लोकप्रियसाहित्यग्रन्थमाला–२०

## मञ्जुनाथग्रन्थावलिः

**( मञ्जुनाथोपाह्वभट्टश्रीमथुरानाथशास्त्रिणां काव्यरचनानां सङ्ग्रहः )**

## द्वितीयभागे

### द्वितीयः खण्डः

# निबन्धा ललितनिबन्धाश्च


प्रधानसम्पादकः

**प्रो. राधावल्लभत्रिपाठी**

कुलपतिः

सम्पादकौ

**देवर्षि–कलानाथशास्त्री**

**डॉ. रमाकान्तपाण्डेयः**



**राष्ट्रियसंस्कृतसंस्थानम्**

मानितविश्वविद्यालयः

नवदेहली

प्रकाशकः
कुलसचिवः
**राष्ट्रियसंस्कृतसंस्थानम्**
५६-५७, इंस्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-११००५८

e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

© राष्ट्रियसंस्कृतसंस्थानम्

ISBN : 978-93-86111-56-2

प्रथम संस्करण : २०१०

मूल्यम् : ₹ 310/-

मुद्रकः
अमर प्रिंटिंग प्रेस, दिल्ली-९
E-mail - amarprintingpress@gmail.com

# पुरोवाक्

संस्कृतभाषा यथा चिरपुरातनी सनातनी तथैव प्रतियुगं पुन:पुनर्जायमाना उषा इव नवविच्छित्तिं नूतनां च छविमाविर्भावयन्ती वरीवर्तते, अभिनवप्रभाभास्वरं प्रभातं विभावयितुं क्षमा इदानीमपि स्वे महिम्नि प्रतिष्ठिता चास्त इति जानन्त्येव सर्वे सुरभारतीसमुपासका:। वस्तुत: आधुनिके काले अपूर्वैव समृद्धिर्दरीदृश्यते संस्कृतरचनाया:। अतश्च विंशशताब्दी संस्कृतसाहित्यस्य कश्चन स्वर्णयुग इति युक्तमुक्तवान् कविवरोऽभिराजराजेन्द्रमिश्र:। साम्प्रतिकेऽस्मिन् समये अस्या भाषाया नवोन्मेष: कामपि अभिख्यां तनोति। नैके प्रौढा विदग्धाश्च उदीयमानास्तरुणास्तेजस्विन: पण्डिता: प्रकटयन्ति शास्त्रवैभवमस्या:, तथा च कवयन्ति पर:शतं सुकवय: निबध्नन्ति च विविधान् ग्रन्थान् अगणिता: साहित्यरचनानदीष्णा: सरस्वत्या: सुपुत्रा अस्यामेव भाषायाम्। परन्तु तेषु परै: क्षुण्णं मार्गं परिहृत्य अक्षुण्णमध्वानं श्रयन्त: स्वयमेव स्वीयं पन्थानं रचयन्तो भवन्ति भव्या अभिनवभावजगन्निर्माणनदीष्णा विरला एव, येषां कृतित्वेन–

**अन्धास्ते कवयो येषां पन्था: क्षुण्ण: परैर्भवेत्।**
**परेषां तु यदाक्रान्त: पन्थास्ते कविकुञ्जरा:।।**

(गङ्गावतरणमहाकाव्ये १.७७)

इति सुकवेर्नीलकण्ठदीक्षितस्य वचनं चरितार्थतां याति।

एतादृशेष्वपि विरलसाहित्यकारेषु सम्पूर्णे युगे कश्चन एक एव स्यात् युगप्रवर्तको भविष्यद्रष्टा, स्रष्टा नूतनविधानाम् आविष्कर्ता चाकृष्टक्षेत्राणां, कर्ता च नवोन्मेष-संवलितरचनावचनावलीनाम्। एतादृशा एव साहित्यकारा आसन् भट्टश्रीमथुरानाथशास्त्रिण: मञ्जुनाथापरनामान:। नवीना: परिकल्पना: नवीनविषयवस्तूनामवतारो नवनवविधानां चैदम्प्राथम्येन संस्कृतसाहित्ये प्रचार: इति एतेषामेव स्पृहणीयं कार्मण्यमभवत्। एते तर्केषु कर्कशधियो वयमेव नान्ये काव्येषु कोमलधियो वयमेव नान्य इति प्राचीनानां वच: क्वचित् प्रमाणीकुर्वन्ति, क्वचिच्च–

**कश्चिद् वाचो रचयितुमलं श्रोतुमेवापरस्तां**
**कल्याणी ते मतिरुभयथा विस्मयं नस्तनोति।**
**नह्येकस्मिन् भवति सुभग: सन्निपातो गुणानां**
**एक: सूते कनकमुपलं तत्परीक्षाक्षमोऽन्य:।।**

इति वा कालिदासोक्तिं स्मारयन्ति।

एते भट्टमथुरानाथशास्त्रिण: घनाक्षरी-कवित्त-सवैया-दोहा-सोरठादि-व्रजभाषाच्छन्दांसि संस्कृतकाव्यधारासु साधु स्नपयामासु:। उपन्यास-नभोवाणीरूपक-ललितनिबन्ध-यात्रावृत्त-प्रभृतिनूत्नविधासु ऐदम्प्राथम्येनासाधारणनैपुण्यप्रभवा एतेषां लेखनी

निबबन्ध नैकान् निबन्धान्। संस्कृतगजलगीतेः परिष्कृतं स्वरूपमेते स्थिरीचक्रुः। अस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे द्वित्रान् विहाय केनचिदेकेन साहित्यकारेण एतावतीषु विधासु समं दक्षतया रचनापाटवं प्रतिभाप्रागल्भ्यं च न प्रकटीकृतं स्यात्। वाल्मीकि-व्यास-कालिदासादीनामिव अतितरां विस्तृतं तेषां कृतित्वम्।

अथैतेषां युगप्रवर्तकमहाकवीनां साहित्यं सम्प्रति सुदुर्लभं जातमिति राष्ट्रियसंस्कृत-संस्थानेन तस्य पुनः प्रकाशनमुपक्रान्तम्। अस्मिन् क्रमे मञ्जुनाथग्रन्थावल्याः प्रथमो भागः पूर्वं प्रकाशितोऽभवत्। यत्र द्वयोः खण्डयोः भट्टकवीनां जयपुरवैभवम्, गोविन्दवैभवम् साहित्यवैभवं चेति त्रीणि काव्यसङ्कलनानि प्राकाश्यतां नीतान्यभवन्। तत्रापि प्रथमभागस्य प्रथमे खण्डे जयपुरवैभवम्, गोविन्दवैभवं च विलसतः। जयपुरवैभवं नाम काव्यं भट्टश्रीमथुनाराथशास्त्रिणां १९४७ तमे क्रिस्त्वब्दे जयपुरादेव प्रकाशितम्। विविधछन्दोभङ्गीभिर्जयपुरनगरस्यानुपमा छटात्र कविना विशदं निरूपिता। अत्र परिस्फुरति जयपुरनगरस्यैतिह्यम्, देदीप्यते नगरसंस्कृतिः, पुरपरिसरस्य नयनाभिरामा शोभा चात्र भाविकालङ्कारविन्यासविशेषमनोहारिणी जायते। भाविकालङ्कारस्वरूपं च भामहदण्डिनिरूपितमित्थम्-

**तद् भाविकमिति प्राहुः प्रबन्धविषयं गुणम्।**
**प्रत्यक्षा इव दृश्यन्ते यत्रार्था भूतभाविनः।।**
**चित्रोदात्ताद्भुतार्थत्वं कथायाः स्वभिनीतता।**
**शब्दानाकुलता चेति तस्य हेतुं प्रचक्षते।।**

(काव्यालङ्कारे ३/५३, ५४)

**भावः कवेरभिप्रायः काव्येष्वासिद्धिसंस्थितः।**
**परस्परोपकारित्वं सर्वेषां वस्तुपर्वणाम्।**
**विशेषणानां व्यर्थानामक्रिया स्थानवर्णना।**
**व्यक्तिरुक्तिक्रमबलाद् गम्भीरस्यापि वस्तुनः।**
**भावायत्तमिदं सर्वमिति तद् भाविकं विदुः।**

(काव्यादर्शे, २।३६४-६५)

रुय्यकस्तु- न केवलं कवेरपितु सहृदयस्यापि अतीतानागतानां प्रसङ्गानां हस्तामलकवत् साक्षात्कारं भाविकेऽपेक्षितं मनुते। युक्तमुक्तवान् कुवलयानन्दव्याख्यायाम् आशाधरभट्टः- भावाय साक्षात्काराय प्रभवतीति भाविकम्। भाविकालङ्काररचनायां कविरीश्वरभावेऽवस्थितो रचयतीति युक्तमुक्तवान् विमर्शिन्यां जयरथः। एतादृशेन 'चिरनिवृत्तमप्येतत् प्रत्यक्षमिव दर्शितमि'त्यादिकविवचःस्मारकेन भाविकालङ्कारस्य सटीकं प्रयोगेण महीयते जयपुरवैभवम्। काव्यास्यास्य भट्टश्रीमथुरानाथशास्त्रिभिर्ब्रजभाषाच्छन्दोनिबद्धं शीर्षकमपि निरदेशीत्यपरोऽपि विशेषस्तेषां काव्यसंसारस्य, यथा-

**छन्दोमयगुञ्जे 'मञ्जुकवितानिकुञ्जे' चारु-**
**चित्रयुतं 'जयपुरवैभवम्' इदं बुधेन,**
**जयपुरभूमिपतिपरम्परापूज्यमान-**
**श्रीकृष्णाभिधानकविकलानिधिवंशजेन**
**देवर्ष्यवटङ्कधरतैलङ्गान्वयाभिजात-**
**काव्यकलाख्यात-मञ्जुनाथपरनामकेन**
**साहित्याचार्यभट्टश्रीमन्मथुरानाथकवि-**
**शास्त्रिणा कृतं प्रकाशितं च जयपुरात्तेन।। १ ।।**

गोविन्दवैभवं च भट्टवर्याणां भक्तिभावमयी रचना। वैभवकाव्यमालायामिदं तेषामन्तिमः पुष्पहारो यत्र तेषां प्रज्ञा भक्तिभावे परिणमति।

प्रथमभागस्य तृतीये खण्डे भट्टमहोदयैः प्रणीता हालकृतगाथासप्तशत्याः समच्छन्दोऽनुवादरूपा संस्कृतगाथासप्तशती व्यङ्ग्यसर्वङ्कषाख्यटीकया सह प्रकाशिताऽभवत्। एतेषु त्रिषु खण्डेषु भट्टकवीनां यथोपलब्धानि पद्यात्मकानि सर्वाण्यपि काव्यानि प्रकाशितान्यभवन्।

द्वितीयो भागोऽयं भट्टमहाभागानां गद्यकृतीनां प्रकाशनार्थं कल्पितो वर्तते। तत्रापि द्वितीयभागस्य प्रथमे खण्डे भट्टमहाभागानां त्रय उपन्यासग्रन्थाः षष्टिप्रायाः कथाश्च प्रकाशिताः। इयं हि कथाविधा हिन्द्यां 'कहानी' आङ्ग्लभाषायां च 'शॉर्ट स्टोरी' इति पदेन व्यपदिश्यते। भट्टमहाभागा नूनम् अस्या नवविधाया उन्नायकेषु सन्ति। संस्कृतरत्नाकरप्रभृतिपत्रिकासु प्रकाशिता एताः कथाः सामग्र्येण इदम्प्रथमतया ग्रन्थावल्यामस्यां प्रकाशिता भवन्ति। अत्र काश्चन अप्रकाशितपूर्वा अपि कथाः सन्ति सङ्कलिताः, यथा हृदयव्रणः यथा वा जीविते ममता।

कथास्वेतासु भट्टमहोदयानां गद्यरचनाचातुर्यं सामाजिकपरिवेशादिचित्रणवैशिष्ट्यं द्रष्टुं शक्नुवन्ति सुधियः सहृदयाः। संस्कृते कस्यापि कथाकारस्य एतावती कथासम्पत्तिरेकस्मिन् संस्करणे नैव प्रकाशिता स्यादिति संस्कृतगद्यसाहित्ये खण्डस्यास्य वैशिष्ट्यं स्वीकरिष्यन्त्येव सुधियः सहृदयाः।

द्वितीयभागस्य द्वितीयेऽस्मिन् खण्डे भट्टमथुरानाथशास्त्रिणां निबन्धा ललितनिबन्धाश्च केचन प्रकाशतां प्राप्नुवन्ति। एतेषु ''भारतवैभवम्'' अप्रकाशितपूर्वं विद्यते तथैव केचन अन्येऽपि अप्रकाशितपूर्वा निबन्धा इह प्रथमतया प्रकाशिता भवन्ति।

इयं ग्रन्थावलिः विद्वद्धौरेयाणां कवितल्लजानां विविधभाषानिपुणानां कलामर्मज्ञानां कलानाथशास्त्रिणां सुचिन्तितैः भूमिकावचोभिर्विभूषितेति सविशेषं परितोषमनुभवामः। देवर्षिकलानाथशास्त्रिणश्च स्वनामधन्यानां प्रातःस्मरणीयानां भट्टमथुरानाथशास्त्रिणां सुयोग्यास्तनयाः, यान् दर्शं दर्शम्-

**'न कारणात् स्वाद् बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात्'**

इति महाकविकालिदासवचसोऽसकृत् स्मरामः। अथ च सुयोग्यः युवाऽपि

प्रौढपाण्डित्यवैभवमण्डितः पण्डितः श्रीरमाकान्तपाण्डेयो ग्रन्थावल्या अस्या सम्पादने एतेषां सुकविवर्याणां कलानाथशास्त्रिणां साहाय्यमाचरत्। वस्तुतः अपारं मञ्जुनाथसाहित्यमधिकृत्य सत्यमेव रमाकान्तपाण्डेयोऽप्रतिमां विशेषज्ञतां गाहते, यतो बहोः कालात् पूर्वमयं मञ्जुनाथवाग्वैभवे स्वकीयं दीक्षाचणत्वं प्रकटीचकार भट्टमथुरानाथशास्त्रिवर्यमधिकृत्य अखिलभारतीयसङ्गोष्ठ्या आयोजनेन, तत्सामग्र्याः सम्पादनप्रकाशनेन तथा च मञ्जुनाथगद्यगौरवमिति स्वसम्पादिते ग्रन्थे तेषामेव श्रीमद्भट्टमथुरानाथशास्त्रिणामप्राप्त-दुर्लभगद्यरचनानामाविष्कारपुरस्सरं सम्पादनेन च।

एतस्या मञ्जुनाथग्रन्थावल्याः प्रकाशनम् अमुष्मिन् नवीने सहस्राब्दे संस्कृत-साहित्यजगतः काचन अनितरसाधारणी घटना वरीवर्तीति न संशीतिः। भट्टमथुरानाथशास्त्रिवर्यैः संस्कृतस्य नवोऽभ्युदयकाल आयानवलोकितोऽलौकिकेन चक्षुषा। प्रकाशनमिदं संस्कृतसाहित्यरचनाक्षेत्रे सम्भावनानां नवद्वारमपावृणुयादित्याशास्महे।

**राधावल्लभः त्रिपाठी**
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम

# मञ्जुनाथप्रशस्तयः

अन्तः सद्रससम्भृतातिमधुरद्राक्षासदृक्षाक्षरः
स्फूर्जत्प्रौढतमार्थगौरवधरः शृङ्गारितः स्वैर्गुणैः।
श्रीमान्काव्यनिकुञ्ज एष स मनोहारी निगुम्फोऽद्भुत-
स्तुल्यो यस्य नवीनरीतिललितो नाद्यावधि प्रेक्षितः।।

(भट्टश्रीनन्दकिशोरशास्त्रिणः)

नृत्यत्प्रायपदध्वानेऽवधानं यच्छतो मम।
विनैवार्थानुसन्धानमुदिता कापि निर्वृतिः।।
मञ्जुनाथः कविर्नूनं प्रशस्योऽमृतमञ्जुवाक्।
चिरं जयतु चेतांसि रञ्जयन् सरसात्मनाम्।।

(सरस्वतीभवनाध्यक्षस्य खिस्तेनारायणशास्त्रिणः)

रम्यः कश्चित् सुगन्धो विलसति नगरे पाटलाभेऽविरामो
नाऽयं पुष्पाटवीतः प्रभवति विपणेर्नाऽप्ययं गान्धिकानाम्।
वाग्देवी-सौधदीपोज्ज्वलन-नव-नव-प्रातिभद्रव्ययुक्तेः
कीर्तेरेषोऽनुभावोऽप्रतिमकविपतेर्मञ्जुनाथस्य नूनम्।।

(आचार्यगोविन्दचन्द्रपाण्डेयस्य)

# सम्पादकीयं निवेदनम्

अस्माकमुपास्या सेयं गीर्वाणगिरा यावती पुरातनी भाषाऽस्ति, तावत्येव नवीना। सहस्राब्दीनामनेकासां कालो व्यतियातो यदवधि साहित्यसर्जनमस्यां विधीयमानमस्तीति यावान् पुरातनोऽस्या इतिहासो विख्यायते, तावत्येव नूतनताऽप्यस्यामस्ति, चिरयौवनवती सेयं भाषेति विद्म एव वयम्। अत एव वेदकालीनाया ऋषिकाया लोपामुद्राया उष:सूक्तानुसारं यथा सेयमुषा: ''पुराणी युवति'' रित्याख्यायते स्म (पुराणी देवि युवति: पुरन्धि्र:), तथैव संस्कृत-भाषाऽपि पुराणी युवतिरस्तीति सर्वदा सहर्षमुल्लिखामो वयम्। अत एव प्रतियुगं नूतनं साहित्यमस्यां सृज्यमानमवलोकयितुं शक्यते। भास-कालिदासादीनारभ्य वर्तमानयुगीन-कविकथाकारादिपर्यन्तं काव्य-नाटक-कथोपन्यासादिसाहित्यं यद्द्यत्वे ''सर्जनात्मक-साहित्या''भिधानेनोल्लिख्यते, निरन्तरमस्यामवतार्यमाणमस्त्येव। एतस्य परिधौ, विधाविशेषेषु च विस्तार एव संजायते, न नैयून्यम्।

एकोनविंश्या: शताब्द्या अवसानस्य, विंश्या: शताब्द्या: प्रारम्भस्य च कश्चन कालखण्डो निर्विवादं पुनर्जागरणयुगत्वेन भारतीय-साहित्येतिहासेऽपि समभिधीयते, भारतीय-समाजेऽपि। मुद्राणालयानां प्रसारेण, पुस्तकानां, पत्र-पत्रिकाणां च विस्तारेण संस्कृतभाषाया इतिहासेऽपि नवजागरणयुगमिदमासीदिति सर्वे वयं मन्यामहे। तदैव भारते विश्वविद्यालयशिक्षा प्रसारमाप, तत्र च संस्कृतभाषाया महत्त्वं सविशेषमाख्यापितमाङ्गल-शासकैरपि, संस्कृत-साहित्यस्याभिज्ञानशाकुन्तलप्रभृति नवनीतं पाश्चात्यभाषास्वनूद्य यदवधि प्रासारि विलियम-जोन्सप्रभृतिभिराङ्ग्लै:, शार्मण्यदेशीयैश्चाऽपि, तदवधि संस्कृतं विश्वजनीनत्वेन महत्त्वम-धादित्यपि मन्यामहे वयम्। तदानीं खलु विश्वविद्यालयेषु संस्कृतस्याध्ययनाध्यापनादि सविशेषं प्रासरत्। तादृशस्याध्यापनस्य, परीक्षाणां च माध्यमं त्वभूदाङ्ग्लभाषैव। तदानीं खलु भारतीये संस्कृताध्येतृसमाजे धाराद्वयं प्राचलत्।

एका धाराऽभूत्तादृशानां विश्वविद्यालयादिवरिष्ठशिक्षासंस्थानेषु समधितस्थुषां विदुषां येष्वाङ्ग्ला वैदेशिकाश्चाऽप्यभूवन्, भारतीया अपि, ये संस्कृतभाषां तत्साहित्यं च क्लासिकल (श्रेण्य) वाङ्मयत्वेन गभीरस्य शोधस्यानुसन्धानस्य च विषयं मन्यन्ते स्म, वेदोपनिषत्पुराणा-दीनां, श्रेण्यसाहित्यस्य चानुशीलनं, तदनुवादनं, तदुपरि शोधानुसन्धानादि चाङ्गलभाषायां, कदाचिच्च वङ्ग-हिन्द्यादिभाषास्वपि क्रियेत, इत्येतदेवाऽऽसीद् भारतीयानां विश्वविद्यालयाना-मुद्देश्यम्। प्राचीन-ग्रीक-लैटिनादिवदियमपि पुरातनी भाषाऽस्ति यस्यां मन्त्रपाठादिकं,

कर्मकाण्डादिकं चानुष्ठीयते, यस्याः प्राचीनं साहित्यं शोधार्थिभिरनुशील्यते, अनुसन्धीयते च। न कश्चिदद्य प्राचीनग्रीकभाषायां लैटिनभाषायां वा काव्यरचनामुपन्यासलेखनं वा कर्तुं कल्पयेदपि। अतः संस्कृतभाषाऽपि क्लासिकलभाषात्वेन ग्रीक-लैटिनादिवदनुसन्धानपात्र-मेवाऽस्तीति मन्वानानां विदुषामभूत्सा धारा।

अन्याऽभूदेका तादृशी धारा यस्या विद्वांसो ''जीविताना'' माधुनिकभाषाणां पङ्क्तौ संस्कृतं परिगणयन्ति स्म, संस्कृते सम्भाषन्ते स्म, कवयन्ति स्म, पत्रलेखनादि कुर्वन्ति स्म, कविसम्मलेनादीनामायोजनं कुर्वन्ति स्म, कथालेखनं, विनोदालापांश्चापि कुर्वन्ति स्म। एतस्यैवाऽभूदयं परिणामो यद् यदा मुद्रणालयानां प्रसारवशात् ''पत्रकारता'' प्रारभ्यत भारतीय-भाषासु, तदा संस्कृतपत्रपत्रिका अपि ''विद्योदय'' सदृश्यः प्राकाश्यन्त (न केवलं पण्डितप-त्रिकासदृश्यः) या अवलोक्य चित्रीयन्ते स्म वैदेशिकाः। एवंविधासु पत्रिकासु सर्जनात्मक-साहित्यं विपुलमात्रायां प्रकाशयितुमारेभिरे सम्पादकाः। सहस्रशः संस्कृतसर्जकास्तु विद्यन्ते स्मैव तदानीं देशे।

एतस्यायमभूत् स्वाभाविकः परिणामो यदूनविंश्याः शताब्द्या अन्तिमे चरणे विंश्याः शताब्द्या पूर्वार्धे च सुमहति परिमाणे संस्कृतभाषायां काव्य-नाटक-कथोपन्यास-निबन्धादिकस्य ''सर्जनात्मक''-साहित्यस्य सर्जनमभूद् देशे यस्य प्रकाशनं कदाचित् पूर्वं पत्रिकास्वभूत्, तदनु ग्रन्थाकारेषु, कदाचिच्च ग्रन्थरूप एव तदवततार। पं. अम्बिकादत्तव्यासस्य सुविदित उपन्यासः ''शिवराजविजया''ख्यः पूर्वं क्रमिकरूपेण संस्कृतचन्द्रिकापत्रिकायां प्राकाश्यत, तदनु ग्रन्थरूपेण।

इत्थमस्या नूतनधारायाः प्रयासानां परिणामवशात् संस्कृते जीवन्तीष्वाधुनिकभाषास्विव तादृशं सर्जनात्मकसाहित्यमनवरतमवततार। तत्र च पत्रकारतायाः सर्वाधिकमुल्लेखनीयमवदान-मभूत्। अत एव बहवस्तादृशाः संस्कृतपत्रकाराः प्रादुरभूवन्, ये सुललित-सर्जनात्मक-साहित्यस्य प्रणेतारोऽप्यभवन्, पत्रकारा अपि। तादृशेषु सर्जकेषु सर्वप्रथमुल्लेखनीयोऽस्ति वाङ्गो विद्वत्तल्लजः पं. हृषीकेशभट्टाचार्यो यो हि वङ्गदेशात् सूदूरं पश्चिमोत्तरप्रदेशे लाहौरनगरे विश्वविद्यालयीयशिक्षातंत्रेणाऽऽकारितस्तत्र प्रापत्; ''विद्योदय'' नामकस्य संस्कृतपत्रस्य चाऽऽरम्भमकरोत् यत्र सर्जनात्मकं साहित्यं सुभृशं प्राकाश्यत। सपद्येव तदनु पत्रमिदं वङ्गदेश-मागमत्। अत्र हि भट्टाचार्यैर्ललितकथाललित-निबन्ध-विनोदव्यंग्यादि हृदयावर्जकं साहित्यं प्रकाशयितुमारब्धम्। सेयं धारा संस्कृतचन्द्रिका-संस्कृतरत्नाकरादिविविधपत्ररूपेण सततं प्रावहत्, भूयांसं च साहित्यभाण्डागारमवतारयामास संस्कृते। संस्कृतचन्द्रिकासम्पादकः पं. अप्पाशास्त्री राशिवडेकरोऽपि सर्जनात्मकसाहित्यस्य सुविदितः प्रणेताऽभूत् (महाराष्ट्रीयः), संस्कृतरत्नाकरसम्पादको देवर्षिभट्टमथुरानाथशास्त्री अपि कविशिरोमणिः, कथाकारो,

ललितनिबन्धकारश्चाऽभूत् (राजस्थानीयः)। तदनु "संस्कृतप्रतिभा" (भारतीय साहित्य-अकादम्याः संस्कृतमुखपत्र) सम्पादको डॉ. वेङ्कटराघवन् (दक्षिण भारतीयः) अपि स्वयं नाटककारः कविश्चाऽभूत्, तमेव पन्थानं चानुससार।

सर्जनात्मकसाहित्ये नवजागरणस्य येयं धारा संस्कृते प्रावहत् तत्परिणामस्वरूपमेवाद्यत्वे सुविपुले परिमाणेऽभिनवं संस्कृतसाहित्यमुपलभ्यते यस्येतिहासोऽपि प्रारभ्यताऽभिलेखितुं विद्वद्भिः। स्व. डॉ. बलदेव उपाध्यायानां प्रधानसम्पादकत्वे प्रकाशितस्य "संस्कृत वाङ्मय का बृहत् इतिहास" नामक-ग्रन्थराशेः सप्तमखण्डरूपेण, अन्येषु च ग्रन्थेषु, तादृशं विवरणं प्राप्यते। अतएव तत्राऽऽधुनिक-कालीनस्य संस्कृतसाहित्यस्य यद् युगविभाजनं व्यधीयत, तस्य नामकरणमपि सर्जक-पत्रकार-युगप्रवर्तकत्वेन महतीं भूमिकां निरूढवतां विदुषां नामभिरक्रियत-अप्पाशास्त्री राशिवडेकरयुगम् (१८९०-१९३० ई.) भट्टमथुरानाथशास्त्रियुगम् (१९३०-१९६० ई.), डॉ. राघवन् युगं (१९६०-१९८० ई.) चेत्यादि।

अस्मिन् विपुले नूतन-साहित्यभाण्डागारे नूतनविधानां, नूतन-विषय-शिल्प-शैल्यादीनां चाऽवतारणां विधाय विलिखितं काव्य-कथा-नाटक-निबन्धादिसाहित्यं विस्मयावहां लोकप्रियतामभजत्। तदैव तु विंटरनिट्जादयः शार्मण्यदेशीयाः साहित्येतिहासकारास्तदिदं कथयितुं विवशा अभूवन् यत् संस्कृतसदृशी प्राचीना, क्लासिकलभाषा एतादृशीं जीवन-शक्तिं धारयतीति कः खलु विश्वसेद् यदस्यां पत्रपत्रिकाः प्रकाश्यन्ते, कवि-सम्मलेनानि भवन्ति, सजीवं नूतन-साहित्यं च निर्मीयते।

अनेनैव नूतनसाहित्येन संस्कृतगिरं केवलं पुस्तकस्थां, क्लासिकलभाषां, शोधपात्रीभूतां भाषां, मृतभाषां वा व्यपदिशतां पाश्चात्यमतानुवर्तिनां मुखमुद्रणं कृतमभूत्। अत एव तदानीं पं. हृषीकेशभट्टाचार्यस्य "उद्भिज्जपरिषद्" इत्यादीन् निबन्धान् "आत्मवायोरुद्गार" इत्यादि-विनोदगर्भा आत्मवृत्तादिविधाश्च लोकप्रिया अनुभूय प्रसेधितान्यभूवन्नेतादृशानि पद्यानि-

**मुद्रयति वदनविवरं मृतभाषावादिनां मुहेराणाम्।**
**स्मरयति च भट्टबाणं भट्टाचार्यस्य सा वाणी।।**

(मुहेरो मूर्खः)

तादृशं सर्जनात्मकं साहित्यमद्यावधि विपुले परिमाणे सृज्यते, प्रकाश्यते, समीक्ष्यते, समाद्रियते, पुरस्क्रियते च साहित्य अकादमी-संस्कृत अकादमी प्रभृतिभिः संस्थाभिरिति सुमहत् सौभाग्यमस्माकममरभाषासेवकानाम्। अद्यापि भारतीयेषु बहुसंकायीयेषु विश्वविद्यालयेषु मानविकी-संकायान्तर्गतः संस्कृतविभागोऽपि विद्यते यत्र संस्कृतस्य वाङ्मयम्, अर्थात् प्राचीनं वरेण्यसाहित्यं वेदोपनिषन्महाकाव्यनाटकादिरूपं पाठ्यते, तदुपर्यनुसन्धानकार्यं क्रियते, पीएच. डी. इत्यादय उपाधयः प्रदीयन्ते। एवंविधस्य शिक्षणस्य,

परीक्षणस्य, लेखनस्य च माध्यमरूपेण हिन्दीभाषा, आङ्ग्लभाषा, अन्याश्च भारतीया भाषा उपयुज्यन्ते प्रायशः। संस्कृतमाध्यमेन तत्राल्पीय एव कार्यं भवति, न वा भवति। अपरतस्तु गताया विंश्याः शताब्द्या उत्तरार्धे प्रवृत्तायाः संस्कृतविश्वविद्यालयस्थापनपरम्परायाः कारणात् संस्कृतस्यैव विविधविषयाणाम–नुशीलनाय संस्थापितानां विश्वविद्यालयानां शिक्षणपरीक्षण–लेखनादिकार्येषु संस्कृतभाषैव माध्यमत्वं बिभर्ति।

द्वयोरपि विश्वविद्यालयप्रकारयोरनयोः पाठ्यक्रमेषु यत् ''साहित्यं'' साहित्यविषय–मङ्गीकृतवत्सु छात्रेषु पाठ्यते, तत्र कालिदासादयः प्राचीना महाकवयः, जगन्नाथपण्डितराजादयो मध्यकालीना विद्वांसो वा पाठ्यक्रमेषु निर्धार्यन्ते, नवयुगीना अर्वाचीनाः साहित्यसर्जकाः प्रायशः पाठ्यक्रमेषु नावतरन्ति स्म कतिपयदशकेभ्यः पूर्वम्। वाराणस्यादिनगरीयैः पाठ्यक्रमनिर्धारकैः कृपापूर्वकमर्वाचीनेषु साहित्यकारेषु दयमानैः केवलमम्बिकादत्तव्यासोपरि कृपा कृताऽभूद् यत्तस्य ''शिवराजविजया''ख्य उपन्यासः पाठ्यक्रमे निरधार्यत। नापरः साहित्यकारः प्रवेशमलभत बहोः कालात्। इत्थं केवलं क्लासिकल–साहित्यपाठनस्य परिणतिरियमभूद् यत्तादृशः स्नातकः शास्त्रीयान् विषयान् संस्कृते वक्तुं, लेखितुं चावश्यं प्रभवति किन्त्वाधुनिके युगे यादृशं जीवनं प्रवर्तते, या घटना घटन्ते, तासां वर्णनं कर्तुं संस्कृते न प्रभवति। कथं क्षमेत स तथा कर्तुम्?

''बाष्पयान (रेल) विश्रमस्थले (स्टेशन) यदा चिटिका (टिकिट) क्रयणायाहं गतोऽभूवं तदा मम पटपुटकं छिन्नम् (जेब कट गई)'' इत्यादिवास्तविकवृत्तस्य लेखनं यदि संस्कृते करणीयं स्यात् तदा वराकः साहित्याचार्यपरीक्षोत्तीर्णोऽपि कथं प्रभवेत्? रेल–स्टेशन–टिकिट इत्यादीनि प्रमेयानि शिवराजविजये तु न सन्ति, न कालिदासे, न बाणभट्टे। कुत्र लभेत स तत्कृते शब्दराशिम्? अतस्तादृशीष्वभिव्यक्तिष्वपि छात्राणां बुद्धिः प्रसरेदित्येतदर्थं बहुभिर्विवेकिभिर्विश्वविद्यालयैराधुनिकसाहित्यान्तर्गतानि पुस्तकान्यपि पाठ्यक्रमेषु विनिर्धारितानि यत्राधुनिकाः शब्दाः प्राप्येरन्। एवंविधेषु विश्वविद्यालयेषु दयालबाग आगरा–प्रभृतयोऽप्यभूवन्, राजस्थानीया विश्वविद्यालया अप्यभूवन्। बहुभिस्तु पुराणपथपथिकैः पाठ्यक्रमनिर्धारकैरेवंविधस्य नूतनयुगीनविकासस्यावश्यकतैव नानुभूता स्यादिति तु कथान्तरम्।

किन्तु तदिदं तु स्पष्टतया सर्वैरनुभूयेतैव यदद्य यदि द्वितीयधारानुरूपं संस्कृतभाषा ''जीविता'', आधुनिकी, प्रयुज्यमाना च भाषा साधयितुमिष्यतेऽस्माभिस्तर्हि वर्तमानयुगीनानां सर्वविधानामभिव्यक्तीनामवतारणा संस्कृते करणीया स्यात्। संस्कृते जीवनानुभवान् अभिव्य–ञ्जयितुमस्माकं छात्रा अपि समर्थीकरणीयाः स्युः। तदर्थमाधुनिकं संस्कृतसाहित्यमेवैकमात्रं साधनं भवितुमर्हति, नान्यः पन्था विद्यतेऽयनाय। अत एव नूतनं साहित्यं संस्कृते सृज्येत इत्यप्यावश्यकं, तत् प्रकाश्येत इत्यप्यावश्यकं, तस्य निर्धारणं पाठ्यक्रमेषु क्रियेत, इत्यप्यावश्यकम्।

सुमहत् सौभाग्यमस्माकं यदेवंविधा अपेक्षाः प्रति किञ्चिदवधानं वरिष्ठैः प्रशासकैः, शिक्षाशास्त्रिभिश्च प्रदातुमारब्धमस्ति। नूतनसाहित्यसर्जनं प्रोत्साह्यत इति तु सूचितचरमेवोपरि–

तनासु पंक्तिषु, बहुत्र पाठ्यक्रमेष्वपि नूतनसाहित्यं निर्धार्यते। नूतनसाहित्यसमीक्षणाय ''दृक्'' सदृश्यः पत्रिका अपि प्रकाश्यन्ते, ग्रन्थप्रकाशनमपि प्रोत्साह्यते। तादृशेषूपक्रमेषु भारतसर्वकारीयं राष्ट्रियसंस्कृतसंस्थानं यद्धि शासनस्य सर्वतः प्रमुखं संस्थानमस्ति, विपुलं समर्थनं वित्तीय-साहाय्यादिकं च प्रददातीति सुतरां हर्षावहम्। अनेन संस्थानेन नूतनसाहित्यप्रकाशनस्य तदर्थं वित्तीयानुदानस्य, तत्समीक्षणस्य, विविधभाषासु सृष्टस्योत्कृष्टस्य साहित्यस्यानुवादानां प्रवर्तनस्यापि च कार्यक्रमाः परिचाल्यन्त इत्यपि प्रमोदावहम्।

संस्थानस्यास्य कुलपतिभिः, डॉ. राधावल्लभत्रिपाठिभिः स्वयं नूतनसाहित्यसर्जनलब्धयशस्कैर्यदवधि कार्यभारोऽस्य गृहीतस्तदवधि तैः कतिपये तादृशा उपक्रमा अपि प्रारभ्यन्त यैः संस्कृते नवयुगीनविकासस्योपबृंहणं प्रतिफलितं दृश्येत। तादृशेष्वेवोपक्रमेष्वेकतमोऽस्ति संस्कृतस्यार्वाचीनानां साहित्यकाराणां समग्र-ग्रन्थमालायाः प्रकाशनम्। लोकप्रियग्रन्थमालानाम्ना तादृशानां साहित्यसर्जकाणां समस्तानां कृतीनां ग्रन्थरूपेणावतारणं महदुपयोगि स्याद् यैः प्रभूते परिमाणे विविधासु विधासु संस्कृते सर्जनात्मकं साहित्यमवतार्य संस्कृतं जीविता भाषा ख्यापिताऽभूत्, नवजागरणस्य स शङ्खनादः कृतोऽभूद् यस्य विवरणं मया गतेषु प्रघट्टकेषु प्रस्तुतमस्ति।

एवंविधा एव साहित्यसर्जका अभूवन् मम पितृचरणाः कविशिरोमणि-देवर्षि-भट्टश्रीमथुरानाथशास्त्रिपादाः यैः संस्कृतकाव्यसर्जनायां नूतनच्छन्दसां, नूतनशैलीनां, नूतनकथ्यानां चाऽवतारणा कृताऽभूत्, गजलगीतिरचनायाः प्रवर्तनं कृतमभूत्, ललितनिबन्धा जनिता अभूवन्, कथासर्जनस्य नैका विधाः प्रावर्त्यन्त, विनोदोक्तीनां प्रकाशनं प्रारब्धमभूत्, ग्रन्थसमीक्षणं प्रवर्तितमभूत्, संस्कृतपत्रकारतायां नूतनं युगमानायितमभूत् ''संस्कृतरत्नाकर''-''भारती'' प्रभृतिपत्राणां सम्पादनद्वारा। तेषां संस्कृते साहित्यसृष्टिर्लक्षाधिकेषु पृष्ठेषु प्रसृताऽस्ति। तेषां बहवो ग्रन्थाः प्राक् प्रकाशिता अद्य सुदुर्लभाः। तत्सम्पादितपत्रिकादीनां प्राप्तिरप्यद्य कठिना। तेषां लोकप्रियाणां सर्जनात्मक-साहित्यकृतीनामवतारणा ग्रन्थमालारूपेण क्रियेतेति संस्थानस्य शुभसङ्कल्पो यदा मह्यमसूच्यत, सुमहान् सन्तोषः ''सार्थकता''-बोधश्च कश्चिदुदियाय मन्मनसि। पद्ये, गद्ये (कथोपन्यासादिषु) च तेषां सर्जनस्यास्ति विपुलं परिमाणम्। तत्सूचना भूमिकाभागे प्राप्येत पाठकैः। अतः क्रमिकरूपेण विभिन्नेषु भागेषु प्रकाश्यते सेयं ग्रन्थमाला।

प्रथमे पद्यखण्डे तेषां मञ्जुकवितानिकुञ्जाख्यः काव्यसन्दोहः प्रकाश्यते यत्र प्रामुख्येण नूतनेषु शिल्पप्रकारेषु, छन्दःसु, गीतिषु च निबद्धा काव्यरचना परिदृश्येत पाठकैः। विंश्याः शताब्द्या आरम्भेऽपि समस्ते देशे व्रजभाषाच्छन्दःसु प्रणीयमाना सा काव्यरचना लोककण्ठहारत्वमाप्ताऽभूद् यादृशी काव्यपरम्परा तुलसीदासस्य कवितायां, विहारिणो दोहाच्छन्दःसु देव-भूषण-ठाकुर-रत्नाकरादीनां कवित्तच्छन्दःसु च निभाल्यते स्म। व्रजभाषा खलु तदानीमखिलेऽपि देशे काव्यभाषात्वेन प्रतिष्ठिताऽभूत्। केरलीया अपि व्रजभाषायां कवयन्ते स्म। तत्रापि घनाक्षरीत्याख्यायमानं दण्डकं लोकप्रियमभूत्। अत एव कवित्त नाम्ना (कवित्व-

प्रतीकत्वेन) तस्य ख्यातिर्व्यजृम्भतेति लेखकीयायां भूमिकायां सविस्तरं स्पष्टीकृतमस्ति। तदानीमेव देशे उर्दूभाषाऽपि सुप्रतिष्ठिताऽभूत्, तस्याश्च गजल-नामा गीतिप्रकारः सुतरां लोकप्रियोऽभूत्। सर्वेष्वेतेषुछन्दःसु विविधा काव्यरचना भट्टश्रीमथुरानाथशास्त्रिभिर्व्यधीयत।

अस्यां हि शिल्प-विधास्वमूषु तैः सर्वविधाः काव्यविषया न्यबध्यन्त। ऋतुवर्णन-नायिका-भेद-नवरसनिबन्धनादिपरम्पराऽपि तैरनुसृता, नवसभ्यतायाः, नूतनयन्त्राणां चापि वर्णनेन नूतनतां प्रति स्वाभिप्रायः प्रकटीकृतः। तदानीं हि कवितायां कुत्रचन कविनामसङ्केतोऽपि सूच्येतेति परम्परा सुप्रचलिताऽभूत्। व्रजभाषायामेवंविधा नामसूचना भनत इति व्यपदिश्यते स्म, यथा सूरदास तुलसी इत्यादि सङ्केतस्तेषां पद्येषु द्रष्टुं शक्योऽद्यापि तथैव कविनाम प्रतिपद्यं सूच्येत इत्येतदर्थं भट्टपादैः स्वकीयं काव्यनाम मञ्जुनाथ इति स्वीकृतमासीत्। ततो मञ्जुकवितानिकुञ्ज इति काव्यमालाया नामापि तैर्निर्धारितम्। प्रतिपद्यं कवित्तच्छन्दसस्तृतीयचरणे मञ्जुनाथ इति नामसूचनाऽपि प्राचां पद्धतिमनुसृत्य गुम्फिता। सा विलोक्येत पाठकैर्ग्रन्थामलायाम-स्याम्। कवित्तच्छन्दसि चरणचतुष्टयमवश्यं भवति, प्रतिचरणमन्त्यानुप्रासोऽपि भवति किन्तु वाक्यपूर्तिर्द्वितीयेन चतुर्थेन च चरणेन मन्यते। अतः प्रथमचरणानन्तरं तृतीयचरणानन्तरं च न किञ्चित् विरामचिह्नं दृश्येत, वाक्यपूर्तेरभावात्। तदनुसार्येव मुद्रणमत्र दृश्येत पाठकैः।

प्रथमतः साहित्यवैभवाख्यं काव्यसङ्कलनं 1930 ई. वत्सरे मुम्बईस्थ- निर्णयसागर-प्रेसतो मुद्रापयित्वा तैः प्राकाश्यत यत्र आगराविश्वविद्यालयकुलसचिवस्य पं. श्यामसुन्दरशर्मणः प्रयाग- विश्वविद्यालयकुलपतेः डॉ. गङ्गानाथझामहाभागस्य, काशीहिन्दूविश्वविद्यालयकुलपतेः प्रो. ए. बी. ध्रुवमहाभागस्य, वाराणसेय संस्कृतमहाविद्यालयाध्यक्षस्य डॉ. गोपीनाथकविराजस्य च भूमिका आङ्गलभाषायां, नाथद्वारविद्याविभागाध्यक्षस्य शीघ्रकविनन्दकिशोरशास्त्रिणः काशीस्थसरस्वतीभवनाध्यक्षस्य पं. नारायणशास्त्रिखिस्ते महोदयस्य च संस्कृते काव्यमयं प्ररोचनाद्वयं स्वकीयया संस्कृतनिबद्धया भूमिकया सह प्राकाश्यन्त। तदानीं हि भारते विद्यानां कलानां च पुनर्जागर्तिः काचन परिदृश्यते स्म, मुम्बईमहानगरी चापि तस्याः केन्द्रभूताऽसीत्, अतस्तत्र एम. धुरन्धरम्हात्रेप्रभृतयश्चित्रकाराः स्वकीयतूलिकानिर्मितैश्चित्रैर्जनमनांसि मोहयन्ति स्म, लक्ष्मीआर्टप्रभृतिभ्यो मुद्रणालयेभ्यश्चित्रगुम्फाः (आल्बम) काव्यबन्धालङ्कृता अपि प्रकाश्यन्ते स्म। भट्टमहाभागास्तादृशीनां कलाकृतीनां गुणग्राहका अप्यभूवन्, ग्राहका अपि। शतशस्तादृशानि सचित्रपुस्तकान्यद्यापि तेषां सङ्ग्रहे शक्यन्ते द्रष्टुम्।

अतस्तैः स्वकीय-संस्कृतकाव्यगुम्फनेन सह बहूनि तादृशानि चित्राण्यपि (प्रायशः एम. धुरन्धरचित्रितानि, तूलिकया, न तु कैमराख्ययन्त्रेण) ऋतुवर्णन-नायिकावर्णनादिभिः सह मुद्रापितानि साहित्यवैभवे। अनेकासां काव्यरचनानां तु प्ररेणैव तादृशैश्चित्रैः प्रत्ताऽभूत्। अतः पद्यैः सह स्वटीकायां चित्रविशेषस्याप्युल्लेखस्तैस्तत्र तत्र कृतः परिदृश्येत पाठकैः। प्रतिपद्यं सेयं टीका स्पष्टावबोधार्थं प्रकाश्यते किन्तु सर्वाणि तानि चित्राणि न शक्यन्ते मुद्रापयितुमिति तानि नाऽत्र विलोक्येरन्।

मञ्जुकवितानिकुञ्जाख्यस्यास्य काव्यसन्दोहस्य प्रथमो भागो ''जयपुरवैभवम्'' शीर्षकं

बिभ्राणः 1947 ई. वर्षे प्राकाश्यत। अत्र हि ''अपरा काशीति'' ख्यातस्य जयपुराख्यनगरस्य काव्यमयं वर्णनं गुम्फितमस्ति। महाकवेरस्य पूर्वजाः श्रीकृष्णभट्टकविकलानिधिप्रभृतयो जयपुरनरेशैः प्रभूतभूसम्पत्समर्पणपुरस्सरमत्रानाय्य ससम्मानं वासिताः। अस्मिन् कुले जयपुर-राजवंशेतिहासस्य काव्ये निबन्धनं शताब्दीभ्यः कविकर्मत्वेनानुवर्तते यतः श्रीकृष्ण-भट्टकविकलानिधिना ''ईश्वरविलासा''ख्ये महाकाव्ये इदम्प्रथमतया जयपुरनगरस्थापनायाः प्रत्यक्षदृष्टं विवरणं समावेशयता जयपुर-राजवंशेतिहासो व्यलेख्यत, स हि अष्टाविंशीं शताब्दीं यावदितिवृत्तं प्रस्तौति। तदनन्तरं व्रजभाषायां तद्वंशजैरितिहासकाव्यान्यलेख्यन्त। अस्यामेव परम्परायां साम्प्रतिकं जयपुरं काव्यशैल्यां वर्णयत् काव्यं प्रणीयेत यत्र जयपुरस्योद्यानानि, दर्शनीयस्थलानि, प्रमुखा महापुरुषा इत्यादयो विषया अपि वर्ण्येरन्निति जयपुरमहाराजस्य मानसिंह (द्वितीय) स्यानुरोधमनुसृत्य संस्कृते विविधेषुच्छन्दस्सु भट्टश्रीमथुरानाथशास्त्रि-भिर्जयपुरवैभवाख्यः काव्यतल्लजः प्राणीयत। अस्य हि विशेषोऽयमेवास्ति यदत्र ऊनविंश्याः शताब्द्या उत्तरार्धे विंश्याश्च पूर्वार्धे जयपुरनगर्यां कथं विकासकार्याणि समजनिषत, के के सामन्ता विद्वांसश्च नगरीमिमां गौरवान्वितां चक्रुरित्यादि ''यथार्थ'' विवरणं समुपलभ्येत पाठकैः शोधार्थिभिश्च।

स्वकीयाया जन्मभूमेर्वृत्तमुपनिबध्य सारस्वतमृणं परिशिशोधयिषता कविशिरोमणिना सोऽयं काव्यसन्दर्भः प्रथम-भागत्वेन मनोनीतोऽभूदतः समग्रस्य मञ्जुकवितानिकुञ्जस्य भूमिकाऽस्मिन्नेव भागे प्राकाश्यत। अत्रैव भारतविश्रुतानां विद्वन्मूर्धन्यानां म. म. पं. गिरिधिर-शर्मचतुर्वेदानां प्रारम्भिकं वक्तव्यमपि प्राकाश्यत। भारतेन विंश्याः शताब्द्याः पूर्वार्धे स्वातन्त्र्यमधिगतम्। राजतन्त्रस्य स्थाने प्रजातन्त्रमस्थाप्यत। तस्य वर्णनमप्यत्र जयपुरवैभवे प्राप्यते। जयपुरवैभवमिदं मञ्जुकवितानिकुञ्जस्य प्रथमः खण्डः, 'साहित्यवैभवं' च द्वितीय इति तेषां हार्दमभूत्। अतो भूमिकाभागो जयपुर- वैभवेन सह प्राकाश्यत।

भट्टपादानामन्तिमं काव्यमासीद् भक्तिकाव्यं ''गोविन्दवैभव'' नामकम्। आजीवनं नरकथामुद्दिश्य सांसारिकान् विषयान् वर्णयन्ति काव्यानि मया व्यरच्यन्त। इत्थं हि नरकथयाऽऽ-विलीकृतां वाणीं नारायणस्मरणेन पावयितुं भगवद्गुणानुवादपरां काव्यरचनां गोविन्दचरणयोः समर्प्य काव्यप्रणयनपरम्परां समापयिष्यामीत्यभिलाषस्तेषां 1957 ई. वर्षे गीताप्रेस (गोरखपुर) तः प्रकाशितेन गोविन्दवैभवकाव्येन सम्पूरितः। अत्र विविधेषु च्छन्दःसु भक्तिकाव्यं गुम्फितमस्ति। एतदनन्तरं तैर्न काऽपि काव्यरचनाऽक्रियत, गद्यप्रणयनमेव स्वःप्रयाणावधि कृतम्।

सर्वेभ्य एतेभ्यः काव्येभ्यः पूर्वं तैः काव्यप्रणयनविनोदविधया हालसङ्कलिताया गाथासप्तशत्याः संस्कृते समच्छन्दोऽनुवादः कृतोऽभूत्। प्राकृतगाथा इमाः सर्वात्मना हृदयावर्जिकाः किन्तु मूलप्राकृतभाषा नैषु दिनेषु सर्वेषां बोधगम्या, पाठकाः खलु गाथानां संस्कृतच्छायामधीत्य तासां रसास्वादनं कुर्वन्ति, छाया सेयं न च्छन्दोबद्धा अतो रसनीया न भवति। सर्वमिदं विचिन्त्य तैर्गाथानामासामार्यासु संस्कृतानुवादो व्यधीयत, सर्वविधं व्यङ्ग्यजातं

विशदयन्ती व्यंग्यसर्वङ्कषाख्या टीकाऽप्यलिख्यत। संस्कृतगाथा-सप्तशती-नाम्ना ग्रन्थोऽयं मूल-प्राकृतगाथा-संस्कृत-छाया-टीकादि-सहितः प्राकाश्यत निर्णयसागर प्रेस (मुम्बई) तः 1933 ई. वर्षे।

ग्रन्थावल्यामस्यां विभिन्नेषु खण्डेषु ये ग्रन्थाः प्रकाश्यन्ते तेषु भट्टमहोदयैर्विलिखिताः संस्कृतटीकाष्टिप्पण्यो वा, ये ग्रन्थावगमे साहाय्यमाचरेयुः, पद्यैः सह प्रकाश्यन्ते। हिन्द्यनुवादोऽपि बहुषु ग्रन्थेषु प्रथमतः सहैव प्राकाश्यत। स नाऽत्र परिगृह्यते। ग्रन्थभूमिकादीनां ते ते भागा ये तदानीन्तनपरिदृश्यं स्पष्टीकुर्युः, त इह प्रकाश्यन्ते। इत्थं प्रायः शताब्दीमे-कामनुव्याप्य, १९०४ ई. तोऽद्यावधि भट्टमहाभागानां या साहित्यरचना ग्रन्थेषु, पत्रपत्रिकासु, रचनासंग्रहेषु वा प्रकाशमभजत् तस्याः संग्रहोऽत्र यथाशक्यं तस्मिन्नेव स्वरूपे समर्प्यते विदुषां प्रसादाय क्रमशः।

एवंविधे संग्रहे 'सम्पूर्णता', सर्वगुणसम्पन्नता च न कथमपि विनिश्चाययितुं शक्या, इति जानन्त्येव सुधियस्तथापि परिशुद्धतायै प्रयतितमस्माभिः। इदमपि स्पष्टं यच्छास्त्रीयमर्यादा-मनुसरद्भिरपि साम्प्रतिकैर्मुद्रकैर्बहुधा परसवर्णस्य स्थानेऽनुस्वारो विवशतयाऽनवधानतया वा मुद्र्यते, मर्षयिष्यन्ति विद्वांसस्तादृशानि स्थलानि। मुद्रणसौविध्यानुरोधादन्यविधमपि 'शैथिल्यं' समयानुरोधाद् विद्वद्भिः पाठकैः क्षंस्यते इत्याशासानैरस्माभिः प्रस्तूयते सङ्ग्रहोऽयम्।

ग्रन्थावल्यामस्यां पद्यमया ग्रन्थाः, कथोपन्यासगद्यादिमयाश्च पृथक् पृथग् भागेषु प्रकाश्यन्ते। मञ्जुकवितानिकुञ्जाख्या काव्यशृङ्खला प्रथमं प्रकाश्यते यस्यां जयपुरवैभवम्, गोविन्दवैभवं चेत्याख्यं काव्यद्वयं कानिचित् मुक्तकानि च प्रथमे खण्डे, साहित्यवैभवाख्यं काव्यसङ्कलनं च द्वितीये खण्डे प्रस्तूयते। तृतीये खण्डे संस्कृतगाथासप्तशती प्रकाश्यते यस्या उल्लेखोऽस्माभिरत्र कृतपूर्वः। अत्र हि हालसंकलितानां प्राकृतगाथानां संस्कृते आर्याछन्दोबद्धं रूपान्तरणं भट्टश्रीमथुरानाथशास्त्रिणा प्रस्तुतं यत् 'समच्छन्दोऽनुवाद' पदेनाऽपि व्यपदिश्यतेऽ-न्यान्यभाषासु। सहैव व्यङ्ग्यसर्वङ्कषाख्या व्याख्यापि प्रकाश्यते, तल्लिखिता विस्तृता भूमिकापि यस्यां प्राकृतगाथानां काव्यसौन्दर्यं तु विवृतमेव,अमरुशतकेन, गोवर्धनकृतयाऽऽर्यासप्तसत्या च सह प्राकृतगाथानां वर्ण्यवस्तुनः कृतिशिल्पस्य च तौलनिकमध्ययनं विशिष्य विहितमस्ति, तदनु व्रजभाषायाः सुप्रथितायां कविवर्यविहारीविरचितायां दोहाच्छन्दोबद्धायां विहारिसप्तसत्यां कथं प्राकृतगाथासप्तसत्याः स्पष्टः प्रभावः परिलक्ष्यते इत्यपि विस्तृत्य विवेचनमस्ति। तौलनिकस्याध्ययनस्य निवेशं कृत्वा सम्पाद्य ग्रन्थस्य सर्वाङ्गीणं विवेचनं प्रस्तुवन्तीनां भूमिकानां परम्परा पाश्चात्यविवेचनप्रथानामांशिकं प्रभावं गृह्णन्ती ऊनविंश्याः शताब्द्या उत्तरार्धे साहित्यपुनर्जागरणयुगे भारते प्रससारेति विदुषां मतम्। तादृशी परम्परा मुम्बईस्थनिर्णयसागर-मुद्रणालयात् प्रकाशितेषु ग्रन्थेष्वपि तदानीं दृष्टिगोचराभूत्। काव्यमालाख्यग्रन्थमालायाः प्रकाशनेषु तदिदं द्रष्टुं शक्यते (यथा म.म.पं. दुर्गाप्रसादद्विवेदसम्पादिते साहित्यदर्पणाख्यग्रन्थे तादृशी भूमिकाऽस्ति)। भाषेतरकृतीनां तौलनिकमध्ययनं क्रोडीकुर्वती विमर्शवहा सेयं संस्कृत-गाथासप्तशतीभूमिका तुलनात्मकाध्ययनगर्भभूमिकानां संस्कृते प्रथममवतरणं मन्यते(1933वर्षे)।

मञ्जुनाथग्रन्थावल्या द्वितीयो भागस्तेषां गद्यरचनानां प्रकाशनार्थं कल्पितोऽस्ति। खण्डस्यास्य प्रथमेऽस्मिन् भागे भट्टमहाभागानां त्रयः उपन्यासग्रन्थाः षष्टिप्राया लघुकथाश्च प्रकाशिताः। कथा एताः शिल्पदृष्ट्या भाषाभावादिदृष्ट्या च कथाकाराणामुपजीव्यभूताः सन्ति। कस्मिंश्चिदप्येकस्मिन् सङ्ग्रहे केनचिदेकेन कविना प्रणीता एतावत्यो कथाः प्रायशो नैवोपलभ्यन्ते। अत्र सङ्गृहीतकथासु काश्चन भृशं प्रशंसिताऽभूवन् सहृदयसमवाये। ता एताः समवाप्य विद्वांसो नूनमनुभविष्यन्ति हर्षप्रकर्षमिति नो विश्वासः। द्वितीयभागस्य द्वितीयेऽस्मिन् खण्डे भट्टमहाभागानां केचन निबन्धा ललितनिबन्धाश्च प्रकाश्यन्ते। संस्कृतसाहित्ये निबन्धलेखनपरम्पराया विकासे भट्टमहाभागानां योगदानं सुप्रसिद्धमेवेत्यलं विस्तरेण।

ग्रन्थावलीप्रकाशनस्य समग्राऽपि परिकल्पना राष्ट्रियसंस्कृतसंस्थानकुलपतीनां स्वयमुत्कृष्टसर्जकानां, दूरदृष्टिं व्यापकं च समीक्षणसामर्थ्यं बिभ्रतां प्रो. राधावल्लभत्रिपाठिनामेव प्रसादः, अतस्ते सर्वात्मना सर्वेषामस्माकं कार्तज्ञ्यं, धन्यवादांश्चार्हन्ति। जयपुरपरिसरे साहित्यविभागोपाचार्येण कर्मठेन विदुषा डॉ. रमाकान्तपाण्डेयेन स्वप्रतिभया श्रमेण च सम्पादनकार्ये सामग्रीसङ्कलने च यत्प्रशस्यं साहाय्यमनुष्ठितं, तत्कृते सस्नेहं शतशो धन्यवादैराशीराशिभिश्चाऽभिनन्द्यतेऽयम्। अस्य खण्डस्य पृष्ठादिसंयोजने सुषमाशर्म-चिरञ्जीविन्या यत्साहाय्यमनुष्ठितं तत्कृते सा साधुवादमर्हति।

अत्र प्रकाशितान् भारतवैभवप्रभृतिनिबन्धान् समवाप्य नूनं हर्षमनुभविष्यति सहृदयलोक इति दृढं विश्वसिति–

**देवर्षि–कलानाथशास्त्री**

-----

# भट्टश्रीमथुरानाथशास्त्रिप्रणीतटीकादिग्रन्थानां परिचयः

साहित्यवैभव-जयपुरवैभव-गोविन्दवैभवादिप्रबन्धप्रणयनप्राप्तप्रथिम्ना भट्टश्रीमथुरानाथशास्त्रिणा यथा साम्प्रतिकसंस्कृतसाहित्यस्य समुल्लासाय विरचिता विविधविधासंवलिताः काव्य-कथा-गीति-गजल-नाट्यादयो ग्रन्थास्तथैव शास्त्रसन्ततेः सातत्यं सारल्येनाविष्कर्तुं प्राचीनकाव्यानां सम्यगर्थावबोधाय च तैः केचन टीकाग्रन्थाः समीक्षाग्रन्थाश्चापि प्रणीता अभवन्। अथेह तेषां ग्रन्थानां वैशिष्ट्यं विज्ञापयितुं क्रमशः संक्षेपेण परिचयः पुरस्क्रियते।

**१. रसगङ्गाधरसरला-**

भारतीयकाव्यशास्त्रे पण्डितराजजगन्नाथेन नव्यन्यायशास्त्रीयपारिभाषिकपद-परिपूर्णपरिष्कारपद्धतिमवलम्ब्य प्रणीतो रसगङ्गाधराख्यः सन्दर्भः सम्प्रत्यपि सुधीसमवाये पाण्डित्यनिकषत्वेन समादृतो वर्तते। अवच्छेदकावच्छिन्न-प्रतियोगिता-अनुयोगिता-विषयता-विषयिताप्रभृतिनव्यन्यायप्रसिद्धपदप्रयोगं समवाप्य साहित्यिका ग्रन्थस्याऽस्याऽध्ययने न तथा समुत्सहन्ते। ग्रन्थेऽस्मिन् भट्टश्रीनागेशप्रणीता मर्मप्रकाशाख्यैव काचन व्याख्या लभ्यते स्म। भट्टमहाभागैः समर्मप्रकाशव्याख्यस्य रसगङ्गाधरस्य स्वीयया सरलाख्यटीकया संवलितं संस्करणं निर्णयसागरमुद्रणालयात् प्रकाशमनायि। सेयं सरला ग्रन्थग्रन्थिभेदने तन्निगूढरहस्योद्बोधने च अध्येतर्णिामुपकारिका। नागेशेनाऽस्या मतभेदोऽपि दृश्यते पदे पदे। निर्णयसागरमुद्रणालयात् गुरुमर्मप्रकाशसनाथितरसगङ्गाधरेण सह सरलायाः प्रकाशनं १९३९ तमे वर्षेऽभूत्। १९४५ वर्षं यावद् ग्रन्थस्याऽस्य षट्संस्करणानि प्रकाशितान्यभवन्निति महत्त्वमस्य स्वयमेव सिद्धम्।

रसगङ्गाधरपरिशीलने सरलाया वैशिष्ट्यं बहुभिः खलु मनीषिभिः पुरस्कृतम्। अथात्र राष्ट्रपतिसम्मानितानां विश्रुतवैदुषीकाणां पण्डितविश्वनाथमिश्रमहोदयानां तद्विषयकं मतमुपस्थाप्यते-

रसगङ्गाधरोपरि वर्तमानासु अनेक व्याख्यासु महाविदुषो नागेशभट्टस्य व्याख्या तथा विद्वद्वरस्य भट्टमथुरानाथशास्त्रिणश्च सरला व्याख्या चेति द्वे व्याख्ये स्तः महत्त्वपूर्णे। अद्यत्वे वर्तमानानां समासां व्याख्यानामाधारभूमिः सरलाव्याख्यैवेति शक्यते वक्तुम्। प्रथमाननेऽल्प-कलेवरापीयं द्वितीयानने वैशद्यमादधाना स्फोरयति रसगङ्गाधरीयं रहस्यं निपुणम्। क्वचिच्च निराकृतं नागेशाभिमतमप्यनया। ग्रन्थोऽयं गभीरतरो विवेच्यविषयाश्चाऽनेके तथापि कतिपयान्येव स्थलानि आनीयन्तेऽत्र विचारपदवीम्।

इदम्प्रथमतया तावद् विचार्यते काव्यलक्षणमेव। पण्डितराजोऽस्ति शब्दपर्याप्तकाव्य-

तावादी। अतएव रमणीयार्थप्रतिपादकः शब्दः काव्यमिति लक्षणयाञ्चकाराऽसौ। अर्थनिष्ठा रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरतारूपा। लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः। लोकोत्तराह्लादस्य कारणञ्च काव्यार्थस्य पुनः पुनरनुसन्धानात्मको भावनाविशेष एव। इत्थञ्च-चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वं काव्यत्वमिति।

लक्षणस्यास्य पदकृत्यं स्पष्टयन् नागेशो लिखति यत् अस्मिन् लक्षणे शब्दपदमपहाय रमणीयार्थप्रतिपादक एव काव्यमित्येव यदि कथितं स्यात् तदा अनुरागस्य व्यञ्जको रमणीकटाक्षोऽपि काव्यत्वं यायात्। लक्षणेऽत्र प्रतिपादकशब्दं त्यक्त्वा यदि वाचकशब्दो लिखितः स्यात् तदाभिधेयार्थस्योपस्थापकस्य वाचकशब्दस्यैव काव्यत्वं स्यात्, अपगतञ्च स्यात् व्यङ्ग्यार्थप्रतिपादकस्य काव्यत्वम्। रमणीयता चार्थगतैवाऽभिप्रेताऽत्र। तेन तत्प्रतिपादकस्यैव शब्दस्य काव्यत्वं न तु रमणीयशब्दनिष्पादकस्य व्याकरणशास्त्रस्यापि काव्यत्वं कथञ्चन। लक्षणमिदं संघटयन्ती सरला वदति-चमत्कारजनिका या भावना तादृशभावनाया विषयीभूतो योऽर्थस्तत्प्रतिपादकः शब्दः काव्यम्। अस्मिन् काव्यलक्षणे ज्ञानपदमपहाय भावनापदनिवेशनमत एव कृतं यत् यस्मिन् कस्मिंश्चित् सरसपद्ये श्रुतिपथमागते सति उद्बोधकान्तरवशात् घटादयोऽप्यर्थाः तत्र परापतन्तश्चेत् तद्वाचका घटादयः शब्दा अपि कथं न भजेरन् काव्यत्वम्? अतो लक्षणे भावनापदनिवेशः। ज्ञाने भासन्तां बाह्यार्थाः किन्तु ज्ञानधारायां भावनायां तेषां भासनं तु नैव संभवति। भावनायामपि बाह्यार्था भासिष्यन्त एवेति चेदाग्रहस्तदा अपहाय प्रथमलक्षणं कृतं द्वितीयं काव्यलक्षणमित्थम् यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वम्। लक्षणमिदं सरलायामेवं स्पष्टीकृतम्- येन यैर्वा शब्दैरुपस्थापितस्य (अर्थात् यादृशानुपूर्वीप्रतिपादितस्य) अर्थस्य भावनया (पुनः पुनरनुसन्धानेन) चेतसि चमत्कारजननं भवति तादृशचमत्कारजनकताया अवच्छेदके तादृशानुपूर्वीमत्वमेव काव्यत्वं भवतीत्याशयः। एवं सति सकलयाऽनुपूर्व्या यत्र चमत्कारो नोत्पद्यते किन्तु धारावाहिकरूपेणान्यदपि (अचमत्कारोऽपि) प्रतीयते तत्स्थलस्य निरासः।

अत्र पण्डितराजः चमत्कारनिष्ठजन्यतानिरूपितजनकतावच्छेदकं भावनात्वं स्वीकुरुते यतो हि काव्यार्थविषयक-पुनःपुनरनुसन्धानात्मिकया भावनयैव चमत्कारो जन्यत इति भावनात्वमेव चमत्कारजनकतावच्छेदकं वाच्यम्, किन्तु सरला तु भवनया चमत्कारजननं स्वीकुर्वत्यपि चमत्कारजनकतावच्छेदकं शब्दानुपूर्वीमत्वमेव स्वीकरोतीति स्पष्टमेवाऽत्र विप्रतिषेधः पण्डितराजेन सह।

वस्तुतः पण्डितराजस्य काव्यलक्षणपरिष्कारे व्याख्यातर्णिां द्विधा प्रवृत्तिः दृश्यते। सन्त्येके शब्दपर्याप्तकाव्यतावादिनः, इतरे च मम्मटानुयायिनो रसचन्द्रिकाकृदादयश्चेति। सरला तु प्रथमपङ्क्तौ तिष्ठति व्याख्याति च पण्डितराजोक्ततत्त्वानि सारल्येन।

एवं रसगङ्गाधरोक्ततत्त्वपरिष्कारे सरलायाः समुपकारस्तु विद्यत एव। इयं क्वचित्

पाठभेदादिसंशोधनेऽपि प्रवर्तत इत्यपरोऽपि विशेषः।

**२. कादम्बरीचषकम्-**

भट्टमहाभागैः कादम्बर्यां निबद्धा चषकेत्याख्या टीका भानुचन्द्रगणि-सिद्धिचन्द्रगणिभ्यां प्रणीतायाः कादम्बरीटीकायाष्टिप्पणीरूपा वर्तते। इयं खलु ग्रन्थ- ग्रन्थिभेदनपुरस्सरं पाठादिसंशोधने तन्निर्धारणे चापि प्रवर्तते। प्राचीनटीकाकाराणां भ्रान्तयोऽप्यत्र महाभागैरेभिः बहुत्र पुरस्कृता दृश्यन्ते।

सर्वप्रथमं टिप्पणीयं भानुचन्द्रगणिसिद्धिचन्द्रगणिभ्यां प्रणीतया टीकया सह मुम्बईनगर-स्थनिर्णयसागरमुद्रणालयात् प्रकाशितोऽभवत्। भट्टमहाभागैः कादम्बर्याः पाठसंशोधने निर्धारणे च संस्करणेऽस्मिन् सुमहान् प्रयासो विहित इति ग्रन्थदर्शनेन ज्ञातुं शक्नुवन्ति सुधियः। ततोऽप्य-धिकं टीकाकर्त्रोः प्रमादसंशोधने प्रयतितं महाभागैरेभिरिति पदे पदे तद्व्याख्यानं दृष्ट्वा ज्ञायते। अथ ग्रन्थस्याऽस्य सम्पादने भट्टमहाभागैः भूमिकायां निर्दिष्टाः केचन अनुभवाः प्रकाश्यन्ते-

श्रीभानुचन्द्रगणि-तच्छिष्यसिद्धचन्द्रगणिमहोदयाभ्यां विरचिता सेयं व्याख्या मोगलसम्राजोऽकबरस्य समये निरमीयत। यतो हीमौ अकबरसम्राजा सभाजिताविति ताभ्यामेव पुष्पिकायां स्वहस्तेन लिखितम्। गुरवे भानुचन्द्रगणिने सम्राजा महोपाध्यायपदमर्पितम्। महाभागेन चानेन 'शत्रुंजय' करो मोचितः। शिष्योऽपि सम्राजा 'षुस्युदमा' इत्युपपदेनालङ्कृतः। सेयं व्याख्या प्रत्येकपदस्य पर्यायप्रकटन एव व्यग्रा, कामं स पर्यायशब्दः 'इन्द्रस्य टीका बिडौजाः' एव किं न भवेत्। एको यः शब्दः पर्यायत्वेनादौ परिगृहीतः, अन्तपर्यन्तमपि स एव पदे पदे व्यवह्रियते। यथा-ग्रन्थे यत्र यत्रापि सुखपदमायातं तत्र तत्र 'सातम्' इत्यनेनैव व्याख्यातं महाभागेन। 'भ्रान्तिः आरेका, जरा विस्रसा, कुवलयं कुवेलम्' इत्यादिरूपेणैव सर्वत्र व्याख्यातवानयम्। पर्यायशब्दनिवेशो हि जिज्ञासूनां सारल्येन बोधनायैव भवति। सरलस्यापि पर्यायपदनिवेशः करणीय एवेति न ब्रह्मवाक्यम्, किन्त्वेतस्योपरि न मनागपि दृष्टिनिक्षेपष्टीकाकर्तुः। स्नानप्रकरणे आगतं 'स्नान' पदं कादम्बरीमारभमाणस्य कृते न वज्रसारं स्यात्, किन्तु स्नानपीठस्य पर्यायपदम् 'आप्लवनचतुष्किकाम्' इत्येव कृत्वाऽयं कृती भवति। कुत्रचित्तु मूलपदं सर्वैर्बोध्यं भवति, टीकाकर्तुर्व्याख्या तु ज्ञातमप्यर्थं भ्रमिचक्रे निपातयति। यथा 'इन्द्रगोपैः (वर्षाकीटैः)' इत्यस्य व्याख्या 'अग्निरजोभिः' इति। कोऽस्यार्थ इति हि विदन्तु विद्वांस एव। 'विन्ध्यः जलबालकः, निगडः अन्दुकः, मदनः जराभीरुः, धूमो दहनकेतनः, जानु नलकीलकः' इत्यादिरूपेण कृता व्याख्या कियते उपकारायेति विमृशन्तु मनीषिण एव।

कुत्रचित्तु व्याख्यापाटवं तथा प्रकाशयति यथा कृतबुद्धिरपि वराको ग्रन्थस्वारस्यं विहाय व्याख्यापदानामर्थबोधायैव व्यग्रो भवति। नगरं 'द्रङ्गम्' इति कृत्वा व्याख्याति। 'लता' पदस्य हि सुप्रसिद्धोऽर्थः। किन्तु टीकाकारस्तदर्थमाह- 'सरलवृक्षः'। अत्र हि तन्नामको वृक्षविशेषः सर्वस्यैव बुद्धिनिष्ठो भवेत्। भूयस्सु स्थलेषु तु टीकाकारस्य व्याख्यामालोक्य क्षमाशीलस्यापि

मानसमुद्वेलं भवति। 'निर्लक्षणा पाण्डुरपृष्ठा', 'दावानलशङ्का वनवह्निव्यापरः', 'वसन्त इव इष्य इव', इत्यादिव्याख्या कस्य क्षोभाय न भवेत्?

काव्ये च साहित्ये च टीकाकारमहोदयस्य कियत्पाण्डित्यमिति त्वग्रे निवेदयिष्यामि, किन्तु पर्यायशब्दान्वेषणे सर्वमपि वैदुष्यमेव निःशेषयतीति तु प्रत्येकमार्मिकस्यैवाऽवगतं भवेत्। 'निष्पतन्तीम्' इत्यस्य टीकां करोति 'अधःसंयोगफलिकां क्रियां कुर्वन्तीम्'। 'श्वसन्ती' इत्यस्यार्थमाह 'एतनं गृह्णन्ती'। 'एतनं गृह्णन्ती' इत्यस्यार्थ एतस्मिन्काले किमु सहसैवोदयेत्? परं सर्वस्यापि पदस्य यत्किञ्चित्पर्यायपदमवश्यं निवेश्यम्। पर्यायस्थापनेनैव टीका सुटीका भवतीति महोदयस्यास्य विचारः। किन्तु पर्यायनिरपेक्षस्य पदस्य बलात्पर्यायसंनिवेशे कुत्रचित्कुत्र-चित्कीदृशोऽनर्थः संभवतीति तु नास्य महाभागस्य विचारशक्तिरपि।

सूक्ष्ममीक्ष्यतां तावत्-गद्यकाव्यं हि कवीनां कृतित्वपरीक्षायै निकषो नाम। गद्य-काव्येष्वपि 'कथा'-काव्यमतिमनोहरम्, यद्धि वर्तमानकालिक 'उपन्यास (Novel)' स्थापनीयम्। तत्रापि- वाचयतामाहाररुचिमपि तिरोदधत्तदिदं काव्यमस्ति यस्य लेखको मार्मिकाणां शिरोमणिः श्रीमान्बाणः। तस्यैव काव्यस्य नायिकायाः सौन्दर्यसारसंघटिताया देवाङ्गनायाः (कादम्बर्याः) सौन्दर्यवर्णने महोदयोऽयं 'नाभिम्' व्यपदिशति 'तुन्दकूपीम्' इति! तुन्दपदं हि प्रचण्डोदरायाः कस्याश्चित्पम्फुल्यमानमुदरं सूचयत् (यतः प्रफुल्लोदस्तुन्दिल इत्युच्यते) गहनान्धकारितं महान्तं नाभीगर्तं चेतसि चित्रयतीति मन्ये न वक्तव्यं भवेन्मार्मिकाणां कृते। किन्तु सर्वतो निमीलितनयनोऽयं न किञ्चित्पश्यति। येन केनापि रूपेण पर्यायपदस्थापनायैव सहस्रनयनः सन् सोऽयं जागरूकः। अन्यदपि व्याख्यानं दृश्यताम्- 'तडिद्भिः ऐरावतीभिः', 'शुष्काणि वानानि', 'पिपासा उदन्या', 'वल्कलोपान्तेन चोचाञ्चलेन'। वल्कलोपान्तमित्यस्य योऽर्थं न ज्ञातवान् तदर्थं ह्येषां व्याख्याऽ-पेक्षिता, तस्य कृते चोचाञ्चलमिति किं सुखबोध्यं भवेत्? प्रसिद्धाऽप्रसिद्धयोरन्तरं न विदन्नेव किं 'निरन्तरव्याख्या'कारो भवति?

टीकाकारमहाभागस्य व्याकरणज्ञानमप्यलौकिकम्। कर्म-कर्तृवाच्ययोः सर्वत्रापि निरर्गलं प्रयोगः। 'कृतान्तमुखकुहरादिव विनिर्गतमात्मानं मन्यमानः (अहम्)' इत्यत्र 'मन्यमानः' इति कर्तृवाच्यक्रियायाः 'ज्ञायमानः' (पृ ७४) इति व्याख्या। एवं प्रायः सर्वत्रैव। आत्मनेपद-परस्मैपदव्यत्ययाः पदे पदे। 'व्रजमानानीव' संचरमाणानीव' (तृतीयान्तयोगं विनापि)। 'निमज्जप्रानम्' 'कम्पति सति' 'उत्पश्यमानः' (पृ. ७५) 'अजनिषम्' इत्यादीनि स्थाने स्थाने। लिङ्गव्यत्ययाः प्रतिपदम्- 'बाहुवल्ल्यालिङ्गनान्' 'दन्तक्षतान्' 'कर्णावतंसानि' 'त्यज्यमानासु सत्सु', 'श्वेतायमानासु सत्सु' (पृ. ५४७)। ध्वनिशब्दस्य, 'रक्तिमा' इत्यादि इमनिच्प्रत्ययान्तानां च प्रायः स्त्रीत्वमेव प्रयुक्तम्। 'पुस्तकान् शास्त्रान्' (२०५)। 'अप्रापम्, अप्रार्थयत,' इत्याद्यपि बहुत्र। शिष्या इत्यस्य लोकोत्तरा व्याख्या 'शिष्यिणी' इति (पृ. २२०)। 'पराभवितस्य' 'रुदनम्' (पृ. ६८२) 'कार्यताम्' इत्येतस्य व्याख्या 'काराय्यताम् इत्यादि ('कराइये' इति 'हिन्दीं दृष्ट्वा') (पृ. ६६३)।

एवं कादम्बरीग्रन्थस्य टीकासम्पादने भट्टमहाभागैर्यो हि प्रयासो विहितः स तेषां कथनेनाऽनेन ज्ञातुं शक्यते। वस्तुतः भट्टमहोदयानां टिप्पणीं विना टीकाया अस्या एकमपि पदं ज्ञातुं न शक्यते। महाभागैरेभिः पदे पदे टीकाकारस्य व्याख्याने संशोधनपूर्वकं ग्रन्थस्य शुद्धपाठा अपि निर्दिष्टाः सन्ति। बहुत्र 'इति नोचितम्' 'इति उचितः पाठः' इत्येवं निर्दिशद्भिः ग्रन्थस्य टीकायाश्च संशोधनमकारि भट्टमहोदयैरत्र। तत्सर्वं ग्रन्थं दृष्ट्वा ज्ञातुं शक्नुवन्ति सुधियः।

**३. संस्कृतगाथासप्तशती-**

हालकृताया गाथासप्तशत्याः संस्कृतानुवादरूपोऽयं ग्रन्थः। गाथानामर्थबोधार्थं भट्टमहाभागैरत्र सर्वङ्कषानाम्नी टीकाऽपि लिखिताऽभूत्। अयं ग्रन्थः १९३३ वर्षे निर्णयसागर-मुद्रणालात् प्रकाशितः।

**४. शिलालेखललन्तिका-**

भट्टमहाभागैः नैकेषां शिलालेखानां सङ्कलनं सम्पादनं च कृत्वा ग्रन्थेऽस्मिन् प्रकाशनं कृतमभूत्। अयमपि ग्रन्थः १९४१ ई. वर्षे मुम्बईनगरस्य निर्णयसागरमुद्रणालयात् प्रकाशितोऽभवत्।

महाभागैरेभिः कानिचित् पाठ्यपुस्तकान्यपि लिखितान्यभवन्। तेषु सुलभसंस्कृतम् संस्कृतसुबोधिनी चेति द्वौ पाठ्यग्रन्थावस्माभिर्दृष्टौ। कविकलानिधि-श्रीकृष्णभट्टस्य ईश्वरविलासमहाकाव्ये विलासिनीटीका श्रीमद्भिः प्रणीताऽभवत्। टीकयाऽनया सनाथितस्य ईश्वरविलासमहाकाव्यस्य प्रकाशनं १९५८ ई. वर्षे राजस्थान-प्राच्यविद्याप्रतिष्ठानतः समभूत्। ग्रन्थस्याऽस्य पुनः प्रकाशनं २००६ तमे वर्षे जयपुरस्थजगदीशसंस्कृतपुस्तकालयात् हिन्दी-व्याख्यया सह सञ्जातमस्ति। कविकलानिधेः पद्यमुक्तावल्यां वृत्तमुक्तावल्यां चापि भट्टमहाभागैः टीका लिखिता। एतेषां टीकया सह ग्रन्थयोरनयोः क्रमशः १९५९ तमे तथा च १९६२ ई वर्षे राजस्थानप्राच्य-विद्याप्रतिष्ठानात् प्रकाशनं समभवत्।

भट्टमहाभागानां जीवनं साहित्यं चोपजीव्य बहुभिः खलु विद्वद्भिः ग्रन्थाः प्रणीता अभवन्। नैकेऽनुसन्धित्सवश्छात्रा महाभागानामेतेषां साहित्ये शोधोपाधिमपि लब्धवन्तः। जिज्ञासूनां शोधार्थिनां समुपकाराय केचन प्रमुखा ग्रन्था अत्र निर्दिश्यन्ते।

**१. मञ्जुनाथगौरवम्-**

गङ्गाधरभट्टमहोदयानां सम्पादकत्वे भट्टमहोदयानां जीवनं साहित्यं चाश्रित्य लिखितानां निबन्धानां सङ्कलनरूपोऽयं ग्रन्थः १९९० तम ई. वर्षे राजस्थानसंस्कृतअकादमीतः प्रकाशनमवाप।

**२. श्रीमथुरानाथशास्त्रिणः कृतित्वसमीक्षणम्-**

डॉ. प्रभाकरशास्त्रिणां सम्पादकत्वेऽस्य प्रकाशनं १९९५ ई. वर्षे राजस्थान-संस्कृतअकदमीतोऽभवत्।

**३. मञ्जुनाथगद्यगौरवम्-**

आचार्यराधावल्लभत्रिपाठिप्रवर्तितायाः प्रख्याग्रन्थमालायाः षष्ठः स्पन्दः मञ्जुनाथग्रन्थ-गौरवमिति नाम्ना डॉ. रमाकान्तपाण्डेयस्य सम्पादकत्वे २००४ ई. वर्षे नवदेहलीस्थप्रतिभा-प्रकाशनेन प्रकशतामानीतः। अत्र भट्टमहोदयानां प्रमुखा गद्यरचनाः सङ्कलिताः सन्ति।

**४. मञ्जुनाथवाग्वैजयन्ती-**

शिमलानगरस्थभारतीय-उच्च-अध्ययन-संस्थानम् इत्याख्यायाः संस्थायाः सहकारेण मञ्जुनाथस्मृतिसंस्थानम् २००४ ई. वर्षस्य अप्रैलमासे (३-४-दिनाङ्कयोः) ''संस्कृत वाङ्मय में भट्टश्रीमथुरानाथशास्त्री' इत्यस्मिन् विषये राष्ट्रियसंगोष्ठीं समायोजयत्। अत्र देशस्य विभिन्नेभ्यः प्रान्तेभ्यः समागतानां विदुषां व्याख्यानानि समभवन्। देवर्षि-कलानाथशास्त्रिणां सम्पादकत्वे प्रकाशितेऽस्मिन् ग्रन्थे तान्येव व्याख्यानानि भट्टमहोदयानां साहित्यसमीक्षणपराणि प्रकाशितानि सन्ति।

जयपुरात् प्रकाश्यमानाया भारतीपत्रिकाया भट्टमथुरानाथशास्त्रिस्मृतिविशेषाङ्केऽथ च स्वरमङ्गलाया भट्टजन्मशताब्दीविशेषाङ्के भट्टमहोदयानां साहित्यादिसमीक्षणे काचिदभिनवा दिगुन्मीलिता सहृदयमनीषिभिः। विविधेषु विश्वविद्यालयेषु भट्टमहोदयानां साहित्यमाश्रित्य शोधकार्याण्यभवन् भवन्ति चाद्यापीति तत्सर्वं विद्वद्भिर्गवेषणीयमिति शम्।

**-रमाकान्तपाण्डेयः**

***

# विषयानुक्रमणिका

**पुरोवाक्** — **iii**
**मञ्जुनाथप्रशस्तयः** — **vii**
**सम्पादकीयं निवेदनम्** — **ix**
**भट्टश्रीमथुरानाथशास्त्रिप्रणीतटीकादिग्रन्थानां परिचयः** — **xvii**
**भट्ट-श्रीमथुरानाथशास्त्रिणां जीवनं साहित्यसेवा** — **xxiii**
**भूमिका** — **xxxix**

## निबन्धा ललितनिबन्धाश्च

| | पृ.सं. |
|---|---|
| **विस्तृता निबन्धाः** | **१** |
| **भारतवैभवम्** | **२** |
| क) भारतीयं गौरवम् | १५ |
| ख) भारतस्य सीमा | २६ |
| ग) आर्याणामावासः | २८ |
| घ) मध्यकालः | ६० |
| ङ) सोमनाथे यवनाक्रमणम् | ६४ |
| च) नादिरशाहस्याक्रमणम् | ६८ |
| छ) मोगलकालः | ७२ |
| ज) स्वातन्त्र्यात् पूर्वं भारतस्य प्रान्ताः | ७८ |
| झ) आर्यावर्त्तस्य राष्ट्रिया एकता | ८२ |
| **गीर्वाणगिरागौरवम्** | **८८** |
| क) संस्कृतभाषायाः अपारा साहित्यसम्पत्तिः | ११० |
| ख) संस्कृतभाषायां प्रचुरा साहित्यसामग्री | १२३ |
| ग) संस्कृतभाषायाः अतिप्राचीनता | १२५ |
| घ) वर्तमानयुगस्यापेक्षा च संस्कृत-भाषा च | १४० |
| ङ) संस्कृतभाषायामन्यभाषाशब्दानां शनैः शनैः प्रवेशः | १४९ |
| च) संस्कृतनिष्ठा हिन्दीशब्दावली | १५१ |
| **ललितनिबन्धाः** | **१५२** |
| १. किन्तोः कुटिलता | १५३ |
| २. बालकभृत्यः | १६५ |
| ३. हीरकः | १७१ |
| ४. मकार-महामेलकम् | १७३ |
| ५. रूप्यकरामस्यात्मकथा | १७६ |
| ६. श्रीहनूमतः आदर्शचरितम् | १८२ |
| ७. हंसवाहना सरस्वती मयूरवाहना कथं जाता | १८६ |
| ८. भारतीयं भोजनशास्त्रं शष्कुली 'जलेबी' च | १९१ |
| ९. विच्छित्तिवैपुल्यं विविधा विधाश्चाभिक्तेः | २०१ |
| १०. मृत्यो! त्वमागतोऽसि | २१२ |
| ११. अपि नाम सेयमव्यवहारिकी? | २१५ |

**यात्रावृत्तान्तात्मका निबन्धाः** **२२१**

१. अमरकण्टकः २२२

२. व्योम-विहारः २२५

३. अस्माकमुत्तराखण्डयात्रा २३२

४. विश्वस्य असाधारणं तीर्थस्थलं भगवान् श्रीअमरनाथः २४१

५. भगवतः श्रीकृष्णचन्द्रस्य लीलाभूमिः श्रीवृन्दावनम् २४३

**निरूपणात्मका निबन्धाः** **२४६**

१. मानवसभ्यतायां जीवनस्य किमुद्देश्यं स्यात्? २४७

२. वर्तमानयुगस्य परीक्षाप्रणाली च संस्कृतशिक्षा च २५१

३. निबन्धलेखस्य विराट् प्रवाहः २६१

४. लिपिविषये निवेदनम् २६६

**शोधात्मका निबन्धाः** **२७३**

१. अपि नासाभूषणमिदमासां यवन जातीनां सहवासादनुकृतम्? २७४

२. काव्यलक्षणं तद्विषये विभिन्न-मतानि च २८७

३. रसस्वरूपं विभिन्ना रससिद्धान्ताश्च ३०१

४. काश्मीरकमहाकविर्बिह्लण-स्तत्काव्यं च ३०८

**नाटिका** ३३३

१. मञ्जुला ३३४

**मुक्तककाव्यानि** ३४४

१. नीरद-नीराजनम् ३४५

२. सती-सप्तदशी ३४७

३. कपिलार्याष्टकम् ३५९

४. वियोगिनो विप्रलापाः ३५०

५. मनोलहरी ३५१

**भट्टश्रीमथुरानाथशास्त्रिणां कृतयः** **३५६**

**भट्टमहोदयानां कथासाहित्यम्** **३५९**

**भट्टमहोदयानां निबन्धसाहित्यम्** **३६३**

# भट्ट-श्रीमथुरानाथशास्त्रिणां जीवनं साहित्यसेवा च

**वंशः पूर्वजाश्च -**

भट्टश्रीमथुरानाथशास्त्रिणो जन्म राजस्थान-वासिनाम् उत्तरभारते निवसतामान्ध्राभिजनानां विद्वद्ब्राह्मणानां कुले जयपुरेऽभूत्। प्रायश्चतुष्पञ्चशताब्दीतः पूर्वं विभिन्नैर्हेतुभिर्दक्षिणदिग्देशाद् बहूनि विद्वत्कुलानि सामूहिक-रूपेणोत्तर-भारतं प्रति प्रव्रजनमत्र विभिन्नेषु प्रान्तेषु प्रवासं च प्रारेभिरे। वल्लभाचार्यप्रभृतीनां वैष्णवाचार्याणां भक्तिधारा-प्रवाह-प्रचारोद्देश्यकेषु प्रवासेषु, वाराणस्यादिविद्याकेन्द्रेषु शास्त्रार्थाद्युद्देश्यकेषु पर्यटनेषु च सहचारित्वमापन्नानि बहूनि ब्राह्मणकुलानि समागच्छन्नुत्तर-भारते, अत्र च राजसम्मानादिना प्रश्रयं प्राप्य स्थायिरूपेण निवासं चक्रिरे। स्वयं वल्लभाचार्य आन्ध्राभिजनोऽ-भूदुत्तर-भारते च न्यवसत्। एवंविध एव तैलङ्गब्राह्मणानां कृष्णयजुर्वेदान्तर्गत-तैत्तिरीयशाखाध्यायिनां वंश एको मोगलकाले आन्ध्रप्रदेशादुत्तर-भारते समाययौ यस्य मूलपुरुषो बावीजी दीक्षितोऽभूत्। आङ्गिरस-आयास्य-गौतमेति त्रिप्रवरान्विते गौतमसगोत्रे वंशेऽस्मिन् बहवः परिनिष्ठिता विद्वांसोऽभूवन्। 'देवर्षि' इति अवटङ्कधरोऽयं वंशो 'देवलपल्ली' 'देवरकोंड' इत्याख्याद् वा प्रदेशान्निर्गत इति बहूनां धारणा, अत एव संस्कृत्य 'देवर्षि' इत्यभिजनाभिधानं समभूत इति तेषामाशयः। अन्ये तु दक्षिणभारतात् काशीं, काशीतः प्रयागं, प्रयागाद् रीवाँ नगरं च गत्वा तत्र राजसम्मानस्वरूपं 'दिवरिखिया' इत्याख्यं ग्रामं बान्धवनरेशाद् गोपालसिंहात् प्राप्तवान्। पूर्वपुरुषो मण्डलदीक्षित इति तमिमं 'देवरिख' ग्रामं व्यपदिश्य संस्कृतं नाम 'देवर्षि' इत्यवटङ्कस्य समभूदिति कथयन्ति।

भवतु तावत्किमपि कारणं, किन्तु देवर्षि इत्यवटङ्कधरोऽयं परिवारः काश्यां, प्रयागे, रीवांनगरे, अनूपशहरे च निवासं विधाय कवित्वख्यातिवशाद् विभिन्नैः राजवंशैः कुलपरम्परया सम्मानितो राजस्थानप्रान्ते बुन्दीनगरं प्राप यत्र ग्रामादिसम्पत्ति-प्रदानसम्मानेन वासितः। बून्दीपतेर्बुधसिंहस्य राजभाषाया रत्नं देवर्षिश्रीकृष्णभट्टः कविकलानिधिः संस्कृत-प्राकृताऽपभ्रंशव्रजभाषादीनां तलस्पर्शी विद्वान् विश्रुतः कविरलङ्कारशास्त्री चाऽभूद् यस्यैतिहासिकानि 'ईश्वरविलास' प्रभृतिकाव्यानि, 'पद्य-मुक्तावली' प्रभृतिमुक्तकसङ्ग्रहाः, 'वृत्तमुक्तावली' प्रभृति छन्दःशास्त्रग्रन्थाः संस्कृते, 'अलंकारक-लानिधि' 'शृंगार रसमाधुरी' प्रभृतयो रीतिग्रन्थाश्च व्रजभाषायां प्रकाशिताः। प्रायो विंशतितोऽप्यधिका रचना अप्रकाशिता विविधेषु ग्रन्थागारेषूपलभ्यन्ते।

सोऽयं श्रीकृष्णभट्टो बून्दीपतेर्बुधसिंहस्य राजसभातो (बून्दीनरेशाद् याचनापुरः-सरं) जयपुरनरेशेन तत्संस्थापकेन सवाईजयसिंहेनाऽऽनीतस्तेनानुष्ठितेऽश्वमेधमखे सक्रियां भूमिकां निरवहत्, राजाज्ञया बहून् ग्रन्थांश्च प्रणिनाय। सवाईजयसिंहेन 'कविकलानिधि' रित्युपाधिना

सम्मानितः सोऽयं मनीषी जयपुरनगरे एवं सप्तदश्यां शताब्द्यां (१६७५-१७६१ ई.) स्थायिरूपेण प्रत्यष्ठिपत् स्वकीयं परिवारम्। तदनु वंशेऽस्मिन् बहवो विद्वत्कवयः समभूवन् येषु श्रीकृष्णभट्टतनयो वाणी-भारतीत्याद्युपनामधारी श्रीद्वारकानाथभट्टः संस्कृत-व्रजभाषादीनां विख्यातः कविरासीत्। जगदीशभट्ट-वासुदेवभट्ट-मण्डनभट्टादयो बहवो वंशजा अस्य राजकवयो मनीषिणो लेखकाश्चाभूवन्।

**शिक्षा-**

मण्डनभट्टो जयपुरराजवंशेन प्रभूतं सम्मानितः कविरासीत्। अस्यैव कुले श्रीलक्ष्मीनाथ-भट्ट-सुतस्य श्री द्वारकानाथभट्टस्य पत्नी श्रीजानकीदेवी मथुरानाथं संवत् १९४६ वैक्रमे वर्षे आषाढ-कृष्ण-सप्तम्यां (१८८९ई०) प्रासौत्। एतत्पिता द्वारकानाथभट्टः सांसारिकव्यवहारविमुखः आध्यात्मिकप्रवृत्तिपरः श्रीमद्भागवतादिवाचने जप-पूजादिषु चाधिकां रुचिमन्वभूत्। पितामहः श्रीलक्ष्मीनाथ एव परिवारे प्रबन्धादिषु प्रमुखोऽभूत्। संस्कृतवैदुष्यपरम्परापरिपूतेऽप्यस्मिन् कुले ''राजवृत्तिसम्मानादि (तदानीन्तन) राजभाषायामुर्दूभाषायामधिकं लभ्यते'' इति धारणाऽऽसीत्। अतः शिशोर्मथुरानाथस्य शिक्षा उर्दूभाषायां भवतु येन सोऽयं न्यायालयादिषु सम्मानितं किञ्चित्पदमधि-गच्छेदित्यासीदेतत्पितामहस्य वाञ्छा। किन्तु स्वभाविकी रुचिरस्य शिशोः संस्कृतेऽभूत्। एवं च यत्किञ्चिदुर्दूभाषां पठित्वा कुलपरम्परापरिगतानि संस्कृत-पुस्तकान्यनेन रुचिवशात् पठितुमारब्धानि। तदनु प्राथमिककक्षासु शिक्षायै सोऽयं जयपुरीये महाराज-संस्कृत-कॉलेजे प्रवेशितः।

तत्र प्रवेशिकाध्यापकैः पं. काशीनाथशास्त्रिप्रभृतिभिः संस्कृतव्याकरणे लघुकौमुद्यादिषु भृशं सपरिश्रममध्यापितोऽसौ स्वल्पीयस्येव वध्यसि प्रवेशिका-परीक्षामुदतरत्। प्रवेशिकापरीक्षायामार्हन्तीं प्राप्तवन्तमेनं साहित्य-न्याय-व्याकरणेति शास्त्रत्रयस्य विद्वांसोऽध्यापकाः स्वस्वविषयं पठितुं प्रैरिरन्। बहुविध-विचारानन्तरं निर्धारितं यदयं साहित्यव्याकरणेति शास्त्रद्वयं समकालमेव पठतु। तदानीं विषयविभाजनं, परीक्षाप्रणाली च नूत्नतया प्रवर्तिताऽभूत् कतिपयवर्षपूर्वमेवाति-कठोरा अभूवन् नियमास्तथापि तत्कालीनेन शिक्षासञ्चालकेन श्रीसञ्जीवनगङ्गोपाध्यायेन विषयद्वयं पठितुं विशेषानुमतिरस्मै प्रदत्ता। साहित्याध्यापकाः नांगल्याभिजनाः श्री गोपीनाथदाधीचाः व्याकरणाध्यापकाः राजगुरुहरिदत्तझाममहाभागाश्चाभूवन्नस्याऽध्यापकाः। सोऽयं साहित्योपाध्याय-परीक्षां १९०१ ई. वर्षे व्याकरणोपाध्यायपरीक्षां च १९०३ ई० वर्षे समुदतरत्। साहित्यव्याकरणयोः प्रत्येकं वर्षत्रयव्यापी सोऽयं पाठ्यक्रमो वर्षषट्कमग्रहीष्यत्, विशेषानुमतिर्यदि नाऽलप्स्यत।

तदनु व्याकरणशास्त्रिपरीक्षाऽनेन सर्वप्राथम्यं लब्ध्वा प्रथमश्रेण्या १९०७ ई० वत्सरे समुत्तीर्णा। महाभाष्य-शेखर-मनोरमादि-विमर्शग्रन्थेषु सुबहु परिश्रम्य कॉलेजाध्यक्षाणां पं. लक्ष्मीनाथशास्त्रिणां शिष्यत्वे, न केवलं कॉलेजे एव, अपितु तेषां गृहेऽपि निरन्तरमध्ययनेनाऽनेका

रात्रीरतिवाह्य, कष्टशतं सोढ्वा, गृहवाससुखानि परित्यज्य च 'गुरुकुलक्लिष्टेन' छात्रेणाऽनेन सपरिश्रममस्यां साफल्यं लब्धमभूत्। काशीस्था म.म.पं. शिवकुमारमिश्रप्रभृतयो भारतविश्रुता विद्वांसस्तदा परीक्षका अभूवन्। आसीत्तदा सेयं परिपाटी यत्प्रौढिम्नः पूर्णतः परीक्षिकास्वमूषु परीक्षासु ससम्मानमुत्तरतां परीक्षार्थिनां प्रमाणपत्रेषु परीक्षकाः स्वहस्ताक्षराण्यकुर्वन्, बहुधा च स्वकीन्याभिमतान्यपि व्यलिखन्। एतस्य प्रमाणपत्रे परीक्षकेण ''लेखपटुरयं बटुः'' इति टिप्पणी प्रत्ताऽभूत्।

एतस्मात् पूर्वं १९०६ ई० वत्सरे पंजाब-विश्विविद्यालयीयायां सर्वोच्चायां शास्त्रिपरीक्षायामयं प्रथमश्रेण्यां सर्वस्मिन्नपि विश्वविद्यालये प्राथम्यमलभत्। १९०९ ई. वर्षे पं. श्रीकृष्णशास्त्रिद्राविडस्य शिष्यरूपेणाऽयं महाराजसंस्कृतकॉलेजीयच्छात्रत्वेन साहित्याचार्य-परीक्षायां साफल्यमभजत्। समीक्षा-चक्रवर्ति-श्रीमधुसूदन-ओझामहाभागादप्ययं वेद-ब्राह्मणोपनिषद्-दर्शनग्रन्थानध्यगीष्ट।

अध्ययन-समकालमेव सम्पादनस्य साहित्यरचनायाश्च या प्रवृत्तिरस्मिन् परिलक्षिताऽभूत्तां विशदीकृत्य साहित्यसर्जनाया या भागीरथी भट्टमहोदयेन अजस्रं प्रवाहिता तस्याः परिचयोऽनुपदमेव प्रदीयते। अत्र तज्जीवनयात्रायाः संक्षिप्तमितिवृत्तमुल्लिख्यते पूर्वम्। सुन्दरलालभट्टस्य राजसम्मानिते ग्राम-सम्पत्तिस्वामिनि चाधिष्ठाने उत्तराधिकारित्वेन सुन्दरलालभट्टेन दत्तकपुत्रत्वेन गृहीतः सोऽयं भूसम्पत्तेः प्रबन्धं, प्रतिष्ठानोपरि यद् ऋणमुपचितमभूत्तस्य परिशोधनं च कृत्वा वित्तीयां स्थितिं दार्ढ्यं नीतवान्। ओरछा-(मध्यप्रदेश) राजगुरोः श्रीरघुनाथदेवदाऊजू महाभागस्य सुतया सावित्रीदेव्या सहाऽस्य विवाहः १९०९ई० वत्सरे समजायत। तिस्रः सन्ततयोऽपि समभूवन् किन्तु शैशव एव निधनं प्रयाताः। ततोऽजयगढ़ (मध्यप्रदेश) स्थस्य पं. नारायणरावस्य पुत्र्या मथुरादेव्याः पाणिग्रहणमनेन कृतं किन्तु कालगत्या मथुरादेवी वर्षावधावेव स्वर्गमारूढा। तदनु १९२२ ई० वत्सरे जयपुरसन्निकटस्थस्य महापुराग्रामस्य निवासिनः पं. शिवानन्द-गोस्वामिवंशजस्य पं. श्री गोपीकृष्णगोस्वामिनः सुतया रामादेव्या सहाऽस्य विवाहः समजायत। विवाहबन्धनमिदं चिरस्थायि प्रतिपन्नम्। १९३४ ई० वर्षे कलानाथनामानं सुतं, १९३७ वर्षे जयानाम्नीं कन्यां, १९४० वर्षे विजयानाम्नीं कन्यां, १९४५ वर्षे च कमलानाथनामानं सुतमियं रामादेवी प्रासौत्।

**अध्यापनं राज्यसेवा च-**

साहित्याचार्य-परीक्षामुत्तीर्य महाराजसंस्कृतकॉलेजे प्राध्यापकपदे सेवामारब्धुमयं प्रोत्साहितो वयस्यैः। संस्कृतरत्नाकरादिमासिकपत्रेषु लेखकत्वेन सम्पादकत्वेन चास्य साहित्यसेवा तदानीं प्रसिद्धिं प्रारभमाणाऽभूत्। प्रतिभाऽप्यस्य सुविदिताऽऽसीत् किन्तु तदानीन्तनेन महाराज-संस्कृतकॉलेजाध्यक्षेण महामहोपाध्याय- पं. दुर्गाप्रसादद्विवेदेन पं. गोपीनाथधर्माधिकारिनामा विद्वानेकः प्राध्यापक-पदे नियुयुजे। एवं हि कालेजस्यास्य सेवापराङ्मुखोऽयं संस्कृत-हिन्द्यादिभाषासु काव्यादिरचनां कृत्वा हिन्दी-संस्कृताध्येतॄन्

स्वगृहेऽध्याप्य च साहित्यजगतः शिक्षाजगतश्च सेवां कर्तुमारेभे।

भूसम्पत्तेः स्वामी राजसम्मानित-प्रतिष्ठानस्य चोत्तराधिकारी सोऽयमभूदिति कृत्वा नैवंविधानां तदानीन्तनानां विदुषां सम्मुखे आजीविकायास्तादृशी समस्याऽभूत्।

तदैव १९२४ ई. वर्षे जयपुरमहाराजस्य श्रीमानसिंहस्य प्रथमो विवाहमहोत्सवो जोधपुर-नगरे समायोजितोऽभूत्। समारोहेऽस्मिन् सोऽयं तत्र सङ्गतेन तत्कालीन-शिक्षा-सञ्चालकेन श्रीश्यामसुन्दरशर्मणा (यो ह्यस्याभिन्नं मित्रं परस्तात् समजायत, यश्चैतस्य मृत्योर्दिनद्वयात् पूर्वमेव दिवमारूढः) समनुरुद्धो यत्संस्कृतकॉलेजे साहित्याध्यापकपदमयं स्वीकुर्यादिति। एतत्फलस्वरूपं २६/१/२४ दिवसेऽयं म.म. दुर्गाप्रसादद्विवेदानामध्यक्षत्वकाले एव तत्राऽध्यापकपदं जग्राह। तदानीं जयपुरे आङ्ग्लशिक्षापद्धत्यनुसारं सामान्यशिक्षाप्रकारस्य विश्रुतो महाविद्यालयो महाराजासंस्कृतकॉलेज इति नाम्ना प्रचलति स्म, यत्र संस्कृत-विषयोऽपि शिक्ष्यते स्म। अत्र संस्कृतप्राध्यापकपदे पं. मधुसूदन ओझा, पं. वीरेश्वरशास्त्री, पं. बदरीनाथशास्त्री, पं. सूर्यनारायणाचार्य इत्यादयो विद्वांसोऽधितस्थिवांसः आसन्। १९२५ई० वर्षे एव कालेजेऽस्मिन् प्राध्यापकस्यावश्यकतामनुभूय पं. श्यामसुन्दरशर्मणाऽयं तत्र नियुक्तः। अस्मिन् कॉलेजे १९३१ वर्ष-पर्यन्तमयं छात्रान् सरलया पद्धत्या संस्कृतं पाठयामास। प्राथमिक-संस्कृत-शिक्षण-पुस्तकानां लेखनायाऽस्मै सोऽयं प्रसङ्ग एव प्रेरणामदात्।

एतदनन्तरं जयपुर-राज्याश्रितानां संस्कृतपाठशालानां निरीक्षकपदे सोऽयं राज्यशासनेन समाकारितो यत्र १९३१ वर्षात् १९३४ वर्षपर्यन्तमयं कार्यमकरोत्। तदानीं संस्कृत-कॉलेजे महामहो-पाध्यायगिरिधरशर्मचतुर्वेदाः कालेजाध्यक्षपदे, साहित्यविभागाध्यक्षपदे च पं. श्री बिहारीलालशर्मणः (डबलाचार्य इति प्रथिताः) कार्यं कुर्वाणा आसन्। बिहारीलालशर्मणां निधनोत्तरं भट्टमहोदयः साहित्यविभागाध्यक्षपदे २५/०२/१९३४ दिनाङ्कात् न्ययोज्यत यत्राऽयं ई. १९४२ वर्षावधि कार्यं कृत्वा सेवानिवृत्तोऽभूत्। नाऽऽसीदेतस्मात् पूर्वं देशीय-राज्यशासनेषु तादृशं कठोरमेकरूपं सेवानिवृत्ते-र्बन्धनम्। न वा राजकीयेष्वभिलेखेषु जन्मतिथेः प्रमाणनस्य सुदृढाऽभूत् परम्परा।

१९४२ ई० वर्षे सोऽयं भट्टमहोदयः केवलं ५३ वर्षदेशीय एवाऽभूत् किन्तु संयोगवशाद् राज्यसेवाऽभिलेखे कदाचन प्रारम्भे जन्मवर्षं संवत् १९४४ इति समभूल्लेखितम् (संवत १९४६ इति स्थाने) अतो यदा ५५ वर्ष-वयस्कानां राज्यसेवकानां सेवानिवृत्तिदृशा निर्धारणं क्रियमाणमभूत्तदाऽन्यैः सह भट्टमहोदयस्यापि सेवानिवृत्तिः क्रियतामिति विचारः समसूच्यत। भट्टमहोदयेन जन्मतिथि-संशोधनाय, सेवाया अवधिवृद्धये (एक्सटेंशन) वा न जात्वपि प्रयतितम्। सोऽयं बहुधा कथयति स्म "मया सेवायै न कदापि प्रार्थनापत्रं प्रदत्तम्, स्वयं राज्याधिकारिभिरेव मम साहित्यसेवागुणानां बहुमानरूपेणाऽहं सेवायां गृहीतः। एवं हि यदा ते सेवानिवृत्तेरादेशान् दित्सवस्तर्हि किमित्यहं तद्विरोधे प्रयत्नान् कुर्याम्?" इति।

एवं त्रिपञ्चाशद्वर्षीये वयसि भट्टमहाभागो राजकीयसेवातो निवृत्तोऽभूत्, न तु

साहित्य-सेवातः। प्रत्युत सेवानिवृत्तेरनन्तरं सर्जनात्मककार्येषु समधिकं व्यापृतिः सञ्जाता। सेवासमकालमपि सम्पादनकार्येषु, काव्यरचनायां, हिन्दी-व्रजभाषादिसाहित्यसेवायां, ग्रन्थानां सम्पादन-टीकालेखनादिकार्येषु चाऽयं सर्वदैव व्यापृत एवाऽस्थात्।

महाराजाकॉलेजे पाश्चात्यशिक्षाक्रमे प्रवृत्तांश्छात्रान् सरलया पद्धत्या संस्कृतं पाठयितुमनेन 'संस्कृत-सुबोधिनी' नामकं पाठ्यपुस्तकमलेखि, पुस्तकमिदं स्वयं तेन प्राकाशि। संस्कृतकॉलेजे शास्त्रिपरीक्षां दित्सूंश्छात्रान् कादम्बरीं पाठयताऽनेन तस्याः सम्पादनं विधाय 'चषक' नाम्नी टीका व्यलेखि, साहित्याचार्यश्रेण्याश्छात्रान् ''रसगङ्गाधरं'' पाठयन्नयं तस्य मुद्रितपाठं भृशमशुद्धं प्राप्य तस्य संस्करणं सम्पादनं च विधाय 'सरला' नाम्नीं टीकामलिखत्। शिलालेखानां सङ्कलनं कृत्वा ''शिलालेख-ललन्तिका'' नामकं पुस्तकं सम्पादयामास। पुस्तकत्रयमिदं निर्णयसागरमुद्रणालयेन मुम्बईस्थेन प्राकाशि। एवं पाठनसहयोगीनि पुस्तकानि प्रणेतुं प्रेरणाऽस्मै राज्यसेवाप्रसङ्गेनैव प्राप्ता। किन्तु सेवानिवृत्तेरनन्तरं विविधासु समितिषु, संस्थासु च सक्रियां भूमिकां निर्वहताऽनेन भूयसी साहित्यसेवा विहिता, स्वयमनेके ग्रन्थाः प्रणीताः प्रकाशिता अपि। सर्वेषामेषां विवरणमग्रे प्रदास्यते।

**जीवनयात्रा -**

सोऽयं प्रारम्भादेव राजकीयभूसम्पत्तिभोगी आसीदिति वेतनादिरायः केवलं गौणरूपेण, द्वैतीयकं सहायकं वाऽऽयस्रोतोऽस्याभूत्। इदमेव कारणं यत्सेवानिवृत्तिस्तदानीमार्थिक-सन्तुलनमस्य न जात्वपि विषमीकर्तुमक्षमत। निवृत्तिवेतन (पेंशन) मस्मै द्वाचत्वारिंशद् -रूप्यकात्मकं जयपुरराज्येन निर्धारितम्। ''मदीयस्यैकस्य भृत्यस्य मासिकवेतनाय पर्याप्तं भवतीति सुमहद् योगदानमस्य सोऽयं परिहासे कथयति स्म।'' भूसम्पत्तेरायेन सोऽयं नगरसीमायामेकं भवनमक्रीणात्, नवीनायां वसतौ भवनं निर्मापयामास, पुत्र्योः पुत्रस्य च विवाहसमारोहानायोजयामास।

अखिलभारतीय-हिन्दी-साहित्य-सम्मेलनस्य द्वात्रिंशत्तमेऽधिवेशने स्वागतमन्त्रित्वेन जयपुरे सुमहान्तं हिन्द्याः साहित्यकं समारोहं १९४४ ई. वर्षे, अ.भा. संस्कृत-साहित्य-सम्मेलनस्याष्टादशेऽ-धिवेशनेऽखिलभारतीय-कविसंम्मेलनसभापतित्वेन संस्कृतविदुषां सुमहानां सम्मलेन १९४५ वत्सरे च सोऽयं सफलयास। १९४३ ई.वत्सरे महात्मागान्धिने समर्पितेऽभिनन्दनग्रन्थेऽस्य संस्कृत-काव्यबद्धः सम्मानाञ्जलिरस्य स्वातन्त्र्य-सङ्ग्रामेण सहानुभूतिं प्रमाणयति। भारतस्य स्वातन्त्र्यानन्तरं जयपुरादि-राज्यानि भारतीय-सङ्घे सममिलन्, अनुपदमेव भूसम्पत्ति- (जागीर) धारकाणां ''जागीरा''ख्या सम्पत्तिरपि राजसात्कृता सर्वकारेण, किन्तु नेदमपि दृढ-सेवाव्रतिनोऽस्य जीवने विचलनमापादयामास यतो ह्यस्य जीवनं तपोनिष्ठानां, संयमिनां, निःस्पृहाणां मुनीनामिव सरलमाडम्बरहीनं चाऽभूत् प्रारम्भादेव। सोऽयं स्ववस्त्राणि स्वयं प्रक्षालयति स्म, प्रतिदिनं भ्रमणाय प्रयाति स्म, प्रतिदिनं संस्कृते किंचन लेख्यमेवेति व्रतमपि निसर्गतो धारयति स्म।

एतस्यैवेयं परिणतिर्यदनेन संस्कृते लिखितानां पृष्ठानां गणनाऽपि कर्तुमद्य न पार्यते। प्रभूतानामेतल्लिखितानां ग्रन्थानां, सम्पादितानां पत्रिकाणां, लेखानां, कथानामन्यासां च रचनानां पृष्ठसंख्या लक्षादप्यधिका सम्भवेदिति स्फुटं प्रतीयते। विविधभाषाऽभिज्ञोऽयं भारतीये शास्त्रीयसङ्गीते सुभृशं रुचिशीलोऽभूत्। आकाशवाण्याः प्रमुखसङ्गीताधिकारिणा ठाकुरजयदेवसिंहेनाऽनुरुद्धोऽयं 'ध्रुपद' शैल्यां गीतान्यप्यलिखत्, गजल, ठुमरी-प्रभृतिशैलीषु गेयपदानि त्वयमाबाल्यं प्रणयति स्मैव। सुदृढ-घटितगात्रस्यास्य व्यायामे रुचिः शैशवकालादेवाऽभूत्। जलसन्तरणं विशेषत उच्चास्थलेभ्यो जले कूर्दन-निमज्जनोन्मज्जनादिक्रीडासु (डाइव) चाप्यस्य कौशलं वार्धक्येऽपि जनान् विस्मापयति स्म। इदमेवाऽभूत् कारणं यन्मधुमेहादयो रोगा नैनमस्पृशन्। सप्ततिवर्षायुष ऊर्ध्वं हृदयरोगस्य लक्षणानि समुदभवन्। तथापि विविधकार्येषु लेखने च व्यापृतोऽयं न विश्रमं स्पृहयति स्म। यद्यपि नायं ग्रामान्तरस्य नगरान्तरस्य वा यात्राभिरोचयति स्म, तथापि सम्मेलनेषु, इतरेषु च समारोहेषु, व्याख्यानादेः कवितापाठस्य वा कृतेऽयं प्रमुख-साहित्यिकसंस्थाभिः सर्वकारैर्विश्वविद्यालयैश्चाऽऽमन्त्र्यते स्म, प्रयाति स्म च कतिधा तद्विधेषु प्रसङ्गेषु। कविसम्मेलनेषु तु प्रायश एवायं सभापतिपदमारोढुमामन्त्र्यते स्म।

एवं निरन्तरं साहित्य-सेवाव्यापृतस्याऽस्य निधनं ७५ वर्षावस्थायां जयपुरे हृदयाभिघात-वशात् ४ जून १९६४ दिनाङ्के समभूत्। सर्वकारेण, राज्यपालादिभिः, पत्रपत्रिकाभिः समग्रस्यापि देशस्य विद्वद्भिश्चाऽस्य निधनं साहित्यजगतोऽपूरणीया क्षतिरुदघोष्यत, शोकप्रस्तावाः पारिताः श्रद्धाञ्जलिविशेषाङ्कोऽपि 'भारती' संस्कृतमासिकेन प्राकाश्यत।

**साहित्य-सर्जना-**

प्रायः पञ्चसप्ततिवर्षात्मके समग्रेऽप्यायुषि भट्टमथुरानाथशास्त्रिणाऽविरतं संस्कृत-साहित्यसेवाव्रतं निरूढम्। कैशोरे वयसि हिन्दी-उर्दू-वङ्गभाषा-गुर्जरभाषादीनां ज्ञानमासाद्य तासां साहित्यमप्यनेनाऽधीतं, तत्र च यद् वैशिष्ट्यमनुभूतं तस्याऽवतारणा संस्कृतेऽपि कथं भवेदित्यस्य विशेषतः प्रयत्नोऽनेनाऽक्रियत।

तस्मिन् हि काले काव्य-जगति व्रजभाषाया महत्त्वमक्षुण्णमासीत्। अभूत् सेयं भाषा प्रायः समग्रस्यापि भारतस्य काव्यभाषात्वेन प्रतिष्ठिता पञ्चशताब्दीर्यावन्मध्यकालीनेतिहासे। कबीरदासस्य तुलसीदासस्य च समयादारभ्य रीतिकालं यावत् (प्रायः पञ्चदशीं शताब्दीमारभ्यैकोनविंशीं यावत्!) प्रमुखैः कविभिरस्यां सुललिता काव्यरचना व्यधायि। एतस्याः प्रमुखं छन्दोऽभूद् 'घनाक्षरी' त्याख्यं यत् 'मनहरण', कवित्त इत्यादि संज्ञाभिरप्यभिधीयते। अस्मिन् छन्दसि अन्त्यानुप्रासस्य, लयबद्धाया-श्छन्दोगतेः, दण्डक-सहजस्य विस्तारस्य च यश्चमत्कारः स काव्यमञ्चेषु कविसम्मेलनेषु च श्रोतृणां हृदयान्यावर्जयति स्म, अत एव छन्द इदं कवित्वस्य निकषायमाणममन्यत, तत एव 'कवित्त' इत्याख्याऽस्य प्रथिता।

भट्टमहोदयस्य पूर्वजा: संस्कृत-प्राकृतादिवद् व्रजभाषाया अपि सुकवयोऽभूवन्। तेषां परम्परामनुसरताऽनेनाऽपि व्रजभाषायां काव्यरचना प्रारब्धा किन्तु तस्या लालित्यं संस्कृतेऽवतारयितुं व्रजभाषाछन्द:सु संस्कृतकवितामप्ययमारेभे। उर्दू - प्रचलितासु 'गजल' गीतिषु प्रयुज्यमानानां वृत्तानां बन्धेऽपि संस्कृत-गीतिरनेनाऽवतारिता। तस्मिन् समये प्रथितासु ठुमरी-दादरा-प्रभृति-शैलीषु सरल-गेय-लयेषु चापि गीतयोऽनेन निबद्धा:। सर्वेणानेन सर्जना-व्यापारेणाऽस्य प्रतिपिपादयिषितमभूद् यत् संस्कृतमद्यापि जीविता भाषा, न मृता। जानन्ति काव्य-मर्मज्ञा यत् कविसम्मेलनेषु मुशायराख्यसभासु च गीतयो गजल-गीतयश्च श्रोतॄन् कथमाप्याययन्ति। शैल्यामस्यां निबद्धा गीतयो विशेषतश्च घनाक्षरीच्छन्दोबद्धा सानुप्रासा सुरम्या च कविता यदाऽनेन जयपुरीयविद्वत्सभासु श्राविता श्रोतृमण्डल्यामलौकिकमिव किञ्चित् कार्मणं प्रसारितवती तदा तत्कालीनैरधिकारिभि:, म.म.पं. गिरधरशर्मप्रभृतिभिर्विद्वद्भिश्चायं घनाक्षरीच्छन्द:सु काव्यरचनायै प्रोत्साहित:।

एतस्यैव परिणामोऽभूत् ''मञ्जुकवितानिकुञ्ज'' इत्याख्याया: काव्यशृङ्खलाया: प्रणयनं यस्यां ''मञ्जुनाथ''इति नाम्नाऽयं काव्यसङ्कलनत्रयम् प्रकाशयामास। ''साहित्यवैभवम्'' इत्याख्ये संग्रहे रसालङ्कारदिघटिता ऋतुवर्णन-नवरसवर्णन-प्रेम-गीति-नीति-अन्योक्ति-प्रभृतिविषयिणी कविता १९३० ई. वत्सरे निर्णय-सागरमुद्रणालये मुद्रापयित्वाऽनेन प्रकाशिता। जयपुरनगरस्य तद्राजवंशस्य नागरिकाणामुद्यानानामन्येषां च स्थलानां वर्णनपरा काव्यरचना १९४७ ई. वर्षे 'जयपुरवैभवा' ख्यग्रन्थे प्राकाशि। भक्तिरचनानां संग्रह: १९५७ ई. वर्षे 'गोविन्दवैभव' नाम्ना गोरखपुरस्थेन गीता प्रेसेन प्रकाशित:। एषु काव्येषु व्रजभाषाच्छन्दसां प्रयोगस्त्वभूदेव, उर्दूच्छन्दसां संस्कृतच्छन्दसामपि सर्वेषां नर्कुटकाश्वघाटी-मन्दाक्रान्ता-शिखरिण्यादीनां प्रचुर: प्रयोगोऽस्ति। १९५७ ई. वर्षे गोविन्दवैभवं यदा प्रकाश्यमानमासीत्, अनेनाऽयं स्वकीयश्चरम: कविताग्रन्थ इति घोषितमुक्तं च यदाजीवनमहं नरवर्णनादिषु, शृङ्गारवीरादिरसनिबन्धने च स्ववाणीं व्यापारयन्नभूवम्। सम्प्रति गोविन्दगुणवर्णनेन पावितां वाणीं नाहं नरकथयाऽऽविलीकरिष्यामि। तत आरभ्याऽनेन गद्य एव लेखनी व्यापारिता, नैकमपि पद्यं लिखितम्। एवं विविध-विषयक-काव्यरचनया, नवीनच्छन्दसां संस्कृतेऽवतारणया चाऽस्य कवित्वयश: सर्वत्र प्रथितं, कविशिरोमण्यादय उपाधयश्च संस्कृत-संस्थाभिरदीयन्त। काव्यरचनाऽतिरिक्तेऽपि विविधे क्षेत्रेऽस्य साहित्यसर्जना सुभृशमुल्लेखनीया।

सूचितचरमिदं यत् संस्कृताध्ययनेन समकालमेव व्रजभाषासाहित्यस्य हिन्दीभाषाया:, बङ्गभाषाया:, आङ्ग्लभाषायाश्चाप्यध्ययनमनेन स्वकीयरुचिवशाद् विहितम्। आसीत्तदा जयपुरनगरे व्रजभाषाकवीनां राजसम्मानितानां कवीश्वराणां च भूयान् समुदाय:। तत्प्रेरणया 'कविमण्डल' इत्याख्या हिन्दी-कवि-संस्था तदानीं प्रचलति स्म यस्या: सक्रिय: कार्यकर्ताऽभूदयम्। हिन्दीसाहित्य रात्रिपाठशाला-नाम्नीं सायङ्कालीनां पाठशालामप्यसौ स्थापयामास यस्यां छात्रा: हिन्दी-साहित्यमपठन्, हिन्दीसाहित्य-सम्मेलन (प्रयाग)स्य प्रथमा-

विशारद-साहित्य-रत्नादि-परीक्षासु च प्राविशन्।

**पत्रकारता-**

संस्कृत-साहित्यसेवा त्वनेन छात्रावस्थात एव प्रारब्धाऽभूत्। जयपुरीयो महाराजसंस्कृत-कालेजस्तदानीं भारतविश्रुतं वैदुष्यकेन्द्रमभूद्यत्र विविधशास्त्र-निष्णाता विद्वांसोऽध्यापकपदमलमकुर्वन्। छात्रा अपि तदानीं भूरि- प्रतिभाशालिनोऽभूवन्। एवंविधे प्रतिभोद्दीपके वातावरणे कालेजीयैः कतिपयैःप्रतिभाशालिभिश्छात्रैः ''संस्कृत-चन्द्रिका'' ऽऽख्यायाः संस्कृतसाहित्यपत्रिकायाः साहित्यरचनारुचिप्रेरितैः १९०४ ई. वत्सरे निश्चितं यज्जयपुरादपि संस्कृतस्य मासिकपत्रं किञ्चित्प्रकाशमेतु। एतस्याऽभूत्परिणामो यत् ''संस्कृतरत्नाकर'' नामकं मासिकपत्रं जयपुरात्प्राकाश्यत येन संस्कृत-पत्रकारताया इतिहासे नवीनस्य युगस्यावतारणा कृता।

व्यतियाति काले पत्रमिदमखिलभारतवर्षीय - संस्कृतसाहित्यसम्मेलनस्य मुखपत्रत्वेन स्वीकृतिमलभत। तदिदं प्रायोऽर्धशताब्दीं यावज्जयपुरात् प्राकाश्यत, ततः काशीतः कानपुरतश्च प्रकाशं लब्ध्वा दिल्लीनगरीं मुख्यालयत्वेन प्रापत्। एतस्य संस्थापकेषु युवकेषु म.म. गिरधरशर्मा चतुर्वेदी, राजगुरु पं. चन्द्रदत ओझा, व्याकरणाचार्यः सूर्यनारायणशर्मा भट्टश्रीमथुरानाथः शास्त्री च प्रमुखा अभूवन्। सर्वेऽप्येते विद्वांसस्तदानीं कालेजीयच्छात्राः स्नातका वा अभूवन्। सर्वप्रथमोऽस्याङ्को ''जयपुर-विद्वन्मण्डल- द्वारा सम्पादित'' इति मुद्रिताक्षरोऽभूत् किन्त्वस्य सम्पादने 'सम्पादकीय' लेखने च प्रमुखतया सोऽयं किशोरो भट्टमथुरानाथ एव प्रामुख्येन प्रवृत्तोऽभूत्। प्रथमं सम्पादकीयमप्ययमलिखित्। परस्तात् सहकारि-सम्पादकत्वेन लेखांष्टिप्पणीश्चालिखत्। तदनु प्रभूतं कालं प्रधान-सम्पादकोऽस्थात्। प्रायः पञ्चाशद्वर्षावधावस्मिन् द्विः पर्यायद्वये, पत्रमिदं प्राकाशि। प्रायः सर्वस्मिन्नप्यस्मिन्नवधौ मथुरानाथशास्त्री सम्पादकरूपेणाऽनेन सह सम्बद्धोऽस्थात्। अनेन प्रसङ्गेनाऽयं संस्कृतपत्रकारतायां युगप्रवर्तनमिवाऽकरोत्। वङ्गभाषायां निपुणेन, तत्साहित्याध्येत्राऽनेन तदानीं वङ्गभाषायाः ''प्रवासि'' - प्रभृतीनां विश्वप्रथितानां मासिकपत्राणां, डॉ. रामानन्दचट्टोपाध्यायप्रभृतीनां सम्पादकाचार्याणां च शैलीं संस्कृतेऽवतार्यानेके नूतनाः स्तम्भा, विधाः, सरण्यश्च संस्कृते समारब्धाः। 'विनोद-वाटिका' इति शीर्षकेण व्यङ्ग्यविनोदानां (चुटकुले), ''संवादाः सम्पादकाभिप्रायाश्च'' इति शीर्षकेण सामयिकघटनानां तत्सम्बन्धे सम्पादकीयटिप्पणीनां वङ्गमासिकपत्र- 'प्रवासि' सम्पादकादिभिः प्रचालितस्य 'कष्टिपाथर' (निकष) स्तम्भस्याऽनुरूपमेव 'साहित्यकुसुमवाटिका' शीर्षकेण नूतनसाहित्य-समालोचनस्य च स्तम्भानयं नियतीकृतवान्, लघुकथाः, यात्रावृत्तानि (रिपोर्ताज), काल्पनिककथाः (फंतासी), एकाङ्कनाटकानि, ललितनिबन्धान्, शोधलेखान्, लघूपन्यासान् (धारावाहिकरूपेण), अन्याश्च विविधा नूतनविधाः समावेश्य पत्रस्याऽस्य माध्यमेन सोऽयं संस्कृतपत्रकारतायां नवीनानि कीर्तिमानान्यरयचत्।

आदर्शरमणी, अनादृता, असमसाहसम् इत्यादयो बहवः संस्कृतोपन्यासा वङ्गभाषीयोपन्यास-शैली-प्रेरितेनाऽनेन लिखिताः पत्रेऽस्मिन् धारावाहिक-शृङ्खलासु प्राकाश्यन्त। बहवो लेखकाः प्रेरिताः स्थापिताश्चानेन, पत्रस्याऽस्य बहवो विशेषाङ्काः विषय-विशेषमवलम्ब्य प्रभूतं साहित्यं प्रस्तुवन्तः प्रकाशमभजन्। वेदाङ्कः (विद्यावाचस्पति-श्रीमधुसूदनओझा-महाभागाय समर्पितो वेदविद्याविवेचनपरः) आयुर्वेदाङ्कः (स्वामिलक्ष्मीराम-भिषगाचार्याय समर्पितः), शिक्षाङ्कः (शिक्षापरिष्काराय प्रकाशितः), दर्शनाङ्कः (म.म.पं. गिरिधरशर्मणे समर्पितः) इत्यादयो विशेषाङ्का ऐतिहासिकं महत्त्वं दधति। इत्थं हि सन् १९०४ वर्षादारभ्य ई. १९४९ वर्षपर्यन्तं, यदवधीदं पत्रं जयपुरात्प्राकाश्यत, सोऽयं सम्पादकत्वमस्य निरवहत्। (कतिपयं कालं व्याकरणाचार्याः पं. सूर्यनारायणशर्माणोऽपि सम्पादकत्व-मन्वतिष्ठन्)। १९५० ई. वर्षात्काशीं प्रति प्रस्थितवत्यस्मिन् पत्रे १९५२ ई. वत्सरे जयपुरात् प्रकाश्यमानाया 'भारती' संस्कृतमासिक-पत्रिकायाः सम्पादनमनेनाऽऽरब्धं यन्मृत्युपर्यन्तं निर्व्यूढम्।

**अनुवादाः -**

विविधभाषागतस्य साहित्यस्य संस्कृतेऽनुवादमाध्यमेनावतारणाऽप्यस्य प्रमुखमवदानम्। प्राकृतभाषायाः प्रसिद्धस्य मुक्तकसंग्रहस्य 'गाथासप्तशतीति' ख्यातस्य हालकविविरचितस्य वाचनं कुर्वाणेनाऽनेनाऽनुभूतं यत्प्राकृतमिदानीं न तावत् परिचितमिति प्राकृतगाथास्त्वरितमेव न हृदयङ्गमा जायन्ते। यदि तासां संस्कृते समच्छन्दोऽनुवादः स्यात्तर्हि सजीवता सुभृशमनुभूयेत। एतस्याऽभूत् फलं यत्सर्वासामपि गाथानां संस्कृते निबन्धनं कृत्वा, आलोचनात्मक-तुलनात्मक-विवेचनपरकया-भूमिकया सह ''संस्कृत-गाथा-सप्तशती''ति शीर्षकेण तामिमां कृतिमसौ निर्णयसागरमुद्रणालयात् प्रकाशयामास। अस्या व्यङ्ग्य-सर्वङ्कषानाम्नीं टीकामप्ययमलिखत् या सहैव प्राकाशि १९३३ ई. वर्षे।

व्रजभाषाकवेः विहारिणः सप्तशतीमप्ययमनूदितवान् संस्कृते दोहाच्छन्दःस्वेव। एवंविधानि संस्कृतदोहाच्छदांसि बहूनि 'विहारिविलास' इति शीर्षकान्तः 'साहित्यवैभव' काव्ये प्रकाशितानि सुबहु चर्चितान्यभूवन्। वङ्ग-भाषाया बहूनामुपन्यासानां हिन्दीकथाकाराणां प्रेमचन्द-प्रभृतीनां बह्वीनां लघुकथानां, वङ्गीयानां गल्पानां (लघुकथानाम्) निबन्धानामन्यासु च विधासु विलिखितस्य प्रभूतस्य साहित्यस्यानुवादा अनेन विहिताः। एवंविधसाहित्यस्यच्छायां गृहीत्वा तदनुहारिण्यां शैल्यां संस्कृते तद्विधा रचना विधायानेन संस्कृतेऽभिव्यक्तिविधानां विस्तारं चाऽऽनायितुं प्रयतितम्।

**संस्कृत-भाषाया जीवितत्वख्यापनम्-**

एवं हि सर्जनात्मकलेखनेन पत्रकारतया च संस्कृते नूतनं जीवनं सञ्चारियितुमस्य प्रयासाः सोद्देश्या अभूवन्। तदानीं हि संस्कृते विदुषां वर्गद्वयमभूत्। एको वर्गोऽभूत् पाश्चात्यशोधपरम्पराप्रभावितानां विदुषां ये संस्कृतमन्यान्यप्राच्यभाषावत् क्लासिकलभाषां मत्वा

तस्यामनुसन्धानस्य प्राच्यविद्याशोधस्य च क्षेत्रमेवाऽपश्यन्, आङ्ग्लभाषामाध्यमेन, इतर-भाषासु वा तस्या दर्शनानां शास्त्राणां प्राचीन-साहित्यस्य गवेषणामनुवादान् विवेचनां चैव फलप्रदाममन्यन्त। इतरो वर्गोऽभूत्तेषां विदुषां ये संस्कृतं मातृभाषावद् भाषन्ते स्म, जीवितां जाग्रतीं च भाषाममन्यन्त, तस्यां मौलिकं सर्जनात्मकं च लेखनमनवरतं प्रचाल्यान्यान्याऽऽधुनिक-भारतीयभाषावत्तामप्याधुनिकीं भाषां मत्वा तस्यां पत्रपत्रिकाणां प्रसारं, कविसम्मेलनाऽऽदीनामायोजनं च सार्थकमनुभवन्ति स्म, जीवितभाषावत् प्रतिष्ठापयितुं च तामाजीवनं प्रायतन्त। भट्टमहोदया अस्यैव वर्गस्य विद्वांसोऽभूवन्।

अत एवाऽसकृत्ते एवंविधाः स्थितीरन्वभवन् यदा पूर्वमुल्लिखितस्य वर्गस्य शोधविद्वद्भिः संस्कृतभाषा केवलं प्राचीना भाषा व्यपदिष्टा, तस्यां नूतन-साहित्य-निर्माणमकिञ्चित्करमिव च प्रतिपिपादयिषितम्। एंवविधासु स्थितिषु साऽऽटोपं, विविधैः प्रमाणैः प्रत्यक्षमनुभावितैश्च चमत्कारैरेते संस्कृतामाधुनिकभाषावत् जीवितां साधयन्ति स्म, एवंविधानि बहून्यान्दोलनानि च परिचालयन्ति स्म यैः संस्कृतभाषा पूर्णतो जीविता सिध्येत्।

एवंविधेषु प्रयत्नेष्वेकोऽभून्नूतनविधासु, नूतनच्छन्दस्सु नूतनविषयेषु च साहित्यसर्जना, अपरोऽभूद्विविधनवयुगीन-साहित्यस्य विभिन्न-भाषाभ्यः संस्कृतेऽनुवादः, इतरश्च संस्कृतेऽभिव्यक्ति-पद्धतीनां विस्तारः।

सन् १९३० वत्सरे वाराणस्यां सञ्चजातेऽखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनस्याऽ-धिवेशनेऽनेन प्रदर्शितं यदेकं वाक्यं संस्कृते कथं परःशतं प्रकारैर्वक्तुं शक्यते। एतेषु कतिपयानि वाक्यानि नवम्बर १९३९ मासस्य ''सुप्रभातम्'' (वाराणसी) इत्याख्ये मासिकपत्रे 'संस्कृतभाषाया महत्त्वम्' 'इति शीर्षकान्तर्गतं प्रकाशितान्यपि। एतदतिरिक्तं तैः पत्र-पत्रिकासु लेखमालामाध्यमेन, विदुषामभिमतानि सङ्कलय्य तानि च प्रकाश्य प्रत्यक्षमेकमान्दोलनमपि प्राचाल्यत यत्र 'किं संस्कृतभाषा मृतभाषा ?' इति प्रश्नमुद्भाव्य तस्या जीवितत्वमख्याप्यत। संस्कृतरत्नाकर (जयपुर) मासिकपत्रे (वर्षम् १२ अंकः ४, वर्षम् १४ अंकः९) ''गन्धर्वसेनस्य स्वर्गयात्रा'' इति शीर्षकेणैतद्विषयकं लेखमेकं लिखित्वा संस्कृतस्य मृतभाषात्वप्रवादस्य निःसारतामेते स्फुटीचक्रुः।

वाराणस्याः शोधमासिके ''सारस्वती सुषमा'' इत्याख्ये (सप्तम-वर्षस्य) द्वितीयेऽङ्के ''अपि नाम सेयमव्यावहारिकी'' इति शीर्षकेण संस्कृतभाषाया जीवितभाषात्वमेते साधयामासुः।

एवं हि संस्कृते सर्जनात्मकस्य लेखनस्य, पत्रकारताया नूतनविधानामन्येषामभिव्यक्ति-प्रकाराणां च संस्कृतेऽवतारणस्यैकमुद्देश्य-मिदमप्यभूदेषां दृष्टौ, यदनेन संस्कृतभाषा विश्वस्य भारतस्य चाऽन्यान्या-ऽधुनिकभाषाणां समष्टौ जीविताया आधुनिक्याश्च भाषाया रूपे प्रतिष्ठितं स्थानं लभेतेति।

**सम्पादनं टीकालेखनं च-**

पत्रसम्पादनेन साहित्यिक-पत्रकारताक्षेत्रे भट्टमहोदयैर्नवीन-युगावतारणा यथा विहिता, तथैव प्राचीनग्रन्थपरिष्कारे, सम्पादने, भूमिकालेखने, टिप्पणादिलेखने चापि सुमहत्परिश्रान्तम्। पूर्वमुल्लिखितं कादम्बर्याः सम्पादनं 'चषक' -टिप्पणीलेखनं रसगंगाधरस्य पाठपरिष्कारः, ''सरला'' टीकालेखनं, तदतिरिक्तं गीतगोविन्दस्य सम्पादनं पादटिप्पणीलेखनं चानेन निर्णयसागर-मुद्रणालयानुरोधेन विहितम। ग्रन्थत्रयमिदं तस्मादेव मुद्रणालयात् प्रकाशितं, संस्कृतविद्वत्सु बहूनि वर्षाणि लोकप्रियं सुप्रसृतं चाभूत्। सेवानिवृत्त्यनन्तरमनेन, स्वपूर्वजेन श्रीकृष्णभट्टेन लिखितस्यैतिहासिक-महाकाव्यस्य ''ईश्वरविलास'' नामकस्य दुर्लभा पाण्डुलिपिः पुणेस्थभाण्डारकरशोधप्रतिष्ठानादधिगत्य सम्पादिता, विस्तृतभूमिकया, ऐतिहासिक-टिप्पणीभिः, स्वनिर्मितया ''विलासिनी'' टीकया च सह राजस्थान-प्राच्य-विद्या-प्रतिष्ठानात् (जोधपुरात्) प्रकाशिता। तदिदं महाकाव्यं राष्ट्रिय-संस्कृत-संस्थानस्य जयपुर-परिसरे साहित्यविभागीयप्राध्यापकेन डॉ० रमाकान्तपाण्डेयेन हिन्दीभाषायामनूद्य २००७ ई. जयपुरात् प्रकाशितमभवत्। यत्र भट्टमहाभागानां विलोसिनी टीकाऽपि संयोजिताऽस्ति। श्रीकृष्णभट्टलिखितायाः पद्यमुक्तावल्याः (मुक्तकसङ्ग्रहस्य) टीका ''गुणगुम्फनिका'' -ऽनेन लिखिता, ग्रन्थस्य सम्पादनं भूमिकया सह कृतं, ग्रन्थश्चायमपि राजस्थान-प्राच्य-विद्या-प्रतिष्ठानात्, प्रकाशितः। श्रीकृष्णभट्टस्य छन्दः शास्त्रग्रन्थो वृत्तमुक्तावल्याख्योऽपि पुणेस्थभाण्डार-करशोधसंस्थानादानाय्य सभूमिकोऽनेन राजस्थान-प्राच्य-विद्या-प्रतिष्ठानात् प्राकाशि। शिलालेखरूपेण च यानि दानपत्राणि प्राचीनैर्नरेशैः सुललितसंस्कृतभाषायां विलेखितानि, तेषामध्ययनं संस्कृतपाठ्यक्रमे समावेशितमभूद्विभिन्नै राज्यैः। एवंविधस्याऽध्ययनस्य कृते पाठ्यपुस्तकरूपेण कतिपयशिलालेखादीनां सङ्कलनं, सम्पादनं, टिप्पणीलेखनं च विधाय 'शिलालेखललन्तिका' नाम्नाऽयं ग्रन्थो निर्णयसागरात्प्राकाशि भट्टमहोदयैरिति पूर्वं सूचितमेव।

**नाट्यकृतयः -**

काव्यलेखनेऽस्य नैपुण्यं तु विश्रुतमेव, अनेन महाराजसंस्कृतकॉलेजे साहित्य-विभागाध्यक्ष-पदमधितिष्ठता 'उत्तररामचरित' नाटकस्य मञ्चोपयोगि रूपान्तरणं विधाय तस्य नाटकस्य कालेजीयनाट्य-संघद्वारा रामप्रकाशाख्ये प्रेक्षागृहे मञ्चावतारणे सुमहद् योगदानमनुष्ठितम्, मध्ये मध्ये स्वनिर्मिताः संस्कृतगीतयोऽन्तर्वेशिताश्च (१९३१ ई. वर्षे)। ततश्च महाभारत-कथामाधारीकृत 'पाण्डव-विजया'ख्य-नाटकस्य मञ्चोपयुक्ता पटकथा विविधप्राचीन-नाटकानामाधारेण रचिता, १९४० ई. वर्षे तस्मिन्नेव नाट्यगृहे मञ्चिता च। जयपुरे आकाशवाणीकेन्द्रस्य प्रारम्भादनन्तरं तदधिकारिभिरनुरुद्धोऽसौ ''मञ्जुला''ख्यं ध्वनिनाट्यं लिलेख। प्रसारितमिदं जयपुरीयाऽऽकाशवाणीकेन्द्रात् १६/१/५७ दिनाङ्के ८/८/५८ दिनाङ्के च तदेतदपि मञ्जुनाथगद्यगौरवम्' इत्याख्ये ग्रन्थे प्रकाशितम्।

**गद्य-रचनाः -**

संस्कृत-गद्येऽप्यस्य लेखनं विपुलमस्ति। शताधिकाः संस्कृतलघुकथाः, दशाधिका

उपन्यासाः, बहवो ललिता-निबन्धाः, काल्पनिककथाः (फन्तासी), व्यङ्ग्यलेखाः, यात्रावृत्तानि, रूपककथाः (एलेगरी), प्रतीक-कथा, विनोदा (चुटकुले) अन्यासु च विधासु लिखिताः सर्जनात्मकरचना गणनातीता एव। शोधलेखाः समालोचनात्मकलेखाः, साहित्यालोचनटिप्पण्यः, सामयिक-टिप्पणानि, समाचारसारादयश्चापि भूरिशो व्यलेख्यन्ताऽनेन। वाराणसी-जयपुर-दिल्ली प्रभृतिकेन्द्रेभ्यः प्रकाशितेषु सर्वेष्वपि पत्रेष्वस्यैवंविधा रचनाः प्राकाश्यन्त यासां सूची सुदुष्करा साङ्गोपाङ्गत्वेन निर्मातुम्। तथापि बहुभिः शोधार्थिभिरेवं-विधरचनासु बह्वीनां सूचीकरणस्य प्रयत्नाः सन्त्यनुष्ठिताः। तत एवैवंविधा सूची शक्येत द्रष्टुम्।

**हिन्दी रचनाः -**

हिन्दीभाषायामप्यनेन बहवो ग्रन्थाः, लेखाः, लघुकथाः, कविताश्चालिख्यन्त। वाल्मीकीये रामायणे विभीषण-शरणागति-प्रसङ्गमवलम्ब्य सुरुचिरं विवेचनात्मकं नूतनमेव पन्थानमनुसरत् पुस्तकं 'शरणागतिरहस्य' नाम्नाऽऽनेन लिखितं यद् गीताप्रेसात् (गोरखपुर) प्रकाशितं लोकप्रियमभूत्। 'सरस्वती'- 'माधुरी'-'कल्याण'-जयभूमि-राष्ट्रभाषा-प्रभृति-पत्र-पत्रिकासु लिखिता अस्य लेखा लघुकथाश्च हिन्दीजगत्यप्येनं सुविदितमकार्षुः। विविधेष्वभिनन्दन-ग्रन्थेषु तत्सम्पादका एनमुपसृत्य विविधविषयकान् लेखानस्य गृहीत्वा प्रकाशितवन्तः।

**समाजे सम्मानः -**

इदमभूत्स्वाभाविकं यदस्य सुदीर्घायै संस्कृतसैवायै परितुष्यद्भिर्विद्वद्भिः, संस्थाभिः, सर्वकारैश्च विविध-सम्मानोपाधिप्रदानद्वारा, सदस्यताप्रदानद्वारा चास्य सम्माननं क्रियेत। अतः सेवाकाले एवायं वाराणस्यादिविविधविद्याकेन्द्राणां परीक्षकः, प्रमुख-वक्ता, समारोहाणामध्यक्षो, मुख्यातिथिर्वा निर्धार्य समामन्त्रितः सादरम्। वाराणस्यां सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य स्थापनानन्तरं तस्य दीक्षान्तसमहारोहावसरे समायोजितस्याखिल-भारतीय-कविसम्मेलनस्या-ध्यक्षपदे, अखिलभारतीय-संस्कृत-साहित्यसम्मेलनेन समायोज्यमानानां कविसम्मेलना-नामध्यक्षपदे, राजस्थान-संस्कृत-साहित्य-सम्मेलनस्य बीकानेरनगरेऽधिविष्टस्य द्वितीया-धिवेशनस्याध्यक्षपदे (१९५०ई.), विविधानामन्येषां समारोहाणां चाध्यक्षपदेऽसकृदयं सानुरोधं प्रतिष्ठापितोऽभूत्। राजस्थान-सर्वकारेण स्थापितायाः (सन् १९५७ ई.) साहित्य-अकादम्याः संस्थापकसदस्योऽयमभूत्। राजस्थान-राज्येन संस्कृत-शिक्षायाः नीतिनिर्धारणाय नियुक्ताया विशेषज्ञसमितेः संस्कृत-मण्डलस्य च सदस्योऽयमभूत् (१९५२-१९६२)। बड़ौदा-विश्वविद्यालयेन रससिद्धान्तानां काव्यसिद्धान्तानां च विषये व्याख्यानानि विधातुमयमा-मन्त्रितोऽभूत् (१९५६ई.)। उज्जयिन्यां कालिदाससमारोहस्य परम्परां प्रारब्धवती कालिदास-समितिरेनं सदस्यं निर्माय समारोहावसरे समायोज्यमानानां कविसम्मेलनानामध्यक्षं च विधाय स्वगौरवमेधितवती। तस्याः प्रमुखः श्रीसूर्यनारायणव्यासस्त्वेनम् "अभिवनकालिदास" पदेनैव सम्बोधयति स्म।

सन् १९३६ ई. वत्सरे जयपुरेऽधिविष्टेन (पञ्चविंशाधिवेशने) अखिलभारतीय-संस्कृत-साहित्य-सम्मेलनेनास्मै कविशिरोमणिः इत्युपाधिः, वाराणसीस्थ-भारतधर्म-महामण्डलेन साहित्यवारि-धित्युपाधिः, बम्बईस्थ-वेल्लनाटीय-तैलङ्गसभया ''कविसार्वभौम'' इत्युपाधिश्चास्मै स्वर्णपदक-सम्मानोत्तरीयादिभिः सह सादरमुपायनीकृतः। १९६१ वत्सरे यदा राजस्थान-सर्वकारेण संस्कृतविदुषां कृते पुरस्कारयोजना प्रारभ्यत, तदा सर्वप्रथममस्मै त्रिसहस्रमुद्रात्मकं पुरस्कारं प्रदाय योजनाया अस्याः शुभारम्भो विहितः। बह्वीभिः संस्थाभिर्मरणोत्तरमस्मै सम्मानाः प्रदत्ताः।

**निःस्पृहता -**

पूर्वमुल्लिखितमेव यद् भट्टमहोदयो जयपुर-राज्येन प्रदत्तायाः प्रभूतभूसम्पत्तेः स्वामी आसीदिति नानेनार्थकष्टमनुभूतं यौवने। बाल्ये तु सुमहतीमार्थिकीं विपत्तिं सोढ्वा, स्वमतिबलेन विविधान् सङ्कटानुत्तीर्य स्वकीयं राजसम्मानितं संस्थानमनेन कथं सङ्कटादुद्धृतमित्यस्य वर्णनमनेन 'साहित्यवैभव' काव्ये कृतमस्ति। द्वारकानाथभट्टस्य सुतोऽयं यदा सुन्दरलालभट्टस्य दत्तकोऽभूत्तदानेन ज्ञातं यत् समग्राऽपि भूसम्पत्तिः पूर्वजैः बन्धकतया उत्तमर्णानामधिकारे निक्षिप्ताऽस्ति, न कोऽप्यायः, ऋणं वर्धते यतस्तस्य कुसीदमनुदिनं प्रवर्धते। निःसन्तानं दिवङ्गतेन श्री सुन्दरलालेन, अन्यैश्च स्वेच्छाचरणा-नुरागिभिरनवधानिभिः पूर्वजैः स्वकीयकार्यार्थं विभिन्नेभ्यो जनेभ्यः ऋणानि गृहीतान्यभूवन्, तस्यायं परिणामोऽभूत्। प्रबन्धका भ्रष्टाचरण-परवशा मध्ये सुबहु वित्तं भुञ्जते स्म। अनेन सर्वापि व्यवस्था कैशोर्यादेव सावधानं परीक्षिता, प्रबन्धो निजसात्कृतः, भूसम्पत्तिर्बन्धकत्वान्मोचिता, ऋणं परिशोधितम्, आयः संवर्धितः। एवं प्रायस्त्रिंशद्वर्षात्मके वयस्ययं स्व-निर्भर ऋणमुक्तश्चाजायत। तदनन्तरमधिके-नोत्साहेन साहित्यसेवापरः समजायत।

एवं च साहित्यसेवातः पुस्तकलेखनादिकार्येभ्यश्च नायं कदापि किञ्चन लिप्सुरभूत्। एतस्य परिणामोऽपि तथाविध एवाभूत्। विपुलग्रन्थ-लेखकेनाऽप्यनेन नैकमपि रूप्यकं कस्मादपि प्रकाशकाद् 'रॉयल्टी' रूपेणाधिगतम्। निर्णयसागर-मुद्रणालयः सम्पादनस्य नाममात्रं किञ्चन पारिश्रमिकं प्रारम्भ एव ददाति स्म, न स्वामिस्वं (रॉयल्टीं) निर्धारयति स्म। राजकीयपाठ्यपुस्तक-मण्डलेन यत् संस्कृतपाठ्यपुस्तकमनेन लेखितम्, तस्य पारिश्रमिक-रूपेण सकृदेकशः कश्चन राशिरवश्यमस्मै प्रत्तोऽभूत्, 'संस्कृतसुधा' -ख्यपाठ्यपुस्तकस्य लाभस्तु यः कोऽप्यभूत्, मध्यस्थव्यक्तिभिः सानन्दं भुक्तः।

**परिवेशः परिसरश्च-**

यस्मिन् युगे भट्टमहाभागैराजन्म संस्कृतसेवाव्रतं निरूढं तद् युगमेवंविधानां निःस्वार्थ-सरस्वती-सेवकानामेवाऽभूत्। अनवरतसाहित्य-सर्जनासत्रमेतदेभिर्न कस्मैचिल्लाभलोभाय, न वा यशोलिप्सया, न च कस्यचन बन्धनेन प्रेरणया वा परिचालितम्, आसीत्सा काचनान्तःप्रेरणैव यया खल्वेभिर्निश्चितमासीत् यत् प्रतिदिनं संस्कृते किञ्चन लेखनं विना भोजनं नैव करणीयम्। वाराणस्यां जयपुरेऽन्येषु च संस्कृतविद्याकेन्द्रेष्वभूवंस्तदानीमेवंविधा

एव निःस्वार्थसंस्कृत-सेवका मनीषिणो येषां पुण्यान्यद्यास्माभिरुपभुज्यन्ते। भट्टमहाभागानां ज्येष्ठतनुजत्वसौभाग्येन ममाऽप्यभूदवसरस्तदानीन्त-नानामेवंविधानां मनीषिणां दर्शनस्य, तेषां वैदुष्य-सुरभितासु चर्चागोष्ठीषु प्रवेशस्य, यासु न राजनीतिर्न व्यवसायो, न वाऽन्यविधं किञ्चन वस्तुजातमभूच्चर्चाविषयः, संस्कृतसम्बन्धिन्यश्चर्चाः, शास्त्रसन्दर्भ-संवलिता एव विनोदाः, काव्यालापसन्दानिताः परिहासाः एवंविधा एव व्यासङ्गास्तेषां समवाये, जलविहारोपवनविहारादिषु सर्वविधेषूत्सवावसरेषु चाभूवन्नित्यमधुना स्मरामि। कथं युगमेवेदानीं विपरिवृत्तम्। आस्तां तावत्।

भट्टमहोदयानां सुहृत्परिकरे जयपुरीयाः स्वामिलक्ष्मीराममहाभागा आयुर्वेदमार्तण्डाः, म.म.पं. गिरिधरशर्माणः, पं. चन्द्रधरगुलेरिणोऽनुजाः पं. सोमदेवगुलेरिणः, राजगुरु-चन्द्रदत्तमैथिलाः, पं. सूर्यनारायणशर्माणः, प्रशासकाः श्री श्यामसुन्दरपुरोहिताः, वेदविज्ञाः पं. मोतीलालशर्माणः, पं. गिरिजाप्रसादद्विवेदाः, कलिकातास्थाः (शेखावाट्यभिजनाः) श्रीझाबरमल्लशर्माणः, पुणेस्थाः डॉ. पी.के. गोडेमहोदयाः, बम्बईस्था गोस्वामिगोकुलनाथाः पं. पुरुषोत्तमचतुर्वेदाश्च, वाराणसेया नारायणशास्त्रिखिस्तेमहोदयाः, रायकृष्णदासमहोदयाश्च, वाङ्गा असितकुमारहालदाराः (प्रसिद्धाश्चित्रकारा ये जयपुरीयकला-कालेजस्याध्यक्षा अभूवन्) दाक्षिणात्याः पं. पट्टाभिरामशास्त्रिणः, झालरापाटनस्था नवरत्नगिरिधरशर्माणः अन्ये च विभिन्नेषु प्रान्तेषु स्थिता विद्वांसः परिगणयितुं शक्यन्ते। पं. चन्द्रधरगुलेरि-णाऽस्य कवित्वचर्चा मित्रत्वेन बहुत्र कृताऽभूत् (''पुरानी हिन्दी'' पृ. १६, नागरी प्रचारिणी, काशी)।

एतेषां शिष्येषु, स्व. गणेशरामशर्माणः, स्व. पं. वृद्धिचन्द्रशास्त्रिणः, स्व. वैद्यमुकुन्ददेवाः, पं. गोपालनारायणबहुरा, स्व. दीनानाथ त्रिवेदी मधुपः, उद्योगपतिः स्व. श्री कन्हैयालालतिवाडी, प्रशासकाः श्री शेरसिंह-द्वारकानाथपुरोहितप्रभृतयः शिक्षकाः स्व. श्रीराधागोविन्दशर्मप्रभृतयः, जननेतारः श्रीसिद्धराजढड्ढा-पूर्णचन्द्रजैन-जवाहरलालजैन-युगलकिशोरचतुर्वेद-हीरालालशास्त्रिप्रभृतयो बहवः सन्ति ये महाराजाकालेजाख्ये पाश्चात्य-पद्धत्यनुसारिणि महाविद्यालयेऽथवा महाराजा संस्कृतकालेजाख्ये पाश्चात्य-पद्धत्यनुसारिणि महाविद्यालयेऽथवा महाराजा संस्कृतकालेजाख्ये-प्राच्यपद्धत्यनुसारिणि महाविद्यालये, वा गृहे भट्टमहोदयात्संस्कृतं साहित्यशास्त्रं वाऽधीतवन्तः।

आसां पंक्तीनां लेखकोऽपि तत्सुतत्वेन तेभ्यो न केवलं काव्यशास्त्रकाव्यरचनान्यायवैशेषिक-सांख्य-पुराणेतिहासादिविषयान् अपि तु व्रजभाषाकाव्य-हिन्दी-कवितादि-विषयानपि तदाशीर्वचोभिः स्नेहसम्भारेण च सहाऽध्यगीष्ट, स एव चाऽऽशीःपुण्यराशिरद्य तस्य समग्रो निधिः।

**देवर्षि-कलानाथशास्त्री**

------

# भूमिका

मञ्जुनाथग्रन्थावल्याः प्रथमभागस्य त्रिषु खण्डेषु भट्टमथुरानाथशास्त्रिणां पद्यरचनाः प्रकाशिताः। तत्र प्रथमभागस्य प्रथमे खण्डे जयपुरवैभवं गोविन्दवैभवञ्चेति द्वे काव्ये द्वितीये खण्डे साहित्यवैभवं तृतीये च संस्कृतगाथासप्तशतीति चत्वारि काव्यानि सङ्कलितानि। मञ्जुनाथग्रन्थावल्या द्वितीयभागोऽयं तेषां गद्यरचनानां प्रकाशनार्थमुपकल्पितोऽस्ति। तत्रापि द्वितीयभागस्य प्रथमखण्डे विश्रुतकथाकृतां भट्टश्रीमथुरानाथशास्त्रिणां त्रय उपन्यासग्रन्थाः षष्टिमिताश्च कथाः द्वितीये च खण्डे भट्टमहाभागैर्निबद्धाः प्रमुखाः केचन निबन्धाः पुरस्क्रियन्ते। कथानां लघुकथानां निबन्धानां वाऽवतारः नवाविष्कारत्वेनाऽभिनन्द्यते संस्कृतसाहित्ये। विधाया अस्या उन्नायकेषु भट्टश्रीमथुरानाथशास्त्रिणो नूनं सन्ति धुरि कीर्तनीया इति विदन्त्येव साहित्यतत्त्ववेत्तारो विद्वांसः।

गद्य-पद्यभेदेन स्वीकुर्वन्ति द्वैविध्यं काव्यस्य तत्तत्त्वविद इति सुविदितमेव सुधियाम्। पद्यकाव्यापेक्षया गद्यकाव्यस्य महत्त्वमपि। यथा च भणितिः - **'गद्यं कवीनां निकषं वदन्तीति'**।

संस्कृतसाहित्ये गद्यस्य प्रादुर्भावो वैदिककाल एव सञ्जात आसीदित्यत्र नाऽस्ति संशीतिः, कृष्ण-यजुर्वेदादिषु ब्राह्मणारण्यकोपनिषद्ग्रन्थेषु च तत्प्रयोगो विद्यत एव। पुराणसाहित्ये, दर्शनग्रन्थेषु च यद्यपि तत्प्रयोगो दृग्गोचरीभवति, तथापि गद्यापेक्षया पद्यबन्धेषु दृश्यते महती प्रीतिः कालेऽस्मिन् रचनाकृताम्। सुबन्धु-बाणभट्टप्रभृतिभिः यो हि रचनामार्गः प्रदर्शितः, स नूनं साम्प्रतिकैः कतिपयैरग्रेसारित इति विविधविधासु कवयन्तः कवय एते नवप्रस्थानद्वारमपि संस्कृतगद्यसाहित्यरचनाया उद्घाटयामासुरिति प्राचीनाऽर्वाचीनसाहित्यविधासु निबद्धाः केचन, केचन चात्याधुनिकगद्यलेखनविधाश्रिता ग्रन्थाः संस्कृतगद्यसाहित्ये राजन्ते।

**'ओजस्समासभूयस्त्वमेतद्गद्यस्य जीवितम्'** इति कस्यचिदुक्तिर्यद्यपि सुबन्धु-बाणभट्टप्रभृतीनां गद्यरचनासु सङ्घटते, किन्तु वैदिको मन्त्रद्रष्टा ऋषिर्यो हि संस्कृतगद्यसाहित्यस्य प्राचीनतमं स्वरूपमुपायनीकरोति साहित्यजगति, स न विश्वसिति एतादृक्शब्दाडम्बरेषु। सरला समासरहिता भाषा, ह, वै, उ इत्याद्यव्ययानां वाक्यालङ्कारत्वेन प्रयोगः, उपमारूपकादीनां केषाञ्चिदलङ्काराणां स्वाभाविकता च वर्तते वैदिकगद्यसाहित्यस्य वैशिष्ट्यम्। यद्यपि कृष्णयजुर्वेदाथर्ववेदयोः ब्राह्मणारण्यकोपनिषद्ग्रन्थेषु च तत्प्रयोगबाहुल्यं लभ्यते तथापि तत्र सर्वत्र सारल्यमेवाऽनुभूयते सहृदयैः।

ब्राह्मणग्रन्थानामपि गद्यं भजते तथात्वमेव। अत्राऽपि सरलसरलया भाषया कथ्यं वर्ण्यते -

**''अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरणे सर्वा अन्या देवताः''**

उपनिषत्साहित्ये त्वितोऽप्यधिकतरं रमणीयं गद्यस्वरूपं लभ्यते –

**''यत्र नाऽन्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति तद् भूमा। यत्रान्यत् पश्यति अन्यच्छृणोति अन्यद् विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्''** (छान्द. ३२४)

अनेनैतदायाति यत् वैदिककविर्गद्यस्य सरलं सहजं च स्वरूपमङ्गीकरोति। शब्दाडम्बरे तस्य श्रद्धा नाऽस्ति। एषैव परम्परा पौराणिकैरनुकृता गद्यलेखनस्य। वस्तुतस्तु पौराणिकं गद्यं लौकिकवैदिकगद्यबन्धानां सोपानभूतम्। क्वचिदलङ्काराणां पक्षपातः पुराणेषु दृश्यते, तथापि प्रसादोपेतया भाषया पुरस्करोति पौराणिकः कविः समग्रमपि गद्यसौन्दर्यं वर्णनक्रमे। यथा च विष्णुपुराणे –

**''यथैव व्योम्नि वह्निपिण्डोपमं त्वमहमपश्यं तथैवाद्याग्रतो गतमप्यत्र भगवता किञ्चिन्न प्रसादीकृतम्। विशेषमुपलक्षयामीत्युक्ते भगवता सूर्येण निजकण्ठादुन्मुच्य स्यमन्तकं नाम महामणिवरमवतार्य एकान्ते न्यस्तम्** (४.१३.३४)

गद्यस्य विकासे दार्शनिकानामपि अवदानं वर्तत एव। ग्रन्थेष्वेतेषु यद्यपि सूत्राणां पद्यबन्धानां कारिकाणां च विलोक्यते प्राधान्यं, तथापि कैश्चित् शास्त्रिभिस्तत्रापि गद्यस्य प्रयोगः कृतो विद्यते। अर्थाभिव्यक्तिमभिलक्ष्य प्रणीता एते ग्रन्था यद्यपि शब्दसौन्दर्यं साहित्यसौन्दर्यं च न पुरस्कुर्वन्ति तथापि भावाभिव्यञ्जकता नैतेषां कुत्रचिदपि व्याहन्यते। जयन्तभट्टसदृशाः प्रौढाः केचन गद्यलेखकाः नीरसेऽपि विषये कामपि संवादात्मकतामुत्पादयन्ति।

पातञ्जलमहाभाष्ये शबरस्वामिनः शाबरभाष्ये शङ्कराचार्यस्य ब्रह्मसूत्रभाष्ये जयन्तभट्टस्य च न्यायमञ्जर्यां गद्यस्य वैलक्षण्यमवलोक्यते। नितान्तं नीरसमपि विषयं स्वगद्यप्रयोगमहिम्ना सरसं विदधाति भगवान् पतञ्जलिः। तत्र छात्रोऽनुभवति सम्मुखमासीनमिव गुरुम्। इयमेव गद्यप्रणयनशैली शबरस्वामिनो मीमांसासूत्रभाष्ये लभ्यते।

साक्षाच्छिवावतारभूतो भगवान् शङ्कराचार्य आत्मानात्मतत्त्वविवेचनेऽपि गद्यस्य साहित्यिकं मधुरं प्रसादपेशलं स्वरूपं पुरस्करोति। ''नहि पद्भ्यां पलायितुं पारयमाणो जानुभ्यो रंहितुमर्हति'' इत्येतादृशाः प्रयोगाः आचार्यस्य गद्यप्रणयनचातुर्यं पिशुनयन्ति।

तर्ककर्कशं न्यायशास्त्रं पठन्नपि पाठको न्यायमञ्जर्यां साहित्यिकमास्वादं प्राप्नोति। अत्र गद्यगरिमा सहृदयहृदयानुरञ्जनायाऽलम् –

**आः क्षुद्रतार्किक! सर्वथाऽनभिज्ञोऽसि, ब्रह्मैव जीवात्मानो**
**नहि ततोऽन्ये। नहि दहनपिण्डाद् भेदेनाऽपि स्फुलिङ्गा**
**अग्निस्वरूपा भवन्ति। तत् किं ब्रह्मण एवाऽविद्या ?**

वैदिकसाहित्ये पुराणेषु शास्त्रीयग्रन्थेषु चोपलब्धं गद्यं यद्यपि संस्कृतगद्यसाहित्यस्य विकासक्रमज्ञानाय समीक्षकाणां सहायकं, तथापि तेन गद्यकाव्यानां तात्त्विकानुसन्धानकल्पना न सम्भाव्यत इति लौकिकगद्यबन्धानां संक्षेपेण चर्चेह क्रियते।

**लौकिकं संस्कृतगद्यसाहित्यम् -**

संस्कृतसाहित्ये गद्यकथानां प्रादुर्भावः कात्यायनकालात् पूर्वमेवाऽभूदिति ''आख्यानाख्यायिकेतिहासपुराणेभ्यश्च'' इत्यस्मिन् वार्तिके आख्यानाख्यायिकाशब्दनिर्देशात् ज्ञायते। किन्तु सुबन्धोर्वासदत्तानाम्नी कथारचनैव संस्कृतसाहित्ये प्रथमकृतित्वेनोपलभ्यते। सुबन्धुना प्रवर्तिता बाणभट्टेन च लालिता गद्यकथापरम्परेयमधुना नूत्नविधाव्याजेन प्रणीतकथालघुकथोपन्यासादिसाहित्यसम्पत्साहाय्येन विकासशिखरं चुम्बति। अतो लौकिकगद्यसाहित्यं भिद्यते द्विधा-

१. प्राचीनं संस्कृतगद्यसाहित्यम्

२. आधुनिकम् अत्याधुनिकं च गद्यसाहित्यम्

**१. प्राचीनं संस्कृतगद्यसाहित्यम् -**

यथोक्तमस्माभिः संस्कृतगद्यसाहित्ये सुबन्धोर्वासवदत्तैवोपलब्धा प्रथमा कृतिः। अत्र राजपुत्रस्य कन्दर्पकेतोर्वासवदत्तया प्रणयसम्बन्धो वर्ण्यविषयत्वेनाङ्गीकृतः। ग्रन्थेऽस्मिन् स्वल्पो निर्जीवश्च कथांशः कविना स्वप्रातिभशक्त्या चमत्कारमुपनीतः। सुबन्धोः श्लेषयोजने नैपुण्यं तत्पुराणपटुत्वं वैदिकपौराणिकाख्यानचातुरी पदवाक्यप्रमाणादिशास्त्रपाण्डित्यं च ग्रन्थस्याऽस्य समीक्षणेन स्फुटीभवन्ति। शब्दाडम्बरस्य पक्षपाती कविरयं श्लेषयोजने भजते वैशिष्ट्यम्। यथा -

**नन्दगोप इव यशोदयाऽन्वितः, जरासन्ध इव घटित -**
**सन्धिविग्रहः, भार्गव इव सदा नभोगः, दशरथ इव**
**सुमित्रोपेतः सुमन्त्राधिष्ठितश्च, दिलीप इव सुदक्षिण-**
**याऽन्वितो रक्षितगुश्च।**

अत्र प्रसन्नश्लेषयोजना कवेः शब्दप्रयोगनैपुण्यं पिशुनयति। उपमोत्प्रेक्षाद्यलङ्कार-प्रयोगादपि न सुबन्धुः पलायते, तथापि तत्र सर्वत्र श्लेषयोजनैव चमत्कारपोषिका। यत्र अक्षराडम्बरव्यामोहः कवेः प्रशमितस्तत्र नूनं वासवदत्ता गद्यस्य किमपि चमत्कारि स्वरूपं पुरस्करोति।

प्राचीनसंस्कृतगद्यसाहित्यस्य शिखामणिः गद्यसाहित्यस्य चोन्नायको बाणभट्टः सुबन्धोः परवर्तिकाले सञ्जात इति सत्यम्, किन्तु तस्य कथाप्रणयनशैली शब्दप्रयोगपटुता चाऽद्यापि सुकविसमवाये प्रशस्येते। कथाऽख्यायिकाभेदेन द्विविधं गद्यसाहित्यं प्रतिष्ठापितं शास्त्रविद्भिः। कविनाऽनेन हर्षचरिताख्यगद्यरचनया आख्यायिकाप्रणयनस्य कादम्बरीप्रणयनव्याजेन च कथारचनाया निदर्शनं कृतम्। हर्षचरितस्य त्रिषूच्छ्वासेषु बाणेन स्वजीवनवृत्तं पञ्चसु च राज्ञो हर्षवर्धनस्य प्रभाकरवर्धनप्रमुखाणां चाऽन्येषां राज्ञां वर्णनं कृतम्। एवं ग्रन्थोऽयं न केवलं साहित्यिकदृष्ट्या ऐतिहासिकदृष्ट्याऽपि महत्त्वं भजते। वीरोऽत्र अङ्गीरसस्तथापि करुणस्य चमत्कारः हृदयावर्जकः।

कादम्बरी-नाम्नी बाणभट्टस्य विद्यते द्वितीया कृतिः। संस्कृतगद्यसाहित्ये वैलक्षण्यमस्या वीक्ष्य केनचिद् रसिकेणोक्तम् -

**रुचिर-स्वर-वर्णपदा रसभाववती जगन्मनोहरति।**
**सा किं तरुणी ? नहि नहि वाणी बाणस्य मधुरशीलस्य॥**

पुण्डरीकचन्द्रापीडादीनां जन्मत्रयावगाहिनी कथा कविना कादम्बरीमिषेण निबद्धा। विदिशाधिपते राज्ञः शूद्रकस्य राजसभायां चाण्डालकन्या काऽपि पिञ्जरबद्धशुकहस्ता समायाति। शुक एव कादम्बरीकथां श्रावयति। महाश्वेतापुण्डरीकयोः कादम्बरीचन्द्रापीडयोश्च प्रणयवर्णने बाणो भजतेऽनुत्तमताम्। कादम्बर्याः पूर्वार्धः बाणभट्टेन उत्तरार्धश्च तत्पुत्रेण पुलिन्दभट्टेन प्रणीत इति ग्रन्थस्याऽस्य उत्तरार्धे मङ्गलाचरणमिषेणोक्तम्।

अर्थस्य नूतनता स्वाभावोक्तेः चारुता श्लेषस्य स्पष्टता अक्षराणां विकटबन्धता च कृतेरस्या महत्त्वं निगदन्ति। शब्दानां वर्ण्यविषयानुसारी प्रयोगः कवेर्वैशिष्ट्यम्। रौद्रादिवर्णनस्थलेषु कवेर्विकटबन्धता सरसस्थलेषु च शब्दनम्रता नूनं मनोहारिणी। अलङ्काराणां स्वाभाविकयोजनैवेह कृता। यथा च रसानोपमा -

**क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास**
**इव नवपल्लवेन, नवपल्लवेन इव कुसुमेन, कुसुम इव**
**मधुकरेण, मधुकरेण इव मदेन नवयौवनेन पदम्।**

एवमेव परिसङ्ख्यायाश्चारुताऽपि बाणस्य वैशिष्ट्यं पुरस्करोति -

**यत्र च महाभारते शकुनिवधः, पुराणे वायुप्रलपितम्, वयः**
**परिणामे द्विजपतनम्, उपवनचन्दनेषु जाड्यम्, अग्नीनां**
**भूतिमत्त्वम्, एणकानां गीतव्यसनम्, शिखण्डिनां**
**नृत्यपक्षपातः भुजङ्गमानां भोगः, कपीनां श्रीफलाभिलाषः,**
**मूलानामधोगतिः।**

बाणस्य गद्यशैली विद्यते कवित्वस्य अवधिः। ये खलु समीक्षकाः कठिनपदप्रयोगं तत्र प्रतिपादयन्ति, नूनं ते शब्दप्रयोगतत्त्वं न जानन्ति। पाञ्चालीरीतेरपूर्वयोजना बाणस्य कादम्बर्यां विद्यते। समासबाहुल्यमोजसश्च प्राधान्यं कादम्बर्यां यद्यपि पदे पदे दृश्येते, तथापि तत्सर्वं काव्योत्कर्षाय आवश्यकम्। भावाभिव्यञ्जकस्थलेषु तथाविधशब्दानां प्रयोगो न दृष्टिपथमायाति। यथा मदनव्यथासन्तप्तं पुण्डरीकं प्रबोधयन् वक्ति ब्रह्मचारी पुण्डरीकः -

**सखे पुण्डरीक! नैतदनुरूपं भवतः, क्षुद्रजनक्षुण्ण एव मार्गः।**
**धैर्यधना हि साधवः! किं यः कश्चित् प्राकृत इव विकली-**
**भवन्तमात्मानं न रुणत्सि। क्व ते धैर्यम् ? क्वाऽसौ इन्द्रियजयः ?**

बाणस्य शब्दसाम्राज्यं विस्तृतं सुदीर्घं च वर्तते। कामिनीनां रूपलावण्यवर्णने कवेः

शब्दावली भजते लालित्यम्। अरण्यादिवर्णने च सैव दृश्यते कठोरवर्णयुक्ता शब्दाडम्बरयुक्ता च। कादम्बरी संस्कृतगद्यसाहित्यस्य प्राणतत्त्वमित्यत्र न काऽप्यतिशयोक्तिः।

प्राचीनसंस्कृतगद्यसाहित्यस्य तृतीयः प्रतिनिधिकविरस्ति महाकविर्दण्डी। कवेरस्य दशकुमारचरितम्, अवन्तिसुन्दरीकथा चेमे द्वे गद्यरचने उपलभ्येते। दशकुमारचरिते भाग्यस्य प्रतिकूलतावशाद् अनेकदेशेषु कष्टापन्नं जीवनं निर्वाह्य समागतानां कुमाराणां कथाऽस्ति। राजवाहनं प्राप्य ते सर्वे स्वीयं वृत्तं तस्मै निवेदयन्ति।

दशकुमारचरितमाऽऽख्यानकाव्यविधाया अनुत्तममुदाहरणम्। विषयोपस्थापने पदानां प्रयोगे चेह कविर्वैशिष्ट्यमवगाहते। कथानकानां पारस्परिकं सामञ्जस्यं तेषां धारावाहिकता सरला प्रसादगुणोपेता भाषा च दण्डिनो गद्यप्रणयनप्रटुत्वं विषयप्रतिपादनप्रटुत्वं च ख्यापयन्तीति सर्वमेतत्काव्यगतं सौष्ठवं प्रसमीक्ष्य केनचित्समीक्षकप्रवरेणोक्तम् – **दण्डिनः पदलालित्यमिति।**

दण्डी सुबन्धुबाणयोरनुकर्ता कविर्नाऽस्ति। तस्य स्वीया वर्णनशैली विद्यते। यस्यां सहृदयोऽर्थस्य स्पष्टतां रसस्य च विशिष्टामनुभूतिं प्राप्नोति। तस्य पदानां लालित्यज्ञानाय पङ्क्तयः काश्चनोदाह्रियन्ते –

**कामस्तु विषयासक्तचेतसोः स्त्रीपुंसयोर्निरतिशयसुख –**
**स्पर्शविशेषः। परिवारस्त्वस्य यावदिह रम्यमुज्ज्वलं च।**
**फलं पुनः परमाह्लादनं परस्परविमर्दजन्मस्मर्यमाणमधुरम्**
**उदीरिताभिमानमनुत्तमं सुखपरोक्षं स्वयं संवेद्यमेव।**

अवन्तिसुन्दरीकथाया गद्यांशोऽयं तस्य पदप्रयोगदक्षताया निदर्शकः –

**रज्जुरियम् उद्बन्धाय सत्यवादितायाः, विषमियं जीवित-**
**हरणाय महात्म्यस्य, शास्त्रमियं विशसनाय सत्पुरुष-**
**वृत्तान्तानाम्, अग्निरियं निर्दहनाय धर्मस्य, सलिलमियं**
**निमज्जनाय सौजन्यस्य, धूलिरियं धूसरीकरणाय चरित्रस्य ?**

बाणादीनां रचनासु कल्पनायाः प्राधान्यात् याथार्थ्यस्य सर्वथाऽभावः। दण्डिनो ग्रन्थयोः पुनर्यथार्थवर्णनस्य दृश्यते प्राधान्यम्।

बाणभट्टस्य रचनापद्धतिमवलम्ब्य परवर्तिभिर्नैके गद्यबन्धाः प्रणीता। तेषु कवेर्धनपालस्य तिलकमञ्जरी इदानीमुपलभ्यते। ग्रन्थेऽस्मिन्नेकतो बाणभट्टस्य भाषानुकृतिरपरतश्च गद्यस्य व्यावहारिकं स्वरूपमुपलभ्यते। सन्दर्भानुसारिणी शब्दयोजना नूनमिह मनोहारिणी। उपमोत्प्रेक्षाद्यलङ्कारणां प्रयोगेऽपि कविर्भजते वैलक्षण्यम्।

संस्कृतगद्यलेखकेषु गद्यचिन्तामणिकारस्य वादीभसिंहस्याऽपि स्थानं महत्त्वपूर्णमस्ति। जिनसेनस्य महापुराणे प्राप्ता जीवन्धरस्य कथैवेह एकादशलम्बेषु वर्णिता। प्राचीनसंस्कृत-

गद्यकाव्याधारायां वामनभट्टबाणविरचितं वेमभूपालचरितमपि उल्लेखमर्हति। वेमभूपालः कवेरस्य आश्रयदाता राजा स्वयमपि महाकविरासीत्। तस्य वर्णनं ग्रन्थेऽस्मिन् कृतं कविना।

प्राचीनसंस्कृतगद्यसाहित्येऽन्या अपि गद्यरचनाः स्युः किन्तु सुबन्धुबाणभट्ट-वामनबाणभट्टादि-षट्कवीनामेव कृतय उपलभ्यन्त इदानीम्। दण्डिबाणयोर्गद्यलेखने यद्यपि महान् अधिकार आसीत्, तथापि परवर्तिभिः गद्यस्य प्रयोगः पद्यापेक्षया न्यूनतरमेव कृतमिति ज्ञायते इतिहासग्रन्थानामध्ययनेन। आधुनिकैर्विश्वेश्वरपाण्डेयप्रभृतिभिः गद्यरचनायां गौरवाभिवृद्ध्यर्थं कश्चन नूतन एव प्रयासो विहित इति नैका गद्यरचनाधारा युगेऽस्मिन् प्रादुरभूवन्। अम्बिकादत्तव्यासेन शिवराजविजयाख्यग्रन्थस्य रचनया संस्कृतसाहित्ये उपन्यास-लेखनपरम्परोद्भाविता। एवमन्ये ग्रन्थकारा अपि नूतनकाव्यधारायां कवयन्तो दृश्यन्ते। विंशशतकस्योत्तरार्द्धोऽयं संस्कृतगद्यरचनायाः स्वर्णयुगत्वेन व्यपदेशमर्हति, यस्मिन् भट्टमथुरानाथशास्त्रिप्रभृतयः प्राचीना रामकरणशर्म-राजेन्द्रमिश्र-केशवचन्द्रदाशप्रभृतयश्च साम्प्रतिका नैके गद्यकारा लेखनव्यापृता वर्तन्ते। अत्र नातिविस्तरेण आधुनिकात्याधुनिकगद्यसाहित्यस्य चर्चा क्रियते।

**२. आधुनिकम् अत्याधुनिकं च संस्कृतगद्यसाहित्यम् -**

आधुनिकगद्यसाहित्यस्य पृष्ठभूमिर्न केवलं प्रणयवर्णनं न वाऽऽश्रयदातृराज्ञो गुणानुवादः। अद्यतनीयः कविः सामाजिक-राजनीतिकदशावर्णने भारतस्य स्वातन्त्र्यसङ्ग्रामचित्रणे नारीणां दशानिरूपणे च दृश्यते बद्धपरिकरः। एवं वस्तुविवेचनदृष्ट्या शैलीदृष्ट्या चाधुनिकं गद्यसाहित्यं बहुविधान् वर्ण्यविषयानात्मसात्करोति। कथा लघुकथा उपन्याससाहित्यं यात्रासाहित्यं जीवनवृत्तवर्णनं चेत्यादयो नैके मार्गा आधुनिकसंस्कृतगद्यसाहित्यस्य विशेषाः। साहित्यस्याऽस्य विधानुसारि विवेचनमिहोपस्थाप्यते।

**१. कथा लघुकथाश्च -**

आधुनिककथासाहित्ये लघुकथानामेव प्राधान्यम्। विद्वन्मूर्धन्यस्य श्रीमतो विश्वेश्वरपाण्डेयस्य मन्दारमञ्जरी बाणभट्टस्य भाषानुकृत्या प्रणीता कालखण्डस्याऽस्य गद्यकृतिः। ग्रन्थेऽस्मिन् पुष्पपुरस्य राज्ञो राजशेखरस्य वर्णनमस्ति। पर्वतीयो विश्वेश्वरः सर्वतन्त्रस्वतन्त्रपण्डित आसीदिति तस्य ग्रन्थसम्पत् प्रमाणमत्र। बाणस्य गद्यरचनाभावभावितोऽपि कविर्मौलिकचिन्तनरहितो न दृश्यते। अलङ्काराणां भव्ययोजना गद्यप्रणयने श्रीमतः पाण्डेयस्य वैशिष्ट्यं निरूपयति। परिसङ्ख्याया वैपुल्यमिह नितरां हृदयावर्जकम् -

**गौणार्थपरिग्रहः शब्देषु न क्रियासु, पृष्ठदर्शनं सामप्रयोगेषु न सङ्गरेषु, अदृष्टपर्वत्वं विशिखत्वं च सायकेषु, न तत्तद्विहितक्रियापदेषु, द्विजपरीक्षणं लक्षणाविचारेषु न दानेषु, श्रुतिलङ्घनं वधूनां कटाक्षेषु न जनेषु समभवत्।**

एतादृशकथानां प्रणयने साम्प्रतिकानां मतिस्तथा न प्रवर्तते। उपन्यासविधाया युगेऽस्मिन् प्रादुर्भाव: सञ्जात इति नैके गद्यकारा तस्यामेव विधायां कवयन्तो दृश्यन्ते। वस्तुतस्तु विविधपरिचर्यासु व्यापृत: पाठक: लघुग्रन्थानपेक्षते सम्प्रति। प्राचीनै: काव्यशास्त्रिभिर्यद्यपि लघुकथासदृशरचनायाश्चर्चा न कृताऽस्ति तथापि साम्प्रतिका राधावल्लभ-राजेन्द्रमिश्रादयो विधाया अस्या लक्षणादिपरिष्कारे प्रयत्नं कुर्वन्तो दृश्यन्ते। **कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्** इत्युक्तिरियं वर्ण्यविषयदृष्ट्या कथञ्चित् तत्रापि सङ्गच्छते। संस्कृतलघुकथानां सम्बन्ध: हिन्दीभाषाया: कहानी-विधया आङ्ग्लभाषायाश्च शॉर्टस्टोरीति विधया वर्तते।

एकोनविंशशतकस्याऽन्तिमदशके संस्कृतगद्यसाहित्ये लघुकथारचनाया: प्रयासो विहित: शिवराजविजयकारेण अम्बिकादत्तव्यासेन। तस्य रत्नाष्टकमिति नाम्ना प्रकाशिते कथासङ्ग्रहे हास्यरसप्रधाना उपदेशप्रधानाश्च अष्टौ कथा: सङ्गृहीता: सन्ति। किन्तु कथाकुसुम इत्याख्यकथासङ्ग्रहे भावूपर्णा: कथा: प्रकाशिता:। येन संस्कृतगद्यरचनाक्षेत्रे प्रादुरभूत् काचिन्नवीना क्रान्ति:। १८९८ ईस्वीयवर्षात् १९१० ईस्वीयवर्षं यावत् सहस्राधिका लघुकथा: प्रणीता:। यासां प्रकाशनं विविधसंस्कृपत्रपत्रिकासु समभवत्। वेङ्कटरामशास्त्रिणा कालेऽस्मिन् कथाशतकम् इति नाम्ना शतकथान्वित: प्रबन्ध: प्रकाशमनायि। केचन मौलिका: कथकसङ्ग्रहा: केचन चाङ्ग्लादिभषाभ्योऽनूदिता: कथा: प्रकाशिता:। शतकस्याऽस्यादौ द्वौ कथासङ्ग्रहौ प्रकाशितौ बभूवतु:। तौ च स्त: -

१. कथासङ्ग्रह: - कोइतम्बुरानकृतोऽयं मौलिककथासङ्ग्रह:।

२. कथामञ्जरी - अनन्ताचार्यकोण्डकेन प्रणीता १८०१ वर्षे प्रकाशिता।

इतरे च कालान्तरे प्रकाशिता: सङ्ग्रहा: सन्ति -

३. नाटककथासङ्ग्रह: - अनन्ताचार्यकोण्डकेनैव प्रणीत: प्रकाशितश्च।

४. कथासप्तति: - मन्दिरकलरामशास्त्रिण: कृति: १८०४ वर्षे प्रकाशिता।

५. गद्यकथा - तिरुनारायण अयङ्गरकविना प्रणीता कृतिरियं १८१० वर्षे प्रकाशनं प्राप्ता।

सर्वेऽपि कथासङ्ग्रहा एते मौलिककथारचनाधारां दृढीकुर्वन्ति।

कालेऽस्मिन् विविधा: कथासङ्ग्रहा: कथाश्च प्रकाशिता अभवन्। केचन शास्त्रीयविषया अपि कथारूपेण परिणमय्य प्रकाशिता:। एतेषु रामशरणशास्त्रिण: कौमुदीकथाकल्लोलिनी उल्लेखमर्हति।

आधुनिकसंस्कृतकथासाहित्यस्य विषयानुसारि विवेचनमिह संक्षेपेणोपस्थाप्यते -

**१. पौराणिक्य: कथा:** - पौराणिककथा अधिकृत्याऽपि कैश्चित् कविभि: कथा: प्रणीता:। ता: सन्ति- उषो हरणम् (उपेन्द्रनाथसेनस्य) शिवहास्यम् (मनुजेन्द्रदत्तस्य) सत्यदेवकथा (रामावतारशर्मण:) भद्रसोमा (चारुचन्द्रवन्द्योपाध्यायस्य) मणिकुण्डलोपाख्यानम्, दधीच्युपाख्यानम्, पौराणिकी काचित् कथा (अप्पाशास्त्रीराशिवडेकरस्य)।

**२. उपदेशकथाः बालकथाश्च** – विंशशतके यद्यपि उपदेशकथाः प्रणीताः कविभिस्तथापि बालसाहित्यस्य तत्र अभावोऽस्त्येव। केशवचन्द्रदाशस्य 'महान्' इति कथासङ्ग्रहे काश्चन बालकथाः सङ्गृहीताः सन्ति।

उपदेशप्रधानकथानां प्रकाशनं तु जयचन्द्रसिद्धान्तभूषणभट्टाचार्यादिभिः कृतम्। तासु व्याघ्रीविवाहार्थी शृगालः, वशीकृतभूतः, धर्मस्य सूक्ष्मा गतिः, ईश्वरस्य धनदानक्रमः, राक्षसप्रश्नः, बुद्धिमाहात्म्यम्, अदूरदर्शिता, संशयात्मा विनश्यति (द्वारकानाथशर्मणः) शत्रुसङ्कीर्णे कथं वस्तव्यम् (नन्दलालशर्मणः) दशापरिणतिः, चित्रकारचातुर्यम्, कुटिलमतिर्नाम गोमायुः, वक्रचापलम्, भगवद्भक्तः किमर्थम्, सद्गुरुः (अप्पाशस्त्रिराशिवडेकरस्य) इत्युपदेशकथाः प्रमुखाः सन्ति।

१९७० तमे वर्षे गोविन्दभावेमहाभागेन प्रकाशनं प्रापिते संस्कृतकथातरङ्गिणी इति नाम्नि कथासङ्ग्रहेऽपि सप्तविंशतिकथा उपदेशशैल्यां प्रणीताः सन्ति। अत्र शिक्षाया उपयोगिता सच्चारित्र्यस्य च माहात्म्यं प्रदर्शितं कविना। 'कुपात्रे नैव दातव्यम्', भगवान्, दानी वत्सलः, लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत् इत्येताः कथा इह लोकव्यवहारप्रामाण्यात् धर्मशास्त्रप्रामाण्याद् वा प्रणीताः।

राजस्थानसंस्कृताकादेम्या प्रकाशिते गणेशशर्मणः संस्कृतकथामृतम् इति नाम्नि कथासङ्ग्रहे विचारप्रवणया भाषया काश्चन कथा निबद्धाः। अत्र सिद्धो रासायनिकः, अकिञ्चनस्यौदार्यम्, भ्रातृस्नेहः वीरपरीक्षा चेति नैकाः कथाः प्रभावोत्पादिकाः सन्ति।

**३. भावप्रधाना मनोवैज्ञानिक्यश्च कथाः** – भावप्रधानकथारचनासु भट्टमथुरानाथ-शास्त्रिणोऽप्पाशास्त्रिराशिवडेकरमहाभागस्य च कथाः, मनोवैज्ञानिककथासु च रामनाथशास्त्रि-प्रभृतीनां रचना अत्रोल्लेखमर्हन्ति। विषमा समस्या, बालकभृत्यश्चैते द्वे कथे भट्टमथुरानाथशास्त्रिणो भावप्रधानकथाप्रणयननैपुण्यं प्रकटयतः। दरिद्रतामेव व्याधिं मत्वा चिकित्सकोऽत्र निदानं करोति। एवमेव के. श्रीनिवासमहोदयस्य साधुमणिः, उपेन्द्रचन्द्रस्य रामो नाऽस्तीह भूतले, चन्द्रचूडशर्मणश्छायापथः, राशिवडेकरमहोदयस्य प्राधान्यवादः, विप्रलब्धा च, रामनाथशास्त्रिणः मदीयः स्वप्नः क्रमेऽस्मिन्नुल्लेखनीयाः कथाः सन्ति। भट्टमथुरानाथशास्त्रिणां 'बालकभृत्य' इति कथा कैश्चित्समीक्षकैर्ललितनिबन्धत्वेनाङ्गीकृतेत्यस्माभिरपि ललितनिबन्धसङ्ग्रहे सेयं प्रकाशिता।

कवे राधावल्लभस्य "न ममार न जीर्यति" कथा मनोवैज्ञानिककथास्वन्यतमा। कविनेह डॉ. शरणस्य कुष्ठपीडितायाश्च तन्मातुश्चित्रणं नैपुण्येन कृतम्।

**४. हास्यव्यङ्ग्यकथाः** – कथास्वेतासु हास्यस्य व्यङ्ग्यस्य वा प्राधान्यं निरूप्यते कविभिः। चन्द्रचूडशर्मणः दर्दुरविलापः, अप्पाशास्त्रिणः वेषमाहात्म्यम्, व्यसनविमोक्षः, पुरोहितधौर्त्यम्, भट्टमथुरानाथशास्त्रिणः लालाव्यायोगः, चपण्डुकः, शिष्या, फाल्गुनगोष्ठी, वाई. महालिङ्गशास्त्रिणश्च कलिप्रादुर्भाव इत्येताः कथा हास्यव्यङ्ग्यप्रतिपादनशैल्यां प्रणीताः।

कवय एते सामाजिकमेव विषयं कथायां हास्यव्यङ्ग्यत्वेनोपस्थापयन्ति। यथा शिष्या इति भट्टमथुरानाथशास्त्रिण: कथायां शिष्य: कश्चन सावगुण्ठन: सन् गुरो: समीपं याति। एतादृशीनां कथारचनानां हास्यमेव प्रयोजनम्। कथानां शैली सरला ललिता चास्ति। सामान्योऽपि पाठक: कथ्यमवगन्तुं शक्नोति।

**५. सामाजिककथा:** – सामाजिककथासु सामाजिकदशावर्णनमेव प्रधानपदेऽभिषिक्तं भवति। सामाजस्य नैका: समस्या अत्र चित्रिता:। विश्वेश्वरशर्मण: मम गृहरहस्यम्, उपेन्द्रनाथसेनस्य पल्लिच्छवि:, राशिवडेकरमहाशयस्य श्रीमती विद्यासुन्दरी देवी, चारुचन्द्रवन्द्योपाध्यायस्य स्त्रीचरितम् नैष्ठिकब्रह्मचारी विधुशेखरभट्टाचार्यस्य अपत्यविक्रम: क्षुत्कन्यका, द्विजेन्द्रब्रह्मचारिण: वासन्ती, भट्टमथुरानाथशास्त्रिणश्च एकवारं दर्शनम्, दयनीया, अनादृता इत्येता: कथा: सन्ति।

संस्कृतलघुकथासाहित्ये पण्डिताक्षमाराव–देवर्षिकलानाथशास्त्रि–अभिराजराजेन्द्रमिश्र–केशवचन्द्रदाशप्रभृतय: कवय: सामाजिकदशावर्णने वैशिष्ट्यं भजन्ते। एतेषां रचनासु वस्तुतत्त्वस्य सम्यग्विवेचनं प्रौढशैल्या कृतं विद्यते। समाजस्य यथार्थविषयं स्वीकृत्य काश्चन कथा लिखिता: कविभिरेभि:। स्त्रीणां दशावर्णने क्षमारावमहाभागाया: शैली श्लाघनीया। प्रभुनाथद्विवेदिन: कथाकौमुदी श्वेतदूर्वा च कृष्णलालस्य अनन्तमार्ग:, केशवचन्द्रदाशस्य उर्मिचूडा, वीणापाणिपाटनीमहाभागाया अपराजिता, राजेन्द्रमिश्रस्य इक्षुगन्धा राङ्गडा चित्रपर्णी चेत्येते कथासङ्ग्रहा अपि सामाजिकदशावर्णनपरा: कथा: पुरस्कुर्वन्ति। शिक्षणसंस्थानेषूपाधिदानपरम्परां विलोक्य प्रणीता कवे राधावल्लभस्य वायवा:, इच्छाराद्विवेदिनश्च निरीक्षणम् इति द्वे कथे समाजस्य यथार्थभूमिमवगाहेते।

**६. प्रणयवर्णनपरा: कथा:** – प्रणयर्णनपरासु कथासु नायकनायिकयो: प्रणयसम्बन्ध: नैपुण्येन न्यरूपि कविभि:। विच्छेदानन्तरं तयोर्मिलनसम्भावना विच्छेदकारणानि चाऽत्र वर्ण्यविषयतां भजन्ते। चारुचन्द्रवन्द्योपाध्यायस्य यथार्थप्रेमिक:, आदर्शपति:, भट्टमथुरानाथस्य च प्रेम्ण: प्रतिदानम् प्रेमवर्णनपरा उत्कृष्टतमा: कथा: सन्ति। पण्डिता क्षमारावमहाभागा प्रेमरसोद्रेक: इत्यस्यां कथायां प्रेम्ण: कञ्चन दुर्लभमेव पक्षं न्यरूपयत्।

प्रणयवर्णने साम्प्रतिककविशिरोमणिरभिराजराजेन्द्रमिश्र: सिद्धहस्तो दृश्यते। पोतविहगौ इत्यस्यां कथायां कवेरस्य वर्णनशैली नूनं मनोहारिणी –

> **मुग्धे! पोतविहगावावाम्। परस्परं प्रविहाय नावयो:**
> **काऽप्यन्या गति:। महुलि! यथा जलपोतविहगोऽनन्ताकाशे**
> **प्रोड्डीय परिश्रम्य च विवशीभूय पुनस्तत्रैवागच्छति शरण-**
> **मन्विच्छन्, आवयोरपि सैव स्थिति:। प्रिये जलपोतसन्निभमिदं**
> **लघुकुटीरम्। इदमेवाऽस्माकं शरणस्थलम्। इदमेवाऽस्माकं**
> **प्रणयमन्दिरं प्रिये! यत्रावाभ्यां प्रणयाधिष्ठातृदेवो भगवान्**
> **रतिनायकस्समर्चित:। नैतत् परित्यज्य क्वाऽप्यन्यत्र गन्तव्यम्।**

**७. ऐतिहासिक्यः कथाः** – ऐतिहासिकघटनाश्रयेण कविभिर्नैकाः कथाः प्रणीताः। कथास्वेतासु वीराणां त्यागशैर्यादीनां वर्णनं प्राधान्येन कृतम्। रामकिशोरमिश्रमहोदयस्य खड्गेन तं हनिष्यामि इति कथायां वीरस्य अनिरुद्धसिंहस्य त्यागवर्णनं यथा –

**प्रिये! वीरास्तु हन्यन्ते। आवां शीघ्रं वन्दिनौ भविष्यावः। अहं मुगलकारागारं नैव जिगमिषामि। अतस्त्वं ममान्तं कुरु। विलम्बेन किम्? इति स जगाद।**

राजेन्द्रमिश्रस्य राङ्डेति कथासङ्ग्रहे बालीद्वीपस्य ऐतिहासिकं वृत्तं प्राप्यते। प्राचीनैः भारतीयैतिह्यमाश्रित्य कथा निबद्धाः किन्तु पाश्चात्यघटनावलीनां चित्रणं संस्कृतसाहित्ये मिश्रमहाभागैरेव कृतमिति विशेषस्तेषाम्। द्वारकानाथशर्मणः, बहूपचिकीर्षा पन्नाधायः, विधुशेखरभट्टाचार्यस्य, क्षत्रकथा, गौतमबुद्धः, परशुरामशर्मणः संयोगितास्वयंवरः, हरिप्रसादनर्मदेश्वरस्य क्षत्रियपराक्रमः भट्टमथुरानाथशास्त्रिणश्च पृथवीराजपौरुषम्, आल्हा च ऊदलश्च, पुरुराजपौरुषम् इत्यादिकथाः सन्ति संस्कृतलघुकथासाहित्ये ऐतिहासिकवर्णनपराः।

अद्यतनीयः कविः कल्पनादरिद्रः, शब्ददरिद्रो विषयदरिद्रो वा नाऽस्ति। समसामयिकं सामाजिकं राजनैतिकं वा विषयमाश्रित्य स कथारचनायां प्रवर्तते। आधुनिकयन्त्राणां वस्तूनां च बोधाय स नूतनशब्दानां निर्माणं करोति। यथा वी.आई.पी. इत्यस्य कृते विशिष्टातिविशिष्टः, फोनरिसीवर इत्यस्य च कृते प्रापक इति शब्दः। क्वचित् शब्दसाम्येनाऽपि नूतनशब्दा निर्मीयन्ते। यथा कालगर्ल इत्यस्य कृते कालगरला इति।

**अनूदिता रूपान्तरिताश्च कथा** –

आधुनिककथासाहित्येऽनूदितं रूपान्तरितं च कथासाहित्यमपि समृद्धं विद्यते। संस्कृतेतरभाषाभ्योऽनूदिता नैके कथासङ्ग्रहाः सम्प्रति सहृदयेभ्यः समर्पिताः –

**१. कथाकल्पद्रुमः** – अप्पाशास्त्रिराशिवडेकरमहाभागैः प्रकाशितः सङ्ग्रहोऽयं अरेबियन नाइट्स इति कृतेरनुवादः।

**२. शेक्सपियरनाटककथावली** – मेडपल्लीवेङ्कटरमणाचार्येण प्रकाशितोऽयं ग्रन्थः मेरीलम्ब इति नाम्नः कवेः टेल्स फ्राम शेक्सपीयर इत्याख्यकृतेरनुवादः।

**३. शेक्सपियरनाटककथाचतुष्कम्** – कौण्डिन्यवेङ्कटेश्वरसुब्रह्मण्यशास्त्रिणा अनूदिताः वेनिसनगरवणिक्, विनयम्, हेमन्तकथा, प्रकम्पनश्चैताश्चतस्रः कथाः सङ्ग्रहेऽस्मिन् प्रकाशिताः।

**४. टॉल्ससटॉयकथादशकम्** – अनेनैव विदुषा टॉल्सटॉयकथासङ्ग्रहतः वृथाक्रोधः, यत्र प्रेम तत्र ईश्वरः, वृद्धौ, प्रश्नत्रयम्, देवपुत्रः, भ्रातरौ, मुनित्रयम्, विश्रान्तिसदनम्, इत्याद्या दशकथा अनूद्य प्रकाशिताः। अनुवादेऽप्यत्र पञ्चतन्त्रस्यास्वादः।

**५. टॉल्सटॉयकथासप्तकम्** – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य अनुसन्धानसंस्थान-निदेशकचरेण पं. भागीरथप्रसादशास्त्रिणा सप्तकथा अत्र सङ्ग्रहेऽस्मिन्ननूद्य प्रकाशिताः।

**६. कथामञ्जरी** – अरविन्दाश्रमस्य जगन्नाथेन फ्रेञ्चभाषाया वल्जिस्त्वार इत्याख्यपुस्तकस्य

संस्कृतानुवादो कथामञ्जरीति नाम्ना प्रस्तुत:। सद्गुणप्रेरणादाने समर्था: कथा इमाश्छात्राणां चरित्रनिर्माणे उपयोगिन्य:।

**७. विपञ्चिका** – नागराजेन हिन्दीकथाकारस्य प्रेमचन्द्रस्य पञ्चकथा: संस्कृतेऽनूद्य सङ्ग्रहेऽस्मिन् प्रकाशिता:। अत्र ज्येष्ठो भ्रातृवर्य:, रसिक: सम्पादक:, धिक्कार:, निष्कारणयश:, लॉटरी इति पञ्चकथा: सन्ति।

**८. कथारत्नाकर:** – बॉक कन्बे महोदयस्य कथानामनुवादोऽत्र विहित:।

**९. ईसब्नीतिकथा:** – नारायणकृष्णगोडबोलेमहोदयेन सदाशिवनाथचितलेमहोदयस्य नीतिकथानामनुवादोऽत्र प्रस्तुत:।

**१०. शरत्सप्तकम्** – विश्रुतबङ्गभाषाकवेश्शरच्चन्द्रस्य सप्तकथानामुनवादोऽत्र बिहारीलालमिश्रेण विहित:। ज्येष्ठान्तिका, मध्यमान्तिका, विन्दोर्वाल:, रामस्य सुमति:, परेश:, चित्रम्, अनुराधा चेति सप्तकथा इमा:, सङ्ग्रहेऽस्मिन् सङ्गृहीता:।

कथासर:, कथासप्तकम्, श्रीरामकृष्णकथामृतम्, बालनीतिकथा: (अष्टभागेषु प्रकाशित: सङ्ग्रह:) नीतिकथाभाण्डागारम्, बालकथाकुञ्ज:, बालसाहित्यसरिता चेत्यादय: कथासङ्ग्रहा: विविधभाषाभ्योऽनूदितानां कथानां निदर्शका:।

रघुवंशादिविविधसंस्कृतग्रन्थानां कथारूपान्तरणमपि तैस्तैराचार्यै: प्रकाशितम्। येन संस्कृतगद्यसाहित्यश्रीरेधते। रूपान्तरिता: केचन कथासङ्ग्रहा: सन्ति –

**१. रघुवंशसार:** – (१९००) दत्तात्रेयवासुदेवनिगुडकरमहोदयेन कालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य गद्यरूपं ग्रन्थस्याऽस्य मिषेण प्रस्तुतम्।

**२. भासकथासार:** – वाई. महालिङ्गशास्त्रिणा १९६५ वर्षे भासविरचितनाटकानां गद्यरूपान्तरणं प्रकाशितम्।

**३. कादम्बरीकथासार:** – बाणभट्टस्य अमरकृते: सरलया गिराऽनुवादो विहित: नन्दलालशर्मणा, प्रकाशितश्चाऽयं १९०० इस्वीयवर्षे। आर.वी. कृष्णमाचार्यमहोदयेन १८७४ वर्षे त्र्यम्बकशर्मणा च १९२६ वर्षे कादम्बर्या: सरलगद्यानुवाद: प्रकाशित आसीत्। कृष्णमाचार्यमहोदयेन हर्षचरितसारनाम्ना हर्षचरितस्यापि रूपान्तरणं विहितम्, प्राकाशि चेदं १८७४ वर्षे।

**४. चन्द्रापीडचरितम्** – अनन्ताचार्येण कादम्बर्याश्चन्द्रापीडचरितं सरलगद्यविधिना १९०९ ईस्वीयवर्षे प्रकाशितम्। अनेनैव विदुषा हर्षचरितसारनाम्ना हर्षचरितस्याऽपि सरलानुवाद: कृत:।

**५. उदयनचरितम्** – व. अनन्ताचार्येण अष्टादशाऽध्यायेषु उदयनस्य चरितं वर्णितम्।

सद्य एव प्रकाशिता: केचन कथासङ्ग्रहा: दृष्टिपथमायान्ति। तेषां प्रमुखा: केचन सन्ति –

१. कथासप्तकम् – नलिनी शुक्लाया:

२. मन्दोर्मिमाला – महाभारतकथावल्लरी, श्रीधरभास्करवर्णेकरस्य

३. हा हा, एकादशी च – इच्छारामद्विवेदिन:

४. कथासंवर्तिका – भागीरथप्रसादत्रिपाठिनः
५. अनाघ्रातं पुष्पम् – प्रशस्यमित्रशास्त्रिणः
६. उवाच कण्डुकल्याणः –प्रमोदकुमारनायकस्य
७. सहपाठिनी– प्रमोदभारतीयस्य
८. वृहत्सप्तपदी – दुर्गादत्तशास्त्रिणः
९. गल्पकुसुमाञ्जलिः – कालिकाप्रसादशास्त्रिणः
१०. संस्कृतकथाकुञ्जम् – गणेशरामशर्मणः
११. मञ्जुनाथगद्यगौरवम् (डॉ. रमाकान्तपाण्डेयेन सम्पादितम्) अत्र भट्टमथुरानाथशास्त्रिणः नैकाः कथाः सङ्कलिताः सन्ति।
१२. आख्यानवल्लरी – कलानाथशास्त्रिणः
१३. कथासारः – वि. वेलणकरस्य
१४. शुष्को वृक्षः – कृष्णदत्तशर्मणः
१५. यौतकवर्तनम् –नन्दकिशोरगौतमस्य
१६. कथावलिः – तिरुवेङ्कटाचार्यस्य
१७. कथामञ्जरी – कर्णवीररागेश्वररावस्य
१८. अभिनवसंस्कृतकथा – नारायणशास्त्रिकाङ्करस्य
१९. रञ्जनकथामाला – कमल-अभ्यङ्करस्य
२०. चारुचित्रावलिः – सिद्धगोपालस्य
२१. लघुकथासङ्ग्रहः – मिहिरराजशर्मणः
२२. कथामृतम् – गुणपतिशुक्लस्य
२३. नीरवस्वनः – वनमालीविश्वालस्य
२४. इक्षुगन्धा, राङ्गडा चित्रपर्णी चेति अभिराजराजेन्द्रमिश्रस्य
२५. लघुकथासङ्ग्रहः – साहित्य-अकादमी, दिल्ली
२६. हत्याकारी कः – नारायणदाशस्य
२७. स्मितरेखा – त्रिपाठिनो राधावल्लभस्य

इच्छारामद्विवेद-वनमालिश्वासप्रभृतिकथाकाराणां केचन अन्येऽपि कथासङ्ग्रहाः प्रकाशिता दृग्गोचरीभवन्ति। राजस्थान संस्कृत-अकादेम्याऽपि केचन कथासङ्ग्रहाः प्रकाशिताः, नारायणदाशस्य 'वासन्ती' पत्रिकायामपि काश्चन कथाः सङ्कलिताः सन्ति। विस्तरभिया समेषां तेषां चर्चा नेह क्रियते।

भट्टश्रीमथुरानाथशास्त्रिणां कथाः विविधविषयानाश्रित्य प्रवर्तन्ते। तेषामनुभव-संसारोऽतीव विस्तृतो व्यापकश्चास्तीति कथ्यस्य सम्प्रेषणे पाठकानामुन्मुखीकरणे च सविशेषं प्रभवन्ति ते। तेषां सङ्कलनेऽस्मिन् प्रकाशितेषु उपन्यासेषु 'आदर्शरमणी'त्याख्य उपन्यासः स्त्रीसमस्यामधिकृत्य निबद्धो वर्तते। 'मोगलसाम्राज्यसूत्रधारो महाराजो मानसिंह' इत्युपन्यासोऽयमैतिहासिकीं भावभूमिमवगाहते। मानसिंह-राणाप्रतापयोः विवादम् अकबर-मानसिंहयोश्च मैत्रीं विषयत्वेनाङ्गीकृत्य निबद्धेऽस्मिन्नुपन्यासेऽज्ञातान्यप्यैतिहासिकतत्त्वानि सन्ति

निगुम्फितानि। अतो न केवलं काव्यदृष्ट्या ऐतिहासिकदृष्ट्यापि महत्त्वमेधत एव उपन्यासस्याऽस्य।

'भक्तिभावनो भगवान्' इत्युपन्यासे बालविधवाया 'दलितकन्याया' कमलाया वर्णनं वर्तते। समाजपरित्यक्ता भगवतो दर्शनार्थमितस्ततोऽटाट्यमाना कमलाऽन्ते तत्त्वज्ञानं प्राप्नोति। सा वदति–

**''अपि चरणामृतम्? चरणामृतं कुत्र दास्यसि? मुखे स्थानं नाऽस्ति। समस्तदेहस्योपरि भगवतो मदनमोहनस्याऽधिकारः संवृत्तः। मस्तके मदनमोहनः, जिह्वायां मदनमोहनः, हस्ते मदनमोहनः। क्व दास्यसि चरणामृतम्?''**

संस्कृतसाहित्ये दलितसाहित्यस्य प्रतिनिधिभूतोऽयमुपन्यासग्रन्थः।

ग्रन्थस्याऽस्य कथाखण्डे प्रकाशिताः कथा अपि वर्ण्यविषयानुसारेण सङ्कलिताः सन्ति। कासुचित् कथासु विद्यते एतिहासिकतत्त्वानां प्राधान्यं कासुचिच्चाऽन्यस्य कस्यचित्तत्त्वस्येति तत्तद्वर्ण्यतत्त्वमुपजीव्यकथानामेतासां विभागः कल्पितोऽस्ति।

सङ्ग्रहेऽस्मिन्नाहत्य ५८ कथाः सङ्गृहीताः सन्ति। यासु काश्चन अप्रकाशितपूर्वा अपि सन्ति– यथा जीविते ममता यथा वा हृदयव्रणः। भट्टमहाभागानां कथानां प्रथमोऽयं स्वतन्त्रः सङ्ग्रहः। पूर्वं केषुचित् विविधकथाकृतां कथासङ्ग्रहेषु तेषामपि कथाः सङ्कलिता अभूवन्। मया सम्पादिते मञ्जुनाथगद्यगौरवेऽथ च कथाकल्लोलिनीग्रन्थे काश्चन कथाः सहृदयैर्दृग्गोचरीकृता अभवन्। तेषां कथोपन्यासानामेतावान् विशालोऽयं प्रथमः सङ्ग्रह इति नूनमाधुनिकसंस्कृतसाहित्यक्षेत्रेऽपूर्वेयं घटनेति सहृदयसाहित्यतत्त्वविदां कथारसिकानां स्यादेव मनोमोदाय। भट्टमहाभागानामितोऽपि विशालतमं कथासाहित्यं विद्यते किन्तु कृतेऽपि प्रयासेऽस्माभिः काश्चन कथा नैवाधिगता इति तत्कृते पुनः प्रयासो विधास्यत एव।

**भट्टमहाभागानां निबन्धसाहित्यम् –**

भट्टश्रीमथुरानाशास्त्रिणो निबन्धसाहित्यमतीव विपुलं वरीवर्ति। काव्यलेखने गद्यलेखने च सममेव प्रसरति स्म भट्टमहोदयानां भारती। वस्तुतो विषयविशेषमवलम्ब्य निबन्धलेखनस्य परम्परा पाश्चात्यसाहित्य एव लभ्यते। भारतीयैः प्राचीनकाले न तादृशी विधा समाश्रिताऽभवत्। सत्यमेवोक्तं प्रबन्धपारिजातस्य भूमिकायां देवर्षिणा कलानाथशास्त्रिणा–

''विषयविशेषमवलम्ब्य तस्य संक्षिप्तविवेचनपराणां, भावनाविशेषमवलम्ब्य स्वीयं हार्दमुद्गिरतां वा निबन्धानां परम्परा प्रमुखतः पाश्चात्यसाहित्यस्यैवाऽवदानमिति विदुषां मतम्। 'एसे' (Essay), 'मोनोग्राफ' (Monograph), 'ट्रीटीज' (Tretise) इत्याद्यभिधानानि वहन्ती सेयं विधा विषयस्यैकस्य विवेचनं कुर्वाणान् निबन्धान् निर्दिशति, यत्र तद्विषयकस्य परिज्ञानस्य संक्षिप्य समावेशः क्रियते। अपरस्तु हृदये समुन्मिषन्तीनां भावनानां ललितमुद्गमनमपि निबन्धस्यैवाऽपरः प्रकारो यः 'पर्सनल एसे' (Personal Essay) इत्याख्यायते पाश्चात्यसाहित्ये,

हिन्द्यादिभाषासु च ललितनिबन्धादिनामभिर्व्यपदिश्यते। सोऽयं प्रकारः पाश्चात्यजगति जन्माऽलभतेति साहित्यविपश्चितः कथयन्ति। फ्रांसदेशीयः साहित्यकारः मान्ते (Montaigne, Michel (Eyquem) de) (१५३३-१५९२) इत्याख्योऽस्य प्रकारस्य जनको व्यपदिश्यते येन सर्वप्रथमम् "Essais" शीर्षकं स्वीयनिबन्धानां फ्रेंचभाषानिबद्धानां सङ्कलनं पेरिसनगरात् १५८० ई. वर्षे प्राकाशि। एषु निबन्धेषु धर्म-नागरिकता-सभ्यतादिमानवीयजीवनसम्बन्धिनां विविधविषयाणां सम्बन्धे लेखकेन स्वहृदये समुन्मिषतां स्वकीयविचाराणामुन्मुक्तं हृदयग्राहि च समुट्टङ्कनं कृतमभूत्। अस्या लेखविधायाः प्रभावो विद्वत्सु तावत्प्रसृतो यदाङ्ग्लभाषालेखकैरपि "Essay" इति नामधेयाङ्कितस्यास्य प्रकारस्य सुमहत्साहित्यमलेखि, ततः प्रभृति चाद्यावधि विश्वस्मिन्नस्य प्रकारस्य कथं खलु व्यापकं सर्जनमभूदिति विदन्त्येव विद्वांसः।''

सेयं निबन्धलेखनपरम्परा पाश्चात्यसाहित्यस्यावदानभूतेति विपश्चितो वदन्ति किन्तु भारतेऽपि सेयं परम्परा प्राचीनकालादेव विस्तृतिं प्राप्तवती। नैकान् शास्त्रीयान् लघुविषयानादाय तैस्तैर्मनीषिभिर्लिखिता निबन्धास्तु विलसन्त्येव। एतेषां साहित्यिकं स्वरूपमेव पाश्चात्यजगतोऽवदानमित्यस्माकं प्रसङ्गेऽस्मिंस्तात्पर्यम्।

विंशशतकस्य प्रारम्भकालात् यथा लघुकथानां प्रसारोऽभवत् संस्कृतसाहित्ये तथैव निबन्धविधाऽपि प्रसृतिं लेभे। हृषीकेशभट्टाचार्यादयो मनीषिणो निबन्धलेखनपरम्पराया अस्या विकासाय महान्तं प्रयत्नं कृतवन्त इति जानन्त्येव विपश्चितो विद्वांसः। विंशशतकस्य तृतीयदशके केचन निबन्धसङ्ग्रहाः संस्कृते प्रकाशिता अभूवन्। तेषु रेवतीकान्तभट्टाचार्येण १९२८ ई. वर्षे कलिकातानगरात् प्रकाशिता 'प्रबन्धकल्पलतिका' तथा च विद्योदयपत्रे प्रकाशितानां हृषीकेशभट्टाचार्याणां निबन्धानां सङ्कलनभूता 'प्रबन्धमञ्जरी' (१९२९ ई. वर्षे विजनौरतः पद्मसिंहशर्मणा प्रकाशिता) प्रामुख्यं भजेते। अस्मिन्नेव क्रमे जयपुरस्थमहाराजसंस्कृत-महाविद्यालयप्राचार्याणां गिरधरशर्मचतुर्वेदशर्मणां १९३७ ई. वर्षे प्रकाशितो 'निबन्धादर्शः' इत्याख्यसङ्ग्रहोऽप्युल्लेखमर्हति। क्रमेण भट्टमथुरानाथशास्त्रिप्रभृतिभिर्निबन्धकारैर्विधेयं वृद्धिं प्रापिताऽभूत्। भट्टमहाभागानां शताधिका निबन्धाः संस्कृतरत्नाकरादिपत्रेषु प्रकाशिताः प्राप्यन्ते। तेष्वनेकेऽद्यापि प्रकाशनमुखं पश्यन्ति। मञ्जुनाथग्रन्थावल्या द्वितीयभागस्य द्वितीये खण्डेऽस्मिन् भट्टमहाभागानां केचन प्रमुखा एव निबन्धाः सङ्कलिताः सन्ति। तेषां निबन्धात्मको भारतवैभवनामा पूर्वमप्रकाशितो ग्रन्थो ग्रन्थावल्यामस्यां प्रकाश्यते। भारतैतिह्यवर्णनपरः सुविशालोऽयं ग्रन्थस्तेषां जीवनकाले प्रकाशनं नैव प्राप्नोत्। अत्र यादृशी ऐतिहासिकी विच्छित्तिस्तादृशी एव काव्यात्मिका विच्छित्तिरपि विलसति। अत्र सन्दर्भाणामहमहमिकया संयोजनं ग्रन्थस्य प्रामाण्यं निबन्धकर्तुश्च बहुज्ञतां निदर्शयति। तथैव गीर्वाणगिरागौरवमपि।

ग्रन्थावल्या निबन्धखण्डे पञ्चविधा निबन्धाः सङ्कलिताः सन्ति- विस्तृता निबन्धा,

ललितनिबन्धाः, यात्रावृत्तान्तात्मका निबन्धा, निरूपणात्मका निबन्धाः, शोधात्मका निबन्धाश्च।

भारतवैभवे प्राचीनं भारतीयमैतिह्यं वर्णयन् भट्टमहाभागो देशस्याऽस्य गौरव–सीमा–विस्तारादिविषयान् ललितशैल्या निबध्नाति। प्रसङ्गेऽस्मिन् स बहूनां मतान्युद्धृत्य स्वीयं निष्कर्षं प्रस्तौतीति निबन्धोऽयं न केवलं साहित्यिकदृष्ट्या ऐतिहासिकदृष्ट्याऽपि महत्त्वं बिभर्ति। अस्य वैशिष्ट्यं देवर्षिकलानाथशास्त्रिमहोदयैरामुखरूपेणोपस्थापितमेव।

द्वितीयं 'गीर्वाणगिरागौरवम्' इति शीर्षको निबन्धः संस्कृतभाषायास्तत्साहित्यस्य च सर्वाङ्गीणतामुपस्थापयति। ललितनिबन्धेषु 'किन्तोः कुटिलता' 'मकारमहामेलकश्चेति' साहित्यजगति सुप्रसिद्धौ कविप्रतिभाचमत्कारस्य निदर्शनभूतौ निबन्धौ स्तः। 'रूप्यकरामस्य आत्मकथा' 'विच्छत्तिवैपुल्यं विविधा विधाश्चाभिव्यक्तेः' इति द्वावप्यप्रकाशितपूर्वौ निबन्धाविह प्रकाश्येते। अन्ये केचन संस्कृतरत्नाकरे भारतीप्रभृतिपत्रिकासु प्रकाशितपूर्वा अपीह सङ्कलिताः। यात्रावृत्तवर्णनपरा निबन्धास्तत्तत्स्थानस्य प्रत्यक्षचित्रोपस्थापने समर्था इति सहृदयाः स्वयमेव जानीयुः। निरूपणात्मकाः शोधात्मकाश्च भट्टमहाभागैः काले काले लिखिता निबन्धा न केवलं छात्रान् प्राध्यापकानप्युपकुर्युरिति नो विश्वासः।

भट्टमहाभागानां साहित्यान्वेषणक्रमेऽस्माभिरप्रकाशितपूर्वाणि कानिचिन्मुक्तक–काव्यान्यपि प्राप्तानि। तान्यपि निबन्धखण्डान्ते प्रकाश्यन्ते। 'मञ्जुला' नाटिका कविवर्याणामेतेषां सुप्रसिद्धा एकैव च नाट्यरचना। सेयं साम्प्रतिकीं रेडियोरूपकविधामुपजीव्य प्रणीता तरुणकवीनां मार्गदर्शनं कुर्यादेवेति साऽप्यत्र प्रकाश्यते।

मञ्जुनाथग्रन्थावल्याः सम्पादनयज्ञेऽस्मिन् मां योजितवद्भ्यो राष्ट्रियसंस्कृतसंस्थान–कुलपतिभ्यो विश्रुतसर्जकेभ्य आचार्यराधावल्लभत्रिपाठिमहोदयेभ्यो भट्टमहोदयानां ज्येष्ठसुपुत्रेभ्यो गुरुकल्पेभ्यो विविधविद्याप्रस्थानपारङ्गतेभ्यश्च देवर्षिकलानाथशास्त्रिमहोदयेभ्यः प्रणतिततयो वितीर्यन्ते। नूनं भट्टमहोदयानां साहित्यान्वेषणक्रमे शास्त्रिवर्यैर्भृशं प्रयतितम्। तस्यैव श्रमस्य परिणामोऽयं सङ्ग्रह इति दिक्।

– **रमाकान्तपाण्डेयः**

ख ) संस्कृतभाषायां प्रचुरा साहित्यसामग्री
ग ) संस्कृतभाषायाः अतिप्राचीनता
घ ) वर्तमानयुगस्यापेक्षा च संस्कृतभाषा च
ङ ) संस्कृतभाषायामन्यभाषाशब्दानां शनैः शनैः प्रवेशः
च ) संस्कृतनिष्ठा हिन्दीशब्दावली

## ललितनिबन्धाः

१. किन्तोः कुटिलता
२. बालकभृत्यः
३. हीरकः
४. मकारमहामेलकम्
५. रूप्यकरामस्यात्मकथा
६. श्रीहनूमतः आदर्शचरितम्
७. हंसवाहना सरस्वती मयूरवाहन कथं जाता
८. भारतीयं भोजनशास्त्रं ---
९. विच्छित्तिवैपुल्यं विविधा विधाश्चाभिक्तेः
१०. मृत्यो त्वमागतोऽसि
११. अपि नाम सेयमव्यवहारिकी ?

# यात्रावृत्तान्तात्मका निबन्धाः

१. अमरकण्टकः

२. व्योमविहारः

३. अस्माकमुत्तराखण्डयात्रा

४. विश्वस्य असाधारणं तीर्थस्थलं भगवान् श्रीअमरनाथः

५. भगवतः श्रीकृष्णस्य ...

# निरूपणात्मका निबन्धाः

१. मानवसभ्यतायां जीवनस्य किमुद्देश्यं स्यात् ?

२. वर्तमानयुगस्य परीक्षाप्रणाली च संस्कृतशिक्षा च

३. निबन्धलेखस्य विराट् प्रवाहः

४. लिपिविषये निवेदनम्

# शोधात्मका निबन्धाः

१. अपि नासाभूषण ...

२. काव्यलक्षणं तद्विषये विभिन्नमतानि च

३. रसस्वरूपं विभिन्ना रससिद्धान्ताश्च

४. काश्मीरकमहाकविर्बिल्हण....

# मुक्तककाव्यानि

१. नीरद-नीराजनम्

२. सती-सप्तदशी

३. कपिलार्याष्टकम्

४. वियोगिनो विप्रलापाः

५. मनोलहरी

# नाटिका

१. मञ्जुला

# विस्तृता निबन्धाः

१. भारतवैभवम्

२. गीर्वाणगिरागौरवम्

# भारतवैभवम्

## आमुखम्

भट्टश्रीमथुरानाथशास्त्रिणां संस्कृतकथासर्जनकालोऽभूत् १९०४ ई. त आरभ्य १९६४ ई. पर्यन्तम्। तेषां प्रारम्भिकं कथासाहित्यं १९०४ ई. तः आरभ्य १९३० ई. पर्यन्तमभूत् प्रमुखतः सृष्टं, किन्तु तदनन्तरं १९३०ई. त आरभ्य भारतस्वातन्त्र्यप्राप्तिं यावत्तैः संस्कृतसाहित्ये कथोपन्यास-निबन्ध-व्याख्या-टीका-काव्य-समीक्षा-विनोदवार्तादिर्या विपुला सृष्टिर्व्यधायि तस्या आकलनं विस्माययति पाठकान्। कालखण्डेऽस्मिन् काव्यानि, विमर्शग्रन्थादयश्च तु व्यलेखिषतैव, भारतेतिहाससम्बद्धा लघुकथा अपि भूयस्यां संख्यायां व्यलिख्यन्त। आसीत् स कालः स्वातन्त्र्यसङ्ग्रामस्य, राष्ट्रियान्दोलनस्य।

राष्ट्रियान्दोलनस्याङ्गभूतमवैकं कार्यमभूत्साहित्यकाराणां यत्ते भारतस्य महिमानं, स्वदेशस्य गरिमाणं प्रख्यापयन्ती रचनाः प्रसारयेयुर्येन स्वातन्त्र्यसेनानीनां प्रोत्साहनं स्यात्। हिन्दीकविवर्यस्य राष्ट्रकवेर्मैथिलीशरणगुप्तस्य काव्यं ''भारतभारती' इत्यस्य तथ्यस्य प्रमुखं निदर्शनं यत्र भारतस्य प्राचीनं गौरवमवर्ण्यत, पारतन्त्र्योत्तरवर्तिनी दुर्दशा चाप्यवर्ण्यत। भट्टपादैरस्मिन्नेव साहित्याभियाने भूयस्यो लघुकथा भारतेतिहासविषयिण्यो लिखिताः, पत्रपत्रिकासु प्रमुखतः संस्कृतरत्नाकरे च ताः प्रकाशमाप्ताः। बुद्धकालिकस्याङ्गुलिमालस्य कथामारभ्य मध्यकालीनानां राजपुत्राणां शौर्यं, स्वामिभक्तिं, राष्ट्रप्रेमाणं, देशस्य कृते समर्पणमात्मबलिदानं, पारदैशिकानामाक्रामकाणां च विरोधं कथावस्तुरूपेण प्रस्तुवन्तीनामनेकासां कथानां सृष्टिरस्मिन् स्वातन्त्र्यपूर्वकालेऽभूत्।

एतासां कथानां सङ्कलनं ग्रन्थाकारे प्रकाश्येत येन भारततेतिहासस्य महिमा प्रसरेदित्येषां वाञ्छाऽभूत्। सङ्कलनस्यास्य पूर्वभागरूपेण भारतस्य वेदकालादारभ्याधुनिककालपर्यन्तं या सामाजिकी स्थितिरभूत्तस्याश्चित्रणपरा काचन सामग्री अवश्यं प्रकाश्या, इति तेषां सुहृद्भिः परामृष्टम्। अत एव भारतस्य प्राचीनमितिहासं सङ्क्षिप्य वर्णयन्ती काचनेतिहासरूपरेखा तैर्विलेखितुमारब्धा यस्यां तत्कालीनस्य स्वातन्त्र्यसमरस्य, राष्ट्रियतान्दोलनस्य च भावभूमिः परोक्षरूपेण, प्रच्छन्नरूपेण चानुस्यूता स्यात्। आङ्ग्लानामियं मान्यता तदानीं शोधविद्वद्भिः प्रत्याख्याताऽभूद् यद् भारते खल्वार्या अन्यतः कस्माच्चन प्रदेशादागत्याक्रम्य च स्वराज्यं स्थापयामासुः, तदा वेदान् प्रणिन्युरित्यादि। आर्या भारत एवाभूवन्निति साधयन्तो बहवो ग्रन्थाः प्राकाश्यन्त हिन्द्यामाङ्ग्लभाषायां च। भट्टमहोदयैरपि आर्याणां मूलतो भारतीयत्त्वं प्रख्यापयन्तीतिहासरूपरेखा व्यलेखि। अत्रैव वेदा दृष्टा महर्षिभिरिति तत्र प्रत्यष्ठापि। तदनन्तरं प्राक्तनेतिहासस्य, साम्राज्यानां च वैभवमवर्ण्यत, मध्यकालिकी स्थितिरप्यवर्ण्यत। कथं सोमनाथोपरि यवनाक्रमणमभूत्, कथं भारतीयानामैक्यस्याभावादाक्रामकैरस्माकं प्रदेशेषु विजयो

लब्धः, मोगलकाले दासत्वावधावपि कथं संस्कृतगिरा संस्कृतिश्चात्रत्यानां देशभक्तानामुत्सर्गवशात् साधनावशाच्चाक्षुण्णतया सातत्यमावहत्, सर्वमिदं सङ्क्षिप्य कतिपयनिबन्धरूपेण तैर्व्यलेख्यत।

एतस्याः इतिहाससामग्र्याः प्रकाशनं पूर्वभागे भवेत्, उत्तरभागे चैतिहासिकीनां लघुकथानां समावेशः स्यात्, एवं चैको ग्रन्थो 'भारतवैभव' नाम्ना (साहित्यवैभव–जयपुरवैभव–गोविन्दवैभवेति वैभवत्रय्या अनन्तरं चतुर्थं वैभवं प्रतिनिदधानः।) प्रकाश्येतेति तेषामभूदभिलाषो यत्तेषां जीवनकाले नाऽग्रहीन्मूर्तरूपम्। ऐतिहासिकाः कथाः पत्रिकासु प्राकाश्यन्त किन्त्वितिहासरूपरेखाया भूयान् भागोऽप्रकाशित एवाऽस्थात्।

यदा मञ्जुनाथग्रन्थावल्याः प्रकाशनस्य सङ्कल्पो मूर्तं रूपं गृह्णन्नभूत्, तदा मयाऽनुभूतं यदैतिहासिक्यः कथास्तु समग्रे कथासङ्ग्रहे प्रकाश्येरन्नेव यासु सामाजिक्यः, विनोदपराः, प्रतीकात्मिका, ऐतिहासिकाः सर्वविधाः कथाः समावेश्येरन् किन्तु भारतेतिहासस्य यानि यानि स्थलानि यान् यान् कालान् विशेषान् वा वर्णयन्तस्तेषां लेखा आसंस्तेषां 'भारतवैभव' शीर्षकान्तर्गतमेव प्रकाशनमस्यां ग्रन्थावल्यां स्याच्चेत्तदौचित्यं स्पष्टं प्रतीयेत। अतः सर्वस्य तस्य भागस्य पुनरुद्धारं, सङ्कलनं संशोधनं च कृत्वा, प्रारम्भे राष्ट्रगौरववर्णनपरा गीतीः प्रस्तूय (टीकया सहिताः) 'भारतवैभव' शीर्षको ग्रन्थो ग्रन्थावल्या अस्मिन् भागे प्रस्तूयते। अत्र वेदकालिकी देशस्यास्य स्थितिः, वेदकालिक इतिहासः, अर्याणामादिदेशत्वेन भारतस्यैव स्थापना, मध्यकालिकी सङ्घर्षस्थितिः, देशभक्तानां प्रेरककथाः, भारतस्य समृद्धिः, शौर्यं च कथं विश्वविख्यातमभूदित्यादेर्वर्णनं समाविष्टमस्ति। यत्र कुत्रचन मध्यकालेऽपि कतिपयेषां मोगलसम्राजां भारतस्नेह उपवर्णितः प्रतीयेत। तस्य कारणमिदमेव यद् यदा राष्ट्रीयस्वातन्त्र्यसमरे हिन्दवो–मोगलाश्च (बहादुरशाहजफरादयः) ब्रिटिशसाम्राज्यस्य विरोधे ऐक्यं प्रादर्शयंतदा साहित्यकाराणामियं मानसिकी वृत्तिर्बहुधा प्रतिफलिताऽदृश्यत यदस्यां भूमौ ये केऽपि निवसन्ति ये चेमां स्वकीयां मातृभूमिं मन्यन्ते तेषां सर्वेषामेकमनस्कत्वं साहित्यस्य साध्यमस्तु। इत्थं हि 'भारतवैभव'स्य सर्जनप्रयोजनं स्वातन्त्र्यसमरावसरे भारतेतिहासगरिम्णः प्रतिष्ठापनमभूदिति पाठकाः परिचेष्यन्ति सामग्रीमिमां सकृदवलोक्यैव।

अस्यामेव पृष्ठभूमौ तदानीं विलिखितस्य 'भारतवैभव'स्य सम्पादने मया यत्र कुत्रचन टिप्पणीरूपेण स्वातन्त्र्योत्तरकालीना स्थितिरपि विलिखिताऽस्ति। एवं विधाटिप्पणी यदि दृश्येत चेत्पाठकास्तां सम्पादनकालिकीं स्थितिमेव परिज्ञास्यन्तीति किमधिकनिवेदनेन।

(देवर्षिकलानाथशास्त्री)

# १. भारतवैभवम्

क ) भारतीयं गौरवम्

ख ) भारतस्य सीमा

ग ) आर्याणामावासः

घ ) मध्यकालः

ङ ) सोमनाथे यवनाक्रमणम्

च ) नादिरशाहस्याक्रमणम्

छ ) मोगलकालः

ज ) स्वातन्त्र्यात् पूर्वं भारतस्य प्रान्ताः

झ ) आर्यावर्त्तस्य राष्ट्रिया एकता

# भारतवैभवम्

(निबन्धसङ्ग्रहः)

## उपोद्घातः

## मातृभूमङ्गलम्

### भारत-वसुन्धरा

**दोहा-** हिमगिरि-छत्रतले त्रिदश-नदी-हारि सुखकारि।
जलधि-धौतचरणं भजे भारतमनय-निवारि।।१।।

**कुण्डलिया-** भारत-जननी-ज्योतिषा जगती जयमुपयाति।
ज्ञानाऽऽलोकलवादयं लोकः सभ्यो भाति।
लोकः सभ्यो भाति भौतिकं ज्ञानं फलयन्।
आध्यात्मिकविषये तु मौनमुद्रामिव कलयन्।
सत्यं ज्ञानमनन्तमित्यहो लोकध्वननी।
भुवनतले निखिलेऽपि भासते भारतजननी।।२।।

**घनाक्षरी-** मानव-समाजे सभ्यतायाः साधयित्री सेय-
ममितमगाधज्ञानराशि-जनयित्रीयम्।
विश्वमण्डलेऽस्मिन्निखिलेऽपि प्रभवित्री बभौ
भरत-भगीरथादि भूपोद्भावयित्रीयम्।
श्रीमद्-राम-कृष्ण-पदपङ्कजैः पवित्रीकृता
भीष्मप्रमुखाणां धर्मधीराणां सवित्रीयम्।
वीराणां वरित्री चिन्तनीयचरितानां चारु
चेतसि चरित्री भाति भारतधरित्रीयम्।।३।।
विद्रुमेन्द्रनीलमणि-मुक्ता-पद्मरागभृता
गारुत्मत-गर्भि-हारि-हीरक-युगन्धरा।

---

१. तूलिकाभिः 'लिहाफ, सौड़, गद्दा' प्रभृतिभिर्निवीता आच्छन्नाः। २. शिशिरर्तौ शीतले पवने प्रवाति प्रवहति सति वह्नितापा रोचन्ते इत्यर्थः। ३. गिरिभिः स्थेयसी सुस्थिरा पर्वतबहुलेत्यर्थः।

रजत-हिरण्य-लोह-ताम्र-हरिताल-रङ्ग
हिङ्गुल-गिरिज-गन्धकाद्याकरबन्धुरा।
महित-महार्घ-मर्मराऽऽकरोऽयमेव जने
काननघनेषु सेयं सूयमानसिन्धुरा।
सुरभि-सुगन्ध-निलयेन मलयेन भृता
भूमि-वलयेऽस्मिन् भाति भारतवसुन्धरा।।४।।
नाना-वृक्षवल्लर्योऽत्र रोहन्ते वसन्ते, ततो
ग्रीष्मे दिग्दिगन्ते रश्मिमाली दीप्तिमास्तृणाति।
परितः प्रभूत-भूमिकर्षा भाान्ति वर्षा यत्र
शरदि शशाङ्करुक्-प्रकर्षाद् भूर्मुदं दधाति।
तूलिकानिवीता यत्र हेमन्ते रमन्ते जनाः
शिशिरे स्वदन्ते वह्नितापाः पवने प्रवाति।
श्रेयसी समग्रसमयेषु गिरिस्थेयसीयं
प्रेयसी प्रकृतिदेव्या भारतधरित्री भाति।।५।।
सरसरसालमुकुलाऽग्रभ्रमद्भृङ्गकुला
फुल्लद्बकुलाऽसौ संचकास्ति वञ्जुलाऽवनी
दीव्यद्दक्षिणस्यां परिणद्धपूगपाटलायां
सिन्धुमेखलायां मिलदेला मलयाऽवनी।
सेयमुत्तरस्यां मृगनाभिसौरभायां मिल-
द्राक्षामञ्जुकुञ्जा द्युतिपुञ्जा कुङ्कुमावनी

४. फुल्लन्तो बकुलाः ''मौलिसिरीति ख्याता वृक्षा यस्याम्, आम्र-बकुलादि वृक्षा अस्यामेव रोहन्ते इत्याशयः। ५. वञ्जुलानामशोकानाम् अवनी भूमिः। ६. परिणद्धा विशालीभूताः ( सर्वतः प्रसृता इत्याशयः) पूग (सुपारी), पाटला ('पाटलि, अमोद्या' इत्यादि पर्यायो वृक्षविशेषः) प्रभृतयो यस्यां सा ( तस्यां दक्षिणायां दिशि)।७. समुद्रो मेखलास्थानीयः पर्यन्तभागो यस्याः।८. केशरभूमिः, केशराः काश्मीरे एव भवन्तीति साभिमानमाह विह्लणः- 'सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कविताविलासाः' इत्यादि।९. चम्पकादीनाम् उद्भेदः विकासो यस्याम्। कमल-केतकादीनामनन्तकुसुमानामामोदं सौरभं वहन्ती भारतमेदिनी।
१०. सर्वतः पूर्वं विकासं सभ्यताम्। ११. ज्ञानबीजम् उवाप उप्तवती। १२. जातिदेशनिर्विशेषं सकललोकानां कल्याणं भावयन्त्या भारतधराया एव सत्या विश्वमैत्रीत्यर्थः। १३. जगति एकमात्रा धैर्यवती। १४. अस्या एव सकाशादार्या विनिर्गम्य यूरोपादिदेशेषु जग्मुरिति आर्याणामादिदेशत्वादार्यभूरियम्।

श्रीमत्याः प्रकृत्याः स्फुरदुज्ज्वलविलासवनी
पुण्यपावनीयं भुवि भाति भारतावनी।।६।।
कमलकेतकीकुन्दकुटजकुरबक-ततितुष्टा
मिलन्मालती-मधुकमल्लिकामाधविजुष्टा।
एलालकुचलवङ्ग-पूगपाटल-परिणद्धा
शालशिरीषाशोकतिलक-तरुणी-परिरब्धा।
दलदतिमुक्तकनवमालिकायूथिचम्पकोद्भेदिनी
इयमनवधिकुसुमाऽऽमोदिनी भव्या भारतमेदिनी।।७।।
आर्यवसुमती सर्वतः प्रथमविकासमवाप।
ततः सकललोकालये संविद्बीजमुवाप।।
संविद्बीजमुवाप सकलकल्याणं विदती।
जगति सभ्यतां दधौ विश्वमैत्रीमवदधती।।
मानवताद्युतिजागराय जगदेकधृतिमती।
द्वीपे द्वीपे दीप्तिमदादियमार्यवसुमती।।८।।
वीरनृपसङ्के भूरि शृङ्गारं, विरोधिगणे
वीरं, प्राणिमात्रे किं च करुणं हृदा दधाति
अद्भुतमचिन्त्यशक्तौ, हास्यं वीरमानिगणे,
भीषणभयानकं विधर्मिषु तु याऽनुयाति।
बीभत्सं विरुद्धयुद्धमांसवसापृक्ते रणे
रौद्रं कितवेषु, शान्तमन्तःकरणे पुनाति
मह्यतां मदीयं साधुसाहित्योदयीयं यशो
यद् रसमयीयं भूरि भारतमही यं पाति।।९।।

अचिन्त्यशक्तौ अपरिसीमायाम् अध्यात्मशक्तौ। विरुद्धयुद्धे. दूरादागतानां दस्यूनां मांसवसाभिर्व्याप्ते संग्रामे। मह्यताम्. मम उत्तमसाहित्यसंबन्धि यशः अवश्यं मह्यतां प्रशस्यताम् यतः नवरसमयी इयं भारतमही यम् (अर्थात् माम्) पाति। अन्यदेशवासिकवीनामपेक्षया साहित्य-विषये ममैव यशः प्रशंसनीयं यस्य मे रक्षिका भारतभूः अपि नवरसमयी। नवरसभावुकस्य कवेर्यदि रक्षकोपि नवरसप्रचुरः स्यात्तदा कथं नास्य भागधेयं श्लाघ्य-मित्याशयः।।९।।

**शिखरिणी-** नरेन्द्रे शृङ्गारं, रिपुषु बत वीरं च करुणं
व्यथार्ते, योगे चाऽद्भुतमुरसि हास्यं, भयभरम्।
अधर्मे बीभत्सं द्विषदसृजि, रौद्रं ह्यरिगणे
मुनौ शान्तं यान्ती नवरसमयी भारतमही।।१०।।

नरेन्द्रे शृङ्गारं यान्तीत्यादिः सर्वत्रान्वयः।।

**घनाक्षरी-** विश्वमण्डलेऽस्मिन् गुरुगौरवं वहन्ती सेय-
मार्यवैजयन्ती जगन्मौलौ परितः प्रवातु
सर्वतोऽपि पूर्वं मानवीयसभ्यताया गुरु-
र्देशो दत्तसभ्यतोपदेशो मङ्गलं दधातु।
नित्यं नीतिनैपुणेन नीचैर्नमयन्ती शठान्
दूरं दमयन्ती भटान् प्रेमभरात्संपृणातु
पूर्णपरतन्त्रतामपास्याऽमोघमन्त्रतया
सर्वतः स्वतन्त्रतया भारतविभा विभातु।।१२।।

आर्याणां वैजयन्ती राजपताका जगतां मस्तके प्रवातु प्रस्फुरतु। दत्तः सभ्यताया उपदेशो येनेदृशः। संपृणातु लोकान् प्रीणयतु 'पृ पालनपूरणयोः' (भारत विभा)। पूर्वां परतन्त्रताम् अपास्य दूरीकृत्य। अमोघः (अनिष्फलः) मन्त्रः मन्त्रणा यस्य सोऽमोघमन्त्रः तत्तया राष्ट्रशासने मन्त्रणायास्तत्साफल्यस्य च सुभृशमपेक्षेति सूचितम्।१२

## चित्तौड़दुर्गमहिमा

वीरक्षत्रियाणां रणकौशलधरेषु यत्र
तुङ्गशिखरेषु काप्यपूर्वविभा भ्राजते
प्रतिपदमेव यत्र साँगा-गोरा-बादलादे-
र्महाराणाप्रतापस्य प्रतापभा विभासते।
क्षत्रकुलरीते राजवंशदृढनीतेरिद-
मार्यसंस्कृतेश्च रक्षाकवचं प्रकाशते
विविधविधर्मिगण-चित्तोडं स्वदेशिजन-
चित्तोढं तदेतद्दुर्गचित्तौडं विराजते।

***

## भारतदेशः ( गीतिः )

अहो ! श्रीभारताभिख्योऽतिमुख्यो दिव्यदेशोऽयम्।
अपि ध्यायेत् सुरेशो यं स भूमेः सन्निवेशोऽयम्।।१।।

जगज्जीवातवे जाताऽनुयाता जाह्नवी यस्मिन्।
प्रसर्पत्पुण्यपीयूषप्रवेशो भूप्रदेशोऽयम्।।२।।

त्रिलोकाऽधीश्वरो यस्मिन् हरो वाराणसीवासी।
प्रहासी स्वर्गसौख्यानां, विभासी भूमिवेशोऽयम्।।३।।

हरिर्यस्मिन् बहून्-वारानुरीचक्रेऽवतारांस्तान्।
ध्रुवं मन्ये महिम्ना नाकलोकस्यापदेशोऽयम्।।४।।

अमुष्मिन् वर्द्धिताऽऽनन्दो मुकुन्दो मोदमातेने।
तदीयाऽलङ्घ्यलीलाभिर्विलीनाऽलीकलेशोऽयम्।।५।।

ध्रियन्तेऽस्मिन्निधिप्रख्याः सुविख्याता अमी वेदाः।
भृशं भूमण्डले ख्यातोऽवदातो यन्निदेशोऽयम्।।६।।

अमुष्मिन्नेव सर्वादौ दिदीपे ज्ञानदीपोऽयम्।
सदा ह्याध्यात्मविद्यायां बुधानां श्मश्रुकेशोऽयम्।।७।।

हिमाद्रिः प्रोन्नते मौलौ चकासच्चामरं धत्ते।
उदन्वद्धौतपादाग्रो नरेशानां नरेशोऽयम्।।८।।

विराजत्कुङ्कुमक्षेत्रो विजैत्रोऽशेषदेशानाम्।
स वै काश्मीरदेशोऽस्मिन् समिन्धे स्वर्गशेषोऽयम्।।९।।

कलाविद्यागृहं यस्मिन् जयाऽऽद्यं तत्पुरं रम्यम्।
स धीमान् मानसिंहाऽऽख्योऽधितिष्ठत्यम्बरेशोऽयम्।।१०।।

अमुष्मिन्नुष्णशीताऽऽद्याः प्रतीताः स्युर्यथाकालम्।
अहो क्रीडास्थलं देव्याः प्रकृत्याः पुण्यवेशोऽयम्।।११।।

रसालाऽक्षोटनारङ्गाऽम्बुजद्राक्षेक्षुजम्बीरम्।
फलं यस्मिन्नलं सिध्येत्स कश्चिद्भूविशेषोऽयम्।।१२।।

भृतो नानाविधैर्धान्यैः किलान्यैर्यानि गीयन्ते।
अहो सर्वानुजीव्याऽनन्तसम्पत्संप्रवेशोऽयम्।।१३।।

खनिभ्यो हीरकं सूते प्रभूतेलासनाथोऽयम्।
ध्रुवं नानाऽऽकराऽधीशो धनेशानां धनेशोऽयम्।।१४।।

हिमाद्रिर्मस्तकं, बाहू इमौ पूर्वाऽपरौ देशौ।
हृदा ध्येयाऽङ्गसंस्थानं दधानोऽस्मत्परेशोऽयम्।।१५।।

हिमाद्रौ मस्तके गङ्गा, भुजङ्गा भूरि भासन्ते।
सदा धर्माऽनुयातोऽङ्गेवदातो व्योमकेशोऽयम्।।१६।।

कियद् गीतानि गायामो न तृप्यामो गुणैः किन्तु।
करेणाऽऽपाद्यतेदानीं स्वदेशो हा! विदेशोऽयम्।।१७।।

सखे मे मञ्जुनाथाऽलं मुधा मा यापयेः कालम्।
कदाचित् संस्कृतोपेतो न रोचेतोपदेशोऽयम्।।१८।।

यं (भूसन्निवेशम्) इन्द्रोऽपि ध्यायेत्स भूमेः सन्निवेशः अयमस्ति।।१।। जगतां जीवनौषधाय जाता जाह्नवी यस्मिन्देशेऽनुयाता, अत एव प्रसर्पतः पुण्यरूपपीयूषस्य प्रवेशो यस्मिन्नीदृशोऽयं भूप्रदेशः।।२।। उरीचक्रे स्वीचकार। महिम्ना स्वर्गलोकस्यापि अपदेशः। विलीनः अलीकस्य मिथ्यापराधादेर्लेशः यस्मिन्।।५।। निधिप्रख्याः निधिसदृशाः। येषाम् (वेदानाम् अवदातः पवित्रो निदेशः (आज्ञा) सर्वत्र ख्यातः।।६।। श्मश्रुकेशः (कीर्तिरक्षणे श्मश्रुसदृशः 'मूछों के बाल')'।।७।। हिमालयः अस्य मस्तके चकासत् देदीप्यमानं चामरं धारयति। उदन्वता (समुद्रेषु) धौतं पादाग्रं यस्य समुद्रपर्यन्तं विस्तृत इत्यर्थः। अत एव चामरादिभिश्चिह्नैरयं राज्ञामपि राजा।।८।। विराजन्ति कुङ्कुमस्य (केशरस्य) क्षेत्राणि यस्मिन्। स्वर्गशेषः ( स्वर्गसदृशः) काश्मीरदेशः अस्मिन् (भारते) समिन्धे प्रकाशते।।९।। कलानां विद्यानां च गृहं जयाद्यं पुरं जयपुरम्। अम्बेरेशः आम्बेरराज्याधीश्वरः।।१०।। रसालाऽक्षोटेत्यादि समाहारद्वन्द्वः। अक्षोट 'अखरोट'। भूविशेषः विशिष्टा भूः।।१२।। यानि धान्यानि अन्यदेशीयैर्बहिर्नीयन्ते। अत एव सर्वैरनुजीव्यानाम् अनन्तानां सम्पदां सम्प्रवेशो यस्मिन्नीदृशोऽयम्।।१३।। प्रभूतेला. प्रभूता या इला (पृथ्वी) तया सनाथः विस्तृत इत्यर्थः। नाना आकराणां (स्वर्ण-हीरकादिखनीनाम्) ईशः स्वामी।।१४।। हृदा हृदयेन ध्येयम् अङ्गसंस्थानम् (अवयवसन्निवेशः) यस्य ईदृशः अस्माकं परमेश्वरः। उपास्यबुद्ध्या हृदये ध्येय इत्यर्थः।।१५।। अयं भारतदेशो व्योमकेशः (शिवः) अस्ति, तदेवाऽऽह-हिमाद्रिरुपे मस्तके गङ्गा, भुजङ्गाः (मर्मदंशकाः बहिर्देशेभ्य आगताः) भूरि भासन्ते प्रकाशन्ते। अयं धर्मेण मुक्तः, अङ्गे पवित्रोऽस्तीति शिवरूपकम्। शिवपक्षे तु- धर्मेण वृषेण अनुयातः, अङ्गे अवदातः श्वेतः अन्यत् स्पष्टम्।।१६।। स्वदेशोऽपि स्वहस्तेन विदेशः आपाद्यत अक्रियत। वयं तथा विशृङ्खला यथा स्वदेशोऽपि विदेशवत् पारतन्त्र्य-दुःखानुभावको जात इत्याशयः।।१७।।

संस्कृतभाषानिर्मित: उपदेश: न रोचेत।।१८।।

(गीति:) **देशकार्यकर्तॄन् प्रति विनम्रप्रार्थना**

माननीयमहोदया:। श‍ृणुयात मे विनयं न किम्।
सम्प्रदायस्यथ नम्रनीतिनिवेदने समयं न किम्?।।१।।
श्रीमतामयमेव देश उपागतो गुरुतां चिरात्।
यद्बलेन हि दैशिकी जनता गताऽभ्युदयं न किम्?।।२।।
आर्यजातिरियं महामहिता सतामुदये हिता।
ज्ञानगौरवतो जगाम जनेषु सा विनयं न किम्?।।३।।
तामुदग्रतमाल-ताल-रसाल-सालभृतां भुवम्।
आर्यदेशभवामुपास्य नवा अभूम वयं न किम्?।।४।।
पूर्वगौरवमुत्सृजन् नवसभ्यतामभिमण्डयन्।
भावयन्तु भवत्समाज उपागतोऽपचयं न किम्?।।५।।
ज्ञानगौरवमण्डितं बत धर्मगौरवमेव न:।
आर्यदेशमुपेयुषां प्रजुहाव लोकचयं न किम्?।।६।।
विद्यया सह धर्म्यभावमवेक्ष्य पूर्वजनस्य न:।
सर्व एव हि सभ्यदेशजनो दिदेश जयं न किम्?।।७।।
नूनमद्य परस्परं सहयोगतो, दृढनिश्चयात्।
प्राप्नुयाज्जनता नितान्तमियं महाविजयं न किम्?।।८।।
वीक्ष्यतां नयने प्रसार्य-जगद्गति: किल किंमुखा?
स्पर्द्धया प्रसरज्जवाद् बत धास्यते विलयं न किम्?।।९।।
अस्तु, सर्वमपैतु, सारमुदेतु न: सारस्वतम्।
विद्यया तिमिरेऽपयाति वहामहे सुनये न किम्?।।१०।।
मञ्जुनाथनिवेदनेन भवेदनेन न किं फलम्?
दुन्दुभौ ध्वनितोऽपि याति रव: श्रुतेर्विषयं न किम्?।।११।।

'एतद्देशप्रसूतस्य सकाशादग्रजन्मन:। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवा:।।' इति चिरात्प्रथितम्। दैशिकी भारतदेशभवा जनता।।२।। भूतदयावशात् सर्वेषाम् उदये कल्याणे हितकारिणी।।३।। उदग्रा: उन्नता: ये तमालादयो वृक्षा:, तै: भृतां पूर्णाम्। उपास्य आश्रित्य

सर्वविधैः सुखैः, उत्साहेन च नवा इव बलोत्साहशालिनः वयं न अभूम? अपितु अवश्यं सुखिनो जाताः।।४।। किन्तु वैदेशिकशासनजातया नवशिक्षया आर्यसभ्यतागतं महत्त्वं विस्मरन्, नवां वैदेशिकसभ्यतां च भूषयन् अयं भवत्समाजः अपचयं क्षयं न उपागतः? पूर्वगौरवविस्मरणेन आत्मदुर्बलतया क्षयमेव प्राप्तवानित्याशयः।।५।। अस्माकं धार्मिकगौरवेण साकम् आध्यात्मिक-ज्ञानस्य गौरवमप्यतुलमासीत्। अत एव अस्मिन् आर्यदेशे चीन-तिब्बत-नेपाल प्रभृतिभ्यो विद्याध्ययनार्थं लोकसमूहम् आजुहाव आकारयामास-ह्वेन्साङ्ग प्रभृतयो यात्रिणः कष्टान्यपि सहित्वा समाजग्मुः।।६।। अत एव विद्यया सह भगवतो बुद्धस्य, अन्येषां च धार्मिकं भावं समीक्ष्य अन्येषां सर्वेषामपि तुलनायाम् आध्यात्मिकमुत्कर्षमवलोक्य सर्वेषामपि देशानां जना अत्र विनयेन समागच्छन्तः अस्माकं पूर्वजानां विजयं दिदिशुः, सभ्यदेशा अस्माकं जयघोषं चक्रिरे।।७।। अद्यापि सहयोगेन विजयं प्राप्नुयादेव।।८।। अद्य जगतः प्रवृत्तिः कीदृशीति दृश्यताम्। यदि परस्परवास्माभिः कृता स्पर्धा तर्हि तूर्णमेव प्रखरजवेन प्रलयः स्यात्।।९।। यत्किमपि स्यात् वयं तु सारस्वतप्रतिभया विद्यया च तिमिरापनयनं करिष्यामः। तेनैव सन्नीतिः प्राप्स्यते।।१०।। स्पष्टमिमं दुन्दुभिध्वानं शृणुत फलं स्यादेव।।११।।

## देशोन्नतये प्रभुप्रार्थना

हे गणेयगुणावधे करुणानिधे ह्यवधीयताम्।
दृष्टिरुज्जवलभा-रते तव भारते विनिधीयताम्।।१।।
एष भूवलये विशेषविधोऽस्ति देशवरश्चिरात्।
सर्वसभ्यसमाज एष विभाति यद्रमणीयताम्।।२।।
किं नु कोपि निदर्शयेद् बत देशमीदृशमुन्नतम्।
यस्य वाङ्मयमावहेन्निगमागमैस्तुलनीयताम्।।३।।
यत्र कुङ्कुमकेसराः कलयन्ति कामपि सुच्छविम्।
देश ईदृश ईक्ष्यते किमिहाऽपरोऽपि? विचीयताम्।।४।।
रत्नराशिरलुण्ठि लुण्ठनतत्परैर्बहुधा परैः।
किन्तु साम्प्रतमप्यसौ वहते परां महनीयताम्।।५।।
कूटनीतिनियन्त्रणैः परतन्त्रता नाऽभूद्यदा।
देश एष दधौ तदा तव देव! दुर्दमनीयताम्।।६।।
अस्य खड्गतले बलेन परैः शिरो नमितं पुरा।
काममद्य विनम्रनीतिपरो ह्ययं परिचीयताम्।।७।।

किन्तु सभ्यवराः। समेत्य भवद्भिरेव विचार्यताम्।
एकतामवलम्ब्य कार्यपथे यथावदुदीयताम्।।८।।
वक्तृतां परिहाय सम्प्रति कर्तृतां कलयेम चेत्।
उन्नतिः स्वयमावृणीत मनागिदं परिचीयताम्।।९।।
निर्मले यमुनातटे निकटे कदम्बमहीभृताम्।
अत्र वै विहरन् हरिर्विदधे महाकमनीयताम्।।१०।।
किन्तु सैव विहारभूः परिहारभूर्जनिताऽधुना।
हेलयाऽपि दयानिधान! दयादृगत्र विधीयताम्।।११।।
तावकीं करुणामुपेत्य न वेत्त्यसौ हृदि वेदनाम्।
धार्मिकेषु दयावता भवता द्रुतं समुदीयताम्।।१२।।
गीयते निगमाऽऽगमैर्गुणगौरवं तव सर्वदा।
नाथ! सम्प्रति मञ्जुनाथगिरा कियद् बत गीयताम्?।।१३।।

गणनीयानां (श्रेष्ठतया माननीयानां) गुणानाम् अवधिः (परकाष्ठा) सदृश! 'गणनीयं नु गणेयम्' अमरः। उज्ज्वलायां भायाम् (कान्तौ) रते, सत्कार्य करणे न कीर्तिसम्पादके इत्याशयः। तव (त्वदीयतया प्रख्याते) भारते कृपादृष्टिः स्थाप्यताम्।।१।। विभाति जानाति।।२।।

निदर्शयेत् निदर्शन (दृष्टान्त) विधया सूचयेत्–निगमागमैः वेदोपनिषदादिभिः।।३।। कुङ्कुमस्य काश्मीरजस्य केसराः किञ्जल्काः 'गुच्छे'।।४।। असौ भारतदेशः, महनीयतां संपन्नताम्।।५।। तव एष देशः दुर्दमनीयताम् अजेयतां दधौ।।६।। पूर्वं वीरतायुगे खड्गो धृतः। सम्प्रति नम्रतायुगम्।।७।। वक्तृतां सभासु केवलं भाषणम्। कर्तृतां सर्वैः सङ्गत्य देशहिते कार्य पद्धतिं स्वीकुर्याम।।९।। विहारस्य भूमिः भारतं सम्प्रति परिहारस्य त्यागस्य भूमिः किमिति कृता? अवतीर्यतां पुनरपि।।१०।।

## देशनायकेभ्यो निवेदनम्

भारते गणतन्त्रमद्य हि भारतीय–सुमेधसाम्।
देश एष निदेशगोस्ति हि भारतीयसचेतसाम्।।१।।
शासनेन स्वदेशगानामद्य नन्दति मानसम्।
स्वागतं पुरतः स्वयं बत सन्दधाति सचेतसाम्।।२।।
भास्वतः किरणैरितः प्रविषह्य नीतेयं निशा।

सम्प्रकाशमवाप्य सम्प्रति लीयते तिमिरं दिशाम्।।३।।
लोकलोचनरोधकं प्रतियातु वैकृतमासुरम्।
सन्ततं समुदेतु चेतसि भाव एष दिवौकसाम्।।४।।
पश्यत क्षणमग्रतोऽपि किमस्ति नः पुरतो धृतम्।
क्षेत्रमत्र हि कर्मणामिदमस्ति नित्यनिरेनसाम्।।५।।
जातयः सकला अपीह समादृताऽतुलसाहसाः।
अग्रतः प्रसरन्ति वृत्तिमुपेत्य सन्नतवेतसाम्।।६।।
तर्हि किं मुनिवंशजैर्नु भवद्भिरेव उदास्यताम्?
किं चिरेण? विबुध्यताम्! पदमेत संयतरेतसाम्।।७।।
हे चराचरनायक! प्रणिदर्शयस्व दिशं कृतौ।
नम्रनीतिनिवेदनं शृणु सर्वमान्यसचेतसाम्।।८।।

भारतीयानां सुमेधसां बुद्धिशालिनां देशनेतृणाम्। निदेशे शासने गच्छति चलतीति निदेशगः, 'निदेशः शासनं च सः' इत्यमरः। सचेतसां सहृदयानाम्।।१।। स्वयमेव स्वागतम् अग्रतः विसृत्य स्वीकारं सन्दधाति कुरुते।।२।। भास्वतः किरणैरियं निशा नीता, अद्यावधि वैदेशिकशासनजा नैराश्याऽन्धकारपूर्णा रात्रिरासीत्। अद्य आर्यशासनजं सुप्रकाशमवाप्य दिशामपि अज्ञाननैराश्यरूपं तिमिरं लीयते लुप्तं भवति। 'दिशा' मित्यनेन न केवलं भारतस्यैव, अपि तु अस्य परितः अन्यान्यदेशैः सह यः किल पारस्परिक-सम्बन्धकृतः अत्याचारः आसीत् सोऽपि स्वदेश-शासनेन निवृत्त इत्यर्थः।।३।। आसुरं पारस्परिकहिंसादिदरूपं वैकृतं विकारः। दिवौकसां भावः (देवभावः प्रेम-परोपकारादिः)।।४।। नित्यं निरेनसाम् कपट-प्रतिहिंसादिपापशून्यानां कार्याणामिदं क्षेत्रं कर्तव्यस्थलम्।।५।। जातयः रूस-अमेरिका-जापान प्रभृतिदेशवास्तव्याः भारतीयेतरजातयः विज्ञानादिषु असामान्यं साहसम् आहृत्य (अवलम्ब्य), सन्नतो वेतसो वेत्रवृक्षो यस्याम् एवंविधां वृत्तिं चर्याम्, नम्रतामिति यावत्। उपेत्य कार्यक्षेत्रे अग्रतः प्रवर्द्धन्ते।।६।। त्याग-सहनशीलतादिसम्पन्नैः भवद्भिः एव उदास्यताम्? उदासीनतया ताटस्थ्यमवलम्ब्यताम्? संयतरेतसाम् ऊर्ध्वरेतसां वशिनामित्यर्थः, पदम् एव, कृतसंयमानां संयतवृत्तीनां पदं स्थानम् अधिकुरुत।।७।। कृतौ दिशं दर्शयस्व, कार्यस्य दिक् काऽस्तीति निर्दिश, सर्वेषां निवेदनं शृणु।

***

# भारतवैभवम्

## प्रथमोऽध्याय:

### भारतीयं गौरवम्

नूनमखण्डस्यापि भूमण्डलस्यास्य पयोधिपयोभिरावृतो जलसंस्तरभागोऽस्ति भूरि भूयान्, स्थलभागस्तु तदपेक्षया भूरि विरल इति भाषन्ते भौगोलिका: । पयोधि: परित: परिवृत: सोऽयं स्थलभूखण्ड: सप्तसु भागेषु विभक्तो ये हि द्वीप-संज्ञया पुराण-संहिताभिराख्याता: । ते च-जम्बू-शाक-कुश-क्रौञ्च-शाल्मली-गोमेद-पुष्कराख्या: । तेषामाद्योऽयं जम्बूद्वीप: सर्वतो महान्। समग्रस्यापि भूखण्डस्यार्द्धो भागो नूनमनेनैव व्याप्त:, अर्द्धे त्वन्यस्मिन्नन्येऽपि द्वीपा इत्याहुरार्यवैज्ञानिका: । जम्बूद्वीपस्य नव[२] वर्षा: (भागा:) । तेषामन्यतमोऽपि सर्वप्रधानमयं भारतवर्ष:, यो हि कर्मक्षेत्रमित्याख्यातो[३] मनीषिभि: । अस्य हि पुरा समभूद्भूयानायाम:, यो हि नवसु[४] भागेषु विभक्त: प्राक्तनै: । अयमस्माकमावासभूत: । सागरसंवृतस्तु तेषां नवमो भाग: । अस्य चतु: सीमा:, गिरयो नद-नदी-प्रभृतय: अवान्तरदेशाश्च पुराणसंहितानुसारिणि मार्कण्डेयपुराणे भारतखण्डवर्णनाध्याये विस्तृत्य वर्णिता: ।

अस्माकमयमार्यावर्तो न नाम साधारणो देश: । अस्य हि वर्तमाना सीमा भगवन्तं मनुमारभ्य प्रवृत्तान्वाख्यायते । यथा-

**'आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्।**
**हिमवद्विन्ध्ययोर्मध्यमार्यावर्तं मनुर्जगौ ।।'**

इयमेव मानवसभ्यताया आदिभूमि: । भगवती संस्कृतभारती अत्रैवोत्तरोत्तरं प्रौढिं भेजे, यया हि सर्वत: प्रथममस्मिन् संसारे ज्ञानाऽऽलोक: प्रवर्तित: । तथा हि मम पद्यद्वयम्-

---

१. 'भूमेरर्द्धं' क्षारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राहुराचार्यवर्या: । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेश: ' सिद्धान्तशिरोमणि ।

२. इलावृत-रम्यक-हिरण्मय-कुरु-हरिवर्ष-किंपुरुष-भारत-केतुमाल-भद्राश्वा: ।

३. 'तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्ट वर्षाणि स्वर्गिणां पुण्यशेषोपभोग- स्थानानि भौमानि स्वर्गपदानि व्यपदिशन्ति ।' श्रीभागवतम् ।

४. 'भारतस्यास्य वर्षस्य नव भागान्निबोध मे । समुद्रान्तरिता ज्ञेयास्ते त्वगम्या: परस्परम् ।। इन्द्रद्वीप: कशेरुश्च ताम्रवर्णो गभस्तिमान् । नागद्वीपस्तथा सौम्यो गान्धर्वो वारुणस्तथा । अयं तु नवमस्तेषां द्वीप: सागरसंवृत: ।।'' मार्कण्डेयपुराण ।

५. आर्या यत्र समन्ताद्वर्तन्ते पुन: पुनरुद्भमन्त्यत्र ।

**यथैवाऽऽदौ सृष्टा नरजगति सभ्यत्वसरणि-**
**र्यदीयं साम्राज्यं क्वचन समये प्राज्यमभवत्।**
**यतोऽमूः सम्भूता जगदुदरसूता[१] नरगिरो**
**गिराऽसौ गैर्वाणी जयती वरवाणी परिवृढा।।१।।**
**यया लोके वेदाः परिकलितभेदाः प्रकटिताः**
**स्मृतीनां धात्री या, प्रसवनकरी योपनिषदाम्।**
**समस्तत्रैलोक्ये ह्युपदिशति याऽऽध्यात्मिकपथं**
**स्फुरद्दिव्यज्योतिर्जगति जयतान्निर्जरगिरा।।२।।**

भूरिभाग्यभूरियमेव भूर्न केवलमार्याणां न वा केवलं प्राच्यदेशीयानाम्, अपितु-

सर्वेषामेव प्राच्येतिवृत्तगवेषकाणां मनस्यङ्कयामास मानवसभ्यतागतं कञ्चिदुत्कर्षं नूनम्। अयोध्यां सरयूं चाऽवलोक्य किं न स्मरणपथमधिरोहति दशकन्धर-कन्धराभुजविपिनदवानलो भगवान् रामचन्द्रः? साम्प्रतमिदं लघुतमं नगरम्, किन्तु कस्मिन्नपि समये सेयमासीन्महाविभव-शालिती विशालतमा राजधानी यत्र हि नानादेशीयानां मूर्धाभिषिक्तानां प्रभूताः सम्पदोऽस्याश्चरण-योरलुठन्। तत्समयस्य साक्षि भगवतो वाल्मीकेः सूक्तिसुधानिस्यन्दस्तदिदं रामायणं नूनम्।

रामायणस्य समये समाजः कियदुदारचरित्रः पवित्रश्चासीत्। जीवनस्यादर्शः किय-दुन्नतोऽभूत्। परिवारे परस्परं कीदृक् पूर्णः प्रणयोऽभवत्। राज-प्रजयोर्मिथोऽतुलनीयः सद्भावोऽभूत्। अद्येव नासीद् द्वयोः स्वार्थैकप्रणयिता। 'बालोऽपि नाऽवमतव्यो मनुष्य इति भूमिपः' इति धार्मिकमहत्त्वेन।

**'राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम्।**
**राजन्यसति लोकेऽस्मिन् कुतो भार्या कुतो धनम्।।'**

इति जगति जीवनाधारत्वेन वा यदि प्रजानां राजा विश्रम्भभूमिरासीत्तर्हि राजापि निजप्रजाः पुत्राधिकं स्निह्यति स्म। तासां रक्षणावेक्षणमात्मनः प्रधानं जीवनलक्ष्यममन्यत। आसीत्समाजस्य विश्वासः।

**'प्रजानां विनयाऽऽधानाद्रक्षणाद्भरणादपि।**
**स पिता पितरस्तासां केवलं जन्महेतवः।।'**

अत एव हि भूपतेरुपरि समुपस्थिते सङ्कटे प्रजाः प्राणपणेनापि तत्साहाय्यं विदधुः। राज्ञि वनं प्रोषिते प्रकृतयोऽपि सर्वं गृहादिकमपास्य गलदश्रवस्तमनुययुः। निजस्वामिना विरहितं नाभ्यनन्दँस्ता राष्ट्रम्। आहुस्ताः-

---

१. वैदिकभाषामूलभूताया वर्तमानगैर्वाण्याः पूर्वजायाश्च यस्या इण्डोरोपियानाख्यायाः सकाशादन्या वैदेशिकभाषाः परिष्कृतस्वरूपजुषो भारतीयभाषा उदभवन्निति भाषाविदो वदन्ति।

**'न हि तद्भविता राष्ट्रं यत्र रामो न भूपतिः।**
**तद्वनं भविता राष्ट्रं यत्र रामो निवत्स्यति।।'**

इतो राजापि प्रजानामवनाय तासामनुरञ्जनाय निजं राज्यं सुखं जीवनं चापि न किञ्चिदभिमन्यते। प्रजासु सङ्कटे समुपस्थिते, देशद्रोहि-दस्यु-प्रभृतीनामाक्रमणे सम्भवति, रक्षाभित्तिरिव सर्वप्रथमं स्वयमयं सम्मुखमवतिष्ठते। न गणयति च निजप्राणादिकम्। अत एव हि क्षत्रियशब्दस्य महन्महत्त्वं प्राख्याप्यत पार्थिवपुङ्गवैः-'क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः'। अद्येव न प्रजाप्रमुखपरतन्त्रम्, अपि तु सर्वतन्त्रस्वतन्त्रं निजमिदं राज्यतन्त्रमेव किम्, सर्वमखिलं वैभवं जीवलोकसुखं किं बहुना जीविताधिकां प्रियतमामप्येष परिहरति। या भार्या अकार्यशतमपि कृत्वा धर्मतो भरणीया। आह मनुः -

**'वृद्धौ च मातापितरौ साध्वी भार्या शिशुः सुतः।**
**अप्यकार्यशतं कृत्वा भर्तव्यान्मनुब्रवीत्।।'**

यस्या विरहे स्वयमेष दीनं व्यलपत्-'इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोः, असावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः' इत्यादि तामेव प्रेयसीं सीतामपि त्यक्तुमयं विवशो भवति। आह-

**'स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।।'**

किमत्र कारणम्?

पूर्वकर्मानुबन्धिनी लोकानां शुभाशुभे नियतमिमे भाग्याधीने, तथापि राजा प्रजानामभ्युदयमात्मनः कर्तव्यमवधारयति। तास्वनवसरममङ्गले संघटिते स्वयमयमात्मनोऽपराधं भावयति। अत एव राजा रामः अकालमेव ब्राह्मणतनये विपन्ने नूनं प्रजाभिरक्षितुर्ममैव कश्चिद्पराधः संवृत्तो येन मे प्रजास्वकालमृत्युना प्रविश्य ब्राह्मणतनयोऽयं संहृतः।'' इति भूतानुकम्पया स्वयमनुशोचति। अपि समुपलब्धः क्वचिदीदृगुदारो व्यवहारो भूमण्डलेऽन्यत्र?

सर्वतोभावेन निजाभिभावकस्य भूभर्तुर्भरवशे एव सुखं स्व-स्व-व्यवहारेषु निश्चिताः प्रकृतयः परमामुन्नतिं भेजुर्विद्यासु नानाकलासु च। व्यवसायवाणिज्यादिभिरासीदस्य दूरदूरद्वीपैरपि घनिष्ठः परिचयश्च सम्बन्धश्च। भारतस्य पोताः समुद्रवक्षसि तरन्तो दूरदूरद्वीपेषु विश्रमं विदधुः। धर्मशास्त्रे समुद्रयात्रानिषेधं दर्शयन्तो यद् बाह्यैः सह व्यवसायविच्छेदं समर्थयन्ते तत्तु प्रतारणमात्रम्। विशिष्टब्राह्मण-विषयिणी सा व्यवस्था न देशमात्रं पङ्गूकर्तुं प्रभवेत्। आसीत्परमामुन्नतिमुपगता पोतनिर्माणकला भारतीयानाम्। सामुद्रिकपोतानां नानाभेदा नानाविधतरिनिर्माणशिल्पं[3] च स्फुटमावेदयति भारतीयानां समुद्रयात्रायां द्वीपान्तरेषु यातायातम्। तत एव हि यथा भारतीयद्रव्याणि बहिर्जग्मुस्तथा द्वीपान्तरेभ्यस्तत्रत्यानि वस्तून्यपि देशेऽस्मिन् समाजग्मुः। किं न विलोक्यन्ते

प्राचीनसाहित्ये राजसमाजादृतानि चीनांशुकादिवस्तूनि ?

किञ्च विद्या-कलादीनां भवनमिदं भारतमेवाऽभूद्भूतकाले भूमौ। साम्प्रतं वा मध्यकाले वा भवेदन्यान्यदेशैरपि प्रदर्शितो विद्यानां विद्योतः किञ्चित्, किन्तु सर्वतः प्रथमं मानवजातौ ज्ञानाकारप्रवर्तकः सोऽयमेव भाग्यवान् भूखण्ड इति नात्ममुखेन प्रशंसा सेयम्। संमन्यन्ते तदिदं तथ्यं निष्पक्षपाताः पाश्चात्या अपि। ये तु केचिद् ग्रीसदेशे मिश्रदेशे च प्रारम्भिकीं सभ्यतां साधयितुमकाण्डपरिश्रमं विदधते, सेयं विजेतृजातेः साम्प्रतिकी राजनीतिलीला। बहवः किल रहस्यमिदमधुना बोद्धुमप्यपारयन्। अत एव विशेषविवरणं विनाऽनाग्रहिलैस्तदिदं तत्त्वं स्वतोऽवगन्तव्यं नाम। ये तु पाश्चात्त्यमुखनिर्गतवाणीनामनन्यदासा भारतीयाभासास्ते तु प्रमाणशतैरपि न प्रत्येतारः प्राचीनानां वचांसि। अस्तु 'ऋग्वेदसंहितातो न किञ्चित्प्राचीनं वाङ्मय-मुपलब्धमद्यावधि भूमण्डलेनानेन' इति सर्वैरप्यन्वेषकैः स्वीकृतं तथ्यमित्येव महद्भागधेयं नूनम्। वेदसंहितोद्भावकास्ते आर्या आसन्ननार्या वेति तु स्वतः प्रत्येतव्यम्।

इदानीमवशिष्यते द्वितीयस्य राजनीतिप्रकारस्य समुत्तरणं नूनं यत् नासीद्भारतीया-नामार्याणां भारते निवासः प्राथमिकः, अपि तु बहिर्देशेभ्यः समागत्य भारते उपनिविष्टवन्तस्ते इति। एतस्याप्युत्तरं सत्यव्रतसामश्रमिप्रभृतिभिः ऐतरेया- लोचने भूमिकायाम् समञ्जसमेव वितीर्णम्। अन्येऽपि साम्प्रतं भारतीयानामत्रैव निवासं स्वीकर्तुमुन्मुखा इव दृश्यन्ते। अस्तु सत्यवसरे प्रसङ्गसङ्गत्या तदिदमत्र गृह्येत। किन्तु 'इमं मे गङ्गे।' इत्यादिमन्त्राणामिदंप्रथम-तयोच्चारका ये केचिदासन् ते गङ्गां प्रत्यक्षमालोकयन्त एवैतादृशं सम्बोधितवन्त इति तु मादृशानां विश्वासः। गङ्गा च सेयं भारतं भूषयति, भूखण्डान्तरं वेति तु स्वतो विवेचनीयं नूनम्। अस्तु, कृतं प्रसक्तानुमप्रसक्तेन। विद्यानामादिमोद्भावका भारतीयमहर्षीणां पूर्वजा एवाऽऽसन्निति साधयन्ति महान्तो गवेषका एव।

विद्यानां साकल्येन वर्णनं साहित्ये समुपनिबन्धनं च भारतीय-प्राचीनग्रन्थेष्वेव दृष्टम्, नेतरदेशीयासु भाषासु। साहित्ये समावेशश्च कस्यचिद्विषयस्य तदैव भवति यदा शतशतवत्सरात्मके काले व्यतीते विषयेऽस्मिन् सन्देहकृताया अव्यवस्थाया विशृङ्खलतायाश्च प्रसङ्गः समुपतिष्ठति। तदा हि सुव्यवस्थार्थं विषयस्याऽस्य स्वरूपनिर्देशः, परिगणना, भेदोपभेदा-श्चेत्यादिकं साहित्यिकरूपमाविर्भवति। एवं च कस्यचिद्विषयस्य साहित्ये समुपनिबन्धन-मालोक्य लोकालये तत्प्रचारस्य भूयान् कालः अनुमतव्यो भवति। 'पूर्वं भाषाया उद्भवः ततस्तत्सुव्यवस्थार्थं व्याकरणस्य जन्म। न किल व्याकरणात्काचिद्भाषा जन्म लभते' इति यदिदं प्रमापकं तत्प्रमापकानुसारेण साहित्ये समुपनिबन्धनकालात्पूर्वं भूयान् समयपरिवर्तो विद्याप्रचारस्याऽनुमीयते भारतेऽमुष्मिन्। अस्ति हि पुराणसंहितासु विद्यानां साहित्यिकसन्निवेशो नूनम्। तथा हि विष्णुपुराणे-

**'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**
**धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश।।**
**आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।**
**अर्थशास्त्रं चतुर्थं च विद्या ह्यष्टादशैव ताः।।'**

सर्वतः प्रथमं वैदिकसाहित्ये दीयतां दृष्टिः। यस्मिन् समये समग्रेऽपि जगति नासीत्कोऽपि ज्ञानालोकः, सर्वेप्यन्यान्यदेशवास्तव्या भोजनशयनादिकं देहपालनमेव बहु मन्यन्ते स्म, आसीत्तस्मिन्नपि समयेऽस्य सविधे दिव्यज्ञाननिधिः श्रीमान् वेदराशिः, यस्य ज्ञानगरिमविषये प्राचीनताविषये च महामहापण्डितानामनेकानि मस्तिष्कानि अनन्तकालाद् गवेषणाप्रयत्ने संलग्नानि परं नाधुनापि चरमान्वेषणा तेषां समाप्यते। आध्यात्मिकज्ञाननिधयस्ताः किलोपनिषदो भारत एवाविर्बभूवुर्याभिः प्रभाविता यूरोपदेशीयाः पारस्यदेशीयाश्चैकमुखेन घोषयामासुः–' आध्यात्मिकभावसम्पन्ना काचिद्भाषा यद्यस्ति संसारे तर्हि सा संस्कृतैवेति'। मॉनियरविलियम्स–शोपनहार प्रभृतयः स्पष्टं सिद्धान्तयन्ति यत् 'भारतीयं वायुमण्डलमुत्कृष्टान् पवित्रान् सत्यांश्च विचारान्प्रचारयत्येतासु'। 'यद्धि राष्ट्रमुपनिषत्सदृशान् ग्रन्थान् प्रसूते, भगवद्गीतासदृशांश्च महागभीरान् प्रबन्धानुपजनयति तस्योदारत्वं को वा न स्वीकुर्यात्'। न केवलं पूर्वदेशीयाः, अपि तु सर्वे पाश्चात्या अपि स्वीकुर्वन्ति यद्भाषाया उपरि तद्भाषाभाषिणां प्रभावः प्रस्फुरति। यदि काञ्चिद्भाषां मृदुस्वभावाः संयमिनो दयाशीलाश्च पुरुषा व्यवहरिष्यन्ति तर्हि तद्भाषाया उपरि तत्प्रभावाः प्रतिफलिष्यन्ति अत एव ते व्याहरन्ति–' संस्कृतभाषा मधुरस्वभाव–सम्पन्नाना–मार्याणां भाषणवशान्माधुर्यपूर्णा समजनि।'

इत्थं नितरामलब्धापरपारो वेदराशिरस्माकममूल्यो निधिः। पातञ्जलमहाभाष्ये परः–सहस्रशाखा अस्याभिहिताः। बह्वयो विलुप्ताः, अल्पीयस्योऽवशिष्यन्ते, तासामपि बहुमूल्यं वाङ्मयमनन्तपारम्। संहिता–ब्राह्मणारण्यकोपनिषदादीनामयं ग्रन्थराशिः प्राचीनतमः। तदनु गान्धर्ववेद–धनुर्वेदायुर्वेद–नाट्यवेदादय उपवेदा अपि प्रथिताः सन्ति। तेषां विपुलमस्ति वाङ्मयम्। षड् वेदाङ्गा अप्याख्यायन्ते शिक्षा–कल्प–व्याकरण–निरुक्त–ज्योतिष–छन्दोऽ–भिधानाः। श्रुतिमूर्छनादि–पदावस्थिततानपरिच्छेदप्रयुक्तावधाने पृथक् षड्जादिस्वर समुदायो गान्धर्ववेदः। चतुःषष्टिकलासंग्राहकमौशनसादिशास्त्रमर्थशास्त्रम्। अङ्गानि षट् शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति। ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार ईरिताः।। विचारो वेदवाक्यानां मीमांसा प्रोच्यते बुधैः।। सा च पूर्वोत्तरभेदाद् द्विधा। तथा हि –कर्मप्रतिपादनपरा जैमिनिप्रणिता द्वादशाध्यायी पूर्वमीमांसा, ब्रह्मप्रतिपादनपरा व्यासप्रणीता चतुरध्यायी उत्तरमीमांसेति। पदार्थनिर्णयपरं तर्कशास्त्रं न्यायः (अत्रैव वैशेषिकनयस्यान्तर्भावः)। मन्वत्रि–विष्णुहारीतादिप्रणीतं धर्मशास्त्रम्। कपिलपातञ्जल–पाशुपत पाञ्चरात्रादीनामागमानामपि धर्मशास्त्र एवान्तर्भावः। सर्गप्रतिसर्गादिपञ्चलक्षणलक्षितं मत्स्यमार्कण्डेय भविष्यभागवत ब्रह्म ब्रह्माण्ड ब्रह्मवैवर्तवायुवामन विष्णु वराहाग्निनारदीय पद्मलिङ्ग गरुडकूर्मस्कन्द भेदादष्टादशविधं पुराणम्

(संक्षिप्तसंग्रहो यथा– ''मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्। अनापलिंगकूस्कानि पुराणानि विदुर्बुधाः।'' तदन्वष्टादशोपपुराणानि, औपपुराणानि इत्यादि वाङ्मयमनन्तम्। आगमविधा अपि वैपुल्यं बिभ्रति। सुमहानयं वाङ्मयसम्भारो न कुत्राप्यन्यत्र लभ्यो भारताद्दते।

यानि खलु दर्शनशास्त्राणि अस्माकमुन्नतेः परं काष्ठां प्रमाणयन्ति, येषा दर्शनानां सत्तया समस्तस्यापि भूमण्डलस्य सभ्या जातयः सशिरःकम्पमस्माकमुच्चान् विचारान्प्रशंसन्ति, यानि खलु दर्शनानि दृष्ट्वा अस्माकं जातिरतिप्राचीनतमेऽपि काले सुसभ्या सुमन्नता चासीदिति बलान्मन्यन्ते, तानि किल दर्शनशास्त्राणि भारतमेवाविर्भावयांबभूव। ये किल यूरोपादिदेशीयाः प्राचीनदार्शनिकाः समग्रेऽप्यात्मनो देशे दर्शनरहस्यं प्रचार्य कृतिनोऽभूवन् तेऽप्यस्माकं दर्शनानामृणिनः। मॉनियरविलियम्समहाशयो यस्य सिद्धान्ताः पाश्चात्यपण्डितानां गोष्ठीषु महत्त्वदृष्ट्याऽवलोक्यन्ते, दर्शनशास्त्रविषये स्पष्टमभिप्रायं प्रकाशितवान्–'यूरोपस्य प्रथमदार्शनिकौ प्लेटो, पिथागोरसश्चेत्येतौ द्वावपि दर्शनविषये भारतवासिनां हिन्दूनां सर्वप्रकारेण ऋणिनौ स्तः'।

लैथब्रजमहाशयः स्वनिर्मितेतिहासे हिन्दूनां विषये पक्षपातपूर्णान् सङ्कीर्णान्विचारान्प्रकट-यामास, परं तस्यापि मुखादिदं निःसृतम्–'दर्शनशास्त्रस्यादिगुरवः केवलमार्या एव'। अध्यापको मैक्समूलरो वक्ति–'यद्धि राज्यमुन्नतेरुच्चशिखरे स्थितं भवति, यस्मिन् राज्ये आन्तरिकाणां बाहीकानां च शत्रूणामक्रमणस्य किञ्चिदप्याशङ्का न भवति, यस्य राज्यस्य लोका धनसम्पत्त्या सहैव अनेकानि विद्यामन्दिराणि अनेकांश्च विश्वविद्यालयान् स्थापयित्वा सर्वा अपि विघ्नबाधाः पराहत्य विद्यानामालोचनायां मनः संयोजयन्ति तस्मिन्नेव सभ्ये समुन्नते च राष्ट्रे दर्शनशास्त्र-स्याविर्भावो भवति।

सर्वतः प्रथमं गगनमण्डलस्य वृत्तान्तो भारतीयैरेव प्रकाशितः। यां खगोलविद्यामवलम्ब्य पाश्चात्त्यैः साम्प्रतमतिशयितोन्नतिः प्रकटिता सा विद्या भारतेनैव सूचिता संसारस्याग्रे। यत्कान्तिमण्डलं संस्कृतभाषाभिज्ञैर्भारतीयज्यौतिषिकैरन्विष्टं तत्खलु समग्रोपि संसारः सम्मानयति। चीनदेशः, अरबदेशश्च यज्ज्यौतिषविद्यायाः प्रकाशं दर्शयामास सोऽपि भारतानुग्रहलब्ध एवेति सर्वैरेव गवेषकैः स्वीकृतम्।

यद्धि अङ्कगणितं समग्रेऽपि संसारे भारतवर्षस्य महत्तां प्रमाणयति तदप्यस्मिन्नेव देशे सर्वतः प्रथममाविरासीत्। कोल्ब्रुकपण्डितो निष्पक्षपातं साधितवान् यत्समग्राय जगते दशपर्यन्तां गणनामपि भारतवर्षमेव शिक्षयामास। कथयत, यो देशः अन्यान्यदेशवासिनो लोकानङ्गुलिपर्वणा–मुपरि 'एकं द्वे त्रीणि' इत्यादि गणनामपि शिक्षयामास तस्य कीदृगासनमन्यान्यदेशानां संनिधौ? भारतवर्षस्येतिहासे सयुक्तिकमेतत्साधितं यत्–' अरबदेशवासिभिः सेयं विद्या हिन्दूभ्यः शिक्षिता। अत एवेमां विद्यां ते 'इल्म हिन्दसा' (भारतवर्षीयां विद्याम्) वदन्ति।' स्पष्टोऽयं घोषणाडिण्डिमो यदद्यावध्यपि आरब्याः पारसीकाश्च अङ्कान् 'हिन्दसा' इति नाम्ना व्यवहरन्ति।

बीजगणितं यत्खलु एल्जब्रेति नाम्ना व्यवहरन्ति पाश्चात्यास्तदपि भारताम्भोनिधेरुद्भूतमेकं रत्नम्। रेखागणितस्य तानि शुल्बसूत्राण्यस्मिन् देश एव प्रसूतान्याासन्। प्राच्यविद्यापण्डितो मॉनियरविलियम्समहाभागः कथयति

''बीजगणितस्य रेखागणितस्य चाविष्कारः, ज्योतिषशास्त्रेण सह तस्य प्रथमं प्रयोगो हिन्दूनामेव द्वारेणाऽभूत्।'' डाक्टर थीबोमहोदयः स्पष्टमभिप्रैति ''अखिलमपि भूमण्डलं रेखागणितस्य कृते भारतवर्षस्याधमर्णमस्ति, न यूनानदेशस्य।।''

यद्धि सङ्गीतशास्त्रं सर्वदेशीयानां सङ्गीतशास्त्राणामपेक्षया प्राचीनं सुविस्तृतं पूर्णं च परिगणितं तदप्यत्रैव प्रोद्भवं लेभे। गानं रोदनं च सर्वोऽपि विजानातीति किंवदन्त्यनुसारं सर्वेष्वपि देशेषु सङ्गीतस्य प्रचारो नूनं भवेदिति वयमनुमिनुमः। परं यत्र बहूनां विभिन्नविभिन्नवाद्यानां 'खं खं पंपं' स्वरैरेव सङ्गीतव्यसनं निर्वाह्यते सोऽपि देशः सङ्गीतशास्त्रं जानातीति किं हृदयेन स्वीकुर्मः? तत्सङ्गीतमस्ति उत अज्ञहस्तपतितानां वाद्यानां करुणाऽऽक्रन्दनमस्ति! सङ्गीतस्य सोऽस्ति विलक्षणो महिमा–येन जिघांसु हृदयमपि सहजमेव द्रुतं भवति। 'रागस्य' कार्यमेव तादृशमस्ति यत्सोऽयमभिज्ञस्य अनभिज्ञस्यापि वा हृदयं तथाऽनुरञ्जयति यथा कस्मैचित्कालाय तद्धृदयं तस्मिन् रागरसे लीनं भवति। अत एव 'शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गानरसं फणी' इति प्राचीनः प्रवादः। सोऽयं दृष्टान्तः सर्वत्र सुप्रसिद्धो यत्तालयानुगतं वीणावाद्यं यदि प्रारभ्यते तदा ह्यारण्यका हरिणका अपि मुह्यन्ति। एवं यत्र सङ्गीतस्योन्नतिस्तस्याग्रे तत्सङ्गीतं कथं वा सङ्गीतपदयोग्यं भवेद् यत्र विभिन्नविभिन्नशब्दानां वाद्यानां समाहारमात्रमभ्युपगम्यते।

मनुष्यहृदयस्यैकमात्रं परिष्कारकं सङ्गीतशास्त्रमिदं भारतेनैव प्रसूतं यस्य हि नारद-हनूमद्-भरतमुनिप्रभृतयो महान्त आचार्या आसन्। या स्वरलहरी विलक्षणमेकं नादं पुञ्जीकृत्य, नियतानां मात्राणामनुसारेण माधुर्यमवकिरन्ती प्रचलति तस्यां मात्राणां नियमनं यदि मनुष्यस्य कृतिस्तर्हि देवेभ्यो न सोऽतिरिच्यत इति वक्तव्यं स्यात्। अद्य हि भारतं सगर्वमुन्नमयेच्छिरो यदिदं दिव्यं सङ्गीतमत्रैवाविर्भूतमिति। कियन्तञ्चित् कालमारभ्य तदिदं सङ्गीतशास्त्रं संस्कृतविदुषां हस्तात्प्रच्युतम्, आसेवन्ते तदिदं भारतीया माहम्मदा एव बाहुल्येन। एते चाभिमानमत्ताः कथयन्ति कदाचित् 'यदिदं शास्त्रं यूनानदेशादेवोपलब्धं भारतीयैः। अस्माकमिदमाद्यं धनम्'। परं ते नैतिहासिकाः, केवलं मुखमस्तीति वादिनः। एकदा ईदृशेनैव माहम्मदगायकेन सहाभून्मम संवादः। अवददसौ यथाभ्यस्तम्– 'अस्माकमेवासौ विद्या। अवश्यं प्राचीनैर्हिन्दुभिरस्यां परिष्कारः कृतः'। मया प्रोक्तं 'खाँ साहब! यदीयं विद्या श्रीमतामेवाऽऽदिधनं तर्हि सप्तस्वराणामपि नामानि पारस्यभाषामयान्येव स्युः। षरज-रिषभ गान्धारैत्यादीनि मन्ये पारस्यभाषामयान्येव नामानि। वसन्त-हिल्लोल-भैरव इत्यादिनामान्यपि मन्ये यूनानभाषामयान्येव।' नासीदुत्तरं खाँ साहबसन्निधौ।

इदानीं दीयतां नाट्ये दृष्टिः। नाट्यविषयमादाय बहूनि वर्षाणि गवेषितं पाश्चात्यैः पण्डितैः। प्रारम्भतः पुत्तलिका नृत्यमादाय नाट्यस्योत्पत्तिरभूदिति बहूनां धारणा। तस्यापि

सूत्रं वेदकालादारभ्योपक्रम्यते। ततो भारते नाट्यस्योन्नतिस्तादृगभूद्यामद्यत्वे समुन्नतोन्नतानि स्वतन्त्रराष्ट्राण्यद्यापि तुलयितुं नालम्। अहं पणबन्धपुरस्सरं शङ्कुयां घोषयितुम्–यद्भाषान्तर–पक्षपातिनो दर्शयिष्यन्ति किञ्चिदीदृशं पुस्तकं यद्धि भरतमुनिप्रणीतं नाट्यशास्त्रं तुलयेत्? बहुभिर्वर्षैर्नाट्यशास्त्रविषये गभीरं गवेषयद्भिः पाश्चात्यैः किं कस्मिन्नपि देशान्तरे प्राप्तं नाट्यशास्त्र सब्रह्मचारि पुस्तकम्? तथ्यं त्विदं यन्नाट्यशास्त्रस्यास्य वस्तुतस्तत्त्ववेदितारोऽपि विरला एव भवेयुः। प्रलुप्तः किलैतद्विषयः प्राचीनः सम्प्रदायः।

कोहल– नखकुट्टादीनां नाट्यशास्त्राचार्याणां बहवः प्राचरन् पुरा ग्रन्थाः येषां नाममात्राणि साम्प्रतमलङ्कारग्रन्थेभ्यः समधिगच्छामः। नाट्यमञ्चस्य पाश्चात्यैर्भूयः स्वरूपमुन्नमितं प्रवर्द्धितं चेति ते मनस्यभिमन्यन्ते किन्तु तेषां सभ्यताया जन्मतोपि पूर्वं भारतेन रङ्गमञ्चस्य कियान्परिष्कारो व्यधायीत्यस्य साक्षि केवलं भारतीयं नाटककदम्बकमेव। देवसभायां दिव्यैर्गन्धर्वाप्सरोभिः सोयं नाट्यमञ्चः प्रारभीति भरतोक्त्यनुसन्धानोत्तरं कति वा नाटकानि भारतेस्मिन् कविभिः प्रणीतानीति न कोऽपीयत्तया शक्नोति वक्तुम्। समर्थसमर्थैः कालिदासादिकविभिरपि नाट्यमञ्चोऽयं मण्डितः स्वकृतिभिः। भासादीनां पुरातनानि नाटकानि वर्तमानकालपर्यन्तं लुप्तान्यन्विष्य प्रचारितानि गवेषकैरिति को वा विलुप्तरत्नग्रन्थस्य भारतीयनाट्य–साहित्यस्येयत्ताप्रकाशनाभिमानं वहेत्?

अन्यदीयेषु साहित्येषु दृश्यकाव्यस्य नाटकादयो द्वित्रा एव प्रसिध्यन्ति भेदाः किन्तु भारतीयसाहित्ये अभिनेयानां काव्यानां नाटकप्रकरणभाणादयो रूपकनामानो दश प्रधानभेदास्ततो नाटिका–त्रोटक–गोष्ठी–प्रभृतीन्यष्टादशोपरूपकाणीति जातय एव भूयस्यो नाटकानाम् येषामव–लम्बनेनानन्ता ग्रन्था निर्मिता भारतीयैः प्राग्भिः। बहूनि रूपकाणि तु संप्रति नाममात्रतोऽनुमेयानि यानि हि साहित्यदर्पणे समुद्धृतानि ग्रन्थकृता। यथा–केलिरैवतक–मेनकाहित–सौगन्धिकाहरण–लीलामधुकर–पुष्पभाषित–देवीमहादेव–यादवोदय–स्तम्भित–रम्भ–नर्मवती–विलासवती–कन्दर्पकेलि–शर्मिष्ठाययाति–कुसुमशेखरविजय–बिन्दुमती–प्रभृतीनि।

यत्किलायुर्वेदशास्त्रमद्यापि भूमण्डलेऽतुलनीयं गौरवमावहति, यस्य च साहाय्येन समग्रेष्वष्यन्यान्यदेशेषु जीवयन्ति वैदेशिकाः परोलक्षान् जनान् तदपि भारत एवाऽविरभूत्। बहवोर्द्धैतिहासिका जल्पन्ति यद्वैद्यकविद्या यूनानदेशाच्छिक्षिता भारतीयैरिति। सोऽयमेषां स्पष्टो भ्रमः। यूनानदेशे ह्यष्टमशताब्द्यां वैद्यविद्यायाः प्राचारोऽभवत्, तस्मिन् हि समये हारूँ रशीद् भूपालस्य शासनमासीत्। अस्मिन्नेव समये अरबेषु चरकादिग्रन्थानामनुवादोऽभूत्। सर्वतः प्रथमं सेरापियन–नामाऽरबग्रन्थकारः चरकं 'जरक' नाम्ना लिलेख। एविसेनस्तु 'सिरक' नाम्ना व्यपदिदेश। रहाजेजो यो ह्यस्मादपि प्राचीनोऽभवत्स तु सरकेति नाम समुल्लिलेख। एभिः स्पष्टं ज्ञायेत यदष्टमशताब्द्यां भारतवर्षादेव यूनाने प्रचरिताभूद्वैद्यविद्या। डा. हण्टर महोदयस्यास्त्यन्वेषणम्–'अष्टमशताब्द्यां संस्कृतभाषातो यानि पुस्तकान्यनूदितान्यभूवन् तान्येवारबदेशे वैद्यविद्याप्रचारस्य मूलम्। सप्तदशशताब्दीपर्यन्तं योरपदेशवासिनो वैद्या अरबदेशीयानाम् (मूलतस्तु हिन्दूनाम्) नियमानन्वसरन्। अष्टमीं शताब्दीमारभ्य पञ्चदशशताब्दीपर्यन्तं यानि वैद्यकस्य पुस्तकानि निरमीयन्त यूरोपे तेषु चरकस्य प्रमाणान्युद्धृतानि'।

मौलानाहालीमहाभागः स्वयमेतदङ्गीकुरुते–' सर्वतः प्राचीनौ वैद्यकग्रन्थकारौ चरकसुश्रुतौ, ययोः कृतिः सर्वत्र प्रचरिता। अन्ययोरनुवादो यदा ह्यरबेष्वभूत्तदैवारबदेशीया वैद्यकविद्याया-मनुरागिणोऽभूवन्।'

नीतिशास्त्रं तु भारतस्यैकमात्रं वस्तु। कौटिलीयमर्थशास्त्रं यस्य किल महत्त्वं परिमितादेव कालाज्जनैरवगतं तदप्यस्मिन्नेव देशे समुद्भूतम्। अपि कौटिलीयार्थं-शास्त्रसदृशं ग्रन्थं देशान्तरे शक्नुयान्निदर्शयितुं कश्चित्? एतस्य हि गुणगौरवं गायन्तः पाश्चात्याः स्पष्टं वदन्ति–' यस्मिन्काले तदिदमर्थशास्त्रं प्रादुर्भूतं तस्मिन्समये देशेष्वन्येषु एतावती सभ्यतैव नासीत्प्रचारिता, दूर निर्माणकलां भारते ह्यस्मिन्नैकैकं विषयमालम्ब्स परः शतानि पुस्तकानि प्राणीयन्त प्राकृततैः। कियत्परिगण्यन्ताम्, नास्ति कोऽपि तादृशो विषयो यत खलु संस्कृतभाषाभाषिणां भारतीयानां मर्मस्पर्शिनी विचारकहरी न प्रवृत्तास्यात्। महागभीरं दर्शनविधयमारभ्य भोजननिर्माणं, गृहनिर्माणं, पटनिर्माणं, चित्रनिर्माणमित्यादि व्यावहारिकविषयपर्यन्तं सर्वेष्वपि विषयेषु परःशता ग्रन्था व्यलेख्यन्ता येषु बहवो विनष्टा बहवो विनाशिताश्च वैदेशिकैराक्रमणैर्येषां नाममात्रमेवाऽस्माकं विदितम्। म्लेच्छराजानां शासनसमये बहुवारमस्माकं पुस्तकालयाः पावकेऽदाह्यन्त। खिलजी नामकस्य म्लेच्छराजस्य सेनानायको मुहम्मदविनसामाख्यः पुरी-विहार-नालन्दा-बुद्धगयासु स्थितान्पुस्तकालयानदाहयदि स्पष्टमितिहासग्रन्थेषु। एवं बहून्वारान् बहूनां ग्रन्थरत्नानां ध्वंसे सत्यपि ग्रन्थाः सन्त्यवशिष्टास्तैरेव मार्मिका अनुमान्ति यत्सर्वेष्वेव विषयेषु भारतीयानि मस्तिष्कानि पुरा प्रावर्तिषतेति। किं बहुना, कामशास्त्रेऽपि तत्तादृशानि पुस्तकानि सन्ति येषां साम्यं नाद्यापि देशान्तरेषूपलभ्यते। कामसूत्रं यद्धि वात्स्यायनमुनिप्रणीतमस्ति तादृशः सूत्रग्रन्थः देशेन केनचिदन्येन कदाचिदुद्भावितः?

इदानीं काव्येषु दीयतां दृष्टिः। अस्माकं देशे ईश्वरदत्तप्रतिभावद्भिः कविभिस्तादृशानि काव्यान्युदभाव्यन्त येषां तुलना नाद्यापि कुत्रचित्कर्तुं शक्या। महाकवेः कालिदासस्य नाम को वा शिक्षितम्मन्यो न जानीयात् यस्य रघुवंशशाकुन्तलादिषु गेटेप्रभृतिपाश्चात्त्यानामपि लेखनी प्रमोदप्रमत्तेव स्वैरमुद्गायत्यभिनन्दनगीतीः। कालिदासस्य भवभूतेः सुबन्धोर्दण्डिनो माघस्य कुमारदासस्य —श्रीहर्षस्य भारवेर्बिल्हणस्य भर्तृहरेर्भल्लटस्य—अमरस्या—भिनन्दस्य बाणस्य त्रिविक्रमस्य क्षेमेन्द्रस्य जगद्धरस्य जयदेवस्य मयूरस्य राजशेखरस्य कविकर्णपूरस्य पण्डित-राजस्य जगन्नाथस्य कस्य कस्य वा नामान्युल्लिख्यन्तां नाम। अत्रत्याः कवयः कवितारचने तथा सिद्धहस्ता आसन् यथैते स्वल्पमप्यायासं न प्रतीयुर्नानाछन्दोनिबद्धानां कवितानां निर्माणे। अयं किल विशेषो भारतीयसाहित्यस्यैवास्ति यत् शब्दानामर्थबोधकः कोषोऽपि छन्दोनिबद्धायां कवितायामेवास्ति। पारस्य-भाषाकोषकारैर्यदात्मनः खालिकवार्यादयः कोषाः कवितायामुप-निबद्धास्तदेतदप्यस्मदनुकरणमिवेत्यन्वेषकाणां सिद्धान्तः। किं बहुना-धर्मविषयकपुस्तकान्यपि भारतीयसाहित्ये पद्यनिबद्धान्येव। नायं विशेषो भारतमिदमन्तरा कस्मिन्नप्यन्यदेशीयसाहित्ये समवाप्येत।

कियद्वा परिगण्यताम्। निखिलेऽप्यस्मिन् भूमण्डले सोऽयमस्माकं भारतवर्ष एव विद्यानां विषये सर्वतोऽग्रमी मार्गप्रदर्शकश्च। वराकैरन्यान्यदेशैर्यस्या नामापि कदाचिन्न श्रुतं स्यात्तामपि विद्यां विद्योतयामासुर्भारतीया एव। सूत्रनिर्माणविद्या यां हि पाश्चात्या 'एफारिज्म' शब्देन व्यवहरन्ति, साक्षादियं भारतवर्षस्यैवैकमात्रं सम्पत्तिः। अस्या एव विद्याया आधारेण गृह्यसूत्राणि, ब्रह्मसूत्राणि, अन्यान्यानि च न्याय-व्याकरणादिसूत्राणि भारतेऽस्मिन् जन्म लेभिरे। दृश्यते हि देश-जाति-निर्विशेषं सर्वत्रैव स्वल्पैरक्षरैर्बह्वर्थ-प्रतिपादनकलायाः समादरः। पाश्चात्यपण्डिता अय्युच्चकोटेस्तमेव कविं परिगणयन्ति यो हि स्वल्पैरक्षरैः बहुतरमर्थं निबध्नीयात्। अस्यां विद्यायां भारतीयैः पण्डितैः परा काष्ठा प्रदर्शितेति निर्धारणीयं स्यात्तत्वतो विचारे। पणबन्धपुरस्सरं शक्नुयां वक्तुम् यदिदानीं तु समग्रेष्वपि यूरोपादिदेशेषु सभ्यतादेव्याः सुमहानालोकः प्रसृतोऽस्ति। अस्मिन्नपि समये, कोऽपि विद्वान् किं निदर्शयितुं शक्नुयाद् संक्षिप्ताक्षरेषु महागभीरार्थ-प्रतिपादकान् तादृशान्वैज्ञानिक-ग्रन्थान् यथास्माकं प्राचीनाः सूत्रग्रन्थाः सन्ति?

अपि सन्ति समग्रेऽपि भूतण्डले कस्मिन्नपि देशे कस्याञ्चिदपि भाषायाम्- 'अर्थमात्रालाघवं पुत्रोत्सवमिव' महोत्सवं मन्यमाना ग्रन्थकर्तारः? सामान्यतममेकमुदाहरणमुपस्थापयामि। संस्कृतव्याकरणस्य पाणिनिनिर्मितमेकं सूत्रमस्ति 'अदसोसेर्दादु दो मः'। अत्र ह्यष्टौ अक्षराणि सन्ति। किन्तु अष्टस्वेवाऽक्षरेषु षट् पदानि सन्ति अदसः असेः दात् उ दः मः।'यस्मिन् अदस् शब्दे मकारः अन्ते न भवति तत्र, दकारादग्रेतनस्य ह्रस्वाक्षरस्य ह्रस्व उकारः, दीर्घस्य तु स्थाने दीर्घ उकारो भवति। किञ्च दकारस्थाने मकारो भवति।'' एतावानर्थ एभ्यः षड्भ्योऽक्षरेभ्यो निःसरति। पाणिनिसूत्रेषु बहुष्वेव पूर्वसूत्रेभ्यः कानिचित्पदान्याकृष्यन्ते, किन्तु स्वल्पकायेऽस्मिन् सूत्रे नैकमपि पदं पूर्वाकृष्टम्।

एवं कलानामपि विषये भारतस्यास्य भूरितमभूतिमत्त्वम्। कलाः किल सभ्येष्वेव देशेषु जन्म लभन्ते इति हि युगेऽस्मिन्नतिप्रामाणिकतया प्रख्याताः पाश्चात्या एव प्रमाणयन्ति। व्यावहारिकसभ्यतया स्वच्छन्दं निरूढेषु सर्वव्यवहारेषु मनुष्यस्य प्रवृत्तिः सौष्ठवमनुधावति यद्धि कलानामुद्भवस्य मूलम्। ततश्चान्वेषणीयं स्याद् यद्भारतीया सभ्यता कियत्पुरातनीति। यस्मिन् समये भूमण्डलस्य सर्वाः अपि जातयः केवलं पानभोजनादि यथाजातधर्मानेव बहु मन्यन्ते स्म तस्मिन्नपि-समये भारतेऽस्मिन् तादृशं वैदिकसाहित्यमाविर्भूतं यतः पुरातनं च वैज्ञानिकं च गभीरं च साहित्यं न क्वचिदपि भूखण्डे श्रुतपूर्वम्।'वेदेभ्यः पुरातनं वाङ्मयं न किञ्चिदद्यावधि समासादितम्' इति विजेत्रभिमानिनो महानैतिका वैदेशिका अपि सङ्गिरन्ते। ततश्च साहित्येन सह सभ्यतायाः सम्बन्धश्चेदभिमन्यते तर्हि सर्वतः पुरातनी सभ्यता वेदसाहित्योद्भावका-नामार्याणामधिगन्तव्या स्यात्। सभ्यतायां च प्रसृतायां कलानामङ्कुराः स्वयमेवोद्भिद्यन्ते, इति तु प्रतिपन्नप्रायम्।

प्राचीनसाहित्यद्वारा आर्याणां कलासम्पन्नत्वानुमाने ये किल महोदया विमनायन्ते स्म

तेषां कृते सम्प्रति प्रत्यक्षमेवोपस्थितम्। 'मौञ्जोदडो' स्थाने यत्किल राजतन्त्रेण खननकार्यमारम्भितमासीत्तत्र भूमिगर्भात्तादृशानि पुरातनवस्तून्यधिगतानि यैः किल भारतीया सभ्यता त्रिसहस्रवर्षेभ्यः पुरातनी स्वत एवाधिगन्तव्या भवेत्। मृत्कलशाः हस्तिदन्तसमुद्गकाः धातुपत्राणि चेत्येवंविधा बहवः पदार्थाः समधिगताः येषां किल प्रत्यक्षं कलाभिः सम्बन्धः। ततः कथं प्राचीनार्याणां कलापटुत्वं नोपगन्तव्यं स्यात्?

किञ्च 'चतुःषष्टिकलानां' प्रसिद्धिः बहोः पुरातनकालादस्ति भारतेऽस्मिन्। कलाश्चतुःषष्टिरिति परिगणनं च भारत एव श्रुतं, नान्यत्र कुत्रचित्। चतुःषष्टिकलानामियं चर्चा अतितमां प्राचीने 'ललितविस्तर' ग्रन्थेऽप्युपलब्धा। कस्यापि व्यावहारिकपदार्थस्य साहित्यरूपे समावेशस्तदैव भवति यदा बहुकालं यावत्समाजे तस्य व्यावहारिक- रूपेण सुप्रचारः सुप्रसिद्धिश्च भवति। ततश्च 'चतुः षष्टिकला' इति साहित्ये निवेशः सुस्पष्टं सूचयति यत्पूर्वं कलानामुद्भवः, ततस्तासां लोके परिग्रहः, तदनु तासां साहित्यिकरूपे सन्निवेशः, (यतो हि तासां चतुः षष्टित्वं परिगणितम्), इति हि भूयसः समयपरिवर्तनस्य परिणामः। एवं च भारतेऽस्मिन् कलानामुद्भवो भूयस्तरां प्राचीन इति को वा नाभ्युपगच्छेत्?

***

# द्वितीयोऽध्यायः

## भारतस्य सीमा

जयपुरीयराजसभाप्रधानपण्डितविद्यावाचस्पति गुरुवरश्री मधुसूदनशर्म- महाभागैः 'इन्द्रविजयाख्ये' भारतदेशाख्याननिबन्धे प्राचीनार्यदेशस्य पूर्वकालिकी सीमा एवं निरदिश्यत-

**'पूर्वसमुद्रेत्याख्यो देशो यः पश्चिमाब्धिपर्यन्तः।**

**पूर्वोऽस्यार्यावर्तः, पश्चिम आर्यायणं भागः।।'**

एतदनुसारं पूर्वस्यामयमार्यावर्तो यथा पूर्वसागर-पर्यन्तं विस्तृतस्तथा पश्चिमायाम् अद्यत्वे 'ईरान' इति प्रथितो भूभागोऽप्यार्यावर्त-भुक्त आसीद् यस्य यथार्थो व्यपदेशः आर्यायण इति। सोऽयं पश्चिम आर्यावर्त आसीत्। यस्य पश्चिम भारतस्य (आर्यायणस्य) भिन्न-भिन्न काले राजशासनानां भेदे सति-ओरियंस पारस्थान-खुरासानादिनाना विधान्यभिधानानि प्रावर्तन्त पुरा-

**'इत्थं पश्चिमभारतमुक्तं क्वचिदीरियंस-सन्नाम्ना।**

**पारस्थानं क्वचन क्वचन खुरासानमीरानम्।।'** (इन्द्र.)

अद्य तु शासनभेदात् खुरासान (हिरात इति प्रसिद्धः) पृथक्प्रान्तः, पारस्थानं पृथक्प्रान्तः इरानं च पृथक् किन्तु पुरा सर्वोऽप्ययं पश्चिम आर्यावर्त आसीत्। यतो ह्यासीत्पुरा भूगोलशास्त्रानुसारं देशविभागः। प्राचीनार्यशास्त्रे भारतवर्षं 'भूतवृत्तपाद' रूपम्। ततश्च पूर्वस्यां चीनसमुद्रमारभ्य पश्चिमतो लोहितसमुद्रपर्यन्तं प्राचीनभारतवर्षस्य सीमा। सिन्धोः प्राच्यां दिशि यः समुद्रस्तत्र 'फारमोसा' पर्यन्तं प्राच्यभारतम्। सिन्धोः पश्चिमायां च विलोचिस्तान-अफगानिस्थान-ईरान-मेसोपोटेमिया-अरब-एतदुत्तरं यो लोहितसागरस्तत्पर्यन्तं पश्चिमभारतम्। वैदिकभारतस्य पुरा भूमि-मानुषलोक-मध्यलोक इत्यासन्नाना व्यपदेशाः। द्वात्रिंशाक्षांशात्पूर्वं तदिदं भारतं पृथ्वी, एतदुत्तरं सप्तत्रिंक्षाशादुत्तरः स्वर्गलोक इति तद्विभागः।

अयं भारतवर्षो दक्षिणोत्तरतः सहस्त्रयोजनपरिमित इति पुराणसंहिता-

**योजनानां सहस्त्रं तु द्वीपोऽयं दक्षिणोत्तरः।**

**आयतस्तु कुमारीतो गङ्गायाः प्रवहावधिः।।** (इति मत्स्ये)

मार्कण्डेयपुराणेऽपि भारतस्य सीमाऽऽख्यानम्, आकारश्चैवमुपलभ्यते-

**'दक्षिणेऽपरतो ह्यस्य पूर्वेण च महोदधिः।**

**हिमवानुत्तरेणाऽस्य कार्मुकस्य यथा गुणः।।'**

पश्चिमो योऽयमासीदार्यावर्तस्तस्य सीमा सम्प्रति सुतरां सङ्कुचिता। ओरियंस–पारस्थान–खुरासान (हिरात) ईराननाम्ना सम्प्रति प्रथिताः प्रदेशाः पुरा आर्यावर्तपश्चिमभागान्तर्गता आसन्। ते सम्प्रति भारतात्पृथग् भूत्वा पृथग् देशाः सम्पन्नाः। एवं च आर्यावर्तस्य पश्चिमसीमा यथा यथा संकुचिताऽभवत्तथा तथा ह्यार्याणां निवासः पूर्वस्यां दिशि प्रचुरं प्रासरत्। परिणामोऽस्य सोयमभूद् यद् भारतस्य पूर्वस्यां दिशि (अर्थात् भारतस्य पूर्वसीमातो बहिः) ये देशा अनार्य–वासत्वेन प्रथितास्तेष्वपि शनैरार्याणां प्रसारोऽभवत्। पूर्वं मगधा अनार्यवासा आसन्, शनैस्तेष्व–प्यार्याणां प्रसृतिरभूत्। कुरुराजस्य दुर्योधनस्य समयेऽङ्गराज्यमपि आर्यावासेषु पर्यगण्यत। इतः पश्चिमप्रान्तीया आर्यावर्तस्य देशा भारतात्पृथग् भूत्वाऽन्यशासने समगच्छन्त। पुरा येषु प्रदेशेष्वा–सीदार्याणामधिकारः प्रास्फुरच्च वैदिकी पताका, त एव देशाः शासनान्तरमुपलभ्य देशान्तररूप–मधारयन्। अत एव पश्चिमतः पूर्वस्यां दिशि प्राचीनार्याणां शनैः प्रसारं दृष्ट्वा बभूव पाश्चात्य–गवेषकाणां भ्रमो यदार्या अन्यस्मात् कस्माच्चन देशात् प्रस्थाय भारतमागता इति। भारतागमनात् पूर्वं यस्मिन् प्रदेशे आर्याणामावासस्तैः साध्यते सोऽप्यार्यावर्तान्तर्गतः।

एतद्विषये प्राचीनैः पण्डितैः प्रसङ्गवशतो निजाभिप्रायः समये समये प्रकटीकृत एव तत्तद्ग्रन्थेषु। नाधिकमभ्यूहस्य विषयः। 'आर्यविद्यासुधाकरे' यज्ञेश्वरभट्टेन साधितस्तावत्–प्राचामार्याणां निवासोऽयमार्यावर्त एवेति। अधुना सत्यव्रत सामश्रमिमहाभागेनापि 'ऐतरेयालोचने' सोऽयमवतारितो विषयो महता गवेषणेन। किन्तु विजेतृनीतिवशाः पाश्चात्त्याः प्राहुर्यन् मध्यैशियातः समागमन् भारतमिदं प्राञ्च आर्या इति। पाश्चात्यशिक्षयैव प्रेरितप्रतिभानां बहूनां भारतीयानामपि यूरोपीय–पण्डितानां मन्त्रोपदेशतो बभूव धारणा यद् भारतीया आर्या बहिस्त एव समागता इति। एतद्विरोधे भारतीयैरन्वेषकैर्बहु प्रयतितं साधितं च। लोकमान्येन तिलकेन यूरोपीयाणां मतं निरस्य सुमेरौ स्थितिरार्याणां साधिता। सामश्रमिमहाभागेन 'एशियाटिकसोसाइटी' द्वारा मुद्रापिते 'ऐतरायालोचने' आर्यावर्त एव संस्थितिरार्याणां सर्वतः समर्थिता। किन्तु गुरुमन्त्रदीक्षितानामाङ्गलभाषाशिक्षितानां नैतेषु तथ्येष्वभूदवधानं किञ्चित्। साम्प्रतं तु बाबूसम्पूर्णानन्दमहोदयेन 'आर्यों का आदिदेश' नामके हिन्दी पुस्तके साधिता सर्वैः प्रकारैरार्याणां मूलनिवासिता भारतवर्षस्येति किं वा सम्प्रति प्रतिपद्येरन्नवशिक्षिताः? पण्डितानां संस्कृत–भाषानिबद्धा गवेषणा न तेषां दृष्टौ प्रविशति चेत्संप्रति तु आङ्गलभाषापण्डितेनैव तदिदमन्विष्टम्। किमिदानीमपि परमगुरूणां पाश्चात्यानां स्वल्पोऽप्युक्तिविरोधो न श्रद्धेयस्ते?

***

# भारतवैभवम्

## तृतीयोऽध्यायः

### आर्याणामावासः

कथयन्ति पाश्चात्या यत् ''आर्याश्चतुःसहस्रवर्षेभ्यः पूर्वमुत्तरपश्चिम- कोणाद् भारतमाविशन्। इतः पूर्वमिमे 'मध्यैशिया' मध्यवसन्। जनसंख्यावृद्धौ खाद्यसामग्रीन्यूनतया क्लिष्टा इमे संघश इतस्ततः प्रासरन्। यः संघः सुदूरपश्चिमं प्रति प्रावसत् तत्संततिः साम्प्रतिकयूरोपराष्ट्रनिवासिनः। ये च तावदीरानं भारतं च प्रातिष्ठन्त तद्वंशजाः ईरानीया भारतीयाश्चार्याः समभवन्। भारते समुपेतानामेषां विशेष- परिस्थितिवशाद् यो वै सभ्यतायाः संस्कृतेश्च विकासोऽभवत् स एवाग्रे हिन्दूसंस्कृतौ सभ्यतायां च पर्यणमत। भारतीयाशाखाया अमुष्याः संस्कृतिसर्वस्वं वेदाः तत्रापि विशेष ऋग्वेदः। एष हि न केवलमार्याणाम्, अपि तु पृथिव्याः सर्वतः पुरातनो ग्रन्थः। एतेन हि प्राचीनार्याणां चतुः सहस्रसंवत्सरपुरातनं जीवनं भूयसाऽवगम्यते''।

संस्कृतपण्डितानामासीदारम्भादेव दृढो विश्वासो यत्प्राचीनार्याणामिदं भारतमेवासीदादिमं स्थानम्। परं तदिदमेतेषां मानसे वाक्प्रवाहे वाऽऽसीत्। नैतत्पुष्टये एभिः कानिचित्प्रमाणान्यन्विष्टानि यैः परिपन्थिनः परितुष्येयुः। न वा मध्यैशियातः प्रोषितत्वसाधनाय पाश्चात्यैर्या युक्तयः प्रदत्तास्तासां खण्डनमेव विहितम्। बहवस्त्विदमप्यपवदन्ते यत्प्राक् पण्डितानामेतद्विषये दृष्टिरेव नासीत्। किन्त्विदमंशतः कामं सत्यं भवेत्, परं सर्वथा सत्यतां स्वीकर्तुं न कथञ्चिदुत्सहामहे। संस्कृत-पण्डितैरार्याणां भारतनिवासित्वे प्रकाशितमात्मीयमभिमतम्, किन्तु येन प्रकारेण पाश्चात्त्यानां कर्णगोचरमिदं स्यात्तथा नासीत्साधनं पुरा तेषां सविधे। यज्ञेश्वरपण्डितेन 'आर्यविद्यासुधाकरे' वेदद्रष्टृगणामार्याणां भारतनिवासित्वे दत्तमात्मनोऽभिमतं किन्तु तदर्थमावश्यका उपपत्तयो नोपन्यस्ताः।

अस्मिन्विषये पाश्चात्यपरिबोधनोचितं यदि केनचिद्भारतीयेन लिखितं तर्ह्यसौ लोकमान्यो बालगङ्गाधरतिलकः। अनेन 'दि आर्क्टिक होम इन दि वेदाज्' पुस्तके यद्यपि संस्कृतपण्डितानां मतस्य पुष्टिर्न कृता परं प्रचलितस्य पाश्चात्त्यमतस्य खण्डनमवश्यं विहितम्, समञ्जसं च विहितम्। तन्मतस्य सोऽयं सारांशः-

आसीत्सोऽपि समयो यस्मिन्नुत्तरीयध्रुवप्रदेशस्याञ्चलो मनुष्याणां निवासयोग्योऽभूत्

यो हि साम्प्रतं नास्ति तथा। आर्याणामादिदेशः स एवाभूत्। समयविपर्ययेण हिमस्य तज्जनितशैत्यस्य च प्रकोपे प्रवृद्धे शनैश्शनैस्ततो निष्क्रम्य केचिद्यूरोपे केचिदीराने केचिच्च भारते समागत्य उपन्यविशन्। तन्मतेन वैदिकसभ्यतायाः प्राचीनता प्रायो दशसहस्रवर्षानुमिता पर्यवस्यति।

पाश्चात्त्यपण्डितैस्तिलकस्य प्रगाढपाण्डित्यस्य प्रशंसाऽवश्यं विहिता किन्तु न तन्मतं तैरभिमतम्। अत्र हि पाश्चात्यानां गूढा, प्रयोजनप्रवणा प्रकृतिश्च तान्विवशीकरोति। सम्प्रति तदिदं रहस्यं बहवो नवशिक्षिता अपि ज्ञातुं प्रभवन्ति। यदा हि विजेतृभिर्गूढोऽभिसन्धिः प्रकटितः– 'यथा यूरोपादिजातयो बहिर्देशेभ्यः समागत्य भारतमध्यवसन् तथैवार्या अपि बहिस्तः समागत्य भारतमध्यतिष्ठन्, को वा तेषां नवीनोऽधिकारः' इति, तदा ह्येतेषामुन्मीलितं सुप्तं चक्षुः। पाश्चात्य–गुरूणां कर्णफूत्कृतमुल्लङ्घ्य प्रारब्धो नवीनशिक्षितैरप्येन्वेषणप्रयत्नः। अस्यां दिशि सर्वतः प्रथमो लेखकः स्वर्गीयः श्री अविनाशचन्द्रदास एव हि प्राचीनभारतीयपण्डितानां मतं समर्थयमानः 'ऋग्वेदिक इण्डिया' पुस्तके प्राचामार्याणां समर्थयामास भारतीयतामेव। अत्र हि भूगर्भशास्त्रानुसारं प्रमाणितैरनुसन्धानै ऋग्वेदकालिकीमार्याणां स्थितिं भारते एव संघटमानां साधितवान्।

ततोऽद्यावधि लोके प्रकाशितं प्रतिकूलमनुकूलं चोभयविधं पाश्चात्त्यानां भारतीयानां च साहित्यं सम्यक्परिशील्य राष्ट्रीयमहासभायाः (कांग्रेस) प्रधानमंत्री सुप्रसिद्धो नेता बाबूसम्पूर्णा–नन्दमहोदयो लिखितवान्–'आर्यों का आदिदेश' नामकं हिन्दीग्रन्थं यत्राऽद्यावध्युपलब्धैः प्रमाणैः साधितवान् यद्–'आर्याणां निवासः प्रारम्भादेवासीदस्मिन्नार्यावर्ते एव। तस्यायं सारः किञ्चित्–

ऋग्वेदे नदीनामासाम् (सिन्धु, विपाशा, शतद्रु, वितस्ता, असिक्नी, परोष्णी, सरस्वती) मुहुर्वर्णनेन सप्तसिन्धवनाम्नि देशे तेषामासीन्निवास इति ज्ञायते। इमा नद्यश्च भारतं विहाय नान्यत्र कुत्रचित्। अत एव नदीभिराभिर्जुष्टे (सप्तसिन्धवे देशे) भारतैकदेशे तेषां निवासः स्पष्टं परिज्ञायते। येषामार्याणां वंशजा वैदिकदेवतोपासका अद्यत्वे प्रसिद्धा भारतीयार्या आसन् तेषामेवैकशाखीया अन्येऽप्यार्या आसन्, तेऽपि मित्रवरुण–अग्न्यादि देवानस्तुवन्नपूजयंश्च। किन्तु पूर्वोक्तेषु आर्येषु शनैर्विकासे सति 'इन्द्रः' देवानां प्राधान्यं भेजे। द्वितीयशाखीयानां (मित्रवरुणादिपूजकानां) प्राचीनता तादृश्येव, किन्तु ते तं विकासं न बहु मेनिरे। अत एव न ते इन्द्रं मानयामासुः। शनैः शनैर्मतभेदस्य जन्म भूत्वा परस्परं स्पर्द्धा, निन्दा, मात्सर्यम्, संघर्षः विरोधश्चाऽज्ञायत। आद्यशाखया इन्द्रोऽभिमतस्तर्हि द्वितीयशाखया स विमतः। एका शाखा सुरं (देवम्) उत्कर्षभूमिं मन्यते तर्हि तत्प्रातिद्वन्द्व्ये, अन्यशाखायाम् 'असुरः' (दैत्यः) उत्कृष्टः पूज्यः परिगण्यते। अवश्यमिमौ पक्षौ द्वावपि भ्रातरौ। एकत्रोत्पन्नौ देशभ्रातरौ (अत एव हि अदितेरुत्पन्ना देवाः सुरा, दितेरुत्पन्ना दैत्या असुराः। किन्तु द्वावपि वैमात्रेयभ्रातरौ समानबलौ च)।

शनैः शनैरयं संघर्षः संप्रवृद्धय युद्धस्य रूपं जग्राह। यस्य परिणामो देवासुरसंग्रामो यो हि समानबलानां भ्रातर्णिामासीत्। अत एव जयपराजययोस्त्वरितम–सम्पत्त्या भूयांसं कालं

प्रावर्तत, भयङ्करं हानिप्रदं च रूपं भेजे। अयमेव देवासुरसंग्रामः (आर्याणां भिन्नशाखीयभ्रातृभिः संघर्षः) ऋग्वेदमारभ्य पुराणसंहितासु तदनुगामिषु वा साहित्यादिषु च भारते प्रसिद्धिं प्राप। अग्निमित्र-वरुणादि-देवोपासकाः सुराणामुत्कर्षवादिनो वेदप्रवर्तका ऋषिवंशजाः प्रारम्भिका आर्याः 'इन्द्र' (नवविकसितशक्ति) पक्षपातित्वादुत्तरोत्तरं स्वदेशे उत्कर्षं स्थितिदाढ्यं च भेजुः। नवविका-सस्याऽपक्षपातिनोऽन्यशाखीया ये पूर्वेषां प्राप्तिद्वन्द्वयेन 'असुराणाम्' उत्कर्षं ख्यापयन्तस्तेषामेव अग्निमित्रवरुणादिदेवानां स्तावकाः संघर्षवशात् 'सुरान् देवान्' निनिन्दुः। असुरान् (असून् प्राणान् रान्ति तान् अर्थाद् बलवतः) प्रशशंसुः।

सोऽयं देवासुरसंग्रामः परस्परमार्याणां संघर्षः। सुराणामुत्कर्षख्यापकाः इन्द्रपक्षपातिनो वैदिका आर्याः। असून् रान्ति तेषां बलवतां कीर्तिगायकस्त इमे (आवेस्ताग्रन्थकीर्तिताः) ईरानजाः पारसीका आर्याः। पक्षद्वयभुक्तानामेषामेव 'इन्द्र' नाम्नीं नवविकसित-शक्तिमादाय परस्परसंग्रामः समानबलतया दीर्घकालं चचाल। अन्ते ऋग्वेदादिग्रन्थानुसारं देवानाम् (वैदिकार्याणाम्) विजयः अन्येषामनिन्द्रपूजकानां पराजयः प्रत्यफलत्। तत्कारणात् इन्द्रमस्वीकुर्वन्तो विरोधवशेनाऽस्माद् देशाद्बहिर्जग्मुः। इन्द्रपूजका वैदिकाश्च निजादिमदेशे (साप्तसिन्धवे) दृढीभूता बभूवुः।

एकादिमदेशत्वात् आर्यत्वे समानत्वाच्च द्वयोः संवादिनी भाषा। समाना देवाः। किन्तु देशपरित्यागात् जलवाय्वादिभेदसंघटनया असुरमहत्त्वख्यापनाच्च द्वयोर्दलयोरभूद् भेदः। अतोऽन्यदलीया ''मृध्रवाच'' उक्ताः।

ईरानदेशे मित्रस्य 'मिथ्र', वरुणस्य 'वरन', सोमस्य 'होम', सकारस्य हकारोच्चारणेन सप्त 'हफ्त', सिन्धु 'हिन्दु', विवस्वतः पुत्रो यमः 'विवहवत पुत्रो 'यिम' इति पुरा उच्चारणभेदः पप्रथे। ततश्च प्राचीनेरानवासिनः (पारसीकाः) साप्तसिन्धववासिनो वैदिकाश्च भ्रातरः परस्परम्। एके विजयशालित्वात्तत्रैव (सप्तसि.) तस्थुः, अपरे बहिः (ईरानादिषु) जग्मुरिति देवासुरसंग्राम-परिणामः। अनेन अतिप्राचीन 'आवेस्ता' ग्रन्थेनापि स्पष्टं सूचितं भवति यदार्याणामादिमनिवासः सप्तसिन्धुदेशेऽभूत् न चैते कुतश्चिद् बहिः स्थानादागताः। इतः पूर्वं साप्तसिन्धवे कुत आगता इति तु नासीदृग्वेदवर्णितानामार्याणां विदितम्।

पारसीकानामतिप्राचीनार्यत्वं समकालिकसभ्यत्वं च भाषाया बहुतरसाम्येन बुध्यते। जेन्द भाषया लिखितस्य 'आवेस्ता' ग्रन्थस्य गाथाद्वयं नीचैः-

'ह्यत ता ऊर्वाता सशया या मजदाओ ददाता रवीति चा अनीति चा-------अत ऐपि ताईश अंघहती अश्ता[१]' (गाथा)

'अस वे सव्रेम मज्दा यथा वाओ हख्मी--------परे वक्खेदा यथा ऊवैंद्यास---अवैमी पैति।

१. मज्द ने हमको दो आत्माएँ दीं। इनमें से जो ऊँची आत्मा है वह अनीति की ओर ले जाती है और जो नीची आत्मा है वह अनीति की ओर।

२. हे माज्द हमको सिखाओ कि वह कौन सा उत्सर्ग कौन सा धैर्य कौन सा वैराग्य है जो हमको तुमसे मिला दे और आत्मा ज्ञान करा दें।

आभ्य: सप्तसिन्धुभ्योऽतिरिक्ता:- दृषद्वती-तुष्टामा-सुसर्तु-रसाश्वेती-कुभा-गोमती-मेहत्नु-क्नुमु-इति।

सिन्धोर्नाम सुषोमा, विपाशायाश्च आर्जिकीयेत्यपि प्राप्यते। ऋक् १०-७५-५, गङ्गायमुनयोरपि प्रसङ्ग उपलभ्यते। किन्तु वर्तमानकाले यथा गङ्गायमुनयोर्महत्त्वं तथा पुरा सिन्धुसरस्वत्योरासीत्। स्थाने-स्थाने सिन्धोर्विद्यते वर्णनं तत्रापि सरस्वत्यास्तु वर्णनं काव्यस्येव अत्यलङ्कृतम्।

सप्तसिन्धवस्य उत्तरतो हिमालय:, तत उत्तरमेक: समुद्रो यो वर्तमानतुर्किस्थान-स्योत्तरसीमामारभ्य पश्चिमायां कृष्णसागरपर्यन्तमगच्छत्। एतस्याप्युत्तरं भूमिरासीद् या उत्तरध्रुवपर्यन्तमगात्। दक्षिणत: समुद्रो यत्र सम्प्रति राजपुत्रप्रदेश:। अयं समुद्रस्तावत्पर्यन्तमगच्छद् यत्राधुना अरावलीपर्वत:। अयं पश्चिमायां अरबसागरेण समगच्छत पूर्वस्यामप्येक: समुद्रो यो हिमालयस्योपत्यकाया अधस्तात् युक्तप्रान्तं विहारं चाप्लावयत् आसामपर्यन्तमगच्छत्। पश्चिमायां सुलेमानपर्वत:, अत्रापि पर्वतस्याधरस्तात् समुद्रस्यैका सूक्ष्मा रेखाऽऽसीत्।

उपर्युक्तं वर्णनमवश्यं विलक्षणं प्रतीयेत। सोयं सप्तसिन्धवप्रदेश: स एवासीद् योऽधुना पञ्चाम्बुकाश्मीरनाम्ना प्रसिद्ध:। नास्ति तत्सविधे कुत्रचित्समुद्रस्य सन्धानम्। परमुपरिलिखित-सीमानुसारम्-उत्तर-पूर्व-दक्षिणेषु किञ्चित्पश्चिमे चेति चतुर्भागेषु समुद्रेणावृत:। ऋग्वेदकालिक-मानचित्रेणेदं स्पष्टीभवेत्। यतो हि कालस्य तावानन्तरो जातो येन भारतस्य भौगोलिकस्थितौ समघटत बहुतरं परिवर्तनम्।

भूगर्भशास्त्रमेतस्य परिवर्तनस्य समर्थकम्। एतस्य स्पष्टीकरणमिह तावदनावश्यकम्, परन्तु वैज्ञानिकैस्तदिदं स्वीकृतं यद् विन्ध्यादिप्राचीनपर्वतापेक्षया हिमालयो नवीन:। यदा हि हिमालयो बहिरुत्थितस्तदा तदध: समभूद्गर्त: यो हि कतिसहस्रवर्षैरपूर्यत। तावत्पर्यन्तं गङ्गा-यमुनादयो लघीयस्यो नद्योऽभूवन्। किन्तु गर्ते पूरिते यथैव समुद्रो दूरमगच्छत् तथा तथैव ता अपि अग्रगामिन्योऽभूवन्। एतावत्किल, यथा यमुना गङ्गया संगता गङ्गा च समुद्रेण सङ्गतुं गङ्गासागर पर्यन्तं प्रायात्। समुद्रे अपसृते एव, ब्रह्मपुत्रनद:। आसाममार्गेण वङ्गानागत्य गङ्गयाऽमिलत्।

इतो राजपुत्रस्य समुद्रोऽशुष्यत्। पूर्वं सरस्वती अत्रैव समुद्रेऽपतत्। यथा यथा समुद्रोऽऽशुष्यत् तथा तथाऽत्र बालुका उदभवत्। पूर्वं यां मृत्तिकां नद्यो हिमालयादानयन् तया युक्तप्रान्त-विहार-वङ्गा: प्रादुरभवन्। परन्तु दक्षिणे नासीदीदृक् साधनम्। अत एव नाऽपतन्मृत्तिका। पानीयाऽधस्तनी बालुकैव केवलमशिष्यत, यस्य सागरस्य स्मारक: 'साँभरह्रद:' साम्प्रतम्। सरस्वती या कस्मिंश्चित्समये महानद्यासीत् सा अतिलघीयसी समभूत्। सा हि राजपुत्रस्य बालुकाप्रदेशे विलुप्यतेऽपि। नाममात्रशेषा संप्रति सरस्वती। घग्घर नाम व्यपदिश्यते, किन्तु तदिदं नाम दृषद्वत्या अपि कृते व्यवह्रियते। आस्तिका: केवलं संतोषयन्त्यन्त:करणं यद् अन्त:स्रोता: सरस्वती प्रयागे त्रिवेण्यां वर्तमानेति।

उत्तरदिग्गतः समुद्रः शुष्कः सम्प्रति। तस्य स्मृतिः कास्पियनसागर–अरबसागर–तत्प्रदेशीयैरन्यैर्महाह्रदैश्च सांप्रतमपि वर्तमाना। यत्र पश्चिमसमुद्रः सुलेमानपर्वतं यावदगच्छत् तत्र सिन्धप्रान्तस्यैको भागोऽवसत्।

पाश्चात्या गवेषकविद्वांसः कथयन्ति यत्प्राचीनार्याणां समुद्रस्य नासीत्परिचयः। यत्किञ्चिद्वर्णनं यत्रकुत्रचित्लभ्यते तद्धि श्रुतप्रायम्। किन्तु उपरिप्रोक्तानुसारं सप्तसिन्धवं परितः प्राय आसीत्समुद्र एव, आर्यास्तावत्पर्यन्तं पर्यजानंश्च। पाश्चात्त्याः कथयन्ति यत्कर्णाकर्णिकया समुद्रकथा तैः श्रुता। किन्तु ते सीमारूपेण समुद्रमजानन्निति वेदतो विद्मः–

**'वातस्याश्वो वायोः सखा यो देवेषितो मुनिः।**

**उभा समुद्रावाक्षति यश्च पूर्व उतापरः।'** १०/१३६/५

कुत्रचिच्चतुःसमुद्राणामपि निर्देशः। यथा–रायः समुद्रांश्चतुरोऽस्मभ्यं सोम विश्वतः आपवस्व सहस्रिणा।। (ऋ. ९ –३४–६)

अस्तु, स्थाने स्थाने स्पष्टीभवति यत्प्राचीनार्याणामासीत्प्रचुरः परिचयः पयोधीनाम्। एभिः सप्तसिन्धवदेशमावसद्भिः पूर्वो दक्षिणश्च समुद्रः प्रत्यक्षीकृतः। एतेषां सम्मुख एव गङ्गा धारा शनैः पूर्वाभिमुखाभवत्। शनैः शनैश्च समुद्राणां स्थाने मनुष्याणामावासयोग्या भूमिरभूत्। वेदमन्त्राश्च न्यूनान्यूनं १६–१७ सहस्रवर्ष पुरातनाः। ते च स्वस्मादतिपुरातनस्य समयस्य सङ्केतं कुर्वन्ति। पितृणां वर्णने ते कथयन्ति यत् प्रमीतानां तेषां तावान् समयो व्यतीतो यावता ते पूर्वजाः सन्तोऽन्येषां पथिकृतः (यमसदने गामिनो मार्गस्य निर्देशकाः) अपि जाताः। यथा–

**'नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः'**

(ऋ. १० मण्ड., सूक्तं–'१४)

किं विस्तरेण अस्मिन् सूक्ते एवंविधपितृणामाख्यानमस्ति येषां शरीरत्यागस्य स्मरणातीतो व्यतीतोऽनेहा। एते हि देवैः सह साम्यमवापुः, मार्गकाराश्चान्येषां संवृत्ताः एतेन स्पष्टं शक्यमनुमातुं यद् यदा इमे मन्त्राः प्रोदचार्यन्त ततो न्यूनान्न्यूनं दशसहस्रवर्षाणां पुरातनं समयं सूचयन्ति स्म।

सर्वस्य संक्षिप्तो निष्कर्षः– अद्यतः पञ्चविंशतिसहस्रवर्षेभ्योपि पूर्वमार्याः साप्तसिन्धव–देशे न्यवात्सुः। पूर्वं पाश्चात्या भारतीयसभ्यताया मूलं मिश्रदेशस्य सभ्यतां जगुः। यतो नास्मिन्देशे तत्कालस्य स्मारकं प्रमाणं किञ्चित्। परं 'मोहेञ्जोदडो' (सिन्धुभाषया मृतानां स्तूपः) 'हरप्पा' प्रदेशस्य खननकार्ये यानि वस्तून्युपलब्धानि तैर्भारतस्य सभ्यता षट्सहस्रवर्षेभ्यः पुरातनीं स्वीकुर्वन्ति विप्रतिपन्ना अपि। तादृशकलानां विस्तारे अवश्यं कियान् कालोऽपेक्षितः। ततश्च मौर्यकालिककलायाः पितृत्वगवेषणार्थं ईरानं प्रति गमनस्य नाऽपेक्षा। पूर्वे यूरोपीयाः सभ्यताविकासं सर्वतः पूर्वं मिश्रेऽमन्यन्त परं सम्प्रति तदिदं सर्वमान्यमभूद् यत् ईराकप्रदेशे सभ्यतायाः प्रारम्भो मिश्रतोऽपि पुरातनः। ईराकस्य पुरातनी सभ्यता सुमेर–अक्काद (शुमीर (सुमेर) अक्कादेति ईराक केन्द्र पर्यन्तं विस्तृता सभ्यतेति प्रथिता। किन्तु गवेषकैः सर्वतो

विलक्षणं यत्तत्त्वमाविष्कृतं प्रदेशस्य भग्नावशेषा ये सम्प्रति खातास्तेषां सभ्यता महेञ्जोदरो सभ्यतातो भूरि भूरि संवदते। गृहस्थापत्यम्, मूर्तयः, मुद्राः, भाषाः, अन्यत्किं बह्वीनां व्यक्तीनां नामान्यपि संवदन्ते। एतेषामेक उपास्यः ''इन्दुरु'' इन्द्रेण संवदते। किमधिकम्, वेदे जर्फरी, तुर्फरीत्यादयः शब्दा अद्यावध्यासन्नस्पष्टार्थाः। अन्वेषकाणां सम्मतिर्यद्वयं केवलमद्यावधि भारतमेवान्वेषयामो, न बहिः। इमानि हि ईराकस्य प्राचीननदी-पर्वतादीनां नामानि। यद्यार्याणामेका शाखा तस्मिन् समये भारते (सप्तसिन्धवे) आसीत्तर्ह्यन्या ईराके आसीत्। द्वयोश्चासीत्संपर्कः, अत एव वेदे द्वयोरेव इतिहासोपलब्धिः (एवंविधान्वेषकेषु भारतीयेषु अध्यापकप्राणनाथ विद्यालङ्कारः)।

एवं किल प्राचीनार्याणामार्यावर्तनिवासित्वमेव, न पुनर्बाह्यात्स्थानादत्रागन्तुकत्वम्। अत्र हि बहवः संस्कृतपण्डितानाक्षिपन्ति यत्-' संस्कृतपण्डितैर्नात्र विषये लेखनी स्पृष्टा। प्रत्युत यैर्बालगङ्गाधरतिलकमहोदयादिभिः पाश्चात्त्यानां— प्रातिद्वन्द्वये यत्किञ्चिल्लिखितं तत्रापि -'बाल (बालगङ्गाधर) सिद्धान्तस्तु बालसिद्धान्त एव' इत्यवहेलागर्भमेवाऽऽभाषितम्। अत एव नवीनैर्बहुभिः संस्कृतज्ञानां विषये निर्धारितं यन्नेमे एतद्विषये किञ्चित्स्वमतं रक्षन्ति, किं बहुना, प्रश्नस्यास्य गूढं महत्त्वमपि नेमे विदन्तीति। किन्तु नेदं कथमपि तथ्यम्। संस्कृतपण्डितै-रारम्भादेव संभाषितं यदार्याणामादित एव भारतेऽभून्निवासः। तत 'आर्यविद्यासुधाकर' कारं यज्ञेश्वरभट्टमारभ्य-सत्यव्रतसामश्रमि-समीक्षाचक्रवर्ति श्री मधुसूदन शर्मविद्यावाचस्पति-महामहोपाध्याय पं. श्री गिरिधरशर्म चतुर्वेदादिभिः, पङ्क्तीनामासां लेखकेनानेनापि च समये समये वक्तृतादिभिर्लेखैश्चाप्ययं विषयः सुबहु समर्थ्यते स्म।

किन्तु पाश्चात्यविद्वद्भिस्तदिदं मन्ये वज्रलेखीकृतमिव ततो ग्रामपाठशालामारभ्य विश्वविद्यालयपर्यन्तं चापि सेयं नवशिक्षितेभ्यो मन्त्रदीक्षा दत्ता यत्-आर्या बहिस्त आगत्य भारतमाक्रान्तवन्तः, आदिमनिवासिनश्च पराकृत्य स्वाधिकारं चक्रु रिति। आङ्गलशिक्षितेषु सेयमपि रुढिर्दृढं प्ररूढा यद् भारतीया सभ्यता मिश्र (ईजिप्ट) देशस्य ईराकदेशस्य च सभ्यतातोऽर्वाचीना। दयनीया आङ्गलशिक्षिता वराका नाविदन्नत्र विजेतृजातेर्निगूढं नैतिकरहस्यं पूर्वम्। संप्रति तु पूर्वोक्तरूढ्योर्विरुद्धं न कञ्चन तर्कं ते मनसापि श्रोतुं कामयन्ते। परःशतवर्षाणां सांस्कृतिका राजनैतिकाश्च ये गूढाग्रहा अन्तःकरणस्यान्तस्तले निगूढाः सन्ति ते तदिदं तथ्यं स्वीकर्तुं निवारयन्तीव। यदीमा वार्ता विज्ञानसम्बन्धिन्योऽभविष्यंस्तर्हि आक्षेप्ता प्रत्यक्षप्रयोगद्वारा अशक्ष्यन्निराकर्तुम्। किन्तु प्राचीनैतिहासिक क्षेत्रे यत्र यूरोपीयविद्वद्भिरात्मनः किञ्चिन्मतं स्थिरीकृतं तद्विरोधे भारतीयस्य कस्यचिदभिमतं सम्मानं लभेत, एतत्किलाऽसम्भवं न चेत्सुकठिनं त्ववश्यमेवेति को न विवेकी विजानीयात्?

***

# वैदिकार्याः प्रारम्भादेव भारतवासिनो, न बाह्याः

भारतस्यास्य बोधनायाऽऽर्यावर्तशब्दोऽयं भृगुप्रोक्त-मनुसंहितायां व्याकरणमहाभाष्ये ततस्तु महाभारतादावपि कामं भवेद् दृष्टः, परं न वेदसंहितासु। किन्त्वार्यशब्देन श्रेष्ठा जातिश्चिरात्प्रासिध्यद्वेदेषु। ''विजानीह्यार्यान् ये च दस्यवो बर्हिष्मते रन्धया शासदव्रतान्'' (ऋ १/५१/८१), ''तयाहं सर्वं पश्यामि यश्च शूद्र उतार्यः'' (अथर्व. ४/२०/३ खं.), ''अयुव-मार्यस्य राष्ट्रं भवति'' (ऐतरे ८/५/२) इत्यादौ स्थाने स्थाने प्राप्यते जातिवाचकस्यार्य-शब्दस्योल्लेखः। चिरन्तनेन पाणिनिनाप्यार्य-शब्दः सोयमुपगृहीतः -'आर्यो ब्राह्मणकुमारयोः' (६/२/५८)। निरुक्तकारो यास्कोऽपि व्यवहृतवानिमम्- 'विकारमस्यार्येषु' (२/१/४)। आर्यशब्दश्चायं व्याख्यातस्तेन स्थानान्तरे-'आर्यः ईश्वरपुत्रः'। आर्यपदं निघण्टौ (२/२२) ईश्वरनामसु पठितम्, तस्यापत्यम् 'आर्यः'। अस्मत्पूर्वपुरुषा आर्या रूपवत्त्वेन बलवत्त्वनेन विद्वत्त्वेन सत्यवादितादिबहुसद्गुणवत्त्वेन पवित्राचारवत्त्वेन च भूयस्तरां गौरवमलभन्त समाजे। अत एव ईश्वरपुत्रा इति व्यपदिश्यन्त। एतद् दृष्ट्वैव महम्मदीयाः स्वधर्मप्रवर्तकं मुहम्मदं साक्षादीश्वरपुत्रं मन्यन्ते। आर्याः (ईश्वरपुत्रतागौरववाहिनः सभ्याः) आवर्तन्ते पुनः पुनरुद्भवन्ति यत्र स आर्यावर्तः। आर्याः 'आ' आभिमुख्येन (प्रधानरूपेण) वर्तन्ते यत्र स आर्यावर्तः, इति सत्यव्रतसामश्रमिमहाभागः।

स चायमार्याणामादिमावासः पुरा हिमवत्पृष्ठस्य दक्षिणे भागे 'सुवास्तु' प्रदेशे बभूव - 'सुवास्त्वा अधि तुग्वनि' (ऋ. ८/२०/३७)। 'सुवास्तुर्नदी, तुग्वं तीर्थं भवति, तूर्णमेतदायन्ति' (४/२/७) इति यास्कः। वास्तुः वासभूमिः, सा खलु यस्यास्तीरे सुष्ठु भवति सा नदी सुवास्तुः। (४/२/७०)। कनिङ्हममहाशयस्य मतानुसारं स्वात् सुवात्। अत एव प्रदेशमिमं परिजानन् तत्र- भवान्पाणिनिराह -'सुवास्त्वादिभ्योऽण्' इति वा प्रसिद्धा नदी सेयं सुवास्तुः। सुवास्तुनिवासकाले च तत्रत्यैः सेयमृक् समाम्नाता-''मा वो रसाऽनितमा कुभा.'' इत्यादि। एतस्मादृङ्मन्त्रात् आर्याणामादिनिवासस्य चतुः सीमानो व्यज्यन्ते। तथा हि- सुवास्तु जनपदादुत्तरस्था रसा (नदी) उत्तरसीमा, कुभा (काबुलनदीति प्रसिद्धा) पश्चिमसीमा, तक्षशिलाप्रदेशीया सरयूः (न उत्तरकोसलस्था सरयूः, कुभाद्युत्तरदिशि तस्या असाहचर्यात्) पूर्वसीमा, कुभाया अधः क्रुमुसिन्धु सङ्गमश्च तद्दक्षिणसीमा।

ततः सुवास्तुतः किञ्चित्पश्चिमे पर्वते आर्याणां निवासप्रवाहः प्रासरत्। ततः किञ्चित्कालानन्तरं सुवास्तुतः प्राग् दक्षिणस्थां श्रीकण्ठशैलसमुद्भूतां जह्नुमुन्याश्रमतलवाहिनीं जह्नावीं यावदार्यावासः प्रवृद्धः। यथा ऋक् -'पुराणमोकः सख्यं शिवं वां युवोर्नरा द्रविणं जाह्नव्याम्' (जाह्नवी एव उत्तराखण्डे भागीरथ्याः शाखाविशेषत्वेन ख्याता साम्प्रतिकी जाह्नवी, इति सामश्रमि महाभागः)। जाह्नावीतीरस्थो जाह्नवप्रदेशः अद्यतन 'पाँचकोरा' तः प्राक्,

सिन्धुतः प्रत्यक्, वुनाद् (वर्णु) प्रदेशतश्चोदक्दिश्यवस्थित इति विश्वकोषसम्पादको वसुदासः।

एतदनन्तरमार्याणामावासः सारस्वतप्रदेशेषु विस्तीर्णः। यथाह यास्कः– विश्वामित्र ऋषिः, सुदासः पैजवनस्य पुरोहितो बभूव, स वित्तं गृहीत्वा विपाट् शुतुद्र्योः संभेदमाययाव–नुययुरितरे, (२, ७, २)। अत्रैव बहव ऋङ्मन्त्राः सामगानमन्त्राः आथर्वमन्त्राश्च समाम्नाताः। यागविधयोऽप्यत्रोद्भूताः। आर्यसाम्राज्यमिहैव प्रथमं विश्रुतम् अत एव सर्वेष्वेव वैदिकग्रन्थेषु सरस्वत्याः प्रसङ्गो भूयसा श्रूयते। यागभूमित्वेन प्रशंसाऽप्यस्यैव प्रदेशस्य। यथा– 'नित्वा दधे वर आ पृथिव्या इलायास्पदे सुदिनत्वे अह्नाम्। दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि।।'' (ऋ. ३/२३/४)। हे अग्ने: अहं त्वां इडायास्पदे (शस्यबहुले) एवंविधप्रशंसाभाजने प्रदेशे निदधे (स्थापयामि)। 'कः स प्रदेश' तदाह –'दृषद्वत्याम्' 'आपयायां' 'सरस्वत्याम्' (दृषद्वतीतीरमारभ्य सरस्वतीतीरं यावत् त्रिनदी प्रदेशः सर्व एव ब्रह्मावर्तः) 'मानुषे' जनपदे त्वं 'दिदीहि' दीप्यस्व। अत एव हि प्रोक्तं मनुना –'सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते।।' (२,१७)।

ततोऽस्यार्यावर्तस्य भूयान्विस्तारोऽभूत्, त्रिसप्तनदीभिः सोऽयं व्याप्तः। यथा शाकलसंहिताया दशममण्डले नवर्चं सूक्तं (यद्धि नदीस्तुतिपरतया 'नदीस्तुत्' इति प्रसिद्धम्) तस्य पञ्चमी ऋक् –

**'इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या।**
**असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणोह्या सुषोमया।।'**

अत्र श्रुता (१) गङ्गा प्रसिद्धैव। ततः पश्चिमस्था यमुना (२) ततः पश्चिमस्था सरस्वती (३) ततः पश्चिमस्था शुतुद्री (४) कश्यप–पुरतः प्राक्प्रवाहिणी। ततः पश्चिमस्था परुष्णी (एषैव यास्ककाले इरावती, सम्प्रति ऐरावती)। ततः पश्चिमस्था असिक्नी (एषैव चन्द्रभागा) ततः पश्चिमस्था वितस्ता। ऐरावती–चन्द्रभागा–वितस्तेति तिसृणामासां सम्मेलनतो याऽभूदतिप्रसारा मालवदेशीयकश्यपपुरतः पश्चिमस्यां दिशि दक्षिणाभिमुखी महानदी सैव मरुद्वृधा (५), शतद्रोरुपरिष्टात् पश्चिमपार्श्वतः सङ्गता प्राचीनतमा आर्जीकीया (६) उरुञ्जिरेति प्राचीनतरं नाम, (विपाडिति यास्ककाले, विपाशानाम्नी संप्रति)। ततः पश्चिमस्था सुषोमा (७) या हि तक्षशिलानामप्रदेशान्निम्नगामिनी सिन्धौ च सङ्गता। एताः सप्त नद्यो यावद्भूभागे प्रावहन् सप्तनदः सप्तसिन्धुरिति वा ख्यायते। गङ्गायमुने विहाय पूर्वोक्ताः पञ्चनद्यो यावद्भूभागे प्रवहन्ति स पञ्चनदः सारस्वतप्रदेशश्चेति विश्रुतः।

एष सप्तनदः सिन्धोः पूर्वपारस्थः। एवमेव सिन्धोः पश्चिमपारस्थोऽप्यपरः सप्तनदः प्रदेशः। अयं प्रदेशः साम्प्रतमार्यावर्ताद् बहिर्भूतः परं पुराऽऽसीदार्यावर्तान्तर्गतः। अत एव शाकलसंहितायाः षष्ठ्यामृचि सप्तानां नदीनां वर्णनम्

**''तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेतया त्या।**
**त्वं सिन्धो कुभया गोमतीं क्रुमुं मेहत्न्वा सरथं याभिरीयसे।।''**

अत्र तृष्टामा (१), सुसर्तुः (२), रसा (३), श्वेती (४), कुभा (५), गोमती (६), मेहत्नु युता क्रुमुः (७), इमाः सप्त नद्यः समुद्रगामिनः सिन्धुनदस्य पश्चिमस्यां दिशि पूर्व-दक्षिणाभिमुखं प्रावहन्। सिन्धुश्चायं हिमालयमध्यभागादुत्पद्य पूर्वं पश्चिमाभिमुखगामी ततः किञ्चिदग्रे गत्वा दक्षिणप्रवाही। एतासां सप्तनदीनां सम्प्रत्यन्यान्येव नामानि। चित्रालदेशतः पूर्वस्यां प्रवहमाना 'पञ्चकोर' प्रदेशीया त्र्यवयवा नद्येव मन्ये 'तृष्टामा'। 'सुसर्तुः' रिति सुनास्तोर्नामान्तरं या हि संप्रति 'स्वात्' इत्युच्यते। 'रसा' पूर्वं सुवास्तुप्रदेशस्योत्तरसीमभूता वर्णिता। 'श्वेती' डेरा इस्माइलखाँ प्रदेश-तलवाहिनी अर्जुनी। कुभा 'काबुल्'। 'क्रुमुः' वर्णुप्रदेशीया कुरम्। 'गोमती' गोमल् इतिख्याता। एताः सप्तापि साक्षात् परम्परया वा सिन्धुनदसंगताः।

ततश्च 'चित्राल्' प्रदेशतः प्राक् विलोचिस्तानप्रभृतित ऊर्ध्वं च यो वै आर्यावर्तप्रदेशः स किल 'पश्चिमसप्तनदः' इति व्यपदेशमर्हति। सप्तनदे पञ्चनदप्रदेशोऽन्तर्भवति किं च यथा पूर्वसप्तनदे पञ्चनदप्रदेशोऽन्तर्भवति तथा पश्चिमसप्तनदे अफगान-पंचकोर-प्रदेशो व्याप्यते। एवं सति गान्धारोऽयमार्यावर्तेऽन्तर्भवति। अत एव गान्धारीणामिवाविका (ऋ. १/१२६/७), 'नग्नजिते गान्धाराय' (ऐत. ब्रा.), 'साल्वेयगान्धारिभ्यां च' (पाणिनि ४/१/१६९), इत्याद्युक्तयः संगच्छन्ते। अत एव च कुरुराजधृतराष्ट्रपत्नी दुर्योधनादीनां माता 'गान्धारी' भारते प्रासिध्यत्। एवमेव अद्यतन 'पारस्य' राज्यप्राक्प्रान्तवर्ती पूर्वमद्रप्रदेशः, तत एव पाण्डुराजस्य पत्नी 'माद्री' चापि भारतीयैवासीत्। अत एव हि 'पौर्वमद्रः' इति पदसाधनाय 'मद्रेभ्योऽञ्' (४/२/१०८) इति प्राणीयत पुरा पाणिनिसूत्रम्। एवं च पारस्यप्राक्प्रान्तवर्ती यथा पूर्वमद्रः, तथा पारस्योत्त-रप्रान्तवर्ति, अद्यत्वे 'मिदिया' नामकं साम्राज्यमेव उत्तरमद्र इति स्वीकरणं नाऽनुचितम्। तथा च एकः सप्तनदप्रदेशः सिन्धोः पूर्वपारस्थः, अपरश्च सिन्धोः पश्चिमपारस्थः। सिन्धुश्चायं हिमवन्मध्यभागादुद्भूय पश्चिमप्रवणः अन्ते समुद्रमाविशति। तथा च पुरातनमार्यावर्तं मध्यतो द्विधा कुर्वन् सोयं सीमादण्ड इवावावस्थितोऽद्यापि विद्योतते भारते।

सप्तनदीसिक्तो यथा एकः प्रदेशः (पूर्वसप्तनदः) तथा सप्तनदीमातृकोऽन्योऽपि सप्तनदः (पश्चिमसप्तनदः) उपरि वर्णितः। एताभ्यश्चतुर्दशनदीभ्योऽतिरिक्ताः अन्या अपि सप्तनद्यः पूर्वोक्तनदीस्तुत्सूक्तस्य ६-८ ऋग्भ्यां ज्ञायन्ते, याः सिन्धोरतिदूरे उत्तरपश्चिमभागे पुराऽऽसन्। तासामेका १. ऊर्णावती (कैलाशनिम्नस्थोर्णाप्रदेशीया), २. हिरण्मयी, ३. वाजिनीवती, ४. सीलमावती, एताश्चतस्रोऽप्युत्तरदिक्स्थाः। ५. 'एनी' नदी निम्नबिलोचिस्थाने प्रसिद्धैव। एवं ६. 'चित्रा' चित्रालप्रदेशतो निर्गत्य कुभायां मिलिता। ७. 'ऋजीती' चापि कुभायाः समीपवाहिनी। एवं किल त्रिसप्तनद्यः पुरातने आर्यावर्ते प्रकटमासन्, यासु सिन्धुनदः सर्वप्रधानम्। यथा- 'प्र सप्त-सप्त त्रेधा हि चक्रमुः प्र सृत्वरीणामति सिन्धुरोजसा' (नदीस्तुत्सूक्तम्) [आपः-नद्यः सप्त सप्त भूत्वा त्रिधा त्रिश्रेण्यः सत्यः प्रचक्रमुः प्रावहन् (सिन्धोः पूर्वस्यां सप्त, पश्चिमस्यां सप्त, उत्तरस्यां च सप्त) एतासां सृत्वरीणां नदीनाम् (एकविंशतिसंख्याकानाम्) ओजसा बलेन अति अतिशयितः एको नदः सिन्धुः।] अयं सिन्धुः पूर्वोक्तनदीनां पुत्र इव राजेव चाग्रे वर्णितः। एतत्त्रिसप्तनदी परिवृतो मध्ये सिन्धुना सिक्तः समभूत्पूर्वकालिक आर्यावर्तः। अतएव- 'यस्तेजो ब्रह्मवर्चसमिच्छेत्-------प्राङ् स इयात्,--योऽन्नाद्यमिच्छेत्----दक्षिणा स इयात्-- यः

सोमपीथमिच्छेत्----उदङ् स इयात्, इत्यादयश्चतुर्दिग्विषयका वादाः प्राक् उदगित्यादेरवधिसापेक्षतया मध्यगतं सिन्धुमेवावधीकृत्य प्रवृत्ता इति सिन्धुमध्योऽयमस्माकमार्याणां पुरातनो निवास इति स्पष्टमभ्युपेतव्यम्।

किञ्च द्वितीयनदीसप्तके तृतीया नदी 'रसा' या पूर्वमावर्णिता सैव प्राक्तन-भारतस्यासीदुत्तरसीमा। अर्थात् रसाया उत्तरेणासीदनार्यदेशः, तस्याश्च दक्षिणेनासीदार्यावर्तः। अनार्यदेशात्पणिनः (व्यापारिणः) असुराः (आर्येतरे) आर्यदेशे आगत्य गवादिसङ्ग्रहमकार्षुः। अत एव कदाचित् पणिभिरनार्यैर्गुप्तमपहृताः आर्याणां गावः 'सरमा' नाम्न्याः कुक्कुर्या अनुसन्धानेन उत्तरसीमभूतामिमां रसां तीर्त्वा पुनरलभ्यन्त प्राक्तनैरार्यैः एतद्विषयको देवशुनी-पणिसंवाद ऋक्संहितायाम् (१० मण्डले) विस्तृत्योक्तः। तस्यादिमैषा ऋक्-

**'किमिच्छन्ती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः पराचैः।**

**कास्मे हेतिः का परितक्मासीत् कथं रसाया अतरः पयांसि।।**[१]

अत्र निजगवीनां प्रत्याहरणाय 'रसा' नद्यास्तरणं भारतीयार्याणामेवेति को वा स्थिरमस्तिष्को न विजानीयात्। इदानीं परीक्ष्यतामार्याणां बहिस्तः समागत्य भारते प्रविष्टत्वं (औपनिवेशिकत्वम्) आङ्गलशिक्षितानां सुन्दरमस्तिष्के बलात्प्रवेशयतां यूरोपीयविदुषां पाण्डित्यम्। 'रसाया अतरः पयांसि' इति 'रसा' नद्यास्तरणमिदं दृष्ट्वा ते कथयन्ति- 'मध्येशियातः समागत्य आर्या 'रसा' नदीमुत्तीर्य भारते प्राविशन्। एतन्नदीतरणमेव पूर्वतनार्याणां बहिः प्रदेशादागतत्वं सूचयति' इत्यादि। नात्र विशेषवाग्वादस्यावश्यकता। प्रमाणमत्र पाठकानां हृदयमेवेत्यलम्। सेयं 'रसा' प्राचीनभारतस्य पश्चिमसीमेति 'आवेस्ता' ग्रन्थतोऽप्यवसीयते। तत्र हि 'रंहा' [सकारस्थाने हकारोच्चारणात्तेषाम्] स्थाने स्थाने संस्मृता। स्वीकृतमिदं विश्वकोषकारेणापि। स आह- 'सेयं' समुद्रसंगता 'रसा' त्वद्यतनार्यावर्ततो बहिष्ठा, खोराशानराज्यान्तर्गता 'आवेस्ता' ग्रन्थवर्णिता 'रंहा'।

'ईरान्' इति साम्प्रतं प्रथितो देशः, मूंजवान् इति ख्यातः पर्वतश्चापि पुराऽऽर्यावर्तान्तर्गतोऽभूदृक्संहिताकाले। यथा-

**'प्रावेपा मा बृहतो मादयन्ति प्रवातेजा इरिणे वर्वृतानाः।**

**सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान्।।'** (१०-३४-१)

'ईरिणे' ईरानप्रदेशे वर्वृतानाः अधिकतया वर्तमानाः 'वृहतः' विभीदकवृक्षाः 'मा' मां मादयन्ति। अयं (विभीदकः) मौजवतः मूजवान्नामपर्वतोत्पन्नस्य सोमस्य भक्षः इत्यादिरस्या

---

१. सायणकृतं भाष्यं स्पष्टीकरोत्यार्याऽनार्यवृत्तमिदम्। तथाहि तदक्षराणि- ''इन्द्रपुरोहितस्य बृहस्पतेर्गोषु बालनाम्नोऽसुरस्य भटैरसुरैरपहृत्य गुहायां निहितासु सतीषु-------बृहस्पतिप्रेरितेनेन्द्रेण गवामन्वेषणाय सरमा नाम देवशुनी प्रेषिता। सा च महतीं----- नदीमुत्तीर्य बलपुरं प्राप्य गुप्तस्थाने नीतास्ता गा ददर्श। अथ तस्मिन्नन्तरे पणय इदं-- वृत्तान्तमवगच्छन्त एनां मित्रीकर्तुं संवादमकुर्वन्''। अत्र पणयो वणिजः। (बनजारे) असुरा बलवन्तोऽनार्याः अभिप्रेता इत्युक्तं निरुक्ते- ''पाणिनिर्वणिग् भवतीति (२/५/३) असुरा बलवन्तः (३/२/२)।

अर्थः। ईरिणमिति द्विधा व्याख्यातं निरुक्ते– 'ईरिणमृणातेरपार्णं भवति अपरता अस्मादोषधय इति वा' (९-१-८)।

अथर्वसंहितायाः पञ्चमकाण्डस्य चतुर्दशर्चद्वाविंशतितमसूक्तस्य तृतीये मन्त्रे 'परुष' नामजनपदस्य, चतुर्थे अष्टमे च 'महावृष' प्रदेशस्य, पञ्चमसप्तमयोः नवमे च 'मूजवत्' प्रदेशस्य बाह्लिकप्रदेशस्यापि, अन्तिमे (चतुर्दशे) अङ्ग-मगध-मूजवत्- गन्धारीणां श्रवणमस्ति। परमिमे सर्वेपि जनपदास्तदानींतनार्यावासस्य बहिर्भूता आसन्। अत एव आथर्वणैस्तत्र 'तक्म' स्थापनं प्रोक्तम् [इदं हि बहिरेव विधीयते]। तथाहि चतुर्थे मन्त्रे–

**'गन्धारिभ्यो मूजवद्भ्योऽङ्गेभ्यो मगधेभ्यः।**

**प्रेष्यं जनमिव शेवधिं तक्मानं परिदद्मसि।।'**

यद्यपि 'परुष्' (पेशावर)-'गान्धार' (कन्दहार) योः पूर्वमार्यावर्तान्तर्गतत्वमुक्तं किन्त्वेतन्मन्त्राम्नानकाले तयोर्बहिर्भूतत्वमभूदिति प्राचामाचार्याणां तात्त्विको विमर्शः। अनेन हि प्राक्तनार्यावर्तस्य सजीव इतिहासश्चक्षुषोरुपगच्छतीति को वाऽऽर्यसंतानो न प्रकटयेत्पुलकम्।

अङ्गराज्यस्य पुराऽनार्यत्वमेवासीत्। कुरुराजदुर्योधनकाल एव तस्याऽऽर्यावासत्वं समपद्यत। मगधस्य तु चिरादनार्यावासत्वं प्रासिध्यत्। तथा च ऋक्- 'किं कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति धर्मम्।' (३-५३-१४)। 'कीकटो नाम देशोऽनार्यनिवासः' इति निरुक्तम् (६-६-४)। कीकटश्चायं मगधः। यथाहि स्मृतिः-

**'कीकटेषु गया पुण्या, पुण्या पुनपुना नदी।**

**च्यवनस्याश्रमं पुण्यं पुण्यं राजगृहं वनम्।।'**

अयं मूजवान्काममनार्यावासोऽपि आर्यावासस्योत्तरसीमासीदिति जानीमः। यतो हि वाजसनेयिनः- 'एतत् ते रुद्रावसम्, तेन परो मूजवतोऽतीहि' (सं.- ३-६१) इति प्रार्थयन्ते। अत्र हि रुद्रनाममृत्युदेवताया मूजवतः परपारे गमनप्रार्थनात् आर्यावर्ततो दूर एव तस्य स्थितिर्वाञ्छितेति स्फुटं गम्यते। ततश्च अद्यतन पारस्यराज्यस्य पश्चिमोत्तरस्थो य एशियामाइनर-प्रदेशस्तस्मात्प्राक्, अनुगङ्गप्रदेशात्पश्चिमे, सिन्धुसागरसंगमादुत्तरे, मूजवत्पर्वताद्-दक्षिणे संहिताकालिक आसीदार्यावर्त --- इति सर्वसारो निष्कृष्यते। किन्तु आर्यावर्त सीम्नामेतावत्त्वेऽपि प्राचामार्याणामासीदधिकार इतोपि दूरे दूरे।

यतः-

**'आवदिन्द्रं यमुना तृत्सवश्च प्रात्र भेदं सर्वतातामुपायत्।**

**अजासः शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्व्यानि।।'**

(ऋ. ७-१८-१९)

अत्र आर्याणामिन्द्राय यमुनाः, तृत्सवः, अजासः, शिग्रवः, यक्षवः (एतत्प्रभृतिदेशवासिसामन्ता राजानः) अश्व्यानि (अश्वादिवाहितानि) शीर्षाणि (शिरसा संधृतानि च) बलिम् (उपढौकनम्) जभ्रुः (प्रददुः) इति आर्येन्द्राय करप्रदानेतिहासः प्रख्यायते।

ऐतरेयकाले त्वार्यावर्तस्यायतनं यादृगासीत्तत् अभिषेकप्रकरणादनुमातुं शक्यते। तत्र 'प्राच्यां दिशि ये के च प्राच्यानां राजानः, दक्षिणस्यां दिशि ये के च सत्वतां राजानः, प्रतीच्यां दिशि ये के च नीच्यानां राजानो येऽपाच्यानां, उदीच्यां दिशि ये के च परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्राः, ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि ये के च कुरुपञ्चालानां राजानः सवशोशीनराणां राज्यायैव तेऽभिषिच्यन्ते'' (८-३-२)।

अत्र 'प्राच्यानां राजानः' इति सामान्यतो निर्देशात्प्राच्यां दिशि नासीत्कश्चित्प्रबलो नरपतिः, प्रत्युत क्षुद्रराजैरधिकृता ग्रामप्राया आसन्। अत एवाग्रे 'प्राच्यो ग्रामताबहुला विष्टाः' (ऐत. ३-४-६) इत्युक्तम्। तदानींतनः स पार्वत्यजनपदः अद्यतनो नयपालकिरातनगरादि (भूटान) क एवेति जानीमः। तत एव हि सोमवल्लीनां क्रयो विहित ऐतरेयके 'प्राच्यां वै दिशि देवाः सोमं राजानमक्रीणन्'। एवं पाणिन्यादिकाले कान्यकुब्जाऽऽहिच्छत्रादयो ये प्रख्यातास्तेऽप्यैतरेयकाले ग्रामप्राया एवासन्।

दक्षिणस्यामासीदेकं सत्वद्राज्यं बलवद्, यद्धि 'आदत्त यज्ञं काशीनां भरतः सत्वतामिव' (शत. १३-४-५-२१) इत्यादिरूपेण दौष्यन्तिभरताधिकृतं बहुत्र स्थाने आम्नातम्। (दौष्यन्तेर्भरतस्येतिहासो बहुप्राचीनः, अत एवैतरेयादिषु स 'गाथा' नाम्ना व्यपदिष्टः)।

प्रतीच्यां दिशि तु नैकमप्यासीत्सुसमृद्धं राज्यम्। तस्या उत्तरभागे पर्वतपादस्थभूमिपाः 'नीच्याः' केचिदप्रसिद्धप्रायाः। दक्षिणभागेऽप्यवाच्याः केचित्। मध्यभागे त्वरण्यभूमयः।

उदीच्यां दिशि तु- हिमवत्पृष्ठदण्डस्योत्तरे भागे आर्यावर्ताद् बहिर्विद्यमानावपि 'उत्तरमद्रः' 'उत्तरकुरुश्चेति श्रूयेते। एवं प्रतीयते यत् हिमवतः पृष्ठदेशे मद्र-कुरुदेशावास्तां मध्यस्थितौ, ययोर्दक्षिणोऽर्द्धभाग आर्यावर्तभुक्तः। उत्तरभागो योह्यार्यावर्ताद् बहिरासीत्स 'उत्तरकुरुः' 'उत्तरमद्रश्च' इत्यभूत्प्रसिद्धः। अस्य हि नैसर्गिकसौन्दर्य- स्वास्थ्यकरत्वादितः, तद्देशवासिनां शान्तिप्रियत्व- तपःपरायणत्वादि-देवस्वभावदर्शनाच्च पुण्यमयत्वं देवक्षेत्रत्वम्, अजेयत्वं च यथा ऐतरेयके- 'देवक्षेत्रं वै तन्न वैतन्मर्त्यो जेतुमर्हति' इति श्रुतम्। तथा महाभारतेऽप्यर्जुनदिग्विजये (सभापर्वणि) प्युपलब्धम्-

**''तास्तु सान्त्वेन निर्जित्य मानसं सर उत्तमम्।**
**ऋषिकल्पांस्तथा सर्वान् ददर्श कुरुनन्दनः।।**
**तत एवं महावीर्यं महाकाया महाबलाः।**
**द्वारपालाः समासाद्य हृष्टा वचनमब्रुवन्।।**

**पार्थ नेदं त्वया शक्यं पुरं जेतुं कथञ्चन।**
**उपावर्तस्व कल्याण पर्याप्तमिदमच्युत।।**
**न चापि किञ्चिज्जेतव्यमर्जुनात्र प्रदृश्यते।**
**उत्तराः कुरवो ह्येते नात्र युद्धं प्रवर्तते।।**
**अथेह पुरुषव्याघ्र किञ्चिदन्यच्चिकीर्षसि।**
**तत् प्रब्रूहि करिष्यामो वचनात्तव भारत।।**
**ततस्तानब्रवीद्राजन्नर्जुनः प्रहसन्निव।**
**पार्थिवत्वं चिकीर्षामि धर्मराजस्य धीमतः।।**
**न प्रवेक्ष्यामि वो देशं विरुद्धं यदि मन्यसे।**
**युधिष्ठिराय यत्किञ्चित्करपण्यं प्रदीयताम्।।**
**ततो दिव्यानि वस्त्राणि दिव्यान्याभरणानि च।**
**क्षौमाजिनानि दिव्यानि तस्य ते प्रददुः करम्।''**

तदिदं महान- गरमद्यत्वे 'तिब्बत्' इत्युच्यते [स्थौल्यवदिति तस्यार्थः, एतद्देशवासिनः प्रायः स्थू- लनासिकोदरजङ्घा भवन्ति।]

अत्र 'मध्यायां दिशि' कुरु पाञ्चाल-वश-उशीनराः कीर्त्यन्ते। एवं च कुरुपाञ्चालादयः प्रदेशा आसन्नार्यावर्तस्य मध्यदेशाः। वशः सोयं महाभारतादि प्रसिद्धः शिविः स्यात्। मध्यमायां दिशि इत्यस्य 'ध्रुवायां, प्रतिष्ठायाम्' इति विशेषण द्वयदानाम् मध्यायावर्ते एव तदानीमासीद्राजधानीति ज्ञायते। अत एव हि कुरुपञ्चालादिमध्यदेशमेवाऽवधीकृत्य पूर्व-पश्चिमादयोऽत्र दिशः सूचिता भवन्तीति सूक्ष्ममालोचनीयम्।

ततश्चैतरेयकाले हिमवतो दक्षिणपार्श्वनिम्नस्थं किरातजातिनिकेतनं किरातनगरमेवासीदार्यावर्तस्य पूर्वप्रत्यन्तः [आर्यावासाद्बहिःस्थो देशः]। पूर्ववर्णितं सत्वद्राज्यमन्तर्निवेश्याऽऽसीद्दक्षिणसीमा। गिरि-गिरिनदी-ग्रामसीमादि प्राचुर्यवर्णनाद् गान्धारादिदेशेभ्योऽप्यग्रे आसीत्पश्चिमसीमा। उत्तरस्यां तु उत्तरकुरूणामजेयत्ववर्णनात्तः पूर्वमेवासीदार्यावर्तस्योत्तरसीमेति ज्ञातव्यम्। एकत्र ऐतरेयके श्रूयते- 'त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूर्तिवा इत्युदन्त्या बहवो भवन्तीति' (७-३-६)। 'एते' इति प्रत्यक्षनिर्देशात्तस्मिन्काले विद्यमाना आसन्निमा जातय इति ज्ञायते। 'उदन्त्याः' इत्यस्य प्रत्यन्तवासिनोऽनार्या इत्यर्थः। तथा च अनार्यभूमीरिमाः प्रत्यन्तीकृत्य-आसामन्तः स्थिताः प्रदेशा एवासंस्तस्मिन्काले आर्यभूमयः। अन्ध्रजातयो दक्षिणायां प्रसिद्धाः। 'पुण्ड्रः' इति सांप्रतिकं 'दीनाजपुरम्'। शबरपुलिन्दमूतिवाश्च विन्ध्यगिरिवासिनो म्लेच्छजातिविशेषाः प्रायः प्रसिद्धा एव। ततश्च प्राच्यां दिशि सोयमार्यावर्तो नासीद्विस्तृतस्तस्मिन्काले इति ज्ञायते।

शतपथस्य 'विदेघ-माथवा' ख्यानात् (का.१-३, प्र.३ का १०-१९ क.) विदेहनाममैथिलजनपदो नासीदतिप्राचीनाऽऽर्यभूरिति प्रतीयते। दक्षिणमगधस्य तु नाऽभूत्तदाऽप्यार्यावर्तभुक्तत्वम्। ततोऽर्वाचीनेन पातञ्जलमहाभाष्येणापि दक्षिणमगधात्प्रत्यगेव आर्यावर्तसीमा प्रोक्ता। शतपथे (१२-९-३-३) 'बाह्लिक: प्रातिपीय: शुश्राव' इत्याख्यानात् पश्चिमदिशि बह्लीकोयमार्यावर्तान्तर्गत एवासीदिति ज्ञायते। पाणिनिनापि आयुधजीविवाचि- पार्श्वादिगणे बह्लीकशब्द: पठित: (५-३-११७)। एवं 'कम्बोजाल्लुक्' इति कम्बोजपदमपि तत्र दृश्यते। महाभारतेपि कम्बोजबह्लीकौ वर्णितौ। (द्रो. प्र. ११७,१५५ अध्या.)। 'कंबोजा: कम्बल भोजा:' इत्यादिना निरुक्त: कम्बोजशब्दो यास्केनापि। एवं 'शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते' इति महाभाष्यपस्पशा।

महाभाष्ये आर्यावर्तस्य चतु:सीमनिरूपणमेवमुपलभ्यते 'क: पुनरार्यावर्त: ? प्रागादर्शात्। प्रत्यक्कालकवनात्, दक्षिणेन हिमवन्तम्, उत्तरेण पारियात्रम्।' 'आदर्शादय: पर्वतविशेषा:' इति तट्टीकाकारकृत्कैयट:। 'जनपदतदवध्योच्च' (पाणि ४-२-१२५) इत्यस्योदाहरणे 'आदर्शक:' इति पददर्शनात् आदर्शनामा सीमापर्वत: प्रत्यभिज्ञायते। एतस्य निरुक्त्या सोयमञ्जनपर्वत इत्यवगम्यते। एष सम्प्रति 'सुलेमान्' इत्युच्यते। पूर्वसीमाभूतं कालकवनं तु दक्षिणमगधस्य प्रत्यक्स्थितं बकासुर (बक्सर) प्रदेशीयं ताडकवनम्। पुरा तत् कालयवनाश्रितमभूत्। तत एव कालवनं कालकवनमिति वा नाम सम्पन्नम्। अत एव हि मगधस्यानार्यावासत्वं पतञ्जलिना स्वीकृतम् -'हम्मति: सुराष्ट्रेषु, रंहति: प्राच्यमगधेषु' इत्यादि। ततश्च प्राच्यमगधीयकुसुमपुरादीनाम् (सम्प्रति पटनेत्यादि प्रसिद्धानाम्) आर्यावर्तसीमतो बहि: स्थिति-रेवासीदिति विज्ञायते।

भगवान्मनुस्त्वाह सीमानमार्यावर्तस्य- 'आ समुद्रात्तु वै पूर्वादा समुद्रात्तु पश्चिमात्। तयोरेवान्तरं गिर्योरार्यावर्तं प्रचक्षते।।' 'तयोर्गिर्यो:' पूर्वोपात्तयोर्हिमवद्विन्ध्ययो:। ततश्च पूर्वाऽपरसमुद्रव्यापी देशो मनोरभिमत:। अत्र पूर्व: समुद्र: 'गङ्गासागरसंगम:'। पश्चिमस्तु 'सिन्धुसागरसंगम:'।

अत्र 'तयोरेवान्तरं गिर्यो:' इति मनूक्त्या पूर्वस्यां यावत्येव विन्ध्यगिरे: प्रसृतिस्तावानेव यज्ञिय आर्यावर्त:। एतस्माद्बहि: आर्यावर्तत्वेपि न यज्ञियत्वमिति- मनोस्तात्पर्यम्। अत एव अङ्ग वङ्ग कलिङ्गेषु सौराष्ट्रमगधेषु च गमननिषेध: सङ्गच्छते। अत एव च ''नाऽऽसन्पुरा एतेषु (अङ्गादिषु) प्रदेशेषु ब्राह्मणा: इति प्रवाद: प्रासिध्यत्। साम्प्रतमपि मगधान्तर्गतेषु पटनाप्रभृतिषु, अङ्ग- प्रदेशेषु भागलपुरादिषु, चान्यत: समागता: शाकलद्वीपिब्राह्मणा: तथा वङ्गेषु कान्यकुब्जादागता एव ब्राह्मणा 'राढिवारेन्द्र- वैदिका:' इति ख्याता: प्राप्यन्ते।

कलिङ्गप्रदेशस्यागम्यत्वम् 'अत्यन्तापह्नवे लिङ्वक्तव्य:' इति कात्यायनवार्तिक - तद्भाष्यभ्यामवगम्यते। अस्योदाहरणे भाष्यम्-'नो कलिङ्गान् जगाम' एतद्धि विवृतं कैयटेन- 'न केवलं तद्देशभोजनादेरपह्नवो यावत् तद्देशगमनादेरपि'। एष कलिङ्गप्रदेशोऽद्याप्यार्यावर्ताद्

बहिरेव संस्थितो मेदिनीपुरादारभ्य तैलङ्गदेशान्तं यावद्विस्तृतः। (पुरायमासीत् उत्कलिङ्ग-मध्यकलिङ्ग-कलिङ्गेति त्रिधा विभक्तः। अत एव त्रिकलिङ्गनामा। त्रैलिङ्गनाम तु तत एव समुद्भूतम्। उत्कलिङ्गनामत एव उत्कलनामप्रसिद्धिरित्यैतिहासिकाः।)।

अमरसिंहोऽपि प्राच्योदीच्यमध्यम्लेच्छेति चतुर्विभक्तमार्यावर्त देशस्य परितः संस्थानम-सूचयत्- 'आर्यावर्तः पूण्यभूमिर्मध्यं विन्ध्यहिमागयोः' तत्र 'शरावत्यास्तु योऽवधेः। देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः। प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः।।' (प्राक्सहितो दक्षिणो देशः 'प्राग्दक्षिणः, पश्चिमसहित उत्तरदेशः 'पश्चिमोत्तरः' अन्तं प्रतिगतः 'प्रत्यन्तः' (सीमान्तप्रदेशः) इति तदर्थः)। अमरसिंहकाले यथा शरावती प्राच्योदीच्ययोः सीमाऽसीत्तथा सूचितं काशिकायामपि -'प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा। विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती।।'

## यूरोपीयाणां मतखण्डनम्-

एवमार्याणामार्यावर्तवासित्वे दृढासिद्धेऽपि नीतिनिपुणा यूरोपीय पण्डिताः प्राहुः- ''सारस्वतप्रदेशदमधिवसद्भिः प्राचीनार्यैः 'अनु प्रत्नस्यौकसो हुवे' (ऋ. १-३०-९) इति निजस्य पुरातनं स्थानं स्मृतम्। अत एव ते पूर्वमन्यत्रैव कुत्रचिदूषुः। विचारेण तत्पूर्वस्थानं मध्यैशियाप्रदेशस्य 'बेलुर्ताग्- मुशताग्' पर्वतयोर्मध्यगतं सिध्यति। तस्मादेव च स्थानात्प्राचीनार्याः (भारतीयाः पारसीकाः शर्मण्यादयश्च) भारत-पारस्य-जर्मनादिषु विकीर्णा बभूवुः।

'इमं ये गङ्गे यमुने.' इत्यादि भारतीया नदीः प्रत्यक्षमामन्त्रयन्तो वैदिका आर्याः सुस्फुटं भारतवास्तव्या एवाभूवन्नित्येतद्विरुद्धं वचः कथमु श्रद्धमर्हति? परं विजेतृनीतिनिध्नैः पाश्चात्त्यैर्यो वा गुरुमन्त्र आङ्गलशिक्षितानां कर्णयोर्निहितस्तत्प्रतीकाराय वक्तव्यमेवाऽऽपतितम्। श्रूयताम्- अनु प्रत्नस्येति प्रसङ्गापतितो मन्त्रो येन द्रष्टा प्रोक्तस्तस्यैव प्रत्नमोकः अन्यत्रासीदिति ऊहावकाशः, अथवा आर्यमात्राणां स्थानान्तरीकरणस्यावसरः? 'अहं प्रयामि पातालं तुरङ्गमगवेषणे' इत्यत्र वक्तुः पातालगमनं प्रतीयते, उत आर्यजातिमात्रस्य पातालप्रवेशः प्रख्यायते? अनु प्रत्नस्येतिमन्त्रस्य द्रष्टा विश्वमित्रपुत्रः शुनःशेप ऋषिः। स एवात्मनः पूर्वावासस्य स्मरति, यो हि जह्नुमुन्याश्रमकान्तारे जाह्नव्या मूले जह्नूनां चाधिपत्ये आसीत्। (ऐत. ब्रा ७-३-६)। तस्मादेवाश्रमाद् हरिश्चन्द्रपुत्रो रोहितस्तं क्रीत्वा सारस्वतप्रदेशमानिनाय (ऐत. ७,१,१-६)। ततश्च कथमनेन प्राचामार्याणां स्थानान्तरादागत्य भारत-प्रविष्टत्वं कल्प्यते?

पाश्चात्यैरेतद्विषयकेऽनुमानेऽष्टौ हेतवो दत्तास्ते पाठकानां पुरतः ससमाधानमुप-स्थाप्यन्ते-

(१) 'एशियाखण्डतः प्रसृता एव भारतीय- यूरोपीयादय आर्या भारतादौ प्रविष्टाः' इति सुप्रसिद्धः प्राचीनः प्रवादः। अनेन तावदनुमीयते यद्भारतीयार्या एशियामध्यत एवागता इति। अनेन कथमस्माकमार्यावर्ते आदिनिवासः प्रतिषिध्यते भूस्वत्वनाशो वा साध्यते? पूर्वोक्तः

सुवास्तुदेशः सप्तनदप्रदेशो वा यत्रार्यैर्वेदा दृष्टाः, किमेशियाखण्डे नास्ति? ततः स्थानात्पूर्वं बहवो विश्वामित्र-पुत्रादयो निर्वासिताः। यथा 'त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूतिवा इत्युदन्त्या बहवो भवन्ति वैश्वामित्रा दस्यूनां भूयिष्ठाः' (ए. ७-३-६)। एवमेव त्वग्दोषदुष्टत्वा-द्भर्तृपरित्यक्ता अत्रिसुता विदुष्यपालैव ग्रीकदेशीयानाम् 'अपोलो' देवता स्यादिति संभावयन्ति भूयांसः।

(२) 'भारतीय-पारसीक-यूरोपीयादीनां प्राचीनभाषासु मिथः सौसादृश्यमवलोक्यते विशेषतश्च- सर्वास्वेवैतासु भाषासु शीततर्रोरेकविधमेव नाम।

ततश्च-एकवंशप्रभवत्वं च सर्वेषामनुमीयते इति। अत्रोच्यते, आदिजातानामेषां स्यादेकवंशप्रभवत्वम्। शीतप्रधानदेशवासित्वं च यत्किलानुमीयते तदपि सम्यगेव। अत एव हि उपहिमालयं सुवास्तुप्रदेशे सप्तनदप्रदेशे वा प्राचामार्याणां निवासोऽस्माभिरुपपाद्यते। ततश्च कथमेषां बहिस्तः समागतत्वम्? किञ्च-पारसीकानामवेस्ताग्रन्थस्य 'वेन्दिदाद' प्रकरणीये आद्येऽध्याये अभ्युदयशालिनो नगरस्यैकस्य प्रशंसास्ति, यस्य नाम तत्र 'हरखइति' व्यपदिष्टम्। सोयं स्पष्टः 'सारस्वत' प्रदेशः। सकारं हकारमुच्चारयतां तेषां भाषायां 'सरस्वती' शब्दस्यैव 'हरखइती' इति विपरिणामः संजात इति स्वीकुर्वन्ति भाषावैज्ञानिकाः। तदिदं क्लार्कमहोदयेनापि स्वीकृतम् (१८६२ ख्र. मु. व्या. ५६-५८ पृष्ठ)।

(३) ''-'अवेस्ता' ग्रन्थस्य 'वेन्दिदाद' प्रकरणे देशवर्णनप्रसङ्गे 'ऐर्यनम्वेजो' नाम हिमप्रधानो जनपदो वर्णितोऽस्ति, स एवैषां पारसीकानामादिवासभूः स्वीक्रियते। पारसीकानां भारतीयानां वदनमण्डलगतं सौसादृश्यमस्ति। एवं वैदिकभाषातो ज्रेंदभाषायाः (आवेस्ताग्रन्थभाषायाः) अपि बहुतरं सादृश्यम्, तथा द्वयोरपि जात्योः समानमग्निपूजकत्वम्। ततश्च मूल-भूतानामार्याणामावासभूमिः 'ऐर्यनम्वेजो' स्थानमनुमीयते'' इति। अस्तु सम्यगिदम्। पारसीकाः स्युरस्मद्भ्रातरः। निवसेयुश्च तेषां पूर्वजाः 'ऐर्यनम्वेजो' स्थाने। किन्तु सुवास्तुप्रदेशाद्ब-हिर्भूतानां तेषां तस्मिन् स्थाने निवासः संपन्न इति वेदादिभ्यो ज्ञायते [आर्याणां मध्ये सदा 'इन्द्रस्य' प्राधान्यं शनैः संवृत्तं तदा इदमस्वीकुर्वन्तो मित्रवरुणयमादिमतपोषकाः केचिद्विरुद्धा अभवन्। शनैः सोयं विरोधः 'देवासुरसंग्राम' रूपं भेजे। द्वयोर्भिन्नदेशवास्तव्यतां च चकारेति बहवो जल्पन्ति। ततश्च वेदद्रष्टृभ्य एवार्येभ्यो विच्छिद्य केचित् 'ऐर्यनमवेजो' स्थानमुपगताः स्युरिति सुसंभवमेव। स्पष्टमिदं सम्पूर्णानन्दनिबन्धचर्चायामग्रे स्यात्] सर्वेषामेवार्याणां तत्र (ऐर्यनमवेजो) निवासकल्पनं तु स्थूलप्रायम्। एकवंशजा अपि नानाकारणैर्नानादेशेषु निवसन्त्येव। अत एव वैदिकेष्वार्येषु सारस्वतप्रदेशमधिवसत्स्वेव तद्वंशलब्धजन्मानः केचित् 'ऐर्यनम्वेजो' स्थाने समागता इति सुसंगतमेव। स चायं जनपदो हिमप्रधानः काश्मीरेभ्य उत्तरः 'आर्याणक' इत्यार्येषु कीर्तितः। यथा हि राजतरङ्गिणी-

**'तुषारवर्षैर्बहुलैस्तमकाण्डनिपातिभिः।**

**आर्याणकाभिधे देशे विपन्नं केचिदूचिरे।।'** (४-३६७)

(४) ''बहोः कालात्प्रसिद्धिरस्ति-'ग्रीक-रोमकजातिपूर्वपुरुषाः पूर्वोत्तरदेशतः प्रस्थाय इटाल्यादौ न्यवात्सुः' इति। अयं प्रवादस्तदैव संगच्छते यदा हि एशियाखण्डस्य मध्यभूमिरेव मूलभूतानामार्याणामावासत्वेन परिकल्प्येत। ततश्च मध्येशियाखण्ड एव प्राचीनार्याणामावासभूः सिध्यति''। अत्र वदामः-सुवास्तु-सारस्वत-प्रदेशोऽपि इटाल्यादिप्रदेशेभ्यः किञ्चिदुत्तर-पूर्वगतः। ततश्च प्राचीनः प्रवादः प्राचामार्याणां सुवास्तुप्रदेशवास्तव्यत्वेऽनुकूल एव।

(५) 'हिमालयस्योत्तरभूभागः पवित्रतमः स्वर्ग इति लोकोत्तरमाहात्म्यवाही चेति भारतीयार्येषु सर्वतः प्रख्यातम्। तथा च तादृशोयमेशियामध्यभागः प्राचीनार्याणामादिनिवासः स्वत एव सिध्यति'। इदमपि व्यामोहनमात्रम्। आर्याः किल हिमालयस्य दक्षिणभागे (सुवास्त्वादिप्रदेशे) न्यवसन्निति पूर्वमवोचाम। तेहि तपः-साधनादिकृते हिमवदुत्तरभागं प्रायशोऽगच्छन्, लेभिरे च सिद्धिम्। अत एव हिमवदुत्तरभागे तेषां बहुमानः, न तु पूर्वपुरुषाणा-मावासभूमिरिति तेषां पावित्र्यबुद्धिः। लोकातीतमहिमा तु- उत्तराणां कुरूणामजेयत्वादिश्रवणादिति महाभारतादितो विदितमेव। हिमवत्पृष्ठस्य स्वर्गरूपत्वं तु पुराणेभ्यः प्रासिध्यत्। तत्रापि कारणमुत्तरत्वम्। आर्याणां मते उत्तरा दिग् देवभूमिः। दक्षिणा च याम्या (यमनिवासभूः)। ततश्च हिमवदुत्तरभूभागस्य पवित्रतामात्रेण नैषा प्राक्तनार्याणां निवासभूः संभवतीति विवेक्तव्यम्।

(६) 'कौषीतकिब्राह्मणे श्रूयते- 'उदीच्यां दिशि प्रज्ञाततरा वागुद्यते, उदञ्च उ एव यन्ति वाचं शिक्षितुम्, यो वा तत आगच्छति तस्य वा शुश्रूषन्ति इति हस्माहैषा हि वाचो दिक् प्रज्ञाता, इति एवं किल हिमवद्दक्षिणभागस्थितः कौषीतकब्राह्मणप्रवक्ता उत्तरभागस्थितानां निजपूर्वपुरुषाणामादिनिवासभूतामुत्तरां दिशं प्रशस्तवाक्शिक्षकत्वेन स्तौति' इति षष्ठोयमनुमान-हेतुस्तेषाम्। अत्रोच्यते न केवलमत्रैव, ऐतरेयब्राह्मणेऽप्येवं- विधा श्रुतिरुपलभ्यते। ऐतरेय-ब्राह्मणकाले च कुरुपञ्चालशिविसौवीरा आसन्मध्यदेशा इति पूर्वमावर्णितम्। ततश्च मध्य-देशस्थितः प्रवक्ता स्वापेक्षया उत्तरां दिशम्, अर्थात् उत्तरस्थितम् 'उद्यान' देशमेवमुपस्तौतीति सरलोऽयमर्थः। उद्यान-जनपदश्च काश्मीर-संनिहितः। उज्जानक इति व्यपदिष्टः सोयं विद्यानिवासत्वेन राजतरङ्गिण्यामन्यत्रापि च प्रशस्तः। अत एव विद्यानिलयस्यास्यैव सेयं स्तुतिः, किं नाम पश्चिमतोऽप्युत्तरमनुधावनेन?

(७) ''लोकं पुष्येम तनयं शतं हिमाः'' [शतं संवत्सरान् बालं तनयं पुष्याम इति तदभिप्रायः] इत्याशीर्मन्त्रः। हिमर्तुतः संवत्सरपरिगणनं तत्रैव युज्यते यत्र किल सदैव शीतस्या-तिशयः स्यात्। भारतीयप्रदेशेषु नैवम्। मध्येशियाप्रदेशस्थो वेलुर्ताग् मुशताग पर्वतयोरन्तरालभागस्तु तादृश एवेति स एव प्राचामार्याणामावासदेशः स्यादिति तेषां सप्तमो हेतुः। सम्यक्। हिमर्तुवाचक-हिमशब्देन संवत्सरपरिगणनात्, हिमशब्दस्याऽब्दवाचित्वेन व्यवहाराद्वा चेदस्मत्पूर्वपुरुषाणां शीतप्रधानदेशवासित्वमभ्यूह्यते तर्हि शरदृतुवाचिशरच्छब्देन संवत्सरपरिगणनात्, शरच्छब्दस्य वर्षवाचितया व्यवहाराद्वाऽस्मत्पूर्वपुरुषाणां शरदृतुप्रधानदेशवासित्वमपि कल्प्यताम्। अस्ति

तद्रूपेणापि श्रवणं बहुत्र। यथा- 'तिस्र यदग्ने शरदस्त्वामिद्' (ऋ.१-१२-६२), शतमिन्नु शरदो अन्ति देवा:' (ऋ.१-१४-६१), 'शतं नो रास्व शरदो....ऽश्यामायूँषि' (ऋ. २-३-२७), 'शतं जीव शरदो वर्धमान:' (तैत्तिरी.), 'पतिर्जीवति शरद: शतम्' (ऋ. १०-८६-३९) इत्यादि।

वस्तुतस्त्वेवंविधैरनुमानैरार्याणामौपनिवेशिकत्वसाधनं तदिदं स्थूलप्रायम्। न तावदार्या: केवलं शीतप्रधानदेशवास्तव्या:, न वा शरदृतुप्रधानदेशवासिन:। अस्ति हि तत्त्वमस्याऽन्यदेव। 'शरच्छृता अस्यामोषधयो भवन्ति, शीर्णा आप इति वा' (नि. ४-४-४) 'शृणाति (हिनस्ति) प्राणिन:' इति शरत्पदव्युत्पत्त्या शरदृतोरस्वास्थ्यकारित्वमासीदाचार्याणां संमतम्। ततश्च सैव वर्षस्यान्तममानि तै:। शरदृतुश्च यदा वत्सरस्यान्तावयवस्तदा हिमर्तु: संवत्सरस्यादि: सुतरां सम्पन्न:। एवं च वर्षगणनाप्रसङ्गे हिम-शरच्छब्दयोरन्यतरस्य प्रयोग: प्रचलित: प्राय: पूर्वेषाम्। शनैर्गौण्या वृत्त्या तयोरब्दवाचित्वमपि प्रसक्तमेव। एवं च वर्षपरिगणने हिमशब्दस्य प्रयोगमात्रेण प्राचीनार्याणां बेलुर्तागनिवासित्वजल्पनं नास्ति किं राजाज्ञामात्रमिति स्वयं विविच्यताम्।

(८) ''-'उत्तरं गिरिमति दुद्राव' (१-८-१) इति हि शतपथे प्रोक्तम्। 'उत्तरं गिरिम् हिमालयं 'अति' अतिक्रम्य 'दुद्राव' द्रुतगमनं कृतवान् इति तदर्थं कृत्वा पाश्चात्यपण्डिता: कथयन्ति यत् हिमालयमुल्लङ्घ्य द्रवणेनानेन स्पष्टं किल हिमालयोत्तरवासिनामार्याणां हिमालयमुल्लङ्घ्य भारते प्रवेश: सूचितो भवति। सोयमष्टमस्तेषां हेतु:। किन्तु सोयं हेतुर्व्या-मोहहेतुरेवाऽपक्वधियाम्। 'मा धर्मपुस्तकमधीष्व, चेत्वमपवित्र: इति कस्यचिद्धार्मिकस्योक्ति:' अत्र चेत् त्वमपवित्र: इति वाक्यखण्डं प्रलुप्य ''मा धर्मपुस्तकमधीष्व' इति सेयमाचार्याणामाज्ञा'' इति यथा प्रतारणमात्रं परिज्ञायेत तथा तदिदं कौतुकं नाम। यत्र किल तदिदं शतपथवचनं प्रोक्तं तत्र प्रसङ्ग एवाऽन्यादृश:। सोयं जलप्लावनस्य ('बाढ') प्रसङ्ग:। कदाचित् संभूते जलप्लावने आर्यावर्तीयसमुद्रादुत्थितो जलौघ: सहसा हिमालयस्य शृङ्गं यावदधिरुरोह। तत: शनैरुपशान्ते जलोपप्लवे स 'यथावदन्ववससर्प'। तत्र यदा जलौघ: निसर्गादधिकं जगाम तदा 'उत्तरं गिरिं' (हिमालयम्) 'अति दुद्राव' उचितादधिकं जगाम' इति प्रोक्तम्।

अत्र अधिकं गमनमेव प्रासङ्गिकोऽर्थो न तु उल्लंङ्घनम्। वेदार्थनिर्णायकेषु निरुक्तादिषु सर्वत्र अतेरभिपूजित एवार्थ:, न अतिक्रमणम्। यथा निरुक्ते- 'अति सु इत्यभिपूजिते' (१-१-५)। अत एव उक्तस्य 'अति दुद्राव' इत्यस्य 'अतिजगाम' (शृङ्गपर्यन्तं प्राप) इति भाष्यकृता हरिहरस्वामिनाऽर्थ: कृत:। इदानीं विचार्यताम्, अनेन शतपथखण्डेन प्राचीनार्याणां हिमगिरिमुल्ल-ङ्घ्य भारते पलायनं कथंकारमापतितम्'? अस्तु, यदि कदाचित् उल्लङ्घनमप्यर्थ: स्यात्तदापि, ये किल प्राचीनार्या: पाश्चात्यानामुक्त्यनुसारं हिमगिरेरुत्तरे बेलुर्ताग्प्रदेशेन्यवात्सु: तेषामार्याणां दृष्ट्या सोयं हिमालय: 'उत्तरगिरि:' आहोस्विद् 'दक्षिणगिरि:' स्वयमेतद्विचार्यं तैरेव। अत एव एवमेवंविधभूतलोपरिसंस्थिता सेयं भित्तिरवाङ्मुखं निपततीति क्षणं विचार्यतां विवेकिभिरेव।

## बालगङ्गाधरतिलकमहोदयस्य मतनिरासः

१. प्राचीनार्याः सुमेरुप्रदेशे-न्यवात्सुरिति तेन (बालगङ्गाधरतिलकेन) गवेषितम्। यतो हि- 'अमी य ॠक्षा निहितास उच्चाः.' इत्यादिॠङ्मन्त्रात् उत्तरस्थाः ॠक्षाः (सप्तर्षयः) शिरसि उन्नताः उत्तरदिग्गते मेरुप्रदेशे एव द्रष्टुं शक्यन्ते। अत एव एतन्मन्त्र- प्रवक्तृणामार्याणां सुमेरुपृष्ठे निवासः, इति तत्तात्पर्यम्। किन्तु नेदं तथ्यम्। ॠक्षपदस्य नक्षत्राण्येवार्थः, न सप्तर्षयः। ततश्च आकाशस्थानि नक्षत्राणि यथा मेरौ उच्चानि दृश्यन्ते तथाऽन्यत्रापि। उच्चैः पदेन मस्तकोपरिभ्राम्यमाणत्वं तु न केनचिदवगम्यते। अस्तु, ॠक्षपदस्य सप्तर्ष्यर्थे कृतेऽपि 'उच्चाः उत्तरस्थाः' इत्येवार्थः। उक्तं हि शतपथे- उत्तरा हि सप्तर्षय उद्यन्ति इति।

यदि च तात्त्विको विचारः क्रियेत तदा सोयं मन्त्रो (अमी य ॠक्षाः) वरुणविज्ञान-परः। वरुणस्तु रात्रिकालिकोऽधःस्थः सूर्यः। ततश्च वरुणराज (सूर्यविशेष) कर्तृकः सप्तर्षि-प्रभृतीनां चन्द्रमसश्च प्रकाशो मन्त्रस्यास्य भावार्थः। मेरुप्रदेशे च सूर्यविशेषस्य वरुणस्य अधःस्थितत्वेन सप्तर्षिप्रभृतीनां प्रकाशनं नोपपद्यते। अत एव सोयं मन्त्र आर्यावर्तवासिनामेवाऽऽ-र्याणामुक्तिः संगच्छते, न मेरुप्रदेशवासिनाम्।

२. 'ससूर्यः पर्यूरू वरांस्येन्द्र आववृत्याद्रथ्येव चक्रा' इति मन्त्रखण्डेन 'मस्तकोपरि-नक्षत्राणां रथचक्राकारेण भ्रमणं मेरुस्थानामेव दृग्गतं भवति' इति तदुक्तिः। किन्त्वस्य मन्त्रस्यार्थो मध्यस्थितस्य सूर्यस्याऽऽकर्षण-शक्तिसूचनम्।'इन्द्रः परमैश्वर्यादिगुणयुक्तः सूर्यः ऊरू (विस्तृते आकाशे) वरांसि पृथिव्यादिग्रहोपग्रहमण्डलानि आवृत्यात् आवर्तयति। कथम्?- 'रथ्या चक्र इव' यथा अक्षः मध्यस्थः सन् रथसंबन्धीनि चक्राणि (भ्रामयति)। ततश्च मध्यस्थित-सूर्याकर्षणशक्तितः सर्वेषां ग्रहोपग्रहाणामितस्ततोगमनं विक्षेपराहित्यं भ्रमणं चेति मन्त्रेणानेन सूच्यते, नान्यत्।'यो अक्षेणेव चक्रिया शचीभिः.' इत्यादिभिः स्थाने-स्थाने सूचितमिदं विज्ञानमग्रे।

३. अग्निष्टोमे प्रातरनुवाकः प्रातरेव पठ्यते। तस्य संख्या तु - 'सहस्रमनूच्यं स्वर्गकामस्य' इति। ततश्च सहस्रसंख्यस्यानुवाकस्य प्रातःकाले तदैव पाठो भवेद् यदा उषःकालो मासद्वयमितः स्यात्। उत्तरध्रुवप्रदेशे च षण्मासपरिमितो दिवसो भवतीति प्रातःकालो मासद्वय-मितः संभवतीति बालगङ्गाधरोक्तिः। किन्तु तत्त्वतो विचारे प्रातरनुवाकस्य सर्वदिवापाठ्यत्व-श्रुतिः- 'उदित आदित्ये प्रातरनुवाकमनुब्रूयात्' सर्वं ह्यैवैतदहर्दिवाकीर्त्यं भवति' (ऐत. ४-३-४)। अवश्यं प्रातः पाठ्याः स्वल्पा ॠचः, ता ह्यादौ प्रारभ्यन्ते इति नामधेयस्यान्वर्थता। किञ्च सुमेरुप्रदेशीयोषसो दीर्घत्वं किमार्यावर्तवासिनामस्माकं दृष्ट्या, अथवा तत्रत्यानाम्? अत्रत्यानां दृष्ट्या इति चेत्, अस्मत्कृतेन दीर्घत्वेन पूर्वकालिकार्याणां सुमेरुवासः कथं साध्यः? अथ तेषामिति चेत्, सर्वदा येषां दीर्घम् उषो भवति कथं तैस्तस्य दीर्घत्वं प्रत्येयम्? दीर्घत्वं ह्यापेक्षिकम्। यावत्किल लघुर्द्वितीय उषःकालो न दृश्यते तावत्तस्य दीर्घत्वं कथं प्रत्येयम्। किञ्च यदि प्रातरनुवाकस्य पाठो द्विमासात्मकस्तर्हि प्रातस्सवन-माध्यन्दिनसवनतृतीय-सवनानां कालाः कीदृशा मन्तव्याः? संवत्सरकालश्च कीदृशः? अथ दीर्घौषसि सुमेरावेव प्रातरनुवाक-

पाठस्य संभवस्तर्हि युधिष्ठिरादिभिरार्यावर्तवासिभिरनुष्ठितेऽश्वमेधादिषु प्रातरनुवाकपाठो न बभूवेति मन्तव्यं स्यात्।

'तानीदहानि बहुलान्यासन् या प्राचीनमुदिता सूर्यस्य' (ऋ. ७-७६-३) इति मन्त्रेण उषसः कतिदिनव्यापित्वं यत्साधयितुं वाञ्छितं तदपि न, अनेन दिनानामानन्त्यमात्रं गम्यते न दीर्घत्वम्। किञ्च उषः शब्दस्य बहुवचनान्तप्रयोगेण 'इमा एव ता उषसो.' इत्यादिषु यद्दैर्घ्यमुषसः साध्यते तदपि मनोरथमात्रम्। पूर्वपरसन्दर्भेण मन्त्रः सोयं पुनर्जन्मविषयो नोषसो दीर्घत्वविषयः [दर्शितः पूर्वापरमन्त्रपाठस्तत्र]।

४. सुमेरुवासिभिर्दक्षिणस्यां सूर्यस्योदयो दृश्यते स्म। अत एव 'पुत्रश्चरति दक्षिण' इति दक्षिणदिक्पुत्रः स प्रोक्तः। एतदपि यत्किञ्चित्। उत्तरपदस्य ऊर्ध्वमर्थो वेदे। तथा च 'ऊर्ध्वस्थः सूर्यः, दक्षिणा अर्थात् अधस्था पृथिवी' इत्येव तदर्थः। किञ्च न दक्षिणायामुदयः येयं दिगस्माकं पश्चिमा, सैव सुमेरुवासिनां दक्षिणा। यस्यां सूर्य उदेति तस्या एव पूर्वत्वनियमात्।

५. ''सप्तर्षिहस्तावचितविशेषाण्यधो विवस्वान्परिवर्तमानः'' इति कुमारपद्यं यत्प्रमाणत्वेनोद्धृतं तत्तूपहास्यमेव। एतद्धि अद्ययुगीयेन 'अस्त्युत्तरस्या' मिति वर्तमानकाल-वादिना कालिदासेनोक्तम्। किं तस्यापि सुमेरु-प्रदेशवासित्वम्?

६. वैदिकमन्त्रेषु 'नवग्वा' 'दशग्वा' इतिपदस्वारस्यात्, नवमासात्मको दशमासात्मको वा वत्सरो गम्यते। एतादृशं वर्षं नास्मत्प्रदेशे। सुमेरौ संभवत्येवं वर्षमिति तत्रैवादिमानां निवासः सिध्यतीति यदुक्तं तदपि निर्बीजमेव। सुमेरुप्रदेशे नवमासात्मकः संवत्सरः? दशमासात्मको वा? यदि नवमासात्मकस्तर्हि 'दशग्वा' इत्यस्य का गतिः? अथ दशमासात्मकस्तर्हि 'नवग्वा' इत्यस्य का उपपत्तिः? उभयविधमेव वर्षमिति चेत्, विरुद्धयोर्द्वयोः कथमेकत्र समावेशः? किञ्च, अस्माकं वत्सरो भूभ्रमणजन्यः, तेषां कथम्? अस्माकमब्द एव तेषामेकं दिनमिति चेत्, तर्हि तादृशैः कतिभिर्दिनैर्मासः, कतिभिश्च वर्षम्? एवं सति शतायुर्वै पुरुषः, इत्यस्मादेत-दृष्ट्या परिगणने कथं सिध्येत्? किञ्च 'नवग्वा' पदेन नवमासात्मकः, 'दशग्वा' पदेन दशमासात्मकः साध्यते तर्हि यत्र 'शतग्वि' पदं श्रूयते- ''शनिश्चिदन्तो अद्रिवोऽश्वावन्तः शतग्विनः०' इत्यादि, 'आ न इन्दो शतग्विनम्' (ऋ ९-६७-६) इत्यादि। तत्र किं शतमासात्मकं वर्षं वक्तव्यं स्यात्?

तिलकेन सिद्धान्तितं यद्वेदे देवयानशब्दात् सूर्यस्य सुमेरुयानम् (उत्तरायणम्) अवगम्यते, पितृयानशब्देन च सूर्यस्य कुमेरुगमनम् (दक्षिणायनम्) प्रतीयते। ततश्च सुमेरुप्रदेशेषु देवयाने दिनं सम्पद्यते, पितृयाने च रात्रिः। तथा च देवयान-पितृयान-शब्दान्विता अमी मन्त्राः सुमेरुप्रदेशेष्वेव निवसद्भी रचिताः। एवं च वैदिकानामार्याणां तत्रैवादिनिवासः सुतरां सिध्यतीति। तदिदं मार्मिकदृष्ट्या समीक्षणीयं नूनम्। उत्तरायणदक्षिणायने भूमध्यभागस्थितेनैव नूनं सम्यक् परिदर्शनीये। उत्तरकेन्द्रे दक्षिणकेन्द्रे वा समवस्थितानामेकपार्श्वगामितया अपरपार्श्वगता अयनगतिर्न सम्यक्तया परिलक्षणीया। तथा च देवयान-पितृयानाभ्यां दिवारात्र्योराविष्कारस्य

सुमेरुप्रदेशे कथं वा स्वारस्यम्?

वस्तुतस्तु 'देवाः' द्युस्थाः अश्विप्रभृतयो 'यान्ति' गच्छन्ति येन मार्गेण स एव भूमण्डलादिभ्रमणमार्गो देवयानाख्यः। पितृस्थानानां चन्द्रमण्डलादीनां भ्रमणमार्ग एव पितृयानम्। किं वा अन्तरिक्षस्य यमनामक-वायु-विशेषाधिकृतं चन्द्रलोकम्, अपरं वा तत्संनिहितं पितृलोकं त्यक्तस्थूलदेहा अर्चिरादिसहाया गच्छन्ति येन मार्गेण स एव पितृयानाख्यः, सर्वेषां मन्त्राणां तथैव संगतेः। ततश्च तिलकोद्भावितः सर्व एव मनोरथो मनस्येव जीर्यति।

किञ्च-देवानामेकैकवर्षात्मके रात्र्यहनी भवतः, अनेनापि आर्याणामादिनिवासः सुमेरौ साधयितुमिष्टस्तेन। परं देवानामित्यस्य 'सुमेरुवासिनां मानवानाम्' इत्यर्थावगतौ किं मानम्? मनुसंहितादौ अस्मत्संवत्सरकालमितं देवानां दिनमित्यवश्यमुक्तम्, परं न तत्र सुमेरोर्गन्धोपि। एवं सुमेरुवासिनां देवत्वं महाभारतादिनाऽवगतं किन्तु न तत्र देवानां मास-ऋतु-अयन संवत्सरादियानमभिहितम्। ततश्च ज्ञातव्यमेव यत्सुमेरुप्रदेशीयस्थले दिनमासर्त्वादिमानं कीदृशम्? परिमाणं च तेषामब्दमानतः, अथवाऽस्माकम्? वस्तुतस्तु सुमेरोर्देवलोकत्वं यद्वर्णितं महाभारतादौ तत् आपेक्षिकम्। यथेह सौरे जगति भूलोकान्तरिक्ष-द्युलोक विभागाः, तथैवाऽस्मच्छरीरादिष्वपि। अग्नि-वायु-सूर्याणां प्रधानतो भू-आदीनि स्थानानि। ततश्च भुवि तेषां सत्तायाः का कथा, भौमपदार्थेष्वस्मच्छरीरादिष्वापि तथैव तेषां त्रयाणां देवानां सत्तां स्वीकुर्महे। तथा च-यथाऽस्य सौरजगतः ऊर्ध्वभागे स्वर्गस्थितिस्तथैवास्यां पृथिव्यामपि मध्यादिदेशापेक्षया ऊर्ध्वभागस्थाः काश्मीरादिदेशाः स्वर्गाः। तत ऊर्ध्वस्थाः कैलास-गन्धमादनादयः काश्मीरस्थानां स्वर्गाः। ततोऽप्यूर्ध्वस्थाः सुवीर्यादि (साइबीरिया) प्रदेशाः कैलासादिवासिनां स्वर्गाः। ततोऽप्यूर्ध्वतनः सुमेरुप्रदेशः सर्वभूवासिनां स्वर्गः तदित्त्थं सुमेरुप्रदेशस्याऽऽपेक्षिकदेवनिकेतनत्वे स्वीकृतेऽपि तत्र आद्यानामार्याणामावास आसीदिति कथंकारं सिध्येत्?

## किमार्या बहिर्देशेभ्योऽत्र समायाताः?

आर्या भारते मध्यैशियादेशादागत्य, अत्रत्या अनार्यजातीर्विजित्य देशेस्मिन् न्यवसन्निति पाश्चात्यानां तथाकथितः शोधो यद्यपि भारतीयैरन्यैश्च शोधविद्वद्भिः साधु परीक्ष्य खण्डितः, नाऽधुना तस्य मान्यता विश्वस्य मूर्धन्य-विद्वत्सु, तथापि तस्य किंचिद् विवेचनं, तद्गत-भ्रामकमान्यतानां खण्डनं चाऽस्माभिः प्रबन्धेऽस्मिन् विहितं प्रसङ्गवशात्। एतद्विषये आधुनिकान्वेषकाणां यानि मतानि तान्यप्युद्धृतानि। अस्मिन्नेव प्रसङ्गे कतिपयान्यभिमतानि पुनर्विवेच्यन्ते। नीरजाकान्त चौधरी देव शर्मणा १९६१ तम ख्रिष्टीयवत्सरस्य भादपद मासे गोरखपुरीय 'कल्याण पत्रे' महता समारोहेण साधितं यत् ''आर्याणां बहिर्देशेभ्यः समागत्य भारते प्रवेशस्य कथा सर्वथा मिथ्या'' इति । स हि लिखति-''आधुनिक पाश्चात्त्यमतानुसारं भारतेतिहासः ३३० ई. पूर्वतः, अर्थात् दिग्विजयिनः सिकन्दरस्य भारताऽऽक्रमणात्प्रारभ्यते। इतः पूर्वस्य तु यत्किञ्चिज् ज्ञानं तद्धि इतिहासनाम्ना न व्यपदेष्टुं शक्यते। अत एव सिकन्दरस्य

मृत्योरनन्तरं तदीयसेनापतिना सेल्यूकसेन पश्चिम-एशियाप्रदेशे साम्राज्यमभूत् स्थापितम्। तेषां राजदूतः सोयं मेगास्थानीजः ३०४ ई. पूर्वं मौर्यसम्राजश्चन्द्रगुप्तस्य राजसभायां किञ्चित्काल-पर्यन्तमतिष्ठत्। तेन हि एको यात्रावृत्तान्तः समभूल्लिखितः। तस्यैव हि उपलब्धेभ्यः अंशेभ्यो निम्नाङ्कितं वृत्तमुद्धृतं पाश्चात्यैः। मेगास्थनीजः कथयति-''समस्तोऽपि भारतदेशः एको विराट्देशः, यस्मिन् हि विभिन्न विभिन्न जातीनां लोकाः सुखं निवसन्ति। एषां मध्ये एकोऽपि जनो मूलतो विदेशिवंशोत्पन्नो नास्ति। मार्मिकेण सुस्पष्टं ज्ञायते यत् सर्वेऽपि भारतीयाः आदिमभारतवासिनां वंशधराः। एतदतिरिक्तं भारतेऽस्मिन् वैदेशिकलोकानां कदापि कश्चिदुपनि-वेशो नाऽभूत् स्थापितः। न च भारतेनाऽपि विदेशे गत्वा कश्चिदुपनिवेशः स्थापितोऽभूत्।''

आधुनिकानाम् पाश्चात्त्य-ऐतिहासिकानां मतानुसारम् अनुमानतः २५०० वर्षाण्यारभ्य १५०० ई. वर्षपूर्वम् यावत् आर्यजातीयं दलम् उत्तर-पश्चिम सीमान्तमार्गेण भारतेऽस्मिन् प्राविशत्। आगत्यैव च तेन एतद्देशनिवासिनः द्रविड-कोल-भील जातीयान् विजित्य क्रमशः स्वीयोपनिवेशः स्थापितः। इमे आर्याः हिन्दू-पारसी-काकेशीय-ग्रीकप्रभृति यूरोपीयजातीनामासन् पूर्वजाः। भारताद् बहिः कस्मिन्नपि स्थाने एतेषां प्राचीना निवासभूमिरासीत्।

यदि तदिदं सत्यं तर्हि भारतेऽस्मिन्नभियानमार्याणां, मेगास्थनीजस्य भारते आगमनात् प्रायः १२०० वर्षपूर्वं निश्चितमभूत्। किन्तु मेगास्थनीजः प्रबलतया साधयति ''यत् भारतस्य एकमात्रस्यापि पुरुषस्य पूर्वपुरुषाः भारताद् बहिस्तो न समागताः, न च भारतेऽस्मिन् वैदेशिकजातेरुपनिवेशः कदाचित्स्थापितोऽभूत्''।

मेगास्थनीजः सोयमुच्चपदस्थः, निरपेक्षः, बुद्धिमांश्च, पुरुषोऽभूत्। तस्य संमतिरु-पेक्षणीया न नाम सिध्येत्। तन्मतस्य अन्यान्येषामंशानां विचारे कृते निश्चेतव्यं स्याद् यदयं भारतेऽवश्यावश्यं किञ्चित्कालं स्थितो भवेत्। तद्विवरणस्य भूयस्यो वार्ताः सर्वथा विश्वास्याः सिध्यन्ति। बहूनां विषयाणामुपलभ्यन्ते प्रमाणानि। अत एव हृदि विश्वासो भवेद् यदेतास्य कृतं विवरणं प्रायः पक्षपातशून्यमेव भवेदिति।

प्रथमम्-अद्यतः २३०० वर्षेभ्यः पूर्वं भारतेऽस्मिन् न कोऽपि तदिदमजानाद् यद् भारतीया आर्याः (वैदिकाः) बहिर्देशेभ्यः समागता भारतेऽस्मिन् इति। प्रत्युत सर्वेषामयमेव निश्चयोऽभवद् यद्- प्रत्येकं भारतवासी भारतस्याऽऽदिम-निवासिनां वंशजः इति।

द्वितीयम्- बहिर्देशादागतया कयाचिदपि जात्या भारतेऽस्मिन्नाद्यावधि उपनिवेशः स्थापितः। अर्थात् भारतमिदं विदेशीय लोकेभ्यः कदापि नाऽभूत्पराजितम्। सदैव स्वाधीनं समभूत्।

तृतीयम्- भारतेनानेन द्वितीये राष्ट्रे न कदाचिदुपनिवेशः स्थापितः। अर्थात् देशेनाऽनेन अपरस्य राज्याऽपहरणस्य न कदाचिदपि चेष्टा कृतासीत्। इदं हि भारतीयराजनीतेश्चिरन्तनधाराया

अनुरुपमासीत्। एतदतिरिक्तम्-भारताद् बहिः, समीपस्थेषु देशेषु वैदिकी जातिः, वैदिकी सभ्यता च तस्मिन् समये सुस्थिताऽऽसीदिति पुरातनेतिहासानामालोचनया निश्चेतव्यं भवेत्।

'भारतीया वैदिकजातिरस्मिन् देश एव समुत्पन्नेति' यदि सत्यं, तर्हि सुतरामिदं सिध्यति यद् भारतेऽस्मिन्नार्याणामभियानं न कदाचिदभूत्। यद्येवं न स्यात्तर्हि एकसहस्रवर्षाणामभ्यन्तरे एव आर्याणामभियानमिदं (मेगास्थनीजस्य समये) पूर्णतया विस्मृतं नाऽभविष्यत्।

'वैदिकजातेः (अर्थाद् भारतीयानाम्) स्मृतिशक्तिरेव दुर्बला' इति सेयं वार्ता नाद्यावधि केनचिद् वैदेशिकेन (विपक्षेण) प्रमाणैः साधिता। प्रत्युत-ये जनाः सहस्रसहस्रवर्षावधि-वंशानुक्रमेण समग्रा अपि श्रुतीः (वेदान्) अन्यान्यानि च शास्त्राणि सम्यक् प्रकारेण कण्ठस्थान्य-कुर्वन्, तेषां स्मृतिशक्तिः कथं नु दुर्बला स्यात्? एवं- विधाः पण्डिताः साम्प्रतमपि दक्षिणप्रान्ते विद्यमानाः सन्ति येषां सर्वा अपि वेद-संहिताः कण्ठस्थाः सन्ति। पूर्वस्मिन् समये श्रुतधराः कवयः, पण्डिताश्च भूयांसोऽभूवन्। स्वल्पस्यैव समयस्य सेयं घटना यत् पण्डितराज-जगन्नाथतर्कपञ्चाननेन गङ्गातीरे द्वयोर्गौराङ्गयोः (आङ्गलयोः) परस्परविवादः श्रुतोऽभूत्। तयोर्भाषां नासौ पण्डितो जानाति स्म। तथापि न्यायालये तस्य पण्डितस्याह्वाने कृते साक्षिरुपेण तयोर्वैदिशिकयोर्विवादस्य अविकलमावृत्तिः कृताऽभवत्। सेयं वार्ता सर्वतः प्रसिद्धा। शतावधानिनः पुरुषा भारते अद्यावध्यापि न भवेयुर्दुर्लभाः। (भारतमार्तण्डोपाधिधारिणः श्री गट्टूलालाजीति प्रसिद्धास्तैलङ्गब्राह्मणा जन्मान्धा अपि, शतावधानिनः किम्, सहस्रावधानिनः आसन्, येषां स्मृतिशक्तेश्चमत्कारः आङ्गलशासनेऽपि सहस्रसहस्रजनानां प्रकाण्डसभासु सर्वतः सुपरीक्षितोऽभवत्। इति जानन्ति भारतस्य सर्वेऽपि प्रान्तदेशाः।)

**विशेषतः**- पूर्वकाले पितृकार्यमपि देवकार्यवत् विशेषावश्यकं परिगण्यते स्म। वर्तमानसमये माता-पित्रोः वार्षिकं श्राद्धमपि न बहुभिः क्रियते, किन्तु पूर्वम् [शतवर्षेभ्यः पूर्वमेव] प्रत्येक-अमावस्यातिथौ बहवः पितृश्राद्धमकुर्वन्। तर्पणं तु नित्यकर्मैव। अत एव पूर्वतना भारतीयाः निजपूर्वपुरुषाणां नामानि, तद्वृत्तान्तांश्च यथावत् स्मरन्ति स्म। अश्वमेधयागे ये ऋत्विजो व्रियन्ते स्म, तैरेव पूर्वतनचतुर्दशपुरुषपर्यन्तानां नामान्युच्चारणीयान्यभवन्। अद्यावध्यपि घटकब्राह्मणाः (विवाहसंसाधकाः) चतुर्दश-पुरुष-पर्यन्तं वंशावलिं सम्यक्तया समुपस्थापयन्ति। राजपुत्रप्रान्ते विवाहाऽवसरे वर-कन्यापक्षयोरुभयोरेव पुरोहिताः चतुर्दशपुरुषपर्यन्तां वंशावलिम् [कुत्रचित्कुत्रचित् चत्वारिंशत्पुरुषपर्यन्ताम्] अद्याऽपि वर्णयन्ति। तदिदं कर्म 'शाखोच्चार' नाम्ना प्रख्यायते। पुरा भारते अकालमृत्युर्न सहसाऽभवत्। साधारणतया शतवर्षात्मके काले त्रयः पुरुषा निश्चेतुं शक्येरन्। ततश्च चतुर्दशपुरुषानुक्रमे प्रायः ४६६, चत्वारिंशत्पुरुषानुक्रमे च १३३३ वर्षाणि संभवन्ति। अर्थात्-साधारणतया शतशतवर्षाणां पारिवारिकमितिहासं जनास्ते परिजानन्ति स्म। निवासस्थानान्यपि तेषां स्मरणात् न प्रच्यवन्ति स्म।

भारते गताः कतिचन शताब्द्यो झंझावातविध्वस्ताः, अन्धकारमयदुर्युगरूपे व्यतिगताः,

यासु माहम्मदाः पठानाः मोगलाश्च भारतमाक्राम्यन्। ततः आङ्ग्लानां पराधीनतादुःखम्, तत्कृतोऽपमानश्च सहनीयोऽभवत्। अस्यां नारकीयध्वंसलीलायां, निरंकुशशासनजनितैरत्याचारै-र्वैदिकसभ्यतायाः मूलमेव कम्पितमभूत्। देवमन्दिराणि, शास्त्रग्रन्थानां भण्डागाराणि सर्वतो विध्वस्तान्यक्रियन्त। प्रचारकाणां समग्राणि कुलान्येव व्यनाश्यन्त, विधर्मिणो वा निरमीयन्त। एवं भयङ्करवात्यायां परितः प्रचलितायामपि मर्मान्वेषिणः सूक्ष्मरुपेण द्रष्टुं शक्नुयुर्यत् सहस्रवर्ष-पूर्वतनानां कुलपतीनां नामानि, तेषामन्येभ्यः प्रदेशेभ्यः समागमनस्य वार्ताः तत्पुरातनेतिहासश्चापि विस्मृतिगर्भे नाद्यापि विलुप्तानि। काचिदपि सुसभ्या जातिः शतसहस्रवर्षेषु व्यतिगतेष्वपि स्वीयस्य आदिमप्रदेशस्य प्रियां कथां विस्मरेदिति न कदाचित्संभवति। वर्तमाना यहूदीजातिरेतस्य निदर्शनम्। वर्तमानानां यहूदिनां संख्या एककोटितोऽपि न्यूना। द्विसहस्रवर्षेभ्यः पूर्वतनकालादेव [७० ई. तदपेक्षयाऽपि ६०० वर्षेभ्यः पूर्वत एव] ते स्वदेशान्निर्वासिताः, समग्रे संसारे च व्याप्ताः, परं किं ते एकदिनार्थमपि निजं पूर्वदेशं 'पैलेस्टाइन' क्वापि विस्मृतवन्तः ? एतस्याः स्वदेशनिष्ठायाः प्रभावेणैव यहूदीजातिः सेयं प्रथममहायुद्धादनन्तरं स्वीये 'पैलेस्टाइने'-- स्वाधीनं राज्यं स्थापयितुमभवत्समर्था। बहुसंख्यका यहूदीजातीयास्तत्रैव सन्ति साम्प्रतं परावृत्ताः।

यदि सेयमार्यजातिः सत्यसत्यं २५००-१५०० ई. पू. एतन्मध्यकाले बहिर्देशाद् भारते समागताऽभविष्यत्। तर्हि परम्परातः सेयं कथा कर्णाकर्णिकया, मुखामुखि वाऽवश्यं प्रचारिताऽभविष्यत्। सहस्रवर्षान्तराले एव सेयं विस्मृता भवेदिति नासीत्संभवपरम्। शतवर्षेभ्यः पूर्वम् 'एलफिन्स्टनः' स्वीये भारतेतिहासे मेगास्थनीजस्य तामिमामुक्तिं समुद्धृत्य लिखति-भारतीयहिन्दूनां पूर्वजाः कदाचिदपि वर्तमानमाधुनिकं निजनिवासं विहाय कस्मिंश्चिदन्यस्मिन्देशे न्यवसन्तीति स्वीकारस्य न किञ्चित्कारणम्। वेदे, मनुस्मृतौ, मनुतः पूर्वतने अन्यस्मिन् वा ग्रन्थे, हिन्दूजातिपूर्वनिवासभूमेर्न कश्चिदुल्लेखः।

यस्मिन् समये एल्फिन्स्टनेन तदिदं लिखितं, तावत्पर्यन्तं भारते आर्यजातेरभियानस्य सेयं सुकृत्रिमा कथा नाभूत्संघटिता। मैक्समूलरादीनां गवेषणाप्रारम्भस्याऽप्यासीन्महाविलम्बः। अहह! आधुनिकेषु इतिहासेषु, केषुचित् तत् सम्बन्धिपुस्तकेषु वा, मेगास्थनीजस्य एतस्या उक्तेरुल्लेखपर्यन्तमपि नोपलभ्यते, एतस्येदमेव सुस्पष्टं कारणं यत् बहिर्देशात् आर्याणां भारतेऽभियानस्य सेयं कथा मेगास्थनीजस्योक्तेः सुस्पष्टं विपरीता, राजनैतिकैः कल्पिता।

## वेदेषु तत्सम्बन्धिशास्त्रेषु आर्याणामभियानस्य क्वापि नोल्लेखः

वेदसंहितायामाध्यात्मिकोपासनाया मन्त्राः। वर्तमानसमये उपलभ्यमाने ऋग्वेदस्यांशे १०१७ संख्या मन्त्राः। एषु केवलं चत्वारिंशन्मन्त्रेषु पार्थिवभावः, सभ्यताविषयकः कश्चित्सङ्केत-श्चानुमीयते गवेषकैः। एते मन्त्रा यदि ऐतिहासिकगवेषणाया भूमिकारूपा अपि चेन्मन्येरंस्तथापि भारते आर्याणामभियानस्य सूचिका काऽपि युक्तिर्गवेषकैर्नोपलब्धा। डॉ. कीथमहोदयो वेदस्य

भारतीयस्य ऐतिह्यस्य च विषये सर्वतो विख्यातः सुमहान् गवेषको मन्यते। महाभागेनाऽनेन विषयेऽस्मिन् यत्किल समीरितं तद्धि सुतरां विचारणीयम्। स हि लिखति– ''अभियानस्य विषये यानि प्रमाणान्युपन्यस्यन्ते तेभ्यः कस्यचित्सिद्धान्तस्य निर्धारणे महत्या मार्मिकताया आवश्यकता। किन्तु तदिदं निश्चितप्रायं यद् वैदिका भारतीयाः केन प्रकारेण भारते प्रविष्टा एतन्निर्धारणाय ऋग्वेदस्य न काचित् सहायता। केवलं जनैरनुमीयते यत् अभियातृदलीया जना हिन्दुकुशघाट्या भारते कदाचित्प्रविष्टाः स्युः, ततश्च पञ्चाम्बुप्रदेशे भूत्वा पूर्वदिशि प्रसृता भवेयुः। यदीदमनुमानं सत्यमपि स्यात्तथापि ऋग्वेदे आर्याणामभियानस्य छायामात्रमपि नोपलभ्यते इति वाच्यं स्यात्। (वेदस्य बाह्योऽर्थः)।

अधिकांशतः, उत्साहिभिः पाश्चात्त्यगवेषकैर्न कदाचिदपि भारते पदार्पणमपि कृतम्। केवलं कोषस्य सहायतया वेदानामर्थस्तैरूहितः। तेषां मध्ये–कैश्चित्पाश्चात्त्यैः आर्याणाम–भियातृदलस्य भारते आदिमनिवासिभिः अनार्यैः सह युद्धस्येतिहासो नूनं गवेषितः। किमधिकम् –''तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम्'' इति कोटिकोटिभारतीयाः सहस्रसहस्रवर्षेभ्यः प्रतिदिनमनेकान् वारानावर्त्तयन्तोऽपि नानेन किञ्चित् ऐतिहासिकं तत्वं कदाचिदपि प्राप्तवन्तः। श्राद्धे उपयुज्यमानात्–''इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्----'' इति मन्त्रादपि केनचित् केनचिद् गवेषकमहाभागेन आर्यजातेरादिनिवासः, अभियातृदलस्य नेतृणां नाम–धामादिकम्, किं बहुना, भारते आगमनस्य समये मार्गे आगतानां कतिचित् स्थानानां, विश्रामस्थलानां च सङ्केतो महता प्रयत्नेनान्विष्टः। अपूर्वेणाऽनेन आविष्कारेण अन्धकारगर्भात् प्रकाशप्रापणस्य सेयं कृपा आर्यसन्तानानामुपरि कृता।

ये महाभागा एतेषामाधारेण निरायासमेव दुरवगाहेऽपि वैदिकसाहित्ये स्वमनीषानुकूलं मन्तव्यं निर्धारयन्ति तैर्मार्मिकसमालोचकस्य कीथमहोदयस्य कथनं सूक्ष्मदृष्ट्या विचारणीयम्। ऋग्वेदे आर्यशब्दस्य त्रिषु स्थानेषूल्लेखः। किन्तु एतस्य अर्थो जातिवाचकः कुत्रापि नास्ति [१-१०३-३, ६-२५-२, १०-६५-११]। अस्तु, विषयेऽस्मिन् भूयसी आलोचना सुसम्भवा, किन्तु तदिदं निश्चितप्रायं यत् वेदे वेदसम्बन्धिशास्त्रेषु, किं बहुना विराट् संस्कृतसाहित्येऽपि आर्याणां बहिर्देशेभ्य उपगमनस्य, अन्यस्या जातेरागमनस्य वा, आर्याणां पूर्वस्थानस्य वा सङ्केतमात्रमपि नोपलभ्यते।

देशस्य सर्वेऽपि शिक्षिता जानन्ति यत् चत्वारिंशद्वर्षेभ्यः पूर्वं सिन्धुदेशस्य 'मोहनजोदडो' 'हडप्पा' इति स्थलयोरतिप्राचीनसभ्यता अनुसन्धानेन पुरातत्त्वविद्भिरन्विष्टा। पुरातत्त्वविदां निर्णयो यत् इमौ जीर्णावशेषौ न्यूनात्न्यूनं ३००० वर्षाणाम् ई. पू. पुरातनौ। पाश्चात्त्यगवेषकैरद्यावधि निश्चयः कृतोऽभूद् यत् भारते आर्याणां प्रथमप्रथममभियानं २५०० ई. पू. प्रथमं नाऽभूत्। परं सिन्धुदेशस्य अनेनान्वेषणेन पाश्चात्त्यकृतं सर्वमप्यन्वेषणं विपरीतं पर्यवस्यति। 'मोहनजोदडो हडप्पा' स्थानयोः प्राचीनावशेषौ यदि आर्यसभ्यतायाश्चिह्नानि निश्चीयन्ते तर्हि पूर्वनिश्चिता आर्याणां भारतेऽभियानस्य कथा नितान्तं दुर्बला सिध्यति। यतो हि पाश्चात्यानां मतानुसारं

२५०० (ई.पू.) वर्षेभ्य: पूर्वं भारतस्याऽधिकारिण: असभ्या: ('कोलभिल्लादय:') आसन्।

मन्ये गूढनीतेरनुसारं 'मोहनजोदडो' सम्बन्धिनी सभ्यता, सिन्धुसभ्यता नाम्ना अत एव प्रसिध्यते, अर्थात् सेयम् 'आर्यसभ्यता' नास्ति, अपितु- 'सिन्धु उपत्यकाया: सभ्यता' (Indus valley civilization) इति नाम्ना पृथक् क्रियते। 'गार्डन चाइल्डस्य' अभिमतमस्ति यत् सेयम् आर्याणां सभ्यता नास्ति, अपि तु भारतस्य कस्याश्चन प्राक्-आर्यजाते: सम्बन्धिनी।

एतदतिरिक्तम् मध्यभारतेऽपि 'महेश्वरे' (प्राचीन माहिष्मती) अन्यान्यस्थानेष्वापि प्राचीनतमानां ध्वंसावशेषाणां क्रमश: आविष्कारो जायमानोऽस्ति, अग्रे भविष्यति च। तर्हि निश्चितमनुमीयते यत् एतेषां स्थानानां सभ्यताम् आर्यसभ्यतात: पृथक् कर्तुम् 'नर्मदा-उपत्यकाया: सभ्यता' 'गाङ्गेय सभ्यता' इत्यादि नामकरणस्य मन्ये आवश्यकता भवेत्।

## सिन्धूपत्यकाया: सभ्यता वैदिकी

'मोहनजोदडो' इत्यादि स्थानेषु खननकार्यमसम्पूर्णम्। तत्र मुद्रादि (सील) षु या लिपिरुपलब्धा, तस्या: पाठोद्धारो नाधुनाऽपि जात:। अत एव निश्चितरूपेण न किञ्चित् सिद्धान्तयितुं शक्यते, किन्तु ''सेयं सभ्यता वैदिकी'' इति साधयितुं पर्याप्तानि प्रमाणानि। पाश्चात्यैरन्वेषकैरेव तदिदं तथ्यं सर्वात्मना स्वीकृतम्-

१. 'मोहनजोदडो' स्थाने नासाग्रदृष्टि-मूर्तयो बहुश: प्राप्ता:। नासाग्रदृष्टि:, किं वा भ्रूमध्यदृष्टि: सेयं भारतीययोगविद्याया: सुप्रसिद्धमङ्गम्। अवैदिकसभ्यताया: कलाकारा: (ग्रीक, रोम आदि देशेषु) इमामन्तर्दृष्टिं न परिचिन्वन्ति। चीन-जापानादि देशेषु ध्यानासीनासु बुद्धमूर्तिषु सेयं दृष्टि: प्राय: प्राप्यते, किन्तु ''तदिदं बौद्धमतं भारतीयस्य वैदिकधर्मस्यैव शाखा'' भारतादुद्भूतो वा धर्म इति हि पाश्चात्त्या अप्यङ्गीकुर्वन्ति।

२. पशुपतिमूर्ति:- वेदेरुपरि योगासने स्थिता त्रिशिरा: एका साधकमूर्ति: प्राप्ता, यस्या: समन्तात् अनेके पशव: परिवेष्ट्य स्थिता:। अन्वेषकस्य सर जोन मार्शलस्याभिमतं यत् सेयं 'पशुपति' मूर्ति:। एवं न चेत्तथापि, आसनस्य व्यवहार: अवैदिकीषु जातिषु न कुत्रचिद् दृष्ट:।

३. 'मोहनजोदडो'- हडप्पेति द्वयोरपि स्थानयो: जीर्णावशेषेषु बहूनि लघु-दीर्घाकाराणि शिवलिङ्गानि प्राप्तानि। सेयं लिङ्गपूजा वैदिकी। पाश्चात्यधर्मप्रचारका: ('मिश्नरी') चिराद् घोषयन्ति-'सेयमश्लीला। सेयमनार्येभ्यो गृहीता किन्तु ''प्राग्-वैदिक्यां कस्याञ्चिदनार्यजात्यां सेयं प्रचरिता- भूदिति'' बहुनाऽन्वेषणेनाऽपि न साधयितुमशक्यत विरोधिभि:। केवलं मौखिक: प्रवाद:। विन्टरनीजस्य मतम्-'शिवलिङ्गपूजायां न काचिदश्लीलता। प्राचीनसभ्यताया: सुप्रसिद्ध आलोचक: डॉ. ड्यूरान्टमहोदय: कथयति- ''हिन्दू-उपासनापद्धत्यां शिवपूजा सर्वाधिका तपस्यासाध्या, महासंयमसाध्या च। लिङ्गायतगणा: लिङ्गस्य श्रेष्ठपूजका भक्ताश्च। भारते तेषां सम्प्रदाय: अति संयमशील:''। फलत: शिवलिङ्गपूजायामश्लीलता-कल्पना केवलमसभ्यता, नास्तिकता।

किञ्च–असभ्यात्, अर्द्धसभ्यात्, यवनात्, म्लेच्छाद्वा अथवा सभ्यादेव वा कस्माच्चित् समाजात् वैदिकजात्याऽनया कस्यचिद् धर्मस्य, मतस्य, देवतायाः उपासनाया वा काचित्प्रणाली गृहीता शिक्षिता वा भवेदित्यस्य न किञ्चित् प्रमाणमधिगतं विरोधिभिः। सनातनधर्मः, तस्योपासनापद्धतिश्च स्वयं पूर्णा, अत्र हि स्वयं दानस्य शक्तिः, अपरस्मात् किञ्चिद् ग्रहीतुं न काचिदावश्यकता। देशस्य दुर्गतेः समये पराधीनतयाः कालेऽपि, विजेतृजातिभ्योऽपि, वैदिकजात्याऽनया धर्मस्य विषये न किञ्चित् शिक्षितम्, तदा सर्वविधस्वातन्त्र्यकाले स्वाधीना, विजयिनी, सेयम् 'आर्य' जातिः कस्याश्चन परजितायाः, असभ्यायाः, 'दस्यु' जातेः सकाशाद् धर्मं शिक्षेत, इति किं बुद्धिगम्यम्? किं च तत्प्रयोजनम्? तत्रापि अश्लीलभावस्य शिक्षा। शिवपूजायां लिङ्गोपासना क्रियते। किन्तु सेयं शिवलिङ्गपूजा परब्रह्मण आदिमूर्तेः प्रतीक पूजा। सर्वाभिर्जातिभिः कर्तुं शक्या। पुरोहितस्य, दक्षिणायाः, भोग–रागादीनाम्, मन्त्रादेः नात्र आवश्यकता। न किञ्चिदाडम्बरम्। साधारणजलेन, बिल्वपत्रेण, अधिकाधिकं चेत् पञ्चाक्षरमन्त्रमात्रेण वा देवाधिदेवः सोयं सुप्रसीदति। भारतेऽस्मिन् यावन्ति शिवलिङ्गानि, शिवमन्दिराणि च न तावन्ति अन्यदेवस्य मन्दिराणि। शिवस्य यावती पूजा, न तावती अन्यदेवस्य। इदानीं विचार्यताम्–आर्याणां कृते असभ्यजातिलब्धपूजापद्धतये एवंविधसर्वश्रेष्ठा-सनप्रदानस्य किमासीत्प्रयोजनम्?

किञ्च–वर्तमानकाले भारतेऽस्मिन् विपक्षगणसूचितायाः तथाकथितायाः आदिवासि-जातेरपि साम्प्रतं नोपलब्धिः, यस्यां जातौ शिवलिङ्गस्य, शिवपूजाया वा अस्तित्वं विलोक्येत। ततश्च सेयं शिवपूजा वैदिकी, मोहनजोदडो, हडप्पास्थानयोः प्राचीनाधिवासिनः वैदिकपद्धत्यैव उपासनामकार्षुरिति बुद्धिशालिभिः स्वीकर्तव्यं स्यात्।

किञ्च–जीर्णावशेषेष्वेषु एकं चित्रमस्ति यस्मिन् एकस्य वृक्षस्य शाखायां द्वौ पक्षिणौ स्थितौ। एकस्य मुखस्य समीपे फलम् अन्यः केवलं प्रेक्षते, न तस्य फलम्। तदिदं चित्रं सुस्पष्टम्। ऋग्वेद मन्त्रस्यास्य भावः–

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**

**तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति।।**

(ऋ. मं.१ सू. १६४)

यदि चित्रेऽस्मिन् सोऽयं भावस्तर्हि मोहनजोदडोगता सभ्यता वैदिकीत्यत्र कः खलु मनागपि संदिह्यात्?

तत्रैव अन्यदप्येकं चित्रं यत्र श्मशानस्य दृश्यम्। एका कलशी अर्द्धदग्धानि काष्ठानि, चिताभस्म, ज्वलच्चिता आदि। शवस्याग्निसंस्कारः प्राचीनकालादारभ्याद्यावधि वैदिक भारते एव प्रचलितः। ततश्चैवंविधचित्रैः अन्यान्यैश्च चिह्नैः सुस्पष्टं, ततः कथं साधयितुं शक्यं यत् २५०० ई. पूर्व समये आर्या बहिर्देशाद् भारते उपगताः इति।

## देवी मूर्तिः ( Mother Goddess )

मोहनजोदडो, हडप्पा इति स्थानद्वये विलोचिस्तानस्य भिन्न-भिन्न स्तूपेषु च बहुतराः स्त्रीमूर्तयः प्राप्ताः। याः किल दग्धया मृत्तिकया निर्मिताः। एतासां सम्बन्धे सर जान मार्शेलेन प्रोक्तम्-''एताः किल महादेव्या मूर्तयः सन्ति (Mother Goddess)। इमाः भूमध्यसागरस्य द्वीपेषु, तथा मिनोयान् सभ्यतायां च पूज्यन्ते स्म। सेयं देवीपूजा 'आर्य' (वैदिक) जात्यां नाऽऽसीत्। आर्येषु देवीपूजा एतेषां सकाशादेव तत्र गता।''

परं सेयमुक्तिः सर्वथा भ्रममूला। आर्येषु द्विजवर्गे (ब्राह्मण-क्षत्रिय-वैश्येषु) प्रत्येकं व्यक्तिः दैनिके नित्यकर्मणि त्रिकाल-सन्ध्यासु महादेव्या गायत्र्या उपासनां नियमेन करोति। अपि किं तर्कबलेन तदिदमपि समर्थयितुं शक्यं यत् ''वेदमूला सेयं देवी-उपासनाऽपि 'क्रीटतः' भूमध्यसागरप्रान्ताद्वा भारते प्रविष्टा ?

किञ्च-मोहनजोदडो स्थाने याः स्त्रीमूर्तयोऽधिगताः, ता देवीमूर्तय इति न स्वीकर्तुं शक्यते। तस्मिन् काले तत्रत्याः शिल्पिनस्तावच्चतुराः शिल्पनिपुणाश्चाऽऽसन्'' इति तत्र लब्धाभिः 'चर्म' खड्गावरोधिकाभिः ('शील्ड') अन्यैश्चोपकरणैः परिज्ञायते। देवीमूर्तयः सर्वत्र कलापूर्णाः सुमनोरमाश्चाधिगताः। एतासु तु मूर्तिषु सौन्दर्यस्य, शिल्पस्य च सुतरामभावः। एतासु अलौकिकं दिव्यलक्षणं, पूजायाः श्रद्धायाश्च परिचयः, न केनापि समर्थयितुं शक्यते।

यदीमाः पूजाप्रतिमा अभविष्यन्, तर्हि एताः शिल्प-कला विशिष्टाः अभविष्यन्। मूर्तयश्चाकारे दीर्घा अभविष्यन्। वृत्ताकारमुखाः, काकिणी-कृतनेत्राः, स्त्रीणां मृत्तिकामूर्तयः सर्वेषु प्रान्तेषु, ग्रामेष्वपि च साम्प्रतमुपलभ्यन्ते। एता हि प्रतिगृहमर्च्यमानाः श्रीदेव्याः प्रतिमाः इति न कोऽपि मन्यते। काकिणीकृतनेत्रत्वं काकिणी (कौडी) द्वयं संश्लेष्य नेत्रकार्यं यासु कृतं स्यात् तासां मूर्तीनां विषये कथ्यते।

सिन्धु-उपत्यकायां प्राप्ताः ता इमाः स्त्रीमूर्तयः एवंविधानि शिशूनां क्रीडनकान्येव। आभिः सह भूमध्यसागरीयायाः द्रविडसभ्यताया वा न कोऽपि सम्पर्को नूनम्। विषयेऽस्मिन् श्रीमणिमाधवचौधुरीमहोदयस्य प्रबन्धः ''सिन्धुसभ्यतार उत्पत्ति'' सिन्धु धर्मे स्त्रीदेवतार उपासना'' इति च द्रष्टव्यौ (प्रवासी १३५५)।

(सिन्धु-सभ्यतायाः सम्बन्धे सेयमालोचना प्रकाशिता, एतद्विरोधे यावत्कालं सुदृढं प्रमाणं नोपलभ्यते, तावत्तदिदं दृढीक्रियते यत्-सिन्धुसभ्यता न काचित् पृथक्, किन्तु आर्य (वैदिक) सभ्यताया एव अन्तर्भुक्ता नूनम्)।

स्वामिविवेकानन्देन कतिपयवर्षपूर्वमलेखि-दाक्षिणात्या द्रविडजातीयाः सन्ति, ते उत्तराखण्डवासिभ्यः 'आर्येभ्यः' पूर्णतया भिन्नाः। भारते दाक्षिणात्या ब्राह्मणा एव आर्यवंशजाः एतेहि उत्तर-भारतस्तत्र गताः।'' इदं सर्वथा अविश्वसनीयम्। सम्पूर्णं भारतं सर्वदा 'आर्य' वंशजमासीत्।

यदि आर्या बहिर्देशेभ्यो भारतमुपगता भवेयुस्तर्हि सेयं वार्ता कस्यामप्यवस्थायां, कस्मिन्नपि रूपे इतिहासेऽवश्यं गृहीता भवेत्। विस्तृते च साहित्ये तस्याः सङ्केतः कुत्रचिदवश्यमुपलब्धो भवेत्। तिथीनां वत्सराणां च विषये भवेत् कदाचिद्वादविवादस्य विषयः, किन्तु कलि अब्दः (५०६१तोप्यधिकः) युधिष्ठर अब्दः भारते अद्यापि प्रचलितः। तदिदं किं भारतीयजातेः सिन्धु उपत्यकासमाजस्याऽपेक्षयापि प्राचीनतायाः सङ्केत न करोति? आधुनिकशैलीयुक्त इतिहासो न भवेत्कामम्, किन्तु वैदिक-शास्त्र पुराण-इतिहासाः (रामायण-महाभारतादि) वैदिकसभ्यतायाः ऐतिहासिकसामग्र्या सम्यक् समृद्धाः। एवं सत्यपि सेयं वार्ता कुत्रचिदपि नोपलभ्यते यत् आर्य (वैदिक) जातिः बहिर्देशाद् भारते आगतेति। अथवा तदानीं भारतमिदं विदेशीयानां पादाऽऽक्रान्तमिति।

## ज्यौतिषं प्रमाणम्

भारते वैदिकसभ्यतायाः प्राचीनता ज्यौतिषशास्त्रादपि प्रतीयते। प्रोफेसरो वालेसः कथयति "भारतीयज्योतिषस्य मानानि ज्यामितेर्गणितानुसारमपि निष्पद्यन्ते।" प्रायः सर्वेषामपि सम्मतमस्ति यदिदं गणिततत्त्वमतिप्राचीनमस्ति। समीक्षाद्वारा एतेषां समयः ईसातो न्यूनान्न्यूनः त्रिसहस्रवर्षेभ्योऽपि प्राचीनः। वालेसमहोदयः तदिदं तत्त्वं पूर्णतया प्रमाणीकरोति।

भारतीयज्योतिषस्य वर्तमानः सारो यदि पञ्चसहस्रवत्सरेभ्यः पूर्वमपि सङ्कलितः स्वीक्रियेत तदपि सभ्यताया एवंविधे उच्चतरे 'स्तरे' प्राप्तुं न्यूनान्न्यूनम् एकसहस्रवर्षाणां समयो व्यतीतो भवेत्। अर्थात् तदिदं स्पष्टं प्रमाणितं भवति यत् ४००० ईसातः पूर्वकाले वैदिक-आर्यजात्या भारते सभ्यता प्रचारिता, इति। कलि-अब्दानां प्रचारस्य वार्ता पूर्वं सूचितैव।

## आर्यावर्तः आर्यजातिश्च

आर्यशब्दोयं न वैदेशिकः, सोयं भारतीयः। देवभाषाया धातु-प्रत्ययाभ्याम् (ऋ-ण्यत्) निष्पन्नः। 'आर्य शब्दस्यार्थः- धार्मिकः, धर्मशीलः, श्रेष्ठकुलोत्पन्नः, पूज्यः, श्रेष्ठः, उदारचरितः, शान्तः, इति, "कृतेन हि भवेदार्यो न धनेन न विद्यया"। आर्य शब्दस्यार्थः- महाकुलः, कुलीनः, साधुः, सज्जनः।

**"कर्तव्यमाचरन् काममकर्तव्यमनाचरन्।**
**तिष्ठति प्रकृताचारे स तु आर्य इति स्मृतः।।"**

भृशमन्वेषणेऽपि वैदिकभाषायां 'आर्य' शब्दस्यार्थः न क्वचिज्जातिवाचकः। 'आर्य' नाम्नी काचित् जातिः न कदाचिदप्यासीत् परन्तु यदि कस्यैचिज्जात्यै 'आर्य' नाम्ना वैशिष्ट्यं प्रदातुमिष्यते चेत्- वैदिक (भारतीय) जातिरेव एकमात्रं विशुद्धा 'आर्य' जातिः।

**तर्हि के अनार्याः ?**

**''किं ते कृण्वन्ति कीकटेषु गावो, नाशिरं दुहे न तपन्ति धर्मम्''**

(ऋग्वेदः३/३/२९)

कीकटदेशः अनार्याणां निवासस्थानवाचकः (कीकटो नाम देशोऽनार्यनिवासः' (यास्कः, निरुक्ते)।

ये देव-पितृणाम् मनुष्याणां चोपकारं न कुर्वन्ति, ये इहलोकादतिरिक्ते अपरस्मिन् लोके विश्वासं न कुर्वन्ति, ये अग्निहोत्रादि यज्ञं च न कुर्वन्ति, ये तपश्चर्यातो विमुखाः, ते नास्तिकाः, ते अनार्याः। ते यस्मिन् देशे निवसन्ति, तस्यैव नाम कीकट इति। (भार्गव शिवराम किंकर, 'उत्सव')

ब्रह्मावर्तः (वेदो वा वेदज्ञा वा यत्र पुनः पुनरावर्तन्ते 'जन्म गृह्णन्ति' स ब्रह्मावर्तः)।

आर्यावर्तः (आर्याः वैदिके धर्मे निष्ठावन्तः पुरुषाः पुनः पुनर्जायन्ते स आर्यावर्तः) एवंविधया व्युत्पत्त्या स्पष्टं ज्ञायते यद् भारतमेव वैदिक (आर्य)-जातेर्मूलनिवासः, उत्पत्ति-स्थानम्। आर्यभूमेर्भारतस्यास्य 'कुमारिकाखण्डः' इत्यपि नामधेयम्। कुमारिकादेव्या नाम्ना तदिदं निष्पन्नम्। ''वर्णव्यवस्थितिरिहैव कुमारिकाख्ये, शेषेषु चान्त्यजजना निवसन्ति सर्वे'' [सिद्धान्तशिरोमणिः गोलाध्यायः] उत्तरस्यां हिमाचलम्, दक्षिणायां कुमारिकामन्दिरपर्यन्तं भारतमिदं सम्पूर्णमेकस्यैव देशस्य नाम्ना विख्यातम्। आर्य, द्रविडेति भेदं प्रख्यापयन्तो विचारयन्तु हृदीदम्।

वैदिक-ऐतिह्यानुसारं मनुः, शतरूपा चेति प्रथमौ राज-राज्ञ्यौ। वैदिकसभ्यताया आधारः आदिभूमिः भारतखण्डः कुमारिकाखण्डो वा। पुरा वैदिकसभ्यता पृथिव्यां सर्वतो व्याप्ताऽऽसीत् क्रमशः सा संकुचिताऽभवत्। किन्तु बाल्यावस्थात एव भारतीयाः पाठ्यपुस्तके पठन्ति- ''भारते आर्य- अभियानेन सहैव भारतस्येतिहासः प्रारभ्यते। एतेभ्यः पूर्वं द्रविडजातेर्विषये नाधिकं परिज्ञायते। आक्सस् नद्याः घाट्याम् आर्यजातिरवसत् ईसवीय एकसहस्रवर्षेभ्यः पूर्वम्, ततो बहुपूर्वं वा संघीभूता आर्या उत्तर-पश्चिमदिशः पर्वतमार्गेण क्रमशः पञ्चाम्बुदेशस्य समभूम्या अस्मिन् देशे प्राविशन्।''

एका द्वितीया कथा (कल्पना) अस्ति यत्- शूद्रगणा भारतस्य आदिमा अधिवासिनः। पूर्वकाले ते 'दासाः' आसन्। अमेरिकायाम्- अंग्रेजाः, पूर्तगीजाः, एवंविधाभिर्जातिभिः अफ्रिकानिवासिनः 'दासान्' कृत्वा अस्थापयन्। तेषां वंशधराः बहुकालं यावत् 'दासाः' आसन्। पुरातत्ववादिनः स्वप्नायितमलिखन्- ''भारतं श्यामनेत्रवद्भिरादिमनिवासिभिः सर्वथा परिपूर्णमासीत्। तदनन्तरम् श्वेतकायाः 'आरियन्' गणाः कस्मादपि देशाद् भारते आगताः। स देशः कीदृगासीदिति न निश्चितम्। केचिद्वदन्ति 'तिब्बत-मध्यतः' ते समागताः, अन्ये वदन्ति- 'मध्य-एशियातः' ते उपगताः, इति। कतिपये आङ्ग्ला वदन्ति यत् आर्याणां केशा रक्तवर्णा आसन्, अन्ये कथयन्ति तेषां केशाः श्यामा आसन्निति। कतिपये जगदुः ते स्विट्जरलैण्डस्य

एकस्य 'ह्रदस्य' तटे न्यवसन्। कतिचिदाहुः– ''उत्तरमेरुवासिनस्ते आसन्निति।''

सर्वमिदं कथामात्रम्। सर्वतः पुरातनेषु अस्माकं शास्त्रेषु कुत्रापि सूचनामात्रमपि नास्ति यद् आर्यगणाः कुतश्चिद् बहिः बहिः प्रदेशाद् भारतमुपागच्छन्निति। प्राचीनभारतान्तर्भुक्तम् 'अफगानस्थानम्' अपि आसीदिति न विस्मर्तव्यम्।

## वैदिकजातेरासीदितिहासः

पाश्चात्यभारतीयतत्त्ववेत्तॄणाम् (Indologists) इतिहासलेखकानामस्ति धारणा यत्–वैदिकाः (हिन्दवः) इतिहासलेखनं न जानन्ति स्म, अतः प्राचीनकालिको नोपलभ्यते इतिहास इति। किन्तु सेयं धारणा भ्रमपूर्णा। वैदिकजातिरितिहासलेखनाभिज्ञा आसीत्, लिखिताश्च तया इतिहासाः। किन्तु संस्कृतसाहित्यस्य महान् भाण्डागारः अन्यान्यैः शिल्प–स्थापत्यादि निदर्शनैः सह अत्याचारिणां हस्तैः स हि सम्पूर्णो ध्वस्तोऽभवत्। योऽद्य न लभ्यते यस्य चोल्लेखो न दृश्यते, स हि पदार्थ आसीदेव नेति न कश्चिद्विवेकी साधयितुं शक्नुयात्। वैदिकजातेः प्राचीन इतिहासो धारावाहिकरूपेण नोपलब्ध इत्यनेन नेदं वक्तुं शक्यते यत्स इतिहासो लिखित एव नाऽऽभूदिति। चीनदेशस्य प्रख्यातः परिव्राजकः ह्वेन्स्याङ्गः सप्तमशताब्द्यां बहुवर्षाणि भारते न्यवात्सीत्, अनेकदेशानां च भ्रमणमकार्षीत्। स हि लिखति– ''घटनानामितिहासं लिपिबद्धं कर्तुं प्रत्येकदेशे एकः कर्मचारी आसीत् यो हि तमिममलिखत्। सर्वघटनानां पूर्णविवरणस्य नाम 'नीलपीतम्' इति। विवरणेष्वेषु उत्तमानाम्, अशुभानां सम्पूर्णानामेव घटनानां दौर्भाग्यस्य सौभाग्यस्य चाऽभवदुल्लेखः।'' 'इतिहासानां प्रात्यहिकघटनानां चोल्लेखः शासनात्पूर्वं नासीदिति ये वदन्ति ते हुएन्साङ्गस्य तदिदं वक्तव्यं विचारयन्तु। तस्मिन् समये मोगलाः विश्वकोषे 'आर्यन्' शब्दः इण्डो–यूरोपीयभाषाणां 'सा टे म्' श्रेण्यन्तर्गतः स्वीकृतोऽस्ति। ततः 'आर्यवाद' वादविषये ये नानाविधा वादविवादा आसन् तानुपसूच्य साम्प्रतम् आर्यवादः विश्वकोषादिषु सुसंघटितोऽस्ति। परं भारतीयविदुषां, ये हि पाश्चात्य प्रवर्तितपाठ्यक्रमेण ज्ञानप्रवाहं सञ्चित–वन्तस्तेषां कृते शिक्षायाः पाठः (आर्याणामभियानविषयकः) साम्प्रतमपि स एव। 'आर्या भारते बहिर्देशादुपगताः' इत्येव ते दृढमभिजानन्ति, बाल्ये पाठ्यपुस्तकेषु अधीतत्वात्। विश्वकोषं तु वराकाः कियन्तः पठन्ति?

ये केचन भारतीयैरधुना इतिहासा लिखिताः, तेषु प्राचीनसाहित्यापेक्षया विरोधदर्शनेऽपि, हृदये सन्देहसमुदयेऽपि, नाद्यावधि केनचिदपि एतद्विलेखनस्य साहसमङ्गीकृतं यद्आर्याणां बहिर्देशादुपगमनस्य कथा सर्वथा कल्पिता, मिथ्या इति।

एतत्कल्पनायां निगूढमुद्देश्यं पाश्चात्त्यानाम्। 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति मन्वानानां हृदयात् आत्मगौरवम्, स्वदेशप्रीतिः, जातीयाऽभिमानः सर्वथा अपगमितः। 'अस्माभिः अन्यैर्वैदेशिकैरिव अस्मिन् देशे विजयः कृतः। अस्माकं जन्मसिद्धोऽधिकारो

नास्त्यस्मिन् देशे। विदेशादागता वयमस्मिन् विदेशीया एव'' सेयं धारणा नवशिक्षितानां मनसि दृढमूला जाता।''स्वदेश स्वदेश बोल रहा क्यों, यह नहि तेरा देश।।'' यथा वयं बहिर्देशादुपगताः, तथा भवन्तोऽपि बाह्यादुपगताः। यूयं किञ्चित्कालपूर्वमागताः। यावत्कालं राज्यभोगो भवद्भाग्ये आसीत् तावद् भुक्तः। युष्माकमनन्तरं मोगलाः समागताः। यावत्कालं राज्यभोगस्तेषामपि भाग्ये आसीत्तैरपि भुक्तः। इदानीं वयमागताः। वयमपि भवतां समाना एव। भारते भवन्तोऽपि बहिस्तः उपगताः वयमपि। पुनर्भवतां हृदये अशान्तिर्वा, असन्तोषो वा किमर्थम्? सन्तुष्टा भूत्वा अस्मदधीना यूयं सुखं निवसथ, [इदमेव पाश्चात्यद्वारा आविष्कृतस्य ''आर्यवादस्य'' आन्तरिकं रहस्यम्।]

आङ्गलशैल्या भारतस्य योऽयमितिहासो निर्मितः, तस्याऽध्ययनेन सेयमेव धारणा स्पष्टीभवति----यत्-आदिमकालादेव भारतस्य अन्यैर्द्वारा पराजयः प्रारब्धोऽभूत्। क्रमशः आगन्तुकाया एकस्या जातेरनन्तरम्, अपरा जातिर्भारतीयान् पराजित्य अस्मिन् देशे स्वीयं राज्यमस्थापयत्। तासु जातिषु नायं कस्याश्चिदपि स्वदेशः, पितृदेशः। आङ्गलानां भारतविजयोपि तस्यैव क्रमस्य एकोऽनुच्छेदः अन्यतमः परिणामो वा। भारतीयजातेर्मनस्सु एवंविधभावानां सम्प्रवेशः आङ्गलानां वास्तवः सांस्कृतिको विजयः। अस्माकं च वास्तविकी पराधीनता। राजनैतिकी पराधीनता अस्थायिनी भवति, परं सांस्कृतिकी पराधीनता स्थायिनी दीर्घा च भवति। आर्यवादस्य पूर्वोक्तस्य सोयं विषः भारतीयानां जातीयविचारधारां सर्वथा जर्जरामकरोत्।

पूर्वोक्तस्य 'आर्यवादस्य' स्वीकरणे, तस्य द्वितीयांशोऽपि स्वीकरणीयो भवति यत्-वेदाः वेदमूलकानि शास्त्राणि, इतिहासपुराणानि च केवलं कपोलकल्पनाः। पशुपालानां गीतानि। यतो हि तेषु आर्याणां बहिर्देशादुपगमनस्य नोपलभ्यते वृत्तान्तः। हन्त! मिथ्याकथा-कल्पनस्याऽस्य फलस्वरूपे अस्माकं वैदिकधर्मे विश्वासः, आचारे निष्ठा, प्राचीनेषु श्रद्धाप्रभृतयः सर्वे एव सत्पदार्थाः शिथिलीभूताः। फलतः- आर्याणां बहिर्देशादुपगमनस्य सेयं कथा सर्वथा मिथ्या। राजनैतिकैः कर्णधारैः स्वबुद्ध्या निर्मिता। एतस्या अभ्यन्तरे गम्भीरो राजनैतिको दुरभिसन्धिरनुप्रविष्टोऽस्ति। तदिदं निःसन्देहमभवत्सिद्धम्। वैदिकी भारतीया आर्यजातिः भारतखण्डस्य मूलतो निवासिनी। इमे आर्याः बहिर्देशादागतानां केषाञ्चिद्वंशजाः कथमपि नेति सुतरां निश्चितम्।

***

# भारतवैभवम्

# चतुर्थोऽध्याय:

## मध्यकाल:

## भारतीयसम्राजां वैभवभोगा:

''विभवो भोगशक्तिश्च, नाऽल्पस्य तपस: फलम्।'' यस्य दीनस्य मध्यवित्तीय-पुरुषस्य जीवनयात्रानिर्वाहोपयुक्तं वित्तं भवेत् स हि भोग- विलासादिकं जानन्नपि कथं तदुपभोगं कुर्यात्? प्राय: प्राचीनशैल्या शिक्षिता: प्राचीनभूपालानां भोग-विलासमयीं जीवनचर्यां सर्वात्मना जानन्ति। संस्कृतपण्डिताश्च रसमयेषु काव्येषु विलासप्रकारान् बहुधा दृष्टवन्त:, तदनुकूलां चर्यां चाऽपि जानन्त्येव। किन्तु विलासमयी चर्या धनवैभवबाहुल्ये सत्येव शक्यते निर्वाहयितुम्। एतद्विपरीतम्, बहुषु पाश्चात्त्य- देशेषु धनवैभवप्राचुर्येऽपि तत्र विलासा:, भोगप्रकाराश्च लोकानामविज्ञाता:। अत एव ते धनवैभवस्य भोग-विलाससाधनत्वं न परिजानन्ति। किन्तु परमेश्वरेण यस्मै वैभव-सामर्थ्यं दत्तं स हि भाग्ये सत्येव तदुपभोगं सम्यक्प्रकारेण करोति, यथा हि शीर्षके पद्यखण्डेन सूचितम्।

कला:, ऐश्वर्यम्, विलास:, एवमादीनां सामाजिक आधार:, पूर्णा सम्पन्नता तथा सर्वविधा सुखशान्तिश्चास्तीति सर्वे जानन्ति। प्राचीनानां भूपालानां भोगविलाससङ्कथा 'पुराण' कालिकी परिगण्यते, यत्र हि नवशिक्षितानां विश्वासो नाऽभ्युदेति। किन्तु मोगलसम्राजां शासनकाल ऐतिहासिक:। येन ज्ञानधनेन एतद्युगीया: सर्वत: सम्पन्ना:, आत्मनि विज्ञताभिमानं च धारयन्ति, तै: पाश्चात्यैरेव मोगलकालिकमितिवृत्तं प्रणीतं, यद्धि सर्वतो नवशिक्षितजगति प्रचरितम्। पाश्चात्यानामितिहासेभ्य एव अत्रत्यैरपि परिज्ञातं यत् कतिपयशताब्दीपर्यन्तं मोगलसम्राड्भि: सम्पन्नता, सुखशान्तिश्चाऽनुभूता। अत एव ऐतिहासिका: कथयन्ति यत्तेषां जीवने 'राग-रङ्गा:' बहुश: प्राचलन्। अन्यसम्राजां विषये भवेदपि कदाचिन्मतान्तरम्, किन्तु मोगलसाम्राज्यस्य वस्तुत: संस्थापकस्य सम्राडकबरस्य शासनकाल: पूर्णतया सम्पन्न: समभूत्।

सम्राडकबरो निजं राजकोषम् चतुस्त्रिंशत्कोटिमुद्राभ्य: (३४८२२६२८६ रु.) अप्यधिकमधिकरोति स्म, इति हि यूरोपीय इतिहासलेखक: डॉ. लेट महोदय: अलिखत्। तस्मिन् समये रूप्यकस्य मूल्यं १९१४ तमख्रिष्टवत्सरापेक्षया षड्गुणमासीत्। एतदनुसारम् तद्राजकोषस्य मूल्यम् लेटमहोदयस्य शब्देषु [चतुर्विंशति कोटि 'पोण्ड' मुद्रा: सन्ति]। अकबरस्य समकालिक: एङ्गलैण्डस्य शासक: 'सप्तम हेनरी' महोदय: जगति सर्वतोऽप्यधिको धनिक:

प्रख्यायते स्म। स हि अष्टादशलक्षात्मक-स्वर्णमुद्रा ('गिनी') मितां स्वर्णरूप्यात्मिकां सम्पत्तिमधिकरोति स्म। तेन हि रूप्यकस्य मूल्यं न्यूनीकृतमभूदिति तस्मिन् समये प्रसिद्धिरासीत्। इङ्गलैण्डीयेतिहासस्य स्वर्णयुगस्याऽधिष्ठात्री एलिजाबेथमहाराज्ञी चतुर्लक्षपौण्ड मुद्रात्मकम् ऋणं व्यक्त्वा स्वर्गवासिनी बभूव।

अकबरस्य शासनकाले प्रतिदिनव्यवहारोपयुक्तानामन्नादिवस्तूनां का परिस्थितिरासीदिति तत्त्वतः परिज्ञाने तत्सामयिकस्य रूप्यकस्य मूल्यं बहुतरमनुमातुं शक्येत। अकबरस्य शासनकाले एकरूप्यकस्य द्वादश 'मन' मिता गोधूमाः, अष्टादश 'मन' मिता यवाः, षोडशमनमिता माषाः ('उर्द'), मुद्गाः अष्टादशमनमिताः, उत्तमाः तण्डुलाः एकरूप्यकस्य दशमनमिताः प्राप्यन्ते स्म। लवणम्- एकरूप्यकस्य षोडशमनमितम्, एकः अविः (भेड) सार्द्धमुद्रया क्रीयते स्म। दुग्धं तु एकमुद्रया ४४ शेटकमितं प्राप्यते स्म। विंशशताब्द्यां जातो भारतीयः अङ्कान् इमान् श्रुत्वा विस्मितो भवेत्।

आगरानगरस्य दुर्गे औरङ्गजेबेन यदा हि स्वस्य पिता शाहजहानो बन्दीकृतोऽभूत्, तस्य च राजकोषो यदा हि तेन स्वाऽधीनीकृतोऽभूत् तदा हि तस्य रत्नानां संख्या तेन जिज्ञासिताऽभवत्। एतदर्थं कोषाध्यक्षः फौलादखानो नियुक्तोऽभूत्। एतत्कार्यार्थं स हि अवकाशं ययाचे। षण्मासानन्तरं स हि सम्राजे उत्तरमददात् ''रत्नानां परिगणनार्थम्, तेषां मूल्याङ्कनार्थं च न्यूनान्न्यूनं चतुर्दश वर्षात्मकः समयः समपेक्ष्यते। अवरङ्गजेबो विवशतया स्वस्य प्रबलमौत्सुक्यं खर्वीचकार। शाहजहानस्य सविधे पञ्चकोटिमुद्राणां रत्नानि तस्य व्यक्तिगता सम्पत्तिरासीत्। एतदतिरिक्तं कोटिद्वयमुद्राणां रत्नानि राजपरिवारेभ्यः उपायनरूपे अदीयन्त। तस्य जगत्प्रसिद्धमयूरसिंहासनं स्वर्णरत्नमयमेवाऽऽसीदिति को न जानाति।

एवंविधवैभवमयीमाधारशिलामधिष्ठाय मोगलसम्राजां विलासमयं जीवनं विचित्रैः शिल्पमयैश्च कृत्यैराप्लावितं प्राप्यते। विलासाः, नानाप्रकारका उत्साहाः, तदर्थं नवीननवीनाः प्रयोगाः, नानाविधा मनोरुचयः, विभिन्नप्रकारकाश्चित्तप्रसादाश्च तेषां जीवनचर्यायामवाप्यन्ते। कलानां, साहित्यस्य च स्वाभाविकः प्रणयस्तेषां जीवनकाले सर्वतो विकीर्णः प्राप्यन्ते। सम्राड् बाबरः चिर्भटकायाः ('खरबूजे') भोजनं भृशमभिरोचयति स्म। स हि पुष्पाणां, मनोहरपल्लवानां चाऽपि महान् प्रणयी आसीत्। मृगया प्रायः सर्वेषामेव मोगलसम्राजामभिरुचिता बभूव। सम्राजा अकबरेण विशिष्टप्रकारिका एका मृगया-प्रणाली आविष्कृताऽऽसीत् या हि 'कमरघा' इति प्रख्यायते स्म। सेयं क्रीडा अतीव लोकप्रियाऽभवत्। एतस्यां बहवः मृगव्यान्वेषकाः ['हकने' शिकारका पता लगाने वाले] चत्वारिंशत्क्रोशपरिमिते परिसरे मृगयापशून् परिवेष्टयन्ति स्म। शनैः शनैस्तमेतं मृगयापशुं सम्राजः समीपे आनेतुं प्रयतन्ते स्म, येन गजोपरि संस्थितः सम्राट् सकौतुकं मृगयां तनुयात्। तस्मिन् समये सम्राजं विहाय, न कश्चिदन्यो वन्यहस्तिनो गृह्णाति स्म, न च चित्रमृगस्य मृगयां करोति स्म।

जहाँगीरः पशूनां मिथोयुद्ध-दर्शनस्य परमानुरागी आसीत्। स हि हस्तिनां, महिषाणां च युद्धमपश्यत्। कदाचित्कदाचित् मनुष्यानपि महिषैः सह योधयामास। स हि एवंविधेषु नृशंसेषु क्रीडनेषु परममनुरज्यति स्म। सम्राट् अकबरः 'चौसर' (चौपड) क्रीडायां 'गुटिका' स्थाने परिचारिकाणां प्रयोगमकरोत्। अकबरश्चित्रकलायै अपि परमं प्रश्रयमदात्। तस्य राजसभायाः ('दरबार') प्रख्यातश्चित्रकरः अब्दुलसमदः 'कुरानस्य' १२२ तममध्यायं 'कुक्कुरमुत्ता' पुष्पस्य बीजोपरि समग्रं लिलेख। जहाँगीरः स्वयं चित्रकारः, चित्रपरीक्षकश्चासीत्। स हि स्वजीवनचरिते स्वयं लिखति- ''मम चित्रकलाज्ञानस्य, एतत्कलापरीक्षणस्य च शक्तिस्तावतीं सीमानं प्राप, यत् मृतः, किं वा जीवितो मत्परिचितः कालाकारो यां कलाकृतिं चकार, अहं कलाकारस्य नामनिर्देशं विनैव तत्कालं पर्यचिनवं यत् कीदृशी कृतिः कस्य कलाकारस्याऽस्तीति। यदि द्वाभ्यां कलाकाराभ्यां मिलित्वा चित्रे कस्मिंश्चन-----भृकुटिः, मुखं च चित्रितं, तर्हि अहं तत्कालमेव निरदिशम्- 'मुखं केन चित्रितं भृकुटिश्च केनेति।

उद्यानविषयकं शिल्पम्, स्थापत्यम्, नृत्य-सङ्गीते, एतदादीनां परिज्ञानं रुचिश्च सर्वेष्वेव मोगलसम्राट्सु स्वाभाविकमिवाऽऽसीत्। एतदतिरिक्तम्, भोजन-सामग्रीचयन-----चातुर्यं सम्राट्सु बाहुल्येन व्यलोक्यत। सम्राजो भोजनालयस्य प्रात्यहिको-व्ययोऽनेक सहस्रमुद्रामितः साधारणतयाऽभवत्। राजहर्म्यस्य सर्वोपि व्ययः एककोटिमुद्रातः कथमपि न्यूनो नासीत्। सम्राड्युवराजपत्नीनाम्, राजकुमारीणां हर्म्यस्य उपमहिषीणाम् (रक्षितानाम्), प्रौढनारीणाम्, गायिकानाम्, सर्वासामेव स्वरूपानुसारं सम्मानः, तदुचितो व्ययश्चासीत्। हर्म्यमालायां कर्तव्यानुसारिण्यस्तासां पदव्योऽपि सम्मानसूचिकाः समभवन्। गृहप्रबन्धिकानाम्- 'शाहे खानम्' ('घर की बादशाह') सम्राट्- पुत्रीणाम् 'दुर्र ई दुरनि बेगम' ('शाहजादियों में मोती जैसी') रक्षिताः प्रायः 'बादामचश्म' (बडी-बडी आँख वाली) इत्यादि संज्ञाभिरस्मर्यन्त। शृङ्गारे प्रौढानां 'फलाकि बानो' सौभाग्यशालिमहिला, कञ्चुकिन्यः स्त्रियः मृगनयनी, रसबाई, नीलम, अमृतादि पदकान्यवहन्। मोगल-सम्राजः हिन्दी-संस्कृतनाम्नां प्रयोगमतिप्रणयेनाऽकुर्वन्।

हर्म्ये समागता राजकुमार्यः नृत्य-सङ्गीत-कामशास्त्रादीनामध्ययनमकुर्वन्। तत्र हि शृङ्गारमयानि काव्यानि बाहुल्येनाऽपठ्यन्त। सम्राट्कुमार्यः आभरणानामति-प्रणयिन्यः अभवन्। एतासां भूषणान्यपि अतिबहुमूल्यान्यभवन्। अङ्गुलीषु महामूल्यान्यङ्गुलीयकान्यधारयन्, यासु दर्पणान्यपि जटितान्यभूवन्। ता मुहुर्मुखदर्शनविनोदेन अप्रीयन्त। प्रत्येकमाभूषणं बहुसंख्यकं बहुमूल्यं चाऽभवत्। तासां परिधानानि अतिबहुमूल्यानि पुष्पसारैः सुवासितानि चाऽभवन्। एकस्मिन् दिवसे बहुवारान् परिधानीयानां परिवर्तनमभूत्। एकवारं शरीरे धृतं वस्त्रं पुनस्तदेव न कदाचिदप्यधार्यत। परिधानीयानीमानि अतिसूक्ष्माणि सुदृश्य-सुस्पर्शानि चाऽभूवन्। 'इटेली' प्रदेशस्य पर्यटकेन 'निक्कोलो मनुकि' महोदयेन वर्णितम्- 'प्रत्येकवस्त्रस्य भारः एक 'ओंन्स' तो नाधिकोऽभवत्। स्त्रीणामुत्तरीयाणि ('ओढनी', 'शाल') तादृक् सूक्ष्माण्यभवन् यत् तानि

अङ्गुलीयकस्याऽभ्यन्तरे प्राविशन्।

सम्राजां राजपुत्रा अपि प्रायशो विलासरुचयोऽभवन्। कस्यचित् सम्राट्पुत्रस्य चेत् कुमारः अभवत् तर्हि तस्य नामकरणम्, तस्य कृते प्रतिमासवेतननिर्धारणं च तस्य पितामहाधीनमासीत्। जहाँगीरः, नूरजहाँ च काव्यनिर्माणप्रणयिनावास्ताम्। मोगलवंशस्य रक्ते विलासप्रवाहः स्वाभाविक इवासीत्। सर्वेऽपि प्रायः काञ्चन-कामिनी-कादम्बस्य स्वभावतीऽनुरक्ता आसन्। जहाँगीरो मद्यस्य पात्रमतिप्रणयेनाऽस्तौत्। मुहम्मदशाहस्तु 'रँगीला बादशाह' नाम्ना प्रख्यातोऽभूत्। 'जहाँ-दारशाहः' अतिविलासी आसीत्। एका नर्तकी तस्यातिप्रेयसी बभूव। सम्राजः शिरसि धारणीयं छत्रं तयाऽपि धारणीयमभूत्। सा हि दीपपङ्क्ति -दर्शनं बहुधा अभ्यरोचयत्। अत एव प्रतिमासं त्रीन् वारान् सर्वस्मिन्नपि नगरे 'दीपावली' प्राभवत्। दीपान् अप्रज्वालयन् नागरिको राजाज्ञया दण्डितोऽभवत्।

सम्राट्प्रेयसी ('लालकुँअर') यात्रिभिः परिपूर्णाया नौकाया जले निमज्जनं न कदाचिद्-अद्राक्षीत्। आसीच्च तस्या महानभिलाषः अत एव तस्याः सङ्केतमात्रेण सम्राजः- आज्ञयैकदा-यात्रिभिः परिपूर्णा नौका यमुनाया धारायां तत्कालं निमज्जिता नौचालकैः।

***

# सोमनाथे यवनाक्रमणम्

गुर्जरस्य पश्चिमायामस्ति 'कठियावाड' नामकः प्रायद्वीपः–यस्यास्माकमितिहासे––'सौराष्ट्रम्' इति नामधेयम्। प्रायद्वीपस्य दक्षिणतटे भगवतः सोमनाथस्य (शिवस्य) महाविशालं पावनं मन्दिरम्। पुरा ह्यासीदस्य महन् माहात्म्यम्। ग्रहणादिपर्वसु द्वित्र– लक्षयात्रिणामभूदत्र महान् समारोहः। राजभिर्महाराजैश्च देवोत्तरसम्पत्ति रूपेण प्रादीयन्त द्विशतग्रामा येषामायेन मन्दिरस्य व्ययो निर्वाह्यते स्म। ऐतिहासिकैरेतस्य मन्दिरस्य महद्वैभवमावर्णितम्। अत्र हि द्विसहस्राण्यर्चकाः, पञ्चशतानि नृत्याङ्गनाः, द्वे शते चासन्नियता गायकाः। मन्दिरस्य मध्यावलम्बिनी महती घण्टा द्विशत 'मन' सुवर्णनिर्मितया शृङ्खलया ललम्बे। देव–स्नानाय प्रत्यहं पञ्चशतक्रोशेभ्यः समाह्रियते स्म गङ्गाजलम्। एवमिवान्यान्या अपि मन्दिरस्य वैभवसूचिका वार्ताः सुप्रसिद्धा इतिहासेषु। अस्तु, अयं किल भगवतः सोमनाथस्य संक्षिप्तः परिचयः। साम्प्रतमाक्रमणकारिणो गजनीस्थानीयस्य महमूदस्यापि किञ्चित्परिचयः प्रदीयते।

अफगानस्थाने गजनीनामकमासीत्सुप्रसिद्धं नगरम्, यत्र हि दुर्गममभूदेकं दुर्गमपि। ९९७ तमे ख्रिष्टाब्दे सुबुक्तगीन नामके एतदीयेऽध्यक्षे लोकान्तरमुपगते, तत्पुत्रमिस्माइलं निगडयित्वा महमूदोऽभूदस्य शासकः। अयं हि सुबुक्तगीनस्य रक्षिताया वेश्यायाः पुत्रः। एष माहम्मदधर्मस्यासीद् घोरः पक्षपाती। सदैव येन केनाप्युपायेन स्वधर्मस्य प्रचारे प्रयत्नशीलः सोयं द्रव्यलालसाग्रस्तोऽपि परकाष्ठाया आसीत्। आभ्यामेव कारणाभ्यामाकृष्टः सोयं दुर्दान्तः सप्तदशवारानस्माकमाचक्राम देशम्। एतस्यान्तिममाक्रमणं सोमनाथेऽभूद्यस्य संक्षिप्तो वृत्तान्तः प्रकटीक्रियतेऽधस्तात्।

१०२४ तमस्य ख्रिष्टाब्दस्य सितम्बरमासे महमूदः प्रातिष्ठत गजनीनगरात्। अनेन सह चत्वारिंशत्सहस्राधिका सेना, विंशतिसहस्रणि चासन् भारवाहकाः उष्ट्राः। अक्टूबरमासे सोयमुपागमन्मुलतानम्, ततश्चोपाययावजमेरुनगरम्। अजमेरस्य शासकस्तस्योपगमवृत्तमाकर्ण्यैव पलायाञ्चक्रे। अत एव शासकशून्यामिमां राजधानीं प्रान्तं च यथेच्छमयं लुलुण्ठ, भ्रंशयामास च तत्स्थानानि। लाभलोभादग्रे प्रवृद्धः सोयं गुर्जरप्रदेशस्य सुसमृद्धाम् 'अनहिलवाडा' नाम्नीमवाप राजधानीम्, यत्रत्यः शासकोऽप्येतद्भयाद् दूरं दुद्राव। इमं प्रदेशं लुण्ठित्वा सोयं समुपययौ सोमनाथम्।

भयङ्करभावनाभिः सह कृतोपनिवेशे चास्मिन्, स्वल्प एव काले विदितमभूदेत–दागमनस्य कारणं लोकानाम्। एकः साहसी पुरुषस्ततमेवं न्यवेदयत्–'यदि त्वमात्मनो हितं कामयसे तर्हि प्रत्यावर्तस्व स्थानादस्मात्। अन्यथा मन्दिराधिष्ठितो देवस्त्वां नाशयेदञ्जसा'।

किन्तु द्रव्यलालसान्धः स दुर्दान्तः कथमेवं भर्त्सनाभिः परावर्तेत? स हि मन्दिरमाक्रमितु-मादिशन्निजवीरान्। यवनसैनिकैरेतैः क्षण एव सर्वेऽप्यपसारिताः शान्तिप्रिया लोकाः। मन्दिरान्तः स्थिता लोकाः संभूय शम्भुमभ्यर्थयामासिरे-'भगवन्। रक्ष नः साम्प्रतम्'। किन्तु भारतीयानामिव विदेशीयानामपि स्वामिनः पिनाकिनः साम्प्रतं किं चिकीर्षितमिति कथं ते वराका विद्युः? बहिः स्थिता यवनसैनिकाः 'अल्लाहो अकबर' इति घोषैः दिशो मुखरयन्तो बलात्प्राविक्षन्मन्दिरान्तः। उपान्तवासिभिः क्षत्रियैर्यथैव सोयं दुःसंवादोऽधिगतस्तथैव सशस्त्रमुपगतास्ते म्लेच्छानिमानाक्रमन्त, निपातयामासुश्च सर्वान्मन्दिरस्य बहिः। अस्मिन्नास्कन्दने न्यहन्यन्त बहवो यवनाः। त्रीणि दिनानि समभूद् घोरयुद्धम्। अनहिलवाडराजधान्याः शासको निजसेनामुपादाय समाययौ साहाय्याय हिन्दूनाम्। शूराणां क्षत्रियाणां बाहुल्यमालोक्य नाग्रे प्रससार साहसं यवनानाम्। सम्मुखमुपागतमिव प्रतिक्षणं लक्षयामासुस्ते निजपराजयम्। सर्वथा निकटागतमनिष्टमवधार्य महमूदो निजसेवाध्यक्षान्प्रतिबोधयामास नानाधा, धर्मस्य ईश्वरस्य च शपथेन सर्वानिमानुत्तेजयामास। धर्मबलानुप्राणितेषु यवनेषु पुनः सञ्चचार साहसम्। प्ररोचनावाक्यैर्द्विगुणीकृतविक्रमास्ते महताऽऽवेशेन युद्धाय समनह्यन्त। स्वयं महमूदः सोत्फालमारुरोह रणतुरगम्। साहसिनं स्वामिनमग्रगामिनमालोक्य सर्वेपि योधा युगपदाक्रमन् मन्दिरमिदम्। हन्त! चिरयुद्धपरिश्रान्तैः क्षत्रियवीरैर्नेदमाक्रमणमशक्यत सोढुम्। युद्धेऽस्मिन् पञ्चसहस्रहिन्दवो जलमार्गेण पलायितुं प्राक्रमन्त येषु बहवो यवनैर्विवशं निगृहीता निर्दयं न्यहन्यन्त।

इदानीं महमूदो मन्दिरं प्राविक्षत्। अहह तत्रत्यं विभवमालोक्य समवापदनवाप्त-पूर्वं विस्मयमसौ। अतितुङ्गमासीन्मन्दिरम्। अस्याभ्यन्तरभागे धनुषाकारेषु मन्दिराधारेषु देदीप्यमान-रत्नखचिताश्चित्रविचित्राः षट्पञ्चाशदासन् सुवर्ण-स्तम्भाः। मन्दिरे नासीत्सूर्यरश्मीनां प्रवेशो यथावत्, अत एव महामहत्या सुवर्णशृङ्खलया लम्बमानः प्रकाशते स्मैको गन्धदीपो रात्रिन्दिवम्। मन्दिरद्वारमाविश्यैव सोमनाथस्य विशाला मूर्तिरभूद् दृग्गोचरम्। सा ह्यासीन्नवहस्तोन्नता, यस्यां सार्द्धत्रिहस्तपरिमिता भूप्रोथिताऽभूत्। मूर्तिमवलोक्यैव स समादिशद् भङ्क्तुम्। भीषणवज्रपातोपममिममवलोक्य व्यतिकरं मन्दिराभ्यन्तरस्थिता देवपूजकास्तस्य निपेतुश्चरणयोः, बद्धाञ्जलयः सदैन्यं प्रार्थयाञ्चक्रिरे-'अस्मदाराध्यस्य देवस्य सेयं भूमिर्न चेद्भवता खण्ड्यते तर्हि समर्पयामस्तावद् द्रव्यं यावन्न कदाचिदपि श्रीमता संगृहीतं स्यात्'। द्रव्यलोलुपोऽसौ प्रार्थनामाकर्ण्य विचारमूढो निभृतमस्थात्। एतस्य सचिवा अपि धर्म-दयाऽऽविष्टाः सूचयामासुरात्मनः सम्मतिम्-'एतेषां ब्राह्मणानामवधारणीयैव सेयं प्रार्थना'।

परं किञ्चित्कालं विचार्य स्वयमेवासौ देवार्चकानुवाच-'मूर्तिरक्षकतापेक्षया मूर्तिभञ्जकताकीर्तिरेव मेऽधिकं प्रिया। अहमस्मि मूर्तिभेत्ता, न तावन्मूर्ति-विक्रेता', इत्युक्त्वैव धर्मान्धोसौ निजलगुडेन मूर्तिमभ्याजघान। ततः सर्वेपि यवनास्तामिमां मूर्तिं प्राहार्षुः। प्रतिमाऽसौ व्यदीर्यत। किन्तु दृश्यतां भगवतोऽद्भुतं समीहितम्, यन्नानेन भगवान् क्रुद्धो जातः। अपि तु पाषाणानां

स्थाने प्रतिमाभ्यन्तरे पूर्णैर्महामहार्घैरसंख्यै रत्नैस्तत्स्थानमपूर्यत। नास्मिन्संदेहो यन्मूर्तिरक्षायां यावान् धनलाभो महमूदायाऽभविष्यत्तदपेक्षया भूयानधिको लाभो मूर्तिखण्डनेऽभवत्। किन्तु देवमूर्तिविदारणस्य दुष्कार्याद्दुर्दमनीयेन द्रव्यलोभेन चास्य चरित्रं चिराय कलङ्कितमक्रियत।

चित्रं, चतुर्धाऽसौ मूर्तिरभज्यत। तेषामेकैकं खण्डं मक्कामदीनातीर्थयोरवशिष्टौ द्वौ खण्डौ च महमूदो गजन्यां प्रेषयामास। गजनीप्रेषितयोरनयोरेकः खण्डो राजहर्म्येऽपरश्च प्रधाने यवनोपासनास्थाने (मसजिद)ऽस्थाप्यत। मन्दिरद्वारमपि चन्दननिर्मितमासीत्, यस्योपरि कुशल-शिल्पिकृतमुत्करणकार्यमत्यद्भुतभासीत्। तदपि गजनीं प्रैष्यत। द्वारमिदमष्टशतवर्ष-पर्यन्तमतिष्ठद् गजन्याम्। १८४२ तमे ख्रिष्टाब्दे सम्राट् प्रतिनिधे लार्ड एडिन्बरा महोदयस्याज्ञया प्रधानसेनापतिः 'नाट' महोदयः सुमहता समारोहेण द्वारमिदं पुनर्भारतं प्रत्यानयत्, यत् अधुनापि अस्य नगरस्य दुर्गाभ्यन्तरेऽवतिष्ठते। एकस्य शिल्पकलाविचक्षणस्य कथनमस्ति यदिदं द्वारं न चन्दननिर्मितम्, अपि तु देवदारुघटितम्। एतस्योपरितनं कारुकार्यमपि यवनशिल्पशैलीमनुहरते, अत एवानुमीयते यन्नेदं तद् द्वारं सोमनाथमन्दिरस्य वस्तुतः।

एतस्मिन्नाक्रमणे महमूदेन यावद्द्रव्यमुपलब्धं तस्य यदि वर्णनं तत्त्वतः क्रियते, जनानां दृष्टौ तन्मिथ्या प्रतीयेत। एतावदिदमासीद् यदस्य पूर्णतया परिसंख्यानमपि न स्थिरीभवति। अस्तु यत्किञ्चित्। तथाप्यैतिहासिकानामिदं वर्णनमवश्यं विश्वासार्हं सर्वेषामाक्रमणानामपेक्षया प्रभूततमं द्रव्यमस्मिन्वारे यवनाः स्वदेशं निन्युः।

स्वदेशमुपगतो महमूदः १०३० तमे ख्रिष्टीयसंवत्सरे (अप्रेलमासस्य १९ तारिकायाम्) पञ्चत्वमगात्। आसीदस्य वयस्तदा पञ्चाशद्वर्षात्मकम्। चतुस्त्रिंशद्वर्षाण्यसौ राज्यमशिषत्। मरणात्पूर्णमयं सर्वामप्यात्मनः सम्पत्तिमानाययामास सम्मुखे, द्वे दिने च तया-साकमन्तिमं प्रणयमदर्शयत्। आत्मनः प्राणान्पणीकृत्य परमपरिश्रमेण या समृद्धिस्तेनाऽर्जिता तामत्रैव विहाय विवशमयं प्रतिष्ठते लोकान्तरमिति चिन्तासन्तापेनास्य नेत्राभ्यां प्रावहन्नविरलमश्रुधाराः। अन्तसमये परिसंख्यानतोपि बहिर्भूतामपारामिमां धनसमृद्धिं विजहतोऽस्य दुःखमवश्यमभूत्, परं नेदं तस्य मनस्यभवद् यदस्माद्धनराशेरेकामपि मुद्रां विसृजेदसौ लोकोपकाराय धर्माय वा। समग्रामपि सम्पत्तिमसौ पुनः पूर्ववद्धनागारे स्थापयितुमादिशत्। हन्त! किं तावदस्ति साम्यमेतस्य कार्पण्यस्य कुत्रचिद् भूमण्डले? द्रविणस्य दर्शनानन्तरं द्वितीय-दिने-समग्रां सेनाम्, हस्तिनस्तुरगान् शिबिकादिकञ्चाखिलं सम्यगलङ्कृत्य निजसम्मुखमानेतुमादिशत्। एतत्सर्वमालोक्य स हि सोच्चैःस्वरमरोदीत्।

नास्मिन्कश्चिदपि सन्देहो यन्महमूदः शूरो राज्यलोलुपः, उत्कृष्टो योद्धा महापराक्र-मश्चासीत्। एतदतिरिक्तमेतस्मिन्नासीद् विद्याभिरुचिरपि च गुणः कश्चित्। फिरदौसी नामकं महाकविमयं कवितानिबद्धमेकं ग्रन्थं निर्मातुमादिशद् यस्य प्रतिपङ्क्ति चैकैकं 'दीनारम्' दातुं प्रतिजज्ञे। 'दीनार' नामको नाणकः सुवर्णस्य रजतस्य च पृथक्-पृथक् प्राचलत्तस्मिन्समये।

महमूदस्य च पुरस्कारप्रतिज्ञा नासीद्विस्पष्टार्था यदहं सुवर्णस्य रजतस्य वा दीनारान्वितरेयमिति। किन्तु महमूदस्यालोकसामान्यं धनवैभवामालोक्य कविः स्वमनसैवाऽकल्पयद्यन् महाविभवोसौ सम्राट् सुवर्णस्यैव दीनारान् समर्पयेन्न रजतस्य। परमपरिश्रमेणाद्भूतं ग्रन्थं निर्माय यदा कविः सम्राटसम्मुखमुपाहरत्तदा तेन परिज्ञातं यद्रजतस्य दीनाराः समर्प्येरन्। मनस्वी कविः क्रोधाविष्टो महमूदमनालोक्यैव निजगृहमगात्तस्योपहासपरमन्यं चैकं ग्रन्थं निर्ममौ, यस्योपरि गभीराशयो महमूदो न किञ्चिच्चकार। प्रत्युत कवेः क्रोधोपशमाय प्रजिघाय महामूल्यमुपायनम्। किन्तु महान्खेदो यन्नास्योपायनस्यासीत्कश्चिदुपयोगः। नेदं कविना चक्षुर्भ्यां वीक्षितमपि। उपयानवाहिनो राजपुरुषा यथैव कवेर्गृहं प्रापुस्तथैव गृह-पुरुषाः कवेः शवमादाय श्मशानं प्रत्यचलन्।

गजनवीयोसौ महमूदोत्यन्तमासीत्कुरूपः। नासौ जातु दर्पणमवालोकयत् । एकदा मुकुरे मुखमात्मनो विलोकयन्नसौ भूयस्तरां विषसाद जगाद च समीपस्थान् यद्राज्ञो रूपमाकर्षकमेवापेक्ष्यते वस्तुतः। किन्तु दैवेच्छायां किं जनः कुर्यात्। विधाता मामेवं निर्ममौ यन्मामवलोक्यैव लोकानामुदेति घृणा। कतिपये ग्रन्थकाराश्चैवमवर्णयन् यन्महमूदो निजसौन्दर्येण-नाऽशकत् प्रीणयितुं जनान्, अत एव निजपराक्रमेणासौ सर्वांश्चकार चकितान्। यदीदं तथ्यं तर्हि स्पष्टमिदमस्ति यन्महमूदस्य कुत्सितं रूपमेवासीत्तस्य वैभवस्य कारणम्।

महमूदेन गजनवीनगरमिदं सम्यगावासितं परिष्कृतं च। प्रजानां सौख्याय स्थाने स्थाने धर्मशालादिकाः प्रणीताः। राजधान्यामेका महापाठशालापि प्रत्यष्ठापि यस्यां परःसहस्र हस्तलिखिताः समगृह्यन्त ग्रन्थाः। विदुषां साहाय्याय लक्षमुद्रास्तेन पृथगकल्प्यन्त। महावीरो-सौ त्रिंशद्वर्षैर्निजराज्यमीरानोपसागरमारभ्य यूरालसरः पर्यन्तम्, कुर्दिस्तानस्य पर्वतमालामारभ्य शतद्रुनदी पर्यन्तं वर्द्धयामास। एतावतो राष्ट्रस्य प्रभुरप्यसौ 'मूर्तिभञ्जक' ('बुतशिकन') विरुदेनैवात्मानं धन्यं मेने। चित्रं विधेर्विलसितम्।

***

# नादिरशाहस्याक्रमणम्

भारतवर्षमिदमात्मनो धनशालितया सज्जनतया उदारतया सहनशीलतया च दुष्टदस्यूनां दृष्टिं दु:खाकरोति स्म चिरादिति विदितमितिहासविदाम्। वयं विपुलपरिश्रमेण सत्यतया च धनमध्यगच्छाम किन्तु नान्वतिष्ठाम तद्रक्षायै प्रयत्नम्। अस्माभि: सञ्चितं सुवर्णं सर्वत: किन्तु तद्रक्षणाय लोहस्यास्त्रशस्त्राणि नोत्पादितानि। परिणामोयं समभवद् यद् ये किल धने विद्यायां चास्मत्त: प्रहीणा आसंस्तेऽप्युद्दण्डतयाऽस्मदावासमाचक्रमु:। सर्वस्वं चास्माकमपहृत्य हरिणीप्लुतै: पलायमाना नि:शङ्कमगमन्नात्मगृहान्। आसीदावश्यकता यद्यथा वयं ज्ञानार्जनाय धनसञ्चयाय चाहर्निशं पर्यश्राम्याम तथा तद्रक्षाया अप्युपाया: कर्तव्या आसन्, किन्तु शान्तिमयी नि:स्पृहता नैवं कर्तुमदिशदवसरम्। इदमेवासीत्कारणं यदस्माकमशिक्षितोऽसभ्यश्च प्रतिवेशी अफगानिस्तानपरिसरो न केवलमानन्देनाऽऽत्मरक्षामेवाऽकरोत्, अपि तु समये समयेऽस्माकं देशं प्रविश्य लुण्ठनेऽप्यभूत्प्रवृत्त:। न च कश्चित्तमेनं दमयितुं प्राभवत्। प्रत्युत य: कोपि भारतं प्रविविक्षुरत्राऽऽगतस्तस्यैव लोकातिशायिन्या: सभ्यताया: कारणात् अग्रे समुपसृत्य स्वागतमिवाकार्षीत्। सादरं स्थानं दत्त्वा स्वकीयं वस्त्रं तेन पर्यधापयत्, स्वकीयं जठरमवमुष्य तस्मै भोजनमदात्, भ्रातरमिव च तमेनममानयत्।

पर्यवसानमिदमभूद्यद् यदा वयमशयिष्महि, प्रत्युत सानन्दं शयनमपि यावन्नापूर्यत, तत:पूर्वमेवास्माकमतिथिभिर्वयमाक्रान्ता:, हस्तौ पादौ च निगडयित्वा भूमौ वयमापातिता:। अपानीयत सर्वस्वमस्माकम्। क्षुत्क्षामा: समभूम, अलुप्यत विह्वलानां नो धर्म–कर्मणोरपि चिन्ता। समुदभवद्भ्रात्रोरपि मिथ: कलह:। स्वर्णमयं भारतं भस्मसादभूत्, न चेदमेकदा, अपि तु मुहुर्मुहु:। अस्माकमभूदियं परिस्थितिर्यदा चंगेजखानो भारतं प्राविशत्, तैमूरो यदा घातशूरोऽ–भवत्। किन्त्वस्मिन् वारे सर्वतोऽधिका दु:स्थितिरभूद्यदा हि नादिरशाहो देशमिममास्कन्दत्। तद्दिनमनुस्मृत्य वेपते हृदयम्, सीदत्यन्तरात्मा। इदानीमपि यदा वयं घोरमन्यायमालोकयामस्तदा 'नादिरशाही' ति तमनुशोचाम:।

कम्बोजानाम् (बाह्लीकदेशस्य) मार्गेण सीमागिरिमालामुल्लङ्घ्य पञ्चनदान्प्रावि–शन्नादिरशाह:। नौसेतुभि: सिन्धुमातीर्याऽभूदयमग्रेसर:। लाहोरप्रान्तशासक: केवलं यत्किञ्चिद–करोदस्य प्रतिरोधम्, नैनं विहाय कश्चिदन्योऽस्य सम्मुखमप्यगात्। नि:शङ्कमग्रे प्रसृतोऽसौ समुदलंघयद्यमुनाम्, इन्द्रप्रस्थात्पञ्चाशत्क्रोशान्दूरमयमुपागात्। एतस्यास्कन्दनमाकर्ण्य दिल्ली–शासको मुहम्मदशाहो व्याकुलोऽभूत्। हन्त! विलासरसमग्नस्य क्वाऽस्य नृत्यगोष्ठी कुत्र च नादिरशाहस्य रणोन्मत्ता वीरवाहिनी।

अतियत्नैरिन्द्रप्रस्थीया सेना समरसम्मुखीनाभूत्। दिल्लीसम्राट् आसफजाहं सह नीत्वा समुपागात्करनालम्, अध्यवात्सीच्च सुदृढं दुर्गम्। अवधप्रान्तस्य शासकः (सूबेदार) सआदत-खनोऽपि साहाय्याय समागात्। समभूद् द्वयोः सेनयोः सम्प्रहारः। श्रूयते आसफजाहः शत्रुणा सह गूढं समगंस्त, अत एव नासौ सम्यगयुद्ध। फलमभूद् यत्सम्राजः सेना सर्वथा व्यनश्यत्, प्रधानसेनापतिः 'खानदौराँ' समरेऽशयिष्ट। सआदतखानो निगडितोऽभूत्। हतोत्साहो मुहम्मदशाहो व्यसर्जयत्सन्धेः प्रस्तावम्। आसफजाहो राजदूतो भूत्वा प्रायासीन्नादिरशाहसन्निकटम्। नादिरशाहो महताऽऽदरेण तमामन्त्रयत। अभूदुभयोः समागमः, आसीदेकस्मिन्नेव नगरे द्वयोरावासः। नादिरशाहस्यानीकिनी निर्भ्रममभ्रमन्नगरमितस्ततः, किन्तु नादिर शाहः सुदृढमिमामाज्ञां प्रासारयन्नगरे यत्तदा न काचित्क्रूरता दस्युता वा भवेत्। प्रबन्धार्थमेतस्य सोऽयं प्राहरिकानपि स्थाने-स्थाने-ऽतिष्ठिपत्।

एवं सत्यपि दिल्लीस्था प्रजा नाऽभ्यरोचयन्नादिरशाहम्। प्रयत्नाः कृताः, प्रजा किन्तु नौपेति स्म प्रणयं कथञ्चित्। यो हि निष्कारणं निर्वैरं चाक्रामत्, निर्बलतावशाच्च योऽस्मान्वशे चकार, दीना दुर्बलाः सन्तोपि प्रजाजनाः कथं तमेनमादरदृशा पश्येयुः ?

द्वितीयस्मिन्दिने मिथ्यैवोद्घोषः प्रासरत्-नादिरशाहः पञ्चत्वं गत इति। प्रसिद्धः किल भारतीयो गड्डरिकाप्रवाहः। न कश्चिद्व्यचारयन्नापि च तथ्यं निरधारयत्कोपि। मत्तप्रलापः सोयं गृहाद्गृहं प्रासरत्। अक्षुभन्भारतीया युगपदेव। नादिरशाहस्य सैनिका यत्रैवालक्ष्यन्त तत्रैव- ते समाक्राम्यन्त भारतीयैः। पशुमारममार्यन्त सैनिकाः। न कोऽपि सम्राट्सैन्याधिकृतस्तदवर्जयत्। इन्द्रप्रस्थीयानामेतावन्नीचताऽभूद् यत्प्राहरिका अपि वराकाः खड्गधारायामवहन्।

नादिरशाहो व्यतिकरमिममवरोद्धुं प्रायतत पूर्वम्, किन्तु नाभूत्सफलः। अखिलां निशामचलत्सोयमुपद्रवः, प्रत्युत शनैः शनैरुपचयं भेजे। प्रातः सैन्धवमारूढोऽसौ बहिरभ्राम्यन्न-गरस्य। आसीत्तस्य विचारो यन्मां प्रत्यक्षीकृत्य भवेयुर्भारतीयसैनिकाः शान्ताः। रथ्यासु भ्राम्यन् विलोकयामासासौ निजसैनिकानां शवान्। किन्तु प्रशंसामस्तस्य धैर्यं यन्नायं प्रकृतिदुर्दमोपि किञ्चिदनिष्टं कर्तुमैषीत्। परं लोकानां दौरात्म्यमिदमभूद् यद्भवनेभ्यः प्राक्षिप्यन्त पाषाणा नादिरशाहस्योपरिष्टात्। किञ्चिदग्रेऽभिसरत्येव कश्चिन्नादिरशाहमभिलक्ष्य प्राक्षिपन्नालिकास्त्रम्। नादिरो दैवादरक्ष्यत, किन्तु तत्पार्श्वरक्षकः सेनाधिपतिर्विलोकयत्येव तस्मिंस्तत्रैव व्यपद्यत। इयमासीद्वीरपुरुषाणां सहनस्य सीमा अत एव प्रस्फुरदोष्ठोसौ सर्वसंहारस्य (कत्लेआम) प्राचारयदाज्ञाम्। प्रातःकालादारभ्य भूयांसं समयं यावत्प्राचरन्नरहत्याकाण्डः। न जानीमः कियन्तो गुणिनः सज्जनाश्च करवालतीर्थे न्यमज्जन्। विशसन-विध्वंसयोर्नासीत्परिसीमा। नगरमकारि बलिसात्, यत्र हि स्थानस्थानतः प्रवहन्त्यः शोणितापगा अपि न प्राभवन्निर्वापणे। अभूदुद्वेलः सर्वनाशस्य महार्णवः।

उचित एवायं दण्डो भारतीयानामनभिज्ञतायाः। प्रथमा सेयममीषां मूढता च कदर्यता च यन्नैभिः कायमनोधनैः संहत्य संयोधितो निजदेशस्य परिपन्थी, न परिरक्षिता जननी जन्मभूमिश्च

शत्रोरुपद्रवात्। ततः सर्वाधिका सेयमज्ञताभूद्यत् क्षुधितसिंह इव सोयं नादिरशाहो मुधैव प्रकोपितः। यद्येवं नाभविष्यत्तर्हि केवलं धनमेवादाय कदाचिन्नादिरो निजदेशं परावर्तिष्यत। अस्तु, अन्ते मुहम्मदशाहस्तदमात्यश्च प्रणामाञ्जलिभिर्नादिरशाहमशमयताम्। स हि हिंसाकाण्डस्य निरोधाज्ञा- मदिशत्। निजसेनाया उपरि तस्य कियानातङ्कोऽभूदित्येतावतैव परिज्ञायेत यत्तस्याऽऽज्ञाक्षरेषु निःसृतेष्वेव यो यादृक्परिस्थित्यामासीत्तादृगेव चित्राङ्कित इवावतस्थे। यदि कस्यचित्कर-वालः कन्धरामस्पृशत्तर्हि स तत्रैव न्यरुध्यत। किन्तु दिल्लीनिवासिनां दौर्भाग्यदुर्दिनं नात्रैव परिसमाप्यत। अद्यावधि रुधिरप्रवाहिणी खड्गधारा प्रावहत्तर्हि सम्प्रति धनाकर्षणाय सङ्घर्षः प्रावर्तत।

अयं नियोगः पुरा सआदतखानस्याधीनोभूत् किन्तु स देहलीं प्राप्यैव पञ्चत्वमयात्। ततस्तदिदं कार्यं सरबुलन्दखानस्य, ईरानदेशवासिनश्चैकस्यायत्तमक्रियत। द्वावपीमौ पूर्वत एव प्रजानां रक्तशोषणे प्रसिद्धावास्ताम्, तदुपरि नादिरशाहस्य निष्ठुरो नियोगः। घोरेणात्याचारेण समाकृष्यत सर्वतो द्रविणम्। अश्रूयत सर्वतोऽब्रह्मण्यम्। किन्तु दीनानां दुःखस्य दर्शकः को वा दयालुरासीत्, व्याकुलानां व्यथावारकः को वा कारुणिकोऽभूत्?

सर्वतः पूर्वं साम्राज्यस्य कोषे मणिभूषणागारे चाधिकारोऽक्रियत। विश्वविश्रुतं मयूरसिंहासनं(तख्ते ताऊस) अप्यधिकृतमभूत्। एतदुत्तरं धनकुबेरैः श्रेष्ठिभिर्निजसर्वस्वं समार्प्यन्त तदनन्तर राजकीयाधिकारिणामवसरः समागमत्। ततः साधारणश्रेणिकानाम्, अन्ते च दीनदुर्गतानागर्तिनाभूदव्याहतिः, तेऽपि नानाधा निर्दयमपीड्यन्त।

विरल एव स जनोऽवशिष्येत यो हि न भवेद्भाजनमत्याचाराणाम्। बहुभिः पर्यत्यज्यन्त प्राणाः। बहवस्तु भीता आत्महत्यामनुतस्थुः। प्रतिगृहमश्रूयत करुणाक्रन्दनम्। एकैकशो जना अपीड्यन्त, इच्छापूर्तावसत्याम् एतदतिरिक्तं प्रान्ताध्यक्षेभ्यः (सूबेदार) कररूपेण धनमपाकृष्यत। येन केनापि प्रकारेण धनं सर्वतः समाह्रियतेति सर्वस्य सारः।

गमनसमये नादिरशाहो मुहम्मदशाहेन सन्धिमस्थापयत्। मुहम्मदशाहस्य दुहित्रा पुत्रस्य विवाहमकरोत्। सिंहासनमधिष्ठाप्य निजकरदत्तैर्भूषणैरभूषयन्मुहम्मदशाहम्। सोऽयं दग्धेष्वङ्गेषु, क्षारप्रेक्षपो नूनम् । किन्तु नरवराहस्य मुहम्मदशाहस्य कुत्रैतत्परिज्ञानम्? जीवन्नसौ मुक्त इत्येव तस्य कृते कुशलम्।

अष्टपञ्चाशद्दिनानि भारतमापीड्य परावर्तिष्ट नादिरशाहो निजदेशम्। कोटिशो मुद्राः, कोटिकोटिमुद्राणां कनक-रजत पात्राणि, भूषणानि च सह समाहरत्सोयम्। महामूल्या हस्तिनो वाजिनो दासेरकाश्चाप्यनीयन्त। शताधिकाः शिल्पिनोऽपि भारतादीरानं प्राहीयन्त तदा।

नादिरशाहस्य प्रस्थानादनन्तरं भूयांसि दिनानि मृत्योरिव शान्तिमन्वभवत्सेयं देहली। निवर्तने नादिरशाहस्य यदा किल धन-जनानां हानिरनुमिता जनैस्तदा तेषां मस्तिष्कमभूद् घूर्णितम्। सर्वमन्यदनुचिन्तितं स्यात् किन्तु नेदं कदापि संप्रधारितं तैर्यत् कतिकोटिमिता अपि भारतवासिनः किमिति निर्बलाः पशव इव निर्दयं न्यहन्यन्त, अनाथा इव निर्बाधमबाध्यन्त,

निःसहाया इव निःशकमलुण्ठ्यन्त ? किन्नासीद् भारतवासिनामपि हस्तपादम् ? किमासन्नेषामपि शरीरे प्राणाः ? किमेतैरप्यासीदपीतं मातुः स्तन्यम् ? निःसंशयं सर्वमिदमेषामासीदेव, न्यूनतासीत्केवलमेकतायाः, आवश्यकतासीन्मिथः सहानुभूतेः, अपेक्षासीत्परस्परं संघटनस्य। वक्तुं वयमजानीम किन्तु नैकेन स्वरेण। योद्धुं वयं प्राभूम किन्तु न मिथः सङ्गत्य। फलमिदमेवाभूद् यद्वयमेकैकमपीड्यामहि, निःशङ्कमलुण्ठ्यामहि, निर्दयं चाहन्यामहि।

निर्गते नादिरशाहे महता विलम्बेन सम्राजस्तत्सामन्तानां च विद्राणाभून्निद्रा। यथैव चक्षुषी विस्फार्य विलोकितं तथैव सर्वतः सर्वनाशः सम्मुखगोऽभवत्। सेना नाममात्रायासीत्, कोषश्च निःशेषः। दक्षिणतो महाराष्ट्रा महता समारोहेण निजप्राबल्यमस्थापयन् लब्धे चावसरे न पर्यशेषयन् लुण्ठनादिकमपि। केवलमासीदवशिष्टमिदमुत्तरभारतम्, तदिदं नादिरशाहस्तथा व्यमर्द्दयन्न यथा महाराष्ट्रा अपि प्राभवन्विपोथयितुम्। तदुपर्यपि पारस्परिकः संघर्षो व्यजृम्भत, यस्य परिणामः सोयमभूद् यदुत्तरभारतमिदं मोगलानां हस्तान्निःसृत्य पूर्वं सिखानां ततश्चाङ्गलानां हस्तक्रीडनमभूत्।

***

# मोगलकालः

इतिहासकीर्तितकार्याणामार्याणां स्वतन्त्रशासनस्य तु कथा पृथक्पथा तावत्, किन्तु वैदेशिकविभारतस्य भारतस्येतिहासे मोगलानां शासनकालो विशेषेण प्रसिद्धो व्यपदिश्येत। अस्मिन् समयेऽपरिज्ञातनिवेशेषु दूरदूरप्रदेशेष्वपि भारतस्य कीर्तिकथा प्रासरत्। यूरोपाद् बहवो यात्रिणो मोगलसम्राजां राजसभामालोकयितुमिहागच्छन् ये तेषां वैभवं प्रत्यक्षीकृत्य समभूवन्विस्मिताः। मोगलानां साम्राज्यं १५२६ तम ख्रिष्टसंवत्सरादारभ्य १८०३ तमं वर्षं यावत्प्राचलत्। बाबर आसीत् प्रथमो मोगलसम्राट्। अयं यथा शूरस्तथा विद्वानप्यासीत्। अस्य शिल्पकलाविलासोऽप्युल्लेखितुं शक्येत नूनम्। अनेन ह्यात्मचरिते विवृतं यत् 'मया निजसौधस्य निर्मापणाय ६८० शिल्पकारा न्ययुज्यन्त। तदतिरिक्तम्– आगरा, सीकरी प्रभृतिस्थानेष्वपि १५९१ शिल्पिनः प्रत्यहमकुर्वन् स्थापत्यकार्यम्। किन्तु प्राक्कलाकवलनशीलस्य कालस्य प्रभावान्नाधुना बाबरस्य हुमाँयोश्चापि समयस्य किञ्चिदुपलभ्यते शिल्पकार्यम्।

बाबरादुत्तरं हुमायुस्तत्सिंहासनमधितष्ठौ। आसीदयं ज्योतिःशास्त्रप्रणयी। एष हि नक्षत्रगणनां कृत्वा तदनुसारमेवाऽध्यवेशयद्राजसभाम्। श्रूयते यदेकदा कश्चिद् भस्त्राऽऽसेची हुमायोः प्राणरक्षामकरोत्। ततश्च देहलीमुपगतो हुमायुः कृतज्ञतया घण्टात्रयस्य कृते भस्त्रासेचकमिममकरोद् भारतसम्राजम्। अयं तु निजभस्त्राया व्यधापयद् गोलाकारान् खण्डान् ये हि निजनाममुद्रयाङ्किता नाणक–रूपेण प्रचालितास्तेनाऽऽत्मस्मरणार्थम्।

हुमायोरनन्तरं तत्सूनुरकबरो भारतस्याभूत्सम्राट्। एष एव मोगलमालायां सुमेरुरिव महाँश्च कीर्तिमाँश्च। संसारे ये ये कीर्तिशालिनः सम्राजः पूर्वमभूवंस्तेष्वकबरस्य नाम सप्रशंसमुपकीर्त्यते कथाकोविदैः। अयमासीन्महाविचक्षणः, किन्तु नाभूदयमक्षराणां पाठकलेखकः। चित्रं, न प्रबभूव सोयं स्वहस्ताक्षराण्यपि कर्तुम्। आगरानगरस्य रक्तपाषाणनिर्मितं दुर्गमकबरेणैव निर्मापितम्। सिकन्दरास्थानस्य पाषाणोपरि कृतमुत्करणशिल्पम्, सीकरी प्रदेशस्य राजसौधास्तस्यैव शिल्पकलामार्मिकत्वमद्यापि सूचयन्ति, येषां शिल्प–नैपुण्यमवलोकयन्तश्चित्रीयन्ते विचक्षणचूडामणयोपि। मर्मरपाषाणे तादृक्सूक्ष्मतया लताविटपाः, पुष्पपत्राणि, तद्गतनाड्यश्चोत्कीर्णा येषामग्रतस्तूलिकालिखितं चित्रमप्यधरायते। पाषाणनिर्मितं जालशिल्पंनिर्निमेषनयनमालोकनीयमेव। अकबरस्य समये समभूवँल्लोकैकसारा बहवश्चित्रकाराः। सम्पूर्णेऽपि सप्ताहे यावन्ति निरमीयन्त चित्राणि, चित्रमार्मिकः परिश्रमी चाकबरस्तान्येकदिनमात्रे सूक्ष्मतया पर्यैक्षत स्वयमेव। अदाच्च चित्रकारेभ्यस्तेषां योग्यतानुसारं पुरस्कारम्। कदाचित्कदाचिदकबरो हिन्दूनामिव पर्यधत्त वासांसि, आङ्क्यच्चालिकं चन्दनतिलकेन, अमण्डयच्च

कुण्डलाभ्यां कर्णयुगलम्। अस्य सभायामासन् भूमण्डलप्रसिद्धाः नव विद्वांसः। बीरबल-टोडरमल्लादयोऽस्यैव सभारत्नान्यासन् येषां कीर्तिकथयाङ्कितं भारतेतिवृत्तम्। अकबर-बीरबलयोश्चातुर्यपूर्णाः कथाः कथापटूनां कथानके एतावल्लोकप्रियाः समभवन् यासां छायया प्रत्यहं नवनवाः कथाः परिकल्प्य कल्पनाकोविदैर्मूलकथासु मिश्रिताः। टोडरमल्लेनैव मन-सेरादिवस्तुपरिमाणानि, मील-विराह-विस्वादीनि भूपरिमाणानि गज-गिरहप्रभृतीनि वस्त्रादीनां च परिमाणानि नियतीकृतानीति प्रसिद्धम्। अकबरो विविधधर्माणामध्ययनं विधाय सार्वदैशिकं कञ्चन धर्ममवतारयितुमैच्छत्। तत्कृते पुस्तकाध्ययनस्याऽभावे विकल्परूपेण स धर्माचार्यैः सह सम्भाषणं कुरुते स्म। सीकरीसौधे तत् स्थानमद्यापि दर्शयन्ति तत्रत्याः पर्यटकप्रदर्शकाः (गाइड) यत्र मध्येऽवस्थितोऽकबरः समन्ततोऽवस्थितानां तत्तत्सम्प्रदायपण्डितानां भाषणान्यशृणोत् तान्यवाधारयत् अवाऽऽलोचयच्च। आसीदयमतिसंयतचर्यः। एतस्य मन्त्रिणा अबुलफजलेन लिखितम्- 'सम्राड् अहोरात्रे एकदा भुङ्क्ते, क्षुधाशेष एव च भोजनाद्धस्तमाकोचयति। शोरक-शीतलीकृतं च गङ्गाजलमयमापिबति'। अकबरो रजन्यामशेत षड् घण्टाकालम्, समग्रं दिवसमयमकरोदश्रान्तभावेन सम्राज्यकार्याणि। रात्रौ चाऽयमध्यवेशयत्पूर्वोक्तां विदुषां सभां यत्र मनोविनोदेन साकमभूदस्य प्रचुरो ज्ञानलाभः। अयं हि समग्रहीदशेषाणामपि मार्मिकाणां सम्मतिम्, किन्तु पर्यन्ते स्वबुद्ध्या सूक्ष्ममालोक्यैव किञ्चिदपि कार्यमकरोत्। गुणपरीक्षको नीतिपटुश्चायम् आम्बेर-योधपुरादिशासकानां क्षत्रियाणामकरोदादरं ददौ च तेभ्यो भूयांसि पदानि प्रतिष्ठां च। अभूदस्य भूयोभी राजन्यैः सहाप्रदर्शितभेदं वैवाहिकसम्बन्धोपि। किन्तु सोयं प्रकारः कूटनीतेरेव, यया हि राजन्याः स्वमर्यादां विस्मृत्य सर्वदार्थमेषामनुगताः स्युरिति हि पुरावृत्तसमालोचकाः प्रोचुः।

सम्राजोऽकबरस्य तनयः समभूज्जहाँगीरः। बाल्येऽस्य नामासीत्सलीम इति किन्तु साम्राज्यसिहांसनमधिष्ठितस्याऽस्याभूत्पूर्वमीरितं नाम। एतस्य महिषी 'नूरजहाँ' इतिहासे सुप्रसिद्धा। यद्यपि सेयमासीन्महिला, किन्तु प्रतिभाऽमुष्या नाभूत्साधारणी। सेयं साम्राज्यस्य कार्यं सम्यगबुध्यत पर्यचालयच्च शासनसूत्रम्। पाटला (तरुणी) पुष्पाणां सौरभसारः (गुलाब का इत्र) सर्वतः प्रथममनयैव समुद्भावित इति लोकेषु प्रसिद्धम्।

भारतसाम्राज्यमधिवहताऽनेन 'न्यायशृङ्खला' नाम्ना सुवर्णस्यैका महती शृङ्खला लम्बितासीद्या कति 'मन' मित चामीकरनिर्मिता। यस्या एकः प्रान्तः शाह-गुल्मे ('शाहबुर्ज') द्वितीयोऽञ्चलश्च दुर्गाद् बहिर्यमुनातटे पाषाणस्तम्भेनैकेनाबद्ध आसीत्। सेयं षष्टि 'गज' परिमिताऽभूत् प्रत्येकहस्तद्वये ('गज') चैकैका-घण्टाः समबध्यन्त, या ह्यञ्चलेऽवकर्षण-कालमेव वेगतो रणरणायन्ते स्म। सम्राजा समभूत्सर्वतो घोषितं यद् यस्य किल जनस्याभियोगो न सम्यगालोचितो भवेदधिकरणे, (कचहरी) स हि मत्समीपे निर्णयार्थमिमां शृङ्खलां परिचाल-येत्स्वैरम्। 'हाकिन्स' नाम्नेतिहासलेखकेन लिखितमितिवृत्ते- 'जहाँगीरस्य समये त्रीणि सहस्त्रं सैन्याधिकृताः (मनसबदारी) अभूवन् येषामधिकारे त्रिलक्षमिता सेना सर्वदा समनह्यत।

साम्राज्यकोषेऽनन्तो धनरत्नराशिरासीत्। हर्म्यमालायां चास्य षट्त्रिंशत्सहस्रं दास्यः परिचारकाश्चा-सन्नियुक्ताः। सम्राजोऽस्याभूवन् द्वादशसहस्रं कुञ्जराः, येषु त्रिशतं केवलं सम्राज एव सेवामकुर्वन्। प्रत्यहं सभायां पञ्चायुतमितानां राजतमुद्राणामासीद् व्ययः। राजहर्म्येषु च मुद्राणां त्रीण्ययुतमव्ययीत्।

जहाँगीरादुत्तरं तत्तनयः शाहजहाँ सिंहासनमध्यास्त। एष हि बहून् राजसौधान्निरमापयत्। इन्द्रप्रस्थ (देहली) नगरमयमेव पुनः पर्यवासयत्। यमुनातटे रक्तपाषाणैः सोयं निरमापयद् दुर्गमं दुर्गम्, यद्धि पञ्चाशत्लक्षमुद्राणां व्ययेन विंशतिवत्सरैः पूर्णमभूत्। दुर्गस्य प्रथमां कक्ष्यामतीत्य लभ्यते स्म तोरणद्वारं यदुपरि सर्वदा राजदुन्दुभयः सोन्नाहमनदन्। तत उत्तरं पूर्वदिशि साधारणराज-सभा (दरबारे आम) तत्पृष्ठतश्च विशिष्टा राजसभा (दरबारे खास) या हि मर्मरशिलाभिर्मनोज्ञं निर्मिता सा-खल्वासीत् पूर्वं सर्वतो रजताऽवगुण्ठिता।

अस्यामेव निहितमासीत् 'मयूरसिंहासनम्' (तख्ते ताउस)। सिंहासनस्यास्य विषये प्रसिद्धं यदेतस्य कृते- ८६ लक्षमुद्राणामुत्तमोत्तमरत्नानि न्यचीयन्त राजकोषतः। ततश्चतुर्दश-लक्षमुद्रा व्ययेनसप्तहस्तायतो नव-दशहस्तोन्नताश्च पट्टो निरमीयत। ततो मणिरचितानां द्वादशस्तम्भानामुपरि सिंहासनस्यास्य मौलिभागोस्थाप्यत। सिंहासनेऽस्मिन्नुभयतो विरच्येतां मयूरौ ययोरङ्गेषु साम्राज्यदुर्लभान्यद्भुताद्भुतरत्नान्यधीयन्त आरोहणाय चास्य त्रिपर्व सोपानमरच्यत यस्मिन्नपि-बहुमूल्य-मणयो व्यराजन्। कुशलैरपि शिल्पिभिः सप्तभिर्वत्सरैरिदमशक्यत पूरयितुम्। एतस्य निर्माणे एककोटिमुद्राणामभूद् व्ययः। आगरानगरे 'ताजमहल' नामकं महासौधमयमेव निजमहिष्याः स्मारकरूपे निरमपायत्, यद्धि विश्वविश्रुतेषु दर्शनीयवस्तुष्वन्यतमम्।

ततः शाहजहाँतनय औरङ्गजेबो भारतसाम्राज्यमग्रहीत्। एष हि निजभ्रातॄन्निहत्य कूटनीत्या सिंहासनमारोहत्। संयतेऽस्य जीवने भोगनिवृत्तेरेव भावाः सर्वतो व्यराजन्। नास्य मनः प्रासज्यत कुत्रचित्प्रमोदे हासे विलासे च। नायं निजशरीरकृत्येषु राजकोषस्यैकामपि मुद्रां व्यवाहरत्। उष्णीषिकाः सेवित्वा, धर्मपुस्तकस्य प्रतिलिपिं कृत्वा च जीवनवृत्तिं निरवीवहत्। अपि प्राप्येत भूमण्डलेक्वाप्येवंविधः सम्राट्? आसीदस्य समये मोगलसाम्राज्यस्य सर्वाङ्गैः पूर्णता। पूर्णत्वे सति च यथा पुनः क्षयस्यारम्भो नैसर्गिकस्तथैवात्रापि समभवत्। आत्मनो धर्मस्य (यवनधर्मस्य) नृशंसतयापि प्रचारमन्विच्छन् सोयं भारतीयधर्मे क्रूरं व्यवहर्तुमारेभे। अन्य धार्मिकेभ्यो 'जजिया' नामकं करं सञ्जग्राह। देवमन्दिराणि ध्वंसयित्वा तत्स्थाने निजोपासनामन्दिराणि (मस्जिद) अतिष्ठिपत्। दिल्ली साम्राज्याभयकवचेषु जयपुराधिपतिप्रभृति क्षत्रियवीरेषु पदे पदे सन्देहमादधे। फलमिदमभूद् यदस्यान्तःशत्रवो बाह्यशत्रवश्च तथाविरभूवन् यथा यवनसाम्राज्यस्य मूलं सर्वथा शिथिलमेवाभूत्।

कोङ्कणप्रदेशे समुज्जृम्भमाणः श्रीमांश्छत्रपतिः शिवाजी औरङ्गजेबस्य प्रधानशत्रुरासीत्। हिन्दुत्वस्य रक्षायै अयमेव महाभागः प्राज्येपि दिल्ली साम्राज्ये विक्रमैकसारां निजखड्गधारां तथा तीक्ष्णीचकार यथा प्रबलमुज्जृम्भमाणोऽप्यौरङ्गजेबो न प्रबभूवात्मनो मनोरथं सम्पादयितुम्।

परिमितसैन्यावष्टम्भितस्यापि साहसबलोज्जृम्भितस्यास्य नीतिचातुर्येण च समुचितावसरज्ञतया च शनैः शनैर्दक्षिणदिङ्मण्डलेऽस्य राज्यमेवाधिष्ठितमभूत्। अयं यथा वीरस्तथा धर्मधीरोऽप्येक एवासीत् तत एव, एकमात्रस्याप्यस्य विस्फुरणेनान्तर्धूमायमानो विरोधवह्निर्भारते तथा प्रजज्वाल यथा दिल्लीसाम्राज्यस्याभूदत्रैव परिसमाप्तिः, कामं नाममात्रार्थमग्रेपि गण्यतां कैश्चित्तत्। एतस्यैव कारणं यन्न केवलं महाराष्ट्र एव, अपि तु वक्षसि विस्फुरद्भारतीयार्यरक्तबिन्दवो हिन्दवो निखिला अपि महाभागस्यास्य कृते समुद्वहन्ति नूनं निःसीमानमभिमानम्।

**परिस्थिति-विमर्शः**

मोगलानां समये पान-भोजनादिर्जीवनोपयोगिसामग्री समधिकं समर्घाऽऽसीत्।

दुग्धं, दधि च गृहे गृहे, नगरे नगरे सुलभं समर्घं चाभूत्। येषु प्राचीनाभिलेखेषु।

अकबरसामयिकं वस्तुपरिमाणमासाद्यततेषु घृतं दशाणकाधिक मुद्रया एक-'मन' मितमालिखितम्। यैर्भाग्यवद्भिः स्वसमये एकमुद्राया घृतं काचकूपिकायामालोकितं ते दयनीयाः कथमिदं विश्वस्युः ? 'बर्नियर' नामकेन वैदेशिकयात्रिणा लिखितम्- ''अस्मिन् देशे जम्वीरशार्करं[1] दधि चातिशय्य न किञ्चिद्विशिष्टं भोज्यम्। मोगलसम्राजः समारोपयन्बहुशो विलासोपवनानि। आखेटक्रीडाया अपि तेऽभूवन् रसिकाः। अकबरसम्राट् प्रकाममभिरोचयति स्म 'पोलो' क्रीडाम्। जहाँगीरः कपोतपालनव्यसनी समभूत्। शाहजहाँ रूपपरिवर्तनपूर्विकां नटक्रीडां रुच्या- स्पृहयाञ्चकार। मोगलानां साम्राज्ये दीनपान्थानां सुखाऽऽवासाय पथिकाऽऽवासाः (सराय) स्थाप्यन्ते स्म। यत्र तेषां सुखोपलब्धये यथाभिलषितं शीतोष्णजलयोरासीत्प्रबन्धः। न केवलमेतदेव, पान्थानां कृते भोजनस्य, आस्तरणादेश्चापि प्रबन्धः पान्थावासेषु तेष्वक्रियत। जहाँगीरः प्राचीन 'संसरणानां' (सड़क) जीर्णोद्धारं कृत्वा समरचयत्तेषां सुव्यवस्थाम्। अबुलफजलेनाङ्कितमितिहासे-'सर्वेषामेव शिक्षोचितजातीनां बालानां कृते नवयुवकानां च कृते समभूवंस्तदा पाठशालाः। तस्मिन् समये विद्यालयानां कृते भारतवर्षमिदमासीत्सर्वतः प्रसिद्धम्।

कतिचिज्जनानामयं निरूढोस्ति विचारो यन्मोगलसम्राजो रात्रिन्दिवं भोगविलासेष्वेवामज्जन्। किन्त्वयं तेषां भ्रमः। मोगलसम्राजो महापराक्रमाः परिश्रमशीला उदाराशयाश्चाभूवन्। एत एव साम्राज्यस्य सर्वप्रधानानि सेनाध्यक्षा एत एव च सर्वोपरितना न्यायाधीशा आसन्। नासीदीदृशः साम्राज्यस्य कोपि विभागो यो हि तेषां निरीक्षणतो व्यत्यरिच्यत। आसीदियं तेषां दिनचर्या-तेह्यतिप्रत्यूषेऽजागरुः ततः सौधगवाक्षमधिष्ठाय प्रतीक्षमाणाभ्यो निजप्रजाभ्यो दर्शनमददुः। प्रणमन्त्यश्च प्रजाः प्रसङ्गतो विद्याकलाशिल्पादिकमात्मगतं सूचयन्त्यः स्वामिनो हृदि तत्प्रासङ्गिकमवकाशमासादयन्। विशेषप्रभावे तु तदात्व एव तत्प्रतिफलमलभन्त राजस्थानिक हिन्दुराजधानीष्वपि सेयं 'सलाम' प्रथा निजाभ्यस्तसम्राजामनुकरणेन प्राचरदद्यावधि।

किन्तु सेयमस्माकमतिप्राचीना भारतीया राजचर्या या हि लोकावर्जनधिया यवनसम्राड्भिरप्यनुगता। एतस्याः स्पष्टप्रमाणभूतम्, मोगलसामयिकतया तद्गतशब्दानुबद्धं प्रसिद्धमिदं पद्यमापामरमेव। राम झरोखे बैठकैं सबको मुजरा लेत। जैसी जाकी चाकरी वैसों ही फल देत। अस्तु, एतत्प्रजाप्रदर्शनोत्तरं किञ्चिद्विश्रम्य ते भोजनमकार्षुः। मध्याह्ने समभूद् राजसभा (दरबार), यस्यां प्रार्थनापत्राण्युपातिष्ठन्। रात्रौ चापि समध्यविशद्विशिष्टा सभा यस्यां गुप्तमन्त्रणाः कर्तव्यनिश्चयाश्च निरधार्यन्त। किं वा विशिष्य विस्तरेण, वक्तव्य-सारः सोयमेव यद् यवनसम्राजां समये नासीद्भारतवर्षस्य तावदधिकं शोचनीया दशा।

मोगलानां शासनकाल एव यूरोपस्य कतिपया जातयो व्यापारप्रसङ्गेन समाजग्मुर्भारत-वर्षम्। पुरा हि युरोपेन सह भारतस्य वाणिज्यं समभूत् 'एशियाई कोचक' द्वारा मिश्रमार्गेण वा। इटलीप्रदेशस्य वेनिसनगरं व्यवसायस्यासीत्केन्द्रम्। 'कुस्तुन्तुनिया' हि व्यवसायादिविषयेष्ववहद् भूयसा महत्त्वम्। किन्तु कुस्तुन्तुनियोपरि यवनानामधिकारे जाते पूर्वोक्ताः स्थलमार्गाः प्रायोन्यरुध्यन्तैव। तत एव-युरोपीयाः समुद्र-मार्गस्य शरणमगृह्णन्। पोर्तगालस्य नाविको वास्को दि-गामा सर्वतः प्रथमं भारतमुपागमत्। तदनन्तरं तु युरोपस्य वाणिज्यं पौर्तगालीयानामेवाभूद्धस्त-गतम्। ततः शनैरुपातिष्ठन् डचजातीयाः ततो गौराङ्गाः (आङ्गलाः) तदनन्तरं च फ्रान्सवासिनः।

किन्तु न कस्यचिदप्यपयात्येकरसमयः समयः। समुपतस्थौ मोगलानामपि पतनकालः। औरङ्गजेबस्य समय एव छत्रपतिः शिवाजी दक्षिणस्यामध्यतिष्ठिपन्महाराष्ट्रराज्यम्। पञ्चनदेषु सिक्खाः प्राबल्यं भेजुः। अवधानां वङ्गानां च प्रान्तीयशासकाः (सूबेदार) स्वतन्त्रतया 'नबाब' पदमधारयन्। दक्षिणभारते निजामोपि निजाधिकारं प्रसार्य स्थापितवान् स्वतन्त्रं राज्यम्। किन्तु नेमान्यपि राज्यानि चिरमपारयन् निर्वाहयितुमात्मनः स्वतन्त्रताम्। एतानि हि पराबभूवुरंग्रेजा ये किल वाणिज्यप्रसङ्गेन समाययुर्भारतमिदम्। अङ्गरेजानां यः सङ्घो व्यापारं प्रसारयितुमिहाऽऽ-गात्तस्यासीन्नामधेयम् 'ईस्ट इण्डिया कम्पनी'। एष हि स्थाने स्थाने निजव्यापारकेन्द्राण्यस्थापयत्। निभृतनिभृतं च सोयं सङ्घो वाणिज्यव्यपदेशेन स्वीयां शक्तिमवर्धयत्। तत्तत्प्रान्तीयराज्या-धिकारिभिः सह सम्पर्कं भेजे। षड्यन्त्रैस्तेषु भेदं कृत्वा दुर्बलयामास तेषां शक्तिम्, प्रवर्धयामास चात्मनोधिकारान्। सर्वतः प्रथमं क्लाइवो वङ्गानां शासकं सिराजुद्दौलां पराभूय स्थापितवा-नङ्ग्रेजानामधिकारं वङ्गप्रदेशे। ततो 'मार्क्विस आफ वेलेस्ली' तामिमां प्रभुतां प्रवर्धयामास शतमुखम्। ततो लार्ड हार्डिञ्जो, डलहौजी च द्वावपीमौ सिक्खानामपि शासनमपजह्रतुः। अभूदेकमात्रमङ्गरेजानमिवाधिकारो भारतेऽस्मिन्।

भेदनीत्या परतन्त्रीकृते राज्ये न सहसैवाधिगन्तुं शक्या लोकरुचिः। अत एव ह्यतिसा-धारणं धार्मिकव्यपदेशमादाय गौराङ्गाधिकृतसैनिकेषूद्बभूव विस्फुलिङ्गो विरोधाग्नेः। अयमेव हि १८५७ तमे ख्रिष्टाब्दे राजविद्रोहानलस्य भयानकं रूपमापेदे। सोयं चोयमुपप्लवः शनैः शनैर्भारतमात्रमानशे। अभूत्स्थाने स्थाने गौराङ्गाणां निधनम्। अभासत भारते अङ्गरेजानां प्रभुता सङ्कटापन्ना। किन्तु देशवासिनामेवोपजापेन सोयं विद्रोहः शनैः शान्तिमगात्। भृशं निगृहीता

अभूवन् विद्रोहिणोपि। परं विद्रोहिणां कम्पनी सेयं कम्पनी अपि विलयं भेजे। तत्स्थाने इङ्गलेण्डस्य महाराज्ञी विक्टोरिया भारतवर्षस्यास्य सम्राज्ञी बभूव। नीतिनिपुणैरङ्गरेजैर्धर्मादि-स्वातन्त्र्यम्, अन्यान्यांश्चाधिकारान्भारतीयानामुद्घोष्य वशीकृताखिला प्रजा। प्राचार्यत कलानां कौशलम्, प्रासार्यत विपुलो वाणिज्यव्यवसायः, अदर्श्यत वैज्ञानिकश्चमत्कारः, अक्रियत चातुर्येण शिक्षाप्रचारः, प्रादीयत धूमशकटि-गैसनलजलादिसाधनैः प्रजाभ्यो बहुतरा सुविधा। आसीदियं पूर्वविद्रोहदुःखैर्बहुतमं क्लिष्टा भारतीया जनता। अत एव निरुपद्रवामिमां सुविधा-मधिगत्य स्वल्पेनैव भृशं तुष्टाभूत्। विक्टोरिया महाराज्ञी भक्तिदृशा दृश्यते स्म। निरमीयन्त विक्टोरियाप्रशस्त्यादयः स्तुतयः। ततस्तत्पुत्र ऐड्वर्ड सप्तमः, तदनन्तरं तदात्मजः पञ्चमो जार्जः, साम्प्रतं च षष्ठो जार्जमहाभागो भारतस्यास्य साम्राज्यपदमधितिष्ठतीति जानन्त्येव सर्वेपि।

***

## स्वातन्त्र्यात् पूर्वं भारतस्य प्रान्ताः

भारतवर्षस्य प्राचीनं नाम आर्यावर्तः, यतो ह्यस्मिन्नार्याणामासीन्निवासः। भारतवर्षमिति तु पुरुवंशीयस्य दुष्यन्तपुत्रस्य महाप्रतापिनो भरतभूपतेर्नाम्ना प्रासिध्यत्। तस्य भूपतेर्विषये प्राह कालिदासः– 'रथेनाऽनुद्घातस्तिमित' इत्यादि। प्राचीनभारतापेक्षया वर्तमानभारतस्याऽऽयामो भूयस्तरामह्रसत्। अत एव हि तत्सीमस्वपि बहुतरमघटतान्तरम्। वर्तमानभौगोलिका एशिया-यूरोप-अफ्रीका-आस्ट्रेलिया-उत्तरामेरिका-दक्षिणामेरिका इति षट्सु भागेषु विभजन्ते भूमिमण्ड-लमिदम्। एते हि महाद्वीपा महासागरैः परितः परिवृताः, महासमुद्रैरेव चेमे परस्परं द्वीपान्त-राद्विभज्यन्ते। महासागराश्चेमे-हिन्दमहासागर, पैसिफिक, अटलाण्टिक, आर्कटिक, अण्टार्कटि-केति नाम्ना प्रख्याताः। अस्माकमिदं भारतवर्षम् 'एशिया' नामकस्य महाद्वीपस्यान्तरालवर्ति।

यस्मिन्नेशियामहाद्वीपे भारतवर्षमिदमस्माकमधितिष्ठति तस्मिन् आल्टाई, याब्लोनाय, स्टोनोवाय, प्रभृतयः प्रधानपर्वताः। दृश्यताम्, प्रान्तेस्मिन्निमौ काकेशस-क्यूवलनामानौ शैलौ। इतो दृश्यतामयम् एलबुर्जो हिन्दुकुशश्च महीधरौ। हिमालय-हिन्दुकुश-सुलेमानपर्वतश्रेणि-भिरेवेदमस्माकं भारतं वर्षमेशियाप्रदेशस्यान्यान्यदेशेभ्यः पृथक्कृतम्। यतो हि भारतवर्षस्योत्तरत-स्तदिमे पर्वताः, अवशिष्टासु तिसृषु दिक्षु च परिवृतो हिन्दमहासागरः।

नदीभिः पर्वतैश्चापि देशानां मिथः सीमा प्रविभक्ता भवति। भारतवर्षे चापि विन्ध्याचल-सतपुडा महीधराभ्यां मध्यशताभ्यां देशस्यास्य कृतौ द्वौ खण्डौ-उत्तरभारतं दक्षिणभारतं चेति। पश्चिमीयघाट- पूर्वीयघाट-अरावली-नीलगिरिभिरपि तस्य स्वभावतः खण्डा इव कृताः। एवमेव सिन्धु-गङ्गा-यमुना-ब्रह्मपुत्र-नर्मदा-ताप्ती-महानदी-गोदावरी-कृष्णा-कावेरीप्रभृति-भिर्नदीभिरपि देशेऽस्मिन्नवान्तरविभागः कृतः। गौराङ्गराजतन्त्रेण शासनसौकर्यार्थं भारतवर्षस्य विहिता निम्नलिखिता विभागाः-१. बम्बई, २. मद्रासः, ३. संयुक्तप्रान्तः, ४. विहारोत्कलौ (विहार उड़ीसा) ५. पञ्चनदः (पंजाब), ६. मध्यप्रदेश, विदर्भः (बरार) ७. आसामः, ८. ब्रह्मप्रदेशः (बर्मा), ९. वङ्गाः, १०. उत्तरपश्चिमसीमाप्रान्तश्चेति। इमे हि दश महान्तः प्रान्ताः। एतदतिरिक्ताः- देहली, ब्रिटिशविलोचिस्थानम्, अजमेर-मेरवाडा, कुर्गः, अण्डमानद्वीप-समूहश्चेति पञ्च लघूनि मण्डलानि।

भारतवर्षस्य भूमिरत्यन्तमुर्वरा। अतएवात्रत्यो व्यवसायः प्रधानं कृषिः। किन्तु वर्तमानेन भौतिकविज्ञानेन यन्त्रकार्यालयानामप्युन्नतिरापादि। अस्माकं देशेऽनुमानतोऽनेक शतं यन्त्र कार्यालयाः (मिल)। मोहमयी-अहमदाबाद-नागपुरेषु सन्ति कार्पासकर्मशालाः, कलकत्ताञ्चले 'जूट' अथवा 'पाट' इति ख्यातस्य वस्तुनोऽपि कर्मशालाः सन्ति। कृष्णाङ्गार (कोयला) स्य तु बह्व्यः कर्मशालाः।

प्राचीनकालमारभ्यैव भारतवर्षमिदं कलाकौशलाय सुप्रसिद्धम्। साम्प्रतमपि तथैव कलाकौशलं विद्यत इति यद्यपि न शक्यते वक्तुम्। क्व सन्ति सूक्ष्मातिसूक्ष्मसूत्रवातारो यैर्निर्मिता समग्रापि वस्त्रसंहतिः ('थान') एकस्यामेलायां समायात्। यस्यां वस्त्रसंहतौ समकर्तितदूर्वाक्षेत्रोप-र्यास्तृतायां न स्पष्टं प्रतीयेत यद्वस्त्रमास्तृतम्, उत यामिन्याः सोयं नीहारः। लेखनीमुखं सहजभावेन परिचालयन्त एव ये मनुष्यस्याऽपि कलामाकृतिमङ्कितवन्तस्तादृशाः क्व सन्ति चित्रशिल्पिनः, तथापि कतिपयेषु तीर्थस्थानेष्वन्यान्यनगरेषु साम्प्रतमपि शिल्पकार्याणि भवन्त्येव। एकस्मिंस्तण्डुले सम्पूर्णमपि 'दोहा' पद्यं लिखन्तः सन्ति साम्प्रतमपि शिल्पिनः। यन्त्रनिर्मितानां शस्त्राणां चित्रादीनां च निजकरकौशलेनोत्पादयितारोऽद्यापि भारतेऽस्मिन्नुपलभ्यन्त एव राजस्थानेषु केषुचिच्छिल्पिनः। दिल्ली-मुर्शिदाबाद-ढाका-लखनऊ-अहमदाबाद-बनारस-जयपुर-श्रीनगर प्रभृतीनि स्थलानि स्वस्वकलाकौशलाय प्रख्यातानि। अन्यत्तु सर्वं यन्त्रैरेव क्रियते।

भारतवर्षमिदं देशान्तरेषु विशेषतो योरपद्वीपे- कार्पास-शण-तण्डुल-तेलहन-गोधूम-पशुचर्म-अशोधित धातु- ऊर्णा-वेसवार ('मसाले') प्रभृतीन् प्रेषयति। द्वीपान्तरेभ्यश्च सुवर्ण-रजत-वस्त्र-ताम्र-लौह-लौहसार (फौलाद) यन्त्राणि (मशीन)- तैल- काचनिर्मितवस्तु-कौशेय-वैदेशिकौषधादीनि देशेऽस्मिन्नायान्ति।

साम्प्रतमेतेषां प्रान्तानामुपरि दीयतां दृष्टिः। गृह्यतां सर्वतः प्रथममयं मध्यप्रदेशो विदर्भश्च। मध्यप्रदेशे गोधूमतण्डुलौ, विदर्भे जवाराढकौ लोकानां मुख्यतया भोज्यम्। विदर्भे नागपुरे च कार्पासो भवति बाहुल्येन। इयममरावती, अयमकोला, एष हिङ्गनघाटः, एतेषु हि स्थलेषु भूयान् कार्पासस्य व्यवसायः। अत एव हि नागपुरमिदं वस्त्रवानयन्त्राणां कृते विश्वतः प्रथितम्। बुरहानपुरमिदं पुरातनं नगरम्, एतद्धि सौवर्णसूत्रनिर्मितवस्त्राणां (जरी के कपड़े) कृते भारते प्रसिद्धम्।

इदानीं नगरेषु कालिकातानगरमुपगम्यताम्। इदं नगरं वङ्गानां राजधानी। पूर्वं तु सर्वस्यापि भारतस्याभूदिदं राजधानी, किन्तु साम्प्रतं भारतवर्षस्य राजधानी इन्द्रप्रस्थम् (देहली)। वङ्गा हि नदीनां बाहुल्यात्प्रभूतजलाः, अत एवात्र मत्स्यानामपि समर्घता। तत एव तण्डुला मत्स्याश्चाप्यत्रत्यानां प्रधानं भोजनम्। गृहाः सर्वेपीष्टकचिताः, नास्यां धरायां पाषाणाः सुलभाः। धनिकाः किल पोतानापूर्य मद्रासदेशतः पाषाणानिह समानयन्ति। महत्यस्मिन्नगरे मरुप्रभृतिसुदूरप्रान्तेभ्योऽपि व्यवसायिनः समागत्य व्यापारं चिरात्प्रसारितवन्तः शनैः शनैरत्रत्या बभूवुः। एतस्मिन्महामहतां भूसम्पत्त्यधिकारिणां धनविलासभाञ्जि भूयांस्येव भवनानि येषु मल्लिकोपवनादीनि सुप्रसिद्धानि। अत्रत्यं विचित्रवस्त्वागारम्, दुर्गादिकं चापि दर्शनीयं नूनम्। महाऽऽयामोपि कतिपयक्षणैरेव सङ्कोचनीयो विस्तारणीयश्च यन्त्रसेतुः (हावडे का पुल) अप्यत्रत्यो दर्शनीयो यात्रिणाम्। भारते विशालतायामासज्जिता कृषिक्षेत्रहर्म्योपवनादिरूपा भूम्यधिकारिणां प्रभूता सम्पद् यया हि मण्डितमिदमञ्चलम्।

एतत्समीप एवोत्कल (उडीसा) देशोऽस्ति यत्र दारुब्रह्मेति पुरा-कीर्त्तितो भगवान्

जगदीशः। जगन्नाथपुर्यां प्रायः सर्वदैव यात्रिणां यातायातम्, विशेषतस्तु आषाढ-शुक्ल-द्वितीयायां (रथयात्रोत्सवे)। एतत्समीपवर्ति समुद्रतटं स्वास्थ्यायापि विशिष्ट-लाभप्रदम्। कलकत्तादि-स्थानेभ्यः समायान्ति जलवायुपरिवर्तनाय बहवः।

बङ्गदेशसंभिन्न एव 'आसाम' प्रदेशः। अत्र हि स्थानस्थानेषु चायोपवनानि काष्ठका-रुकार्यालयाश्च।

'मद्रास' प्रदेशे तण्डुल- नारिकेल-भवननिर्माणोपयुक्तकाष्ठानि चाधिक्येनोद्भवन्ति। अत्र हि नारिकेलस्य रज्जुरतिसुदृढा भवति। दीनानां गृहा नारिकेलकाष्ठैरेव निर्मीयन्ते, छादनमपि नारिकेलत्वच एव। रामेश्वर-श्रीरङ्ग-मदुरा-कुमारीप्रभृतीनि तीर्थानि सन्त्यस्मिन्नञ्चल एव, यद्दर्शनायोपयान्ति दूरदूरतोऽपि यात्रिणः। एतस्मिन्प्रान्त एव केरलमण्डले कोचीन-त्रावन्कोर-विजयनगरप्रभृतीनि सन्ति राजस्थानानि।

एतदन्तर्भुक्तं 'महीशूर' मण्डलं हिन्दुनरपालेनानुशिष्टं सुप्रसिद्धं भारते। अत्र हि विद्या-शिल्प-कलादीनामपि समुचितं पर्यवेक्षणम्। इह 'चाय-काफी' प्रभृतिपदार्थानामाधिक्येनोपयोगः। एतद्राज्यान्तर्गतं 'बेङ्गलोर' नगरं सम्प्रति व्यापार-सौन्दर्य-नगरसौष्ठवादिषु प्रभूतमुन्नतिसम्पन्नम्। मलयाचलमण्डितेस्मिन् महीशूरमण्डले चन्दनतत्तेल-फेनकप्रभृतीनां बहवो यन्त्रकार्यालयाः।

प्रान्त एव यन्नाम्ना प्रासिध्यत्तदिदं 'बम्बई' नगरं वर्तमानभारते सुमहत्समृद्धमुन्नतं च। कस्मिंश्चित्समये मत्स्याजीवानामतिलघीयानयं ग्रामोऽभूत्किन्तु साम्प्रतमिदमेङ्गलेण्डस्य पुत्र इति जेगीयते जनैः। व्यापारस्य यन्त्रकार्यालयादीनां च भारते सर्वापेक्षया प्रधानतममिदं क्षेत्रम्। पाश्चात्त्यदेशानामिदमेव यातायातस्य द्वारमित्यर्णवयायिपोतानामत्र महान्कार्यसम्भारः। अतिविस्तृतं चात्र पोतविश्रामस्थलम्। भारतराजधानीचरं कलिकत्तानगरं भूसम्पत्त्यधिकारिणां विभवैः काममुज्जृम्भेत परं व्यापारप्रसारे पश्चिमदेशीयसौष्ठवप्रकारे चेदमेव नगरमुत्कर्षेत्। यथाऽत्र महाविशालाः सर्वविधयन्त्रकार्यालयाः सीनेमादिक्रीडागृहाश्च, तथा महासमृद्धान्यभ्रंलिहानि हर्म्याण्यप्युपसागरमन्यनगरातिशायीनि। इयद्विशालोऽस्य नगरस्य परिसरो यदत्रोपदशानि धूमशकटि- विश्रमस्थानानि, येषु स्वल्पस्वल्पसमयान्तर एव करोति गतागतानि स्थानीया वाष्पशकटिः। भगवतो नदनदीपतेर्गर्भं मृत्पाषाणैरापूर्य प्रतिवर्षं प्रवर्ध्यतेऽस्य नगरस्य महानायाम-स्तथापि नाद्यावधि निवृत्ता निवाससङ्कुलता। देशानुसारं महाराष्ट्रबाहुल्येऽपि पारसीकभाटियादि-धनिकप्रमुखमिदं नगरम्। मरुदेशवासिनोऽपि साम्प्रतमुज्जृम्भन्ते व्यापारे-यद्यपि नगरेऽस्मिन्-प्रायः पृथिव्याः सर्वदेशीया एवोपलभ्येरन्नराः। पचिमदेशीयानां कृते भारते समागत्य दर्शनीयानि स्थलानि यद्यपि नगरेऽस्मिन् 'मलाबार हिल' 'कोलाबा' प्रभृतीन्युपसागरतटं भूयांसि।

उत्तरेण मोहमयीं गुर्जरदेशः। मोगलशासनात्पूर्व गुर्जराणां राजधानी-क्षेत्रं किल 'अनहिलवाडा' नगरेणासीदधिष्ठितं तत्रेदानीम् अहमदाबाद नगरम्। अत्र हि व्यापारस्य साधीयान्प्रसारः। सूत्रकर्तन-वस्त्रवानादीनां सर्वतोऽधिका अत्र यन्त्रकार्यालयाः गुर्जर-सौराष्ट्रेषु वडोदा-भावनगर-राजकोट ध्रांगध्रा-वढवान प्रभृतीनि राजसंस्थानानि। तेषु 'गायकवाडस्य'

राजधानी वटोदर (बडोदा) पत्तनं वर्तमानसमये भूयः समुन्नतम्। वर्तमानः शासकोऽस्य विद्या-कला-प्रणयी समाजपरिष्कारकश्च। शिक्षा-कलादि-सम्प्रसाराय साधीयानस्य भूपतेरभिनिवेशः। गुर्जरदेशेऽपि साधीयसी सस्योत्पत्तिः। सूरत प्रभृतीन्यस्य संपन्नानि दर्शनीयनगराणि। गुर्जरदेशीया उदारप्रकृतयः किन्तु ते तावच्छ्रमसहा न भवन्ति यावन्महाराष्ट्राः। महाराष्ट्राणां वीरता परिश्रमशीलता चेतिहासप्रसिद्धे। छत्रपतिः शिवराजवीरोऽत्रैवाभवद् येन हिन्दुसभ्यतायाः संरक्षणाय साम्राज्याधिकारिणो मोगला अपि निजखड्गधारया चमत्कृताः। स्वल्पेनापि संघेन तथा पराक्रान्तं महाराष्ट्रवीरैर्यथा कोटिकोटिमुद्राणां व्यये परोलक्षसैनिकानां बलिदानेपि मोगलसाम्राज्यमुत्तरोत्तरं शिथिलमूलमेवाभवत्। प्रतापिनः 'पेशवाख्याः', नानातात्याटोपे प्रभृतयः साहसिनोत्रैवाभवन्।

इदमस्ति संक्षिप्तं शब्दबद्धं भारतस्य चित्रं स्वातन्त्र्यात् पूर्वं भारतस्य भौगोलिक्या राजनैतिक्याश्चावस्थितेः।

[स्वातन्त्र्यादनन्तरं यथा राज्यानां पुनर्घटनं, देशीयराज्यानां (देशी रियासत इत्याख्यानां) भारतीयसङ्घे समामेलनं, भारतीय संविधानस्य २६ जनवरी १९५० दिनाङ्कात् प्रवर्तनं तदनुसृत्य राज्यानां सङ्घटनमित्यादि महत्त्वपूर्णा ऐतिहासिक्यो घटना अघटन्त तास्तु साम्प्रतिकशिक्षार्थिनां विदुषां च प्रायः सुपरिचिता एव।]

***

# भारतवैभवम्

## पञ्चमोऽध्यायः

### आर्यावर्तस्य राष्ट्रिया एकता

### ( संक्षिप्तमैतिहासिकं सर्वेक्षणम् )

बहूनां नवशिक्षितानां प्रायः सेयं धारणा समवाप्यते यत् भारतस्य 'एक-राष्ट्रनिर्माणम्' अस्मिन्नेव समये समभवत्, अन्यथा इतः पूर्वं भारतमिदमनेकराज्येषु विभक्तम्, अनेकेषु शासनेषु च सङ्क्रान्तमासीत्। एतस्या मनोभावनायाः प्रचारकाः प्रधानतोऽस्माकं पूर्वशासका आङ्गला एव। किन्तु भारतीयसाहित्यस्य प्राक्तनेतिहास-परिशीलकास्तथ्यमिदं चेत्किञ्चित्परिश्रमेण गवेषयेयुस्तर्हि स्फुटमिदं प्रमाणितं भवेद् 'यद् देशे कृत्रिमा येयमेकता साम्प्रतं प्रचार्यते, सर्वतो विघटनस्य वा यानि लक्षणानि निरीक्ष्यन्ते, एतस्य सर्वस्याऽपि बीजवापः आङ्गलानां शासने एव समजायत।' राष्ट्ररूपभवनस्य निर्माणं भौगोलिक्याः एकता-भूमेरुपरि सञ्जायते, किन्तु एतस्या मूलमस्ति 'जातीया एकता'। जातिगता चैकता च भावनात्मिकामेकतामालम्ब्य सम्प्रवर्द्धते। एतासामुपरिपृष्ठ ('छत्त') निर्माणं राजनैतिक्या एकतया सम्पाद्यते।

ईशुखिष्टस्य सहस्रसहस्रवर्षेभ्यः पूर्वं शबर-किरात-द्रविड-मुण्डादि जातीया भारतेऽस्मिन् न्यवसन्, येषां भिन्ना भाषा, भिन्ना च संस्कृतिरभूत्। एवं-विधभिन्नभिन्नलोकान् संयोज्य जातीयैकतायाः भावनात्मिकायाश्चैकतायां: स्थिरीकरणं प्राचीनार्याणां सर्वतोपि जटिला समस्याऽभूत्। एतदर्थं गभीरविचारशालिभिस्तैः एका संघात्मिका जातिः सम्पादिता। यस्यां हि नानाभाषाभाषिणः, नानावर्ण-रूपसंयुक्ताः, नानाविधसंस्कृतिशालिनश्च जनाः स्वस्वयोग्य-तानुसारम्, स्वस्वकार्यानुसारं च स्वोचितं स्थानमलभन्त। संघात्मिका सेयं जातिः कालान्तरे हिन्दूजातिनाम्ना प्राख्यायत। सुप्रसिद्धेन ऐतिहासिकविदुषा के. एम्. पणिक्करमहोदयेन अलेखि- ''विस्तृतायाः भारतीयजनसंख्यायाः विभिन्नविभिन्नतत्त्वानां मध्यतः एकस्याः सभ्यतायाः, एकरूपस्य समाजस्य च संघटनं, तस्य च समग्रेऽपि देशे संस्थापनं प्राचीनार्याणां महती सेयं सफलता इति।''

सुप्रसिद्धः पाश्चात्यः इतिहासकारः स्मिथमहोदयः स्वीकुरुते- ''भारतमिदं सुदृढां गभीरामेकां (सर्वाधारभूताम्) एकतामधिकरोति, या हि भौगोलिकपृथक्तया, राजनैतिक-प्रभुसत्तया च संस्थापितायाः एकतायाः अपेक्षयाऽपि सुगभीरा। सेयमाधारभूता एकता रुधिरम्, वर्णम्, भाषाम्, परिधानम्, आचार-व्यवहारान्, नानावर्गाणामसंख्यातान् विभेदांश्चातिक्रम्य

सर्वोपरि संस्थिता।।''

सत्यं चेदन्विष्यते तर्हि प्राचीनार्याणां जातिनियमाः तथा जटिलाः, दुर्दरूढाश्च नाऽऽसन्। भोजनादिव्यवहारे, विवाहादिसंव्यवहारे च न तावती बाधा आसीत्। इतिहासे दृश्येत यत् सम्राजा चन्द्रगुप्तेन ग्रीकदेशीयां राजकुमारीमङ्गीकृत्य तया सह परिणयः कृतः। कालान्तरे शक, हूण, शाकद्वीपादिवासिनश्चानेके जना वैदेशिका भारते-न्यवसन् ये हि प्राचीनार्यैः तथा मिश्रिताः, येषां वर्तमानकाले चिह्नमात्रमपि नाऽऽसाद्यते।

भावनात्मिकायाः एकतायाः कृते [यस्य बलेन भारतस्य यस्मिन् कस्मिन्नपि भागे निवसन् मनुजो विचारयति यत् समस्तोऽपि देशस्तस्यैव स्वदेशः।] काश्चन नद्यः सुपवित्राः स्थिरीकृताः यासु स्नानं पावनं, कर्तव्यं च स्थिरीकृतम्। यथा-

**''गङ्गे च यमुने चैव गोदावरि सरस्वति।**

**नर्मदे सिन्धु काबेरि जलेऽस्मिन् सन्निधि कुरु।।''**

युगयुगान्तरे अद्यापि कर्मनिष्ठा हिन्दवः सप्तस्वेतासु नदीषु स्नानेन-पुण्योपार्जनस्य कामनां धारयन्ति। एताश्च नद्यः समग्रेऽपि भारते व्याप्ताः, नैकस्मिन् प्रान्ते। एवमेव अस्मत्पूर्वजैरार्यैः भारतस्य पर्यन्तेऽवस्थितानां पर्वतानां यात्रापि तीर्थभूता-स्वीकृता। यथा-

**'महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः।**

**विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः।।'**

एतदेवाऽभिसंधाय जगद्गुरुशंकराचार्यप्रभृतिभिः स्वस्थापिता मठा भारतस्य चतसृष्वपि-दिक्षु-निवेशिताः। यथा-शृङ्गेरी (दक्षिणायाम्), द्वारिकापीठम् (पश्चिमायाम्) बदरीनाथः (ज्योतिर्मठः, उत्तरस्याम्) जगन्नाथः (पूर्वस्याम्), येन हि श्रद्धालवो भारतीयाश्चतुर्णामपि धाम्नां यात्रां कुर्वन्तो देशस्यैकतां प्रतिपदमनुभवन्ति।

## भाषागतं महत्त्वम्

भारतस्यैकतायाः सर्वतोऽधिकं प्रमाणमस्ति सेयं संस्कृतभाषा। लोकानां विस्मयो भवेत्, यस्मिन् समये वर्तमानकालिकानां यातायातसाधनानां सर्वथाऽप्यभावोऽभूत्, तस्मिन्नपि समये हिमालयमारभ्य कुमारीपर्यन्तम्, सिन्धुमारभ्य वङ्ग-आसामपर्यन्तं च सेयं संस्कृतभाषा सर्वतोऽधीयते स्म, सर्वे च तामिमां बुध्यन्ते स्म। हिन्दुजातेर्जननमारभ्य मरणान्ताः सर्वेपि संस्काराः अनयैव भाषया संपाद्यन्ते स्म।

## राजनैतिकी एकता

अस्मत्पूर्वजैः राजनैतिकी एकता, केन्द्रीय-सत्ता चापि महत्त्वेन संरक्ष्यते स्म। पुराणेषु, तदाश्रयग्रन्थेषु रामायण-महाभारतयोश्च स्थाने-स्थाने अश्वमेधयज्ञस्य, दिग्विजयस्य, चक्रवर्तिनो

राज्यस्य च प्राप्यते स्पष्टं वर्णनम्। सम्राजः पक्षे सर्वदिशां विजयः, चक्रवर्तिराज्य-स्थापनं च महा-आदर्शस्थापनेन सह पुण्यकार्यमपि बुध्यते स्म। पुराणानुसारं मान्धाता, रघु, युधिष्ठिर प्रभृतिभिश्चक्रवर्ति राज्यस्थापनमकारि। गुप्तसम्राजा समुद्रगुप्तेनाऽपि दिग्विजयं कृत्वा अश्वमेधयज्ञो व्यधायि। अनयैव भावनया सम्राट् अशोकः समग्रेऽपि भारते मौर्यसाम्राज्यं स्थापयामास। गुप्तसम्राट् समुद्रगुप्तो दिग्विजयं कृत्वा अश्वमेधयागमकरोत्। आर्यावर्तस्याऽस्य राष्ट्रिय-एकतायाः सर्वतोऽधिकं प्रमाणमितः परं किं स्याद्-यत् पञ्चाम्बुराज्ये गत्वा ग्रीकराज्यस्य शासनविध्वंसकः चन्द्रगुप्तमौर्यः, मगध (विहार) राज्यस्य निवासी आसीत्, एवं पुरुषपुर (पेशावर) पञ्चाम्बु राजस्थानपर्यन्तं व्याप्तस्य हूणराज्यस्य विध्वंसकः एकोऽभूद् मालवदेशस्य राजा यशोवर्मा।

६४७ तमे ख्रिष्टवत्सरे सम्राजो हर्षस्य मृत्योरनन्तरं भारते राजनैतिक एकतायाः समभूदवसानम्। अनेकेषां राज्यपुत्रराज्यानां समभूदुदयो यानि हि परस्परं युद्ध्यन्ते स्म। अस्मिन्नेव समये दुर्दुरूढतायाः 'सामाजिक संकीर्णतायाश्च' आर्यजात्यां प्रवेशोऽभवत्। अत एव ग्रीक-शक हूणादि विदेशीयजातिवत् मोहम्मदाः (मुसल्मान) अपि भारतीयसमाजस्याङ्गभूता नाऽभवन्। माहम्मदेषु सोयमेव महान् दोषोऽभूत् यत्ते स्वात्मानं शासकजातीयं मन्यते स्म, ते स्वात्मनः पृथक् सत्तां च सर्वदा रक्षन्ति स्म। 'मुसलिम लीग' संस्थया भारतवासिनो माहम्मदाः स्वीयं पृथग्राज्यं (पाकस्थान) स्थापयितुं प्रेरिताः, पर्यन्ते सफलीभूताश्च। एवं सत्वेऽपि भारतस्य राष्ट्रीयता तादृशी मधुरा, सुदृढा चासीद् यद भारतीयैः माहम्मदैः देशे सहवासात् सोयं देशः 'स्वदेशः' इति विचार्यते स्म। स्वीयां पृथग् जातीयतां संरक्षन्तोऽपि ते भारतीयां सभ्यताम् तत्संस्कृतिं च न केवलं ते स्वीकुर्वन्ति स्म, अपि तु तस्यां ते महत्त्वपूर्णं योगदानमपि कुर्वन्ति स्म। ''मानुष हौं तो वही रसखाँन बसौं ब्रज गोकुलगाँव के ग्वारन।'' इति हृदयाद् गायन् कृष्णभक्तो रसखानः एको माहम्मद एव आसीत्। इयमासीत्तदानीन्तना स्थितिः।

एवमेव अकबरसम्राजः पार्श्ववर्ती अब्दुलरहीमः (खान खाना) न केवलं हिन्दीभाषायाः समभूत् केवलं सुकविरेव, अपि तु कृष्णभक्तेः प्रचारकोऽप्ययमासीत्। सुप्रसिद्धमस्त्य तदिदं दोहाच्छन्दः-''धनि रहीम मन आपनो, कीन्हो चारु चकोर। निस दिन ही लाग्यो रहै कृष्णचन्द्र की ओर।।'' अकबरमारभ्य शाहजहाँपर्यन्तास्तादृशाः यवनसम्राज आसन् ये एतादृशीमेव भाषां पोषयन्ति स्म, या हि 'हिन्दी' ति प्रसिध्यति।

### माहम्मदसम्राजां योगः

आर्यजातीयैः सम्राड्भिरिव माहम्मदसम्राड्भिरपि भारतीयराजनीतेः प्राङ्गणे एकतास्थापनार्थं प्राणपणेन यत्नः क्रियते स्म। ते हि भारतमेव स्वदेशं भावयन्ति स्म। अत एव गजनी, काबुल, कन्धार आदीन् विहाय (यत्र हि तेषां जन्माऽभूत्) दिल्ली-आगरानगरयोरेव राजधानीं स्थापयन्ति स्म। अलाउद्दीन खिलजी, मुहम्मद तुगलक, अकबरमारभ्य अवरङ्गजेब-पर्यन्तैः सर्वैरेव मोगलसम्राड्भिः भारतीयदक्षिण प्रान्तस्य एतदर्थं विजयः परम- परिश्रमेणाऽपि कृतः, येन हि स्वदेशस्य भारतस्य राजनैतिकी एकता अक्षुण्णा तिष्ठेत्।

## धर्मनिरपेक्ष-जातीय-एकता

जातीय-एकतायाः कृतेऽपि भारतेऽस्मिन् नासीत्प्रयत्न इति न कश्चित्साधयितुं प्रभुः। माहम्मदसम्राजा अकबरेण हिन्दु-माहम्मदयोः सामाजिकम्, सांस्कृतिकं च सामञ्जस्यं स्थापयितुं धर्मनिरपेक्षस्य साम्राज्यस्य स्थापनाय यत्नः कष्टं सोढ्वापि नूनं क्रियते स्म। धर्माग्रहिलाः 'मुल्ला' मौलिवी' महोदयाः एतत्कृते ते अतिविरुद्धा अप्यासन्। राष्ट्रियामिमामेकतां स्थापयितुं सर्वतः प्रथमं यदिदं कार्यं प्रारभ्यत, तदर्थमेव वैदेशिकैरप्यैतिहासकैः अकबर 'महान्' ('ग्रेट') सम्राट्, 'राष्ट्रियसम्राड्' वा स्वनिबन्धे लिखितः। अकबरेणैव माहम्मदशासनेऽप्यस्मिन् 'गोवधस्य निरोधः' साम्राज्यशासनेऽस्मिन् विहितः। साम्राज्ये शासकपदानि हिन्दूभ्योऽपि तेन निष्प्रतिरोधं दीयन्ते स्म। सम्पूर्णस्य महतः प्रान्तस्यापि पतयः ('गवर्नर') हिन्दवोऽभवन् (कामम्, एतदर्थं राजनैतिकानां भिन्न-भिन्ना दृक्कोणाः सन्ति, किन्तु तेन राजपुत्रक्षत्रियैः सह वैवाहिक-सम्बन्धोऽप्यास्थाप्यत। तेन हि हिन्दूनां भाषायै, कलायै, संस्कृतये चाऽपि सुस्पष्टं राज्याऽऽश्रयः प्रादायि। सर्वतः प्रथमं स एव तदिदं तथ्यं हितावहतया समबुध्यत यत्-'राष्ट्रियएकतायाः सुस्थिरतार्थं विशालजात्योरनयोः (हिन्दुमाहम्मदयोः) एक समाजस्थापनं हितावहं भवेदिति। एतदेव मूलं मनस्याधाय सहि 'दीने इलाही' नामकमेकं समाज सम्प्रदायम् स्थापयामास, यस्मिन् तत्सामयिका दीक्षिता अप्यभवन्। एतस्य प्रत्यक्षं फलमप्यालोक्यताम्-यदा हि औरङ्गजेबेन अकबरस्य सेयं राष्ट्रियनीतिः पादघातमवहेलिता, तदा मोगलसाम्राज्यस्यास्य--- तत्कालं विलोपोऽप्यभवत्। किन्तु औरङ्गजेबात्पूर्वम्, भारतेऽस्मिन् सामाज्यशासने राष्ट्रिय-एकता कीदृशी समभवत्, एतस्य परिचयः सम्भवेदनेनैव यत् कस्मिंश्चित्काले ब्राह्मणैः 'अल्लोपनिषद्' ग्रन्थः माहम्मदानामेकीभावाय पृथक्तया प्रदर्शित उपनिषत्सु परिगणनाय। 'कट्टर' पण्डितानामप्यासीत् स्फुटं घोषणा-" दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान्-पूरयितुं समर्थः" इति।

औरङ्गजेबस्य सङ्कीर्णधर्मनीतेः कारणात् मोगलसाम्राज्यस्य पतनमभूत्। किन्तु कालान्तरे भारते प्रविष्टैराङ्गलैः सम्पूर्णेऽपि देशे स्वीयं शासनं प्रवर्तितम्। अंग्रेजानां शासनेन क्षुब्धैः सर्वतो नियन्त्रितैश्च भारतीयैः १८५७ तमे ख्रिष्टवत्सरे सर्वतः प्रथमं "स्वाधीनतासंग्रामस्य" शङ्खध्वनिर्विहितः, यो हि आङ्गलैः 'सैनिक-विद्रोह' नाम्ना घोषितोऽभूत्। तस्मिन् समये भारतस्य संघटनशक्तिर्बीजरूपेणाऽलक्षितमुत्पेदे। तस्मिन् समये हि भारतीया जनता राजसभायाः सर्वमान्यान् त्रीन् मानबिन्दून् अमन्यत एको मोगलवंशजो देहली सम्राट्, द्वितीयः अवधप्रान्तस्य नवाब वजीरः, तृतीयो महाराष्ट्राणां पेशवा। एते त्रय एव तात्कालिकं राष्ट्रियसंग्रामं सञ्चालयन्ति स्म। अस्मिन् राष्ट्रियाऽभ्युदये हिन्दवः, माहम्मदाश्चेति द्वावेव संहत्य सञ्चालनकार्यमकुर्वन्। सुप्रसिद्धेन इतिहासविदा माल्सनेन लिखितं यत्- प्रारम्भिकेऽस्मिन् राजविद्रोहे ('स्वतन्त्रता संग्रामे') एतत्संघटनात्पूर्वम्- अजीमउल्ला, वजीरुलहक, मीर अली सदृशा अनेके मौलिवीमहोदयाः प्रजासु सर्वतः परिभ्रमन्तः तात्कालिकशासनस्य विद्रोहं कर्तुं जनान् उत्तेजयन्ति स्म धर्मयुद्धस्य

('जिहाद') प्रचारं चाऽकुर्वन्। किन्तु दैवदुर्विपाकात् सा क्रान्तिः असफलाऽभूत्। परं तेन सङ्कटेन आङ्गलैः शासकैः सेयं शिक्षा दृढीकृता यत् हिन्दु-यवनानां मध्ये बहोः कालात्प्रचलिताम् इमामेकतामुन्मूल्यैव देशोपरि शासनं सुशकम्'' इति।।

## आङ्ग्लानां शासनसमयः -

इतः परम् आङ्गलानां शासनकालः प्रारभ्यते, यत्र हि ''भेदः प्रवर्त्यतां, शासनं च क्रियताम्'' इति कुटिला नीतिः प्रावर्तत। सर्वप्रथमं माहम्मदानाम् एकं शिष्टमण्डलम् (डेपुटेशन') १९०६ तमे ख्रिष्टीयवत्सरे 'आगा खानस्य' नेतृत्वे तात्कालिकभारतीय वाइसरायस्य 'लार्ड मिण्टो' इत्यस्य सविधे अगच्छत्। लार्डेन तेभ्यः आश्वासनं दत्तं यत् -'एकस्य सम्प्रदायस्य जातेर्वा, स्वरूपे तेषां राजनैतिक अधिकाराणां रक्षा क्रियेत'' इति। एवं किल अङ्ग्रेजानां कूटनीत्या भारतीयराजनीत्यां जातीयवैमनस्यस्य सर्वतः प्रथमं विषबीजं प्रोप्तम्, यस्य महत्त्वमेकेन आङ्गलशासकेन बुद्ध्वा लार्ड मिण्टोसविधे पत्रं प्रेषितम्-''इदं किल राजनैतिकपटुतायाः कार्यं भवता सम्पादितं यद्धि भारतीयमितिहासं दीर्घकालं यावत् प्रभावितं कुर्यात्'' वास्तवे पृथक् 'पाकस्थान' निर्माणस्येदमेवाऽऽसीद् बीजम्। १९०६ तमे ख्रिष्टवत्सरे एव 'मुस्लिमलीगस्य' स्थापनाऽभूत्।

## माहम्मदानां पृथङ् निर्वाचनम्

१९०९ तमे ख्रिष्टवत्सरे 'मॉर्ले-मिण्टो-सुधार' नाम्ना केचित् परिष्कारा: प्रारभ्यन्त तेष्वपि पृथङ् निर्वाचनस्य घातकं विषमासीत् प्रच्छन्नम्। एतदनुसारं योरपीयानाम्, एंग्लोइण्डिय-नानाम्, भारतीय-ईसाईमतभुक्तानाम्, पञ्चाम्बुदेशीयसिक्खानाम्, सर्वेषामपि तेषां 'पृथक् निर्वाचन' स्याऽधिकारोऽभवत् (अर्थात् एतेषां प्रत्येकवर्गः स्ववर्गद्वारा एव निर्वाचितो भवेत्। एवं सिक्खानामेकस्मिन् दले ('अकाली') पृथग्वादस्य या भावना साम्प्रतं प्रबलाऽभवत्, एतस्याः पूर्वाऽऽभासः १९२९ वार्षिके राजकीयेधिनियमे ('ऐक्ट') एव प्राप्यते यस्या बीजवप्तारः केवलमङ्ग्रेजा एव। सुप्रसिद्धो भारतीयो राजनीतिज्ञः शिवस्वामी ऐयरः एतत्सम्बन्धे लिखितवान्- ''साम्प्रदायिकाऽधिकाराणां पृथक्स्वीकारस्यैवायं परिणामोऽभवद् यत् एवंविधानामन्यान्य-वर्गाणामपि साम्प्रदायिकाऽधिकाराणामस्वीकरणं कठिनं किम् असम्भवमिवाऽभवत्। कुटिलैस्तैः पृथङ् निर्वाचनमिदं भारतीयराजनैतिकजीवनस्य स्थायि तत्त्वं निरणीयत।''

१९३२ तमे ख्रिष्टवत्सरे पूर्वोक्तसाम्प्रदायिकनिर्णयानुसारं तु अस्पृश्याः ''अछूत'' अपि हिन्दुवर्गात् पृथक् अक्रियन्त। तेभ्योऽपि पृथङ् निर्वाचनस्याऽधिकारः प्राप्तोऽभूत्। किन्तु एतत्कृते महात्मना गाँधिमहोदयेन आमरणम् अनशनमङ्गीकृतम्। पुण्यपत्तने मिथो विचारवि-निमयोऽप्यभूदेतद्विषये। तदनन्तरमतिकठिनतया तदिदम् (अस्पृश्यानां पृथङ् निर्वाचनम्) अस्वीकृतमभूत्। अहह! अस्पृश्यानां पृथक् निर्वाचनमिदं भारतीयां 'राष्ट्रिय-एकताम्', 'हिन्दूनां एकतां' च विचूर्णयितुमासीदेकं महाऽस्त्रम्। यदि सेयं कूटनीतिः सफलाऽभविष्यत्तर्हि

अखण्डितस्याऽप्यस्य भारतस्य अन्यान्येऽपि खण्डाः अद्रक्ष्यन्त। तात्कालिक-पृथङ्निर्वाचन-पद्धतेरेव दुष्परिणामोऽयं यद् भारतस्य खण्डो भूत्वा 'पाकस्थानस्य' पृथङ्निर्माणमभूत्। बहवो जनाः 'पाकस्थान' स्वीकरणस्य दोषं भारतीयानां नेतृणां शिरस्यारोपयन्ति। किन्तु किम् आङ्गलाः अखण्डितमिदं भारतं परित्यज्य पृथग् अभविष्यन्?

अस्तु, आङ्गलदेशीयैरेतैः आत्मनः साम्राज्यं स्थिरीकर्तुम्, व्यवसाय-वाणिज्यादीनां हिताय च, विजितायाऽस्मै भारताय राजनैतिकी एकता निर्दिष्टा, किन्तु राजनैतिक-एकतया राष्ट्रिय-एकता नैव सिध्यति। पूर्वमुल्लिखितम्-'राष्ट्रिय-एकतायाः प्रधानं मूलम्-जातीया एकता' इति। कूटनीतिपटवः आङ्गला जातीयामिमामेकतां भङ्क्तुमेव पृथङ् निर्वाचनपद्धतिं प्राचालयन्, यया हि हिन्दु-माहम्मदान् पृथक् पृथक् कृत्वा भारतस्य राष्ट्रिय-एकताया उपरि कुठाराघातमकुर्वन्। तस्या एव भेदनीतेः सोयं दुष्परिणामो यद् भारतीयान् माहम्मदान् दृष्ट्वा, अन्यान्येऽपि वर्गाः ('अकाली' प्रभृतयः) स्वस्य कृते पृथग् राज्यनिर्माणस्य कामनामधारयन्।

एतस्य या परिणतिर्जाता जायमाना च तामद्य सर्वे भारतीयाः साश्रु पश्यन्ति, आङ्गलानां गूढामिमां कूटनीतिं च परिचित्य तस्याः सर्वाङ्गीणस्याध्ययनस्य प्रयत्नान् विदधति।

***

# २. गीर्वाणगिरागौरवम्

क ) संस्कृतभाषायाः अपारा साहित्यसम्पत्तिः

ख ) संस्कृतभाषायां प्रचुरा साहित्यसामग्री

ग ) संस्कृतभाषायाः अतिप्राचीनता

घ ) वर्तमानयुगस्यापेक्षा च संस्कृतभाषा च

ङ ) संस्कृतभाषायामन्यभाषाशब्दानां शनैः शनैः प्रवेशः

च ) संस्कृतनिष्ठा हिन्दीशब्दावली

# गीर्वाणगिरागौरवम्

## मङ्गलम्

**यथैवादौ सृष्टा नरजगति सभ्यत्वसरणि-**
**र्यदीयं साम्राज्यं क्वचन समये प्राज्यमभवत्।**
**यतोऽमूः सम्भूता जगदुदरसूता नरगिरो**
**गिराऽसौ गैर्वाणी जयति वरवाणीपरिवृढा।। १।।**

वेद-उपनिषत्-स्मृतिप्रभृतिद्वारा यया संस्कृतभाषया एव सभ्यताया मार्गो दर्शितः। प्राक्समये सर्वस्मिन्नपि भूखण्डे यदीयं (यस्या एव) एकच्छत्रं राज्यमभूत्। युरोपादिदेशभाषास्वपि एतस्या एव मूलशब्दा विलसन्तीति अन्वेषकाः। जगन्मध्ये उत्पन्नानां मानवानां भाषा इमा अस्या एव समुद्भूताः।।१।।

**यथैवाऽऽदौ वेदाः परिकलितभेदाः प्रकटिताः**
**स्मृतीनां धात्री या प्रसवनकरी योपनिषदाम्।**
**समस्तत्रैलोक्ये ह्युपदिशति याऽऽध्यात्मिकपथं**
**स्फुरद्दिव्यज्योतिर्जगति जयतान्निर्जरगिरा।। २।।**

परिकलितभेदाः नानाशाखादिभिः सहिताः। स्फुरद्दिव्यज्योतिः देदीप्यमानं दिव्यम् आध्यात्मिकं ज्योतिर्ज्ञानं यस्याम्।।२।।

**पुरा ब्रह्मा यस्यां सविधि वरिवस्यामरचय-**
**त्ततो दिव्यज्ञानैर्मुनिभिरभिधानैरपि नुता।**
**पुराणोद्यद्व्यासोदितयतिविलासोत्सवभृता**
**सुराणां सा भाषा मतिमदभिलाषान् सफलयेत्।। ३।।**

ब्रह्मा सर्वसृष्टेः कर्ताऽपि यस्यां वरिवस्यां सृष्टेः सर्जनसामर्थ्याय तपः-स्तुत्यादिकमकरोत्। तदनन्तरं दिव्यज्ञानशालिभिर्मुनिभिः नाना अभिधानैः उपनिषत्-स्मृत्यादिवाङ्मयैः स्तुता। पुराणेषु उद्यन्तः प्राप्यमाणाः ये व्यासस्य मतिप्रकर्षाः तदानन्दपूर्णाः। मतिमतामभिलाषान्- ये आर्याणाम् असाधारणम् आध्यात्मिकं वाग्वैभवं ज्ञातुमिच्छन्ति तादृग्बुद्धिशालिनाम् इच्छाः पूरयेत्।।३।।

**प्रशस्यायां यस्यां स किल समभूद्दर्शनचयो**
**न कस्याञ्चिद्वाचि प्रभवति तुला यस्य जगति।**
**सवित्री शास्त्राणामहह महयित्री मतिमतां**
**सतामाविष्कर्त्री मनसि रमतां सा सुरगवी।। ४।।**

दर्शनसमूहस्य तुलनायां न भूमण्डलेऽपि किञ्चिद् वाङ्मयमुत्पन्नमिति गवेषकाः पाश्चात्त्या अपि सम्मन्यन्ते। वेदान्तन्यायज्यौतिषादिशास्त्राणां सवित्री उत्पादयित्री। महयित्री प्रशंसायाः प्रापयित्री, आर्षसाहित्यं पठन्तः सर्वदेशीया अपि आर्याणां प्रशंसां कुर्वन्तीत्याशयः। सताम् आविष्कर्त्री अस्या भाषाया वाङ्मयादेव वैदिकदार्शनिक-कौटिलीयशास्त्रादिवेदितारो बभूवुरित्याशयः।।४।।

**निधानं धर्माणाममलमुपधानं कविधियां**
**समाधानं शङ्काभ्रमिपतितभाषान्तरविदाम्।**
**प्रधानं विद्यानामतुलमवधानं मतिमतां**
**तिरोधानं भ्रान्तेर्विलसतु विधानं सुरगिरः।।५।।**

धर्माणां नानाविधानां समाजकर्तव्यानां निधानं निधिः-''एतद्देशप्रसूतस्य सकाशादिति'' सूत्रितं महत्त्वं व्यनक्तीत्याशयः। उपधानम् आश्रयः संस्कृतभाषारूपमाश्रयं प्राप्य भूमण्डलगतानां कवीनां मध्ये कालिदासादयोऽसामान्यं गौरवं बिभ्रतीत्याशयः। सृष्टिः कदा, परलोकोऽस्ति न वा, इत्यादीनां शङ्कारूपाणां भ्रमीणां मध्यपतितानां कृते। अवधानं बुद्धिमतां कृते सावधानीकरणसाधनम्। विधानं, विधिः, सर्वमपि वाङ्मयम्।।५।।

**विराजद्वाणीनामनवधिकवीनां रचनया**
**ययाऽकस्माद्विस्मापितमिदमहो शिक्षितजगत्।**
**चमत्काराढ्यानां सरसवचसामादिजननी**
**विनीयान्नः कामानधिकृतगवी संस्कृतगवी।।६।।**

अनवधि (अनन्त) कवीनां, रचनया शिक्षितजगत् यया विस्मयं प्रापितम्। कालिदासभवभूतिबाणादिसदृशाः कवयो न कुत्राप्यभूवन्निति सर्वेषामैकमत्यम्। अधिकृतगवी अधिकृता अधिकारशालिनी गौः वाणी, सर्वभाषासु श्रेष्ठाधिकारधारिणी भाषा। समासान्तष्टच्। नः कामान् अभिलाषान् पूरयेत्।।६।।

**क्रियाः स्पष्टा यस्यामथ च निचितः कारकचयो**
**न सन्देहः कस्याऽप्युदयति हि यस्याः परिचये।**
**यदीयोऽसौ कोषः परिकलिततोषः सुमनसा-**
**मसावन्तर्वाणीन् प्रमदयतु वाणी दिविषदाम्।।७।।**

क्रियाः भवति गच्छतोत्यादितिङन्तपदरूपाः। कारकसमूहः कर्मकरण-सम्प्रदानादिः विचितः व्याकरणनियमेन पृथक्-पृथक् परिचितः। अत एव यस्याः संस्कृतभाषायाः परिज्ञाने कस्यापि सन्देहो न भवति, क्रियाकारकादिनिःसन्देहशब्द-घटिततया स्पष्टं यस्याः परिज्ञानमित्यर्थः। यस्याः शब्दकोषः पण्डितानां जनितपरितोषः, प्रचुरोऽस्याः शब्दकोष इति गवेषकाणां मतम्। अग्रे उदाहरणादिभिर्ज्ञेयम्। अन्तर्वाणीन् पण्डितान्'अन्तर्वाणिस्तु शास्त्रवित्' इत्यमरः। दिविषदां देवानां वाणी संस्कृतम्।।७।।

**पुरा दिव्यैर्गेयैर्भृशमपरिमेयैरपचिता**
**ततस्त्वार्षैः सूक्तैः परतरपटूक्तैः परिणुता।**
**ततो नानागुम्फैः सुकविभिरभीड्या समुदभू-**
**दसौ सा वाग्देवी विमलयतु मे वीक्षणपथम्।। ८।।**

गेयैः सामादिभिर्गानयोग्यैः वाङ्मयैः। अपचिता पूजिताप्रशस्या, 'पूजा नमस्याऽपचितिः' 'क्षयाऽर्चयोरपचितिः' इत्यमरः। परतरम् अत्यन्तं पटुभिः प्रोक्तैः सूक्तैः परिणुता स्तुता। अभीड्या सर्वतः स्तुत्या। सरस्वती वाग्देवी।।८।।

**अलङ्कारो वाचामतुलमधिकारः सुमनसां**
**प्रतीकारो भ्रान्तिप्रतिहतधियां मूढमनसाम्।**
**श्रुतीनां प्राकारः, प्रसभमुपकारः कविगिरां**
**प्रकारो गैर्वाण्या जयति विनिकारोऽत्र भुवने।। ९।।**

अलङ्कारः भूषणम्, इयं स संस्कृतवाण्येव सर्ववाणीनां भूषणस्थानीया। सुमनसां पण्डितानां, देवानां वा अतुलं यथा स्यात्तथा अधिकारः, अनया भाषयैव देवानां पण्डितानां च भूमौ माहात्म्यं प्रसृतमित्यर्थः। संस्कृतं कठिनम्, अव्यवहार्यं वा इत्यादिभ्रमाक्रान्त-मनसा जनानां प्रतीकारः उपचारः। प्राकारः रक्षार्थं वेष्टनं विनिकारः तिरस्कारशून्यः।।९।।

**शुभार्थे शस्या या विबुधवरिवस्यासमुचिता**
**प्रशस्याया यस्या पदमपि सुखं सौति जगताम्।**
**विधात्री धर्माणां, सकलसुविधात्री सुमनसा-**
**मियं शर्वाणीव स्फुरतु सुरवाणी मनसि मे।। १०।।**

शुभार्थे मङ्गलारम्भे 'सर्वमङ्गलमाङ्गल्येति' शर्वाणी भगवती प्रशस्या। परलोकादिषु शुभप्राप्त्यर्थं सुरवाणी अपि शस्या। विबुधानां देवानां पण्डितानां च वरिवस्यायां पूजायाम्, 'वरिवस्या तु शुश्रूषा' इत्यमरः। पदं चरणं जगदम्बिकायाः, पदं सुप्तिङन्तं मन्त्ररूपं सुरवाण्याः। सुमनसां देवानां पण्डितानां च सकलसुविधाजनयित्री।।१०।।

**चिरममरतां मर्त्त्यानां या तनोति निषेविता**
**सकलजगतामीशेनाऽपि स्फुटं मुकुटे धृता।**
**जयति जगतीकल्याणार्थं दृढं दधती व्रतं**
**नवरसवती दिव्या स्त्रोतस्वती सुरभारती।। ११।।**

सुरभारती संस्कृतभाषा शृङ्गारवीरादिनवरसवती दिव्या स्त्रोतस्वती नदी। अन्या नदी मधुरैकरसयुक्ता, इयं तु नवरसवतीति व्यतिरेकः। मर्त्यानां अमरतां देवरूपं तनोति उभयत्र। जगदीशेन शिवेन शिरसि धृता गङ्गा, भगवता सर्वभाषाणां मूर्द्धभागे स्थापिता तादृश्ययोग्यतया देववाणी। कल्याणव्रतधारकत्वम् उभयत्र।।११।।

**घनाक्षरी ( कवित्त )–**

**नित्यं निजसेवकानाममरपदं ददाति**
**मानसं पुनाति या वै महितमहस्वती**
**लोकसमुद्धारायैव यद्धाराप्रवाहो भाति**
**पापपरिहारार्थे या प्रथितयशस्वती।**
**आदिजननीति जनाद् गौरवमुपेता या च**
**विष्णुपदस्पर्शोचितपावनपयस्वती**
**देशपरिपावनाय बाढमियमोजस्वती**
**निर्जरसरस्वतीव निर्जरसरस्वती।। १२।।**

इयं निर्जरसरस्वती देववाणी, निर्जराणां सरस्वती गङ्गा नदीव, 'कूलङ्कषा निर्झरिणी रोधोवक्रा सरस्वती' इत्यमरः। महितमहस्वती पूजनीयमहत्त्वधारिका, उभयत्र। गङ्गायां धारायाः प्रवाहः, अमरवाण्याः अविच्छिन्नः प्रसारः (सुव्यवस्थिततत्वेन निःसन्देहतया मध्येऽवरोधाभावात्)। दिव्यप्रभावतया आदिजननी (गङ्गा), सर्वभाषाणामुत्पादिका (संस्कृतभाषा)। गङ्गा विष्णुपदोद्भूतैव, संस्कृतभाषा अध्यात्मज्ञानप्रदतया भगवच्चरणप्रापिका। अन्यदुभयत्रापि स्पष्टम्।।१२।।

**हरिगीतिका–**

**इह सकलभाषाजन्मदा का? भास्वती सुरभारती**
**वद, वेदजननी का? जगत्योजस्वती सुरभारती।**
**अनुपमसरससाहित्यधनिका का? सती सुरभारती**
**वद भारतानुगता भवेत् का भारती? सुरभारती।। १३।।**

यावन्मात्रभाषाणां जन्मदात्री का (प्रश्नः), सुरभारती (उत्तरम्)। एवमग्रेऽपि। साहित्येन धनिका का? भारतस्य अनुरूपा भाषा का? उत्तरम्–सुरभारती। यत इदं भारतं, सा भारती।।१३।।

**घनाक्षरी ( कवित्त )–**

**तिमिरमपास्य ययैवादौ ज्ञानमाविष्कृतं**
**शासनमुपाहितं ययैव बिबुधोत्सवाय**
**यस्याः सेवनेन कविलोका यान्त्यमरपदं**
**यामिह वदन्ति प्रभवित्रीमात्मशोधनाय।**
**याऽसौ सर्वमङ्गला न केवलमिहैव लोके**
**सेयं दिव्यलोकेष्वपि भूरिभव्यवैभवाय**
**लोकद्वयकल्याणी शुभावहाऽथ शर्वाणीव**
**सेयं सुरवाणी जनिं लेभे जगतः शिवाय।। १४।।**

शर्वाणी पार्वती इव सुरवाणी, ततश्च सर्वमुभयसमन्वयि। विबुधानां देवानां पण्डितानां च उत्सवाय शासनं दुष्टान् दमयित्वा लोकनियमनं यथा भगवत्या कृतम्, शासनं शास्त्रं यथा

देववाण्या स्थापितम्। आत्मशोधनाय अन्तःकरणपावनाय। सर्वमङ्गला तन्नाम्नी भगवती। सर्वाणि मङ्गलानि यस्याः सकाशात् सा वाणी। अन्यत् उभयगामि, स्पष्टम्।।१४।।

**पण्डितप्रशस्यपरिणद्धपदगुम्फ वती**
**चित्तचमत्कारिलसदर्थतो यशस्वती**
**नृत्यद्वरवाणीमणिनूपुरनिनादनिभा**
**श्रवणमुपागतैव मह्यते महस्वती।**
**मञ्जुनाथ! मायामृगतृष्णामोहमूढानपि**
**प्राणिनः पुनाति या हि पावनपयस्वती**
**भासते सभासु समुल्लासितविलासरसा**
**गोविन्दानुरागरसात् सरसा सरस्वती।। १५।।**

परिणद्धः प्रौढः पदगुम्फो यस्याः। महस्वती तेजस्वती। मायारूपा या मृगतृष्णा तस्या मोहेन मूढान्। वाणी ईश्वरश्रद्धावशादेव अन्येषु प्रभावशालिनी सम्पद्यते इति सूच्यते।।१५।।

**पदपरिगुम्फो वर्णमैत्रीमनुयाति यत्र**
**भाति जगज्जैत्री भावकल्पनकला तुरी**
**दासा इव वाचमनुगच्छन्त्यनुप्रासा यत्र**
**प्रमदविकासाद् याति मानसीयमातुरी।**
**गैर्वाणीगुणैरेवाऽत्र सूयते यशःपटोऽपि**
**शुष्कतार्किकाणां तिरो गच्छति वेमा तुरी।**
**मानसमुपेतया यया चाऽमृतमाचामन्ति**
**वाचामुपगुम्फनाय सा चातुरी चातुरी।। १६।।**

पदगुम्फनं वर्णमैत्रीमनुगतम्। एकस्थानोच्चारणीयानां वर्णानामेवाधिक्यं वर्णमैत्री। भावानां कल्पनकला सैव तुरी तूलिका, लेखनीति यावत्। प्रमोदस्य विकासात् इयं मानसी आतुरी आतुरता याति। गुणैः तन्तुभिः पटः उत्पाद्यते, इह तु संस्कृतभाषायाः प्रसिद्धैः गुणैः यशो विस्तारः उत्पाद्यते, अत एव तार्किकाणां मते पटनिर्माणस्य साधनभूताः तुरीवेमाद्याः इह तिरोभूता भवन्ति। मानसम् उपेतया यया (चातुर्या) अमृतम् आस्वादयन्ति, संस्कृतरचनायां सैव चातुरी चातुरीपदवाच्या।।१६।।

**स्फुरन्निगमवाङ्मयैः स्फुटकिरीटशोभावती**
**पुराणरशनावती स्मृतिमनोज्ञमालावती।**
**इयं मुनि मनीषिणां हृदि सुखासने भास्वती**
**समस्तसुषमावती सुरसरस्वती सेव्यताम्।। १७।।**

निगमवाङ्मयैः वैदिकसाहित्येन। अष्टादशपुराणैः रशना (कटिभूषण)वती। हृदि सुखाऽऽसने हृदयरूपे सुखजनके आसने, हृदि सुखासने इति व्यस्तरूपकम्। भास्वती देदीप्यमाना। 'सुषमा परमा शोभा'।।१७।।

**स्फुरन्निगमभास्वती वरविवेकिविद्वत्कला-**
**विलाससुषमावती सुमनसां सुखं तन्वती।**
**सनातनसुनीतिभृद्हृदयमन्दिरे जाग्रती**
**जयत्यमरभारती जनति सर्वधामोज्ज्वला।। १८।।**

स्फुरद्भिः निगमैः वेदैः भास्वती। श्रेष्ठविद्वत्कलाविलासेन सुषमावती। सुमनसां देवानां पण्डितानां च। सुनीतिभृतां विवेकिविदुषां हृदयमन्दिरे। जाग्रती सर्वदा प्रबुद्धा सर्वविधैः धामभिः तेजोभिः उज्ज्वला। अमरा भारती सरस्वती, अमराणां भारती संस्कृतवाणी च।।१८।।

**मोलिर्वेदोऽस्ति यस्या मुखमुपनिषदः कन्धरा धर्मशास्त्रं**
**वक्षो वेदान्तविद्या कलय कटितटं दर्शनानीतराणि।**
**जङ्घाऽन्ये शास्त्रसंघाश्चरणमथ नयो मण्डनं काव्यमेतत्**
**प्रत्यक्षं वीक्षसे चेत्कथमहह मृता सा हि गीर्वाणवाणी।। १९।।**

इतराणि दर्शनानि कटितटं कलय जानीहि। नयः नीतिशास्त्रं चरणम्। प्रत्यक्षं मूर्तिदर्शनेऽपि वैदेशिकाः, तद्गतानुगतिकतया एतद्देशीया नवीनशिक्षिता अपि च कथमिमां मृतभाषेति व्यपदिशन्तीत्याशयः।।१९।।

**द्विजानां कर्तव्यादथ विभवभव्यादपि गुणाद्**
**गुणज्ञो गैर्वाणीमिह पठति वाणीं बुधजनः।**
**धनाप्तेस्त्वाशातः श्रयति नृपभाषामिति बला-**
**दिय हौणी गौणी, मुखमिव तु मुख्या ह्यमरवाक्।। २०।।**

द्विजानां ब्राह्मणक्षत्रियवैश्यादीनां संस्कृतजातीनां कर्तव्यमिदमिति बुद्ध्या, विभवभव्यात् स्वाभाविकात् दिव्य-माधुर्य-सुबोधत्वादिवैभवगुणादित्यर्थः। प्राचीन-परम्पराप्रचलितगुणवेदितामाहात्म्येन गुणपरिचयी बुधजनः सर्वदेशीयेभ्यः आध्यात्मिकज्ञानप्रदतया सर्वतः प्रशस्यो भारतीयलोकः, गैर्वाणीं सुरवाणीमिमां संस्कृतां पठति। वैदेशिकशासने वैदेशिकैः नृपैः आत्माभाषैव राजभाषेति कृत्वा सर्वेषु अधिकार-कार्यालयादिषु प्रवर्तिता। ततश्च राज्ञा, तच्छासनेनैव च सर्वमपि देशगतं कार्यं सम्बध्यते। कार्यानुगामि च वेतनादिजीविकासाधनम्, ततश्च धनप्राप्तेः आशातः बलात् परवशतया इमां नृपभाषां हौणीम् आङ्गलभाषां श्रयति स्वीकुरुते। 'श्रयति' पदेन राजशासनबलात् तस्या आश्रय इव कर्तव्यो भवतीति द्योत्यते।'आशा' पदेन विजितजातीनामेषां तत्पठनेऽपि बहुधा अपेक्षितलाभो भवतीति सूच्यते। बलात्, आजीवनान्नदानबलगुणात् गौणी अमुख्या, अनिच्छया पठनीया।।२०।।

**सेयं सभा प्रतिभावतां प्रस्तूयतां सुरभारती।**
**वदनात्कवीनां श्रूयतां सुरभारती सुरभारती।।**
**इह भारतीयनभोऽन्तरे व्याप्ता तथाऽमरभारती।**
**निनदोऽधुनाऽपि श्रूयतां सुरभारती सुरभारती।। २१।।**

देववाण्या विजयगीतिः-अयं प्रतिभाशालिनां समाजः (संघटितः) अत एव सुरभारत्या

एव प्रस्तावोऽस्तु। कवीनां मुखादपि सर्वतः सुरभारती सुराणां भारती (अर्थात् मनुष्याणां का कथा, सेयं देवानां वाणीति) प्रशंसागीतिः श्रूयताम्। वैदिककालादारभ्य भारतीयगगने भारती इयं तथा व्याप्ता यथाऽधुनापि अन्तरिक्षात् ('ईथर') 'सुरभारती सुरभारती' इति नादः प्रत्यक्षं श्रूयताम्।।२१।।

**इदमार्यजातेर्मस्तकं का वा समुन्नतमादधौ ?**
**निःशङ्कमुच्चैः स्तूयतां सुरभारती सुरभारती।।**
**यैषाऽखिले भूमण्डले निदिदेश मानवसभ्यताम्।**
**विजयध्वजो व्याधूयतां सुरभारती सुरभारती।। २२।।**

का मस्तकमुन्नतं चकार? (प्रश्नः), सुरभारती सुरभारती इति दाढ्‍र्यसूचकं द्विरुक्तमुत्तरम्। भूमण्डले मानवसभ्यतां शासनरूपेण या एषा निदिदेश (शिष्टवती, बोधितवती), सा इयं देववाणीति विजयध्वजो दोधूयताम्। 'निदेशः शासनं च सः' इत्यमरः।।२२।।

**अयि नव्यशिक्षित! किं प्रजल्पसि ? पठ मनाग् भाषामिमाम्।**
**स्वयमेव पुनरनुभूयतां सुरभारती सुरभारती।।**
**अभ्यर्थ्यते त्रिजगत्पते! पुनरेव भाविनि भारते।**
**प्रतिगेहतः संश्रूयतां सुरभारती सुरभारती।। २३।।**

अधुना किं वितण्डावादं करोषि, भाषापठनोत्तरं स्वयमनुभवः क्रियतां यत् सेयं सुरभारती सुरभारत्येव, अद्वितीया नूनं सर्वविधसाहित्यादिविषयेषु इत्याशयः।।२३।।

**कवित्वम् (सिंहावलोकनम्) -**

**गीयतां गृहे गृहेऽद्य गुण्या गुणगीतिर्हरे-**
**र्नित्यं नगरेषु प्राच्यसभ्यता ह्युदीयताम्**
**दीयतां जनेन पुण्यसेवायामजस्रं मनो**
**धार्मिकजनोऽद्य विद्यावैभवे प्रचीयताम्।**
**चीयतां चतुर्दिक् धनधान्यधामलक्ष्मीरियं**
**भूरि भारतीयं यशः सर्वतो निधीयताम्**
**धीयतां मनस्सु देववाणी तत्त्वविज्ञैर्नरैः**
**काममनभिज्ञैरियं जातु प्रविगीयताम्।। २४।।**

गुण्या गुणविषये हिता प्रशस्या। तेन स्वाभाविकमास्तिकत्वम् आर्याणां महत्त्वमिति भावः। प्राच्या सभ्यता, आर्षी सभ्यता। उदीयतामित्यनेन-'वैदेशिकशासनादिना आर्यसभ्यता किञ्चित्तिरोहितेव, सम्प्रति भारतीयशासने 'उदीयताम् उदयं गच्छतु।' प्राचीयतां प्रचितः समृद्धः भवतु। ये तत्त्वबोद्धारः तैः सेयं देववाणी मनसि स्थाप्यताम्, मनोयोगपूर्वकम् एतस्याः पूर्ववैभवस्थापनार्थं प्रयत्यताम्। अनभिज्ञैः तद्गुणाऽपरिचितैः कामं कदाचित् प्रविगीयताम् सैषा न सर्वबोध्या, कठिना इत्यादि निन्द्यतामित्याशयः।।२४।।

***

## कैः कारणैरन्यभाषाऽपेक्षया महत्त्वं संस्कृतभाषायाः ?
## सर्वादिमत्वम् शब्दकोषबाहुल्यं च

मानसिकभावानां प्रकाशनाय कण्ठताल्वाद्यभिघातनिष्पन्नानां शब्दानां प्रवाहरूपाया भाषाया आवश्यकता भवतीति वैज्ञानिकानां समयः। भाषायाः साहाय्यं विना मनुजो न कथञ्चिदपि निजहृदयभावान् प्रकाशयितुं प्रभुर्भवति। यद्यपि इङ्गितादिना यत्किञ्चित्सूचयितुं कदाचित्प्रभवेत्, किं तु सर्वस्मिन्विषये स्वातन्त्र्येण सर्वविधव्यवहारनिर्वाहो भाषावत् चेष्टादिना न कथञ्चित्सम्भवतीति अनाग्रहिलैः स्वीकर्तव्यमेव भवेत्।

भाषा हि सर्वतः प्रथमं कस्मिन् काले मनुजमुखान्निस्सरदिति विचारसीमातिगामी विषयः। विकाससिद्धान्तानुयायिनो यद्यप्यस्मिन्नपि विषये काञ्चिदुपपत्तिं दर्शयितुमग्रेसरा भवेयुः, परं शब्दब्रह्मणो नित्यतां विजयढक्कानिनादपुरस्सरं सर्वत्रोद्घोषयन्तो वयमेवंविधान्वेषणमकिञ्चित्करमेव मन्यामहे। सर्वतः पूर्वं मनुष्याणां कीदृशी भाषासीदित्यमुं विषयं बहोः कालादन्विष्यन्ति गवेषणशीलाः पाश्चात्त्यविद्वांसः। नानाविदुषां नानाविधानि मतानि। परं सर्वेषामपि विदुषामन्वेषणेन तदिदं प्रतिदिनं दृढं भवति यदस्माकं देववाणी संस्कृता सर्वजगतां भाषाभ्यः सुबहुतरं प्राचीना। विना किञ्चिद् दृढतरं प्रमाणं नाऽस्मिन्समये किञ्चिदपि साधयितुं शक्यम्। यदि वयमस्मत्पूर्वजानां भारतवासितां प्रतिपादयामस्तदाऽपि नवशिक्षितसमाजः पृच्छत्यस्मान् 'किं वा प्रमाणं भवत्पूर्वजानां भारतवासित्वे?' 'अस्मत्पूर्वजैरात्मनः संसारयात्रानिर्वाहार्थं गृहनिर्माणं वस्त्रनिर्माणं पात्रादिनिर्माणं चाऽऽत्मनो बुद्ध्यैव कृतम्'। एतद् यदि निसर्गसिद्धमपि साम्प्रतं वदामस्तदाऽपि भवन्त्यमाकमुपरि वाग्बाणवर्षाः– 'नैतज् ज्ञानमासीद्भारतवर्षीयाणाम्, अन्येभ्यो देशेभ्यः शिक्षितमेतत्।'

एवं खलु जगतः सम्पूर्णमेव वायुमण्डलं सम्प्रति विपर्यस्तमिव। सोऽयं हेतुवादस्य जाज्वल्यमानः समयः। अस्मिन् समये उपपत्तिं विना नैकपदमपि शक्यते प्रसर्तुम्। परम् अन्वेषकैरेव साधितमिदं यत्संस्कृतभाषा सर्वतः पुरातनीति। यतो हि प्रत्यक्षं प्रमाणं वेदा विराजन्ते। वेदानां समयनिर्णयकार्ये महामहाविदुषामनेकानि मस्तिष्कानि बहोः कालाद् व्यापृतानि। अनेकानि च मतानि प्रकाशितान्यभूवन्नद्यावधि। केचित्पाश्चात्याः ख्रिष्टजन्मतः षट्सहस्रवर्षाणां पुरातनं वेदराशिं मन्यन्ते। केचिच्च लोकमान्यतिलकमहोदयादयस्तस्मादपि पुरातनम्, अपरे उमेशचन्द्रभट्टाचार्यप्रभृतयो लक्षवर्षपुरातनं वेदराशिं स्थापयन्ति। भवतु नानाविधमान्दोलनमेतत्। परमनेन सर्वेणाऽपि सिध्यति यद् वेदेभ्यः प्राचीनं किञ्चनापि वाङ्मयं नाधिगतमद्यापि समग्रेणाऽपि भूमण्डलेन। वेदाश्च देववाणीपर्यायक–संस्कृतभाषायाम्। अतः सुस्पष्टं सिध्यति यत्सर्वाभ्यः प्राचीना सेयमस्माकं संस्कृतभाषा। यद्यपि वैदिकभाषातो वर्तमानसंस्कृतभाषायामुपलभ्यते भेदः, परं कालक्रमाज्जायमानः सोऽयं भेदो द्वयोरपि भाषयोर्मध्ये

कस्याश्चिदपि भाषान्तरत्वं नाऽऽपादयितुं शक्नोति। सर्वास्वपि भाषासु कालक्रमेण लोकानां व्यवहारपरिवर्तनक्रमेण च स्वभावत एव सम्भवत्ययं भेद:। दृश्यताम्, या हि संस्कृतभाषा काव्यादिव्यवहारे उपयुज्यते, तस्यामेव कालक्रमेण कियान् भेद: सम्पन्न:। या हि महाकविना भासेन भाषा व्यवहृता न तादृशो जगन्नाथपण्डितराजस्य। धर्मशास्त्रादीनां भाषाया: प्रकारोऽन्य:। उपनिषदां चाऽन्य:। काव्यानां च पृथग्विध इति नायं भेदो वैदिकभाषां संस्कृतभाषात: पृथक् कर्तुं शक्नुयात्। आम्, एतदवश्यं मन्तव्यं यन्मध्ययुगे वैदिकभाषायां बहव: संस्कारा वैयाकरणै: (कालकृतपरिवर्तननियमं, लोकानां व्यवहारप्रवाहं च समीक्ष्य) प्रचारिता:, यैर्हि भाषायां भूयान् परिष्कार:, परिवर्तनप्रवाहं विषह्य भूयसी स्थिरता चाऽभवत्। अत एव हि सेयं संस्कृत-भाषे'ति व्यपदेशमलभत।

ततश्चाऽतिप्राचीनकाले एकमात्रं सेयमस्माकं देववाणी-पर्यायकसंस्कृतभाषैव लोकानां व्यवहारसमादरयोर्भूमिरासीत्। कालक्रमेण देशकालादीनां, जलवाय्वादीनां च संसर्गवशात्सेयं नानाभेदान् प्राप्तवती। जलवाय्वादीनाम् उच्चारयितुर्मनुष्यस्योपरि भवति तादृश: प्रभावो येन मनुष्यस्याऽस्य उच्चारणमपि विलक्षणतया परिवर्तते। तकारसम्बद्धं शब्दं वयमेकेन प्रकारेणोच्चारयाम:, पाश्चात्यदेशीया गौराङ्गास्तं हि अन्येनैव प्रकारेणोच्चारयन्ति। किं नाम दूरानुधावनेन भारत एव देशभेदात् नानाविधान्युच्चारणानि। चक्षु:शब्दं ज्ञानशब्दं च वङ्गदेशवास्तव्या यथोच्चारयन्ति न तथा दक्षिणात्या:। एनमेव च शब्दं वाङ्गा यथोच्चारयन्ति, मैथिलास्ततोऽन्येनैव प्रकारेण। तेषु शिक्षिता एव किम् प्रकाण्डपण्डिता अपि 'चच्छु:' इत्युच्चारयन्त: प्रत्यक्ष दृष्टा:। मूर्धन्य'ष'कारोच्चारणे वाङ्गमैथिलदाक्षिणात्यानां सुप्रसिद्धो भेद:। 'ऋ'कारोच्चारणेऽपि दाक्षिणात्य-राजस्थानीयादीनां सुस्पष्टो भेद:।

अस्तु, नायं विषयो विस्तरमर्हति। जानन्त्येव सर्वेऽपि-देशजलवाय्वादीनां माहात्म्येन भाषायां निसर्गत एवाऽयं भेद उद्भवति। अत एव प्राचीनतम-आर्यभाषाया: सकाशादेव पूर्वतनीनां पूर्वपश्चिमादिभाषाणामुत्पत्तिरभवत्। सुदूरेषु यूरोपादिदेशेषु पूर्वं या: खलु लेटिन्-ग्रीकादयो भाषा प्राचलन्, या: खलु 'क्लासिकल्' संज्ञार्हास्ता: सर्वा अपि अस्या देवभाषाया: समुत्पन्ना:। न केवलं वयमेव, परं सुयोग्या: पाश्चात्त्यविद्वांसो मोनियर विलियम्स, प्रोफेसर-मैक्समूलरप्रभृतयोऽपि सुस्पष्टमिदं सम्मन्यन्ते।

एवमियमस्माकं देववाणी सर्वापेक्षया सुतरां प्राचीना, सर्वासां च भाषाणामादिपितामही च सिध्यति। किं नु नाऽनेन भाषाया अस्या महत्त्वमभिव्यक्तं भवति यत् सर्वासामपि भाषाणां महत्त्वमेतन्निदानकमेव? यत: सर्वा अपि ता: अस्या: सकाशादेव जन्मलेभिरे। कदाचन नवशिक्षोद्रिक्तमति: कश्चित्किशोर: स्वपितामहमवादीत्- ''तात! किं वाऽस्मदपेक्षया महत्त्वं भवत:, यदेवं सर्वाधिकगौरवेण मुहु: संमन्त्र्यते?''

वृद्ध: पितामह: सस्मितमवादीत्-''वत्स! पृच्छ मे महत्त्वमात्मन: पितरमेव यस्य खलु कलेवरमेव मत्सकाशाज्जननं लेभे।''

**शब्द-कोषमहत्त्वम्**

सेयं साधारणी कथा यत्-यस्य सविधे पूर्णं द्रव्यं भवति, स एव जनः सम्प्रति सांसारिकान्व्यवहारान् स्वच्छन्दतया यथावन्निर्वाहयितुं पारयति। स्वल्पेन 'भाण्ड' द्रव्येणाऽऽरभ्यमाणो व्यवसायो न किल विवेकिनां दृष्टौ फलेग्रहिर्भवतीति जानीयुः सर्वेऽपि। यस्य खलु कोषः पूर्णो भवति, स एव सर्वसमये सर्वविधं निजकार्यं साधयितुं प्रभवति। अत एव द्रष्टव्यमिदानीं यत्संस्कृतभाषायाः सविधे कोषबलं कियत्परिमाणकमिति। नयने प्रसारयन्तो वयं पश्यामो यदस्याः सविधे विपुलं खलु शब्दकोषरूपं धनम्। अनेके खल्वस्याः कोषाः- अजयपालकृतो नानार्थसङ्ग्रहः। गदसिंहकृता नानार्थध्वनिमञ्जरी। चक्रपाणिदत्तकृत शब्दचन्द्रिका। जटाधराचार्यकृतः पर्यायनानार्थकोषः। दण्डाधिनाथकृता नानार्थरत्नमाला, एवमादयो बहवः सन्ति। एते हि साम्प्रतमुपलभ्यन्ते तादृशाः कोषाः प्रदर्शिताः। ये तु साम्प्रतं नोपलभ्यन्ते, केवल ग्रन्थोद्धृतैर्नामभिर्यान् वयं जानीमस्ते भोगीन्द्रकात्यायनप्रभृतयस्तु पृथगेव सन्ति।

एतद्व्यतिरिक्तम्-अस्मद्भाषायां सर्वेषामेव शब्दानामुत्पत्तिर्मूलभूतैर्धातुभिरेवोपदिष्टा। एकैकस्माच्च धातोर्बहूनां शब्दानामुत्पत्तिर्भवति। यथा- 'गम्' धातोः गौः, गन्ता, गतिः, गमनम्, गतः, गामी, गन्तुः, गमकः, गच्छन्, गमिष्यन्, जग्मिवान्, गन्तुम् गत्वा, गामं गामम् इत्यादयोऽनेके शब्दाः सम्भवन्ति। अनेकेषां शब्दानां जन्मदातारो धातवोऽप्येवंविधा अनन्ताः सन्ति संस्कृतभाषायाम्। व्याकरणेषु धातुपाठे ये परिगणिता धातवस्तेष्वेव न खलु समाप्तिर्धातुपाठस्य। सर्वोऽप्ययं धातुपाठक्रमो दिग्दर्शनमात्रम्। अनन्ताः किल धातवः। न खलु तान् वैयाकरणपितामहोऽपि साकल्येन परिगणयितुं प्रभुः। अत एव हि प्राचीनतम आलङ्कारिकः श्रीमान् वामनः स्पष्टतमं वक्ति- ''वर्द्धते धातुगण इति हि शब्दविद आचक्षते।'' किं बहुना स्वयं व्याकरणेऽपि- भ्वादिस्त्वाकृतिगणः। तेन चुलुम्पतीत्यादिसङ्ग्रहः 'दिवादिस्तु भ्वादिवदाकृतिगणः। तेन क्षीयते, मृग्यतीत्यादिसिद्धिः', इति स्फुटमुदीर्यते।

अथाऽप्येकैकस्य धातोरुपसर्गसम्बन्धेन पुनरनेकेऽर्थाः सम्भवन्ति। को वा न जानाति यद् 'हृ' धातोर्हरणमर्थः। परं तेनैव धातुना सह यदि 'उप' उपसर्गो योज्यते तर्हि 'उपहारस्य' उपायनमर्थो भवति येन भवन्तः सन्तुष्येयुः। यदि 'प्रः' संयोज्यते तर्हि प्रहारस्य ताडनमर्थो भवति, यस्य किल चर्चापि सभ्यसमाजेऽनुचिता। यदि च 'आ'कारः संयोज्यते तर्हि आहारस्य भोजनमर्थो भवति यदर्थं लोकालये सर्वोऽपि समन्ताद् व्यस्तः। यदि तु 'उत्' योज्यते तर्हि उद्धारो भवति, यस्य कृते संस्कृतभाषामादाय वयं सर्वेऽपि शिक्षिताः साम्प्रतं प्रयत्नशीला। यदि च परिर्योज्यते तर्हि परिहारो भवति, यो हि साम्प्रतमापत्तीनां कर्त्तव्यः स्यात्। यदि तु विर्योज्यते तर्हि विहारः सिध्यति, यं किल सर्वेऽपि समये समये वाञ्छन्ति। यदि तु 'स' संयोज्यते तर्हि सर्वसंहारो भवति। कथयत! अस्ति कस्याञ्चिदन्यस्यां भाषायामेवंविधा विलक्षणता? अहं सदर्पमेव वक्तुं प्रगल्भेयज्जगतः कस्यामपि भाषायामयं चमत्कारो नास्ति, यदेकैकः शब्दः कल्पवृक्ष इव अनन्तार्थप्रसूर्भवेत्।

एतदुत्तरं गुणानाम् आकारप्रकारादीनां च दृष्ट्याऽपि शब्दानां निष्पत्तिः सिध्यति भाषायामस्याम्। यथा हि 'बादाम' फलस्य आकारं दृष्ट्वा नेत्रोपमफलमिति निर्देशः। 'अर्डूसा' इत्यस्य, व्यात्तस्य सिंहमुखस्य साम्यात् 'सिंहास्यः' इति। पत्रच्छेदे कृते बाणपृष्ठगतपक्षसाम्यात् 'शरपुंखः' ('सरफोंका', झोझरू इति च)।

एवमनेकैः प्रकारैः संस्कृतभाषायामपरिमिताः शब्दाः सिध्यन्ति। न खलु तानद्यावधि कोऽपि कोषकारः साकल्येन सन्दर्शयितुं प्रबभूव। यो हि व्याकरणशास्त्रस्य सर्वप्रामाणिक आचार्यः, सर्वमपि ज्ञातव्यं ज्ञातवान्, सोऽपि भाष्यकार श्रीमान् पतञ्जलिमहर्षिः शब्दानां परिगणनविषये पश्यत! किं वक्ति? 'अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो नान्तं जगामेति।'

एतावान् किल गभीरोऽस्माकं देवभाषायाः शब्दसागरो यदस्मिन् समये ये किल कृतकार्याः परिनिष्ठिताः परिगण्यन्ते, तेऽपि वराका नेममंशतोऽपि परिमातुं प्रभवन्ति। एकं सामान्यं दृष्टान्तमुपस्थापयामि। आसीदेकालब्धप्रतिष्ठानां पण्डितप्रकाण्डानां सुहृद्गोष्ठी। आसंस्तत्र व्याकरणाचार्यन्यायशास्त्रिविरुदालङ्कृताः कतिपये पण्डिताः। प्रसङ्गक्रमेण 'रत्नकार' – वाचिनि 'वैकटिक' शब्दे सम्मुखमागते ते सर्वेऽपि प्रोचुः – नायं शब्दोऽस्माभिरद्यावधि श्रुतः। यदि स्यात्तथापि नायं प्रसिद्धः। तेषां सेवायां सविनयमुक्तमपि–'प्रभो! रत्नकारवाचकोऽयं शब्दः प्रसिद्धः, प्रयुक्तश्च मार्मिकैर्ग्रन्थकारैः। कोषेषु हेमचन्द्रोऽवलोक्यताम्। अथवा श्रीमद्भिरेव मणिकारवाचकः कश्चन पारिभाषिकः शब्दो निर्दिश्यतां यो हि योगबलेन नाऽऽगतो भवेत्, अपि तु तस्मिन्नर्थे रूढो भवेत्।' परं नेदं सर्वमश्रावि प्रौढमहाभागैः। विवादश्चाऽयमेतावतीं भूमिमागतो यद् येषां गृहे सा मण्डली समवेताऽभूत्तेऽपि भृशमुत्तेजिता भूत्वा प्रोचुः– 'एतावन्तः प्रौढपण्डिताः कथयन्ति यदयं शब्दः प्रसिद्धो नास्ति, तत्किमसत्यम्? त्वमेव केवलं संस्कृतरहस्यवेदी?'

सहृदयाः! संस्कृतवाङ्मयस्य दृश्यतामक्षोभ्यत्वम्–यदत्र श्रुतशालिनः परमं प्रौढा अपि तलस्पर्शिनो नैकान्तं भवितुमर्हन्ति। बहुशः प्रयुक्तोऽयं वैकटिकशब्दो रत्नपरिचयप्रसङ्गे। यथा हि परमप्राचीनः प्रसिद्धकविर्भल्लटो 'भल्लटशतके'–

> **'स्वल्पाशयः स्वकुलशिल्पविकल्पमेव**
> **यः कल्पयन् स्खलति काचवणिक्पिशाचः**
> **ग्रस्तः स कौस्तुभमणीन्द्रसपत्नरत्न–**
> **निर्यत्नगुम्फ पटुवैकटिकेर्ष्ययाऽन्तः॥'**

नायं भल्लटः साधारणकविरेव। एष हि काव्यप्रकाशादिषु पदे पदे समुदाहृतः। रत्नपरिचये तु सुतरां प्रसिद्धोऽभूत्पण्डितमण्डले। अत एव हि पण्डितेन्द्रः क्षेमेन्द्रः समुदाहृतवान् 'कविकण्ठाभरणे' – 'यथा रत्नपरीक्षापरिचयो भल्लटस्य'–

**''द्रविणमापदि भूषणमुत्सवे शरणमात्मभये निशि दीपकः।**
**बहुविधोर्व्युपकारभरक्षमो भवति कोऽपि भवानिव सन्मणिः।।''**

नायं वैकटिकशब्दो मणिकारवाचक एव। रत्नवणिग् ('जौहरी')- वाचकोऽपि सोऽयं प्रयुज्यते सुकविभिः। अहह! कियन्मधुरमुवाच शम्भुकविः 'अन्योक्तिमुक्तालतायाम्'-

**'अक्षामं मणिदाम संवृणु, ननु त्वं दर्शयेथा मुहु-**
**र्मा मां मुग्धमनोहराः शशिकराऽऽकाराश्च हारस्त्रजः।**
**एषा वैकटिक! स्फुटैव पुरतः सा पामराणां पुरी**
**यस्यां काचललन्तिकाऽङ्कितकुचोत्सङ्गाः कुरङ्गीदृशः।।'**

प्रसक्तानुप्रसक्तेन अन्यतो गतोऽस्मि। प्रकृतमनुसरामि। एवं तावदस्माकं गीर्वाणभाषायाः कोषबलं माहम्मदानां कारूंदेशीयधनाऽऽगारतोऽप्यतिमहत् संसिध्यति। शब्दानां प्राचुर्येण वयमेकैकं भावमनेकैः प्रकारैः प्रकाशयितुं प्रभवामः। निम्ने किञ्चिदुदाहरणं दर्शयामि, यत् एकामेव वार्तां वयं गीर्वाणभाषया कतिभिः प्रकारैः प्रवक्तुं पारयाम इति।

''आकाश में जब बादल घिर रहे थे मैं उस समय सहृदयसम्मेलन के लिए घर से रवाना हुआ।''

यदा ह्यासन् गगने घनाः संहतास्तदैवाऽहं सहृदयसम्मेलनार्थं गृहात् प्रस्थितोऽभूवम्। अधिगगनमण्डलं यदा ह्यासन् मेघाः पुञ्जीभूतास्ताहं सहृदयसम्मेलनस्य कृते भवनात् प्रास्थिषि। व्योमनि यस्मिन् काले जलदाः समभवन् समवेतास्तदात्व एव सहृदयसम्मेलननिमित्तं सदनाद्यात्रामकरवम्। वियति यदा सममिलन्पयोदास्तदाऽहं सहृदयसम्मेलनाय वेश्मतो व्यदधां यात्राम्। वियन्मध्यमभिव्याप्नुवत्सु पयोधरेषु निकेतनादहं सहृदयसम्मेलनप्रयोजनाय प्रस्थानमकार्षम्। आकाशे मुदिरेषूपगच्छत्सु सहृदयसम्मेलनहेतवे गृहादहं प्रास्थिषि। यदा हि दिवि समवेताः समभवन् पयोमुचस्तदाहं सहृदयसम्मेलनकारणेन मन्दिरादहं व्यधिषि यात्राम्। विहायसि यदा ह्यभूवन् जीमूताः संघटितास्तदाऽहं सहृदयसम्मेलनस्य कृते गृहतोऽभूवं प्रस्थितः। अम्बरे यदा ह्यासन् वारिधराः परिवृतास्तदा खल्वहं सहृदयसम्मेलनाय समभूवं प्रस्थित ओकसः। अन्तरिक्षमुपयाताः खलु यदा वारिदास्तदा सहृदयसम्मेलनस्योद्देश्येन प्रस्थितोऽभूवमहमागारात्। तारापथमालीढवत्सु जलधरेषु सहृदयसम्मेलनाय सदनतः प्रचलितोऽभूवम्। नभसि संघटितेषु जीमूतेषु सहृदयसम्मेलनार्थमहमोकसः प्रास्थिषि। विष्णुपदमाचुम्बत्सु नूनमम्बुवाहेषु सहृदयसम्मेलनमुद्दिश्य निलयान्निःसृतोऽभवम्। सुरवर्त्मनि कृतनिलयेषु बलाहकेषु सहृदयसम्मेलनमुपलक्ष्य निशान्ताऽभ्यन्तरादभ्युपगतोऽभूवम्। अभ्रमभ्युपगच्छत्सु तडिद्वत्सु सहृदयसम्मेलनस्यार्थे निजोदवसितात्प्रोषित आसम्। नभःप्रदेशमुपगतेषु वारिवाहेषु सहृदयसम्मेलनस्य हेतोर्निलयात् निरसरम्।

बहुवचनानुरोधात् मेघसमूहश्चेद् गृह्यते तर्हि-

अम्बरमभ्युपगतायां कादम्बिन्यामहमागारादभूवं निष्क्रान्तः। वियदाचुम्बिन्यां कादम्बिन्यामहमोकसः समभूवं निर्गतः इत्यादिर्भूयान्विस्तरो भवेत्। यदि च मेघसमूह-घनपटल-वारिदनिवह-जलदनिकाय-जलधरनिकर-इत्यादि चेत्प्रयुज्यते तर्ह्यपि भवेद् बहुतरो विस्तरः।

विवेकिमहानुभावा: ! कियद्वा परिगणयामि, 'मेघस्य' 'व्याप्तिक्रियाया:' 'गृहस्य' गमनार्थकक्रियायाश्च पर्यायशब्दानादाय सम्भवन्ति वाक्यस्याऽस्य एवंप्रकाराणि बहूनि रूपाणि।

'अहं गृहात्प्रस्थितोऽभवम्' इत्यस्य कर्मवाच्यतायां 'गृहत: प्रास्थीयत मया' 'गृहादक्रियत मया प्रस्थानम्', 'सदनादकारि मया यात्रा', 'भवनत: प्रास्थीयत मयका' 'सद्मत: प्रयाणमक्रियत मया', 'ओकसो व्यधायि मया यात्रा', 'भवनत: प्रचलितेनाऽभूयत मया', 'निकेतनात्प्रस्थितेनाऽभावि मया', 'निलयात्प्रयाणमकारि', इत्यादीनि तावन्मात्राण्येव पुन: सम्भवेयु: स्वरूपाणि।

पूर्वोक्तान्यमूनि कारणानि सम्यगालोच्य विचार्यतां विवेकशालिभि: श्रीमद्भिरेव यत्संस्कृतभाषायामस्यां कियानवकाश इति। या हि भाषा परिमितै: शब्दै:, परिमितेन रूपेण तांस्तान् भावान् प्रकाशयितुं विवशा (बाध्या) भवति, सा केन वा रूपेण निजमनोभावान् (प्रसङ्गानुसारं नानारूपैरुपस्थितान्) यथावत्प्रकाशयितुं प्रभवेत्प्रकामं प्रभु: ? भाषा हि मनुष्यस्य मनोभावान्प्रकाशयितुमुत्पन्नाऽभवदिति भाषावैज्ञानिका: प्रवदन्ति। ततश्च यस्या: खलु भाषाया: सविधे मनुष्यस्याऽभीष्टान् भावान् प्रकाशयितुं साधनान्येव न भवेयु:, सा कथं वाऽऽत्मन उद्देश्यं सफलयेत् ?

कल्प्यताम् अस्माभिर्ज्येष्ठमासस्य माध्याह्निक: सूर्यो वर्णनीय:, तस्मिन्वर्णने सूर्यस्य तादृङ्नाम प्रयोक्तुमस्माभिरभिलष्यते, येन सूर्यतापस्य प्रचण्डता भयङ्करता च प्रतीता भवेत्, तदाऽस्माकं चित्तं तादृशभाषाऽवबोधकं सूर्यनाम अन्वेष्टुमुद्व्याकुलं भविष्यति। अन्विष्यन्तो वयं संस्कृते-'चण्डांशु:, प्रचण्डकार:, तिग्मरश्मि: इत्यादीनि नामान्युपलभामहे। यदा चाऽस्माकं सामान्येन प्रात: कालिको भानुर्वर्णनीयो भवति तदा वयं- 'रात्रिमपनीय दिनमनेन प्रवर्तितमिति हृदि कृत्वा तादृशभावप्रकाशकं सूर्यनामाऽन्वेषयिष्याम:। उपलभ्यते चा तादृक् संस्कृतभाषायाम् अहस्कर:, दिवाकर:, दिनमणि:, दिनकर:, दिनपति: इत्यादि। यदा च देवानां मध्ये श्रेष्ठत्वमेव सूर्यस्य साधयितुमिष्यतेऽस्माभि: तदा सूर्यस्य पूज्यताख्यापक महिमशालि नामधेयं गवेषयिष्याम:। अस्ति तादृगपि संस्कृते सूर्यनाम-आदित्य: (देवमातुरदितेरपत्यमिति), ग्रहपति:, त्रयीतनु:, लोकबन्धु:, लोकबान्धव:, त्विषांपति:, द्वादशात्मा इत्यादि।

यदि च पापकार्यं कुर्वाणाय कस्मैचित्पामराय शिक्षां प्रदातुं भगवत: सूर्यस्य साक्षित्वं प्रतिपाद्यते चेत्तर्हि तादृङ् नाम मार्गयिष्यामो येन सूर्यस्य सर्वव्यापकत्वं प्रतीतं भवेत्। अस्ति तादृगपि संस्कृतवाण्याम्-कर्मसाक्षी, जगच्चक्षु:, लोकबन्धु:, इत्यादि। यदि च सर्वेषां रङ्गाणां (वर्णानाम्) श्रीमान् भानुरेवाऽऽश्रय:, एतस्य किरणेषु सर्वप्रकारका रङ्गा: सन्ति (इदं किल विज्ञानं पाश्चात्यै: परिमितादेव कालादवबुद्धम्। अस्माकं तु चिरकालतस्तदिदमवगतमभूत्)। अस्तु, यद्येष विषयोऽस्माकं प्रतिपाद्यो भवेत्तर्हि एतदभिव्यञ्जकमपि संस्कृतभारत्यां सूर्यस्य नामधेयमुपलभामहे। यथा-चित्रभानु: इति।

इदानीं विचार्यतां, यस्या: खलु भाषाया: सविधे सूर्यवाचक: केवलं 'सन्' शब्द

एव नीवीधनं भवेत्सा भाषा कथमस्माकं पूर्वोक्तान् भाषान् यथावत्प्रकाशयिष्यति? इदानीं कथयत! पूर्वोक्तानां कामप्रसूनां शब्दानां पुरस्तात् सः 'सन' शब्दः शणपिण्ड इव निःसार कुतो वा न प्रतीतो भवेत्? यस्य खलु जनस्य सविधे कश्चिदेक एव जीर्णः परः शयनसमये भोजने, स्नाने, बर्हिभ्रमणे, सभासंस्थादिषु चापि कलेवरलग्नो भवेत्स किल भवादृशानां महिर्भ्रवस्त्रधारिणां सविधे कुतो वा न दरिद्रः परिगणयिष्यते? एतादृशो जनो दिव्यपटधारिणां श्रीमतां सन्निधौ किं स्थानं प्राप्नुयात्? अस्तु, एवं प्रभूतेन शब्दकोषेण सम्पन्ना सेयमस्माकममरभारती अन्यासां भाषाणां सविधे महार्हं सिंहासनमध्यासितुं नास्ति किं योग्या?

## कीदृशी वार्ता कैरक्षरैर्वाच्या?

उपरि तु सोऽयं शब्दानां विषयो निवेदितः श्रीमद्भ्यः। परं कीदृशी वार्ता कैरक्षरैर्वक्तव्या, इति सूक्ष्मातिसूक्ष्मरूपेणाऽनुशासनमपि किमन्यस्यां भाषायामुपलभ्यते? यदि कश्चिज्जिघांसुः क्रोधाऽऽवेगकम्पितसकलावयवः खड्गमुद्यम्य, क्रोधोद्रेकवशात्तिरोहितहिताऽहितज्ञानः कञ्चित्पुरुषं हन्तुं विचेष्टते, तर्हि कीदृशैरक्षरैः स आततायी बोधनीयो येन तस्य क्रोधः किञ्चिन्न्यूनो भवेत्, उचिताऽनुचितज्ञानं पुनरुदयेत्तस्य, प्राणिवधपातकाच्च निर्मुक्तो भवेत्सः। अस्मिन्नवसरे संस्कृतभाषा कथयति ''एवंविधैरक्षरैर्गुम्फितानि वाक्यानि प्रयोज्यानि तस्मिन् समये, यैरवश्यमेव तस्य कोपो न्यूनो भवेत्।''

यदि च कश्चिद्धर्मपरिपन्थी दुर्दान्तो राजा निष्कारणमेव कञ्चिद्राजानमाक्रान्तवान्, तर्हि आक्रान्तस्य तस्य राज्ञः कीदृशैरक्षरैः पराक्रमशक्तिर्जागरणीया, येन धार्मिकभावोत्तेजितमनाः स द्विगुणीभूतशक्तिः शौर्योद्दीप्तः सन् परिपन्थिनमेनं पराभवेत्। यदि च कश्चिदाख्यानलेखकः कयोश्चिद्यूनोः परस्परप्रेमसम्बन्धिनीं कथामाख्याति, तर्हि कीदृशैरक्षरैस्तत्र वाक्यरचना कार्या यामाकर्णयतां, वाचयतां वा चेतस्सु सुमधुरमनोहरा काचिदपूर्वैव प्रेमरसधारा प्रवहेत्। तदाऽस्माकं संस्कृतभाषा नियमं प्रदर्शयति– 'मधुरे विषये प्रतिपादनीये टडढवर्णाः शब्देषु न प्रयोज्याः। वर्गपञ्चमाक्षरयुक्ता अन्ये वर्णाः प्रयोक्तव्याः, इति'।

यदि तु कश्चिदुत्तेजनाकारी ओजोविषयो वर्णनीयो भवेत्तर्हि वर्णानां प्रथमतृतीयवर्णा द्वितीयचतुर्थाभ्यां संयुक्ताः, टडढवर्णाः, रेफसंयुक्ताश्च केचिद्वर्णाः दीर्घदीर्घाः समासाश्च प्रयोज्याः। यथा हि गुरुधनुर्भङ्गाच्चण्डमूर्तेः परशुरामस्य श्रीरामचन्द्रं प्रत्युक्तिः–

**''नवोच्छलितयौवनस्फुरदखर्वगर्वज्वरे**
**मदीयगुरुकार्मुकं गलितसाध्वसं वृश्चति।**
**अयं पततु निर्दयं दलितदृप्तभूभृद्गल-**
**स्खलद्रुधिरधस्मरो मम परश्वधो भैरवः।।''**

अत्र हि क्रोधस्थायिभावको रौद्रो रसः खेलतीति तादृशा एव वर्णाः संघटिताः कविना, यां संघटनामाकर्णयतो जनस्य हृदि ओजोगुणजागरणसूचिका मनस उद्दीप्तिः सुस्फुटमाविर्भवति।

महाकविः कालिदासः संस्कृतसाहित्ये कियत्सुप्रथितयशाः? यस्य खलु मधुररस–

नि:स्यन्दिनीमनुपमां काव्यरसधारामास्वाद्य समग्रमपि भूमण्डलं प्रमुदितं चमत्कृतं चाऽस्ति। तस्यापि महाकवे रचनायां प्रदर्शयन्ति संस्कृतसाहित्यमार्मिका भाषाविषयकं दोषं यदयं महाकवि: कुत्रचित्कुत्रचित् समयानुगुणं वक्तुं न पारयतीति। एष हृदयेन सहाऽनुबद्धां मधुररसाऽनुगुणां रचनां सर्वस्मिन्नपि समये प्रयुङ्क्ते। यदा हि 'शाकुन्तले' मातलिरदृश्यरूप: सन् दुष्यन्तप्रियसखं विदूषकं मेघाच्छन्नप्रासादशिखरे आक्रान्तवान्, तदा आमोडितकन्धर: स ब्राह्मण: कातरस्वरेण बहुविधमब्रह्मण्यमाक्रन्दितवान्। तमेतमार्तस्वरं श्रुत्वा महाबलो दुष्यन्त: सुभृशं चुकोप–'हन्त हन्त ममाऽपि गृहा: सत्त्वैरभिभूयन्ते। मत्समक्षमेव मत्प्रियसखो माधवो निष्करुणमेवमभिहन्यते!' क्रोधेन जाज्वल्यमान: स धनुर्बाणमादाय प्रासादमध्यारुरोह। परं न ददर्श कञ्चिदपि सत्वम्। आपीडितकण्ठतटो ब्राह्मणस्तु द्विगुणतरं चीत्करोति स्म। इदानीं पञ्जरनिबद्ध: केसरीव सुभृशमभूत्कुपितो दुष्यन्त:। महामहति क्रोधेऽपि कान्यक्षराण्युवाच? दृश्यताम्– ''भो भोस्तिरस्करिणीगर्वित! किमिदानीं मदीयमस्त्रमपि न त्वां पश्यति? स्थिरो भव। मा च ते वयस्यसम्पर्काद्विश्वासो भूत्, पश्य तमिषुं सन्दधे–

**'यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षिष्यति द्विजम्।**
**हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यप:।।'**

अहह! धनुर्बाणमादाय मन्ये दुष्यन्तराजो नीतिशास्त्रस्योपदेशं ददाति! अहो क्रुद्धस्य मुखात् कियन्नाम शोभन्ते– 'हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यप:' इति प्रशान्तसुभगान्यक्षराणि।

सर्वविधसाहित्यपरिशीलका: पाठकमहाभागा:! कथयत! अस्ति कस्याञ्चिदन्यस्यां भाषायामेवंविध: सुसूक्ष्मो भाषाविचार:? यत्र हि साहित्यस्य मौलिमुकुटमधिरूढा भूमण्डलविख्याता महा–महाकवयोऽपि, स्वल्पतमायामपि सूक्ष्मतायामुल्लङ्घितायामपि विवेकिनामालोचनाचक्रान्नाऽव्याहतिं लभन्ते!! एतस्या भाषाया: संस्कारार्थमेव 'साहित्य' –नामधेयं गभीरतमं शास्त्रं जागर्त्यस्यां देवभाषायाम्, यदन्तर्गतान्यनेकानि ग्रन्थरत्नानि चमत्कुर्वन्ति भाषान्तरपाठकानां मर्मपरिशीलकानि चेतांसि। अस्तु, साहित्यगता विशेषा: सुप्रसिद्धा: प्रायो विशेषज्ञमहानुभावानां, किन्तु भाषाया अस्या: स्तरे स्तरे, तादृशी सुव्यवस्था परिचालिता, यया हि एतस्या वाक्यनिर्माणे, वाक्यद्वारा अर्थपरिज्ञाने च नांऽशतोऽपि भ्रमो भवति।

## भाषाया: शरीरसंघटने सुव्यवस्था

भाषायां हि विकारो भ्रामकत्वादिना उद्भवति। अस्मिन् वाक्येऽस्य शब्दस्य कर्मत्वम्, उत कर्तृत्वमिति यत्र भ्रमो भवति, तत्र हि भाषा विकृता भवतीति वदन्ति भाषावैज्ञानिका:। किन्तु भूमण्डले सर्वत: सुविस्तीर्णाऽपि सेयं तादृश्या सुव्यवस्थया सम्पन्ना यत्साधारणत: शिक्षितस्याऽपि न कदाचित्वसंशयो भवति। अत्र हि व्याकरणस्य तादृशी सुव्यवस्था यस्यां भ्रमोदयस्य न स्वल्पोऽप्यवकाश:। द्वितीया विभक्ति: कस्मिन् कस्मिन् स्थले, तृतीया विभक्ति: कुत्र कुत्र भवति, प्रथमा च कस्मिन् स्थाने इति सुविशदं नामनिर्देशपुरस्सरमनुशास्ति

संस्कृतव्याकरणम्। एकस्मिन् वाक्ये एकां क्रियां प्रति द्वयोर्द्वयोः शब्दयोः कुत्रचित्कुत्रचिद् वाक्ये कर्मत्वं भवति। परं तत्र कीदृशं मुख्यं कर्म, कीदृशं च अमुख्यमिति सर्वं परिगणय्य प्रदर्शयति व्याकरणम्-यत् अस्य-अस्य धातोर्योगे अस्मिन् अस्मिन् (मुख्ये अमुख्ये वा) कर्मणि कर्मत्वबोधिका द्वितीया विभक्तिर्भवतीति। पुनस्तस्य वाच्यान्तरकरणे, (कर्तृवाच्यतः कर्मवाच्यकरणे (Passive Voice) मुख्ये कर्मणि प्रत्ययः? आहोस्वित् अमुख्ये? इति प्रश्नसमाधानार्थं सर्वा अपि क्रियाः परिगणय्य प्रदर्शयति व्याकरणं यत् अस्य अस्य धातोर्योगे अस्मिन् अस्मिन् कर्मणि (गौणे वा मुख्ये वा) प्रत्ययो भवतीति।

इयम् इयं विभक्तिः एतम् एतमर्थं बोधयतीति कारकविभागः, इयम् इयं च क्रिया इमम् इममर्थं बोधयतीति क्रियाविभागः संस्कृतव्याकरणे तथा सुनिबद्धोऽस्ति यज्जगतः कस्यामपि भाषायां तादृशः सुव्यवस्थितो नाऽस्तीति घोषणापुरस्सरं शक्यते वक्तुम्।

पश्यत, सररमेशचन्द्रदत्तमहाशयः स्वनिर्मिते इतिहासे किं वक्ति- ''इदं संस्कृतभाषाया एव ज्ञानमासीत् यत्साहाय्येन अस्यां शताब्द्यां युरोपवासिभिर्विद्वद्भिर्भाषातत्त्वमाविष्कृतम्। 'बॉप' एवं 'ग्रिम' नामकाभ्यां तथा अन्यान्यैश्च विद्वद्भिः, आर्यभाषाशब्दानां तेनैव प्रकारेण व्युत्पत्तिः कृता, येन प्रकारेण श्रीमत्पाणिनिना संस्कृतभाषायां कृताऽऽसीत्। सा आर्याणामितिहासस्य तावति पूर्वकाले कृताऽभूद् यदा हि एथेन्सस्य रोमस्य च परिज्ञानं नाऽऽसीत्।''

सर्वास्वपि भाषासु कर्तृवाचकशब्दानां कर्मवाचकशब्दानां च पूर्वाऽपरत्वं नियमितं भवति। यदि तत्र विपर्यासः क्रियेत, तर्हि अर्थान्तरमेव सम्भवेत्, न सोऽर्थः। 'मनुष्यो दुर्दान्तं सिंहं हन्ति' इत्यस्य वाक्यस्य इंग्लिशभाषायामनुवादे 'A Man Kills a furious lion' अत्र हि Man इति- कर्तृपदं पूर्वम्, lion इति कर्मपदं पश्चादिति सर्वदा सुनिश्चितं च। यद्यत्र पूर्वं मनुष्यवाचकपदस्य निवेशः स्यात्तर्हि 'सिंहो मनुष्यं हन्ति' इति विपरीत एवाऽर्थः सम्भवेत्। परमस्माकं संस्कृतभाषायां विभक्तिचिह्नानां तथा सुव्यवस्थाऽस्ति यत् महामहत्यपि वाक्ये किञ्चिदपि पदं कुत्रापि परिवर्त्यतां नाम, तथाऽप्यर्थविषये कदाऽप्यव्यवस्था नोत्पद्यते।

'एष मनुष्यो दुर्दान्तं सिंहं हन्ति' इति वाक्ये 'दुर्दान्तमेष सिंहं हन्ति मनुष्यः' 'सिंहमेष मनुष्यो दुर्दान्तं हन्ति' 'हन्त्येष मनुष्यो दुर्दान्तं सिंहम्', 'मनुष्य एष हन्ति दुर्दान्तं सिंहम्' 'हन्ति मनुष्य एष दुर्दान्तं सिंहम्' 'दुर्दान्तं हन्ति मनुष्य एष सिंहम्' इत्यादि, येन केनाऽपि रूपेण परिवर्त्यन्तां शब्दाः, परम् अर्थो न मनागपि परिवर्तते। कथयत! कीदृशी सुव्यवस्थास्ति कर्मकर्त्रादिकारकाणाम्। कियच्च स्वातन्त्र्यमुपलभते प्रयोक्ता। ये महाभागाः कवितां कुर्वन्ति, भवेत्तेषामनुभवो यच्छन्दसि समावेशार्थं वाक्ये शब्दानामितस्ततः करणं कस्मिंश्चित् कस्मिंश्चित्समये कियदावश्यकं भवति इति। मनोभावप्रकाशनार्थं भाषाया आवश्यकता भवतीति मूलसूत्रमधिकारसूत्रवत् सर्वत्राऽनुवर्तते। इदानीं दृश्यतां, कविताकर्तुः मनोभावप्रकाशनार्थं संस्कृतभाषायामस्यां वाक्यविन्यासकृता कियती स्वतन्त्रता समुपलभ्यते कर्त्रा?

किञ्च-द्वयोः स्वरयोर्मध्ये सन्धिकरणम्, बहूनां पदानां साहाय्येन एकपदनिर्माणम्

(अर्थात् समासः), इत्यादयो विशेषाः सन्ति संस्कृतभाषायामेव, नाऽन्यस्याम्। अन्विष्यन्तां जगतः समस्ता अपि भाषाः, परं न कस्यामपि भाषायामिमे विशेषाः समुपलभ्येरन्। यदि कथयत, एभिर्नियमविशेषैस्तु भाषायां कठिनता समुत्पद्यते। अत एव हि उत्तरोत्तरं दुर्बोधा सेयं भाषा सम्पन्ना, सम्पद्यते च।

आम्, स्यादेतत्। किन्तु काठिन्येनाऽनेन संस्कृतभाषायामस्यां कीदृशी सुव्यवस्था सम्पद्यते इति क्षणं विचार्यतां सूक्ष्मरूपेण। कस्याश्चन नगर्याः पर्यन्ततः प्राकारद्वारा वेष्टनेन, स्थाने स्थाने गुल्म ('थाना')निवेशनेन, मिथः सूचनाविभागस्थापनेन च आडम्बरमिव अवश्यं प्रतीयते। परं नगर्या एतस्याः संरक्षा कीदृशी भवति? यत्सहसैव कोऽपि परिपन्थी नगरीप्रचलितां सुव्यवस्थां, शासनादिकार्यं च न सहसा भेत्तुं शक्नुयात्। अस्तु वा भाषायां कठिनता, परं सेयं कठिनता एतद्व्याकरणज्ञानमूलिकैव। अवश्यं व्याकरणमस्याः कठिनम्। व्याकरणस्य काठिन्यमपि केनचित्कारणेन। सेयं भाषा सुविस्तृताः। अनन्ता अस्यां शब्दाः। देशानां कोणकोणेषु, बहुषु देशेषु प्रसृता। अतएव देशदेशेषु मनुष्याणामाचारव्यवहारवैचित्र्यात्, सम्भाषणस्य नानाविधशैली ('मुहाविरे') जुष्टत्वात्, तत्तद्देशे वस्तुनाम्नां विभिन्न-विभिन्नत्वात्, भाषायामस्यामनन्ताः शब्दाः, अनन्ताश्च शैल्यो देशविशेषेषु चिरकालात्प्रसृताः। व्याकरणं च समग्राया अपि देशभाषायाः कृते निष्पन्नम्। विशेषतश्च पाणिनीयम्, यत्र हि प्राचीनकालप्रचलिताया वैदिकभाषाया अपि रूपाणि निष्पद्यन्ते। ईदृग् विस्तृताया भाषायाः सर्वदेशीयानां (प्राक्-प्रत्यक्-उदग्)-देशेषु सर्वतः प्रचलितानां शब्दानां साधुत्वानुशासनार्थं व्याकरणस्य कियान् विस्तारः स्यात्? तावन्तं विस्तारं च को नाम शिक्षार्थी अवधारयेत्! अत एव व्याकरणस्याऽस्य संक्षिप्तिकरणार्थं सोऽयं सूत्रनिर्माणस्य सुसूक्ष्मः पन्थाः। तत एव च तदिदं सूत्रबद्धं व्याकरणं, जिज्ञासूनां कृते, अवश्यावश्यं कठिनं सम्पन्नम्।

इदानीं बहवो महाभागास्तदेतद् व्याकरणं सरलं भवेत्तथा प्रयतन्ते नितान्तम्। सम्भवेत् किञ्चित् किञ्चित्सरलताऽपि मन्ये। परमेतेषां व्याकरणसुधारकमहाभागानां तदेतदवश्यं निवेदनीयं यदेते महताऽवधानेन तदिदं कार्यं कुर्युः। अतीव दायित्वपूर्णमिदं मार्मिकं कर्तव्यम्। एतेषां प्रयत्नसम्भ्रमेण गीर्वाणभाषाया एतस्याः स्वभाविकी सुव्यवस्था न भग्ना भवेदिति नितरां विचारणीयम्।

## उन्नतभावशालित्वं स्वाभाविकमस्यां भाषायाम्

अस्तु तावदिदम्। इदानीं तदिदं विचारणीयं यदस्यां भाषायां स्वाभाविकं गौरवं कथं नाम सर्वैरङ्गीक्रियते, कियच्चाऽस्तीति। यदि चाऽस्याः स्वाभाविकमुदारभावोन्मुखत्वं सिध्येत्तर्हि शिक्षाविवेकिनां सचेतसां समाजे सेयं निर्विवादं गौरवसिंहासनमलङ्कर्तुं योग्या संसिध्येत्। यः खलु पुरुषो महामहाधनसम्पत्तेः स्वामी भवेत्, परमविस्तृतं च यस्य राज्यं भवेत् परं यदि तस्य

मनो न भवेदुदारभावाऽऽपन्नं तर्हि न तस्य कोऽपि महत्त्वं स्वीकरोति, न च तस्य धनसम्पत्त्यादिना जनतायाः प्रभूत उपकार एव सम्भवति। प्रभूतधनस्सम्पत्त्यादिना, बाह्येन च गौरवेण न कस्यापि महत्त्वं सुस्थिरं भवति इति हि सर्वेऽपि सर्वदेशीयाः पण्डिताः सिद्धान्तयन्ति। इदानीमनेन मानदण्डेन संस्कृतभाषाया महत्त्वं परिमीयतां श्रीमद्भिः। आलोचयामो वयं संस्कृतभाषाया अन्तः, एतस्याः स्तरे स्तरे उन्नताः स्वाभाविका भावा विद्यन्ते इति। समग्रस्यापि संसारस्य सम्मुखे सर्वतः प्रथमं या आध्यात्मिकं भावं स्थापयामास सा भाषा उन्नतभावशालिनी नास्तीति को वा बुद्धिशाली समर्थयेत? युरोपदेशीयाः पारस्यदेशीयाश्च सर्वेऽपि विद्वांस एकमुखेन घोषयन्ति–

'यद् आध्यात्मिकभावसम्पन्ना काचिद् भाषा यद्यस्ति संसारे तर्हि सा संस्कृतैवेति।' मोनियर विलियम्सप्रभृतयः पाश्चात्त्यपण्डिताः सम्मन्यन्ते यत् 'संस्कृतभाषायां निसर्गत एव उच्चाः सन्ति विचाराः।' पाश्चात्त्यः सुप्रसिद्धस्तत्त्ववेत्ता शोपनहारः स्पष्टं सिद्धान्तयति– ''यद् भारतीयं वायुमण्डलम् उत्कृष्टान् पवित्रान् सत्यांश्च विचारान् प्रचारयत्यस्मासु''। या हि भाषा उपनिषत्सदृशान् ग्रन्थान् प्रसूते, भगवद्गीतासदृशांश्च प्रबन्धानुपजनयति, सा यद्युन्नता उन्नतभावशालिनी च न भविष्यति तर्हि काऽन्या भविष्यति?'' एकाऽन्यापि वार्तास्ति–न केवलं पाश्चात्त्या एव, अपि तु अन्यदेशीया अपि अनुभविनो मार्मिका अपि कथयन्ति यद् भाषाया उपरि तद्भाषाभाषिणां प्रभावः समधिकं पतति। यदि काञ्चिद्भाषां मृदुस्वभावाः संयमिनो दयाशीलाश्च पुरुषा व्यवहरिष्यन्ति तर्हि तद्भाषाया उपरि तेषां तादृशः प्रभावः पतिष्यति। अत एव हि समर्थयन्ते पाश्चात्त्या विद्वांसो ''यत्संस्कृतभाषा मधुरस्वभावसम्पन्नानामार्याणां भाषणवशान् माधुर्यपूर्णा जातास्तीति''।

एतदेव किम्। इतोऽपि गभीरतमं विचार्यताम्– यां खलु भाषां विज्ञानस्य साक्षादवतारो भगवान् वेदव्यासः, श्रीमद्वाल्मीकि-प्रभृतयो महर्षयः, श्रीमच्छङ्कर-रामानुजवल्लभप्रभृतयो धर्माचार्याश्चाङ्गीकृतवन्तः, सा भाषा उन्नतान् भावान् कुतो वा नाश्रयेत्? जगद्गुरुणां येषां प्रभावः कोटिकोटिपुरुषेषु प्रसृतोऽभवत्तेषां महानुभावानां भाषा किं न भविष्यत्युन्नता? किं बहुना, यां भाषां भगवदवतारः श्रीमान् बुद्धदेवो व्यवहरति स्म सा भाषा किं नास्ति दिव्यप्रभावसम्पन्ना? यस्य हि बुद्धदेवस्योपासकाः समग्रेऽपि संसारे सर्वतोऽप्यधिकायां सङ्ख्यायां सन्ति, पारेसमुद्रमपि यदुपासकानां राज्यसत्ता जागर्ति, तस्य खलु बुद्धदेवस्योपास्या भाषा उन्नतभावशालिनी नास्तीति किं कोऽपि भुजदण्डाऽऽस्फालनपुरस्सरं साधयितुं समीहते? ननु बुद्धदेवस्य धर्मप्रचारभाषा प्राकृताऽऽसीदिति न भ्रमितव्यं केनाऽपि। यतो हि सा संस्कृतातो नाऽतिरिच्यते। संस्कृतमेव मूलमालम्ब्य अतिस्वल्पेन भेदेन सा स्थिरीकृता। संस्कृतभाषाभाषी स्वल्पेन विचारेण तामनायासं बुध्यते। अत एवाऽस्माकं संस्कृतनाटकेषु स्वच्छन्दं प्रयुज्यते स्म सा भाषेति न वयं भाषान्तरेण साकं विभागसमये तां संस्कृतभाषातो भिन्नां स्वीकरिष्यामः। तत एव हि काव्यप्रकाशसाहित्यदर्पणरसगङ्गाधरादिषु उदाहरणप्रसङ्गेन, साहित्यविषयस्य कस्यचिदालोचनासन्दर्भेण वा, गाथासप्तशतीप्रभृतीनां गाथा निर्विशङ्कमुद्ध्रियन्ते।

संस्कृतभाषायाः स्वाभाविकगौरवसम्पन्नतायाः सम्बन्धे एकमन्यदप्यस्ति सुस्फुटं प्रमाणम्–यत् अस्यां कश्चित्साधारणोऽपि विषयो नितान्तं गौरवशालीव सम्पद्यते। भाषान्तरे यो विषयस्तुच्छ इव दृश्यते स्म, सोऽपि विषयः श्रीमत्यामस्यामुपसंविश्य गौरवयुक्तः सम्पद्यते इति समये समये स्वत एवाऽनुभवितुं शक्यते।

कतिचिद् वर्षाणि व्यतीतानि–एकेन महाराष्ट्रसज्जनेन सारपूर्णः कश्चित्प्रबन्धः प्रकाशितोऽभूत् साहित्यिकमासिकपत्रे यत्–संस्कृतभाषायाः साहित्यग्रन्थेषु हास्यरसस्य परिपोषो नास्तीति। काव्यप्रकाशस्य हास्यरसस्योदाहरणे–

**'आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या**
**मन्त्राऽम्भसां प्रतिपदं पृषतैः पवित्रे।**
**तारस्वरं प्रथितथूत्कमदात्प्रहारं**
**हा हा हतोऽहमिति रोदिति विष्णुशर्मा।।'**

प्रकरणसूचनां विना विष्णुशर्मणो वराकस्य मन्त्रपूते मस्तके थूत्कारसहितं चपेटाप्रहारमालक्ष्य हास्यस्य स्थले कारुण्यमेव मन्ये समुदियात्। साहित्यदर्पणस्योदाहरणे–

**'गुरोर्गिरः पञ्च दिनान्युपास्य वेदान्तशास्त्राणि दिनत्रयं च।**
**अमी समाघ्रातकुतर्कवादा समागताः कुक्कुटमिश्रपादाः।।'**

एतदादिभिः कियान्वा वास्तवो हासः समुदेतीति सहृदया एव पृच्छ्यन्ताम्।

एवं किल संस्कृतसाहित्यस्य मध्याह्नदशापर्यन्तं हास्यस्य तथा सुस्फुटोपलब्धिर्नावेक्ष्यते यथा किल भाषान्तरेषु। अन्तिमे आकरग्रन्थे 'रसगङ्गाधरे' तु हास्यस्योदाहरणं किञ्चित्सफलतां स्पृशति। यथा–

**'[१]श्रीतातपादैर्विहिते निबन्धे निरूपिता नूतनयुक्तिरेषा।**
**अङ्गं गवां पूर्वमहो पवित्रं न वा कथं रासमधर्मपत्न्याः।।'**

एतेन किल संस्कृतभाषासेविनः कदाचिद्विमनायेरन्–यत् अस्माकं सर्वरसाविष्कर्त्री संस्कृतभाषा हास्यरसं प्रकटयितुं किमपटुः? तान् विदुषः सविनयमिदमावेदयामि–भो भो मार्मिकाः! न भेतव्यं न भेतव्यमस्मात् अन्तः फल्गुभूतादाक्षेपात्। पूर्वापरतत्त्वविमर्शनेन स्फुटमिदं श्रीमन्तः परिज्ञातुं प्रभवेयुर्यत् संस्कृतभाषायाः स्तरे स्तरे तादृशा उच्चभावा अनुस्यूताः सन्ति, यदस्यां हसनीयत्वेन प्रवृत्ता भावा अपि किञ्चित्तथा गौरवं स्पृशन्ति यथा किल तैर्यथाभिलषितो हासो नोद्भवति। हास्ये हि भाषाऽपि तादृश्येव उपयुज्यते, क्रीडनकभूतया यया हि श्रुतमात्रया बलादिव श्रोतुर्हास्यमुदियात्। यस्यास्तु वाक्यसङ्घटनायाम् अलक्षितमेकं गौरवमकस्मात् अन्तः आविर्भवति तस्यां भाषान्तरवत् कथं वा क्षुल्लककथासम्बद्धं हास्यमवलोक्यताम्?

---

१. पितृचरणैः धर्मशास्त्रस्य यो निबन्धो निर्मितः, तस्मिन् सैषा नूतनी युक्तिः, यत् गवां शरीरस्य यदि पूर्वभागः पवित्रः, तर्हि गर्दभगृहिण्याः (गर्दभ्याः) पूर्वभागः पवित्रः कुतो न स्यात्? (गवां पश्चाद्भाग एव पवित्रः, अन्तिमो भागो न। अहह कीदृशी धर्मशास्त्रज्ञता! धर्मपत्नीत्यपि हास्यानुकूलम्।

मनाक् तत्त्वं विचारयन्तो मनोवैज्ञानिकाः सम्यगिदं बोद्धुं पारयेरन्– यो हि रात्रिन्दिवम् युद्धादिकठोरकर्मणि जीवनं यापितवान्, येन शौर्यभावोद्दीप्तानि वीरवाक्यानि विहाय न कदाचिद्दैन्यवाक्यानि व्यवहृतानि, स किल नैसर्गिकवीरः निजवाक्यैः कारुण्यप्रदर्शने किं सहजमेव सफलो भवेत् ? तस्य शनैरुदीरितेन साधारणवाक्येनाऽपि लोकस्य भयमिव भवेत्। एवमेव स्वभावतो महत्त्वशालिन्यामस्यां संस्कृतसरस्वत्यां यः कोऽपि विषयस्तथा सुनिबद्धो भवति यथा लोकस्य मानसे गौरवभावस्याऽलक्षितमेव समुदयो भवेत् (हास्यरसपरिपोषकृते-संस्कृतभाषायां तादृशशब्दचयनस्य सहसा न भवेत्सौकर्यम्, अत एव अर्थसामग्री एव तादृशी प्रबलाऽपेक्ष्यते यया सङ्घटितया बलादेव श्रोतुर्हास्यमुदयेत्। यथा–एतत्पङ्क्तिलेखकस्य 'साहित्यवैभवादि' निबन्धेषु अंशतः परीक्षितुं शक्येत।)

कस्मिन्नपि नाटके जटाजूटमाबिभ्रतः, निजतेजोमण्डलेन सकलमपि तं प्रदेशमवभासयतो महर्षेर्मुखात् यदि विदूषकवाच्यानि वाक्यानि श्रूयन्ते तर्हि किं तथा हास्यस्य परिपोषः सम्भवेद् यथा क्षुल्लकभाषामुच्चारयतः फुल्लगल्लस्य कस्यचिद् भण्डस्य, विदूषकस्य वाऽभिनये समुद्भवेत् ? एवमेव नैसर्गिकगौरवभावशालिन्यामस्यां संस्कृतभाषायामन्तर्हितः कश्चिदेवंविधो गौरवभावोऽस्ति येन किल तद्भाषानिबद्धे वाक्ये स्वभावत एव गौरवमुदेति। अपि किं वेदं संस्कृतभाषाया नैसर्गिकमुन्नतत्वं साधयितुं प्रभवेत् ?

अस्माकं वेदाः, उपनिषदः, मन्वादिस्मृतयः, न्यायवेदान्तसाङ्ख्यादिदर्शनानि, पुराणानि, श्रीमद्वाल्मीकिरामायणम्, महाभारतं च संस्कृतभाषाया एतस्या आध्यात्मिकं सुगौरवं तथा प्रथयन्ति यथा सेयं भाषा सर्वस्मिन्नपि विवेकिजनसंसारे सार्वभौमसिंहासनमध्यासितुं योग्या जाताऽस्ति। ग्रन्थानामेतेषां गौरवं समग्रेऽपि भूमण्डले ध्वनितमस्ति, पुनस्तस्याऽऽम्रेडनं समयस्य पुण्यकथाभिर्यापनमात्रं भवेत्। रामायणीयकथायाः सुगौरवमनेनैव परिज्ञातं भवेत्– यत् सृष्टिकालमारभ्य अद्यपर्यन्तं समस्तेऽपि भूण्डले ईदृशी कथा कुत्रापि नोत्पन्ना या रामायणीयां कथां तुलयेत्। समस्तेऽपि भूमण्डले देशभेदात् नानारूपेण प्रचलितासु सम्पूर्णास्वपि भाषासु विरलैव काचिदीदृशी दुर्भाग्या भाषा भवेद् यस्यां रामायणीयकथायाः संसर्गो न भवेत् स्वल्पोऽपि। सर्वैरेव संसारस्य भाषाविद्भिरेकवाक्येन स्वीकृतमस्ति यद्रारामायणसदृशी सुनिबद्धा उन्नतभावपूर्णा मनोज्ञा च कथा नाऽद्यावधि काचित्सम्पन्ना। रामायणकथाऽऽधारेण सर्वेष्वपि देशेषु बहवो ग्रन्था निर्मिता अभूवन्। बह्व्यश्च तद्गुणवर्णनारूपाः समालोचनाः प्रकाशिताः सन्ति। अतएव नास्मिन् विषये किञ्चिदधिकं निवेदयितुमिच्छामि। परं सररमेशचन्द्रदत्तमहाभागस्य सुवर्णाक्षरेषु लेखनीयामुक्तिमवश्यमेव निम्ने प्रकाशयितुमिच्छामि–

''नवशिक्षितमहाभागाः! भवद्भिः इलियडकृतिः पठिताऽस्ति। दान्ते-शेक्सपियरमिल्टनकाव्यान्यधीतानि सन्ति। सादीफिरदौसीकवितापि कण्ठस्था कृतास्ति। किन्तु हृदयान्वेषणं क्रियताम्, उच्यतां कीदृशी कथा हृदये सरसभावपूर्णा प्रतीता ? कतमया कथया हृदयमधिकमालोडितं भवति ? कतमां कथामवधार्य चित्तमधिकतरं प्रोत्साहितं मुग्धं च भवति ? भीष्मपितामहस्याऽपूर्वा वीरता, विरहमनुभवन्त्या भगवत्याः सीतादेव्या अनुपमा पातिव्रत्यकथा,

प्रत्येकहिन्दुसन्तानस्य शरीरे शिरायां शिरायां व्याप्ताऽस्ति। अयि जगत्पते! इमां कथां हिन्दुजातिः कदाऽपि न विस्मर्यात्!

कियत्सहस्रवर्षाण्यारभ्य इयं पुण्यकथा भारते वर्षे ध्वनिता प्रतिध्वनिता च भवति। सुमनोहरेषु वङ्गेषु तुषारचयकिर्मीरितेषु पर्वतपरिवृतेषु काश्मीरेषु, वीरपुत्रप्रसूषु राजपुत्रेषु, सुरक्षितराष्ट्रेषु सागरकल्लोलमुखरितेषु कर्णाटेषु द्राविडेषु च, कियत्सहस्रेभ्यो वर्षेभ्यस्तदिदं गीतं ध्वनितमस्ति। वयं भारतीयाः शिक्षामिमां कदापि कदापि न विस्मरेम। गौरवदिवसेषु एभिरेवाऽनन्तैर्गीतैरस्माकं पूर्वजाः प्रोत्साहिता अभूवन्। हस्तिनापुरीअयोध्यामिथिला-काशीमगधोज्जयिनीप्रभृतीन् देशान् एतान्येव गीतानि वीरत्वेन यशसा चाऽप्लावितानकुर्वन्। दुःखमयदिवसेषु एता एव शौर्यगाथाः संस्मरन्त समरसिंहसंग्रामसिंहप्रतापसिंहप्रभृतयो धर्मरक्षार्थं हृदयस्य शोणितदानमकुर्वन्। अद्य परवशतामापन्नानां, ततः पुनः स्वातन्त्र्यमुपलब्धवतां भारतीयानामेता एव पूर्वकथाः आश्वासस्थानं सन्ति। ईश्वरं हृदयेन प्रार्थयामहे-यद्विपदि, विषादे दुर्बलतायां च वयमिमां पूर्वकथां कदापि न विस्मर्याय। यावत्पर्यन्तं जातीयजीवनमवशिष्टं भवेत्तावत्पर्यन्तं हृदयतन्त्री एभिरेव गीतैः सह गुञ्जन्ती भवेत्।।''

महाभागाः! किमतोऽधिकं साधयामि-यदस्माकमियं गीर्वाणभारती कियता महत्त्वेन मण्डिताऽस्ति। हन्त हन्त! किमतोऽधिकं गौरवं स्यात् यदस्याः संस्कृतभाषाया अलौकिकान् गुणगणान् वीक्ष्य सर्वासां मनुष्यभाषाणां मध्ये इयम् 'अमरभारती'ति गौरवसिंहासनमारोपिता विपश्चिद्भिः। एतस्याः स्वाभाविकं माधुर्यमुपलभमानैः पाश्चात्त्यपण्डितैः सबहुमानमादृता सेयम्। अपि नेदं संस्कृतभाषाया महत्त्वं यद्यैः साकमस्माकं धर्मादिना, निवासप्रभृतिनाऽपि च न कोऽपि सम्बन्ध, पारेसमुद्रं निवसन्तोऽपि माधुर्यमुग्धाः सन्तः एतस्याः सविधे मूर्द्धानं नमयन्ति हृदयं च समर्पयन्ति? इतोऽधिकं किं स्याद् यत् आत्मनो नामोपर्येव संस्कृतभाषाया विजयमुद्रामङ्कयन्ति? अत एव केचिन् मैक्समूलराः सन्तोऽपि मोक्षमूलरभट्टा भवन्ति। केचित् लैन्मनाख्यां धारयन्तोऽपि लक्ष्मणाः सम्भवन्ति। केचित् कीलहार्ननामानोऽपि केलिहरिणाः सम्पद्यन्ते। अपरे मुग्धाऽनलाः प्रख्यायन्ते। अपरे तु अर्थानुगुण्यमपश्यन्तोऽपि भाषामाधुर्यमुग्धाः सन्तो बलात् 'ष्ट्येनाः' अपि स्तेनाः सम्भवन्ति। किं नेष संस्कृतसरस्वत्या भूयानद्भुतः प्रभावो यत् निजजातीयताऽभिमानिनोऽपि, विजेतृत्वगर्वमखर्वं धारयन्तोऽपि पाश्चात्त्याः प्रभवन्त्येतस्याः सविधे सर्वतः परवशाः, इति?

***

# संस्कृतभाषाया अपारा साहित्यसम्पत्तिः

संस्कृतभाषायाः शब्दकोशमहत्त्वम्, भावगाम्भीर्यं च प्रोक्तवानस्मि एतावता प्रबन्धेन। सम्प्रति संस्कृतवाङ्मयस्य विभिन्नविभिन्नविषयेषु विस्तारम्, तद्गतं गौरवञ्च किञ्चिदावेदयामि। प्रेक्षेरन् पाठकमहाभागा यदस्मिन् निबन्धे प्रायः पाश्चात्यविदुषां सम्मत्यनुसारमेव संस्कृतगिरो गौरवं समर्थयितुं मया प्रयत्नः कृतः। यतो हि स्वस्वातन्त्र्यं घोषयन्तोऽपि, हिन्दुसंस्कृतेर्गीतिं मुखतः संलपन्तोऽपि, वर्तमानसमयस्य नेतारः, शासकाः, नवीनशिक्षितमहाभागाश्चापि गौराङ्गाणां पदाङ्कान् विहाय नेतस्ततः स्वल्पमपि गन्तुमिच्छन्ति। आङ्गलभाषैव च तेषां ज्ञानस्य मूलधनम्। अत एवाग्रेऽपि वैदेशिकविदुषामेव सम्मतयः स्थान–स्थानेभ्यः सङ्गृहीताः सन्तीति सन्तोष्टव्यं स्यात्सामयिकमहाभागैः। संस्कृतपण्डितैस्तु कारणं परिज्ञाय नाऽत्र विमनायितव्यम्।

अस्यां विंश्यां शताब्द्यां साधारणशिक्षिता अपि जानन्ति यत् कस्या अपि भाषाया महत्वं तस्याः साहित्यमेव विवेकिनां समाजे सूचयतीति, यस्या भाषायाः साहित्यं यावद्विस्तीर्णं भवति, तस्याऽनुसारेणैव भाषायास्तस्या महत्वं स्थिरीभवतीति। इदानीं दृश्यतām, अस्माकममरभारत्या एतस्याः साहित्यस्य का व्यवस्थेति।

**वेदाः** –**यैरादौ भुवनेषु पावनतमं तज्ज्योतिराविष्कृतं**
**[1]यस्याऽग्रे स्वयमेव सर्वजगतां मूर्द्धा नतो जायते।**
**सर्वस्योषधयः[2] प्रबोधनिधयः पीयूषपाथोधय[3]–**
**स्ते वेदाः सकलाभिनन्द्य[4] विधयः प्रोद्यन्तु नः सिद्धयः[5]।।**
**मखे येषां मन्त्रैर्विधिविहिततन्त्रै[6]र्नियमिताः**
**सुरेशाद्याः सर्वे त्वरितमुपतिष्ठन्त्यभिमुखम्।**
**पुनन्तो विश्वानि प्रतिपदमवन्तो जगदिदं**
**क्षमन्तां ते वेदा दुरितभयभेदाय[7] भवताम्।।**
**चञ्चन्तोऽतिचिरं[8] चतुर्मुखमुखाच्चित्रं चतुर्दिक्षु ये**
**चातुर्वर्ण्यमिदं[9] चतुर्युगचये सञ्चारयन्तेऽन्वहम्।**
**चित्ते चिन्तयतां चतुर्भुजभुजावद्[10] ये चतुर्वर्गदा**
**वेदांस्तां[11]श्चतुरो विचारचतुरो नाऽर्चेत कश्चेतसा।।**
**कल्पादौ[12] स्फुरतां य एव जगतां जीवातवे[13] जज्ञिवान्**
**भूतानां[14] भविकाय यः प्रथितवांस्तांस्तान् विधिप्रस्तवान्।**

---

१. वैदिकविज्ञानज्योतिषः। २. सर्वक्लेशनिवारकत्वात्। ३. अमृतसागराः।
४. सकलैरभिनन्दनीयानि विधिशास्त्राणि येषां ते। ५. अस्माकं सिद्धिरूपाः, प्रोद्यन्तु प्रकृष्टमुदयं लभन्ताम्।
६. विधिविहितानि तन्त्राणि उपाया येषु तैः (मन्त्रैः)। ७. पापभयदूरीकरणाय क्षमन्तां समर्था भवन्तु।
८. चतुर्मुखस्य (ब्राह्मणः) मुखान्निःसृत्य चञ्चन्तः प्रकाशमानाः।
९. कृतयुगद्वापरादिषु ये चातुर्वर्ण्य ब्राह्मणक्षत्रियादिजातिसमाजम्, सञ्चारयन्ति कर्मकलापोपदेशेन प्रचारयन्ति।
१०. चतुर्भुजस्य विष्णोः चतस्रो भुजाः यथा चिन्तयतां (स्मरणकर्तृणाम्) धर्मार्थादिपुरुषार्थचतुष्टयप्रदाः तथा इमे अपीत्यर्थः।
११. चतुःसङ्ख्याकान्। १२. सृष्टेरादौ स्फुरतां प्रकटीभूय प्रकाशमानानां जगताम्। १३. जीवमौषधाय।
१४. प्राणिनां कल्याणाय यो विधिशास्त्राणां प्रस्तवान् प्रकरणानि प्रख्यापितवान्।

**विज्ञानोच्चयवानशेषशुभवान् विद्याभिरुद्द्योतवान्**
**संवित्सौभगवान्[1] स वेदभगवान् भूमौ समुज्जृम्भताम्।।**
**छन्दः पादौ तु यस्याः, नयनमकलुषं ज्यौतिषं, घ्राणमस्याः**
**शिक्षाः, कल्पस्तु हस्तौ, मुखमिदमुदितं विस्तृत शब्दशास्त्रम्।**
**यस्याः श्रोत्रं निरुक्तं, त्रिभुवनमभवद् भासित यद्विभासा**
**श्रीविष्णोर्वेदनाम्नी जयति विजयजस्त्रग्धरा[2] मूर्तिरेषा।।**

**घनाक्षरी**

**सर्गादौ [3]निसर्गात्स्वयमेव प्रादुरासन् पुरा**
**शब्दब्रह्मरूपा येऽभिरूपा[4] विनिगद्यन्ताम्**
**मानवसमाजे यैः प्रबोधज्योतिराविष्कृतं**
**सभ्यताप्रणालीं येन[5] जग्मुर्निरवद्यं ताम्।**
**माहात्म्येन येषामार्यजातेर्मौलिरुन्नतोऽस्ति**
**तन्मे विनयोऽस्ति बुधैरेते[6] प्रतिपद्यन्ताम्**
**दूरीकृतदारुणदुरन्तपरिखेदा इमे**
**वन्दनीयवेदा[7] भवभेदायोपपद्यन्ताम्।।**

सर्वतः पूर्वं वैदिकसाहित्ये दीयतां दृष्टिः। यस्मिन् समग्रेऽपि जगति नाऽऽसीत्कोऽपि ज्ञानाऽऽलोकः, सर्वेऽप्यन्यान्यदेशवास्तव्याः केवलं भोजनशयनादिसृष्टिधर्मे एव व्यापृता आसन्, तस्मिन्नपि कालेऽस्माकं भारतं ज्ञानाऽऽलोकेन विभासितमासीत्। आसीत्तस्मिन्नपि समयेऽस्य सविधे दिव्यज्ञाननिधिः श्रीमान् वेदराशिः। येषां वेदानामंशमादाय जगतः सर्वा अपि जातयः साम्प्रतमात्मनः सभ्यतां पृथक् पृथक् स्थापयन्ति, ते वेदा अस्या एव भाषायाश्चतुर्दिक्षु प्रकाशिताश्चत्वारो विजयध्वजरूपाः। येषां ज्ञानगरिमविषये प्राचीनताविषये च महामहापण्डितानामनेकानि मस्तिष्काणि, अनन्तकालाद् गवेषणाप्रयत्ने संलग्नानि सन्ति, परं नाधुनाऽपि चरमान्वेषणं तेषां प्रकाशितं भवति। त एते भगवन्तो वेदा अस्यामेव भाषायामाविर्भूता इति सुमहता गौरवेण वयमात्मनो मूर्द्धानं जगतां सविधे सगर्वमुन्नमयामः।

---

१. संविदा विज्ञानेन सौभाग्यशाली
२. विजयजां (विजयलब्धाम्) स्रजं मालां धारयति, विज्ञानविषये त्रिभुवने सर्वेषां विजेत्रीत्यर्थः। छन्दोऽप्यत्र स्रग्धरा।
३. स्वाभाविकनियमात्।
४. सर्वप्रकारैः सुन्दराः।
५. येन ज्ञानज्योतिषा तां सभ्यताप्रणालीं (पद्धतिम्) निरवद्यं निर्दोषं यथा स्यात्तथा जग्मुः प्रापुः (मानवाः)।
६. एते वेदाः प्रतिपद्यन्तां शरणीक्रियन्ताम्।
७. भवस्य संसरणस्य भङ्गाय।

## सूत्राणि

आध्यात्मिकज्ञाननिधयस्ताः उपनिषदः अस्यामेव भाषायां प्रादुर्बभूवुः, यासां विषये पूर्वप्रघट्टके बहु किल निवेदितवानस्मि। गृह्यसूत्राणि, ब्रह्मसूत्राणि, अन्यान्यानि च न्यायव्याकरणादिसूत्राण्यस्यामेव संस्कृतभाषायां जन्म लेभिरे। सेयं सूत्रनिर्माणविद्या यां हि पाश्चात्त्याः सबहुमानमभिप्रशंसन्ति, साक्षादस्माकं संस्कृतभाषाया एव एकमात्रं सम्पत्तिः। अतिस्वल्पैरक्षरैः सुबहुविस्तृतस्याऽर्थस्य कथनं नाऽन्यस्यां भाषायां केनाऽप्यवगतम्। समग्रेऽपि सभ्यसंसारे भाषाविज्ञानवेदितारस्तस्या एव भाषायाः प्रशंसां कुर्वन्ति यस्यामतिस्वल्पान्येव पदानि बहुतरमर्थं प्रत्याययन्ति। सोऽयं विशेषः संस्कृतभाषायामेव विलोक्येत।

अतिसामान्यमेकमुदाहरणं दर्शयामि। संस्कृतव्याकरणस्य पाणिनिनिर्मितमेकं सूत्रमस्ति– ''अदसोसेर्दादु दो मः'' इति। अत्र हि अष्टौ अक्षराणि सन्ति। किन्तु अष्टस्वेव अक्षरेषु– 'अदसः असेः दात् उ दः मः' इति षट् पदानि।''यस्मिन् अदस्शब्दे सकारः अन्ते न भवति तत्र, दकारस्य अग्रे ह्रस्वाऽक्षरस्य ह्रस्व उकारः, दीर्घस्य (अक्षरस्य) तु स्थाने दीर्घः ऊकारो भवति। किञ्च दकारस्य स्थाने मकारो भवति'' एतावान् अर्थः एभ्यः षड्भ्योक्षरेभ्यो निःसरति। जानन्ति किल पाणिनिव्याकरणविज्ञा यद् बहुषु पाणिनिसूत्रेषु पूर्वसूत्रेभ्यः कानिचित् पदानि आकृष्यन्ते– ''सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र।'' परं स्वल्पकायेऽप्यस्मिन् सूत्रे नैकमात्रमपि पदं द्वितीयात्सूत्रादनुवर्त्यते। सूत्रे प्रोक्तैः एभिः षड्भिरेवाऽक्षरैरेतावद्विस्तृतः सोऽयमर्थः प्रतीयते। बहुज्ञमहाभागाः! किमु भाषान्तरे दृष्टमवेविधं वाक्यम्?

पणबन्धपुरस्सरमिदमेवं वक्तुं शक्यते यत् इदानीं तु समग्रेष्वपि युरोपादिदेशेषु सभ्यतादेव्याः सुमहान् आलोकः प्रसृतोऽस्ति। अस्मिन्नपि समये कोऽपि विद्वान् स्पष्टं प्रदर्शयतु– यथाऽस्माकं प्राचीनाः सूत्रग्रन्थाः सन्ति, तथाविधाः संक्षिप्ताऽक्षरेषु महागभीरार्थप्रतिपादकाः सन्ति केचिद् वैज्ञानिकग्रन्थाः? 'अर्द्धमात्रालाघवेन पुत्रजन्मोत्सवमिव महोत्सवं' मन्यमानाः सन्ति कस्याञ्चिदन्यस्यां भाषायां ग्रन्थकर्तारः? किं बहुना, गुणग्राहिणः पाश्चात्त्यपण्डिताः सुबहुतरं प्रशंसन्ति स्वल्पैरक्षरैर्बह्वर्थप्रतिपादनकलामस्माकम्। तेऽपि मन्यन्ते यत्–उच्चकोटेः स एव विद्वान् कविर्वा परिगण्यते यो हि स्वल्पैरक्षरैर्बहुतरमर्थं कथयेत्। यद्यप्यस्ति सोऽपि प्रकारो यत्र बहुभिरपि वाक्यैरेक एवार्थः प्रतिपाद्यते (यो हि संस्कृतसाहित्ये व्यासनाम्ना परिचीयते) डार्विन्, स्पेन्सरादीनां भाषा एतमेव प्रकारमनुसरतीति तद्भाषाविदो विदन्ति। परं पाश्चात्त्याः सङ्क्षिप्ताक्षरप्रणालीमेव बहुशः प्रशंसन्ति। सुरसरस्वती चेयमस्माकम् अस्मिन्विषये सर्वासां भाषाणां पथिप्रदर्शिका सिध्यतीति को वा विवेकी न परिजानीयात्?

### स्मृतयः

मनुयाज्ञवल्क्यपाराशरअत्रिहारीतादिप्राचीनमहर्षीणां स्मृतयः (धर्मशास्त्राणि) भूमण्डलस्य कोणकोणेषु मानवसभ्यतायाः सर्वादिमान् पदाङ्कान् प्रकटयामासुर्यान् भारताद्

बहिरावसन्तो विदेशीया अपि सश्रद्धमभिमन्यन्ते। मनुस्मृतेरावश्यकान् आवश्यकानंशान् पृथक् कृत्वा, आत्मभाषया चाऽनूद्य, पाश्चात्त्यैरपि मान्यतया स्वीकृताः, प्रचारिताश्च ते इमे उपदेशा नानासभ्यतासङ्ग्रहसन्दर्भे। अन्यदेशीया–''जीवनसङ्ग्रामे, यैः कैरप्युपायैर्निजमभीष्टं साधयेत्। ततश्च जीवनसङ्घर्षेऽस्मिन् प्रबलो दुर्बलस्य सकाशान्निजाभीष्टमाच्छिनत्तीति'' संसारस्य प्रवृत्तिसाधारणधर्ममाहुः पाश्चात्त्याः। किन्तु अस्माकं धर्मशास्त्राण्युपदिशन्ति– ''यथा मानवः स्वयं स्वस्य जीवनं, स्वार्थं च निजाऽभीष्टं भावयति, तथा अन्यस्याऽपि जीवनं, स्वार्थं च तदभीष्टं भावयन् कस्याऽप्यनिष्टं न भावयेत्, न च तथाऽनुतिष्ठेत्। ''स्वयं जीवेत्, अन्याञ्श्च जीवयेत्'' इति आर्यमानवस्य जीवनसारः। सत्यअहिंसाअस्तेयादयः सर्वैरेव पालनीयाः सामान्यधर्माः के, तत्तद्विशेष–विशेषसमाजेनाऽनुवर्तनीया विशेषधर्माश्च के, इति हि सर्वैरेव स्मृतिग्रन्थैरुपदिष्टः संसारव्यवहारमार्गः। किं बहुना, मार्गे गच्छन् मानवः अन्येषां गमने विघ्नं नोद्भावयेत्। तथा अवसरे सति स्वयं मार्गादपसृत्य अन्येभ्यो मार्गाऽवकाशं दद्यात्– 'पन्था देयश्च भारिणः' इत्यादि। एवं किल यावन्मात्रमानवानां कर्तव्योपदेशिकाः स्मृतयः संस्कृतभाषासाहित्यमेव अलङ्कुर्वन्ति। यत्र हि भूमण्डलमात्रमभिमुखीकृत्य निर्विशेषमुच्यते–

**'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।'**

## दर्शनानि

यानि दर्शनशास्त्राण्यस्माकमुन्नतेः परां काष्ठां प्रमाणयन्ति, येषां दर्शनानां सत्तया समग्रस्याऽपि भूमण्डलस्य सभ्या जातयः सशिरः कम्पमस्माकमुच्चान् विचारान् प्रशंसन्ति, यानि खलु दर्शनानि दृष्ट्वा अस्माकं जातिरतिप्राचीनतमेऽपि काले सुसभ्या सुसमुन्नता चासीदिति बलान्मन्यन्ते, तानि किल दर्शनशास्त्राणि सेयमस्माकं संस्कृतैव वाणी जनयामास। ये किल युरोपादिदेशीयाः प्राचीना दर्शनिकाः समग्रेऽप्यात्मनो देशे दर्शनरहस्यं प्रचार्य सभ्यसमाजे कृतिनोऽभूवन् तेऽप्यस्माकं दर्शनशास्त्राणामृणिनः। श्रीमान् मोनियर विलियम्समहाशयो, यस्य सिद्धान्ताः पाश्चात्त्यपण्डितानां गोष्ठीषु महत्वदृष्ट्याऽवलोक्यन्ते, दर्शनशास्त्रविषये स्पष्टमभिप्रायं प्रकाशितवान्– ''यूरोपस्य प्रथमदार्शनिकौ प्लेटो, पिथागोरसश्चेत्येतौ द्वावपि दर्शनशास्त्रविषये भारतवासिनां हिन्दूनां सविधे सर्वप्रकारेण ऋणिनौ स्तः।''

लैथब्रजमहाशयः स्वनिर्मिते इतिहासे हिन्दूनां विषये यद्यपि पक्षपातपूर्णानतिसङ्कीर्णान् विचारान् प्रकाशयामास, परं तस्याऽपि मुखादिदमेव निःसृतं यत्– ''दर्शनशास्त्रस्याऽऽदिगुरवः केवलमार्या एव सन्ति।''

अध्यापकः श्रीमान् मैक्समूलरमहाशयो वक्ति– ''यद्धि राज्यमुन्नतेरुच्चशिखरे स्थितं भवति, यस्मिन् राज्ये आन्तरिकाणां बाह्यानां च शत्रूमाणामाक्रमणस्य किञ्चिदप्याशङ्का न भवति, यस्य राज्यस्य लोका धनसम्पत्त्या सहैव, अनेकानि विद्यामन्दिराणि, अनेकांश्च विश्वविद्यालयान् स्थापयित्वा, सर्वा अपि विघ्नबाधाः पराहत्य, विद्यानामालोचनायां मनः

संयोजयन्ति, तस्मिन्नेव सभ्ये समुन्नते च राष्ट्रे दर्शनशास्त्रस्याऽऽविर्भावो भवति।''

एवं प्रशंसाभाजनानि दर्शनशास्त्राणि अस्याः संस्कृतभाषाया एव गौरवं घोषयन्तीति को वा न मंस्यते? अत एव हि भारतीयसभ्यतान्वेषकैर्नवीनशिक्षितमहोदयैः-

**'कवित्वं', 'घनाक्षरी'-**

**'मानवसमाजे सत्यमार्गमुपादिक्षन् यानि**
**ज्योतिर्जननानि जनजीवने विमृश्यन्ताम्**
**मानुषातिशायिनो विचारान् विमृशन्तो यत्र**
**चित्रमुपयन्तो बुधा वैदेशिका स्पृश्यन्ताम्।**
**आर्यसभ्यतायाः स्फुरद्विजयपताकासमा-**
**न्यतुलितराकाभाणि परमं प्रकृष्यन्ताम्-**
**तत्त्वानां विमर्शनानि गूढतलस्पर्शनानि**
**पुण्यपरामर्शनानि दर्शनानि दृश्यन्ताम्।।'**

**ज्यौतिषमङ्कगणितं च-**

सर्वतः प्रथमं गगनमण्डलस्य वृत्तान्तोऽनयैव भाषया प्रकाशितः। यां खगोलविद्यामवलम्ब्य पाश्चात्त्यैः साम्प्रतमतिशयितोन्नतिः प्रदर्शिता, सा विद्या संस्कृतभाषयैव सूचिता संसारस्याऽग्रे। यत् 'क्रान्तिमण्डलं' संस्कृतभाषाभिज्ञैः प्राक्तनज्यौतिषिकैरन्विष्टं तत् खलु समग्रोऽपि संसारः सम्मानयति। चीनदेशः, अरबदेशश्च यं ज्यौतिषविद्यायाः प्रकाशं दर्शयामास, सोऽपि संस्कृतभाषाऽनुग्रहलब्ध एवेति सर्वैरेवाऽन्वेषकपण्डितैः स्वीकृतम्। अध्यापको वेबरः, कोल्ब्रूकपण्डितश्च बहुभिः प्रमाणैः साधितवान् यत् 'चीनाऽरबदेशयोर्ज्यौतिषविद्या भारतवर्षादेव प्रकाशमुपगता। आर्याणां क्रान्तिमण्डलं तेषामेव। अरबदेशवासिभिस्तेभ्य एव परिज्ञातमेतत्' इति।

यद्धि अङ्कगणितं समग्रेऽपि संसारे भारतवर्षस्य महत्तां सुस्पष्टं प्रमाणयति, तदप्यस्यामेव संस्कृतभाषायां सर्वतः प्रथममाविरासीत्। यदि भारतवर्षीया अङ्कविद्या अन्यान्येषु देशेषु न प्राचरिष्यत्तर्हि केऽपि देशा अङ्कलेखनेऽपि न समर्था अभविष्यन्।'ऐनसाक्लोपडिया मैथामैटिका' विषयं प्रकाशयमानः कोल्ब्रुकपण्डितो निष्पक्षपातं साधितवान् यत् समग्राय जगते दशपर्यन्तां गणनामपि भारतवर्षमेव शिक्षयामास। कथयत या भाषा अन्यान्यदेशवासिनो लोकान् अङ्गुलिपर्वणामुपरि 'एकं द्वे' इत्यादि- गणानामपि शिक्षयामास, तस्याः कीदृशमासनं भविष्यति भाषाणामन्यासां सन्निधौ? पाश्चात्त्यपण्डितः एलबरूनी निजमभिप्रायं प्रकाशयति- ''अस्मिन् शास्त्रे भारतवर्षीया आर्याः संसारस्य सर्वजातीनामपेक्षया सुभृशमुन्नताः। मया हि अनेकभाषासम्बन्धिनामङ्कानां नामानि शिक्षितानि, परन्तु मया कस्यामपि भाषायां सहस्रसङ्ख्यातोऽग्रेतनीनां सङ्ख्यानां नामानि नाऽवाप्तानि। परन्तु संस्कृतभाषायामष्टादशाऽङ्कानां सङ्ख्यानामपि नामानि सन्ति। अष्टादशतमाया अन्तिमसङ्ख्यायाः 'परार्द्धं' तेषां नाम।''

कथयत, यासु भाषासु सहस्रसङ्ख्यातोऽग्रेतन्याः सङ्ख्याया नामाऽपि नास्ति, ता भाषाः संस्कृतभाषायाः साम्यलवमपि कथङ्कारं लभेरन्? अरबदेशवासिभिः गणितविद्या हिन्दुभ्यः एव समधिगतेति सर्वेऽपि गवेषकाः सिद्धान्तयन्ति। भारतवर्षस्येतिहासे सयुक्तिकमेतत् साधितं यत्–अरबदेशवासिभिः सेयं विद्या हिन्दुभ्य शिक्षिता। अतएव इमां विद्यां ते 'इल्म हिन्दसा' अर्थाद् भारतवर्षीयां विद्यां वदन्ति। एतस्य सुस्पष्टं प्रमाणं त्विदमेवाऽस्ति यदद्यावधि आरब्धाः पारसीकाश्च अङ्कान् 'हिन्दसा' इति नाम्ना व्यवहरन्ति।

बीजगणितं यत्खलु एल्जब्रेति नाम्ना व्यवहरन्ति पाश्चात्त्यास्तदपि संस्कृतभाषासिन्धुसमुत्थितमेकं रत्नम्। रेखागणितस्य तानि शुल्वसूत्राण्यस्यामेव भाषायां प्रसूतान्यभूवन्। यस्मिन् खलु रेखागणितविषये भूयसीमुन्नतिमधिरूढाः पाश्चात्त्यपण्डिताः, तदप्यस्माभिरेवोपदिष्टमासीत्। प्राच्यविद्यापण्डितो मोनियर विलियम्समहाभागः कथयति– ''बीजगणितस्य तथा रेखागणितस्य चाऽऽविष्कारः, ज्यौतिषशास्त्रेण सह तस्य प्रथमं प्रयोगः, हिन्दूनामेव द्वारेणाऽभूत्।''

डाक्टर थीबोमहोदयः स्पष्टमभिप्रैति – 'अखिलमपि भूमण्डलं रेखागणितस्य कृते भारतवर्षस्यैव ऋणधरमस्ति, न यूनानदेशस्य।'

## सङ्गीतम्–

यद्धि भारतीयं सङ्गीतशास्त्रं सर्वदेशीयानां सङ्गीतशास्त्रणामपेक्षया प्राचीनं सुविस्तृतं पूर्णञ्च परिगणितं, तदप्यस्यामेव भाषायामुत्पत्तिमधिजगाम। 'गानं रोदनं च सर्वोऽपि विजानाति' इति लौकिककिंवदन्त्यनुसारं सर्वेष्वपि देशेषु सङ्गीतस्य प्रचारो भवेदिति वयमनुमिनुमः परं यत्र देशे बहूनां वाद्यानां केवलं 'खं खं पं पं' स्वरैरेव सङ्गीतव्यसनं निर्वाह्यते, सोऽपि देशः सङ्गीतशास्त्र जानातीति किं हृदयेन स्वीकुर्मः? तत् सङ्गीतमस्ति उत अज्ञहस्तपतितानां वाद्यानां करुणाऽऽक्रन्दनमस्ति? सङ्गीतस्य सोऽस्ति विलक्षणो महिमा येन जिघांसु हृदयमपि सहजमेव द्रुतं भवति। रागस्य कार्यमेव तादृशमस्ति यत् सोयमभिज्ञस्य, अनभिज्ञस्याऽपि वा हृदयं तथाऽनुरञ्जयति यथा कस्मैचित्कालाय तद् हृदयं तस्मिन् रागरसे लीनं भवति। अतएव 'शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गानरसं फणी' इति प्राचीनः प्रवादः। सोऽयं दृष्टान्तः सर्वत्र प्रसिद्धो यत् काललयानुगतं यदि वीणावाद्यं प्रस्तूयते तदा आरण्यका हरिणका अपि मुह्यन्ति। एवं यत्र सङ्गीतस्योन्नतिः, तस्याऽग्रे तत्सङ्गीतं कथं वा 'सङ्गीत' –पदयोग्यं भविष्यति, यस्मिन् केवलमेकेनैव तालेन, लयत्यागे सत्यपि विभिन्न–विभिन्नशब्दानां समाहारमात्रमभ्युपेयते।

अस्तु, विषयान्तरं भवति। प्रकृतं वर्णयामि–तत्खलु समग्रेऽपि संसारे स्पृहणीयम्, मनुष्यहृदयस्यैकमात्रं परिष्कारकम्, आन्तरस्य बलदायकं भारतीयं सङ्गीतशास्त्रम् अस्यामेव गीर्वाणगिरि प्रादुरासीद्। यस्य हि नारदहनुमद् भरतमुनिप्रभृतयो महान्त आचार्याः सन्ति, या स्वरलहरी विलक्षणमेकं नादं राशीकृत्य, नियतानां मात्राणामनुसारेण माधुर्यमवकिरन्ती प्रचलति, तस्यां मात्राणामासां नियमनं मनुष्यः कर्तुं शक्नुयादिति तु तद्रसमार्मिकस्य हृदयं न प्रत्येति।

अस्तु वा यदि सेयं मनुष्यस्य कृतिः, तर्हि न स देवेभ्योऽतिरिच्यते, इति वयं निर्मायं वदामः। अद्याऽहमस्मिन् सर्वदेशीयसभ्यमण्डले सगर्वं वदामि-यदनेनाऽस्माकं संस्कृतवाणी सुतरां गौरविणी यदस्यामेव भाषायां तत्तादृशं दिव्यं सङ्गीतशास्त्रमाविर्बभूव। कियन्तञ्चित्कालमारभ्य भारतीयानां दौर्भाग्यवशात्, परिणामाऽवेदिनां शुष्कहृदयानां 'शास्त्राऽर्थपण्डितानां'मुपेक्षावशाश्च, तदिदं सङ्गीतशास्त्रं भारतीयानां विदुषां हस्तात् प्रच्युतमस्ति। तदेतत्सङ्गीतं मोगलानां साम्राज्यशासनादारभ्य आसेवन्ते स्म भारतीया माहम्मदा एव कलावन्ताः प्रायशः।

एते चाऽभिमानमत्ताः कथयन्ति स्म कदाचित् ''यदिदं शास्त्रं यूनानदेशादेवोपलब्धं भारतीयैः। तदिदमस्माकमेव मूलतो धनम्'' इति। परं ते नैतिहासिकाः। केवलं मुखमस्तीति वादिनः। नैतदुच्चारितानां वाक्यानामुपरि विवादसीमा सन्तिष्ठते। एकदा ईदृशेनैव माहम्मदगायकेन सह ममाऽभूत्संवादः। अहं हि 'हिन्दीसाहित्यरात्रिपाठशाला' या अध्यापकान् विद्यार्थिनश्चाऽदाय ''अखिलभारतीयहिन्दीसाहित्यसम्मेलने'' भरतपुरं प्रगच्छन्नासम्। घूमशकट्याम् अस्मन्मध्ये एव स्थानाऽवकाशं लभमानः सोऽयं गायकमहाभागो यथाभ्यस्तमवादीत्सगर्वं प्रसङ्गे प्रक्रान्ते- 'अस्माकमेवाऽसौ विद्या। अवश्य प्राचीनैर्हिन्दुभिरस्यां बहवः परिष्काराः कृताः सन्तीति जाने।'

प्रोक्तं मया- 'खाँ साहब! यदीयं विद्या श्रीमतामेवाऽऽदिधनं तर्हि सप्तस्वराणामपि पारस्यभाषामयानि कानिचित् अन्यान्येव नामानि भवेयुः, यानि हि पुरा भवन्तो व्यवहरेयुर्मन्ये। षड्ज रिषभ गन्धारेत्यादीनि मन्ये पारस्यभाषामयान्येव नामानि। खाँ साहेब! भवतामेव सेयमादिविद्याऽभविष्यत्तर्हि अद्यपर्यन्तमस्या रूपान्तरमेवाऽलप्स्यत। कथयत इदानीमपि शास्त्रीयाणां वसन्त-हिन्दोल-भैरवादिरागाणां गानसमये सर्वेऽपि माहम्मदाः कलावन्तः सूरदासप्रभृतीनां ध्रुवपदान्येव गायन्ति, न उर्दूंपारसीप्रभृतीनाम्। अत्राऽपि किं कश्चिदन्योऽभिसन्धिर्भवेत्?' उचितमुत्तरं प्राप्य खानमहाभागस्तूष्णीकोऽभवत्।

**नाट्यम्-**

अस्तु, इदानीं नाट्यविषये दीयतां दृष्टिः। इह हि पणबन्धपुरस्सरं सर्वेषां पुरतो घोषयितुं शक्यते यत्- 'केऽपि भाषान्तरपक्षपातिनो विद्वांसो दर्शयिष्यन्ति किञ्चिदीदृशं पुस्तकं भाषान्तरे, यद्धि भरतमुनिकृतं 'नाट्यशास्त्रं' तुलयेत्? एतद्धि नाट्यशास्त्रमुद्दिश्य बहूनां पाश्चात्त्यानाम्, एतद्देशीयानां चाऽन्वेषकविदुषां प्रचलन्ति वर्तमानसमये बह्व्यो गवेषणाः। अपि किं तादृशमस्ति पुस्तकम्, उन्नतम्मन्यास्वपि अन्यासु भाषासु? जानाम्यहम्, नाट्यशास्त्रस्यास्य वास्तवेन तत्त्ववेदितारोऽपि विरला एव भवेयुः। सङ्गीते, साहित्ये, इतरशास्त्रीयवैदुष्ये च यः सुपूर्णो भवेत् स एव तत्तत्त्ववदने साफल्यं लभेत। किन्तु वर्तमानकाले शास्त्रपण्डिताः सङ्गीत विषये परमुखाऽपेक्षिणः, सङ्गीतज्ञाश्च शास्त्रवैदुष्ये परिनिष्ठितां नाऽवाप्यन्ते। अत एव नाट्यशास्त्रस्य कतिचिदध्यायानां तत्त्वलाभे भूयस्तरां काठिन्यमेव।

किञ्च नाट्यस्य प्रचारबाहुल्येन। प्राचीनभारते नाटकनिर्माणस्य भूयान् प्रचारः, भूयसी च प्रतिष्ठाऽऽसीत्। मध्यकाले परश्शतानि नाटकानि निरमीयन्त भारते वर्षेऽस्मिन्। बहूनि तु

ईदृशान्यपि समपद्यन्त, येषां रङ्गमञ्चेऽभिनयमपि नानुमन्ति नाट्यमार्मिकाः तानि हि काव्यभेद गणनां पूरयितुमिव, नाटकभेददृष्ट्या प्राणीयन्त। न्याय-व्याकरणादिप्रौढपाण्डित्यं प्रकटयन्तो महामहापण्डिताः, कवयश्चाऽपि नाटकलेखने निजलेखनीं प्रवर्तयामासुः। मुरारिः शास्त्रपाण्डित्ये पुरा प्रथितः। यो हि कस्मिन्नपि 'शास्त्रार्थे (शास्त्रीयवादे)' मध्यस्थीकृतो निजपाण्डित्यवैभवेन निजमतं विवदमानयोर्द्वयोरन्यविधमेव प्रकटयामास, यस्य हि विषयेऽद्यापि प्रवादः प्रसिध्यति- "मुरारेस्तृतीयः पन्थाः" इति। एतत्कृतिः 'अनर्घराघवम्' एकस्यां रात्रौ अभिनीयेत रङ्गमञ्चे, न तादृशमभिप्रयन्ति नाट्यमार्मिकाः प्रायेण। अस्तु,

भारते पुरा बाहुल्यमभूद् रङ्गमञ्चानाम्। नाटक-प्रकरण-सट्टक-भाण-प्रहसनादीन्यनेकानि रूपकाणि (दृश्यकाव्यानि) निरमीयन्त तेषु तेषु प्रान्तेषु। एतेषां कृते नियामकसाहित्यमपि बहुशः प्रकटीबभूव। यथा धनञ्जयस्य दशरूपकमित्यादि। नाट्यविषयस्य रङ्गमञ्चोपरि अभिनेतारः, तन्नियमनिर्मातारोऽप्यनेके समर्थाः पण्डिता अभूवन्, येषामनेके सम्प्रदायाः प्रावर्तन्त नाट्यविषये। किन्तु न तेषां ग्रन्थाः साम्प्रतमाप्यन्ते संस्कृतभाषायाम्। आम्, साहित्यदर्पणादिषु तट्टीकासु च नाट्यप्रकरणस्य अनेके ग्रन्थाः, कोहलनखकुट्टादयः अनेके आचार्याश्च अवश्यं नामतः सूच्यन्ते। येन हि रङ्गमञ्चस्य, नाट्यकलायाश्च भारते प्रचारबाहुल्यमनायासं शक्यतेऽवबोद्धुम्। आस्तां विस्तरः। तदिदं नाट्यशासनं देववाण्यां पुरा भूयस्तरामुन्नतिं च प्रचारं च समवापेति सर्वस्य सारः।

## आयुर्वेदशास्त्रम् ( वैद्यकम् ) -

यद्धि भारतीयमायुर्वेदशास्त्रमद्यापि भूमण्डले अतुलनीयं गौरवमावहति, यस्य च साहाय्येन समग्रेष्वप्यन्यान्यदेशेषु वैदेशिका जीवयन्ति परोलक्षान् मानवान्, तत् आयुर्वेदशास्त्रमप्यस्यामेव भाषायामाविरभूत्। बहवोऽर्द्धशिक्षिता जल्पन्ति यद् वैद्यकविद्या यूनानदेशवास्तव्येभ्यो वैद्येभ्यः शिक्षिता भारतीयैरिति। सोऽयमेषां स्पष्टो भ्रमः। यूनानदेशे अष्टमशताब्द्यां वैद्यकविद्यायाः प्रचारोऽभवत्। तस्मिंस्तु समये हारूँरशीदभूपस्याऽसीत् अरबदेशे शासनम्। एतस्मिन्नेव समये अरबेषु चरकादिग्रन्थानामनुवादोऽभवत्। सर्वतः प्राचीनः सेरापियननामा अरबग्रन्थकारः चरकं 'ज़रक' नाम्ना लिलेख। एबिसेननामा तु 'सिरक' नाम्ना व्यपदिदेश। रहाज़ेजो, यो ह्यस्मादपि प्राचीनोऽभवत्, स तु 'सिरके' ति नाम्ना समुल्लिलेख। एभिः सर्वैर्ज्ञायते यत् अष्टमशताब्द्यां भारतवर्षादेव यूनानदेशे वैद्यविद्यायाः प्रचरोऽभवत्।

डाक्टर हण्टरमहाभागस्याऽस्ति अन्वेषणम्- "अष्टमशताब्द्यां संस्कृतभाषातो यानि पुस्तकान्यनूदितान्यभूवन्, तान्येव अरबदेशे वैद्यकविद्याप्रचारस्य मूलम्। सप्तदशशताब्दीपर्यन्तं योरपदेशवासिनो वैद्याः अरबदेशीयानाम् (मूलतस्तु हिन्दूनाम्) नियमाननुसरन्ति स्म। अष्टमीं शताब्दीमारभ्य पञ्चदशशताब्दीपर्यन्तं वैद्यकस्य यानि पुस्तकानि यूरोपे निर्मितान्यभूवन्, तेषु चरकस्य प्रमाणानि प्रत्तानि सन्ति।"

मौलाना हालीमहाभागः स्वयमेतदङ्गीकुरुते- "सर्वतः प्राचीनौ वैद्यकग्रन्थकारौ

चरकसुश्रुतमहाभागौ अभूताम्, ययोः कृतिः सर्वत्र प्रचरिताऽस्ति। अनयोर्ग्रन्थयोरनुवादो यदा अरबदेशे प्रचरितोऽभवत्तमालक्ष्यैव अरबदेशीया वैद्यकविद्यायामनुरागिणोऽभूवन्, इति।''

'त्रिदोषपद्धतिः' (वातपित्तकफान्यवलम्ब्य चिकित्साऽऽरम्भः) या हि भारतीय-चिकित्साप्रणाल्या मूलाधारः, सा सर्वैरेव विचारशीलैः शनैःशनैरिदानीमभिमन्यते। भूयान् समयो व्यतीतो यदा हि वैदेशिकचिकित्सकैरेतस्याः पद्धतेरुपरि नानाशङ्काः, अनेके तर्काश्चोत्थापिताः, किन्तु भारतीयैरायुर्वेदविशारदैस्ते इमे तर्काः सर्वतः समाहिताः, शङ्काश्चेमाः प्रत्यक्षपरीक्षाद्वारा समूलमुपशमिताः। आङ्गलशासनकाले वैदेशिकचिकित्सापक्षपाति-भिरायुर्वेदस्य विषये भूयस्तरां विरोध इव प्रदर्शितः, एतत्कृते स्थाने स्थाने वैदेशिकाः पक्षपातिनो दृढीकृताः, किन्तु तस्मिन्नपि समये वैद्यसम्मेलनादिभिः प्राचीनैः संस्थानैरेतस्य प्रतीकारः पूर्णतया कृतः। आयोगादि ('कमीशन') द्वारा महामहतां वैद्यचिकित्सकानां साक्ष्यादिभिरायुर्वेदचिकित्साप्रणाली सेयं वैज्ञानिकी साधिता। साम्प्रतं तु शनैःशनैरनुभवेन विरोधिनोऽपि तामिमामङ्गीकुर्वते। विश्राम्यतु विस्तरः। सेयम् आर्षी चिकित्सापद्धतिः, तदिदमायुर्वेदविज्ञानमपि, संस्कृतभारतीमिमामभिमण्डयतीति प्रत्यक्षं प्रेक्षावताम्।

## नीतिशास्त्रम्-

नीतिशास्त्रं यद्धि भारतस्यैकं सुप्रसिद्धं वस्त्वस्ति, तदप्यस्यामेव भाषायामुद्भवम-वाप्नवत्। कौटिलीयमर्थशास्त्रं, यस्य खलु महत्त्वं स्वल्पादेव कालाज्जनैरवगतम्, एतामेव संस्कृतसरस्वतीमामण्डयतीति नास्ति किमेतस्या महत्त्वम्? कोऽपि भाषान्तरपक्षपाती किमद्याऽपि कौटिलीयनीतिशास्त्रसदृशं भाषान्तरे पुस्तकं दर्शयितुं प्रभवति? एतस्य गुणगौरवं वदन्तः पाश्चात्त्याः सुस्पष्टं समर्थयन्ते- ''यस्मिन् काले तदिदमर्थशास्त्रं निर्मितमभूत्तस्मिन् समये अन्येषु देशेषु एतावती सभ्यतैव नाऽऽसीत्प्रचरिता, दूरे तु निर्माणकथा।''

एवमेकैकविषये संस्कृतभाषेयमनन्तानि पुस्तकानि धारयति। कियत्परिगण्यन्ता-मस्माभिः! नास्ति कोऽपि तादृशो विषयो यत्र खलु संस्कृतभाषायाः सुविस्तृता विचारलहरी न प्रवृत्ता भवेत्। महामहागभीरं दर्शनविषयमारभ्य, भोजननिर्माणम्, गृहनिर्माणम्, पटादिनिर्माणम्, इत्यादिव्यावहारिकविषयपर्यन्तं सर्वेष्वेव विषयेषु संस्कृतभाषायां परःशता ग्रन्थाः सन्ति। किं बहूना, कामशास्त्रेऽपि तत्तादृशानि पुस्तकानि सन्ति, येषां साम्यं भाषान्तरेषु नाऽद्यापि समुपलभ्यते। कामसूत्रं यद्धि वात्स्यायनमुनिप्रणीतमस्ति, तादृशः सूत्रग्रन्थः किमस्ति भाषास्वन्यासु? पूर्वं तु सोऽयं विषय एवैतादृशो यत्साधारणतया न भवति सर्वत्रैव तद्बोधः। सति बोधे च न कोऽपि प्रामाणिकरूपेण तद्विषयान् शासनरूपेण प्रकाशयितुं प्रभवेत्। एतस्मिन् सर्वस्मिन् सत्यपि, वात्स्यायनसूत्राणां भाषा च तन्निबन्धनशैली च एवंविधाऽस्ति यत् प्राचीनान् सूत्रग्रन्थान् विहाय सा नोपलभ्यते कुत्रचित्।

## काव्यानि -

इदानीं सुमधुरतमे संस्कृतभाषायाः काव्यविषये दीयतां दृष्टिः। निष्कर्षरूपेण तदिदं प्रवक्तुं शक्यते यत् कविताग्रन्था यावन्तः संस्कृतभाषायां सन्ति, तावन्तो नाऽन्यस्यां भूमण्डलस्य कस्याञ्चिदपि भाषायां विलोक्येरन्। अस्यां हि तत्तादृशान्युत्तमकाव्यानि व्यलिख्यन्त महाकविभिर्येषां साम्यमद्यापि देशान्तरेषु नाऽवाप्तुं शक्यते। महाकवेः कालिदासस्य, भवभूतेः, सुबन्धोः, दण्डिनः, माघस्य, श्रीहर्षस्य, भारवेः, बिह्लणस्य, भर्तृहरेः, भल्लटस्य, भट्टेः, बाणस्य, जगद्धरस्य, त्रिविक्रमस्य, क्षेमेन्द्रस्य, जयदेवस्य, मयूरस्य, राजशेखरस्य, कविकर्णपूरस्य, पण्डितराजस्य जगन्नाथस्य, कस्य कस्य वा नामान्युल्लिख्यन्तां नाम? को वा ईदृशः सभ्यदेशो भविष्यति यत्र महाकवेः कालिदासस्य रसमयी वाणी नाऽऽदृता भवेत्? यदा ह्यनुवादरूपेण श्रीमतः कालिदासस्याऽभिज्ञानशाकुन्तलं पाश्चात्त्येषु प्रसृतं तदा तैरभिज्ञातम्- 'अहो भारतीया नाटकलेखप्रणाल्यां कीदृशाः पारगामिनोऽभूवन्' इति। ये खलु संस्कृतरसाऽभिज्ञाः पाश्चात्त्याः सन्ति ते हि शाकुन्तलस्य प्रत्येकं भावम्, प्रत्येकपात्रस्य स्वभावप्रकाशनपद्धतिं च तथा प्रशंसन्ति यथा शाकुन्तलं सर्वनाटकमौलिभूतं स्पष्टं प्रमाणितं भवति।

पाश्चात्त्यपण्डितस्य गेटेमहादेयस्य शाकुन्तलविषये यत्किल मनीषितम्, यश्च हार्दिकः प्रमोदः, तदिदं सर्वं साम्प्रतिकैः शिक्षितमहाभागैः स्वयमवगतम्। न तस्याऽऽम्रेडनस्य भवेदत्राऽऽवश्यकता। गेटेमहाभागस्योक्तेः सङ्क्षिप्तः सारः 'पं. वासुदेव विष्णु मिराशी' महोदयेन संस्कृतपद्ये सन्दृब्धः। सोऽयमवगम्यतां संस्कृतपरिशीलकैर्नूनम्-

**'वासन्तं कुसुमं फलं च युगपद् ग्रीष्मस्य सर्वं च यद्**
**यच्चाऽन्यन्मनसो रसायनमतः सन्तर्पणं मोहनम्।**
**एकीभूतमभूतपूर्वमथवा स्वर्लोक-भूलोकयो-**
**रैश्वर्यं यदि वाञ्छसि, प्रियसखे! शाकुन्तलं सेव्यताम्।।'**

सुदूरदूरतमानां पाश्चात्त्यानामेवंविधां सम्मतिं पठतो जनस्य मनसि संस्कृतभाषा-सम्बन्धिन्याः काव्यकलाया गौरवं मन्ये सुस्पष्टमभिव्यक्तं भवेत्। अस्तु,

## अन्यापेक्षया विशेषः

संस्कृतभाषायां कवितायास्तावानादरोऽस्ति यावान् अन्यासु भाषासु नाऽवलोक्येत गवेषणेनाऽपि। अत्रत्याः कवयः कवितारचने तथा सिद्धहस्ता आसन् यथैते स्वल्पमप्यायासं न प्रतीयुः कठिनतमच्छन्दोनिबद्धानामपि कवितानां निर्माणे। अयं विशेषः केवलमस्यामेव भाषायामवलोक्येत यत् शब्दार्थबोधकः कोषोऽपि छन्दोनिबद्धायां कवितायामेवाऽस्ति। अनेन चायं लाभो भवति यत्- स्वल्पवयस्काः शिशवोऽपि छन्दोनिबद्धमिमं कोषं सुखेन घोषयन्ति। पुनश्च प्रौढदशायां शिशुहृदये सुदृढीकृतेनाऽनेन महान्तं लाभमनुभवन्ति। पारस्यभाषाकोषकारैर्यत् आत्मनः 'खालिकबारी' प्रभृतयः कोषाः कवितायां समुपनिबद्धास्तदिदमस्माकमनुकरणेनैव,

इति हि सर्वैरेवाऽन्वेषकैः सिद्धान्तितम्। अयमपि संस्कृतभाषायामेव विशेषो विलोक्येत यत् धर्मपुस्तकान्यपि कवितायामेव सन्ति। वेदाः, स्मृतयः, पुराणानि, सर्वाणीमानि कवितानिबद्धान्येव। प्रतिदिनं सायं प्रातः परमेश्वरं प्रति या प्रार्थना क्रियते, सापि कवितागुम्फितैव। एतस्याः कृते भारतीयानां सविधे संस्कृतभाषामयानि परश्शतानि 'स्तोत्राणि' सन्ति, भक्तिपरिप्लुतानि यानि परमेश्वरस्य सविधे आत्मनिवेदनमिव, कवितातत्त्वज्ञानामन्तिके काव्यचमत्कारकृते हार्दं मोदमपि प्रकामं प्रकटयन्ति। वैदिकानि स्तोत्राण्यारभ्य, आर्षाणि, देवप्रसादलब्धानि दिव्यचमत्कारसूचकानि (मूकपञ्चाशिका महिम्नः स्तोत्रलक्ष्मीसहस्रप्रभृतीनि), भगवच्छङ्कराचार्य–श्रीरामानुजाचार्य–श्रीमद्वल्लभाचार्यकृतान्येकानि स्तोत्राणि, समर्थकविनिबद्धानि 'स्तुति–कुसुमाञ्जलि'–'पादुकासहस्र'–'सूर्यशतक' (मयूरभट्टकृत)–चण्डीशतक (बाण)–आलवन्दारु–स्तोत्र–कविकर्णामृत (लीलाशुककृत) पण्डितराजजगन्नाथकृत– 'करुणालहरी'–प्रभृतिपञ्चलहरी–जैनस्तोत्र–'भक्तामर'–'कल्याणमन्दिर'– प्रभृतीनि अनेकानि सन्ति, यानि तत्तत्समाजे प्रकामं प्रसिद्धानि।

समग्रेऽपि भूमण्डले यावत्यः सभ्यभाषाः प्रचरिताः सन्ति, न तासु सोऽयं विशेषः समवाप्येत इति गौरवपुरस्सरमहमद्य वच्मि।

एवमस्याः संस्कृतभाषायाः सुविस्तीर्णमस्ति साहित्यक्षेत्रम्। यस्याः खलु भाषायाः साहित्यं यादृग् विस्तीर्णं भवति, तावदेव भाषाया महत्त्वं स्थिरीभवतीति सर्वदेशीयानां विदुषां सिद्धान्तः। इदानीं कथयत! भूमण्डलेऽस्ति काचिदीदृशी भाषा यस्याः साहित्यं संस्कृतभाषायाः साहित्यं तुलयेत्? साहित्यस्य सर्वाण्यपि अङ्गानि सुपूर्णानि सन्त्यस्याम्। जगति ईदृशः कोऽप्यावश्यको विषयो नास्ति यस्य ग्रन्थाः संस्कृतभाषायां नोपलभ्येरन्। अनन्ताऽनन्ता ग्रन्थास्तु नष्टाः, नाशिताश्च। नाधुनाप्युपलभ्यन्ते। केषाञ्चन नाममात्रमेव विदितम्, केषाञ्चित्तु नाममात्रमपि वयं न जानीमः। म्लेच्छराजानां शासनसमये बहून् वारानस्माकं पुस्तकालयाः पावके अदाह्यन्त। बख्तियारखिलजी नामकस्य म्लेच्छराजस्य सेनानायको मुहम्मदबिनसामाख्यः उदन्तपुरी–बिहार–नालन्दा–बुद्ध–गयासु स्थितान् महापुस्तकालयानदाहयदिति स्पष्टमितिहासेषूपलभ्यते। एवं बहुवारं ग्रन्थरत्नानां लुण्ठने, ध्वंसने सत्यपि, यावन्तः खलु ग्रन्थाः सन्त्यवशिष्टास्तावन्त एव भाषाया अस्या गौरवं प्रमाणयितुं पर्याप्ताः सन्ति।

मान्याः साहित्यानुरागिणो महाभागाः! एतदवधि संस्कृतभाषाया ये ये गुणा मया निवेदिताः तेषु अयमप्येकतमो विशेषोऽस्ति, यदस्यां भाषायां कस्या अपि भाषायाश्छन्दांसि निर्मीयन्तां नाम, परं न तानि विरूपाणि प्रतीयेरन्, प्रत्युत मनोहरतमानि जायन्ते समाजे। नैष गुणः सर्वासु भाषासु विलोक्येत। अधिकं किम्– अस्यां शताब्द्याम् उन्नेतश्चरमसीमानमधिरूढा, नवशिक्षितमहोदयानां विज्ञानसर्वस्वभूता, इंग्लिशभाषैव गृह्यतां पूर्वम्। अस्यां यदि संस्कृतभाषायाः शिखरिणीपुष्पिताग्रादीनिच्छन्दांसि निबध्नीयात्कश्चित्तर्हि किं तेषु, तच्छन्दोगतमाधुर्यमभिव्यङ्क्तुं कविः सफलो भवेत्? परं संस्कृतभाषायां तादृशः प्रभावोऽस्तीति मया स्वयमनुभूय प्रोच्यते श्रीमतामग्रतः। बहवः पाश्चात्यप्रभावप्रभाविता नवशिक्षितमहाभागाः

प्रवदन्ति यदियं संस्कृतभाषा मृतास्तीति। प्रकरणमिदं पृथक्। पृथगेवाऽस्य उत्तरसमारम्भः। किन्तु लाञ्छनेऽस्मिन्–एकामिमामपि युक्तिं ते प्रददति यत्संस्कृतभाषा नियमादिभ्यस्तथा दृढा, जडीभूतेव सम्पन्ना, यदस्यां सामयिकसाहित्यनिर्माणसमुचिता मृदुता एव निःशेषीभूता। यद्यस्यां हिन्द्यादिभाषासमादृतानिच्छन्दांसि निबन्धुं प्रयासश्चेत् क्रियेत्, तर्हि न शक्येत साफल्यं लब्धुम्।

एतदुपरि जयपुरराज्यस्य शिक्षाविभागस्य महामहति प्रकाश्यसम्मेलने, सर्वविधभाषापरिनिष्ठितानां विविधभाषाकवीनां समाजे, मया मध्येसभं प्रत्यक्षं प्रदर्शितं यत्संस्कृतभाषायामस्यां विश्वस्य कस्या अपि भाषायाः किञ्चिदपिच्छन्दस्तद्गतमाधुर्यनिर्वाहपूर्वकं सुखेनैव शक्यते निबन्धुम्, चेत्कविमहाभागस्य भाषाया उपरि भवेदधिकारः। मया हि प्रायो बहूनामेव भाषाणां छन्दांसि गीर्वाणभाषायां रचितानि। भारतीयेषु सर्वष्वेव विश्वविद्यालयेषु तद्विषयकविशिष्टविद्वद्भिः परीक्ष्य समर्थितानि च। अस्तु, विषयस्याऽस्य उपस्थापनं विषयान्तरं भवेत्। अतएव तद्भाषापरिनिष्ठितैः परीक्षितं ब्रज (हिन्दी) भाषायाश्छन्दोद्वयं 'वर्णिका' रूपेण निवेद्य प्रघट्टकमिदमुपसंहारामि। अयं किल वसन्तः प्रारप्स्यमानः। अस्य हि वर्णनं न तावदप्रासङ्गिकम्, अरोचकं च भवेदिति विश्वसिमि–

## 'कवित्त्वं' घनाक्षरीच्छन्दः

**'कोरकिताः किंशुका विकासमुपयातं किल**
**कर्णिकार-कुरबककाननं प्रकाशते**
**[1]स्नुतसहकाररससीकरसुरभिसुखाः**
**सुमितसमीरभराः सुभगमुपासते।**
**मञ्जुनाथ मानय मनोभूमहिमानमिमं**
**मारशरमुग्धतया मुनय उदासते।**
**वापीतट-वाटिका-विहङ्गम-विटपि-विथी-**
**वारिजवनेषु वै वसन्तविभा भासते।।'[1]**

इदं हि घनाक्षरीछन्दः। अस्मिन् एकविंशद्वर्णा भवन्ति। रूपकघनाक्षरीच्छन्दो द्वात्रिंशद्वर्णानां भवति। परमिदानीं त्रयस्त्रिंशद्वर्णानां देवघनाक्षरीच्छन्दो निवेद्यते। एतस्य ग्रथनं हिन्दी (व्रज) भाषायामपि कठिनमेव परिगण्यते। शक्तिशालिनः कवय एव एतद् रचयितुं प्रबभूवुः। अत एव नाऽधिकमस्य प्रचारः। अस्मिन् हि अन्ते त्रयोऽपि वर्णा लघवो भवन्ति, तेषां च द्विरावृत्तिर्भवति। यथा व्रजभाषायाम्–

१. स्नुतःयः सहकार (आम्र) रसः (मकरन्दः), तस्य सीकरैः सुरभयः सुगन्धिताः अत एव सुखकारकाः। परिमिताः पवनभराः सुखं यथा स्यात्तथा उपासते। उदासते तपश्चयतिः तटस्था भवन्ति।

**''झिल्ली झनकारैं पिक चातक पुकारैं बन।**
**मोरनि गुहारैं उठैं जुगनूं चमकि चमकि।।''**

एवं किल ह्रस्ववर्णानामन्ते द्विरावृत्तिरन्यस्यां भाषायां कठिनतयैव सङ्ग्रथ्यते इति रचनाश्रमवेदिनो जानीयुः। परमस्माकममरभारती, इदं देवघनाक्षरीच्छन्दोऽपि सुखं ग्रथयितुं प्रभवति– यथा–

**'वनविटपेषु भूरि शोभते कुसुमघटा**
**रोचते सरोजखण्डसुषमा सरसि सरसि**
**भाति सहकारे कलकोकिलकुहूनां[1] रवो**
**मधुकरयूनां स्वनः सरसां पयसि पयसि।**
**मञ्जुनाथ रसिकमनःसु मदलक्ष्मीर्भाति**
**दृशमुपयाति कामचर्चाऽसौ रहसि रहसि**
**मन्ये मधुपर्वणि मनोभूर्मदजन्मोन्माद[2]**
**मङ्क्ते विशङ्कं निजमुद्रया मनसि मनसि।।'**

***

१. कलानां मधुरगभीराणां कोकिलशब्दानां ध्वनिः।
२. मनोभूः कामः मधु (वसन्तः) रूपे पर्वणि पुण्यसमये, मनसि मनसि प्रत्येकजनस्य चित्ते मदजन्मानम् उन्मादं निजमुद्रया अङ्कितं करोति।

# संस्कृतभाषायां प्रचुरा साहित्यसामग्री

''भाषा हि हृद्गतं भावं प्रकाशयितुमेव मानवसृष्टौ समुत्पन्ना'' इति भाषावैज्ञानिका वदन्ति। यस्या भाषाया: सविधे भावप्रकाशनार्थं यावदेव शब्दरूपं नीवीधनं भविष्यति सा तावदेव साहित्यादिनाऽपि सम्पन्ना भविष्यति। साहित्यञ्च पुनर्भाषाया: सम्पत्ति:, समाजस्य जीवनम्, जनताया: सभ्यतासरणि:। साहित्यमवाप्य भाषा दीर्घजीवनं लभते। साहित्यं च न केवलं सभ्यताम्, अपितु तदधिकारिणां स्वभावं च जीवनपद्धतिं च स्मारयति। साहित्ये च चमत्कारकेण प्रकारेण प्रयुक्ता भाषा प्राय: प्रीणयति पाठकानिति प्रचुरं परीक्षितं प्रतिभावद्भि:। प्रसिद्धप्रकाराऽपेक्षया प्रमोदकेन अन्येन प्रकारेण वर्णनं हि साधारणेऽपि वर्ण्ये बहुशश्चमत्कारमाविर्भावयतीति प्रायश: परीक्षितम्। किन्तु-एकस्यैवाऽर्थस्य नानाप्रकारै: प्रकाशनं प्रबन्धकर्तुभाषायामधिकारं विना न तावत् सुसम्भवम्। भाषाऽपि च तत्तादृशी स्याद्यत्र हि प्रभूत: शब्दकोष:, समपेक्षिता च धातु(क्रिया) सम्पत्तिर्भवेत्। सेयमस्माकं सुरभारती सर्वस्मिन्नपि जगति एतदर्थे सम्पत्सम्पन्ना, ख्यातिमापन्ना च। भाषान्तरेष्विव नाऽस्यां शब्ददारिद्रयम्, येन हि वयं परिमितेनैव प्रकारेण, प्रमेयस्य प्रतिपादने परवशा: स्याम्। एक एव प्रतिपाद्यो विषयोऽनन्तै: प्रकारैरत्र प्रकाशयितुं पार्येत, यदि निबन्धु: सुरभारत्यामधिकारो भवेत्।

प्रकारपरीक्षणाय एकमहमुदाहरणं प्रदर्शयामि। एतदाधारेण स्थालीपुलाकन्यायात् विवेकिन: स्वयं सर्वं परिजानीयु:। पूर्वमप्येकमीदृशमुदाहरणं दत्तं मया। परं नेदं तत्। चर्वितचर्वणं हि समजे[1] शोभते, न तु साहित्यसेविनां समाजे। अन्या घटनाऽप्यत्र कारणम्। गतेषु वर्षेषु भाषान्तरपक्षपातिना वैदेशिकेन एकेन ग्रेजुएटमहोदयेन सह समभून् मम वादसङ्घर्ष: सहसैव। विषयश्चाऽयम्-यत् साहित्यसामग्रीसम्पादनाय भाषान्तरद्वारा भवान् एकमेव वाक्यार्थं कतिभि: प्रकारै: प्रतिपादयितुं पारयति, संस्कृतेन चाऽहं कियद्भि: प्रकारैरिति। तद् वाक्यं चेदम्-

''भारतस्य भूमिं यथैव वयं पश्यामस्तथैव चित्ते प्रमोदो भवति।'' इति

इदानीं संस्कृते दृश्यन्तां प्रकारभेदा:-भारतभुवं यथैव वयमालोकयामस्तथैव मानसमस्माकं प्रसीदति। भारतवसुन्धरां यथैव दृशो: कुर्म: तथैव चित्तं प्रमोदते। भारतभूमिं यथैव नेत्रातिथिं कुर्म: तथैव चेतोऽस्माकं प्रमोदमुपयाति। भारतधरणीं यथैव वयं दृग्गोचरी कुर्मस्तथैव मनसि मोदोऽस्माकमुद्भवति। भारतभूभागं यथैव वयं नेत्रयोर्गोचरमानयामस्तथैव चेतसि प्रमोद: प्रादुर्भवति। भारतभूमण्डलं यथैव लोचनविषयं विदध्म: तथैव मनसि प्रमदमनुभवाम:। भारतविश्वम्भरां यथैव वयं दृशमुपनयामस्तथैव प्रमोद: प्रादुर्भवति। भारतधरित्रीं यथैव नयनयोरानयामस्तथैव हर्ष: सम्भवति। भारतवसुमतीं यथैव नेत्रयोर्ढौकयामस्तथैव चेत: प्रहृष्यति। भारतमेदिनीं यथैव दृशोरुपहरामस्तथैव नन्दति मानसं न:। भारतभूखण्डं यथैव दृग्भ्यामापिबामस्तथैव प्रमदमुपगच्छामश्चेतसि। भारतभूखण्डं यथैव नेत्रप्राघुणिकतां नयामस्तथैव

१. समज: पशूनां संघ:।

हृष्यति हृदयं नः। भारतमातरं यथैव दृग्भ्यामापिबामस्तथेव प्रीयते नश्चित्तम्। भारतजननीं यथैव दृशोर्गोचरतां गमयाम स्तथैव निर्वृणोति नश्चेतः। भारतधरा यथैव दृशोरारोपयामस्तथैव सुखायते नोऽन्तःकरणम्। भारतभुवमलोकयामो यावन्निर्वाति मानसं नः। भारतक्षोणिं यथैव चक्षुषा वीक्षामहे तथैव तुष्यति स्वान्तमेतत्। भारताऽवनिं यथैव चक्षुषोरवतारयामस्तथैव मुदमनुभवामो मानसे। भारतकाश्यपीं यथैव परिशीलयामो दृग्भ्यां तथैव सन्तुष्यत्यन्तःकरण नः। किञ्चिद्भङ्ग्या कथने तु–

भारतभुवो विलोकनेन यथैवात्मानं पावयामस्तथैव प्रमोदमधिविन्दामः। भारतभूदर्शनेन यथैवाऽऽत्मानं सनाथयामस्तथैव हृदि कन्दलितो भवत्यानन्दः। भारतविश्वम्भरां यथैव दृशो पुरस्तादधिगच्छामस्तथैव प्रमुदमङ्कुरितामधिविन्दामो हृदि। भारतमातरमवलोक्य यथैवात्मानं पुनीमस्तथैवानन्दमाविन्दामः। दृशोरवतरन्त्यामेव भारतवसुमत्यामिदं चेतः प्रमोदमुपयाति। नेत्रप्राघुणिकतामुपनीतायां भारतभुवि शतधा प्रमोदः प्रोद्भवति। भारतभूप्रेक्षणेन पाविते़ऽस्मिन्नात्मनि नृत्यति प्रमोदो हृदयाऽवनौ। भारतमातुरालोकनेन कृतार्थीकृत्यात्मानं प्रमोदमुपगच्छामो मानसे। भारतजननीं निपीय नयनाभ्यां मुदमादत्ते चेतः। भारतभुवि दृग्विषयं लम्भितायामेव सम्मदमधिगच्छामो मानसे। भारतजगतीं नयनातिथिमाकलय्य विवृणोति निर्वृतिं चेतः। निभालितायामेव भारतभुवि परिशीलयामः परितोषम्। भारतभुवो मूर्तिमालोक्यैव दृग्भ्याम्, प्रमदमुपयाति मानसम्। विभावयन्त एव भारतभुव प्रमदमाद्मश्चेतसि। नेत्राङ्गणमानीतायामेव भारतभूतधात्र्यां सम्मदमादध्मो मानसे। नयनयोर्गोचरमुपगतायां भारतभुवि प्रहर्षमङ्गीकुर्मः। दृशि पदं दधत्यामेव भारतवसुमत्यां धारयति धृतिं चेतः। भारतभुवमालोकयतामेव मुदं चुम्बति चेतो नः। भारतधरां निरीक्षमाणानामस्माकमवगाहते प्रमोदमन्तःकरणम्। भारतमातरं दृशा परिशीलयतामस्माकमभिमुखीभवति प्रमोदः। नयनयोरवतारितायां भारतमातरि प्रोद्भवति प्रमोदो हृदये। दृग्भ्यामापिबत्सु भारतमहीमस्मासु आलिङ्गत्यानन्दमन्तःकरणम्। नयनातिथितामुपगतायां भारतवसुधायां मोदमनुभवति मानसं नः। चक्षुःसमक्षमुपनीतायामेव भारतवसुन्धरायां प्रमोदमनुभवति मानसं नः। नयनाभ्यां निरीक्षितायामेव भारतवसुमत्यां मोदामहे मानसेऽस्मिन्। भारतमेदिन्यामालोकितायामेव सुखायते स्वान्तं नः। भारतभुवि सम्मुखमुपस्थितायामेव नन्दति हृदयं नः। निर्वर्णितायामेव भारतधरायामादत्ते मुदमान्तरं नः। यावन् निभालयामो भारतविश्वम्भरां तावन्निर्वाति मानसमस्माकम्। दृशोरध्यक्षमुपगतायामेव भारतमेदिन्यां प्रकटयति प्रमोदमन्तःकरणमस्माकम्। दृग्भ्यामापीयैव भारतरत्नगर्भा प्रमदमालिङ्गति मानसं नः। नयनोपकण्ठमागतायामेव भारताऽचलायां प्रमदमाविष्कुरुते चित्तमस्माकम्। नयनसीमनि समुपगतायामेव भारतभुमौ प्रोद्भवति प्रमोदो मानसेऽस्मिन्। इत्यादि।

एतस्यैव कर्मवाच्यक्रियापरिवर्तने तु–

यथैव भारतावनिरधिवीक्ष्यते तथैव प्रमोदेन मानसमिदमधिक्रियते। यथैव दृशोरुपनीयते भारतमेदिनी तथैव भृशमभिनन्द्यते चेतसा। यथैवाऽधिनयनमवतार्यते भारतजननी तथैव चेतसा प्रनृत्यते प्रमदेन। यथैव निपीयते नयनाभ्यां भारतमाता तथैव शतमुखमाविर्भूयते प्रहर्षेणाऽन्तः। करणे। यथैव भारतभूरालोक्यते लोचनाभ्यां, तथैव प्रतिपद्यते प्रमोदोऽन्तःकरणे। यथैव निरूप्यते नयनाभ्यामवनिर्भारतीया तथैव चेतसाऽङ्गीक्रियते प्रमदभरः कोऽपि। यथैव दृग्भ्यामापीयते भारतवसुन्धरा तथैव प्रीयते मानसेनानेन। यथैव दृगभिमुखमानीयते भूमिरियं भारतस्य तथैव प्रनृत्यते प्रमोदेन मानसेनाऽनेन।

***

# संस्कृतभाषाया अतिप्राचीनता

अनादितः (सामयिकान्वेषकाणां मतानुसारमतिप्राचीनकालात्) प्रचलिता देववाणीतिख्याता-प्राचामार्याणां भाषैव सुशृङ्खलता-स्थायिता-सुन्दरताद्यापादकानां व्याकरणसंस्काराणां शनैःशनैर्दृढीभावात् 'संस्कृत'मिति नामधेयं लेभे इत्याचक्षते विचक्षणा गवेषणायाम्। मन्ये नात्र भवेद्विवेकिनः कस्यचिद्विमतिः। सर्वादौ प्रचलिताया एतस्या आर्यभाषायाः साहित्यसमुन्मीलितं रूपं भगवन्तो वेदाः। यदि लिखितं किञ्चित्प्रमाणमवलम्ब्यैव किञ्चित्साधनीयमिति हेतुवादिनां समयस्तर्हि वयं स्फुटमावेदयितुं प्रभवामो यज्जगतः सुतरां प्राचीना भाषा-वर्तमानसंस्कृतभाषाया मूलभूता गैर्वाणी वाणी, निजस्यारम्भिकं स्वरूपं वहन्ती, तत्सदृश्येव वा काचिदासीत् यस्या हि कालवशाच्छनैः शनैः परिष्कृतं साहित्ये स्थिरीकृतं च रूपं वेदा अमी समवाप्नुवन्। यद्यार्याणां साहित्यभाषा वैदिकी सेयं स्वीकृता, तर्हि व्यावहारिक्यपि तेषां सैव, ततः किञ्चिदवरा (अपरिष्कृता) वा स्वीकर्तव्या स्यात्। व्यावहारिकी भाषैव परिष्कृता सती साहित्यभाषास्वरूपं लभते, इति भाषावैज्ञानिकानां सिद्धान्तः। न नाम साहित्यभाषा प्रचलितभाषातः, सर्वथैव विजातीया भवितुमर्हति। प्रत्यक्षमुदाहरणं दृश्यताम्, स्त्रीबालादिष्वापामरं प्रचलिता या वङ्गभाषा सैव संस्कृतभाषायाः शब्दप्राचुर्यात् वर्तमानं मधुरतरं साहित्यरूपं लेभे। कतमो वा विचारशाली द्वयोरनयोर्वङ्गीयत्वं न वदेत्? अत एव भूमण्डले सर्वतः प्राचीना या भाषा वैदिकसंहितासु प्राप्ता तत्संवादिन्येव भाषा काचिज्जनसमाजे प्रचलिताऽभ्युपगन्तव्या स्यात्।

तस्या एवातिप्राचीनाया भाषाया भूखण्डस्य भिन्नभिन्नजलवाय्वोः, लोकानामुच्चारण-करणानां (कण्ठताल्वादीनाम्) वैजात्यवशाच्च शनैःशनैर्भेदस्थिरीभावेन तत्कालप्रचलितानां नानादेशभाषाणां विकासोऽभवत्।

किन्तु सर्वासामपि प्राचीनतमभाषाणामुत्पत्तिस्रोतोभूता काचिदेकैव भाषाऽऽसीदिति वर्तमानैरपि भाषातत्त्वविद्भिः साधितम्। पुरुषोत्तमदासटण्डनादिभिर्भाषाविज्ञाने प्रतिपादितं दृष्टमेव साहित्यपरिशीलिभिर्यत्- सर्वासामपि देशभाषाणामारम्भिकं स्वरूपम् उपादानस्यैक्यमनु-सूचयति। यथा-आर्याणां पितृ (पितर) पारस्यानां पिदर युरोपीयानां फादर, इत्यादयः शब्दाः स्पष्टमिदं प्रामाणीकुर्वन्ति। विषयोऽयं तद्विषयकपण्डितैर्विस्तृत्य विवेचित इति नात्र मया विषयान्तरीक्रियते।

ततश्च- प्राप्तलिखितप्रमाणबलात् प्राचामार्याणां साहित्यभाषा यदि वैदिकी सिद्धा तर्हि व्यावहारिक्यपि तस्या अविजातीया तत्सदृश्येव (तदुपादानभूता) मन्तव्या स्यात् यस्या हि परिष्कृतं साहित्यरूपं वेदाः। भाषा हि नैकरूपा सर्वदाऽवतिष्ठते। भवति हि शनैः शनैः कालवशात्परिवर्तितोच्चारणकरण[1] शक्तीनां लोकानां सम्पर्काद् भाषायां परिवर्तनम्। अतितमां

---

१. परिवर्तितानि उच्चारणस्य करणानि (साधकानि कण्ठताल्वादीनि) शक्तिः सामर्थ्यं च येषां तेषाम्

गवेषकमस्तिष्कशालिभिः पं. श्री चन्द्रधरशर्मगुलेरिभिः 'नागरीप्रचारिणी' पत्रिकायां (पुरानी हिन्दी) साधितम्-प्राचीनवैदिकभाषाप्रवाहस्यैव कालवशाद् द्वे स्रोतसी समानतया प्रवृत्ते। एकस्माच्छनैः शनैः कालकृतपरिवर्तनेन प्राकृतस्योत्पत्तिः। प्राकृतादपि कालवशाद्देश-जलवायुभेदादष्टादश महाराष्ट्र्यादिभाषाणाम्, औड्रीआवन्त्यादि उपभाषाणां च विकासः। प्राकृतभाषाया अपि शनैः शनैः संस्कारेण साहित्यरूपसम्पत्तौ सा पुस्तकस्था भाषा समजनि। व्यवहारभाषायाः स्थानं तु 'अपभ्रंशः' लेभे।

अपभ्रंशस्य विषये श्रीमता सूर्यकरणपारीकमहोदयेन प्रचुरं परिश्रम्य भूयस्तरामन्विष्टम्। मार्मिकाणां परिज्ञानाय तस्य सारभूतमधस्ताद्दीयते- अपभ्रंशस्यारम्भिको विकासो विक्रमस्य द्वितीयशताब्दीतो दशमशताब्दीं यावदासीत्। इतः पूर्वं तु 'अपभ्रंश'शब्दः कस्याश्चन भाषाया बोधको नासीत्। साहित्यस्य भाषा निरक्षराणां साधारणजनानां वा व्यवहारमार्गमवाप्य यदा ह्युच्चारणात्, शिष्टसम्भाषणाच्चाऽभ्रश्यत, विकृतं रूपमुपालभ्यत, तदैव तस्या अपभ्रंशो व्यपादिश्यत। तत्रभवता पतञ्जलिना (यस्य समयः पाश्चात्यानां मतानुसार खिष्टात्पूर्वं द्वितीयशताब्दी) महाभाष्ये प्रायुज्यतायं शब्दोऽस्मिन्नेवार्थे- ''एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः। तद्यथा- 'गौरित्यस्य शब्दस्य गावी, गोणी, गोता, गोपोतलिकेत्येवमादयो-ऽपभ्रंशाः'।'' यथाधुना शिष्टोच्चार्यस्य संस्कृतपदस्य 'संसकिरत', सेंसकिरत, इत्याद्युच्चारणं कुर्वन्ति तदनभिज्ञाः।

विक्रमस्य द्वितीयशताब्द्यां तु भरतमुनिर्नाट्यशास्त्रे-

**एवमेतत्तु विज्ञेयं संस्कृतं प्राकृतं तथा।**
**अत ऊर्ध्वं प्रवक्ष्यामि देशभाषाप्रकल्पनम्।।**

इति देशभाषारूपेण अपभ्रंशं व्यपदिदेश। यतो हि संस्कृतप्राकृतयोरुत्तरम् 'अपभ्रंशं' विहाय का वाऽन्या देशभाषा सम्भवेत्?

एवमेव-

**संस्कृतैः प्राकृतैर्वाक्यैः स्वशिष्यमनुरूपतः।**
**देशभाषाद्युपायैश्च बोधयेत्स गुरुः स्मृतः।।**

काशीप्रसादजायसवालसमुद्धृते 'नारदस्मृति'-वचनेऽपि संस्कृतप्राकृतयोरुत्तरम् 'अपभ्रंशो' देशभाषापदेन व्यपदिष्टः (अर्वाचामन्वेषकाणां मतानुसारं नारदस्मृते रचनाकालः ख्रिष्टस्य पञ्चमी शताब्दी)। एवं किल पञ्चमशताब्दीपर्यन्तं प्राकृतस्य पुस्तकभाषात्वे जाते अपभ्रंशभाषा देशभाषापदं गृहीतवतीति सिध्यति।

अपभ्रंशशब्दस्य भाषार्थे सर्वतः प्रथमं प्रयोगो वलभीनरेशस्य श्रीधरसेनस्य (द्वितीयस्य) शिलालेखे प्राप्यते यत्र हि स स्वपितुः काव्यरचनानैपुण्यमेवमाह- 'संस्कृतप्राकृतापभ्रंशभाषात्रयप्रतिबद्धरचनानिपुणान्तःकरणेति' (श्रीधरसेनपितुर्गुहसेनस्य समयो विक्रमस्य सप्तमशताब्द्याः पूर्वार्द्धं स्वीकृतोऽन्वेषकैः)। एवमेव तत्सामयिको भामहोऽपि- 'संस्कृतं प्राकृतं वान्यदपभ्रंश' इति काव्यस्य भेदत्रयं निर्दिष्टवान्। हर्षचरिते बाणोऽपि राज्ञो

बहिर्भ्रमणे प्राकृतकविना सह भाषाकविमेकं सूचितवान्। तत्रापि भाषाकविपदेन अपभ्रंश-कविरेव, यतो हि बाणस्य समये अपभ्रंशः साहित्यभाषा समजायत। अत एव काव्यादर्शे दण्डी-

**तदेतद्वाङ्मयं भूयः संस्कृतं प्राकृतं तथा।**
**अपभ्रंशं च मिश्रं चेत्याहुरार्याश्चतुर्विधम्।।**

एवमादिभिः प्रमाणैः सिध्यति यद्विक्रमस्य षष्ठसप्तमशताब्दीतः अपभ्रंशभाषा साहित्यरचनायां पर्यगृह्यत। अभूदस्या अपि तथा प्रतिष्ठा यथा राजादयोऽपि एतद्भाषाकाव्यरचनया आत्मनो गौरवं गणयामासुः, साहित्यनीतिकाराश्च अपभ्रंशस्यापि स्वतन्त्रां काव्यशैलीं स्वीचक्रुः।

दशमशताब्द्यां राजशेखरः काव्यमीमांसायाः स्थाने स्थाने अपभ्रंशमुल्लिलेख येन सिध्यति यत्तस्मिन् समयेऽस्याः साहित्यं सम्पन्नदशायां समपद्यत। सह्यपभ्रंशस्य प्रचारे प्राह- 'सापभ्रंशप्रयोगाः सकलमरुभुवष्टक्क-भादानकाश्च' (टक्कः पूर्वीयपञ्चाम्बुदेशः)।

एवं किल त्रयोदशशताब्दीपर्यन्तमपभ्रंशस्य पूर्णो विकासकाल आसीदिति पारीकमहोदयेन साधितम्। ततः अपभ्रंशस्य शनैः शनैः पुस्तकस्थभाषात्वे जाते अपभ्रंशस्य लोकप्रचलितमेकं रूपं व्यवहाराभिमुखं भूत्वा लोकभाषामन्यां ससर्ज। महामतिभिः पं. श्रीचन्द्रधरशर्मगुलेरिभिः अपभ्रंशोत्तरं या 'पुरानी हिन्दी' ति नाम्ना भाषा 'हैमव्याकरण' 'दोहा'[१] छन्दोभिः साधिता, सा हि 'प्राचीन राजस्थानी' ति पारीकमहोदयस्य मतम्। सैव तस्मिन्काले भारते साहित्यभाषारूपेण सर्वतः प्रचचार। अत एव कबीरस्यापि भाषायां राजस्थानीभाषाया एव प्रभावः सर्वतोऽधिकं व्याप्नोत्। साधितमिदं ग्रन्थोद्धृतभाषाशैलीभिः पारीकमहोदयेन। तदुत्तरं तु तत्तत्प्रान्तीयभाषाणां भेदविकासः समभूदिति जानन्त्येव भाषाविज्ञानविदः। अयं किल तत्समयविभागः

| | |
|---|---|
| पूर्वः अपभ्रंशकालः- | विक्रमस्य द्वितीयशताब्दीमारभ्य दशमशताब्दीं यावत् |
| उत्तरः अपभ्रंशकालः- | दशमशताब्दीमारभ्य त्रयोदशीं यावत् |

लोकभाषाया अथवा प्राचीनराजस्थान्याः कालः-त्रयोदशीतः पञ्चदशीं यावत्

अस्तु, गुलेरिमहोदयस्य मतानुसारम्-अपभ्रंशस्यापि शनैर्विस्तारः, अवान्तरभेदप्रसारश्चाभूत्। शनैः शनैः परिष्कारेण तस्यापि साहित्यिकं रूपं पुस्तकस्थं जातम्। व्यवहारपदं 'पुरानी हिन्दी' पदवाच्या भाषा लेभे यस्या हि उपलभ्यमानं स्वरूपं हेमचन्द्रस्यापभ्रंशकोषे उपलभ्यमानानि- 'भल्ला हुवा जो मारिया बहिणि हुमारा कन्त' इत्यादीनि दोहापद्यानि तैर्निर्दिष्टानि। तैः साधितं यन्नेमानि प्राकृतभाषासम्पत्तिः यतो हि संस्कृतभाषाछन्दसां मेरुदण्डस्वरूपं प्रधानतमं छन्दो यथा 'अनुष्टुप्' तथा प्राकृतभाषायाः 'गाथा'। एवमेव शनैः

१. भल्ला हुवा जो मारिया इत्यादिभिः।

शनैर्हिन्दीसाहित्यस्वरूपनिष्पत्तौ स्वीकर्तव्यं भवेद् यद् हिन्दीभाषायाः सिद्धान्तितं मेरुदण्डस्थानीयं सर्वमान्यं सर्ववेद्यं छन्दः 'दोहा'। 'भल्ला हुवा जो' इत्यादीनि हि 'दोहा' छन्दांसि। ततः स्पष्टीभवति यदिदं कालवशात्प्रवृत्तम् अपभ्रंशभाषायां अपि अपभ्रंशस्वरूपं 'पुरानी हिन्दी' इति व्यपदेशोचितं हिन्दीरूपमेव, नापभ्रंशः। तस्याः (पुरानी हिन्दी) सकाशात् शनैः 'रासो' इत्यादिषु प्रचलिताया जन्म, ततः सकाशात् जगनिक-जायसी (पदमावतग्रन्थकर्ता) इत्यादिभाषाया उद्भवः। ततः सूर-तुलसीत्यादिभाषाऽऽविर्भावः, ततश्च भारतेन्दुहरिशचन्द्रादीनां समयाद्वर्तमानहिन्द्याः स्वरूपाविर्भाव इति।

## वैदिकभाषातः 'संस्कृत'स्य रूपनिष्पत्तिः

वैदिकभाषातो द्वितीयं यत्स्वरूपं प्रवृत्तं तस्मात् (वेदेभ्योऽनन्तरम्) ब्राह्मणानां भाषा, ततो गृह्यादिसूत्राणाम्, ततः उपनिषदाम्। ततः पाणिन्यादीनां समये-प्रवाहेऽस्मिन् तादृशा व्याकरणनियम (संस्कार) रूपा 'बन्धाः' प्रवृत्ताः यैस्तस्या भाषायाः प्रवाहः स्वाभाविकं प्रवहणक्रमं परित्यज्य स्थिरोऽभूत्, भाषा निबद्धा जाता। यावत्कालं भाषायां व्याकरण-साहित्यादीनां सुदृढतमा नियमा न प्रचलन्ति तावत्प्रयोगादिषु महत्स्वातन्त्र्यं प्रयोक्तॄणाम्। अत एव जनताव्यवहारप्रवाहपतिता भाषा स्वाभाविकनियमानुसारं क्रमशो विपरिवर्तनं लभते। विपरिवर्तनेन च भाषायाः प्रवाहो नैकरूपतया स्थिरीकर्तुं शक्यते। 'अयम् (परिवर्तनप्रवाहः) किल भाषासु दोषोत्पादकः' इत्यादि विचारयद्भिः प्राचीनैराचार्यैर्देवभाषायां व्याकरणनियमस्वरूपास्ता व्यवस्थाः प्रवर्तिता यासां कारणात्सा भाषा व्यवस्थिता, सर्वदेशेष्वेकरूपा, यथेच्छं कालवशात्परिवर्तयितुं शक्यात्स्वरूपाद्विशिष्टं सुस्थायि च स्वरूपमाप्तवती। व्याकरणसाहित्यादिकृतादस्मादेव संस्कारात् अस्या भाषाया नाम जातं 'संस्कृतम्' इति।

एतस्मात् (संस्कारात्) पूर्वं नायं व्यपदेशोऽस्या भाषायाः प्राप्यते। एतस्याः किल नामनिर्देशो यो व्यवहृतः प्राग्भिस्तत्र सेयं गैर्वाणी, देववाणीत्याद्येव स्यात्, न संस्कृतमिति। रामायणे पुनः 'वाचं चोदाहरिष्यामि द्विजातिरिव संस्कृताम्' (सुन्दर.) इत्यादिः प्रयोगः प्राप्यते। तत्र बहूनां त्विदमेवाभिप्रेतं यदत्र 'संस्कृताम्' इति पदं ''परिष्कृताम्'' इत्यर्थक भाषाया विशेषणरूपमेव, न तु संस्कृतभाषापरम्। यदि तु भाषापरमिदं पदं मन्येत तर्हि अन्वेषकाणां तदिदं वक्तुमवकाशो भवति यत् प्रचलितं रामायणं यदि सैव वाल्मीकीया रामायणसहिता यस्याः कृते प्रसिद्धं यत् अकस्मात्- 'मा निषादे'ति श्लोकं मुखान्निःसरन्तं दृष्ट्वा विस्मयो, भावान्तराऽऽविष्कारश्चाभूत्, तर्हि कथं रामायणे उपजातिपुष्पिताग्रादीनि बहून्येव छन्दांसि? बहवश्च साहित्यसुप्रसिद्धा अलङ्काराः, सुविकसितसाहित्यसामयिकाः कवितापरिष्काराश्चाऽवाप्यन्ते? 'यथैव चौरः स तथाहि बुद्धः' (उत्तर.) इत्यादि गौतमबुद्धोल्लेखः कथम्? तस्मादिदं वर्तमानं रामायणस्वरूपं संस्कृतसाहित्यस्य पूर्णनिष्पत्तिकालिकं न किलाऽऽरम्भिकम्।

भासस्यैव कविता ततः पुरातनीति शक्यं सर्वतो वक्तुम्, यदपेक्षया हि कालिदासादीनां कवितासु साहित्यिकस्वरूपस्योत्तरोत्तरविकासः समवाप्यते। तर्हि किं वाल्मीकिकाव्ये, यद्धि छन्दःसृष्टेरेवोऽऽरम्भकं ख्याप्यते तत्र प्रस्फुरितस्य, विकासमवाप्तस्य साहित्यपरिष्कारस्य दर्शनं भवितुमर्हेत्? आर्षात्प्रभावात्सोऽयं भावी उत्कर्षः पूर्वमेव वाल्मीकिना समवाप्त इति तु न सर्वेषां विश्वासास्पदम्। अस्तु, नायं विषयोऽत्र भूयसा विचारणीयः। किन्तु गैर्वाण्याः संस्कृतमिति व्यपदेशोऽतिप्राचीनेषु ग्रन्थेषु नोपलभ्यत इति त्ववश्यं स्वीकार्यं स्यात्। यतो हि व्याकरणकृतसंस्कारोत्तरमेव तथाविधव्यपदेशप्रवृत्तेः।

अयं संस्कारो गैर्वाण्याः पक्षे समुन्नायको जातो हानिकारको वा, इति तावत्प्रसक्तानुप्रसक्तं विचारान्तरम्, यत्र हि नानाविधविचारभिदा भवितुमर्हन्ति। केषाञ्चिन्मते भाषाया जीवनस्रोतसि सेयमर्गला, यया हि जगज्जनेषु तस्याः स्वभाविकरूपेण व्यवहार एव निरुद्धो यद्वशाच्छनैः शनैः सा पुस्तकस्थैव सम्पन्ना, न तस्या नैसर्गिकी प्रगतिः। अत एव 'मृता' इति केषाञ्चित्कृतस्य व्यपदेशस्याऽवसरः।

अपरे तु वक्तुं पारयेयुर्यदेतादृशसंस्काराभावे नेयं गैर्वाणी एतावदनन्तकालपर्यन्तमेकरूपा स्थातुमशक्ष्यत्। यतो हि स्वभाव एवायं भाषाणां यत्प्रयत्नाभावेऽपि देशजलवाय्वादीनाम्, तत्तद्देशीयलोकानामुच्चारण-कारणभूतकण्ठताल्वादिकरणभेदात् नियमानुसारं तासु स्वतः परिवर्तनान्युद्भवन्ति। निसर्गतः परिवर्तनशीलानि नूनमेवंविधानि वस्तूनि, यतः प्रख्यायते- द्वादशक्रोशेषु भाषा किञ्चित्परिवर्तिता (देशविशेषस्य विभिन्नजलवाय्वादिवशात्) भवति। ततश्च न केवलमेकद्वेषु देशेष्वेव, अपि तु विश्वस्मिन्प्रचरिता, अनन्तकालाच्च प्रवृत्ता सेयमार्यभाषा कथमेकरूपा स्थातुमशक्ष्यत्? प्रत्यहं परिवर्तमानायां भाषायां यथा अव्यवस्था, वैरूप्यं चोद्भवति तथा विपरिवर्तनप्रवाहेण सर्वथा रूपान्तरोपलब्ध्या कदाचिदेकस्मिन्दिने विलोपशङ्कापि नैसर्गिकी। अत एव सुव्यवस्थायै स्थिरीकाराय च प्राचामाचार्याणां सोऽयं संस्कारः श्रेयसे एव न हान्यै इति।

अन्ये ब्रूयुः-नायं गैर्वाण्याः संस्कारः 'इदमहं करोमि' इति स्वप्रयत्नेन निष्पाद्यः केषाञ्चिदाचार्याणां हस्तकौशलम्। अयं खलु नियम एव प्रकृतेर्यद् यथा यथा कस्यचिद् वस्तुनो लोकेषु प्रचुरः प्रचारः, बहुकालिकः संसर्गश्च भवति तथा तथा सामाजिककर्णधाराणां बुद्धिसम्पर्कात्सुनिगूढमेकं परिवर्तनं सुव्यवस्थासौष्ठवादिसञ्चाराय निसर्गादनुधावति। अत एव शनैः शनैस्तद् वस्तु परिवृत्तं विशदीकृतं च रूपमुपलभते। अयमेव किल विकासवादसंवादी पक्षः। ततश्च शब्दाह्वय ज्योतिः सर्वतः प्रवर्तयतां महर्षीणामहर्निशं मेधासहचरी सेयं सुरभाषा कुतो वा न संस्कारमनुसरेत्? यथा यथा हि सेयमृषीणाम्, महापुरुषाणां च प्रचारावष्टम्भं सपेदे तथा तथैव तेषामभ्यर्हणीया सती उत्तरोत्तर सौष्ठवमनुजगाम। नायं संस्कारः पाणिन्यादीनां समयादेव सम्प्रवृत्तः शक्यते वक्तुम्। सन्ति ततः पूर्वे-'इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः', इत्यादयो बहवः शब्दशास्त्रपरिष्कारकाः प्राञ्च आचार्याः। तथा च निसर्गतः प्रवृत्तः सोऽयं भाषासंस्कारप्रवाहः पाणिन्यादिसमये तत्समयजातानां परिष्कारकाणां तेषाम्

(पाणिन्यादीनाम्) शक्त्या प्रचारितं मार्गमात्रमुपलेभे इत्येतावन्मात्रम्। एतत्कृते च कात्यायनेन भगवता पतञ्जलिना चान्यैश्च संस्काराचार्यैर्बहु प्रयतितं ततः किल प्राचीनसंस्कारकाणां प्रातिद्वन्द्व्ये साफल्यमुपलब्धमिति जानीयुः पाणिनीयव्याकरणं मर्मतो विमृशन्तो गवेषकाः। ततश्च प्राकृतिकः सोऽयं भाषासु संस्कारो नियमनिर्माणप्रवृत्तिश्च।

दृश्यताम्, नवीनानां मतानुसारं प्रकृतिनियमात्प्रवहन्ती प्राकृतभाषा लोकेषु प्रचुरं प्रसारमवाप्याऽपि कथं तादृशं संस्कारमधिजगाम यत्कारणाच्छनैः शनैः सापि साहित्यमात्रप्रचरिता केवलं पुस्तकस्था जाता। षष्टिसप्ततिवर्षेभ्यो नवीनं प्रसारक्रममधिगता वर्तमाना हिन्दीभाषैव निरीक्ष्यतां यदेतावच्चुलुकायिते काल एव जनानां प्रवाहे पतिता शनैः शनैस्तथा संस्काराभिमुखं प्रवर्तते यथा शनैः शनैर्लोकानां व्यवहारक्षेत्रादस्या वर्तमानं स्वरूपमपसरति। तत्स्थानं चान्या काचिद् भाषा गृह्णाति यस्या नाम 'हिन्दोस्थानी' स्यादन्यद्वा। वदत, कस्यात्र दोषः ? तस्माज्जानीत सम्यग्, यथा स्वाभाविक एवायं नियमो यत्कालक्रमाद्भाषायां संस्कारस्य सुव्यवस्थायाश्च स्वत एव प्रवृत्तिर्जागर्तीति।

अस्तु यत्किञ्चित्। किन्तु 'इयम् (संस्कृता) भाषा नासीत्कदाचिदपि लोकेषु व्यवहारतः प्रवृत्ता' इति हि शिक्षागौरववाहिनः केचिन्महाभागाः सङ्गिरन्ते। भारतवर्षीयाणां नवीनशिक्षितमहाभागानां ज्ञानधननीवी पश्चिमतः प्रवृत्तेति कार्यतोऽनुमातव्यम्। यतस्त इमे आङ्गलभाषया व्युत्पन्नाः। तस्यामेव भाषायां ज्ञानं विज्ञानमखिलमप्यन्विष्यन्ति। न चेदमस्वाभाविकं नूनम्। यो हि यत्र व्युत्पद्यते, यत्र रमते, यत्र चास्य प्रवृत्तिशक्तिस्तत्रैव चास्य लीलाखेलापि। भाषायाश्चास्याः परमाचार्याः पाश्चात्त्या विद्वांसः। अत एव साम्प्रतिकानां भारतीयनवशिक्षादीक्षितानां विचारशैली तेषामेव पदाङ्कानुसारं प्रचरतीति तेऽपि न नाम मन्ये निषिध्येयुः। तेषाम् (पाश्चात्त्यानाम्) दृष्टिकोणो यद् यद् दर्शयति, पश्यन्ति तत्तदिमे। नैषां दृष्टिरात्मवशा, न च स्वातन्त्र्येण विचारे समर्था। इदमेव विजेतृजातेर्जगति विजृम्भणं नाम। एद्विषये सन्ति प्रमाणानि–

यदा ते (पाश्चात्त्याः) कथयन्ति भारतीयानि काव्यान्यश्लीलानि शृङ्गारबहुलानि, स्त्रैणानुरागोन्मुखानि, एतेऽपि तथेति स्वीकुर्वन्ति। यथा च पश्चिमतो ध्वनिरुत्तिष्ठति–कामशास्त्रं स्वाभाविकम्, मनुष्यस्य परमं ज्ञातव्यम्। तदा 'स्त्रीषु प्रवृत्तिरेव निन्दनीया, शृङ्गारोऽश्लीलः' इत्यादि सर्वं विस्मृत्य तथैव प्रतिध्वनिं कुर्वन्ति। स्मरेयुर्हिन्दीसाहित्यप्रणयिनः सरस्वत्यादिपत्रेषु सेण्टनिहालसिंहप्रभृतीनामन्येषां च कर्णधाराणां कामशास्त्रविषयकान् निबन्धान् ये हि परमादरेण संगृह्यन्ते स्म। यत्कामसूत्रं "नितान्तं गोपनीयम्, मित्राणां कृते" इति मुखभागे विलिख्य स्वर्गीयमहामहोपाध्याय–श्रीदुर्गाप्रसादमहाभागैरतियत्नेन (डा. पीटर्सनमहोदयस्य साहाय्येन) मुद्रापितम्, तस्याऽधुना प्रकाश्यानि संस्करणान्येव किम्, हिन्दीभाषायामनुवादोऽपि सम्भवति। किमेतत् ? अद्य तु वात्स्यायनस्य कामसूत्रं गौरवाऽऽस्थापकं परिगण्यते। आङ्ग्लभाषामाध्यमेन तस्य यशोगाथा विश्वस्मिन् विश्रुता।

अस्माकमाङ्गलशिक्षिता भ्रातरः स्कूलकालेजेषु आरम्भादद्यावधि पञ्चतन्त्र–कथा एव

प्रथमतः पठित्वा संस्कृते प्रवेशं लेभिरे लभन्ते च। अत एव पञ्चतन्त्रेण सह न तेषामपरिचयः साधयितुं शक्यः। किन्तु न कदाचित्तेषां मुखात्पञ्चतन्त्रस्य प्रशंसा, विशिष्य चर्चा वा श्रुता। तस्यैव वराकस्य का कथा? संस्कृतसाहित्ये वेदाः, उपनिषदः, दर्शनानि, बहूनि बहूनि सन्ति रत्नानि, किन्तु न कस्यचित्स्वातन्त्र्येण प्रशंसनमाकर्णितम्। यदि पाश्चात्यैर्वेदा अन्विष्टाः उपनिषदः परिशीलिताः, दर्शनविषये आत्मनो विचाराः प्रकटितास्तर्हीमेऽपि तानाद्रियन्ते। एवमेव यदा तैः (पाश्चात्त्यैः) पञ्चतन्त्रोपरि दृष्टिर्निक्षिप्ता, जर्मनदेशीयो विद्वान् केवलं पञ्चतन्त्रमेवादाय भारते सर्वतो भ्रमन्नन्विष्यति, स्थानस्थानीयेषु कालेजेषु पञ्चतन्त्रविषयकं महत्त्वं ख्यापयति, तदाऽस्माकं वर्तमानशिक्षितमहाभागा अपि तस्य प्रशंसां कुर्वन्ति। एतत्कृते भारते स्थाने स्थानेऽभवन् शिक्षितानां व्याख्यान-सभाः। जयपुरेऽप्यस्मिन् जर्मनविदुषा कॉलेजे प्रचारितं पञ्चतन्त्रविषयकमात्मनो गवेषणम्। नवशिक्षिता अपि शतमुखैरुद्घोषयन् पञ्चतन्त्रस्य महत्त्वम्। लखनऊतः प्रचरिते 'सुधा'-नाम्नि मासिकपत्रे प्राकाश्यन्त भाईपरमानन्दादीनां पञ्चतन्त्रप्रशंसननिबन्धाः। कथयत, किमिदम्?

पश्चिमदिग्देशादिदं विचारस्रोतः समुद्भूतं यत् "सैषा (गैर्वाणी) वाणी नासीद् व्यवहारपरिगृहीता"। तत्कालमेव नवशिक्षाव्युत्पन्नैरपि तथेति तदिदमभिमतम्। अस्तु, भवतु वा यतः कुतोऽप्ययं विचारोद्गमः, किन्त्वालोचनमस्य कर्तुं प्रयतामहे। नवशिक्षितसमाजे सफलता त्वस्मिन्विषये न कथञ्चिदाशिष्या, यतोऽत्र वराकाणां तेषामस्वतन्त्रत्वात्, पाश्चात्त्यमुखनिःसृतवाक्सुधाप्रतीक्षित्वात्।

वेदेभ्यः पुरातनं न किञ्चिद्वाङ्मयमद्यापि भूतलेनोपलब्धमिति गवेषकमूर्धन्यानां सम्मतिः। वेदाश्च यस्यां भाषायामुद्भूताः सैव समयोपयोगिना संस्कारेण संस्कृता वर्तमानसंस्कृतभाषा सञ्जाता। ततश्च वेदा यदा आर्याणां साहित्यभाषासूचकाः प्रत्यक्षमुपलब्धास्तदा व्यावहारिक्यपि भाषा तेषां (आर्याणाम्) किञ्चिदपरिष्कृता सैव (यस्यां वेदानां जन्म, सा गैर्वाणी) समुपगन्तव्या। न हि विजातीयभाषाभाषिणां ततो विजातीयं साहित्यं भवितुं युक्तिसङ्गतम्।[१] यदि तु ततोऽन्या काचिद् भाषासीदिति साधयितुं प्रयत्यते तर्हि तद्भाषायाः सत्तासूचकं किञ्चित्प्रमाणमप्यावश्यकम्। विना प्रमाणं हि नाधुना किञ्चित्साधयितुं शक्यं, न सम्मान्यं नवीनैर्नूनम्। ततश्च निराधारा कस्यचिद् भाषान्तरस्य सत्ता कथं नाम सिध्येत्?

संस्कृतभाषायाः प्राचीनं साहित्यं भूण्डले प्रचलितानां सर्वासामपि भाषाणां साहित्यापेक्षया सुमहद् विस्तृतं सर्वाङ्गपूर्णं च। अस्याः साहित्ये-धर्म-दर्शन-ज्यौतिष-आयुर्वेदादीनामनन्तो ग्रान्थराशिरासीदिति तु जानन्त्येव सर्वेऽपि, किन्तु कला-शिल्प-ज्ञानादीनामपि बहवोऽद्भुता ग्रन्थास्तेषु प्रान्तेषु प्राप्यन्ते यत्र वैदेशिकानामुपप्लवा भूयसा नाभवन्। शिल्पशास्त्रस्यैकः संस्कृतभाषानिबद्धो ग्रन्थो मद्रास प्रान्तादन्विष्य मुद्रितोऽत्रत्य 'कलाविद्यालयस्य' (स्कूल ऑफ आर्ट्स एण्ड क्राफ्ट्स) अध्यक्षस्य श्रीअसितकुमारहाल-

१. व्यवहारे यां भाषा भाषन्ते लोकाः तेषां साहित्यं ततोऽन्यया भाषया निबद्धं भवेदिति नेदं युक्तिसङ्गतम्।

दारस्य समीपे प्रसङ्गवशान्मया प्रत्यक्षमवलोकितोऽभूत्। अद्यापि प्राचीनसहित्यान्वेषणाधिकृतै-र्बहवोऽप्यलभ्या ग्रन्था अन्विष्यन्ते लभ्यन्ते च। नेपालादधुनैव आयुर्वेदविषयिणी कश्यपसंहिता प्राप्ता मुद्रिता च। व्याकरणादिविषये तु भूयानेव विस्तारोऽभूदत्र। भारद्वाजविरचितं वैमानिकशास्त्रमधिगतं मुद्रितं च दिल्लीस्थेनाऽर्यसमाजेन।

प्राचीनसाहित्यान्वेषणाऽधिकृतेन महामहोपाध्याय-श्रीहरप्रसादशास्त्रिमहाभागेन अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य सभापतिपदाद् या वकृता प्रादीयत तस्यां प्रोक्तमासीद् यत् शताधिकानि तु भिन्नभिन्नानि व्याकरणान्येवाधिगतानि, येषां मध्यात् पाणिनीयाद्यानां कतिपयानामेव लोके साम्प्रतं प्रचारः।

काव्यनाटकादिग्रन्थास्त्वद्याऽवध्यपि प्रतिवर्षे नवीननवीना अन्विष्य प्रकाश्यन्ते। आर्याणां बहवो ग्रन्था भारताद् बहिर्नीताः, बहवश्च देशे एवाऽस्मिन् धर्मद्रोहभावनया क्षयमुपनीताः। बहवश्च भयभीतैर्ग्रन्थस्वामिभिः स्वकीयबुद्ध्या गोपिता एव वर्षा-वह्न्याद्युपद्रवैः स्वतो नष्टाः। हिन्दुधर्मद्वेषिणामवरङ्गजेबादीनां समये भूयांसो ग्रन्थाः प्रज्वालनेनैव वह्निसादक्रियन्त, इत्यैतिहासिका जल्पन्ति। कतिपयमासपर्यन्तं पुरातनग्रन्थप्रज्वालनेनैव वह्निसाध्यानि कार्याणि केषाञ्चिद् वैदेशिकराजानां समये समभवन्निति सर्वतः प्रसिद्धम्। एवमादिरूपेण न स्वल्पकालार्थम्, अपि तु शतसहस्रवर्षपर्यन्तं सर्वतो ग्रन्थकर्मनाशानद्यां प्रबलं प्रवाहितायामपि यस्याः साहित्यमद्यापि सर्वापेक्षया विस्तृतमाख्यायते, तस्य मध्योन्नतिसमये कियान् वा विस्तारोऽस्य स्यादिति निष्पक्षपातैः सुधीभिः स्वयमेवाऽऽलोच्यम्। विचारीणयमिदानीम्, या भाषा भाषाव्यवहारे अव्यवहृता स्यात् अपि भवेत्तस्या भाषायाः साहित्यमेतावद्विस्तृतम्? व्यवहारगतां काञ्चिदावश्यकतामनुभूयैव हि साहित्ये ग्रन्थस्य कस्यचिदवतारो भवति। या भाषा व्यवहारेऽनुपात्तैवाऽभूत्तस्या अपि साहित्यमेतावत्सर्वाङ्गपूर्णं सम्भवेदित्यपि किं बुद्धौ समाविशेत्?

आवश्यकता हि प्रसविनी (त्री) पदार्थानाम्। यस्मिन् समये यस्य वस्तुनः समाजेऽपेक्षा, तदेव लोके आविष्कृतं भवेत्। अनपेक्षितस्य वस्तुनः सङ्ग्रहस्य का कथा, स्मरणमपि कदाचित्तस्य न भवति। ततश्च विभिन्नवर्गे विभक्तस्य जनसमाजस्य यद् यदावश्यकं, स्वीयलोके च धनुर्वेद-अर्थशास्त्र-शिल्प-कला-वैद्यक-ज्यौतिष-कामशास्त्र-सूदशास्त्र-प्रभृतयस्तस्मिन् समये विभिन्न-विभिन्नसमाजस्याऽपेक्षिताः सर्वविषयका एव निरमीयन्त ग्रन्थाः। किं बहूना, पक्षिणां मिथः सम्भाषाप्रभृतयोऽपि विषया नात्र परित्यक्ताः। एवं किल प्राचीनभारतस्य सर्वेष्वेव वर्गेषु संस्कृतभाषायाः सम्बन्धमवेक्ष्याऽपि कथमियमव्यवहार्या ज्ञायतां नाम? सर्ववर्गेषु प्रचारमपेक्ष्यैव प्राचीनैः पुरुषैरुच्यते स्म-

**''एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥''**

तर्काभाससम्पर्काः केचिदेवमपि प्रजल्पन्तः श्रूयन्ते 'यत्संस्कृतभाषा कदापि व्यावहारिकी नाऽभूत्। तत्रभवतः पाणिनेरुत्तरकालमेव एतस्या भाषायाः संस्कृतमिति

व्यपदेशोऽधिगम्यते, नेतः पूर्वम्। तथा च व्याकरणकृतसंस्कारकालादारभ्य सेयं भाषा, स्वयं साहित्यसिंहासनमधिरोहन्ती व्यवहारक्षेत्रं प्राकृताऽपभ्रंशभाषादिभ्यः समर्पितवती, कथङ्कारं वा सेयं व्यावहारिकी शक्येत साधयितुम्?'

## बाह्यप्रमाणानि-

सम्यगिदमुपन्यस्तं श्रीमद्भिः, किन्तु यस्यां भाषायां तत्रभवत्पाणिन्यादिभिः संस्कारमापाद्य संस्कृतमिति व्यपदेशः प्रवर्तितः सा भाषा संस्कृतात्पृथक् कर्तुं किं शक्येत श्रीमद्भिः? व्याकरणेन हि आदिकालमारभ्याऽद्यावधि वर्तमानायास्तस्याः परिष्कार एव कृतो नाऽऽविष्कारः। अन्यथा चेद् वैयाकरणा अमी भाषायाः सृष्टिकर्तारः प्रोच्यन्तां, न संस्कर्तारः। तथा च वेदाविर्भावादारभ्य अद्यपर्यन्तं वर्तमाना सेयं गैर्वाणी एकैव भाषा सिध्यति, न विभिन्ना भाषा। संस्कारसम्पत्त्या न किल वस्तुनः पूर्वसत्ता विनिवर्तते। यज्ञदत्तस्य पुत्रः शिक्षादिसंस्कारे सम्पन्ने न किल न भवति, नाऽन्यो वा भवति। अपि तु स एव शिक्षितः 'संस्कारवानिति' लभते व्यपदेशम्। 'द्विजः', 'पुनर्जन्मे'ति व्यवहारास्तु संस्काराणां सामर्थ्यविशेषव्यापका आहार्या एव। यथा व्याध्यादिकसङ्कटविशेषान्निर्मुक्तः 'पुनर्जन्म अद्याऽस्याभवदिति' भाषणभाजनं भवति।

अस्तु, तथ्यमिदं नाऽभ्यधिकं समर्थनमर्हेत्। वर्तमाना राष्ट्रभाषा हिन्दी त्रयोदश-तम (ख्रि.) शताब्दीतोऽपभ्रंशभाषातो विभिद्य पृथग्रूपं विकासं लेभे। आरम्भिकमस्याः स्वरूपं तथाविधमस्ति यस्य हि वर्तमानकालिकेन रूपेण न लेशतोऽपि सम्भेदः संस्रवश्च। तथापि त्रयोदशशताब्दीत आरभ्य वर्तमानकालिक 'हिन्दोस्थानी' पर्यन्ता सा एकैव (गीर्वाण) भाषास्तीति स्वीकारे कथङ्कारं वा भवेद्विप्रतिपत्तिः? 'सहस्रशीर्षा पुरुषः', इति स्वरूपे वर्तमानसंस्कृतस्वरूपे च मौलिकधातुजन्यः को वा भेद इति किमनाग्रहिलः कश्चित्साधयितुं प्रभवेत्?

आङ्ग्लभाषा ह्याङ्गलानां राज्यकालाद् भारतेऽस्मिन् प्रवृत्ता। विस्तारस्त्वस्या एष्वेव परिगणितेषु वर्षेषु देशेऽस्मिन् सञ्जात इति सर्वविदितम्। इतः पूर्वं तत्तत्प्रान्तेषु स्व-स्व-प्रान्तीया भाषाः प्रचलिता आसन्। सार्वदैशिकं तु कार्यं संस्कृतभाषयैव समासिध्यत्। मध्यभारताद् रामेश्वरयात्रां गतो मनुष्यो मद्रासप्रान्तीयैर्जनैः स्वप्रान्तीयया भाषया न व्यवहर्तुमशकत्। संस्कृतभाषया तु तत्रापि व्यवहारसौकर्यं प्रत्यक्षमुपालभ्यत। वङ्गादिप्रान्तेष्वप्येवम्। अत एव अस्मद्भ्रातरो बहवः ('संस्कृतम्', 'मधुरवाणी'-प्रभृति-सम्पादकाः) कथयन्त्यपि यत् 'संस्कृतैव राष्ट्रभाषा, प्रत्यक्षं सर्वेष्वेव प्रान्तेषु एकरूपं प्रचलितत्वात्'। ततश्च अनायासं बोद्धुं शक्यते- 'यदीयं भाषा भारतीयानामव्यवहार्याऽभविष्यत्तर्हि कथं देशस्य एककोणमारभ्याऽपरपर्यन्तं सर्वत्र सुबोधा व्याप्ता च अभविष्यत्? देशे सर्वत्र आत्मीयभावानां प्रकाशनाय सेयं यदा परिगृहीता ततः कथमियं जनानामव्यवहार्या नूनम्?'

भाषावैज्ञानिकैस्तु युरोपपारस्यादिभाषाशब्दानामपि मूलं गैर्वाणभाषाया मौलिकशब्दा

एवाऽऽख्यायन्त, किन्तु भारतीयभाषाशब्दानां सेयं संस्कृतभाषैवोपादानमिति तु सर्वेणापि शिक्षितसमाजेनाभ्युपेतम्। संस्कृतभाषैव स्वाभाविक-विपरिवर्तननियमानुसारं शनैः शनैः प्राकृतादिभाषास्वरूपमधिगत्य अन्ते तत्तत्प्रान्तीयभाषारूपे परिणता। एकस्या भाषाया अन्यभाषारूपे परिणमनं हि शनैः शनैर्व्यवहारप्रवाहेणैव कालक्रमाज्जायते। न हि कस्यचिदाज्ञावाक्येन आविष्कारेण वा अन्या भाषा अन्यभाषारूपे परिणमति। ततश्च न किमिदं बोद्धुं शक्येत यत्संस्कृता (गैर्वाणी) भाषा पूर्वं सर्वतः प्राचलत्, ततः कालक्रमानुसारं शनैः शनैः भिन्न-भिन्नदेशीयलोकानां भिन्न-भिन्नकण्ठताल्वादि-उच्चारणसाधनवशात् सा प्रान्तीयभाषा रूपमवापत्। इदानीं भाषाविपरिवर्तनं नियमं परिज्ञायाऽपि किं साधयितुं शक्येत यत् संस्कृता भाषा सेयं देशे अव्यवहार्याऽभवत्, इति?

सर्वेष्वपि भारतस्य प्रान्तेषु, किं राज्ञां किं प्रजानां, सर्वाण्यपि व्यवहारकार्याणि संस्कृतभाषायामेव अभवन्निति मर्मतो विचारे विचारशीलैर्बोद्धुं पार्येत। अतिप्राचीनानि राज्ञां शासनानि सर्वलोकेषु प्रचारार्थं शिलासु ताम्रपत्रेषु च लिखितानि गवेषणाविभागेन बहुशोऽन्विष्य प्रकटीकृतानि, क्रियन्ते च, यैरितिहासस्य भूयानंशः प्रमाणीक्रियते। एतेषामुद्देश्यं सर्वतः प्रसारो नाम। यदीयं भाषा अव्यवहार्याऽभविष्यत्तर्हि इयता परिश्रमेण राजानस्तामिमां पाषाणादिषु उत्करीतुं प्रायतिष्यन्त किम्? न हि लोकेष्वप्रचलितां भाषां सर्वलोकेषु प्रचारकामुकः कोऽपि परमपरिश्रमेण समुपादद्यात्। गच्छतु प्राचीनकथा। राज्ञां पारस्परिकव्यवहारः संस्कृतभाषयैव मोगलशासनकालपर्यन्तमपि प्राचलम्। आम्बेराधिपतिमहाराजाधिराजश्रीजयसिंहादिभिः सह छत्रपतिशिवाजीप्रभृतीनां संस्कृतभाषयैव मिथः पत्रव्यवहारः प्राप्यते। सन्त्येवंविधानि पत्राणि जयपुरराज्यस्य 'दीवानी हजूरी' विभागे (यानि जयपुरस्येतिहासप्रसङ्गेन कदाचित्प्रकाशितानि अपि)।

किं वाऽधिकेन, गच्छति काले प्रान्तीयभाषासु राजशासनलेखः संस्कृतभाषायामेवाऽभवत्-'स्वहस्तोऽयं मम जयसिंहदेवस्य' इत्यादि। प्रजास्वपि परस्परदम् ऋणादानादिव्यवहारपत्रेषु ''लिखतंश, लिखतम्'' इत्यादिनैवाऽऽरभ्यते। सर्वकार्यसिद्धौ ''लिखतं पढतं तक हो गई'' इत्याख्यायते। जयपुरराजकीयव्यवहारपत्रेषु तु अद्यापि प्रारम्भे लिख्यते- 'दीवानवचनात्' इत्यादि। संस्कृतभाषाप्रवृत्तिः प्रजास्वेतावत् प्राचरत् यदिदानींपर्यन्तमपि 'लिथो' मुद्रालयमुद्रितेषु सर्वसाधारणपुस्तकेषु- 'अथ हीरा राँझा को ख्याल लिख्यते', 'अथ राजा रिसालू को ख्याल लिख्यते' इत्यादि निर्विशङ्कं प्राचलत्। यदि व्यवहार्येषु संस्कृतभाषायाः प्रचारो नाऽभविष्यत्तर्हि ध्वंसाऽवशेषाः कथमिमे यतस्ततः प्राप्येरन्?

वापीकूपतडागादिसार्वजनिककार्याणां याः शिलालिपयोऽधिगम्यन्ते तास्वपि सेयं भाषा प्राप्यते। परःसहस्र (लक्ष) मुद्रा व्ययीकृत्य पुण्येन साकमात्मनः कीर्तिमपि विश्वस्मिन् प्रख्यापयितुमिच्छुः पुरुषस्तानेवोपायान् करोति, तयैव च भाषया लेखयति, यस्याः सर्वलोकेषु परिचयो भवेत्। यदीयं संस्कृतभाषा अव्यवहार्या, लोकेष्वप्रचलिता वाऽभविष्यत्तर्हि किं

कीर्तिलोलुपाः प्राञ्चो धनिकाः प्रमत्ता आसन् यत् इमामव्यवहार्यां भाषां प्रयत्नपूर्वकं शिलास्वलेखयन्? क्षणमवधानपूर्वकं विचार्यताम्, आर्याणां विवाहादिषु मङ्गलकार्येषु, मरणादिषु अशुभकार्येषु च सर्वेष्वधुनाऽपि संस्कारपरम्परा संस्कृतभाषयैव सम्पाद्यते। संस्कृतमयकर्मकाण्डपद्धतेरद्याऽपि सम्बन्धो न विच्छिन्नः। एवं स्थितौ अपि, तत्रापि प्राचीने एव काले, महाभागैस्तदिदं निर्धारयितुमिष्यते यत् संस्कृतभाषा अव्यवहार्याऽभवदिति?

आर्यजातेः स्त्रीणामपि ये आचाराः, धार्मिकव्रतानि, त्यौहार' इतिख्याता उत्सवाः, विवाहादीनां गीतानि, एवमादिषु सर्वेष्वेव संस्कृतभाषायाः सम्बन्धो निष्प्रतिबन्धमनुवृत्तोऽनुमीयते। नगरवासिनां व्यवहाराः शिक्षादिभिः, बहिर्देशवासिनां सम्पर्कादिभिश्च सामयिकाः, परिवृत्ताश्चापि विलोक्यन्ते। किन्तु ग्राम्यजनेषु, स्त्रीप्रभृतिषु च ये व्यवहाराः प्राप्येरन् ते हि पूर्वप्रवाहानुगताः, स्वभावप्रचलिता एव भवन्ति। अन्वेषकजना ग्राम्येषु, स्त्रीणां व्यवहारभाषादिषु एव प्राचीनां रीतिनीतिमन्वेषयन्तीति जगति जानन्ति सर्वेऽपि। ततश्चारम्भादद्याऽवधि व्यवहारप्रवाहं प्रत्यक्षमुपलभ्याऽपि किं सेयमार्यभाषा अव्यवहार्या, कस्मिन्नपि काले अप्रचलिता च वराकी संसिध्येत्?

साहित्यविषये आलोचनाक्षेत्रमिदं न कस्यचिद् विवेकिनो व्याकोपाय भेवेदिति विदन्ति सर्वेऽपि। ततश्च सक्षमाप्रार्थनमिदमावेदनमस्ति यत् 'सेयं संस्कृतभाषा न कदाचिद् व्यवहार्याऽभवदिति' वैदेशिकमहाभागानां, तत्पदाङ्कानुगामिमहोदयानां च वक्तुं तदैवाऽवसरोऽभवद् यदा ह्ययं देशो नानाविधाभिर्वैदेशिकजातिभिराक्रान्तः परवशां स्थितिं प्रगतः, विच्छिन्नैकताशक्तिः, इतस्ततो विशृङ्खल एवाऽऽसीत्। स्वातन्त्र्यकाले तु भारताद् बहिरपि मानवमण्डलैर्मुकुटतटघटितशासनानां सार्वभौमभूपालानां समये शासन-धर्मादीनां विषये कदाचिन्नैसर्गिकसूक्ष्मभेदसत्तायामपि एकतासूत्रं निभृतं तथा प्राचरद् येन सर्वेऽप्यात्मानं मिथः सङ्घटितं विदन्ति स्म। तस्मिन् हि समये प्रान्तीयमवान्तरभेदं स्पृशन्ती अपि एकतासूत्रं देशेऽस्मिन् निभृतं सङ्घटयन्ती सर्वतः प्रचचार सेयं गैर्वाणी वाणी। अस्यैव हि समयस्य संस्मरणमकारि परस्ताद् भाविभी राजशेखरादिभिः-

**''नाऽतिस्पष्टो न चाऽस्पष्टो न रूक्षो नाऽतिकोमलः।**
**न मन्द्रो नाऽतितारश्च पाठो गौडेषु बाडवः।।**
**रसः कोऽप्यस्तु काप्यस्तु रीतिः कोऽप्यस्तु वा गुणः।**
**सगर्वं सर्वकर्णाटाष्टङ्कारोत्तरपाठिनः।।**
**गद्ये पद्येऽथवा मिश्रे काव्ये काव्यमना अपि।**
**गेयगर्भे स्थितः पाठे सर्वोऽपि द्राविडः कविः।।**
**सुराष्ट्रत्रवणाद्या ये पठन्त्यर्पितसौष्ठवम्।**
**अपभ्रंशवदंशानि ते संस्कृतवचांस्यपि।।**
**शारदायाः प्रसादेन काश्मीरः सुकविर्जनः।**
**कर्णे गुडूचीगण्डूषस्तेषां पाठक्रमः किमु।।**

**ततः पुरस्तात् कवयो ये भवन्त्युत्तरापथे।**
**ते महत्यपि संस्कारे सानुनासिकपाठिनः।।**
**मार्गानुगेन निनदेन निधिर्गुणानां सम्पूर्णवर्णरचनो यतिभिर्विभक्तः।**
**पाञ्चालमण्डलभुवां सुभगः कवीनां श्रोत्रे मधु क्षरति किञ्चन काव्यपाठः।।''**

काव्यमीमांसा, अधि. १ अ.७

अद्येव न सर्वदाऽऽसीदस्माकं विशृङ्खला सामाजिकी शक्तिः। भारतीयानां राज्ञां शासनकाले सुशृङ्खलायै परितः प्रचरन्ती वर्णाश्रमव्यवस्था शिक्षादिविषयेषु सर्वतोऽपि सुव्यवस्थितं व्यापिनं चैव क्रमं प्रवर्तयामास येन शिक्षिताः सर्वेऽपि देशवासिनः स्वत एव एकतासूत्रे सङ्ग्रथिता इवाऽऽसन्। पूर्वप्रघट्टकानुसारं प्राचीन काले सर्वतोऽपि प्रचलिता सेयं संस्कृतैव भाषा शिक्षाया भाषाऽऽसीदिति विचारेण पर्यवस्यति। त्यज्यतामयं विशृङ्खलप्रायः सर्वथाऽशान्तिमयो वर्तमानसमयः। परं भगवत्पाणिनिसमयपर्यन्तं तु गैर्वाणभाषैव सेयं व्यावहारिक्यभूदिति सुदृढं प्रमाणितं भवति। अत एव तत्र भवता पाणिनिना जनेषु सर्वतो व्यवह्रियमाणा सेयं 'भाषा' पदेन व्यपदिष्टा। न हि किल जनेषु अप्रचलिता काचिद्वाणी 'भाषा' पदेन व्यवहारमर्हति। यथा 'प्रथमायाश्च द्विवचने भाषायाम्', 'भाषायां सदवसश्रुवः', इत्यादि। तस्मिन् समये प्रतिदिनव्यवहारतो दूरीभूताया वैदिकभाषायाः प्रातिद्वन्द्व्ये प्रतिदिनव्यवहृता सेयं गैर्वाण्येव सामान्यतो 'भाषा' पदेन व्यपदेशनीयाऽभवत्। अस्मदादीनामेव किम्, पाश्चात्त्यविदुषामप्यन्वेषणाऽनुसारं भगवतः पाणिनेः समयः ख्रिष्टजन्मतः कतिशतकपूर्ववर्ती। ततश्च वैदेशिकप्रचारिताऽशान्ति-विरहिते स्वातन्त्र्यमये तस्मिन् समये संस्कृतमेव भारतेऽस्मिन् शिक्षाभाषाऽऽसीदिति स्वीकार्यं भवेत्। अन्यथा कथमेवम् अविशेषितं प्रायोक्ष्यत तत्रभवान् पाणिनिः ''भाषा'' इति ? किञ्च यस्या भाषाया वैदिकभाषातो विलक्षणं संस्कारमापाद्य सेयं 'संस्कृता' समपाद्यत, सापि तस्मिन् काले नेतोऽधिकं पृथग्भूताऽऽसीत्। अत एव एकेन व्याकरणेन द्वयोर्भाषयोर्बोधाय प्रायतत पाणिनिः। प्रावर्तयच्च बहून्येव संस्कृतविभागीयसूत्राणि वैदिकभाषायामपि निजव्याकरणे।

अयं समयः संस्कृतभाषायाः कृते कीदृगिति विचारशीलानां न मन्ये भवेत् परोक्षम्। उपरित संस्कृतभाषाया भक्तिः प्रचुरं प्रदर्श्यते सामयिकमहाभागैः, ''स्वतन्त्रे भारते भारतस्य भाषा संस्कृतं भवेत्'' इति मुखतः समुद्घोष्यते चाऽपि। किन्तु कार्यरूपे किं परिणतं भवतीति क्षणं प्रत्यक्षमालोक्यताम्। राजशासनादिषु कार्यनियुक्तानां शिक्षितमहाभागानामाङ्गलभाषाऽनुरागो नाऽद्यापि समाप्यते। अथवा 'टाइपराइटर' द्वारा शासनादीनां त्वरितं प्रचारसौकर्यं नाद्यापि ते परित्यक्तुं क्षमन्ते। अतएव राजकीयव्यवहारस्य प्रबलायामस्यां प्रवाहधारायां संस्कृतस्य का कथा, संस्कृतशब्दबहुला वराकी हिन्दी अपि स्थानं न लभते यथाऽभिलषितम्। तस्याः प्रातिनिध्ये 'हिन्दोस्थानी' इति पूर्वं परिचिता 'हिन्दी' नाम्ना काचित्सङ्करभाषा तैः स्थापयितुमिष्यते। एवं दुर्धर्षयुगेऽपि-प्रगत (इतः पूर्वतन) जनगणनायां ('सेन्सस रिपोर्ट') मद्रासप्रान्ते यावत्स्मरामि तावत् सप्तपञ्चाशत्कुटुम्बानां मातृ (व्यवहार) भाषा साम्प्रतमपि

संस्कृतं लेखनीयाऽभवत्। ततः केन वा मुखेन समर्थयितुं प्रगल्भ्यते यत् 'संस्कृतं कदाचिदपि व्यवहारभाषा नाऽऽसीत्' इतिः ?

आम्, एतत्तु अवश्यं विवेकतो निश्चेतव्यमेव यत् यादृशी संस्कृतभाषा वर्तमानकाले श्रीमद्भिः पुस्तकेष्ववलोक्यते, तादृश्येव भाषा सर्वदाऽऽसीदिति तु न विचारशीलानामाग्रहः। यतो हि जानीयुरेव भाषावैज्ञानिका यद् व्यवहारप्रवाहतो जायमानानि शैलीवस्तुनामादीनां परिवर्तनानि निश्चितमनिवार्याणि भवन्ति नूनम्। किन्त्वेवं सत्यपि न तेन सा भाषा काचिदन्यैव सम्पद्यते। ततश्चैवं शैलीप्रवाहपरिवर्तनानि, पश्यद्भिरपि कैश्चित् किं साधयितुं शक्येत यद् गीर्वाणभाषा सेयं कदाचिदपि व्यवहरणीया नाऽभवदिति ?

**आभ्यन्तरप्रमाणानि** -

वर्तमानयुगस्य सभ्यता पाश्चात्यविदुषां निर्देशानुसारं, तल्लिखितपुस्तकानुसारम्, तत्कृतगवेषणानुसारं च, शनैः शनैः पोषितास्तीति विज्ञानं सर्वेषाम्। अस्माभिः प्राचीनमहर्षीणां ग्रन्थाधारेण किं वा पुरातनव्यवहारानुसारं च यदि किञ्चित्साधयितुमिष्यते, तर्हि नवीनशिक्षितमहाभागाः, वर्तमानकालिकाः शासकाः नेतारश्च नेदं हृदयेन स्वीकर्तुमिच्छन्ति। कदाचित् पूज्यस्य विदुषः कस्यचित् सम्मानार्थं, तस्य ज्ञानवृद्धत्वानुरोधाद्वा, कदाचित्ते उपरितः स्वीकुर्युः किन्तु हृदयं तेषां न तुष्यति। किन्तु कस्यचित् पश्चिमदेशीयपण्डितस्य यद्यन्वेषणं लभ्येत तस्य सम्मतिर्वा तत्र प्राप्येत, तर्हि हृदयतस्ते स्वीकुर्वन्ति यदेतन्मतं सम्यगिति। महर्षेर्यास्कस्य समयः ख्रिष्टीयसंवत्सरप्रवृत्तेः सप्तशतवर्षेभ्यः पूर्वम्, आङ्ग्लदेशीयैरन्वेषकैरेव निर्धारितः। तस्य (यास्कस्य) समये सेयं गीर्वाणभाषा (संस्कृतम्) व्यावहारिकी आसीदिति सिध्यति। वैदिक-संस्कृतभाषातो भिन्ना, साधारण जनताया या भाषाऽऽसीत्तस्याः कृते यास्केन स्थाने स्थाने 'भाषा' इति व्यपदेशः कृतोऽस्ति।[१] जनैर्भाष्यमाणैव वाक् 'भाषा' पदेन व्यवह्रियते इति हि साधारणव्युत्पन्नोऽपि वेत्ति। यास्केन निरुक्ते 'कृदन्त' शब्दानां निष्पत्तिस्तेभ्यो धातुभ्यः प्रदर्शिता, ये हि धातवो लोकव्यवहारे समागच्छन्ति स्म। तस्मिन् समये भिन्न-भिन्न प्रान्तेषु संस्कृतभाषाशब्दानां यानि रूपान्तराणि, विशिष्टाः प्रयोगा वा प्रचलिता आसन्, तेषामुल्लेखः स्थाने-स्थाने यास्केन कृतः। यथा- 'शवति'[२] इति क्रियापदस्य प्रयोगः कम्बोजदेशे (वर्तमानकाले पञ्चाप-प्रदेशस्य पश्चिमोत्तर-प्रान्ते) गमनार्थे क्रियते स्म। परं एतस्माद्धातोर्निष्पन्न संज्ञा शब्दः 'शव' इति मृतार्थे ('मुर्दा') प्रयुज्यते स्म। प्राच्यदेशेषु 'दाति' इति क्रियापदं छेदनार्थे (दा-लवने) साधारणतया सर्वप्रक्रियासु प्रयुज्यते स्म, किन्तु उत्तरदेशीया एतद्धातुनिष्पन्नं 'दात्र' ('हंसिया' 'दांतखी') मिति कृदन्तमेव प्रयुञ्जते स्म, न धातुम्।

१. भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते। निरुक्तम् २/२

२. शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते, विकारमस्याऽऽर्येषु भाषन्ते 'शव' इति। दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु। निरुक्तम् २/२

एतदनन्तरं पाणिनेः समयेऽपि संस्कृतस्य तदिदं रूपं यथावत्प्राचलत्। तस्मिन् समयेऽपि सेयं वाणी 'भाषा' नाम्नैव व्यवह्रियते स्म। प्रतिदिनव्यवहारे सेयं भाषा उपयुज्यते स्म, इति प्रत्यक्ष भवेद्वीक्षकाणाम्। यदि कश्चित् कञ्चिज्जनं दूरतः समाह्वयति तदा प्लुतः स्वरो भवतीति पाणिनिरनुशास्ति। यथा-गोपः कृष्णं शब्दायते यत्- ''आगच्छ कृष्ण ३। अत्र गौश्चरति'' अर्थात् कृष्णस्य अकारः प्लुतो भविष्यति। एवमेव यदि कश्चिच्छात्रो गुरुम् अभिवादयते, गुरुश्च छात्राय आशिषः प्रयुङ्क्ते तत्रापि प्रत्यभिवादवाक्ये प्लुतः स्वरो भवतीति पाणिनेरनुशासनम्। यथा- ''भो गुरो! त्वामभिवादये'' इति अभिवादवाक्यस्य प्रत्युत्तरे- ''आयुष्मान् एधि देवदत्त ३'' अत्र अन्तिमोऽकारः प्लुतो भविष्यति। एषा प्लुतप्रक्रिया सुस्पष्टं सूत्रयति यत्तस्मिन् समये सैषा संस्कृतभाषा साधारणतया जनेषु प्रचलिताऽऽसीत्।

किञ्च पाणिनेर्व्याकरणे प्रतिदिनं व्यवहृताया भाषाया व्यवहारशैल्योऽपि संस्कृतभाषाया लोके व्यवहृतत्वं सूचयन्ति यथा- 'दण्डादण्डि' (दण्डैः दण्डैश्च परस्परं प्रहृत्य इदं युद्धं प्रवृत्तम्) हिन्दी-भाषायां 'लाठालाठी'। 'केशाकेशि' (केशेषु केशेषु गृहीत्वा इदं युद्धं जातमिति) 'हाथाहाथी' 'हाथापाई' इति हिन्दी। एवमेव प्रयुज्यते- 'उदरपूरं भुङ्क्ते' इति। अत्र उदरं पूरयित्वा भुङ्क्ते इत्येतावता ''पेट भर खाता है'' इति लोकभाषाव्यवहारः सुस्पष्टमभिव्यज्यते। व्याकरणे एवंविधानां प्रयोगाणां साधुत्वप्रदर्शनात्प्रतीयते यत्तस्मिन् समये लोकभाषायां न इमे प्रयुज्यन्ते स्म। यदि ग्रन्थ-लेखन एव संस्कृतभाषाया उपयोगोऽभविष्यत्तर्हि एवंविध-प्रयोगाणाम्, ये हि मिथः सम्भाषण एव प्रयुज्यन्ते, व्याकरणे साधुत्वप्रदर्शनस्य नाऽऽसीदावश्यकता।

तत्रभवतः पाणिनेरनन्तरं वृत्तिकारस्य कात्यायनस्य समये (पाश्चात्यगवेषणानुसारं विक्रमात् चतुःशतवर्षेभ्यः पूर्वम्), तथा भाष्यकारस्य श्रीमतः पतञ्जलेः समये (विक्रमात् त्रिशतवत्सरेभ्यः पूर्वम्) अपि जनतायां संस्कृतभाषाया व्यवहारः प्रवर्द्धमान एवाऽभवत्। नवीननवीनाः शब्दा भाषायां प्राविशन्, नवीननवीनाः शैल्यः (मुहाविरे) प्रयोगे प्राचलन्। अतएव तासां साधुत्वव्यवस्थार्थं श्रीमता कात्यायनेन वार्तिकानि निर्मितानि। यथा- तत्रभवता पाणिनिना 'हिमानी' एवं 'अरण्यानी' शब्दयोः प्रयोगः स्त्रीत्वकल्पनायां प्रदर्शितः, किन्तु कात्यायनेन तयोर्विशिष्टोऽर्थो व्यवस्थापितः। यतो हि वार्तिककारस्य समये 'महत्' हिमं हिमानी, घोरम् (महत्) अरण्यम् अरण्यानी इति लोकभाषायां व्यवहारः प्राचलत्। वरुणानी, रुद्राणी इत्यादिवत् 'यवनानी' इति शब्दस्य व्यवहारः पाणिनेः समये कदाचित् यवनस्य स्त्रियां भवेत्, किन्तु कात्यायनस्य समये यवनानां लिपिर्यवनानीति जनताव्यवहारे प्राचलत्।

महाभाष्यकारेण संस्कृतभाषायाः प्रयोगो भारतस्य प्रान्ते प्रान्ते विभिन्नो विभिन्नः प्रदर्शितः। यथा गत्यर्थे सुराष्ट्रदेशे (वर्तमान-काठियावाडप्रान्ते) हम्मतिः प्रयुज्यते, पूर्वप्रान्ते 'रंहतिः', आर्येषु तु 'गच्छति' इति। शब्दप्रयोगे च शिष्टाः प्रमाणमित्याह कात्यायनः। शिष्टाश्च- ''एतस्मिन्नार्यावर्ते (निवासे) ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारङ्गतास्तत्रभवन्तः शिष्टाः। शिष्टाः शब्देषु प्रमाणम्'' ६/३/१०९ सूत्रोपरि भाष्यम्। भिन्न-भिन्न प्रान्ते भिन्न-भिन्नः प्रयोगः स्पष्टं प्रमाणयति यत्तस्मिन्

समये समग्रेऽपि भारते सेयं संस्कृतभाषा जनताया व्यवहारभाषाऽऽसीदिति।

महाभाष्ये वैयाकरण-रथचालकयोरेको मनोरञ्जकः संवादोऽस्ति- 'प्राजिता' (रथचालकः) इति शब्दस्यार्थविषये। यथा- एवं हि कश्चिद् वैयाकरण आह- 'कोऽस्य रथस्य प्रवेता' इति। सूत आह- 'अहमायुष्मन्! अस्य रथस्य प्राजिता' इति। वैयाकरण आह- 'अपशब्द इति'। सूत आह- 'प्राप्तिज्ञो देवानां प्रिय, न तु इष्टिज्ञः। इष्यत एतद्रूपमिति।' वैयाकरण आह- 'अहो खल्वेतेन दुरुतेन बाध्यामहे'। इति। सूत आह- 'न खलु वेञः सूतः, सुवतेरेव सूतः। यदि सुवतेः कुत्सा प्रयोक्तव्या दुःसूतेनेति वक्तव्यम्'। २/४/५६ सूत्रोपरि भाष्यम्। ततश्च-यां भाषा रथचालकोऽपि ब्रूते सा व्यवहारस्य भाषा नेति कथनं किमु समञ्जसं भवेत्?

महाभारतस्य भाषायां ''शैल्यः'' ('मुहाविरे') प्रतिपदमुपलभ्यन्ते। शैल्यश्च मिथः सम्भाष्यमाणायामेव भाषायां भवन्तीति भाषावैज्ञानिका आहुः। यथा भाष्ये- ''पृष्ठं कुरु, पादौ[१] कुरु'', (अर्थात् नानाविधां सेवां कर्तुमादिशति)। ततश्च विक्रमात्परस्सहस्रवर्षेभ्यः पूर्वत आरभ्य, विक्रमनृपतेरभ्युदयकालपर्यन्तं संस्कृतभाषा सेयमार्याणां मिथो व्यवहारभाषाऽऽसीदिति दृढं निश्चिनुमः। भारतस्याऽनेके प्राचीनाः पृथिवीप राजहर्म्यमालायां नियममास्थापयन् यत्तेषामन्तःपुरे संस्कृतभाषयैव व्यवहारः प्रचलेत्। राजशेखरेण काव्यमीमांसायां विक्रमस्य नाम सूचितमस्त्यस्मिन् विषये। 'उज्जयिनी-नरपालः साहसाङ्क विरुदभृद् विक्रमादित्यो दृढमिदं न्ययमयद् यत्तस्यान्तःपुरे संस्कृतमेव व्यवह्रियेत' (काव्यमीमांसा पृ. ४०)। 'भोजप्रबन्धम्' इतिहासविषये न मान्यं मन्यन्ते, किन्तु धारानरेशस्य भोजस्य शासने कुविन्दस्य तस्या वार्ता न किल विस्मृतिमर्हति येन संस्कृतपद्ये प्रत्युक्तमासीत्-

**काव्यं करोमि, न हि चारुतरं करोमि**
**यत्नात् करोमि यदि, चारुतरं करोमि।**
**भूपालमौलिमणि-मण्डित-पादपीठ!**
**हे साहसाङ्क! कवयामि, वयामि, यामि।।**

***

१. करोतिरभूतप्रादुर्भावे दृष्टः, निर्मलीकरणे चापि विद्यते। पृष्ठं कुरु, पादौ कुरु, उन्मृदानेति गम्यते १।३।१ सूत्रोपरि भाष्यम्।

# वर्तमानयुगस्याऽपेक्षा च संस्कृतभाषा च

संस्कृतभाषा सेयं देशजातिनिर्विशेषं सर्वेषामेव लोकानां पुरा व्यवहारसाधनमभूत्। कस्मात्कालादियमाविर्भूतेति तथ्यतया यद्यपि न निर्धारयितुं शक्यम्, किन्तु "भूमण्डले सर्वतः पुरातनं वाङ्मयं सेयम् ऋग्वेदसंहिताऽऽस्तीति" विजेतृत्वाभिमानिभिर्वैदेशिकः पाश्चात्त्यैरपि सर्वथा सर्वेषामग्रत प्रमाणीकृतम्। वेदाश्च– या संस्कृतभाषाऽस्माभिरद्यत्वेऽनुभूयते, तस्या एव प्रकृतिभूतायां देवभाषायां निरमीयन्तेति विवेकिभिः स्वीकर्तव्यं स्यात्। काममद्यत्वे व्याकरणाकृतैर्नानाविधसंस्कारैः सुनिबद्धं किञ्चिद्रूपमापन्ना संस्कृता, 'अपरा' भ्रमात्कदाचिद् व्यपदिश्येत, किन्तु 'अग्निमीळेपुरोहितं यज्ञस्य देवमृत्विजम्', 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' इत्यादिभिरभिन्नैः शब्दैर्धातुभिश्च सुस्पष्टं परिचेतुं शक्यामिमां प्राचीनभाषां वर्तमानकाले व्यवहृताया एतस्याः संस्कृतभाषायाः सकाशात्को नाम पृथक् साधयितुं तत्त्वतः प्रभवेत्? ततश्च–अनादिकालात्प्रचलिता सेयमद्याऽवधि शासनादिकृतां नानाविधां विघ्नबाधामनुबभूवेति को वा ऐतिहासिको न जानीयात्?

जैनबौद्धादीनां धार्मिकसङ्घर्षे सेयम् प्राकृतभाषया सह द्वन्द्वमसहिष्ट। तत अपभ्रंशभाषया भूयस्तरामपसारिता सेयं 'प्राचीनहिन्दी' रूपमवाप्य, नानाविधानां प्रान्तीयभाषाणां जन्मदात्री भूत्वा, स्वस्वरूपे उत्तरोत्तरं वैरल्यमनुबभूव। किन्तु मोगलसम्राजः 'शाहजहांनस्य' समयपर्यन्तं सेयं संस्कृतभाषा साहित्यगौरवेण सह भारतेऽस्मिन् सर्वतः प्रचचारेति शक्यं वक्तुम्। यतो हि साहित्यनिर्मातृणामन्तिमः स्वतन्त्रग्रन्थनिर्माता पण्डितराजो जगन्नाथः स्वीयैर्विमर्शग्रन्थैः, सर्वलोकमान्यैः काव्यैश्च, संस्कृतभाषायाः समादरमस्मिन्नपि समये सर्वतः समसाधयत्।

तत आङ्ग्लशासने प्रवृत्ते राजनीतिनिपुणैः पाश्चात्त्यैः केनचिदभिसन्धिना सेयं संस्कृतभाषा नाऽभूच्चूर्णिता। प्रत्युत गुणपरीक्षकैः कतिपयैः पाश्चात्त्यविद्वद्भिः संस्कृतस्य भूयस्सु अंशेषु सेवा वा समादरो वा विहित इति वक्तव्यं भवेत्। ततः पाश्चात्त्यानां भारताद् बहिष्करणसिंहनादः प्रवर्तितो गान्धिमहात्मप्रभृतिभिर्महाभागैः। भगवदनुग्रहात् वैदेशिकराष्ट्राणां राजनैतिकविषमपरिस्थितिवशाच्च भारतस्य स्वतन्त्रता समघोष्यत सर्वतः। किन्तु संस्कृतभाषाया भाग्ये स्वाधीनताकृतं सौभाग्यं नाऽद्यापि प्रादुर्भूतमिति वक्तव्यं भवेत्। वर्तमानसमये भारतस्य प्रतिप्रान्तमेव संस्कृतभाषाया विषये अतिशयभक्तिकथाः श्रूयन्ते। 'सेयं राष्ट्रभाषा जायताम्' इत्यपि कोणादुत्थितो मधुरनादः कर्णयोरभ्युपैति। कांग्रेसीयाः शासका अपि बहुसङ्ख्यकप्रजानां परितोषाय, भारतीयानां प्राचीनमहापुरुषाणां भूमौ वयं स्थिता इति अनुरोधेन, मतदातृभ्यो धार्मिकलोकेभ्यः पूर्वमेवंविधमाश्वासनमस्माभिः प्रदत्तमिति लज्जया वा, संस्कृतसम्बन्धे अनुकूलान् उपन्यासान् प्रकाशयन्ति। किन्तु शासकमञ्चात् संस्कृतोद्धारकथा कार्यरूपे न

कथञ्चिदपि परिणतेति प्रत्यक्षमिद संस्कृतक्षेत्रे कार्यं कुर्वतां नूनम्।

संस्कृतस्य पठनपाठनयोः प्रचारप्रश्ने समुपस्थिते तु मर्मविदां बहूनामेव मुखात्सेयं कथा श्रूयते यत्- ''अवश्यं संस्कृतभाषा भारतस्य कृते उपयोगिनी, पारिभाषिक-शब्दनिर्माणादिकृते भारतीयैः शरणीकरणीया च, तथापि वर्तमानकाले सा लोकानां कृते क्लिष्टा। तस्यां व्याकरणस्य या मार्मिकता सा अवश्यं तस्याः स्वरूपोचिता, अन्यान्यव्याकरणेषु दुर्लभा। किन्तु भाषान्तरपरिशीलनात्सर्वत्र सरलतामन्वेषयतां कोमलमस्तिष्काणां वर्तमानकालिकलोकानां कृते वस्तुत एव सा कठिना सिध्यति। प्राचीनकाले व्याकरणस्य सूक्ष्मताः ('बारीकियां') सौष्ठवार्थमवश्यं प्राचलन् भाषायाम्। किन्तु यदि वर्तमानकाले संस्कृतभाषायाः प्रचारः सर्वेषु लोकेषु प्रसारश्च काम्यते तर्हि कानिचित् सौकर्याणि प्रचारणीयानि स्युः।''

संस्कृतक्षेत्रे ये किल कार्यं कुर्वन्ति, संस्कृतभाषाया सह प्रणयं वहन्तो ये हि तस्याः साहित्यमनुशीलयन्ति अन्येषामग्रे प्रशंसन्ति च, वर्तमानशासने महान्तमधिकारमारूढा ये हि संस्कृतभाषायाः पक्षपोषकाः, येषां हस्ते शिक्षासूत्रं परम्परयापि सम्बद्धम्, येषां सकाशात्संस्कृतसेवकास्तामिमां प्रत्याशां धारयन्ति 'यदेते अधिकारारूढान् सम्प्रेर्य संस्कृतस्य हितं जातु साधयिष्यन्ति', ये च प्रान्ते प्रान्ते परिभ्रम्य शिक्षाकार्ये रुचिं वहन्तः संस्कृतभाषां मन्दमन्देनाऽपि स्वरेण श्लाघन्ते, एवंविधाः सर्वेऽपि महाभागाः सम्प्रति संस्कृतस्य कठिनतां सूचयन्ति। भारते तस्याः परितः प्रचारार्थं सारल्यस्य संयोगम्, व्याकरणनियमेषु काञ्चित्सुविधाम्, व्यावहारिकशब्दानां वृद्धिं चाऽऽप्यावश्यकीं मन्यन्ते।

सरदार के.एम. पणिक्करमहाभागो लखनऊनगरे 'संस्कृतपरिषदः' समुद्घाटनावसरे महता सम्भारेण भाषितवान्- ''व्याकरणे या दृढता पुरा प्राचीनपण्डितैः प्रभूततया प्राचार्यत सा सम्प्रति शिथिलीकरणीया, चेत्संस्कृतप्रचारः काम्यते।''

के.एम्. मुंशीमहाभागः संस्कृतसेवकानां सुपरिचित एव येन हि सौराष्ट्रप्रान्ते 'सोमनाथमन्दिरे' ''संस्कृतविश्वपरिषदः'' स्थापनं विहितम्। स हि कतिवारान् सूचयामास यद् व्याकरणनियमेषु सौकर्यं किञ्चिद् विधेयम् इति।

अतीताः कथाः कामं परतः क्रियन्ताम् किन्तु १९५५ ई. वर्षे द्वाविंशतितमस्य अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य सभापतिमञ्चात् चिन्तामणि द्वारकानाथदेशमुखमहाभागेन (भारतराजधान्यां देहल्याम्) प्रौढतमभाषया सङ्कलिते निजभाषणे सूचितं 'यत् पाण्डित्याडम्बरदर्शनार्थं समासबाहुल्यं सर्वथा परिहार्यम्' (पैरा. १४)। रामायणमहाभारतादीनि सरलसंस्कृतसन्दृब्धानि। ततस्तानि विहाय किमिति दण्डिबाणभारविप्रभृतीनां क्लिष्टेषु काव्येषु एतावानाग्रहः? (पै. १७)। संस्कृतव्याकरणाभिमतेषु विविधेषु भूतभविष्यदादिकालेषु बहवो विनाऽऽयासमपहातुं शक्यन्ते। एवमेव बहवो विभक्तिप्रकारा अनावश्यकाः। बहुत्र 'अपाणिनीयम्, अपाणिनीयम्' इति सुप्रयुक्तेषु पाण्डित्यदर्पाऽवहेला प्रयुज्यते। एतत्सुतरामनुचितम्। (पैरा १६)।

श्रीमता इन्द्रविद्यावाचस्पतिमहाभागेन तु ''वर्तमानभारते संस्कृतभाषायाः स्थानम्'' इति नामकं पुस्तकमेव पृथक् प्रकाशितम्। तत्र- ''संस्कृतभाषां न्यूनाधिकरूपेण सर्वे भारतीया जानीयुरित्यभीष्टं चेत् तदर्थमेते उपाया अनुष्ठेयाः''- इत्यारभ्य- 'संस्कृतज्ञैर्लेखने भाषणे च अत्यन्तसरला सुबोध्या च भाषा प्रयोक्तव्या। तदर्थं प्रचलिताः शब्दा एव प्रयोक्तव्याः। यथासम्भवं समस्तानां शब्दानां प्रयोगास्त्याज्याः। असमस्तेषु पदेषु यथासम्भवं सन्धिर्न विधेयः। यथा- 'महिला आगच्छति', अत्र 'महिलाऽऽगच्छतीति' सन्धिं कृत्वा दुर्बोधता न करणीया इत्यादि।

एतदेव किम् अखिलभारतीयविद्याकेन्द्रात् श्रीवाराणस्याः काशिकराजकीयसंस्कृतमहाविद्यालयस्य मुखपत्रिका 'सारस्वती सुषमा' या हि राजकीयतन्त्रेण (गवर्नमेण्ट) प्रकाश्यते, तयाऽपि स्वविशिष्टाङ्के (आश्विन-पौषौ २००६ सं.) सेयमावश्यकता प्रबलरूपेण सूचिता। सर्वतः पूर्वं मुखभागे एव डॉ. भगवानदासमहाभागस्य लेखोऽस्ति। यस्य हि प्रारम्भ एव वाक्येनानेन भवति यत्- ''संस्कृतभाषायाः प्रचारः साधारणजनतायामभिलषितश्चेत् तस्या व्याकरणं सरलीकर्तव्यम्। अंक-अङ्कयोः, पंच-पञ्चयोः, दंड-दण्डयोः, मंद-मन्दयोः, कंप-कम्पयोः, उच्चारणे न कोऽपि भेदः श्रोत्रेण बुध्यते। अतएव अनुनासिकवर्णानां स्थाने पूर्ववर्णशिरः स्थितः बिन्दुः एव अलं लिप्याम्, इति अनुमोदनीयम्।

भूतत्रयबोधनाय लङ् एव अलम्। भविष्यद्-द्वयबोधनाय लृट् एव, तथा लिङ्ोर्विधिलिङ् एव। कर्मवाच्यवाक्येषु तु आत्मनेपदप्रयोगः उचित एव। किन्तु परस्मैपदआत्मनेपदविवेकः (अर्थात् अनयोर्भेद आग्रहः) त्याज्यः। एवं लिङ्गभेदेऽपि नाग्रहणीयम्। तद्धितानां च शब्दबहुलसमासानां च प्रयोगः यथाशक्ति वर्जनीयः। लेखेषु सन्धयो विच्छेद्याः। अपाणिनीयाः प्रयोगाः इतिहासपुराणादिषु आर्षग्रन्थेषु बहुशः प्राप्यन्ते। तेषामनुकरणमिदानीमपि नाऽऽक्षेप्यम्।''

(लेखेऽस्मिन् ''रेखा लिख्या।'', 'शब्दाः पृथक् लिख्याः', ''ऋस्थाने 'र' प्रयुज्यते तन्मर्षणीयम्।'' इत्यादीन्यपि सन्ति। किन्तु व्याकरणतो नातिविरुद्धा या मन्त्रणा सारल्यार्थमभिसूचिता सा सद्भिर्विचारणीया नूनम्।)

वर्तमानकालेन प्रयोगप्रवाहस्य परिस्थितिरप्यन्यथा परिकल्पिता। मार्मिकैकवेद्ये निगूढस्थले आत्मनेपदयोः, नपुंसकपुंलिङ्गयोर्व्यत्यासः (उल्लङ्घनम्) प्रायो बहुत्राऽवलोक्यते। सौकर्यार्थं सन्धीनामकरणं बहुभिरेव प्रवर्तितम् (व्याकरणग्रन्थेष्वपि 'सा विवक्षामपेक्षते' इत्यादिना सुविधाया मार्गः प्रदर्शितोऽस्ति।) 'सङ्ख्यावाचकशब्दानां संज्ञायामेव समासो भवेत्। अन्यथा तु विग्रहः (असमस्तमेव पदं प्रयोज्यम्) स्यात्'। अयं नियमो बहोः कालात् शिथिलीभूतः।''द्वित्रवर्षेभ्यः सोऽयं नियमः प्रचलितः।''''पञ्चवर्षेभ्यः संस्कृतच्छात्रसङ्ख्या न्यूनीभूता'', ''सप्तवर्षैराचार्यपरीक्षाऽध्ययन सम्भवति'', ''परीक्षोत्तीर्णस्य मे व्यतिगतानि विंशति-वर्षाणि'', इत्यादयः प्रयोगाः व्याकरणमर्मविदां पण्डितानामपि लेखनीतो निर्गच्छन्ति। 'अनद्यतने एव भूते लङ् प्रयोक्तव्यः, अद्यतने तु सामान्यभूतः 'लुङ्', इत्यस्य संरक्षा मार्मिकाणामपि वैयाकरणानां प्रयोगप्रवाहे न दृष्टा। ''उभयपदिषु धातुषु कर्तृगामिनि फले

आत्मनेपदम्, परगामिनि परस्मैदम्'' अयं विचारो वैयाकरणपुङ्गवानामपि गोष्ठ्यां नाऽवेक्षितः सम्प्रति। काममत्र बुद्धिपूर्णं सूक्ष्मसमवेक्षणमप्यकारि। ये केचिदङ्गुलिगणनीयाः पण्डितविशेषाः, तेषामपि ''अमुकस्य नैरुज्यार्थं त्र्यक्षरमृत्युञ्जयमन्त्रजपमहं करिष्यामि'', ''मम निर्विघ्ननैरुज्यार्थं मृत्युञ्जयमन्त्रजपमहं करिष्ये'' इति सङ्कल्पे एव आत्मनेपदपरस्मैपदयोर्भेदविभेदो विलोकितः।

पञ्चाम्बुप्रदेशीयैः शिक्षाकार्यकर्तृभिः सारल्यमुपलक्ष्य बहुभ्यो वर्षेभ्यः पूर्वत एव 'लट् लृट् लङ् लिङ्' इति चत्वार एव लकाराः (वर्तमानभविष्यद्भूतकालार्थं प्रेरणासम्भावनाद्यर्थं च) स्वीकृताः, अन्ये गलहस्तिताः। शब्दयोर्मिथः सन्धिरुल्लङ्घितः। सोऽयं प्रवाहः प्रवाहस्वाभाव्यात् अन्यान्यप्रदेशेष्वपि तडिद्वेगेन सम्प्रवृत्तः। बहुप्रदेशीयेषु पाठ्यपुस्तकेषु तदिदं प्रत्यक्षीक्रियताम्। इतः एवंविधसौकर्यविचारेण सह स्वतन्त्रजीवानामन्यान्यपि प्रारब्धानि स्वातन्त्र्याणि। ततश्च भारतस्य सर्वेष्वपि प्रान्तेषु संस्कृतभाषामिमां प्रचुरं प्रचरन्तीं विलोकयितुमिच्छतां संस्कृतसेविनां केषाञ्चित्सोऽयं विचारः प्रादुरभूद् यत् पण्डितसमाज एव यदि सर्वं पूर्वापरं संस्कृतस्याऽभ्युदयं विचार्य संस्कृतभाषाया संव्यवहारे सारल्योपायान् प्रचारयेत्तर्हि सम्यग् भवेत्। अनर्गलं स्वातन्त्र्ये सम्प्रवृत्ते तु सुस्पष्टमव्यवस्था प्रादुर्भवेत्।

दक्षिणप्रान्ते (मद्रासप्रदेशे) अन्यान्यप्रदेशापेक्षया संस्कृतभाषाया भूयान् प्रचारः, उच्चारणादिषु शुद्धता च समवेक्ष्यते। संस्कृतभाषासम्बन्धिषु बहुषु विषयेषु तत्प्रदेशीयविदुषां मुखमीक्षन्ते अन्यान्यप्रदेशीया विद्वांसः। उत्तरप्रदेशे सोऽयं विचारः साम्प्रतं प्रवृत्तः, किन्तु दक्षिणापथे सारल्यविचारः कतिपयवर्षेभ्यः पूर्वत एव पण्डितसमाजे प्रावर्तत। 'ब्रह्मविद्या' नामके 'आद्यार लाइब्रेरी' मुखपत्रे ''संस्कृतग्रन्थिविघटनम्'' इति शीर्षको निबन्धः कुन्हनराजा एम.ए. (D. Phil.) महोदयस्य प्रकाशितोऽभूत्पुरा। महाभागोऽयम् राजस्थाननिवासिनामपि नाऽपरिचितः। कियत्कालात्पूर्वमेष महाभागः अनेकानेकदुर्लभग्रन्थपूर्णस्य राजहर्म्यपुस्तकालयस्य सूच्यादिनिर्माणव्यवस्थार्थं जयपुरनगरे समागमत्। अस्तु। व्याकरणसम्बन्धी विषयः सुललितपद्येषु निबद्धोऽस्मिन्निबन्धे। किन्तु आद्यन्तयोर्वक्तव्यम् आङ्गलभाषाप्रोदीरितमिति तत् संस्कृतेनाऽनूद्य, संस्कृतपण्डितानां सारल्यविचारे सौकर्योपस्थापनार्थमधः समुद्ध्रियते–

## ''संस्कृतग्रन्थिविघटनम्''

भारते भाषायाः प्रश्नोऽद्य पराकाष्ठां प्राप्तः। आङ्गलभाषायाऽद्ययावत् भारतस्य राजभाषाऽऽसीत्, सा विजेतृणां कारणादासीत्। भारते सा सर्वजनव्यवहारभाषा, संलापोपयोगिनी चाऽपि नासीत्। परं विजितत्वादस्माभिः सा राजकीयकार्येषु व्यवहार्याऽभवत् अद्य विजेतारो गताः। ततश्च काऽस्माकं स्यादिति प्रश्नो महत्त्वमापन्नः अद्य एतद्विषये भूयान् मतभेदः। तत्र च विभिन्नभाषाणांकृते लोकानां श्रद्धा, अस्मिन् मतभेदे च भावावेश एव मुख्यं कारणं न तु

विवेकः। मया संस्कृतभाषायाः पक्षपातः सदैव कृतः। परं तां राष्ट्रभाषां निर्मातुमितरथा वा मया केवलं भावावेशकारणान्न पक्षपातः कृतः, अपि तु प्रायोगिकी सुविधा असुविधा च दृष्टिगोचरीकृता। संस्कृतमद्य भारते सार्वजनिकशिक्षायोज्या भाषा स्यादित्यत्र कतिपया आपत्तयः क्रियन्ते।'' संस्कृतमति-कठिना भाषा। संस्कृतं मृतभाषा। यदीयं सार्वजनिकशिक्षायामनिवार्या क्रियेत तर्हि सार्वजनिकी अवनतिर्भविष्यति। केवलमियं भूतकालस्य भाषाऽस्ति।'' इत्यादयः। अस्मिन् निबन्धेऽहं संस्कृतभाषायाः प्रायोगिकानि काठिन्यानि सरलीकर्तुं काञ्चित् परिष्कारान् (सुधारान्) प्रस्तौमि। प्रत्येकं भाषा कानिचन कठिनानि, कानिचिच्च सरलानि तत्त्वानि रक्षति। उपायाः सन्ति, यैः भाषाणां कठिनताः दूरीकर्तुं शक्याः। सरलतानां च लाभः प्राप्तुं शक्यः। अहं वाञ्छामि यदद्य संस्कृतभाषा युगस्याऽनुरूपा निर्मीयेत युगस्येच्छानुसारं तस्याः सरलं स्वरूपं सम्मुखीक्रियेत। तत्र च कठिनानां प्रयोगानामपसारणाय सरलीकरणाय चोपाया आश्रीयेरन्। संस्कृते व्याकरणप्रयुक्तं काठिन्यमवश्यं वर्तते। तत्र केषाञ्चन नियमानां शिथिलीकरणमावश्यक स्यात्। लौकिकीनामन्यासां च भाषाणां शब्दाः स्वातन्त्र्येण संस्कृते ग्राह्या निर्मेया वा। मयाऽस्मिन् प्रस्तावेऽस्माकं प्राचीनानां शास्त्रकाराणां पद्धतिरेवाऽऽश्रिता। विचारार्थमिदमहं प्रस्तौमि-

**संस्कृतस्य व्याकरणं दृढबद्धं पुराकृतम्।**
**काठिन्यभीताः प्रायोऽपावर्तन्तेऽद्य जनास्ततः।।१।।**
**एतं ग्रन्थं श्लथीकर्तुमुपादेयः परिश्रमः।**
**संस्कृताभिमुखान् बालान् पुनश्चाक्रष्टुमिच्छुभिः।।२।।**
**पूर्वाचार्यैः शास्त्रक्लृप्तादद्य व्याकरणाध्वनः।**
**बहूनां पण्डितानां तु व्यतियानं न सम्मतम्।।३।।**
**अचिरादार्षमार्गस्योच्छेदो वा स्यात्, उताऽधुना।**
**ईषद्व्यतिक्रमः कार्योऽस्माभिस्तस्यैव रक्षणे।।४।।**
**इत्येवं विशयग्रस्ते विदुषामपि चेतसि।**
**सम्मोहस्य विमर्दाय विचारः क्रियते मया।।५।।**
**स्खलितान्येव भाषाणां वृद्धिं कुर्वन्ति भूरिशः।**
**इदानीं व्यतियानं यत् तत् पश्चान्नियमो भवेत्।।६।।**
**धातूनां तावदुभयपदिनां कर्तृगे सति।**
**फले, प्रयोगो विहितः सूत्रेण ह्यात्मनेपदे।।७।।**
**एतादृशस्तु नियमः प्रयोगे नोपलभ्यते।**
**तथैव लिङ्गेष्वप्यस्ति विहितेभ्यो व्यतिक्रमः।।८।।**
**एवमेव समासेषु यङ् लुगादिष्वपि क्वचित्।**
**तद्धितेषु कृदन्तेषु दृश्यते विधिभञ्जनम्।।९।।**
**लङनद्यतने लिट् च परोक्षे सूत्रसम्मतौ।**
**नियमोऽयं प्रयोगेषु न तु प्रायेण दृश्यते।।१०।।**

नपुंसके पुंसि वा किं त्रिदिवेति पदं भवेत्।
वेदे नपुंसकं दृष्टं पुंलिङ्गममरोदितम्।।११।।
अगारशब्दोऽमरेण नपुंसकमुदीरितम्।
सप्तागारानिति मनौ पुंलिङ्गोऽपि प्रयुज्यते।।१२।।
रामायणे भारते च कालिदासकृतिष्वपि।
अपाणिनीया वर्तन्ते प्रयोगा विविधास्तथा।।१३।।
उत्सृष्टसूत्राः सन्त्येव प्रयोगा आर्षसंज्ञकाः।
सम्मताः शास्त्रकाराणां साधवः स्वीकृतास्ततः।।१४।।
कर्मण्यदृष्टैकफले शास्त्रमेव प्रयोजकम्।
दृष्टे फले त्वनुभवोऽप्यस्ति कर्मनियामकः।।१५।।
शास्त्रं वस्तुस्थितिं ब्रूते प्रायेण विषये निजे।
प्राक्कालेषूपलब्ध्वां वा तत्तत्कालेषु लक्षिताम्।।१६।।
वृद्धौ सत्यां केचिदंशाः क्षीयन्तेऽन्ये तु केचन।
भवन्त्युपचिताश्चानुवर्तन्ते स्थायिनोऽपरे।।१७।।
अयं स्वभावो लोकेऽस्मिन् विषयानखिलानपि।
परिगृह्णाति, नैव स्यात् संस्कृतस्याऽपवादता।।१८।।
ईकारान्तो रात्रिशब्दः प्रायो वेदेषु दृश्यते।
देवास इति देवेभिरिति रूपे च पाक्षिके।।१९।।
गमध्वै गन्तवे चेति रूपाणि विविधान्यपि।
दृश्यन्ते वेदसूक्तेषु कृदन्तानीतराणि च।।२०।।
नष्टान्येतानि रूपाणि पश्चात्कालीनसंस्कृते।
रूपाणि नूतनान्यन्यान्याविर्भूतानि कानिचित्।।२१।।
कालिदासादिकालेषु प्रसिद्धानि पदानि च।
लुप्यन्ते चेत्प्रयोगेष्ववार्क्काले का क्षतिर्भवेत्।।२२।।
रूपाणि नूतनान्येवमुदियुश्चेत् प्रयुक्तिषु।
पूर्वग्रन्थेष्वदृष्टानि, किं तत् प्रक्षोभकारणम्।।२३।।
कस्य वांऽशस्याऽपचयाद्रूपहानिर्भविष्यति।
भाषायाः कस्य वा नाशः सम्वृद्धौ पर्यवस्यति।।२४।।
अत्र कर्तुं नैव शक्या क्लृप्तिः शास्त्रेण केनचित्।
शरणं केवलं तत्र कवयोऽन्ये च पण्डिताः।।२५।।
विशेषणविशेष्याणां क्रियात्कर्त्रोश्च सर्वदा।
वचनादिष्वैकरूप्यं रक्षणीयं प्रयत्नतः।।२६।।
संस्कृतं भाविकालेऽपि लभते यदि पोषणम्।
स्वातन्त्र्यं बहुशोऽस्माभिः कल्पनीयं प्रयुक्तिषु।।२७।।

ईदृशश्चोद्यमो द्वेधा निर्वर्त्यः संस्कृतेऽधुना।
सञ्चयात् सङ्ग्रहांऽशानां, भ्रंशे लोचनमीलनात्।।२८।।
शर्ववर्मा बोपदेवाश्चाचार्यः शाकटायनः।
हेमचन्द्रश्च भिन्नानि शब्दशास्त्राणि चक्रिरे।।२९।।
रूपावतारे कौमुद्या युगले प्रक्रियामुखे।
सर्वस्वे च परित्यक्तः सूत्राणामादिमः क्रमः।।३०।।
पाणिन्युपज्ञे शास्त्रे ये ग्रन्थयः क्लेशहेतवः।
तेषां विश्लथनायैवमाचार्याणां परिश्रमः।।३१।।
आचार्यपारम्पर्यस्य रक्षायां दीक्षिता वयम्।
किमर्थं वा विषीदामो ग्रन्थिसन्ततिवेष्टिताः।।३२।।
शब्दाः सामान्यविधिभिर्निष्पन्नाः सन्ति भूरिशः।
प्रायेण चैते भाषायां बालानामपि सुग्रहाः।।३३।।
अस्मच्छब्दस्तथा युष्मच्छब्दः सदृशरूपिणौ।
रूपाणि यत्तदादीनां समानान्येव कृत्स्नशः।।३४।।
प्रायेणाजन्तरूपाणि सामान्यविधिगोचराः।
हलन्तरूपवत् क्लेशं ग्रहणे जनयन्ति न।।३५।।
अकारान्तास्तत्र शब्दाः पुंस्यादन्तास्तथा स्त्रियाम्।
तदादयः सर्वनामशब्दाः प्रायः सरूपकाः।।३६।।
इकारान्तस्तथा चोकारान्तः पुंस्येकरूपिणौ।
ईकारान्तः स्त्रियामूकारान्तश्चापि तथाविधौ।।३७।।
रूपं नपुंसके प्रायः पुंलिङ्गमनुवर्तते।
तृतीयातो, द्वितीया च सदा प्रथमया समा।।३८।।
लिङ्गभेदाद्रूपभेदो हलन्तेषु न दृश्यते।
विविधानां हलन्तानां रूपे सूक्ष्मा मिथो भिदा।।३९।।
तिङन्तेष्वपि लट् लङ् च लोट् लिङ् लृट् च न दुर्ग्रहाः।
प्रथमे पुरुषे लिट् च प्रारिप्सूनां न दुर्ग्रहः।।४०।।
तथैवाऽऽद्यं विकरणं चतुर्थं षष्ठमेव च।
दशमं रूपनिष्पत्तौ ललितं ह्येषु सम्मतम्।।४१।।
लृङ्लुटौ विरलौ दृष्टौ लुङ् च प्रायेण वर्जितः ( वर्ज्यते )।
एवं सामान्यतः सिद्धा शब्दा नोद्वेगहेतवः।।४२।।
प्रायस्तिङन्तरूपाण्युत्सृजन्तश्च कृदाश्रयाः।
प्रयोगान् सुगमान् कर्तुं बालानां शक्नुमो वयम्।।४३।।
पुराणानीतिहासाश्च पञ्चतन्त्रकथास्तथा।
काव्यानि कालिदासादिकवीनाम् एवमादिषु।।४४।।

सामान्यविधिनिष्पन्ना ललिताः सुगमा अपि।
शब्दा एवोपलभ्यन्ते न च ते श्रमकारिणः।।४५।।
एकस्यार्थस्य पर्यायेष्वनेकेषूपलभ्यते।
द्वित्राणामेव सत्कारः काव्येष्वन्ये तु नादृताः।।४६।।
यावतामेव रूपाणां प्रायेणाऽवगमाद् भवेत्।
उद्वेगकारणं नैव बालानां ग्रन्थशीलनम्।।४७।।
उच्चित्योच्चित्य तावन्ति विहायाऽन्यान्ययत्नतः।
लघु व्याकरणं किञ्चिन्निर्मातुं शक्यते बुधैः।।४८।।
अक्लिष्टमार्गेणाऽनेन भाषाद्वारं प्रवेशिताः।
क्रमेण बाला व्युत्पन्ना भविष्यन्ति श्रमं विना।।४९।।
सामान्यतः परिचये लब्धे तेषां च संस्कृते।
पश्चाद्विशेषरूपाणां ग्रहणं स्यान्न दुष्करम्।।५०।।
आत्यन्तिकक्लेशहीना भाषा कापि न विद्यते।
स्वभावतो न वा काऽप्यापाततः क्लेशसङ्कुला।।५१।।
क्लेशः केषुचिदंशेषु लालित्यमितरेषु च।
सर्वासामेव भाषाणामयमौत्सर्गिकः क्रमः।।५२।।
उक्तेह सरला रीतिः प्राक्तनग्रन्थशीलने।
प्रयोगे संस्कृतस्याऽस्ति वाच्यं किञ्चित्ततोऽधिकम्।।५३।।
अपहानाय पीडानां कल्प्यन्ते नियमाः सदा।
येऽस्मान् बध्नन्ति नियमास्ते क्षेप्तव्याः सुदूरतः।।५४।।
यद्भङ्गादर्थसन्देहो, दृष्टाः सार्वत्रिकाश्च ये।
तादृशेष्वेव नियमेष्वस्तु भक्तिरचञ्चला।।५५।।
आत्मनेपदमित्यादि विभागे दशधा स्थिते।
भेदे विकरणानां च तथा कृत्तद्धितेषु च।।५६।।
सनाद्यन्तेषु रूपेषु स्त्रीप्रत्ययविधिष्वपि।
कारकाणां विशेषोक्तौ समासान्तेषु सन्धिषु।।५७।।
अस्पष्टलिङ्गभेदेषु सूक्ष्मेष्वन्येषु कुत्रचित्।
यदि भ्रंशाः प्रयोगे स्युर्मील्येतां लोचने तदा।।५८।।
स्वैरमेवाऽन्यभाषाभ्यः स्वीकार्याऽद्य पदावलिः।
यथायोग्यं च विपरिणता संस्कृतवाङ्मये।।५९।।
नूतनानामाशयानामक्लेशेन प्रकाशने।
कालेष्वेष्ववतीर्णानामेषैका सरला गतिः।।६०।।
भाषाया ग्रन्थिविश्लेषे निगलानां च मोचने।
पूरणे वाङ्मयस्याऽपि सन्त्येवं विविधाः क्रमाः।।६१।।

**द्वारं समूलमपवारितकण्टकं चेत्**
**पादद्वयाद्विगलिता यदि शृङ्खला चेत्।**
**सम्पूरितं नवपदैरपि वाङ्मयं चेत्**
**स्यात्संस्कृतं च निखिलैरुपभोगयोग्यम्।।६२।।**

संस्कृतभाषा भारतस्य तासु तासु समस्यासु प्रमुखं भागं ग्रहीतुमारब्धवती। भारतेक बहवो नेतारः, विवेकिनः शिक्षाशास्त्रिणश्च, संस्कृतस्य राष्ट्रभाषापदार्हतां मुक्तकण्ठं समर्थितवन्तः। अहमप्येतस्य समर्थकः। परं कथनमात्रेण न सिध्यति कार्यम्। प्रयोगरूपेण विचारे प्रारब्धे कठिनताः प्रादुर्भवन्ति।

राष्ट्रभाषा राष्ट्रस्य प्रत्येकजनेन बोध्या स्यात्। प्रत्येकराष्ट्रनिवासी तां कात्स्न्येन जानीयात्। राष्ट्रभाषा हि प्रत्येकं विधानमण्डलसदस्येन, प्रत्येकं न्यायकर्मचारिणा, प्रत्येकं राजकर्मचारिणा, विश्वविद्यालयस्य प्रत्येकजनेन सम्पूर्णरूपेण अधीता स्यादित्यावश्यकम्, अद्यत्वे सर्वोऽपि संस्कृतं कात्स्न्येन न बोद्धुं प्रभवति। नैषधचरितकृतो हर्षस्येदं पदं प्रत्येकप्रस्तावे स्मरणीयम्– 'अधीतिबोधाचरणप्रचारणैः'। प्रचारणं खल्वन्तिमं सोपानम्। यदि केवलं प्रचार एव क्रियेत, अध्ययनं, मननं, मुख्यतः आचरणं च न क्रियेत, तर्हीदमस्मच्छास्त्रविरुद्धम्। मम प्रस्तावश्च–तुर्णामप्यमीषां कार्याणां ध्यानं कृत्वा समुपस्थापितः। राष्ट्रभाषायाः प्रचारकैरिदं विचार्यं नाम।

अहं संस्कृतं केवलं राष्ट्रभाषात्वेन स्वीकृतं द्रष्टुमिच्छामि। अहं वाञ्छामि यत् संस्कृतेः सभ्यतायाश्चेयं प्रधानभाषा सम्पद्येत। ऋग्वेदप्रातिशाख्य–बृहद्देवता–श्लोकवार्तिक–बृहदारण्यक–भाष्यवार्तिक–अमरकोष–अष्टाङ्गहृदय–सङ्गीतरत्नाकर इत्यादिषु ग्रन्थेषु यथा शुद्धवैज्ञानिकविषयाणां कृते पद्योपयोगिसंस्कृतस्योपयोगः कृतः, तथैवाऽद्यापि वैज्ञानिकेषु सामाजिकेषु कार्येषु च संस्कृतं प्रयुज्येतेति मे लालसा। अहं वाञ्छामि संस्कृतं तावतीं प्रभावशालिनीं भाषां द्रष्टुं यद्विदेशीयाः भारतस्य ज्ञानं लब्धुं संस्कृतं पठेयुः। ते संस्कृतं स्वदेशेऽध्याप्य भारतीयं ज्ञानं स्वदेशेषु प्रचारयितुं शक्नुयुः। अपि चाऽहं संस्कृतं संस्कृतेरान्तरराष्ट्रियां भाषां निर्मातुमिच्छामि। एतच्च प्रयत्नसाध्यम्। अधीतिबोधाचरणप्रचारणैः साध्यम्। एतत्कृते प्रायोगिकं कर्म कर्तव्यं स्यात्। एतदर्थमेव मयाऽयं निबन्धः प्रस्तुतः।''

एवं किल वर्तमानयुगस्य मानितानां प्रधानपुरुषाणां बहूनामेव आशय प्रकटीकृतः। साधारणजनताया अप्यवस्था न विवेकिनामपरिचिता। अतएव अखिलभारतीय संस्कृतसाहित्यसम्मेलनसदृशीभिः प्रामाणिकसंस्थाभिः, शिक्षाक्षेत्रे प्रचुरानुभवशालिभिः समर्थपण्डितैश्चापि, सम्भूय ''संस्कृतग्रन्थिविघटनस्य'' मार्गः प्रदर्शनीयः।

**नाधुना दीर्घमीमांसा ह्युपेक्षा वाऽपि जायताम्।**
**किमितोऽधिकमावेद्यं तत्त्वज्ञेषु विवेकिषु।।१।।**

एतद्विषये उत्साहिनः पण्डिताः स्वीयं स्वीयमभिमतं संस्कृतपत्रेषु चेत्प्रकाशयेयुस्तर्हि 'सम्भूय तत्त्वनिर्धारणे भूयसी सुविधा स्यात् पत्राणामुपयोगोऽप्येवंविधे समये।'

***

# संस्कृतभाषायामन्यभाषाशब्दानां शनैः शनैः प्रवेशः

प्राकृतभाषायां बहवो 'देशी' शब्दाः सममिलन्निति जानन्ति प्राकृततत्त्ववेदिनः। अत एव हि 'देशीनाममाला'दयः कोषाः प्राकृते पृथक्प्रासिध्यन्। एवमेव प्राकृतभाषाद्वारेण संस्कृतभाषायामपि प्राकृतशब्दाः, संस्कृतभाषाया वेषविन्यासं वहन्तः प्रचलितभाषायाः शब्दा अपि बहवः सममिलन्।

मेरुतुङ्गाचार्येण 'प्रबन्धचिन्तामणि' नामकः सङ्ग्रहग्रन्थो 'बढ़वान' नगरे सं. १८६१ वत्सरे संस्कृतभाषायां व्यरचि। एतस्मिन्नैतिहासिक्यः कथा, आख्यायिकाश्च सङ्गृहीताः, यत्र शैली भोजप्रबन्धस्येव दृश्यते। जैनधर्मस्य माहात्म्यं ख्यापयितुं धर्मोपदेशा अपि बहवोऽत्र सङ्गृहीताः। कथानां मध्ये प्रसङ्गोपयुक्ता अपभ्रंशकविता अप्युद्धृताः या हि सङ्ग्रहीतुः समयात् शतद्विशतवर्षेभ्यः पुरातन्यः। पुस्तकस्य भाषा संस्कृतं तथापि सा देशभाषाशब्दैरोतप्रोता। स्पष्टं प्रतीयते यत् जैनलेखकैर्देशभाषायां विचारितं संस्कृते च निबद्धम्। देशभाषायाः प्रचलिताः शैल्यः (मुहाविरे), लोकोक्तयः (आभाणकाः) शब्दाश्च संस्कृतव्याकरणस्य चोलकं परिधाय स्थाने-स्थाने प्रविष्टाः। यथा-

धर्मबहिका-'बही'। धाटीप्रयात-'धाड़ा डालना'। न्युञ्छन्-'न्योछावर'[१]। दवरकः-'डोरा'। पादोऽवधार्यताम्-'पगधारो, पधारो'। कञ्चोलक-'कचोली कटोरी'। जीर्णमञ्चाधिरूढः-'टूटी खटिया पर पड़ा'। हक्कित-'बुलाया हुआ'। छिम्पिका-'छींपि'। निजतनकगृह-'निजतणो(राजस्था.) घर'। व्याघुटन्ती-'लौटती हुई (बाहुडती हुई (राज.)'। वलित-'लौटा'। कार्मण-'कामण, जादू'। पट्टकिल-'पटैल'। सेजवाली-'सेझवाली' (राज.) 'पालकी'। तापिका-'तई, कडाही' (तपेली, राज.)। फुल्लावयिष्यति-'फुलावेगा'। सिद्धचन्द्रादिकृतकादम्बरीटीकायामपि बप्पीहा-'पपीहा'। कलाचिका-(कलाई प्रकोष्ठे) कुञ्चिका-कूंची 'ब्रश' इत्यादयः शब्दा दृश्येरन्।

वर्तमानकाले संस्कृतभाषायां प्रविष्टा हिन्दीभाषानुहारिणः वैदेशिकच्छायाशब्दाः वातावरण-सहानुभूति-जागृति-वास्तविक-प्राकृतिक-पुनीत-स्वर्गीयगायन-पूञ्जीपतयः-कर्गज-('ज्योतिष्मती' पत्रिकायां) सुसङ्गठिताः-राज्यसञ्चालनसूत्रम्-क्रान्तिकारिणः-प्रस्तावः-प्रगतिशीलः-आन्दोलनम्-धारा ('दफ़ा')-निर्वाचनम्-टिप्पणी-संस्कृतजगतो महानुपकारः-लोकतन्त्र-प्रजातन्त्र-राजतन्त्र-(पूर्वमासीद्राजशासनं किन्तु नायं शब्दो व्यवहृतः) 'विहारसंस्कृतशिक्षासुधारः' (सूर्योदय, १७ वर्षे अङ्क १२)- 'सुधारकाः' इति बहवः प्रयुञ्जते। 'सुधार' शीर्षकलेखे मुहुः प्रायुज्यत। 'स्वकीयां ढक्कां स्वयं वादयन्तः' (प्राध्यापकाः) (Beating their own drums) (मधुरवाणी ७ वर्ष ४ अङ्क)।

---

१. गुर्जरा अत्र 'निर्मञ्छन्'मिति प्रयुञ्जते (७ वर्षे ४ अङ्क, मधुरवाणी)

धनादेशपत्रम् (मनीआर्डर), पत्रप्रेषणां (डाक), प्रयुञ्जन्तोऽपि V.P. प्रेषणस्य सूचनां ददति। प्रान्तीयताऽपि संस्कृते प्रचलिता। वङ्गीया: सम्भ्रान्तपुरुषा:, लुक्कायितं कुर्वन्ति। दण्डायमाना: शून्ये उत्तोलयन्ति। पुरा 'लेख:' इति लेखनक्रियायां लेखे वाऽयं शब्द: प्रायुज्यत, साम्प्रतं 'निबन्ध'- पर: प्रयुज्यते। 'संस्कृतभाषाया लेखा अपि तैर्लिखिता:' 'लेखस्याभ्यर्थनायामवश्यं लेखं दत्तवन्त:' इत्यादि। 'लेखक' शब्दो लिपिजीवके, किन्तु साम्प्रतं रचनाचतुरे। यथा 'ते सिद्धहस्ता लेखका आसन्' (सूर्यो.)। 'संस्था' शब्द: स्थितिवाचक: किन्तु साम्प्रतं सङ्घटना 'बॉडी' पर्याय:। यथा–'राजसत्ताद्वारा नियुक्तसंस्थासु लोकसेवा सङ्घटिता' 'सहानुभूति:, समवेदना'।

एवं हि यथा-यथा विभिन्नभारतीयभाषासु लिखन्तो विद्वांस: संस्कृते साहित्यरचनां कुर्वन्ति, ते तत्तद्भाषापरिगृहीतानां तत्तदाशयसूचकानां शब्दानां तेषु तेष्वाशयेषु संस्कृते प्रयोगं विधाय भाषाया अस्या आयामान् विस्तारयन्तीति किमधिकं भाषिकीवित्सु।

***

# संस्कृतनिष्ठा हिन्दीशब्दावली

स्वातन्त्र्यप्राप्तेरनन्तरं भारतीयेन संविधानेन यथैव निर्धारितं यत् देशस्यास्य राजभाषा हिन्दी भविष्यति, तदिदमावश्यकमापतितं यद् हिन्द्यां प्रशासनस्य, विज्ञानस्य, वाणिज्यस्य अन्यान्यासां ज्ञानशाखानां च पारिभाषिका: शब्दा हिन्द्यां सङ्कलय्य सैषा भाषा समृद्धा विधीयेत। एतदर्थं भारतीय संविधानस्य ३५१ तमायां धारायां स्पष्टीकृतं यद् हिन्द्या: पारिभाषिकी शब्दावली प्रमुखत: संस्कृतभाषातो गौणतश्चान्याभ्यो भारतीयभाषाभ्य: परिगृह्येत। आसीदयं सुस्पष्टो भाषाया अस्या महत्त्वस्वीकार:। एतदनुसारं भारतराष्ट्रपतिना १९६१ तमे खिस्तीयवत्सरे वैज्ञानिक-पारिभाषिक-शब्दावलीआयोग एक: समस्थाप्यत येन विविधज्ञानशाखानां शब्दा: प्रमुखत: संस्कृतस्य विपुलाद् ज्ञानभाण्डागारात्सङ्कलय्य प्रकाशिता:। एतस्मात् पूर्वं डॉ. रघुवीर इत्याख्येन विदुषा स्वकीये बृहदाकारे शब्दकोषे ज्ञान-विज्ञान-वाणिज्य-प्रशासनादिविविधविषयका: परोलक्ष्यं पारिभाषिकशब्दा: संस्कृतस्य पुरातनवाङ्मयात् कौटिलीयार्थशास्त्र-शुल्बसूत्रायुर्वेदरसायनसङ्गीतज्यौतिषगणितादिशास्त्रग्रन्थेभ्यश्च विचित्य सङ्कलिता अभूवन्।

विश्वस्मिन् कतिपया एव भाषा: सन्ति तथाविधा यासु समस्तस्यापि मानवीयज्ञानस्य वाचका: शब्दा उपलभ्येरन्। येषु देशेषु ज्ञानविज्ञानयोर्विवेचनं, मन्थनं च भवति तेषामेव देशानां भाषासु तत्तद्विषयवाचका: शब्दा: समुद्भवन्ति।

एविधा: समृद्धा भाषा: ''पुस्तकालयभाषा:'' (Library Language) इत्याख्यायन्ते भाषिकीविद्भि:। संस्कृतं हि पुरातनी पुस्तकालयभाषा। ज्ञानविज्ञानशाखा-समुद्ररूपा सेयं भाषा पर:सहस्रं वर्षेभ्यो विश्वगुरोर्भारतस्य ज्ञानं जगति प्रसारयन्ती विभ्राजत इत्यस्या महत्त्वं भाषाशास्त्रिणो जगति प्रसेधितवन्त एव। अस्यां हि भाषायां विविधविषयका: शब्दा वेदकालादेवोपलभ्यन्त इति सर्वा एव भारतीया भाषा अस्या भाषाया अधमर्णा:। एवं हि समस्ता पारिभाषिकी शब्दावली संस्कृतादेव भारतीयाभिर्भाषाभि: परिगृहीता।

अपरं चास्या महत्त्वमभूद् यत्पाणिनिना भगवता यद् व्याकरणमस्या निरमीयत तस्मिन् धातुभ्य: प्रत्ययान् संयोज्य तत्तादृशार्थकान् शब्दान् व्युत्पादयितुमेका समादरणीया पद्धतिरन्तर्निहिताऽस्ति। पद्धतिमिमामाश्रित्य तत्तदर्थवाचका: शब्दा निर्मातुं तूर्णमेव शक्यन्ते। येषामर्थानां वाचका: शब्दा न पुरातने वाङ्मये समुपलब्धास्तत्कृते आयोगेन नवीना: शब्दा: संस्कृतभाषाया व्याकरणमाधृत्यैव निर्मिता:।

तस्यास्य संस्कृतभाषामहिम्न एवेदं विजृम्भितं यदद्य पर:सहस्रं संस्कृतशब्दा हिन्दीभाषाया अन्यान्यभाषाणां च शब्दकोषेषु पाठ्यग्रन्थेषु च विलसन्ति, तानेवाधीत्याद्य छात्रा: कलाविज्ञानविधिवाणिज्यादिपरीक्षा उत्तरन्ति। किं नेदं हर्षावहं संस्कृत-विदुषां यदस्या भाषाया: ऊर्ध्वाधर-(Vertical)-पश्चबाह्यगलजालिका (Posterior External Jugular Plexus) दोलन (Oscillation)-आन्तर नोदक (Impeller)-प्रभृतय: शास्त्रीयशब्दा विज्ञानपुस्तकेषु, सिद्धदोष (Convict)-साक्ष्य (Evidence)प्रभृतय: शब्दाश्च विधिपुस्तकेषु समग्रेऽपि देशे प्रसृता अद्यत्वे? अयमासीदस्या एव भाषाया महिमा येन त्वरितमेव चतुर्लक्षसङ्ख्याका: शब्दा हिन्द्यै प्रदत्ता यद्बलाच्च सर्वोऽपि विश्वस्य ज्ञानराशिरद्य हिन्द्यां समानीयतेऽनुवादादिविधया।

एवं हि गीर्वाणगिरा सेयमादिमादेव कालाद् भारतस्यास्याजरामरं पीयूषस्त्रोतोऽस्ति यन्महिम्ना भारतं जगद्गुरुत्वपदवीमधिरुरोह, साम्प्रतमपि च विश्वस्मिन् महामहिमशालि सुखासनं बिभर्ति।

***

# ललितनिबन्धाः


१. किन्तोः कुटिलता

२. बालकभृत्यः

३. हीरकः

४. मकारमहामेलकम्

५. रूप्यकरामस्यात्मकथा

६. श्रीहनूमतः आदर्शचरितम्

७. हंसवाहना सरस्वती मयूरवाहना कथं जाता

८. भारतीयं भोजनशास्त्रं शष्कुली 'जलेबी' च

९. विच्छित्तिवैपुल्यं विविधा विधाश्चाभिव्यक्तेः

१०. मृत्यो! त्वमागतोऽसि

११. अपि नाम सेयमव्यावहारिकी ?

# 'किन्तोः' कुटिलता

कुटिलेनामुना 'किन्तु' ना कियत्कालात्क्लेशितोऽस्मि। यत्र यत्राहं गच्छामि तत्र तत्रैवास्य शत्रुता सम्मुखस्थिता भवति। अस्य 'किन्तोः' कारणात् कस्मिन्नपि कार्ये सफलता दुर्घटास्ति। बहून् वारान् दृष्टवानस्मि यत्कार्यं सर्वथा सज्जं सम्पद्यते, सर्वप्रकारैः सिद्धिर्हस्तगता भवति, यथैव सफलताया मूर्तिः सम्मुखमागच्छन्ती विलोक्यते तथैव क्रूरोऽयं किन्तुर्मध्ये प्रविश्य सर्वं कार्यं विनाशयति।

राज्यतो लब्धाया भूमेरभियोगो बहोः कालान्न्यायालये चलति स्म। मम पक्षात्सर्वाण्यपि आवश्यकानि प्रमाणानि यथायथं दत्तान्यभूवन्। राजसम्भावितानां प्रामाणिकव्यक्तीनां साक्ष्यमपि मत्पक्षे समभवत् यत् सेयं भूमिरभियोक्तुः (मुद्दई) वंशजानामेवाधिकारेऽस्माभिरद्यावधि विलोकितास्ति। द्रव्यबलिप्रदानात्सन्तुष्टेन वाक्कीलदेवेनापि मह्यमभयदानं दत्तं 'यत्प्रमाणानां बलेन सेयं भूमिरवश्यं भवदधिकारभुक्ता भवेत्। न भवता कथञ्चिदपि भेतव्यम्'।

अस्मिन्नभियोगे अद्यैव भाग्यनिर्णयो भावी आसीत्। दृष्टं मया-प्राड्विवाकमहोदयो द्विरावृत्ते चक्षुषी (सोपनेत्रे) दधत् न्यायसिंहासनमलङ्करोतीति। देशीयसज्जनः सोऽयं शिक्षाविभागस्योच्चतमोपाधिनाऽलङ्कृतः। राजनियमनिष्णाततासूचकान्यपि कानिचिदक्षराणि नाम्ना सह सम्बद्धानि। उक्ताभियोगे निर्णयं श्रावयन्नयमवोचत्- 'वयं पश्यामो यदभियोक्तुः पक्षादावश्यकानि सर्वाण्येव प्रमाणान्युपस्थितानि सन्ति। राजतो लब्धाया भूमेर्दानपत्त्रमप्युपस्थापितमस्ति। न्यायालयेन परिज्ञातं यत् इयं भूमिरभियोक्तुरधिकारभुक्ताऽस्ति..........'

अहं निश्चिन्तताया एकं शान्तं निश्वासममुचम्। मया सर्वथा स्थिरीकृतं यत् भाग्यलक्ष्मीरनुपदमेव मे कन्धरायां विजयमाल्यं प्रददातीति। परं प्राड्विवाकमहोदयः पुनरग्रे प्रावोचत्- '.......................'किन्तु' राजस्वविभागस्य (रेवेन्यूवि) प्रधानः किलैकोऽधिकारी एतद्विरोधे एकं पत्रं प्रेषितवानस्ति। एतदुपर्यपि लक्ष्यदानमावश्यकं मन्यामहे'।

मम सर्वोऽप्युत्साहः पलायाञ्चक्रे। 'किन्तु' कुन्तो ममान्तःकरणं समन्तात्कृन्तति स्म। निजहृदयमवष्टभ्य न्यायं प्रशंसन् गृहमागमम्।

अद्य कालेजस्य भाग्यविधाता कालेजं निरीक्षितुमागमत्। सर्वेषामपि महाध्यापकानाम् (प्रोफेसर) अध्यापनकार्यं प्रेक्षाञ्चक्रे, सहैव च निजहस्तगतयोर्निग्रहाऽनुग्रहशक्त्योरपि स्थाने स्थाने परिचयं प्रादात्। मम श्रेण्यामागत्य विद्यार्थिनां परीक्षामकरोत्, गतवर्षाणां परीक्षापरिणाममवालोकयत्। नानाविधसंलापनिकषे ममापि च परीक्षामकरोत्। अन्ते ससन्तोषमवादीत्- 'भवतः कार्यं प्रशंसनीयमवलोकयामि। भवत्सदृशो विद्वान्

अवश्यमभिनन्दनीयः...........'

अहं प्रसन्नताया अभिमुखं मुखं यावत्करोमि तावदेव 'किन्तु ' कुठारः प्राचलत्। सोऽग्रे अवदत्-....... 'किन्तु' विश्वविद्यालयस्य नियमः सञ्जातोऽस्मि यत् इतः परं प्रत्येकविषयस्याध्यापकः एम. ए पदकाङ्कित एव भवेत्'

मम हर्षसागरः शुष्कोः भूत्वा मरुरूपे पर्यणमत्।

पश्याम्यहम्- एष कुटिलः 'किन्तु' दूरदूरपर्यन्तमप्याक्रमणं करोति। ऋषिमहर्षीणामाश्रमानप्यवाप्य तेषां निभृतशास्त्रव्यासङ्गेऽपि हस्तक्षेपं विदधाति। महषिर्व्यासो भगवता गणपतिना स्वीयं महाभारतं लेखयन्नासीत् । सरस्वती कदाचिदन्यत्र 'अन्तःस्रोताः' भवेत् परम् इह तु अनवरतं सरस्वतीप्रवाहः प्रवर्तमान आसीत्। एवंविधे प्रखरप्रवाहेऽपि 'किन्तु' महोदयो वज्रकीलायितोऽभवत्। प्रवाहपूरे निमज्जनस्य का कथा सहस्रार्जुन इव स तं प्रवाहमेव निरुणद्धि स्म। महर्षिणा लेखितम्-

**'सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः।'**

सत्यतायाः पणबन्धपुरस्सरं कामिन्यै कनकाय चेत्युभाभ्यामेव स प्रशंसापत्रमर्पयाञ्चकार। परिलक्षिताः स्युः काममेतयोः परःशता दोषा परम् इह तु द्वयोरेव पूर्णप्रशस्तिप्रदानकार्यं परिसमाप्तमेवासीत्, एतस्मिन्नेवान्तराले 'किन्तु' महाशयः समुपस्थितोऽभूत्-

**''किन्तु' मत्ताङ्गनापाङ्गभङ्गिलोलं हि जीवितम्।।'**

प्रक्रान्तः स प्रवाह एव परिवर्तनं लेभे। जीवनस्यास्थिरतां सूचयन् 'किन्तु' महोदयः कनककामिन्योः सर्वां कमनीयतामेव निर्मूलयामास।

दृष्टं मया-यदेष 'किन्तु' दया-धर्मादिष्वपि अनधिकारचेष्टातो न विरतो भवति। प्रातःकालस्यैव कथास्ति-धर्मव्यवस्थापकमहोदयस्य समीपे एको दीनः करुणक्रन्दनपुरस्सरं न्यवेदयत्- 'महाराज! नववार्षिकी मे कन्या । जातस्य तस्या विवाहस्य अद्य तृतीयो दिवसः। नाद्यापि चतुर्थीकर्म सम्पन्न येन विवाहः पूर्णः परिगण्येत। तस्या पतिः सहसाऽम्रियत। हा हन्त! तस्या अबोधबालिकाया अग्रे किं भावि? अस्यत्कर्मसंख्यावृद्धौः किं ममोच्चकुलमपि सहायकं भविष्यति? आज्ञपयन्तु श्रीमन्तः किं मया साम्प्रतं कर्तव्यम्'

पण्डितमहोदयो गभीरतममुद्रयाऽवोचत्- 'अवश्यमेतत् दयास्थानम्। वर्तमानकाले समाजस्य भीषणपरिस्थितेः पर्यालोचने इदमेवोचितं प्रतीयते यत् एवंविधस्थले पुनर्विवाहस्य व्यवस्था दीयेत............. 'किन्तु' वयं मुखेन कथमेतत्कथयितुं' शक्नुमः । प्राचीनमर्यादापि तु रक्षितव्या स्यात्।

कुत्रचित् सोऽयं 'किन्तु'र्नितान्तमनुतापं जनयति। अनेकवर्षाणां परिश्रमस्य फलस्वरूपं मन्निर्मितमेकं नवीनं संस्कृतपुस्तकमादाय साहित्यमर्मज्ञस्य एकस्य देशनेतुः समीपेऽगच्छम्। मया हि पुस्तकमिदं प्राचीननवीनसमययोर्विविधविभूतिभिः सुतरामलङ्कृतमासीत्। मुद्रणसौष्ठवे चित्रयोजने चापि पूर्णमवधानं दत्तमासीत्।'नेतृ' महोदयः

पुस्तकस्य गुणान् सम्यग्परीक्ष्य प्रसन्नः सन्नवोचत्– 'पुस्तकं वास्तव एव अद्‌भुतं निर्मितमस्ति। बहुकालानन्तरं संस्कृते एवंविधा नवीनता दृष्टिगताऽभवत्। ....'किन्तु' मत्संमत्यां तदिदं पुस्तकं भवान् संस्कृते न विलिख्य यदि हिन्दीभाषायामलेखिष्यत् तर्हि सम्यगभविष्यत्'।

गृहं प्रतिनिवर्तमानोऽहं 'किन्तु' कृताया अस्या मर्मवेधकशिक्षाया उपरि समस्तेऽपि गृहमार्गे कर्णं मर्दयन्नागच्छम्। अनेन 'किन्तु' ना मह्यं सा शिक्षा दत्तास्ति यद्यहं सत्पुरुषः स्यां तर्हि पुनरस्मिन्मार्गे पदनिक्षेपस्य नामापि न गृहणीयम्।

कदाचित् कदाचित्त्वयं क्रूरः किन्तुः मुखस्य कवलमप्याच्छिनत्ति। स्वल्पदिनानामेव वार्तास्ति– आयुर्वेदमार्तण्डस्य श्रीमतः स्वामिमहाभागस्य औषधिं निषेव्य अधुनैवाहं नीरोगोऽभवम्। अस्मिन्नेव समये मित्रगोष्ठ्या निमन्त्रणं प्राप्नवम्। भोजगोष्ठयां समवेतुं केवलं मित्राणामेवाग्रहोऽभवदिति कथङ्कारमहं वच्मि, ममापीच्छाशक्तौ प्राबल्यस्य प्रवाहः पूर्णमात्रायां प्रवर्द्धमान आसीत्। अहं स्वामिमहोदयमप्राक्षम्– 'किमहं तत्र गन्तुं शक्नोमि ?' उत्तरमलभ्यत– ''तादृशी हानिस्तु नास्ति 'किन्तु' गरिष्ठवस्तुनो भोजने अवधानमावश्यकम्। अधुनापि दौर्बल्यमस्ति''।

उत्साहस्य ज्वाला या पूर्वं प्रचण्डतमा आसीत् अर्द्धमात्रायां तु तत्रैव निर्वाणाऽभूत्। अस्तु, येन केनापि प्रकारेण भोजनगोष्ठ्या विशेषाधिवेशनेऽस्मिन् सम्मिलितस्त्वभवमेव। भोजनपीठे अधिकारं कुर्वन्नेवाहमपश्यं यत् सर्वाङ्गपूर्णा एका भोज्यव्यञ्जनानां प्रदर्शिनी सम्मुखे वर्तते इति। नानाप्रकारैभोज्यपदार्थैः पत्रावलिः पूर्णतया पूर्णासीत्। वे सवाराणां गन्धेन उद्ग्रीवतां गता रुचिः तां 'वर्णमालाम्' नहि नहि तां 'व्यञ्जनमालाम्' निःशेषतां नेतुं लालायिताऽभवत्। धीरगम्भीरक्रमेणाहं भोजनकाण्डस्यारम्भमकरवम्। पर्यन्ततो दृष्टिं प्रसार्य दृष्टं मया यत् लोकाः द्विबाहवः सन्तोऽपि सहस्रबाहुतामापन्ना भोजनोपरि भयङ्कररूपेणाक्रमणं कृतवन्तः सन्ति। सर्वतोऽपि तन्मयतया तदेतद् भोजनकाण्डं प्रचलितमासीत्। भोज्यपदार्थानां प्रशंसैव कदाचित् कदाचित् मौनभङ्गमकारयत्।

एकः सुहृदवोचत्– साधु साधु ! सन्तानिकामोदकाः कीदृङ्मनोहराः सन्ति।' अहमपि मोदकस्यैकं ग्रासमगृह्णाम्। तस्य सरसतायाः स्वादिष्ठतायाश्च विषये किं वा वक्तव्यमासीत् ? कण्ठमारभ्य पाकाशयपर्यन्तं स्वादसौरभयोरेकोऽविच्छिन्नः प्रवाहः प्रवर्तमानोऽभवत्। स्वादसूत्रेण संदानितोऽहं यथैव द्वितीयं ग्रासमगृह्णां तथैव स्वामिमहोदयस्य 'किन्तुः' मम कण्ठनालिकामरुधत्। मुखस्य ग्रासो मुख एवाऽभ्राम्यत्। अग्रे गन्तुं नाशक्नोत्। 'किन्तोः' भीषणविभीषिका प्रत्येकवस्तुनि गरिष्ठतां सम्पाद्य भोजनं तत्रैव समाप्तमकरोत्। इदानीम् 'आघ्राणे अर्द्धभोजनम्' इति न्यायानुसारं भवन्तश्चेन्ममाश्वासनं विदध्युस्तर्हि कथैवान्यादृशी।

अयं 'किन्तु' रङ्गेऽपि भङ्गसम्पादकमेकव्यर्थं शस्त्रम्। अद्य संस्कृतकालेजस्य नाट्यसंघो नागरिकनाट्यभवने प्रसिद्धमेकमभिनयं प्रदर्शयिष्यति। तत्प्रबन्धकर्तॄणां मन्मित्राणां महानाग्रहोऽभूत् यदहमस्मिन्नभिनयविलोकनेऽवश्यं सम्मिलितो भवेयम्। सायंकाले भोजनं परिसमाप्य मया गृहिणीं प्रति प्रोक्तम्– 'अहमद्य अभिनयं विलोकयितुं यास्यामि'।

गम्भीरतायाः सुदृढं प्राचीरमुल्लङ्घ्य कष्टादुत्तरमलम्भत 'किन्तु' शीघ्रं प्रतिनिवर्तनीयम्'।

नाट्यभवने वैत्रपीठमधितिष्ठन्नहं नेत्राभ्यामभिनयं व्यलोकयम्, परं हृदये 'किन्तु' महोदयस्य उत्तालनृत्यं प्रवर्तमानमासीत्। बहून् वारान् निकटगतां घटिकादेवीं समयमपृच्छम्। अभिनयसमाप्त्युत्तरं यथैव प्रहसनमेकम् (नकल) प्रारभ्यत तथैवाहं प्रहसनमेतददृष्ट्वैव आसनादुदतिष्ठम्। 'किन्तु' जनिता चिन्ता मां गृहाभिमुखमकरोत्।

अहं देशसेवां कर्तुं गृहाद् बहिरभवम्। मया निश्चितमासीत् 'एतावन्ति दिनानि स्वोदरसेवायै क्लिष्टोऽभवम्, इदानीं कियन्तं कालं देशसेवायामपि लक्ष्यं ददामि'। यथैवाहं मार्गेऽग्रसरो भवामि तथैव मम बाल्याध्यापकमहोदयः सम्मुखगोऽभवत्। मास्टरमहोदयेन प्रस्थानहेतौ पृष्टे सति सम्पूर्णसमाचारनिवेदनं ममाऽऽवश्यकमभूत्। अध्यापकमहोदयः प्रावोचत्– 'तात, सर्वमिदं सम्यक्। किन्तु स्वगृहाभिमुखमपि किञ्चिद्विलोकनीयं भवेत्। येषां भरणपोषणं भवत्येवायत्तम् तान् किं भवान् निराधारमेव निर्मुच्य स्वैरं गन्तुमर्हेत्?'

पुनः किमासीत्। अत्रैव परोपकारविचाराणाम् इतिश्रीरभूत्। 'किन्तु' महोदयेन देशसेवायाः सर्वापि विचारपरम्परा परपारे परावर्त्यत। गृहाभिमुखं मुखं कुर्वन् तस्मात् स्थलादेव परावर्तिषि।

सुभगतमानि प्रावृषो दिनान्यासन्। मया विचारितम्– 'माधवपुरस्थं 'रणस्तम्भवर' (रणथम्भौर) दुर्गं दृष्ट्वा सम्प्रति मनो विनोदयामि। निरन्तरवर्षाभिर्दुर्गस्य समन्तात् समग्रापि सा पर्वतमाला हरितहरिता सम्पन्नासीत् स्थानस्थानतः प्रवर्तमानानां निर्झराणां नयनमनोरमं दृश्यं, श्रवणमनोहरः स्वरश्च अपूर्व एवासीत्। मार्गगताभिर्बकुल–कदम्बतरुश्रेणिभिस्तत्स्थानं केवलं सुगन्धितमेव नासीत्, अद्भुतं मनोहरमप्यभूत्। अहमेकस्मिन् राजकीये विद्यालये निवासमकल्पयम्।

मया हि तत्रत्यं प्रधानाध्यापकं प्रति पर्वतोपरि गमनस्य स्वीयेच्छा प्रकटीकृता। अध्यापकमहोदयोऽवदत्– 'यथेच्छं गम्यताम्। 'किन्तु' अस्मिन्समये अत्र सिंहानां भयं किञ्चिदधिकं भवति। अत एव सावधानतया गन्तव्यं स्यात्।'

अहं हि पर्वतस्य शोभां सावधानाभ्यां नयनाभ्यामवश्यमपश्यं परं 'मास्टर'– निर्दिष्टस्य 'किन्तु' महाशयस्य ध्यानं क्षणमपि हृदयान्न पृथगभूत्। वृक्षलतानां निबिडगुल्मेषु यत्र यत्रान्धकारो व्यलोक्यत तत्र तत्र सिंहः कदाचिदुपस्थितो न भवेत्परमयं क्रूरः 'किन्तु' सिंहस्य रूपं धृत्वा प्रतिसमयं मां मिलितुमिवाग्रेसरोऽभवत्। अस्तु, यथाकथञ्चित् दुर्गमिदमालोक्य आवासस्थानं तमेतं विद्यालयं विमनाः सन् परावृत्तोऽभवम्।

अद्यैव न, बाल्यकालादारभ्यैवायं 'किन्तु' मामनुप्लवमानः क्लिश्नाति। अहं यस्मिन्काले पाठशालायामपठम्, बहुधा वैदेशिका विद्वांसः पाठशालां द्रष्टुमागच्छन्। एकदा एकः संस्कृतज्ञो गौराङ्गसज्जनोऽस्माकं पाठशालां विलोकितुमाययौ। स ह्यस्मच्छ्रेणिस्थान् सर्वानेव विद्यार्थिनो यथाक्रमं प्रश्नानकरोत्। सर्वेषामेवोत्तरेषु यत्किञ्चिदशुद्धिरभवत्। दैवसंयोगान्ममोत्तराणि सर्वाण्येव समञ्जसान्यभूवन्। प्रश्नकर्ता प्रसन्नोऽभवत्। प्रतिवर्षं भाविनि

पारितोषिकवितरणे मदर्थं विशेषपारितोषिकप्रबन्धोऽक्रियत। पारितोषिकवितरणस्य कार्यं यथानियमं प्रारभ्यत। मञ्चिका (मेज)स्थानि मत्पारितोषिकपुस्तकानि दर्शकेभ्यो दूरादेव सूचनामदुर्यत्तानि अन्यापेक्षया उत्तमान्यधिकानि च। पाटलवर्णेन कौशेयदोरकेण स्वस्तिबन्धे बद्धानि, स्वर्णाक्षरमण्डितानि पुष्ट-सुदृश्यान्येतानि पुस्तकानि दूरादप्यालोक्य अहमात्मनः प्रसन्नतामतिकष्टेन गोपयितुं प्राभवम्। इमानि पुस्तकानि नासन् मद्योग्यतासूचकान्येकैकं प्रमाणपत्राण्यभूवन्। मम सहाध्यायिष्वेव किम्, उच्चश्रेणिस्थेषु विद्यार्थिष्वपि मम योग्यतायाः प्रसिद्धिः प्रभावश्च प्रासरत्।

पारितोषिकवितरणार्थं यथैव मम नामाऽघोष्यत तथैव अध्यक्षमहाभागैः पारितोषिकोपरि लिखितं मन्नामधेयमनुवाच्य पुस्तकान्येतानि हस्तेनोत्थापितानि। अध्यक्षमहोदयास्तद्दिनघटनाया उल्लेखं कुर्वन्तः प्रोत्साहनार्थं मम प्रशंसामप्यकुर्वन्–'बालकोऽयं बुद्धिमान् परिश्रमी च। यद्येवमेव नियमपूर्वकं पठेत्तर्हि एकस्मिन्दिने यशस्वी स्यात्'।

मम प्रसन्नताया नासीत्परिसीमा। मम गणिताध्यापकमहोदयाः छात्रोपस्थितिपुस्तकस्य (क्लास रजिस्टर) उपरि त्राटकं निबध्नन्तः समीप एवाऽवस्थिताः आसन्। संयोगवशादेतेषु दिनेष्वेते ममोपरि नासन् प्रसन्नाः। अत एव तदुत्तरे एतेऽब्रुवन् –'प्रतीयते त्वेवमेव। 'किन्तु' अस्मिन्वर्षे अस्य अनुपस्थितयोऽधिकाः सन्ति।'

अध्यक्षमहोदयाः पुस्तकानि यथापूर्वं पुनर्मञ्चिकायामेव व्यसृजन्, अवोचंश्च –'अग्रे नामान्युच्यन्ताम् यावदस्योपरि विचारं कुर्मः'।

कामं मम हितायैव भवेत्, परमहं 'किन्तु' कृतमिमं मर्माघातकमाघातं नाऽपारयं सोढुम्। कस्मैचिदपि किञ्चिदनुक्त्वा विषण्णमना गृहमागच्छम्।

हन्त हन्त सोऽयं 'किन्तु' हतको वेगेन धावन्त्यां वाष्पशकट्यामपि अनुधावनं न त्यजति। एकदा मोहमयीतो जयपुरं प्रति परावर्तमानोऽभूवम्। तेषु दिनेषु केवलं मोहमय्यामेव किं भारतस्य बहुषु प्रान्तेषु ग्रन्थिज्वरस्य (प्लेग) प्रकोपोऽभवत्। वाष्पशकट्याः स्थानस्थानेषु यात्रिणां शरीरपरीक्षाऽभवत्। एकस्मान्नगरादागतो रोगी अन्यस्मिन्नपि नगरे रोगं न सङ्क्रामयेदेतदर्थं बह्वो यत्नो अक्रियन्त। प्रधानस्थानेषु (जंक्शन) 'क्वारंटाइन' स्य विशेषप्रबन्धोऽभवत्। द्राक्तरमहोदया वाष्पयानादवतीर्य यात्रिणां रोगपरीक्षामकुर्वन्। किञ्चिद् रुग्णमपि यात्रिणं यात्रातो न्यवारयन्। तं हि चिकित्सया नीरोगं कृत्वा तदनन्तरमग्रे गमनस्याऽनुमतिं प्रददुः।

स्वाभीष्टस्थानप्राप्तेः पूर्वं निराधारमेव मध्येमार्गं निरोधः प्रत्येकयात्रिणो दुःखाय भवति। विशेषतोऽस्मिन् भयङ्करे प्लेगावसरे। प्रधानस्थितिस्थाने (जंक्शने) यथैव बाष्पशकटिर्व्यश्राम्यत् तथैव तस्या द्वाराणि यन्त्रनिबद्धानि (चाबी ) अक्रियन्त। वाष्पयानीयदण्डपुरुषाः (रेलवे पुलिसमैन) सर्वानपि यात्रिणः पङ्क्तिबद्धान् कृत्वा शकट्याः सुम्मुख एव अवास्थापयन्। डाक्टरमहोदयः, कदाचित् कदाचित् मैडममहोदयापि एकैकयात्रिणो नाडीपरीक्षामकरोत्। निर्निमेषया गृध्रदृष्ट्या च बाह्यपरीक्षां व्यदधात्। ततः परीक्षातः प्रतिनिवृत्तेषु यात्रिषु

वाष्पयानारोहणस्यानुमतिरदीयत। यो यो यात्री परीक्षासरितमुदतरत् स स एव 'जीवन्नरो भद्रशतानि पश्येत्' इतीव विचारयन् सवेगं धावमानः प्रसन्नेन चेतसा निजं स्थानमध्यतिष्ठत्। यस्योपरि डाक्टरमहोदयस्य यत्किञ्चिदपि रोगभ्रमोऽभवत् स एव पंक्तितः पृथगक्रियत। शकटीतस्तस्य वस्तुसम्भारः सरभसमवातार्यत। ततो वाष्पशकट्यां गतायां सर्वेऽपि रुग्णाः रुग्णाभासा वा चिकित्सार्थं नियतनिवासेऽनीयन्त। तत्र हि चिकित्सया नीरोगतायां जातायां स हि यात्री स्वगृहमगच्छत्, अन्यथा यमगृहं तु निश्चितमेव।

यस्मिन्समये डाक्टरमहोदयस्य कराङ्गुलयो यात्रिणो नाडीमस्पृशन् तस्मिन् समये बहूनामपि वीराणां हृदयानि धकधकायन्ते स्म। भयात् रक्तगतेर्निरोधेन शीतलता कामं विरलानां भवेत् परं हृदयरक्तस्य गतिवृद्ध्या ऊष्माधिक्यं बहूनामेवाऽभवत्। अभावेऽपि ज्वरस्य पूर्वरूपमिव प्रतीयते स्म।

अस्यैव परीक्षावक्रस्य तीक्ष्णधाराया उपरि ममापि परीक्षाऽभवत्। डाक्टरमहोदयो मम सम्मुखमागत्य एकवारं माम् आमूलचूडं तीक्ष्णदृष्ट्यापश्यत्। भाग्यवशादयं देशीयसज्जनोऽभवत्। मम यात्रापत्रम् (टिकिट) दृष्ट्वा अवदत्- 'किं मोहमयीतः समागच्छति भवान्?' मम हृदयस्य गतिर्निरुद्धाऽभूत्। मोहमयी प्लेगरोगार्थं प्रसिद्धैव। अत एव सोऽयं प्रश्नो मन्निमित्तमवश्यं सांघातिकोऽस्तीति निश्चितं मया। पुनर्दृढतामधारयम्। 'नैवम्, ये ये यात्रिणो मयैव सह मोहमयीतः समागताः सन्ति तेभ्योऽपि डाक्टरमहोदयो गन्तुमनुमतिमधुनैव दत्तवानस्ति। किं मे भयम्'। अस्तु मम नाडीपरीक्षाऽक्रियत। परीक्षोत्तरं रुग्णपङ्क्यामपि मे निवेशो नाभूत्, नीरोगतां वा निश्चित्य शकटिमारोढुमनुमतिरपि मे नाऽदीयत। त्रिशङ्कुरिव सन्देहशङ्कूपरि मध्यलम्बितोऽभूवम्।

सर्वेषां यात्रिणां परीक्षातः प्रतिनिवृत्ते डाक्टरमहोदये सन्देहसन्दंशपतितानां मत्सदृशानां विचारः पुनरारभ्यत। एतस्मिन् समयान्तराले मम हृदयदशा कीदृशी वा भवेदिति पाठकैः स्वयमनुमातव्यं स्यात्। अस्तु,

एवंविधसन्देहपतिता ममान्ये सहचरा अस्मिन्पुनर्विचारे क्रमक्रमेण अव्याहतिमलभन्त। क्रमानुसारं ममापि वारः समायातः। अहं हि अत्यावश्यककार्याणां हानेः पुटं प्रदाय स्वस्य शिक्षितताया गौरवमपि डाक्टरमहोदयस्य मस्तिष्के स्थापयितुं यत्नमकरवम्। डाक्टरमहोदयोऽपि भद्रोचितया भाषायां मां सान्त्वयन्नवोचत् 'न भेतव्यं भवतः। भवान् हि स्वस्थः। न काऽपि हानेः सम्भावना...........'

मम हृदयं प्रमोदाप्लुतमभवत्, परम् अस्मिन्नेव समये 'किन्तु' क्रकचः सहसैव निष्पपात। डाक्टरोऽवदत् '........किन्तु' केवलमद्यमात्रं तिष्ठतु भवान्। ज्वरपूर्वरूपस्य सन्देहरेखेव किञ्चिद् दृश्यते'।

साधु रे भाग्य साधु! इयन्मात्रान् यात्रिणः परित्यज्य सोऽयं सन्देहपर्वतः किं ममोपर्येव पतनायाऽभूत्?

मयाऽनुभूतमस्ति यदयं कुटिलः 'किन्तुः' नानादेशेषु नानारूपाणि सन्धार्य गुप्तं

विचरति। यथैव लोकानां कार्यसिद्धेरवसरः समुपतिष्ठते तथैवायं प्रकटीभूय लोकानां कार्याणि यथावस्थितमवरुणद्धि।

अहं हि तत्प्रान्तीयैः कतिभिश्चित्प्रतिष्ठितपुरुषैः सह 'तानसा' जलबन्धं द्रष्टुमगमम्। इदं स्थानं मोहमयीनगरात् त्रिंशत्क्रोशानुमितं दूरमस्ति। वाष्पशकट्या मोटरयानैर्वा तत्र गच्छन्ति जनाः ।स्थानमिदमतिसुन्दरं स्वच्छतमं च। सम्पूर्णं मोहमयीनगरं पानीयमस्मादेव स्थानात्प्राप्नोति। अत एवास्य विस्तारोऽपि सहजतयैवानुमातुं शक्येत। मरुत्तरशकटिस्थिता वयं मार्गस्य मनोहरं दृश्यमवलोकयन्तो यावत् प्राप्नुमस्तावदेव भवान् सूर्योऽप्यस्ताचलमचुम्बत्। अतएव तत्स्थानीयवन्यदृश्यदर्शनस्य लालसा मनस्येव निगडनीयाऽभवत्। जलबन्धस्योपरि यः सुदृश्यः सेतुरासीत् तमारुह्यैव पर्यन्तवर्तिनां स्थानानां शोभा निरीक्षणीयेति सर्वसम्मत्या निश्चितमभूत्। वयं सेतोर्द्वारोपरि अगमाम, परं दृष्टं यत्तस्य द्वारं तालकेन पिनद्धम्। प्राहरिकैरुक्तम् 'एतस्य प्रबन्धकर्ता इदानीमेव मोहमयीं गतोऽस्ति। सायंकालोऽपि च सञ्जातः'।

अस्माकमतिखेदोऽभवत्। हन्त! एतावन्तं परिश्रमं कृत्वा इयद्दूरं प्राप्ता अपि, स्थानमपि च नावलोकितम्। अस्मान् विषण्णानवलोक्य एकः प्राहरिकोऽवदत् 'समीपे सर्वप्रधानस्य गौराङ्गाधिकारिणो निवासगृहमस्ति, स यदि वाञ्छेत्तर्हि भवन्तो द्रष्टुं शक्नुवन्ति' । आशाया अस्पष्ट इवाऽऽभासोऽस्माकं नेत्रयोरनृत्यत्। निवासस्य द्वार एव सोऽयमधिकारि महाभागोऽप्यमिलत्। सङ्क्षेपतः सर्वमात्मनो वृत्तं तस्मै निवेद्य सेतूपरि गमनस्यानुमतिं तस्मादयाचामहि। एङ्गलेण्डात्साम्प्रतमेवोपगतः साहबमहोदयः सभ्यतामभिनयन् आङ्ग्लभाषायामवोचत्- 'नो मैटर, यू मे सी इट' (न काचिद्वार्ता, भवन्त इदं द्रष्टुं शक्नुवन्ति।'

प्रम्लानमस्माकं हृत्कमलं प्रफुल्लभूत्। पूर्णतया हृत्कमलस्य विकासोऽपि न समाप्तोऽभूत्, एतावतैव साहबमहोदयः पुनरवोचत् 'बट दि मैनेजर इज नोट हियर।' (किन्तु प्रबन्धकर्ता अत्र नास्ति')

अस्माकं तदिदं कार्यमेकप्रकारेण पूर्णतया सम्पन्नमेवासीत् परं 'किन्तु'ना 'बट' रूपं धारयित्वा सर्वं विनाशितम्। अधुना विकटतम 'बट'जटासु निरुद्धा वयं गृहं प्रति परावर्तनमन्तरा किं वाऽन्यत्कर्तुं शक्नुयाम?

इदानीमेतस्य 'किन्तोः' द्वितीयरूपस्यापि परिचयः प्राप्यताम्। व्यतीतः कियाँश्चित्कालः- दिल्लीवास्तव्यो विद्योत्साही एको 'मुन्शी'महोदयः स्वधनेन संस्कृतस्य हिन्दीभाषायाश्चैकां ग्रन्थमालां प्रकाशयितुमैच्छत्। केषाञ्चिन्मित्राणामाग्रहेण कानिचित्प्राचीनपुस्तकानि स्वस्याऽपरिवर्तितप्राचीनरूपे ग्रन्थमालायां प्रकाशयितुं मयापि प्राहीयन्त। यतो हि तेन महाशयेन सूचितमासीत् यत् मूल पुस्तकं दृष्ट्वैव प्रकाशकाः पुस्तकप्रकाशनं स्वीकरिष्यन्तीति। अस्तु, व्यतीतोऽभूद् भूयान् कालः। न ग्रन्थमाला प्रकाशिताभूत, नापि तस्यां पुस्तकान्येतान्यमुद्र्यन्त। अहं कतिवारान् मुंशिमहोदयाय पत्रमलिखम्- 'यदि ग्रन्थमालाप्रकाशनस्य विचारः स्थगितो भवेत् तर्हि तानि मे पुस्तकानि परावर्त्यन्ताम्। यतः पुस्तकानि मे प्राचीनानि सन्ति। तेषां प्रतिलिपिरपि नाद्यावधि कर्तुमपारि'।।

मत्पक्षात् यथा यथा पत्राणां सेतुः अबध्यत तथा तथैव प्रकाशकमहोदयस्य निद्रा-नदी विस्तारमभजत्। अत एव तामुल्लङ्घ्य नैकस्याप्युत्तरमलभ्यत। पर्यन्ते मया लिखितम्- 'यद्यधुनापि उत्तरं न दीयेत तर्हि स्वयमहमागमिष्यामि। अहं यातायातेन भवाँश्च मन्मार्गव्ययप्रदानेन निरर्थकमेव क्षतिग्रस्तो भवेत्।'

अस्मिन् वारे नागराक्षरावगुण्ठितायामुर्दूभाषायामुत्तरं लब्धम्- 'जनाब पण्डित साहब! गिरन्थमाला बहुत जल्द शाया होने वाली है। चन्दा देने वालों की फहरिस्त में क्या आपका नाम भी दर्ज कर लिया जाए? हां, किताबें पुरानी बहुत सी हैं 'मगर' आपकी भेजी हुई कोई मालूम नहीं होती (ग्रन्थमाला शीघ्रमेव प्रकाशिता भवेत्। सहायता प्रदातर्णिां नामावलौ किं भवतोऽपि नामनिवेशः क्रियेत? आम्, प्राचीनपुस्तकानि बहून्युपस्थितानि 'किन्तु' भवत्प्रेषितं किमपि पुस्तकं न ज्ञायते)

अहं नैराश्यसागरे निमग्नोऽभूवम्। 'किन्तु'कराघातात् कदाचित् रक्षितोऽप्यभूवम्, परमस्मिन् वारे एतस्य 'मगर'स्य मुखात् पुस्तकानां रक्षा सुतरां कठिनेति निश्चितं मया।

अन्यत्परिचीयताम्। शेखावाटी-निवासिन एकस्य श्रेष्ठिमहोदयस्य समीपे कस्याश्चन सार्वजनिकसंस्थायाः कृते धनयाचनार्थं वयमगच्छाम। संस्थायाः लोकसेवाः संसूच्य धनार्थं प्रार्थनाऽक्रियत - यत् भवादृशा यदि सम्प्रति सहायतां न करिष्यन्ति तर्हि एतस्याः संस्थायाः परिचालनमितोऽग्रेऽसम्भवमिति।

सर्वमिदं श्रुत्वा श्रेष्ठिमहोदयेन निजप्रान्तीयभाषायामुक्तम्- 'म्हारे सायता देबा में के औंट है। 'पण' दो च्यार बरस ई को काम देखर देबो ठीक है' (सहायतां प्रदाने मम का विप्रतिपत्तिः, किन्तु द्विचतुर्वर्षाणि संस्थाया अस्याः कार्यं विलोक्य दानं सम्यक् स्यात्।)

अहो धन्येयं पातालस्पर्शिनी प्रतिभा!परिचालनं कठिनम्, अत एव तु सहायतां याचितुमागताः स्मः! श्रीमन्तः कथयन्ति द्विचतुर्वर्षाणि परिचलेत् ततः सहायतां दास्यामः'। निश्चितमस्माभिर्यत् अस्य पण'-बन्धस्याग्रे अस्माकं कापि शक्तिर्न प्रभवेत्।

एवंप्रकारैरयं 'किन्तुः' भिन्नभिन्नदेशेषु भिन्नभिन्नरूपाणि निर्माय स्वस्य प्रकटपरिचयं प्रददत् परिलोक्यतेऽस्माभिः। सत्यं चेत्पृच्छथ तर्हि अहमेतस्य 'किन्तु' कुठारस्य कठोरतया नितान्तमेव तान्तोऽस्मि। अहं वाञ्छामि यदेतस्याक्रमणात् सुरक्षितो भवेयम् परं नायं मां त्यक्तुमिच्छति। बहवो मार्मिका मामबोधयन् यत् 'त्वम् एतं सम्मुखा तं दृष्ट्वैव कथं वित्रस्यसि, कुतश्च एनमपसारयितुं प्रयतसे? किमेनं सर्वथा अहितकारिणमेव निश्चितवानसि? नेदं सम्यक्। पशुघातकस्य छुरिकापि पाशपतितस्य गलबन्धनं छित्त्वा समये प्राणरक्षां कुर्वती दृष्टा।' अहमपि सत्यस्यैकान्ततोऽपलाप न करिष्यामि। एतस्य कथनस्य सत्यताया मयापि परिचयः कदाचित् कदाचित् प्राप्तोऽस्ति-

मोहमयीतो जयपुरं परावर्तमानोऽहं काठियावाडीयमेलशकट्या समागच्छम्। मत्प्रकोष्ठे (कंपार्टमैण्ट) मरुदेशीय एकः श्रेष्ठिमहाभागोऽपि मम यात्रा स हचरोऽभूत्। प्रथमप्रथमं तु अस्माभिः शयनोपवेशनादेरसुविधाऽनुभूता परं स्वल्प एव काले यत्र येन स्थानमुपलब्धम्,

सर्वेऽपि यात्रिण इतस्ततः शयाना अभूवन्। एकस्मिन् पट्टे अहं श्रेष्ठिमहाशयश्चेत्युभौ उपविष्टावभूताम्। श्रेष्ठिमहोदयो निद्रादेव्या आवेशेन घूर्णमानमस्तकोऽभवत्। अहमपि तत्प्रभावान्निर्मुक्तो नासम्। श्रेष्ठी अवोचत्– शृङ्खलधारेण उपरि लम्बमानेऽस्मिन् पट्टे निरर्थकमेव द्वयोः क्लेशः स्यात्।

अहम् उपरि शयनमेव सुखकरं निरधारयम्। यतो हि दारोद्घाटने सति नीचैः पट्टोपर्येव यात्रिणां प्रथमाक्रमणं भवति। अस्तु, उपरि शयनीयं विरचयता मया दृष्टं यन्मम शिरः प्रान्ते बृहदेकं फलकरण्डकं निहितमस्ति, यद्धि हरितै रक्तैश्च मोहमयीकदलीफलैः पूरितम् यस्य चोपरि वस्त्रमेकमर्द्धावगुण्ठितं विद्यत इति। विमनस्कमिव दृष्ट्वा श्रेष्ठिसज्जनोऽब्रवीत्– 'यद्यसुविधा भवेत्तर्हि तु करण्डकमिदं नीचैरवतारयेयम्, अन्यथा कोणेऽस्मिन् तिष्ठत्वेतदपि। फलानि पक्वानि सन्ति। अतएव मर्द्दे कदाचिद्विकृतानि स्युः' । मया प्रोक्तम्– 'यथेच्छं तिष्ठतु। न मे काचिदापत्तिः। यस्मिन्काले जनसम्मर्दो भवति तदा पृष्ठपट्टकमात्रमुपधानीकृत्य निद्रादेवी सेवनीया भवति।'

परिणामे–उपरिपट्टे अहमस्वाप्सम्, नीचैर्निद्राणः श्रेष्ठिमहाभागो नासाध्वनिमारभत। प्रातःकाले आसीदधुनापि विलम्बः। परं तस्मिन्नेव समये श्रेष्ठिमहोदयः स्वकीयं वस्तुसम्भारं दृढतयाऽबध्नात्। शकटीतोऽवतरणस्य पूर्वरूपं सर्वेभ्यः प्रकाशयामास। खटखटात्कारे ममापि निद्राभङ्गोऽभवत्। अहं नीचैरवतरम्। शकटीतया अन्येऽपि यात्रिणाः चक्षुषी उन्मार्जयन्तः शनैः शनैर्निद्रात उदतिष्ठन्। यथैवाहं नीचैः पट्टके आगच्छं तथैव श्रेष्ठिवरोऽपि कदलीकरण्डकमुपरितोऽवतारयितुमियेष, येन शकटीतोऽवतरणसमये विलम्बो न भवेत्। यावदसौ करण्डमुपरितोऽवतारयति तथैव तस्य कोणात् कदलीफलस्य त्वग् (छोंत) नीचैर्निपपात। श्रेष्ठिनो विस्मयोऽभवत्। भूमौ निधाय यथैव वस्त्रमृद्घाटितं, दृष्टम्– करण्डके त्वच एव सर्वाः सम्भृताः सन्ति। ता अपि ईदक्प्रकारेण स्थापिताः यथा उपरितः करण्डकं कदलीफलपूरितं प्रतीयेत। परु फलानि एकान्ततो लुप्तान्यासन्।

'अरे! किमेतत्' इति कृत्वा श्रेष्ठिवराकः पट्टके न्यषीदत्। समीपस्थिताः सर्वेऽपि यात्रिणश्चकिता अभूवन्। लज्जया सङ्कोचेन चाहं भूगर्ते प्राविशमिव। 'हन्त! किमेतज्जातम् । करण्डकं मत्सविधे स्थितमासीत्। सर्वेषां सन्देहो मदुपर्येव निश्चितं भवेत्। हा हन्त विसदृशं सङ्घटितम्।'

जातमपि तदेव। एको यात्री श्रेष्ठिनमपृच्छदेव– किं भो महोदय। उपरितनेऽस्मिन् स्रस्तरे कः अस्वाप्सीत्?'

अहं किञ्चिद्वदामि, एतस्मात्पूर्वमेव श्रेष्ठी प्रच्छकसम्मुखोऽभवत्, उत्तरं च अददात्। ममानन्तःकरणं श्रेष्ठिनः एकैकाक्षरोपरि बलादाकृष्टमभूत्। मम मान–प्रतिष्ठयोर्निर्णयः श्रेष्ठिमहोदयस्य जिह्वाधीन एवासीत्। दृश्यताम्, भाग्यं किं दर्शयति?।

अङ्गुल्या मां निर्दिश्य श्रेष्ठिमहोदयोऽवदत्– 'करण्डिकायाः समीपे, एतस्मिन् शयनीये तु एते महोदया एव अशेरत। अन्यः कश्चित्तु रात्रौ जागृतोऽपि नाऽभूत्.......'

एतान् शब्दान् श्रुत्वा मम हृदयमकम्पत। मया ज्ञातम् 'अमृतं निर्जरैः पीतं विषं पशुपतिः पपौ' इत्याभाणकमद्य मदुपरि संघटिष्यते। हन्त हन्त! घोरापमानजनिकाया एतस्या विपत्तेः सकाशाद् विमोक्षः सम्प्रति कठिनः। परम् आश्चर्यमाश्चर्यम्। किमिदं पश्यामि। यत् एतस्याः कज्जलकोष्ठिकातो मुक्तिदातापि स एव पुरातनो घातुकोऽस्ति।

श्रेष्ठिमहोदयोऽग्रेऽवदत्– '......किन्तु' एतैस्तु तदिदं करण्डकं स्पृष्टमपि नास्ति। एतेषामुपरि न सम्भवतः सन्देहस्य'।

अहं पुनर्जीवलोके परावृत्तोऽभवम्। अचिन्तयं चेतसि–'साधु साधु, अहो धन्योऽसि सखे 'किन्तो'। कीदृशे सूक्ष्मऽवसरे उपस्थाय मानरक्षां कृतवानसि!' परं हृत्पटलात्सोऽयं सन्देहो नापययौ यत् 'कदलीफलानि तर्हि केन भक्षितानि। त्वग्भारमादायैव श्रेष्ठिमहोदयो मोहमयीतः प्रतस्थे इति तु सम्भूतमपि नास्ति'।

एको यात्री अपृच्छत्– 'श्रेष्ठिवर। तर्हि एतानि फलानि केन भक्षितानि?' । श्रेष्ठी अवादीत्– 'ज्ञातं मया। सायंकाले एको यवनमहोदयो मम समीप एवास्यां शकट्यां स्थितोऽभूत्। रात्रौ जातायां स मामवोचत्– 'यदि भवतोऽनुमतिः स्यात्तर्हि अहमुपरि संविशेयम्। भवानप्यत्र सुखेन शयितुं शक्नुयात्'। का हानिः इत्यहमपि तदेतदङ्गीकृतवान्। अस्तु, स हि करण्डकमिदं मुखसम्मुखं निधाय उपरिपट्टे सुष्वाप। इतोऽहमपि निद्राधीनोऽभवम्। एकद्विवारान् मया उपरि दृष्टिरपि प्रेषिता परं तं तथैव मह्यं पृष्ठं दत्त्वा फलाभिमुख शयानमद्राक्षम्। अहं निश्चिन्तोऽभवम्। अर्द्धरात्रस्य सन्निहितमेवासौ महाशयः शकटीतोऽवतीर्य यथागतमगच्छत्। गमनसमये स हि यवनशिष्टाचारानुसारं मामवोचदपि– 'श्रेष्ठिमहोदय। भवत्कृपया मया पूर्णं सुखमवाप्तम्'।

शकटीस्थाः सर्वेऽपि जहसुः।

एकदाऽहं कार्यविधया निजगृहद्वार एव स्थितोऽभूवम्। एतस्मिन् समये काठियावाडप्रान्तीयः कृषीवल इवैकः यस्य हस्ते वस्त्राणां ग्रन्थिरासीत् मत्समीपमागत्य गुर्जरभाषायामतिदीनतयाऽवादीत्– 'श्रीमन्। नाहं याचितुमागतोऽस्मि, नाप्यहं याचकः। अत एव श्रीमान् मम वार्तां निर्विशङ्कं शृणोतु । अहं जात्या क्षत्रियः । वयं हि द्वारकाप्रान्ते निवसामः। इदानीं गयातः समागच्छामः। मम सहयात्रिणोऽन्येऽपि बहवो मनुष्याः सन्ति ये वाष्पयानावमोचनस्थान एव सम्प्रति स्थिताः सन्ति। मार्गे धूमशकट्यां केनचिदस्माकमुपकरणं चोरितं येन गृहप्राप्त्युचितं द्रव्यमप्स्मत्सविधे नावशिष्टम्। इदानीं तडिद्वृत्तं प्रदाय निजग्रामाद्धनमाकारितमस्ति। तत्प्राप्तिसङ्केतस्तु अत्रत्यपत्रप्रेषणालयस्य (डाकघर) एवास्ति। श्वः पत्रप्रेषणालयोद्घाटनसमये तद्धनं प्राप्स्यते। अस्माभिः ह्योदिनादेतदवधि न किञ्चिद् भुक्तम्। श्वः पर्यन्तमपि वयं तु किञ्चिदभुक्त्वापि स्थातुं शक्ष्यामः। परम् अस्मत्सार्थे केचिद् बालकाः एका च जरती वर्तते येषां मुखं नैकः कणोऽप्यद्यावधि पतितः। अत एव दयास्मान् परवशयति। इमानि मम वस्त्राणि निक्षेपरूपे संस्थाप्य केवलं प्रस्थमितं यवचूर्णं दापयतु भवान् येन अर्द्ध पोलिका (रोटिका) वराकेभ्यस्तेभ्यो दीयेत। श्वोऽहं यदा पत्रप्रेषणालयमायास्यामि तदा

भवत्पणान् दत्त्वा वस्त्राणि प्रतिनेष्यामि। क्षुत्क्षाममुखान् अमून् दीनान् शिशून् भूमौ लुठतो नाहं द्रष्टुं शक्ष्यामि।'

मम हृदयं दयाप्लुतमभूत्। उक्तं मया– 'भवदादयोऽन्ये जना अपि दिनद्वयपर्यन्तमभोजनाः कथं तिष्ठेयु? सोऽवदत्–'श्रीमान्! किं वास्माभिः क्रियताम्। गेहे गावो महिष्यः, सर्वमपि कृषिसाधनमस्ति। भृत्याः कृषिकार्यं कुर्वन्ति। परम् अस्मिन् परदेशे कस्मै किं वा कथयामः? भूम्यधिकारिणो भूत्वा भिक्षावृत्तिं तु वयं कर्तुं न शक्नुमः। एतदवश्यमस्ति। वयम् एतावन्तं परिश्रमं व्ययं च सोढ्वा दूरदूरवर्तितीर्थानां यात्रां कृत्वा आगच्छामः। यदि कश्चिद्धर्मपरिज्ञाता स्यात्तर्हि तीर्थयात्रायास्तस्य पुण्यस्योपरि श्वः प्रातः कालपर्यन्तस्य कृते किञ्चिद्भोजनमात्रं याचामः।

मम चेतसि महद् दुःखमभूत्। हन्त हन्त! परवशा दीना निजपुण्यमपि हारयन्ति। पृष्टं मया– 'किं वस्तु वाञ्छ्यते?' । तेनोक्तम्– 'महोदय। सर्वतः समर्घमस्मिन् देशे यवानां चूर्णमस्ति। प्रातःकालपर्यन्तं प्राणरक्षायै अष्टादशमनुष्योपयुक्तं तदेव वाञ्छामि। उपदेशार्थं किञ्चित्सूपं नेष्यामि।' उक्तं मया – 'अहमेतत् रूप्यकद्वयं भवते प्रददामि। भवानेव भोज्योपकरणं क्रीणातु।'

अहं रूप्यके तस्मै प्रददान एवासम्, एतावतैव मम मित्रं मे हस्तमगृह्णात्। उक्तावांश्च– ''रूप्यकद्वयेन गयायाः पुण्यं क्रीणासीति तु विदितं मया 'किन्तु' पूर्वं चक्षुषी उन्मील्य किञ्चिद्विलोकयदिनद्वयमभुक्तस्य किं मुखाकृतिरेवंविधैव भवति? मम प्रतिवेशादपि सोऽयं किञ्चिद्भोजनोपकरणम् किञ्चिच्च धनमनेनैव प्रकारेण गृहीत्वा न्यस्तवानस्ति।''

मित्रस्य वचनं श्रुत्वैवाहं तदभिमुखमपश्यम्। तस्याकृतिरवश्यं म्लाना विलक्षा चासीत् परं क्षुधायाश्चिह्नं नासीत्तत्र। अहं मुद्राद्वयमिदं पुनर्निजसम्पुटके न्यदधाम्। सोऽपि न पुनस्तत्रातिष्ठत्। 'हन्त! संसारे दुःखिनः को वा सहायकोऽस्ति' इति वदन् दानप्रतीक्षामकृत्वैव ततः स्थानात्सहसा अदृश्योऽभवत्।

दृश्यताम् एतस्य 'किन्तोः' एकस्यामेव भर्त्सनायां रूप्यकद्वयमिदं वञ्चकस्य समीपे न गत्वा मत्पार्श्वपुटकमेव यथापूर्वमध्यतिष्ठत्।

'शब्दैः प्रतीयते, यद् गृहे चौरः प्रविष्टोऽस्ति' इति सभयमुपलपन्ती गृहिणी रात्रौ मामबोधयत्। अहं निजशौर्यं प्रकाशयन् महता वीरदर्पेण लगुडमात्रमादाय अन्धकार एव चौरनिग्रहाय प्रचलितोऽभवम्। गृहिणी कर्णसमीप आगत्य शनैरवदत् 'अन्धकारेऽस्मिन् यासि त्ववश्यम्, 'किन्तु' दृश्यताम् सशस्त्रं न प्रहरेत्।'

पुनः किमासीत्। मम वीरदर्पस्य शौर्यस्य च प्रज्वलितं ज्योतिस्तत्रैव निर्वाणमभूत्। चौरनिग्रहः कीदृशः निजप्राणपरित्राणमेव मे अन्वेषणीयमभवत्। लगुडं प्रक्षिप्य कोष्ठके निलीनोऽभवम्। तत एव च कम्पितकण्ठेन चीत्कारमकरवम्– 'लोकाः! आगच्छत, चौरः प्रविष्टोऽस्ति'।

एकेन अमुना 'किन्तु'ना चौरस्य चपेटाभ्योऽवमुच्य सौख्यस्य सुरक्षिते प्रकोष्ठकेऽहं

प्रवेशितः। अनेन किन्तुना कस्मिन्नपि सङ्कटसमये कदाचित् किञ्चित्कार्यं कामं कृतं स्यात् परं भूयसा तु अस्माद् भयमेव भवति। अस्य हि सार्वदिकः स्वभाव एव यत् वार्ता काममुत्तमास्तु अधमा वा परमयं मध्ये प्रविश्य तस्याः कथाया विच्छेदमवश्यं करिष्यति। अतएव कस्मिन्नपि समये कार्यसाधकत्वेऽपि लोका अस्माद्वित्रस्यन्त्येव। वैरिणां भारावताराय कदाचित् हिताधरापि करवालधारा क्रूराकारा प्रखरप्रकारा एव प्रसिद्धा लोकेषु। विगुणः कार्षापण, कुत्सितश्च पुत्रः सङ्कटे कदाचिदुपयुक्तो भवेत् परं जनसमाजे द्वयोरुपर्येव नासाभ्रूसङ्कोचो जातो जनिष्यते च । इदमेव कारणं यत् यस्यां वार्तायां 'किन्तुः' उत्पद्यते तां वार्तां लोका विगुणां गणयन्ति।

मधुमङ्गलमिश्रः पूर्णप्रसादपाण्डेयस्य भवने सूपौदनमभुंक्तेति तज्जातिजनास्तं पङ्क्तिबाह्यं चक्रुः। मिश्रमहाशयस्य सम्बन्धिनः जातिप्रमुखानामनुनयविनयौ कृत्वा अतिकष्टेन मिश्रस्य शोधनव्यवस्थामकारयन्। जातेराज्ञया मिश्र उपोषितोऽभवत्, जातिदण्डोऽपि तस्मात् समगृह्यत। एवं किल प्रायश्चित्ते जातेऽपि जातेर्बहवो जनाः सहभोजे विप्रतिपन्ना आसन्। मिश्रस्य मातुलः पञ्चायत्तसभायां प्रश्नमुपास्थापयत्– 'जातीयसज्जनैर्यद् यत् किञ्चिदाज्ञापितमासीत् तदनुसारं सर्वमक्रियत। ततोऽपि बहवो गृहाः सहभोजे नानामिषान्कुर्वन्तः आपत्तिं प्रकाशयन्ति। इदानीमपि किं कश्चित् 'किन्तु' अस्ति?

'किन्तुप्रभो भूरि नमो नमस्ते'

***

## बालकभृत्यः

**कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः।**
**यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे, 'शिष्यस्तेहं शाधि मां त्वां प्रपन्नम्'।।**

एषु दिनेषु योग्यमेकं भृत्यमुपलब्धवानस्मि। बालकस्यास्य नाऽधिकं वयः। दर्शने सुन्दरः, वस्त्रादिभिः प्रायः स्वच्छः संवसति। मम मानसेऽप्यनेन शनैः शनैः समुचितं स्थानमधिकृतमस्ति। गृहस्थैर्जनैः संविभक्तस्नेहः सोऽयम् अतिममत्वेन गृहे निवसति। कार्येऽतीव तत्परः। चक्रवदहर्निशं भ्राम्यति। कस्मिन्नपि कार्ये नाऽऽलस्यम्, न वा काचिदापत्तिः। हसन्मुखः सोऽयं प्रतिसमयं ममाज्ञानुसारं कार्यं कर्तुं सन्नद्धस्तिष्ठति। किन्त्वस्मिन् यः खलु महान् दोषस्तमपि पाठकमहाभागानामग्रे नाहं गोपयिष्यामि-

(१)

शिशिरर्तोः समयः। रात्रिः प्रायः समाप्ताऽस्ति, तथापि साम्प्रतं परितस्तमोलहरी विजृम्भते, अस्ति प्रत्यूषः। अन्यदिनाऽपेक्षया अद्य शीतमप्यधिकं प्रतीतं भवति। तूलभृतेन प्रावरणेन मुखमाच्छाद्य शय्यामधिशयानोऽस्मि। शिशिरर्तोर्दीर्घदीर्घतमया रजन्या निद्रायाः सर्वोऽपि मनोरथः सर्वाङ्गतया पूरितोऽस्ति किन्तु शरीरोष्मणा सुखोष्णीकृतं प्रावरणं त्यक्तुं नाऽधुनापि मनो भवति। शयनीयसंविष्टस्य मे मनसि नानाविधविचाराः सवेगमभ्राम्यन्। अहमुच्चैः स्वरेण बालकमाह्वयम्- ''हरिदास''।

पाठकमहोदयैरनुमितमेव भवेद् यद् बालकस्यास्य भृत्यस्य नाम हरिदास इति। अहं तं जागरयितुं चेष्टामकरवम्। ममानुमानमासीद् यद् असौ बालकः साम्प्रतमपि निद्रा कदाचिन्न भग्ना भवेत्। पुनः प्रबलतमेनानेन शीतेन शय्यां त्यक्तुं नासौ कदाचित्पारयेदिति। किन्तु दृष्टं मया स मत्तः प्रथममेव जागरित्वा स्वकार्ये संलग्नोऽस्ति। यथैव ममाह्वानशब्दमशृणोत्तथैव स पाकगृहादुत्तरमददात्- 'आम्. श्रीमन्। आज्ञा दीयताम्।'

**अहम्- किं पेया ('चाह') प्रस्तुतास्ति?**

**हरि.- प्रभो। सज्जाऽस्ति सेयम्।**

**अहम्- आनयैनाम्।**

**हरि.- यथाऽज्ञा। अधुनैवोपस्थापयामि।**

मुहूर्तमात्रे हरिदासः उष्णोष्णां प्रातःपेयामादाय मत्सम्मुखे समुपस्थितोऽभवत्। शीतेऽस्मिन् प्रावरणं त्यक्तुं न मनोऽभूत्। अत एव तदावृतशरीर एव स्थित्वा पानाय प्रवृत्तोऽभूवम्। यथैव तत्पात्रं हस्तेऽगृह्णां तथैव दृष्टं यत्पेया अतीव रक्तवर्णा जातास्ति। एतावत्पर्यन्तं किल यत् श्यामरङ्गस्यापि सूत्रपातः संजातोऽस्ति। किञ्चित्पानकं कण्ठादधः समवतीर्य, अनुभूतं मया यत् तदेतत् कटु सञ्जातं, न पानं कर्तुं शक्नुयाम्। अतिकष्टेन यथा कथञ्चित्

द्वित्रान् चषकान् गृहीत्वा बालकमवादिषम्– ''त्वमतीव मूर्खोऽसि । 'चाह' पत्राणि किमेतावत्कालपर्यन्तमग्नौ क्वथ्यन्ते? पश्य कटुरियं जाता। गच्छ, नाहं पास्यामि'।

विलक्षणवदनो हरिदासो मन्दमन्दमवादीत्– 'श्रीमान्। पाककर्त्रा 'महाराजेन' 'चाह' निर्माणमेवमेव मे शिक्षितमभूत्। क्षम्यतां ममापराधः'।

अहम्–शिक्षितं तव कपालम्। गच्छ शौचपात्रे जलं पूरय। जलमुष्णं स्यात्। बालकः अतीवोत्साहेन अधावत्। शौचालयं गतो यथैव शौचाय जलमादातुं प्रवृत्तस्तथैव पात्रस्य मुखसम्मुखे हस्तं प्रसारयतैव मया उष्णोष्णतमो वाष्पः समनुभूतः। चकित भीतोऽहं हस्तं पृथगकार्षम्। दृष्टं मया–वैद्योपदिष्टः, अर्द्धावशिष्टः क्वाथ इव तदिदं जल क्वथ्यमानावस्थायामेव पात्रोदरे पूरितमस्ति। कस्यासीच्छक्तिर्यत् पात्रस्य गात्रे हस्तेनापि परामृशेत्, का कथा शौचस्य। तप्ततैलवृन्ताक इव मनः कटाहे भृशतरमदह्ये, परं तस्मिन् काले किमहं कर्तुं शक्नुयाम्। विवशोऽहं मुक्तकच्छावस्थायामेव शुकपञ्जरमिव धौतवस्त्रं हस्ताभ्यां वहन् शौचालयाद् बहिरागच्छम्।

स्नानात्पूर्व तैलावमर्द्दनं कर्तुं हरिदासमादिशम्। प्रतीयते यत् हरिदासस्य सप्तदशपुरुष–परम्परायामपि तैलाभ्यङ्गो न केनचिदनुभूतः। स ह्यतीव शनैः शनैर्मम गात्रे हस्तेन परामृशत्। मया प्रोक्तम्– 'हंहो तात! किञ्चित्तु बलं प्रदर्शय।'

पुनः किमासीत्। इदानीमेतावता प्रबलभावेन तैलमर्द्दनं प्रारब्धमभूत् यन्मम जङ्घयोर्लोमानि पट्पट्शब्दं कुर्वन्ति सवेगमत्रुट्यन्। वेदनया विकलो भूत्वा सचीत्कारमवदम् 'अलमलं भ्रातस्तिष्ठ! तृप्तोऽस्मि तैलमर्द्दनात्, बहुतरं जातम्। इदानीं कृपां विधाय स्नानाय जलमाहर।'

हरिदासः सरभसमधावत् । कतिभिरेव क्षणैर्जलपूरितो द्वौ कलशौ मत्सम्मुखमुपस्थितावभूताम्। शौचालयपात्रस्य घटनां सम्प्रति मन्मनसि सहसा जागरुकाऽभवत्। तद्भयादेवाऽहमपृच्छम् 'कथय तात जलं तु उष्णं नास्ति?'

हरि.– नैव श्रीमन्। शीतलमस्ति।

स्नानस्य चतुष्किकायामुपविष्टोऽहं शिरसि जलं निपातयितुमाज्ञापयम्। हे भगवन्! जलं किमासीत् मन्ये हिमालयशिखरात् प्रद्रवन्ती साक्षात् हिमानीधराऽवतीर्णाऽऽसीत्। जलधारावरुद्धश्वासोऽहमतिकष्टेन निश्वसन् जलप्रक्षेपमवरोद्धुमिङ्गितमकरवम्। परं मम मुखनिःसृताया आज्ञावाण्याः अग्रे वराकस्य इङ्गितस्योपरि तस्य दृष्टिपातः कथं भवेदेव। मदभिमुखं तस्य लक्ष्यमेव नासीत्। स तु समानभावेन जलप्रक्षेपकर्मणि निलीनोऽभूत्। शीतेन संपिण्डितशरीरः कम्पमानोऽहं बलादुत्प्लुत्य उदतिष्ठम् । किन्तु शिरसि जलकलशोऽभूत् मम मस्तकस्य प्रबलमाघातं प्राप्य हस्तात्प्रच्युतः कलशो नीचैरपतत्। वेदनयेव करुणाक्रन्दनं कुर्वन्नसौ भूमावलोठत्। तस्य शरीरं चिपिटाकारमभवत्, ममापि च मस्तके गोलाकारस्यैकस्य जन्माऽभवत्।

(२)

भोजनं कुर्वन्नासम्। अभून्मम भोज्यपदार्थेषु लवणस्यावश्यकता। किन्तु पाकगृहे आनीतं लवणं नासीत्पर्याप्तम्। अहं हरिदासमाज्ञापयम्- 'भाण्डारगृहे गत्वा किञ्चिल्लवणमानय'।

महतोत्साहेन उच्छलन् स त्वरितमेव भाण्डागारे प्राप्नोत्। तस्मात् स्थानादुत्थितः पात्राणां परस्परसंघर्षस्य घोरघोरतरः शब्दो दूरदूरपर्यन्तस्य जनानुद्ग्रीवाँश्चक्रे। प्रतीतमभूद् यत् प्रलयकालस्य भयङ्करो भूकम्पः समुपस्थितोऽस्तिः। निश्चितं मया मनसि- 'अद्य पात्राणां कुशलं दैवाधीनमेव'। पश्यत्येव मयि लवणपूरितं मुष्टिं वहन् हरिदासः सम्मुखस्थोऽभवत्। अवादिषमहम् 'भोजनागारमर्यादातो बहिःस्थ एव भोज्यपात्रे किञ्चिदेतत् प्रक्षिप'। अह ह! अद्भुतमेकं दृश्यमक्ष्णोः समक्षमभिगतमभवत्। मन्ये पत्रावलेरुपरि होलिकाया अभ्रकक्षोदस्य (अबीर) घटा आच्छन्ना भवेत्। हन्त भोज्यानि सर्वाण्येव वस्तूनि लवणवर्षयाऽनया अखाद्याय वा, भोजनोत्साहं महानस एव विसृज्य आसनादुदतिष्ठम्।

वस्त्राणि परिधाय कार्यालयमुपस्थातुं प्रस्थितोऽभवम् किन्तु द्वारमागत्य दृष्टं यत् परिधानीयपुटके (जेब) 'स्वतन्त्रलेखी' (फौन्टैन पैन) नास्ति। उत्कण्ठितनयनाभ्यां मदाज्ञां प्रतीक्षमाणो हरिदासः सम्मुख एवासीत्। प्रोक्तं मया- 'मत्प्रकोष्ठस्य समुखस्थे एव लघ्वालये मम लेखन्यस्ति। शीघ्रमानय ताम्। किञ्चित्त्वरितं गच्छ। विलम्बः सञ्जातोऽस्ति।'

स हि एतावता वेगेनाधावत् यत् आगमनसमये अङ्गणपाषाणस्योद्घातमवाप्य अधोमुखः समपतत्। हस्तात्प्रच्युता लेखनी दूरे धराशायिनी समभूत्। तस्या आच्छादनं क्वचित् लेखनी सा क्वचिद्व्यलषत्। मया उत्थाप्य दृष्टं यत्तस्याः कृष्णमुखात् दुःखोपचयाच्छ्यामीभूतं रक्तमिव मसीधारा अकाण्ड एव प्रवहन्त्यस्ति। लेखनीमकर्मण्यां दृष्ट्वा, तत्रैव तां विसृज्य कार्यालयमचलम्। लेखनी सेयं बहुमूल्यासीत्। मन्मनसि महद् दुःखं बालकस्योपरि च क्रोधः समभवत्। परं तस्यापि वराकस्य जानुनी संघृष्टे अभूताम्, अधरोष्ठोपरि दन्तः सन्दष्टोऽभूत् यस्माद् रुधिरं प्रावहत् अस्यां दशायां तं प्रति किमहं कथयेयम्, स्वाभाविकी मनुष्यता न मां प्रैररित्। क्रोधवशान्निजमनस्येव इन्धनीभवन्नहं कार्यालयाभिमुखं मुखमकरवम्।

कतिभिश्चिद्दिनैर्मम कासस्य विकासः सञ्जातोऽस्ति। वैद्यजगन्मार्तण्डेन श्रीस्वामिमहाभागेन मधुना सह 'चन्द्रामृता वटी' सेवितुमादिष्टाऽस्ति। दिनं गलहस्तयित्वा सन्ध्या समुपस्थिता। लोका दीपसन्दीपनस्य सामग्रीं समघटयन्, अहमौषधसेवनस्य साधनानि समवलोकयम्। अयमेव निश्चितः समयोऽस्य मया निरधार्यत। एतदुत्तरं तु औषधसेवनस्य मङ्गला (अमङ्गला वा) स्मृतिर्मम मानसपटलात्प्रोञ्छिता भवति। स्मरणोदये सति विलम्बादौषधसेवने तु कृतापराधस्य कर्मचारिणो मासिकवेतनमिव मम भोजनमपि तावत्कालमवरुध्यमानमभूत्। यतो हि वैद्यराजमहाराजेन औषधसेवनाद् घण्टाद्वयोत्तरं भोजनसेवनमाज्ञप्तमासीत्। अस्तु मया हरिदासं प्रत्युक्तम्- गच्छ, मधुनः काचकूपिकां त्वानय'।

वाक्यसमाप्तेः समकालमेव स सवेगं प्रापलायत, काचकूपिकायाः कन्धरां च निष्करुणं करे कलयामास। मदभिमुखमार्गे आगच्छतैव तेन न जाने किं कृतं यत् सर्वं दृश्यमेव

परिवृत्तमभूत्। चूर्णविचूर्णीभूता वराकी कूपिका भूतधात्र्यां विश्राममलभत। सम्मुखयुद्धे वीरलीलां गतस्य शूपसैनिकस्यैव पृथग्भूता तस्याः कन्धरा करुणाऽऽवेदनमिवाकरोत्।

सायं भोजनं कृतवतो मम व्यतीयाय कियांश्चन कालः। अहमैषिषं यद् दुग्धमप्यधुनैव पिबेयम्। यस्मिन्समयेऽहं पठने वा लेखने वा दत्तचित्तो भविष्यामि तस्मिन्समये दुग्धपानमिदमरुन्तुदं भवेत्। यस्मिन् समये ब्रह्मानन्ददायिन्या निद्रादेव्या मधुरमधुरमागमनं प्रारप्स्यते तस्मिन्सुसमये जागरित्वा तु तदिदं पयःपानं मधुरमपि घोरतरं कटु प्रतीतं भवेत्। अत एवाहं प्रोक्तवान् गच्छ हरिदास, पाकगृहात्पेयदुग्धपात्रं त्वानय!

हरिणीप्लुतैः पलायमानः स महानसे प्राप्नोत्। दुग्धपात्रं वहन् स मार्गमुल्लङ्घयन्नासीत्। लेखन्यानयनस्य प्रातःकालिकीघटना मम स्मृतौ सहसैवोदियाय। प्रोक्तं मया 'तात किञ्चित् नीचैरपि दृष्ट्वा चलितव्यं भवति। प्रातरिव न पुनः स्खलितो भवेः।'

पानपात्रमिदं मुखपर्यन्तं दुग्धपूर्णमासीत्। यथैव स नीचैर्दृष्टिमकरोत् तथैव हस्ततिर्यग्भावात्पात्रान्निष्पतद् दुग्धं हरिदासस्याङ्गुलीषु प्रावहत्। उष्णोष्णं दुग्धं यथैवाङ्गुलीरस्पृशत् तथैव उष्णस्पर्शाच्चकितस्तदङ्गुलयः पात्रग्रहणे एकवारं शिथिला भूत्वा यावत्पात्रं पुनः साधयन्ति तावत् पिच्छिले दुग्धप्रवाहे पात्रात्प्रस्खलिताः समभवन्। पात्रमेतत् 'छिन्नमूल इवद्रुमः' अवाङ्मुखमपतत्। आस्थानभवनस्य महामूल्ये आस्तरणे क्षीरसागरः प्रवाहितोऽभवत्। दुग्धस्य दुःखं विस्मृत्य महामूल्यस्य नवास्तरणस्य स्वरूपरक्षायां संलग्नोऽभवम्। परमिदानीं किं भवेत्? प्रबलं प्रवहता पयसा सम्पूर्णोऽप्ययं संस्तरः पाण्डुरङ्गतामनीयत। क्रुद्धोऽप्यहमेतस्य ताडनतर्जनयोर्विचारं विसर्ज्य सर्वप्रथममास्तरणोत्थापनस्य प्रयत्नं स्वहस्ताभ्यामेव प्रारप्सि।

रात्रौ बहुकालपर्यन्तं पुस्तकपठनस्य ममाभ्यासो बहोः कालादेव विरुढः। प्रायः पुस्तकं पठन्तमेव मां निद्रादेवी संस्पृशति। अस्तु, पल्यङ्कोपरि प्रसारितसमस्तगात्रोऽहं भासस्यैकं नाटकं पठन्नासम्। शिरःप्रान्ते च नात्युच्चायामेकस्यां चतुष्किकायां दीपाधारोपरि स्थितस्तिलतैलस्य दीपकः प्रकाशनकार्ये निस्तन्द्रं सावधानोऽभवत्। शयनात्पूर्वं पठनसमये प्रायः प्रत्यहममिमं स्वदेशिदीपकमेव प्रकाशनाधिकारे नियुनज्मि। रात्रिः सार्द्धद्विप्रहरपरिमिता व्यतीता स्यात्, निद्राणस्य मम निद्रा विद्राणाऽभवत्। निद्राया आक्रमणकाले वक्षस्थलोपरि अधोमुखमापतितं पुस्तकं सम्मुद्र्य, निद्रानिमीलितचक्षुषैव मया हरिदासं प्रत्याह्वानवाणी विसृष्टा। स तत्क्षणमेवोत्थितोऽभवत्, अददाच्चोत्तरं विनयेन– 'आज्ञा?'

आज्ञापयमहम्– दीपकं निर्वाप्य दूरे निधेहि।

सरभसं प्रसृतो हरिदासो दीपकमुत्थाप्य यथैवाऽनयत्। तथैव समस्तमपि तत्तैलं मम मस्तके उपधानोपरि चापतत्। मम निद्रा दूरतरं विद्राणाऽभवत्। अकाण्डकृतेन तैलाभिषेकेण नितान्तमुत्तेजितोऽहं पल्यङ्कास्याङ्कादवप्लुत्य सरभसमुत्थितोऽभवम्। सूचीभेद्येऽपि तस्मिन्नन्धकारे शब्दवेधिनं बाणमिव हरिदासगजस्य गण्डस्थले भीषणबलामेकां चपेटां व्यसृजम्। तस्य फलमिदमभूत् यत् हरिदासहस्तात्प्रच्युतो दीपाधारोऽपि शयनीयस्य सविध एव प्रापतत्। दीपाधारात्परितः प्रच्यवद्भिस्तैलविन्दुभिः शयनीयस्य गात्रमपि मसृणमभवत्। तैलेन मन

शिरस्यभिषेकोऽभवत्। शयनीयस्य तु पुण्याहवाचने आम्रपल्लवैरिव बिन्दुभिषेकसौभाग्यं समभूत्। किन्तु वराको मृत्तिकादीपकस्तु 'मृण्मात्रशेषोऽभवत्।'

मया विचारितं–नाधुना हरिदासाय गृहे स्थानं दास्यामि। हतभाग्यो यस्मिन्नेव कार्ये हस्तं प्रक्षिपति तस्मिन्नेव नूतननूतनं कञ्चिदेकमुपद्रवमुत्थापयति। परं पश्यामि–तस्यापि वराकस्य को वाऽपराधः? स हि निजसामर्थ्यमतिक्रम्य प्राणपणेनापि मत्सन्तोषस्य चेष्टां विदधाति। किन्तु सोऽनभिज्ञः। सम्यगुपायं न जानाति। येन जनेन यथा शिक्षितः, तस्य बुद्धिसामर्थ्यं च यथा प्रभवति तथैव स परिचेष्टते। मम सन्तोषः स्यात्, अहं तस्योपरि प्रसन्नो भवेयम्, एतत्किल तस्याऽऽन्तरिकमुद्देश्यम्, अस्ति च तदुपरि पूर्णं लक्ष्यम्। किन्तु दुर्भाग्यवशात्स कदापि सफलो नाऽभवत्।

(४)

अहमपि कदाचित् सफलमनोरथो नाऽभवम्। हे प्रभो! हरिदास इवाहमपि भवन्तं प्रसादयितुं प्रत्येकस्मिन् कार्ये चेष्टां करोमि। एतद् ध्रुवं निश्चितमस्ति यन्मम महामहान्तः प्रमादाः पदे पदे सम्भवन्ति। किन्तु हे अन्तर्यामिन्! ममान्तःकरणस्यान्तस्तलमुद्घाट्य कृपया किञ्चिद् विलोकय। भवान् मदुपरि प्रसन्नो भवेदेतदर्थं मम हृदये कियानुत्साहोऽस्ति। मम मानसे महत्युत्कण्ठाऽस्ति। यत्कदापि तु भवान् मदुपरि सन्तुष्टः स्यात्। परं हे जगत्पते! अहमज्ञोऽस्मि, भवत्प्रसादनोपायान्न जानामि। हे चराचरनायक त्वमेव! कञ्चिन्मार्गमादिश। यः कश्चित्मां यादृशं मार्गमुपदिशति, अहं तेनैवाग्रेसरो भवामि। भवतः प्रसन्नताया आश्वासं दत्त्वा यः कश्चिज्जनो मह्यं यादृशीमपि शिक्षां ददाति अहं तदनुसारमेव भवतः प्रसादनस्याशायां महता उत्साहेन पलायमानोऽग्रे गच्छामि।

हे परात्पर! भवत्पर्यन्तं प्राप्तेर्मार्गा अनेकशाखाः महादीर्घाश्च। तेष्वतिधैर्येण गन्तव्यं भवति। अहं हि प्रामाणिकतया प्रसिद्धस्य कस्यचिदाप्तस्यादेशानुसारं यं कञ्चन मार्गं तु तावदवलम्बे परं यथा यथाग्रे गच्छामि तथा तथा दीर्घः स मार्गो दुर्गमो विकट इव च प्रतीयते। अहं च सुगमतायाः आशायां भ्रान्तः सन् पूर्वावलम्बितं मार्गमपहाय द्वितीयं मार्गमाश्रयामि। तमपि मार्गमुल्लङ्घयतो मम मनसि विचारः समुद्भवति– 'नायं मार्गो निष्कटकः सत्यश्च। अनेन हि नाहं प्राप्तव्यवस्थानं प्राप्स्यामि' इति। हन्त! निजबुद्धिमत्तायाश्चक्रे पतितोऽहं तमपि मार्गं हित्वा पुनर्मार्गान्तरमनुसरामि। हे अन्तर्यामिन्! नाहमिदं निश्चेतुं प्रभवामि यत् यो मार्गो मया त्यक्तः स उत्तमोऽभूत् अथवा अस्मिन् समये यं मार्गमवलम्बितवानस्मि स श्रेष्ठोऽस्ति। हे मायामय! मार्गाणां चक्रभ्रमेऽस्मिन् पातयित्वा मम परीक्षणं सम्प्रति संहरणीयं स्यात्। हे दयार्णव! त्वमेव त्वदिष्टं कञ्चिन्मार्गमादिश, न मे शक्तिः।

हे दीनानाथ! ममाऽनभिज्ञता प्रत्येककार्ये मम बाधिका सञ्जातास्ति। अधैर्यविवशीकृतोऽहमेवंविधां चपलतां कदाचिदनुतिष्ठामि यया हि भवत्प्रसन्नता दूरे, तत्कार्यमेव सर्वं नश्यति। परं हे करुणासागर! मम मूर्खतोपरि दृष्टिं न देहि। भवान् दयामयः। भवतो दयालुतायां मम दृढो विश्वासः। अत एव भवान् निजविरुदं निरीक्ष्य ममापराधान्मनसि नानयेदिति

दृढं विश्वसिमि। हे विश्वपते! भवतः प्रसन्नतासम्पादनं न तावत्सरलम्। महामहान्तः सिद्धा महर्षयश्चापि निजचातुर्यबलेन भवन्तं प्रसादयितुमिच्छन्ति, परं न तत्र प्रभवन्ति। यदि त्वमेव स्वेच्छया प्रसन्नो भवितुमिच्छसि तर्ह्येव कश्चित्त्वां प्रसादयितुं प्रभुर्भवति। एवमवस्थायां मम का शक्तिः? अहं हि स्वाभिमानस्य स्वाज्ञानस्य वा कारणेन, त्वत्प्रसादस्याशायां प्रत्येकपदे भवतो विरागभाजनं भवामि।

हे दयामय! ममेमामज्ञानतां तामसं मोहान्धकारं चापनीय ज्ञानप्रदीपः पुरतः प्रकाशनीयः। अहं धर्मम्, अर्थं, कामं, मोक्षं वा किमपि न वाञ्छामि। अहमिच्छामि केवलं भवन्तम्। मम बहोः कालस्योत्कण्ठा यद् भवान् प्रसीदेत्। मम निश्चयश्चायं जातो यन् मत्प्रयत्नेन किमपि न सेत्स्यति।यदि भवानेव मयि दयालुः स्यात्तर्ह्येव मम नौका संसारार्णवस्य पारं गच्छेत्। हे अशरणशरण! मम बलं वा अवलम्बो वा सर्वस्वं भवानेव। केनोपायेन भवद्दर्शनं भवेदिति हे स्वामिन्! त्वमेव मामाज्ञापय।

भ्रमन्तं भूरि संसारे मुरारे! पाहि दीनं माम्।
पदाब्जे ते विलोठन्तं द्रुतं संयाहि दीनं माम्।।१।।
न भाग्यं तादृशं यत्ते विलोके रूपसौभाग्यम्।
धिनोति ध्यानसौख्यं मे सुधासंवाहि दीनं माम्।।२।।
अविश्रान्तं प्रतीक्षातो नितान्तं श्रान्तचित्तोऽहम्।
दयालो! दृक्सुधासारैर्नवं निर्माहि दीनं माम्।।
श्रुतीनां भूरिभूतीनां विकल्पैर्दिग्विमूढोऽहम्।
कथङ्कारं विलोके त्वां मनागाख्याहि दीनं माम्।।
कृपापीयूषलेशार्थं प्रयस्यन् दूयमानोऽहम्।
निलीनं द्वारदेशे ते न प्रत्याख्याहि दीनं माम्।।
दयामालम्ब्य ते भूमन्! सनाथो मञ्जुनाथोऽयम्।
इदानीं त्वद्वशोऽहम्, पाहि मा वा पाहि दीनं माम्।।६।।

***

# हीरकः

**लोकातिशयिगुणशालिभिरप्यकस्मा-**
**दासाद्यते न कुहचिद् गुणतत्त्ववेदी।।**

कश्चन लोकोत्तरगुणशाली विद्वानात्मनोऽसाधारणगुणानां तत्त्वतः समादरकारकं गुणग्राहिणं विगुणदैववशादलभमानः स्वजीवनवृत्तं वैराग्यात् 'हीरक' कथामिषेण वर्णयति–

अहं हीरकः। 'वज्रमणि'रिति नाम्ना महानादरो मे रत्नसमुदाये। अहं न केवलो मणिरेव, अपि त्वन्येषामपि मणीनां वास्तवमणित्वसम्पादनं प्रायो मदायत्तम्। रत्नत्वाभिमानिनां तेषां कर्णवेधनमेव किम् लोकोत्तरं हृदयवेधनसंस्कारमहमेव सम्पाद्य अन्यान्यरत्नैः सह एकसूत्रतासुविधां विदधामि, येन ते गुणग्राहकाणां सम्राजामपि हृदये खेलन्ति। कथयति महाकविः कालिदासः– 'मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः' इति। किन्तु ये मम महिमानं विदन्ति तेषामेव कृतेऽहं हीरकः। त एव मे मूल्यं जानन्ति। ये तु वराका मां न शक्नुवन्ति परीक्षितुं तेषां सम्मुखे किं मे मूल्यं भवेत्? तेषां हि कृतेऽहं पाषाणमात्रः। इयं मे कान्तिः इयमसाधारणी चमत्कृतिस्तेषां समक्षेऽन्धस्य कृते दर्पण इव सुतरां व्यर्था।

कीदृशं घोरं तपः समनुष्ठाय मया सेयमुज्ज्वलता समधिगतेति मे हृदयमेव वेद। कियतीर्वा यातनाः सहित्वा तदिदमुज्ज्वलं रूपं मया समवाप्तमिति कथमन्यो जानीयात्। पृथिव्या गर्भे स्थित्वा परःसहस्राणि वर्षाणि प्रचण्डज्वालायामात्मानं दग्ध्वा तदिदं दृश्यमानं सौन्दर्यमुपलब्धं मया। किं यूयं 'किबर्ली' स्थानं कदाचिदुपगतवन्तः? मन्ये, बहुभिः पण्डितमहोदयैः तन्नामापि न श्रुतं स्यात्। दक्षिणाऽऽफ्रिकादेशे 'किबर्ली' नामकं प्रसिद्धं नगरम्। तत्रैवाहं निजजन्मभूमितो बहिरभवम्। पाताल इव पृथिव्या अतिगभीरेऽन्तस्तलेऽहमासं समाधिनिमग्नः। किन्तु निजपरिस्थितौ ममाऽऽसीत् पूर्णः सन्तोषः। अहं सम्यगजानां यत् 'येषां मे गुणपरिचयः ते एकस्मिन् दिनेऽवश्यं मां समाधिस्थानात् बहिर्निःसारयेयुः' इति।

यद्यद्य मे जन्मस्थानं गत्वा भवन्तः पश्येयुः तर्हि अवश्यं वो विस्मयः समुदयेत्। तत्र हि महतीनां शिलानां विपुलानां गण्डशैलानां च राशयः परितो निबद्धाः। परःसहस्राः खननकर्तारो भृत्यास्तत्र प्रत्यहं कार्यं कुर्वन्ति। एषामुपरि तेषां कार्यनिरीक्षका अपि परःशताः। अस्तु, किमनया कथया। भूगर्भाद् बहिर्निःसृतमात्र एवाहमेकस्य व्यवसायिनो हस्तगतोऽभूवम्। स हि परमसमादरेण मामनयन्निजसमीपम्। एकतो गुणानुरागिणस्तस्य हृदये प्रतिपदं शङ्काऽभवत्। यन्मां कश्चिदपहरेदिति। पर्यन्ते धनलाभलुब्धः सोऽपरस्य व्यवसायिनो हस्ते मां वक्रैष्ट। एष हि मां भारतवर्षं दर्शयामास। परन्त्वत्रागतमात्रमेव मां चतुर एकश्चौरवरः तं व्यापारिणं वञ्चयित्वा बलादपाहरत्। साधुवेषाच्छन्नः स हि गङ्गातटे निवासमकल्पयत्। आसीदमुष्येच्छा यत्

कतिपयवर्षानन्तरं चौर्यकथां विस्मृतवत्सु जनेषु कस्यचिद्धनिनो व्यासायिनो हस्ते मां विक्रीणीयेति। एष मां पुनर्भूतलसमाधिमकारयत्। किन्त्वेकदा गङ्गायाः पूरोपप्लवेऽहं ततः स्थानात् प्रवाहितोऽभूवम्। प्रशान्ते च जलोपप्लवे मृद्गर्भनिमग्नः तटसमीपेऽहं निपतितोऽभवम्।

गङ्गासमीपे पतितस्य मे व्यत्यगुः कतिपयवर्षाणि। परःसहस्राः यात्रिणः समागता निर्गताश्च। न ममोपरि कस्यचित् दृष्टिरपतत्। परः शतैः पुरुषैरहं पद्भ्यामवमर्दितः तिरस्कृतश्च। किन्तु सर्वमवमानं मुद्रितमुखोऽहमसहिषि। अगमयमहमेवमवस्थ एव बहूनि वर्षाणि।

एकदैकः सन्यासी तेन मार्गेण गच्छन् सहसा मामपश्यत्। स हि साधारणं चमत्कृतपाषाणमात्रं बुद्ध्वा मां निजझोलके न्यपातयत्, अभावयच्च यदनेन कञ्चन बालकं प्रसादयिष्यामीति। अस्तु, वत्सरं यावदहमवात्सं संन्यासिनः कलिलकन्थायाम्।

स चैकदा कस्यचिन्निजसेवकस्य गृहमयासीत्। आसीत् स कृषीवलः। एष निर्गते गुरौ सोऽयं गुरुदेवस्य प्रसादः स्मारकचिह्नं चेति मत्वा स कृषीवलः सबहुमानं मां निजगृहेऽतिष्ठिपत्। परन्तु अज्ञानाद् बालकाः कदाचित् प्रक्षिपेयुरिति भयेन स मां निजलाङ्गलस्य मुष्टिकायामयोजयत्। दुर्भाग्यादहं द्वे वर्षे क्षेत्रात् क्षेत्रमभ्रमं विषण्णतमः।

दैववशादेको वैकटिकस्तं ग्राममागच्छत्। लाङ्गलमुष्टिनिविष्टं माम् अकस्मादवेक्ष्य स समभूत् विस्मितः। अपृच्छदसौ कर्षकम्- 'भद्र! क्वायमासादितस्त्वया पाषाणः' इति। गुरुदेवेनायं प्रसादीकृतः। स च गङ्गाजनन्याः क्रोडादिमं समाहरत्।' इति स प्रत्यभाषत। रत्नपरीक्षको मां ततः क्रेतुमैच्छत्। किन्तु गुरोः स्मारकः प्रसादः सोऽयमिति मत्वा नेदमन्वमंस्त कृषीवलः। किन्तु दीनः कृषीवलो धनसम्प्रहारसम्मुखे कियद्वा तिष्ठेद्वराकः शतस्य मुद्राणां झणत्कारमाकर्ण्यैव स मां वैकटिकहस्ते प्राक्षिपत्। हलमुष्टितोऽवतार्य रत्नवणिजा रौप्यसमुद्गकस्याऽभ्यन्तरेऽहं निवेशितः। किन्त्वपमानेन मे हन्त हृदयं व्यदीर्यत। रत्नानां परीक्षकेणाप्यनेन मम मूल्यमेतावन्न्यूनीकृतमिति दुःखं मे सुतरामसह्यमभवत्।

गृहमुपगतेन तेन सप्रमोदं समुद्गकमुद्घाट्य यदाऽवलोकितं तदा मामिमामवस्थापन्नं समभिवीक्ष्य स शिरोवघातमरोदीत्। अवादीच्च 'सखे, हीरक, एतावन्तं कालं पादेषु लुण्ठस्त्वं न हुङ्कारमात्रमप्यकरोः। गङ्गायास्तटे पादघातं तिरस्कृतः। यतिकन्थायां सावज्ञं निपातितः ततो मूर्खेण कृषकेण हलमुष्टौ प्रतिष्ठापितः। सर्वमिदं भवानसोढ मुद्रितमुखः। किन्तु महान्तमादरं लम्भितो मया भवान्। परं तस्य मे समादरस्य किमिदमेव प्रतिफलम्?

क्षीणे स्वरे-एतावत् क्षीणे स्वरे-यत्सोऽयं स्वरस्तेन वैकटिकेन श्रुतोऽपि न वा इति ममापि सन्देह एव मया प्रत्युक्तम्, 'मया जीवने समादरोऽपि प्राप्तोऽवमानोऽपि। धनिकैः शिरसाऽहं सम्मानितः। चौरेण, निजप्राणान् सङ्कटे निपात्याहमात्मसात्कृतः। ये मां पर्यचैषुस्ते मदुचितं मूल्यमप्यदुरिति स्पष्टोऽयं मे सम्मानः। अवमानस्तु तेभ्यो लब्धो ये मां वराका न प्रत्यभिजानते स्म, किन्तु रत्नपरीक्षकेणापि सता भवता मम मूल्यं शतमुद्रामात्रं निश्चितमिति दुःखेन मे वक्षो विदीर्णम्। ममैभिर्विप्रकीर्णैः कणैरपि भवान् परस्सहस्राः समुपार्जयेन्मुद्राः। परमेतावन्तमवमानं सोढ्वा मम जीवितयापनं कीदृशाय वा सौख्याय!'

# मकार-महामेलकम्

मन्यामहे मान्यमनीषिणां मानसमुदन्तेनामुना महान्तं मोदमासादयेद्यन् मालवमण्डलान्तर्मन्दसौरमेदिन्यां माघमासस्यामायां मङ्गलवारे मकाराणां महामेलकमेकमघटत। मेकलकन्यकाया मार्गे मध्यदेशी-'मित्रमण्डलेन' मनोरमो महान् मण्डपोऽमण्ड्यत। महोत्साहिभिर्मानवैर्मार्गमासस्य मध्ये मण्डनमिदमारभ्यत। मण्डलेश्वरमीमांसनाय माघमासस्य मुखे मान्य-मान्यमकाराणां मण्डलं मथुरायाममिलत्। मण्डलेऽमुष्मिन् मण्डलेश्वरमन्त्रणामादाय मनस्विनामपि मिथो मनोमालिन्यमजनि।

मध्यदेशीयमकाराणां मतमासीत्, 'महनीयो महाराजमकारो मण्डलेश्वरतामावहत्विति'। मरुदेशीयमकाराणां मतमभूत्, 'महोपकारकतया मेघमालाया मकारो मण्डलेश्वरतामधितिष्ठतु। मद्रमण्डलस्य मन्त्रणया माधुर्यमकारो महामोदमाविष्कुर्वन् मार्तण्डमकाराय मण्डलेश्वरतामत-मदात्'मेघमालायामप्ययमेव मूलमिति।' मार्मिकम्मन्यैर्मागधमकारैर्मौलिमुत्थाप्य मन्त्रणमदीयत्- 'मारको मार्तण्डमकारो मानमिममासादयितुमनर्हः।' मुखरो मुरलीयमकारो मुखमुदघाटयत्- 'मतमिदं मार्तण्डमहिमनि मात्सर्यमात्रमिति।' मानी मरुकच्छीयमकारो मुखमरुणीकृत्य मदोत्कटमवदत्'मेलनार्थमागतानां मात्सर्यमयमवहेलनमनुचितं मन्यामहे।' महामन्युर्मौसल-मण्डलीयमकारो मुद्गरमुत्तोल्य मंक्षु मञ्चमारुरोह- 'मिथ्यामानिनां मदमयमहमाहरेयमिति''।

मनस्वी महाराष्ट्रमकारो मिथो मन्युमुद्भवन्तमालोक्य मतमीमांसायामस्यामन्यं मार्गमुद्भा-वयन् मण्डलमध्यमागत्य मन्देतरमूचे- महोदयाः! मृषा मन्तुमिमं मुञ्चन्तु। महाशयानामवधानं मान्याऽमराणामभिमुखमाकर्ष्टुमीहे। मान्यमूर्द्धन्यो महेश्वरमकारो मानमेनमधिगच्छत्विति।

मण्डलमभितो मनाङ् मौनमलक्ष्यत। मुहूर्तमात्रमतिवाह्य मार्मिको मालवमकारो मन्द्रमावेदयत्- महेश्वरीयमकारं मूलतो महतो मकारमेव मन्यामहे। मन्ये, मर्मेदमन्येऽपि मन्येरन्।

मूकमासीन्मण्डलम्। मित्रमानी मलयमकारो मनोगतमाविश्चक्रे - 'मुरारिमकारमहमु-पस्थापयामि''।

मञ्चमास्फाल्य मरुदेशीयमकारो मनोभावमुदैरयत्- 'मुरारिमकारमपि मर्मतो मुरमकारमेव मानयामः। महोदय! मोहमिमं मार्जय। मनुजमर्दकं मुरमपेक्ष्य मन्ये महनीयो महान्'।

महत्या मन्त्रणया माधवमकारस्य मण्डलेश्वरत्वमङ्गीकृतमभूत्। मौनमालम्बमाने मण्डले मधुरमार्मिको मत्स्यदेशीयमकारो मञ्जीरमिवामुञ्चन्मन्दमगुञ्जत्- 'माधवमकारोऽपि माया-मकारः।

मार्मिकीमुक्तिमिमामवगम्य मोदमलभन्त मार्मिकमकाराः। मिथे मन्दमहसन्मित्राणि।

मास्तु मुधा मांसलता। मार्मिकमीमांसायामवसितायामन्ते मुकुन्दमकारस्य

मण्डलेश्वरत्वमवधारितमखिलैः।

मेलकमिमं मण्डयितुं मङ्गलमुहूर्ते मन्दिरान्मन्दसौरमचलन्मण्डलेश्वरः। मार्गे मित्राणामर्हणामङ्गीकुर्वन्, महतामाशिषमायच्छन् मरुत्तरेण मेलकमहीमाप्तवान्मण्डलेशः। मरुत्तरमवरुह्य माननार्थमभिमुखमुपस्थितानां मालवमण्डलीयमहाजनानामभ्यर्हणामूरीकृतवान्। मन्दसौरीय-महाशया महता मोदेन मण्डलेश्वरस्य मङ्गलागमनमभ्यनन्दन्। मुक्तामणिमण्डितं मातङ्गमधिष्ठितो महामूल्यमश्वमारूढानामनुगामिनां महन् मण्डलमनुकर्षन्मण्डलेशो महाद्युतिमुपपयौ। मार्गे मार्गे मठे मठे मन्दिरे मन्दिरे मुदितैर्मानवैर्मञ्जुलमालाभिर्मुण्डितो मध्यान्हे महामण्डपमिममासाद।

मण्डपमेदिनीमायात्येव मण्डलेश्वरे मड्डु-मृदङ्ग-मर्दलादयो मङ्गलमधुरमनदन्। मुख्यमासनमलङ्कुर्वति मण्डलेशे माणवका मन्त्रैर्मङ्गलमाचरन्। मरकतमुक्तामाणिक्यादिमण्डिता मान्यमहिला माङ्गल्यं मनोरममगायन्। महामना मालवीयमहोदयो मण्डलेश्वरमुरसि मालतीमालया मण्डयामास, मौलिमुकुटे मल्लिकामुकुलमयोजयत्। मन्दं मन्दमुत्स्मयमानो मण्डलेश्वरो मञ्चमध्यधिष्ठाय महत्त्वमयमिदानीमभाषणमात्मनो मन्द्रमनोज्ञमारेभे।

माधुर्यमाञ्जुल्यमार्दवादिमहिम्ना मोहितमनस्विमानसा मङ्गलमनोज्ञमूर्तयो मनीषिमानितमाहात्म्या मामका मकारमहाभागाः! मालव-मलय-महाराष्ट्र-मद्र-मरु-मुरल-मत्स्य-मान्दार-मेरुमुखानि मेदुरमहीमण्डलानि मण्डयतामत्रभवताममितमिमं महिमानमुन्मीलयितुं महितमेधसो मुनयोऽपि मौनमालम्बन्ते, मन्दमनीषस्य मादृशस्य मुखमिदमावर्णने महत्त्वमधिगच्छेत्? मान-मेधा-मन्त्र-मति-महिम-मैत्री-महैश्वर्याणां मूलमिमं मकारं मेदिनीमण्डलमिदमखिलमवैति। मान्यमूर्द्धन्यानामार्याणां मन्त्र-मख-मूर्तयो मकारमाश्रयन्ते। मारुति-मघव मनोज-मधु-मुख्या महावीरा मनु-मरीचि-मान्धातृमुख्या महौजसोऽपि मकारायत्ताः। मार्तण्डमृगाङ्कौ मुखमस्याऽवेक्षेते। मेरुर्मही च मकारमेवालम्बते। मस्यैव महिम्ना मनुजो मनुजः। मकारमन्तरा मतमनुजत्वमेतस्य। मस्यैव माहत्म्येन महीश्वरो महितो मानवानाम्, मकारमृते मार्ग्यतामहीश्वरत्वमस्य। मकारस्यैव मायया मन्त्रावली महनीया। मकारमपहाय मलिनामन्त्रावलीमीक्षामहे।

मन्थरमीक्ष्यतां मार्मिकैः-मकारमक्षरमैत्र्यामपि मधुरमुदीरयन्ति महाकवयः। मार्ग्यतामन्यत्- मुनिमते मकारमिमं मङ्गलामाचक्षते। मण्डितमूर्द्धानमिममङ्कनेऽपि मधुरमूर्तिमक्षरमालायामखिलायामस्यामालोकन्ते मानवाः। मकारममिश्रमक्षराणां मूर्द्धानमधिरोहयन्ति मार्यादिकाः। मातृकायामुभयमधिष्ठानमुपदिष्टमस्यैव। मानिनां मानमूलं, मुखे मुख्यतममङ्गमामृष्टमनेनैव मनुजानाम्। माहात्म्यमिदमुपलब्धमन्येन?

'मणिमुकुटमञ्जीरमेखलामुद्रिकादि-महार्हमण्डनमञ्जूषायामस्यैव मुद्रा। मातृमातामह-मातुल-मातृष्वसेय-मित्रादीनां मानमर्यादायां मकारमादिममीक्षन्ते महामतयः। माधव-मुनीन्द्र-मृत-मन्मथादयो मकारमग्र्यमादायैव मानवानामभ्यर्हणामर्हन्ति। महेश्वर-महेन्द्र-महासेन-महाशयानामेव मा मन्यध्वम्, महत्त्वमात्रमधीनमेतस्य। मौलिकमहत्त्वमिदमालोचयन्तु मनाक्, मङ्गलमिव मरणमपि मुष्टिगतमेतस्य मकारस्य। मधुरमन्वीक्ष्यतामिदम् -

मूर्च्छन्मधुरमहिममनोहरेषु मिलन्मरन्दमाकन्द-मन्दार-मधूक-मालूर-मातुलुङ्ग-मुचुकुन्दादिमहितमहीरुहेषु, मलयमरुन्मनोज-माधविकामण्डपेषु, मधुरामोदमांसलेषु माघीयमालतीमरुबकमदनमृणालेषु, मुदितमरालमल्लिकाक्ष-मिथुनमञ्जुलेषु मेदुरमृगाङ्कमरीचिमाद्यन्मन्दाकिनी-मधुरमण्डलेषु, मोदते मकारस्यैव महिमा।'

मेलकमालोकयितुमागतानामीक्षकाणामेको मन्दमुपहस्य मध्ये मन्द्रमवोचत्-''मर्कटमकरादिषु मूर्खता-मिथ्यादिषु, मद्य-मांसादिषु मलिनेष्वपि मकारमहोदयो मूर्तिमात्मीयामाविष्करोत्येव।

मनसि मुदमावहतामेषामट्टहासमेघमाला मण्डपमाच्छादयामास।

मकारमहाशयानां मण्डलमक्षुभ्यत्। मार्मिकाणां मानसमुत्तरमर्पयितुमुदकण्ठत, मानिनामान्तरे मालिन्यमुदैत्।मत्सरिणाममर्षमीलितमभून्मनः। मनस्विमकारो मन्दमन्दमधरमदशत्। मल्लमकारो मुद्गरमस्पृशत्। मुसलिमकारो मुसलमलोकयत्। मुखरमकारो मुष्टिमबध्नात्। महारुद्रमकारो मौलिमान्दोल्य मन्युमदर्शयत्।

मण्डपे मन्युमेघावलीमिमामुत्थितामालोक्य मण्डलेश्वरो मञ्चमध्यमागत्य मण्डपमभितो मुखमभ्रमयत्। मण्डलमात्मीयमधुना मौनमालम्बितुमादिशत्। मेलकागतानामुट्टङ्कनामिमामुत्तरयितुमेवमारेभे-

''मलिनमिदमुत्तममिदमिति मिथ्यामानवतां मानवानामेव मन्थरा मतिः। मनुजानामात्मनि, मानं, मर्कटादीनामवमानममूलकं मन्यन्ते मार्मिकाः। मौलिकमीमांसायामखिलमिदमेकम्। मार्मिकमनीषिणामन्वेषणा मर्कटमेवेमं मानवस्य मूलमाख्याति। मर्कटममेध्यमाचक्षाणा मन्ये मारुतिमूर्तिमिमामर्हयन्त्येव। मद्यमांसादिमकारमण्डलमपि मातृमण्डलमर्हयतां मार्गे मेध्यमाम्नातम्। मलमवमानेन मिषदभिर्मलाधिष्ठानमिदमङ्गमिति मनीषिणामुदीरितमश्रुतं मन्ये। माऽस्तु मोघा मीमांसा। मुनीनामभ्यर्हणीयमखिलेशमिव मकारमिममुत्तमे मध्यमेऽधमेऽपि मिलितमालोकयध्वमध्यक्षम्।

मीलनमुपयाति मार्तण्डे मेलकमिदमवसितमभूत्। मेलकार्थमागतानामभिनन्दनेन, मित्राणामुरसि माल्यावमोचनेन, माणवकेभ्यो मोदकानामर्पणेन मङ्गलमावसानिकमन्वष्ठीयत।

महामण्डपमिममभितो मेलकमुपलक्ष्य मिलितानामनेकमण्डलानामनेके मण्डपा महोत्साहिभिर्मधुरममण्ड्यन्त। मण्डलमुख्यमेलकमिदानीमवसितमवगम्य मण्डलीयमहोत्सव' मकल्पयन्मण्डपेषु। मद्रमण्डलीया मल्लमेलनमाह्वयन्। मालवीया 'मित्रमण्डल' मध्यवेशयन्। मत्स्यमण्डलीया महाकविमहोत्सवमघटयन। मानमहीपमुपस्तुवतामेषामियमुक्तिर्मण्डप-मिममुपगतानमोदयत्-

**''मत्तारातिकुलस्य मानहरणो मित्रार्तिचिन्ताहरो**
**मीलन्मानिजनेषु मुक्तविभवो मूर्द्धाभिषिक्ताग्रणीः।**
**मेधावन्मनुजेषु मैत्रमधुरो मोघेतरश्रीसखो**
**मौर्वीभृन्महिपेषु मञ्जुमहिमोन्मः स्यात्स मानप्रभुः।।''**

# रूप्यकरामस्यात्मकथा

मम नाम रूप्यकशर्मा। अभिजनो भारतवर्षम्। निवासस्थानमिदन्तयाऽनिर्देश्यम्। यतोऽहं सर्वत्र सञ्चरामि। यद्यपि केचित्कृपणमतयो मां निगडयित्वाऽन्धकूपे स्थापयन्ति, परमहं शीघ्रमेव तस्मादपि स्थानात्स्वैरं बहिर्निःसरामि। मम गतिं न केचिदपि रोद्धुं प्रभवन्ति। विष्णुरिवाहं सर्वगः सर्वभर्ता च। मम मत्कुटुम्बिनां चादिम उद्भवो रजतखनिरस्ति। अहं हि तस्यां खनावनन्तकालान्निमग्नोऽभवम्। मम हि समन्तात् 'आसीदिदं तमोभूतम्'। संसारे कुत्र किमासीदिति नासीन्मे विदितम्। अहमिदानीं सर्वत्रगामी, सर्वज्ञानसम्पन्नश्चास्मि, परं तस्मिन्काले पङ्गूकृतपराक्रम इव मूढमवस्थितोऽभूवम्। शनैर्मम मनःस्फुरणमभूत्- 'एषोऽहं बहिः स्याम्' इति। परमहं तस्मादन्धकूपादात्मना बहिर्निःसर्तुं न किञ्चिदपि प्राभवम्। नासीन्मे साम्प्रतमिव तदा ह्येतादृक् समुज्ज्वलं रूपम्। तदाहमव्यक्तलक्षण इव रजतराशिरूपे गूढमवस्थितोऽभवम्। तस्मिन्सन्तमसे निमग्नस्य मम यादृशं दुःखमासीत्तन्मे मानसमेव वेत्ति। अस्तु-प्रकृतिः किल लीलामयी प्रख्यायते। एषा हि प्रतिक्षणं नवनवानि परिवर्तनानि दर्शयति। कस्यचिदपि दिनानि नैकसमानानि यान्ति। सुखान्तरं दुःखं दुःखोत्तरं च सुखमिति सर्वदैव सर्वैरेवानुभूयते। प्रकृतिप्रवाहप्रतितस्य तस्य ममापि दशापरिवर्तनमभूत्। संसारे यथा मम जन्माऽभवत्, सा कथैव सम्प्रति प्रस्तूयते।

एकदा एको मलिनवस्त्रवाही कर्मकरस्तस्मादाकरात्खनित्वा रजताकारे गूढमवस्थितं मां तस्मादन्धकारमयात्स्थानाद्बहिरानयत्। खण्डखण्डानि मृत्तिकामलिनानि ममाङ्गानि एकस्यां बलीवर्दशकट्यामस्थाप्यन्त। सा शकटिः शीघ्रमेव दिल्लीराजधानीं प्रति प्रस्थिताऽभवत्।

दिल्लीराजधान्यां तस्मिन्समये यवनसम्राज औरङ्गजेबस्य शासनमासीत्। स हि सम्राड् मादृशेषु क्रूरतरः समाख्यायते। शीघ्रमेवाहमग्नौ पातितोऽभवम्। अग्नौ पतितस्य मम सर्वाण्यप्यङ्गानि छिन्नभिन्नान्यभवन्। हन्त! हन्त! यः सम्राट् निजभ्रातॄनपि निपोथयन् न दयाञ्चक्रे तस्य शासने मम सेयं दशा भवेदत्र किमाश्चर्यम्? परं मदर्थे कृतः सोऽयमपकारोऽपि मत्पक्षे हितावहोऽभवत्। मम शरीरे विलग्नं समग्रमप्यवकरजातमग्निविशोधनात्पृथगभूत्। शतसहस्रवर्षेभ्यः सञ्चितममात्मनो मूलं स हि तनूनपाद् भस्मीचकार। वेदभगवता सत्यं सत्यमुक्तमस्ति- 'नाऽतप्ततनूर्भद्रमश्नुते' इति। तप्ततनोर्ममापि रूपं दिव्यमभूत्। मत्कान्तिरन्धकारमयमपि तद्गृहमुज्ज्वलीचकार। तादृक् तेजोमयमात्मनो रूपं दृष्ट्वा मम नितान्तं हर्षोऽभवत्। किन्तु दुर्जनसङ्गस्य यत्फलं सर्वैरवाप्यते ममापि भाग्ये तद्दुष्परिहरमसिध्यत्। मम पृष्ठे तप्ततप्ता राजमुद्रा उदकीर्यत, यस्यां हि पिपीलिकापदसदृशानि कस्याश्चन लिपेरक्षराणि संलग्नान्यासन्। अस्तु भाग्येन यद्दुःखं दर्शनीयं तत्किल मया सोढमेव किन्तु सर्वातिशायी विषादो मम तदाऽभूत् यदा हि तप्ततनोरपि मम मूल्यनिर्धारणमभूत्। हन्त हन्त मम ललाटे षोडशाणकमात्रं मूल्यं तप्तमुद्राङ्कितमक्रियत। पृष्ठे च मम जन्मसम्वत्सरो राज्यशासनसङ्केतश्च चिह्नितो ऽभवत्।

यत्किञ्चिदस्तु सर्वविधं दु:खं सोढ्वापि मम मनसि य: प्रमोदोऽभूत्तस्मिन् स्वजातिविजयस्य राजपताकान्तर्हिताऽस्ति। यवनसम्राडौरङ्गजेबो हिन्दुसंस्कृते: परमो विरोधी। स हि हिन्दुभ्यो जजियानामकं धार्मिककरं गृह्णाति। आर्याणां धर्ममर्यादा: सावहेलं मथ्नाति। परं मया सोऽपि विजित:। यावनधर्माग्रहमयेऽपि तस्य शासनसमये संस्कारविलोपस्य का कथा, मध्येराजप्रासादं दुन्दुभिघोषपूर्वकं मम द्विजातिसंस्कारोऽभवत्। एकवारं मम खनेर्जन्म, अग्नौ विलापनेन संस्कारोत्तरं द्वितीयं जन्म। मम द्विजातिभावे किमु कोप्यक्षरमुखो विप्रतिपद्येत? ब्राह्मणादय: किल मातुर्गर्भादेकवारमेव वास्तवं जन्म लभन्ते। द्वितीयं जन्म तु मन्त्ररूपाणि कियन्तिचिदक्षराणि मुखादुच्चार्यैव, नाममात्रार्थं भवति। यत्राग्निर्वराक: केवलं साक्षिभूत एव भवति। वर्तमानसमये तु अक्षरोच्चारणरूपोऽपि स द्विजत्वसंस्कारो वास्तव एव नाटकरूपेऽभिनीयते, वदत, कीदृशं तेषां द्वितीयं जन्म? एवं सत्यपि ते भूयसाऽभिमानेन आत्मनो द्विजत्वं सर्वत: प्रख्यापयन्तो दृश्यन्ते। अपि मम द्विजत्वसंस्कारस्य विरोधं कर्तुं तेषां मुखमुन्मुद्रितं भवेत्? मम हि प्रत्यक्षं द्विवारं शरीरस्यैव जन्म भवति। ममेव ब्राह्मणादिद्विजातीनामपि यदि शरीरमग्नौ निक्षिप्येत तर्हि द्विजत्वसंस्कारस्य का कथा, और्ध्वदैहिकसंस्कारोऽपि तदैव भवेत्। अस्तु, मम द्विजत्वसाक्षिणो नैको वा द्वौ वा। मत्समकालमेव कृतसंस्कारा: सन्ति मम पर:सहस्रा भ्रातरस्तत्साक्षिण:। द्विजत्वसंस्कारस्य प्रत्यक्षप्रभावोऽस्माकं शरीरेषु स्पष्टमद्यापि प्रतिभासते। यतो हि कृतसंस्कारा वयं सर्वेपि भ्रातरो रङ्गे रूपे आकारे गौरवे मूल्ये सर्वतोऽपि समाना:। किमेवमन्येषु द्विजातिषु सोऽयं प्रत्यक्षप्रभावो विलोक्येत?

अस्तु कृतसंस्कारा वयं सर्वेपि भ्रातरो राजभवनमनीयामहि। तत्र च सुदृढेषु दोरकजालमयेषु वस्त्रगृहेषु पूरिता अक्रियामहि। अन्धकारमये खनिगृहे न जानीमो वयं कियत्कालादारम्य निगडिता अभूम, परं तस्मिन्समये अज्ञातवासस्य तावद्दु:खं नाभवत्, यावदस्मिन् समये स्वल्पकालस्यापि निगडनदु:खं सहनीयमभूत्। एकस्मिन् दिने, अस्माकमधिकारिणाऽऽगत्य अस्मत्समक्षमेव सेनाध्यक्षाय प्रोक्तम्– 'बीजापुरे घोरयुद्धं प्रचलितमस्ति। तत्सहायतार्थं सम्राडाज्ञया विंशतिसहस्ररूप्यका इतो दक्षिणापथं गमिष्यन्ति। रक्षकमश्वसैन्यं सह नीत्वा भवानेताँस्तत्र प्रापयतु। यात्रासम्भारमद्य रात्रावेव कल्पयित्वा प्रातरेव इत: प्रस्थितो भव'। एनं सम्वादमाकर्ण्य सर्वेषामेवास्माकं हृदयमकम्पत। नवीनस्थानदर्शनस्य यदौत्कण्ठ्यमासीत्सर्वं तद्विलीनमभूत्। तत्र युद्धस्य नाम श्रुत्वा सत्यं सत्यमेव वयं सन्त्रस्ता अभूम।

प्रातरेव वयं त्वरितगामिनीर्घोटकशकटीरारुह्य दक्षिणयात्रामकुर्म। सुदृढघोटकारूढा द्विशतमश्ववारा नग्नखड्गान् स्कन्धे वहन्तोऽस्माकं रक्षणसेवायां परितोऽचलन्। तदधिपति: सावधानमस्मासु दृष्टिं निक्षिपन् सर्वेषामग्रतोऽचलत्। यथैव वयं दक्षिणसीमायां पदं निक्षिपामस्तथैवास्माकमुपरि सहसा विपदा पदमक्रियत। एकदा सायंसमयात्पूर्वमेव सभयं कम्पमानेन रक्षकसेनापतिना स्वाधिकृतेभ्य: प्रोक्तम्– 'भो पश्य, पार्श्ववर्तिन: पर्वतात्खड्गहस्ता:

कतिचिदश्वारोहा इत एवाभिपतन्ति! अरे! इमे तु महाराष्ट्राः सन्ति!! भोः सावधानाः सन्नद्धखड्गाभवत। एतेषां सङ्काशात् रूप्यकरक्षा सुतरामावश्यकी'। यावदयं सेनापतिर्वाक्यं परिसमापयति ततः पूर्वमेव तेऽश्ववाराः परितोऽस्मान् पर्यवेष्टयन्। यवनसेनापतिर्निजसैन्येन सहैतान् पर्यवेष्टयत्। पुनः किमासीत्। घोरतरं युद्धमभूत्। उभयतो रक्तनदी प्रावहत्। शस्त्रझणत्कारेण शून्यः स वनोद्देशो मुखरितोऽभवत्।

सुदृढपट्टबोरकनिलीना वयं तन्तुजालच्छिद्रेभ्यस्तदेतद्भयानकं दृश्यमपश्याम। हन्त हन्त अस्माकं कृते इयतां जीवानामेवमकारणं हत्या भवति! बहवोऽस्माकं भ्रातरो बोरकनिष्पीडिता अपि मनुष्याणाममीषामज्ञानं दृष्ट्वा निजहास्यमवरोद्धुं नाशकन्।

महाराष्ट्रसैन्यप्रमुखो यवनरक्षकान्पराजित्याऽस्मत्सम्मुखोऽभवत्। अवदच्च स्वसहचरमेकं युवकम्- 'विजयसिंह! पश्य एषु बोरकेषु किमस्ति!'। युवको निष्कोषस्य खड्गस्य कोट्या बोरकमेकमविध्यत्। हन्त हन्त खड्गकोट्या मम कतिपयानां भ्रातर्णीं गात्रं विदीर्णमभूत्। करुणरवं मुञ्चन्तस्ते विपाटिताद् बोरकमुखान्नीचैर्भूमितलेऽलोठन्। अस्मान् निपततो दृष्ट्वा सेनापतिः सुप्रसन्नोऽभवत्। 'अहो ज्ञातम्! इमे रूप्यका बीजापुरं प्रति गच्छन्ति। अस्तु त्वमिदानीमिमान् नीत्वा एभिर्वीरैः सह छत्रपतेः सकाशं गच्छ। अहं वनान्तपर्यन्तं भ्रमित्वा यवनसैन्यसम्वादं च विदित्वा त्वरितं परावर्ते'।

हन्त वयमेकस्य हस्ताद्रक्षां प्राप्य द्वितीयस्य हस्ते न्यपताम। परं यवनस्य संसर्गादार्यसंसर्गोऽस्माकं दुःखाकरो नाभवत्। विजयसिंहोऽस्मान्नीत्वा वनगुल्मेषु निलीनोऽभवत्।

एवं मया मोगलसम्राजां समये बहूनि परिवर्तनान्यवलोकितानि। बहुतराणां राज्यानामुत्थानपतनानि मत्समक्ष एवाऽभवन्। सर्वत्रैव मम प्रभावः प्रासरत्। दुर्दमनीयां मम शक्तिं निरोद्धुं न काऽप्यन्या शक्तिः प्राभवत्। मम प्रभाववशीकृता राजपुत्रदेशा मोगलसाम्राज्यस्य सेवायामात्मनो गौरवं मर्यादां, किं बहुना साम्प्रदायिकीं पद्धतिमपि विसर्जयामासुः। परं धार्मिकी बर्बरतैव यवनानां शासनं धूलिसाच्चकार। औरङ्गजेबस्योत्तरमेव मोगलसाम्राज्यमिदं विच्छिन्नमभूत्। एतस्मिन्नुत्क्रान्तिसमये मम शक्तिः पूर्वतोऽधिकं प्रावर्धत। असम्भावनीयान्यपि कर्माणि मद्बलेन सुसम्भाव्यान्यभूवन्। किन्तु तेषु असत्कर्मणामेव संख्या वृद्धिं प्राप। एकस्य राज्यस्य मन्त्रिणोऽपरराज्यस्य सेनापतये प्रभूतान् मद्भ्रातर्न् समर्प्य तद्राज्यमात्मसाच्चक्रुः। मद्भ्रातर्णीं लोभवशगाः स्वकीयं राजानमेव अन्ये जघ्नुः। सर्वस्मिन्देशे मत्कृते लुण्ठनं मारणं च प्रासरत्। बलिनो जना मल्लाभलोभेन दस्युवृत्तिमधारयन्।

लोका मां मद्भ्रातर्श्च नानायत्नैरगोपयन्। केचन जीवन्तमेव मां भूमौ न्यखनन्। यवनपद्धत्यां मरणोत्तरभाविना भूमिसमाधिसंस्कारेण मां जीवद्दशायामेव समस्कुर्वन्। केचन असंस्कृतेषु अवकरस्थानेषु मद्भ्रातर्न्निपात्य तदुपरि गोमयादिराशीन्निपातयामासुर्येन दस्यवोऽस्माकं सत्तां न जानीयुः। केचिज्जीर्णवस्त्रेषु कन्थासु चास्मानसीव्यन् येन न कश्चिदस्मद्विद्यमानतां विद्यात्। यदि कश्चिदस्मानगणयत्तर्हि अतिनिभृतं प्रकोष्ठे स्थित्वा निःशब्दमेव अस्माकं संख्यामकरोत्। यदि कश्चिदस्मद्भ्राता हस्ताद् भूमौ निपत्य आघातजनितया

पीडया करुणाक्रन्दनमप्यकरोत्तदापि सोऽस्माकमकरुण: स्वामी हस्तेन तं भूमौ निष्पीडयामास येन तन्मुखाच्छब्दो न नि:सरेत्। अन्यत्किम्–परस्परसमागमेन प्रसीदन्तो वयं यदि परस्परं किञ्चिदपि शब्दमकुर्म तर्हि वज्रकर्कश: सोऽस्माकं रक्षकोऽस्माकं मुखमुद्रणमकरोत्। हन्त हन्त एवंविधं घोरनिगडनं न पूर्वं कदाचिदप्यस्माभिरनुभूतम्।

यत्र शब्दे कृतेऽपि कण्ठमालिका निष्पीडयते तत्र का कथा बाहर्नि:सारणस्य? उन्मुक्तस्थानेषु बहिर्निर्गत्य निर्मलवायुसेवनमस्माकं भाग्ये अतिदुर्लभमभूत्। अन्धकारमयेषु स्थानेषु निष्करुणं निपीडितानामस्माकं श्वासो निरुद्धोऽभवत्। केचिद् बर्बरा मां चुल्लिकायास्तले निखन्य प्रतिदिनं मम शिरसि दहनमदीपयन् परं हन्त अहमपि वज्रमयजीवनोऽस्मि। भूमौ निखातस्यापि मे जीवनशक्तिर्नापजगाम। प्रत्युत यदाहं भूमिगर्ताद् बहिर्भवामि तदाहं द्विगुणितोत्साहेन मत्स्वामिनां कार्यं साधयामि। अस्ति किमेषा शक्तिरन्येषामपि जनानाम्? पण्डिता: केवलं मुखेनैवोद्घोषयन्ति परमहं सत्यं सत्यमेव 'अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तयेत्' इत्यस्य प्रत्यक्षमुदाहरणमस्मि।

अजरामरवत् यद्यप्यस्माभि: स उत्क्रान्तिसमयोऽतिवाहित: परं भूमिगर्ते निखातानां बहूनामेव मद्भ्रातर्णिां नीलिकारोग: समभवत्। हन्त हन्त तद्रोगकारणेन ते विवर्णवदना अप्यभवन्। परम्, अतिमन्दमतीनां केषाञ्चिद् केषाञ्चिन्मत्स्वामिनां मौढ्यवृत्तान्तं स्मृत्वा साम्प्रतमपि दु:खं च क्रोधश्च हास्यं चागच्छति। अस्मिन् युगे शिक्षितानां तु का कथा, निरक्षरभट्टाचार्या अपि अस्माकं गौरवं प्रभावं च सुतरामवगच्छन्ति। मम सेवां तथा कुर्वन्ति यथा यद्यहं मलस्थानेऽपि निपतितो भवेयं तर्हि पुरीषमलिनाङ्गमपि मां सावधानमुत्थाप्य सादरं निजवक्ष:स्थले (अङ्गवस्त्रसम्पुटके इत्यर्थ:) स्थानं दद्यु:। मम रोगाणामपि ते सम्यक्प्रकारेण मार्मिका भवन्ति। अतएव मम नीलिकारोगं न किञ्चिद् गणयन्ति। स्वल्पेनैवोपचारेण मम तं दोषमपाकृत्य पुनर्मां मनोहराङ्गं सम्पादयन्ति। परं प्राक्तनानां मुग्धतां शृणुत–

वैष्णवसम्प्रदायस्यैके गोस्वामिमहाभागा आसन् येषां कोषोपनामके अस्मत्सजातीयानां कारागारभवने बहवो मे भ्रातरश्चिरान्निरुद्धा अभूवन्। गोस्वामिमहाभागस्याधिकारी बहिर्वल्लभसम्प्रदायसेवकोऽपि तत्त्वतोऽस्माकं सम्प्रदायपूजकोऽभूत्। स ह्यस्माकं रसज्ञ आसीत्। कोषभवनेऽस्मान् राशीभूतानवलोक्य लोलुपस्य तस्य लालापातोऽभवत्। स ह्यस्मान् येन केनापि प्रकारेण स्वसमीपे नेतुमुद्योगं चक्रे। अहं तु वदिष्यामि स ह्यतीव दयालुरभूद् यतो हि प्रकाशपवनादिशून्यादन्धकारमयादस्मात्स्थानाद् बहिर्नि:सारयितुमुपायमाविश्चक्रे। तथा ह्येकदा गोस्वामिमहाभाग: केनापि प्रसङ्गेन स्वकोषागारं प्राविशत्। अन्धकारमये कोणे भूमिपतितानस्मान् मलिनाङ्गानवलोक्य स ह्यधिकारिणमपृच्छत्– 'अयि भो: इमे रूप्यका एवमवस्था: कथं सञ्जाता: ? नैषां वराकाणां पूर्वमिव सा कान्ति: ?'। अधिकार्यवदत्– 'जय! कृपानाथ! एषामयं विकार: समभवद्येनेयं विवर्णता जाता। सर्वतोऽधिकं दु:खमिदमेवास्ति यदेषां संसर्गेण अन्येषामपि तद्रोगसंक्रान्तेर्भूरि भयम्। भवन्ति प्रायश: सङ्क्रामका व्याधयो नूनम्।' पुन:

किमासीत्, शीघ्रमेव वयं बृहत्सु वंशकरण्डकेषु संस्थिताः सूर्यातपसेवनार्थं सौधपृष्ठे आनीता अभवाम। अस्मासु ये नीलाङ्गास्ते पृथगक्रियन्त। चमत्कृतवदनास्तु मन्ये पुनर्नीलताऽऽपादनार्थं द्विचतुरेव दिनैः पुनस्तमेव कारागारमनीयन्त। मन्ये, कथनस्यावश्यकता न भवेत् यत् नीलवदनभट्टाचार्या बहवो मे भ्रातरोऽधिकारिमहाशयस्य गृहसीमानमपश्यन्। अस्मासु इतस्ततो विपर्यस्ताः केचिद्भ्रातरस्तु अन्यान्येषामपि भृत्यानां जीर्णशीर्णानि भवनान्यध्यवात्सुः।

एवमेवाऽस्माकं गुणग्राही कश्चिच्चतुरमतिः कञ्चन धनिकं ग्रामीणमवदत्– 'पट्टकिल! किं न पश्यसि, गृहकोणे त्वया भूमिगर्ते निखाता इमे वराका रूप्यका घुणैर्निःसारीकृताङ्गा अभूवन्। चातुर्मास्योत्तरं घुणैर्विद्धस्य धान्यस्येव विवर्णतां किं नावलोकयसि प्रत्यक्षम्? अस्तु सम्प्रति एतान् शूर्पे स्थापयित्वा– उच्चतमे स्थाने स्थितः, प्रत्युत कूपस्य गोणिका (गूनी) शीर्षे स्थितस्त्वमेतान् वर्षय। ये किल निःसारतया लघूकृताङ्गा भविष्यन्ति ते वायुवेगेनोड्डीय पृथग् भविष्यन्ति। ये सम्प्रति कार्यक्षमास्ते त्वेकस्मिन्नधःस्थाने राशीकृता भविष्यन्ति।' एकं किल सरलमतिं तं धूर्ततया वञ्चयित्वा स ह्यस्मानर्द्धतोऽधिकानहरत्। एवं किल स्थाने स्थाने रुद्धा वयं नीलिकारोगाक्रान्ता अभूम, किन्तु तस्मिन्समये सावधानं गोपनेऽपि वयं स्थानस्थानतो लुण्ठकानां यवनदस्यूनां च भुजपञ्जरपतिता अभूमैव।

अहं तस्मिन् समये यावत्सु यादृशेषु च स्थानेषु अभ्राम्यम् तावत्सु तादृशेषु च स्थानेषु गमनस्य न वायोर्नापि भगवतः सूर्यस्यापि शक्तिः। इमौ हि जगत्प्राणो जगत्साक्षीति च लोकेषु विश्रुतौ, परं यत्रानयोः सञ्चारोऽपि निरुध्यते तत्राप्यहं निरर्गलं प्राविशम्। निरुद्धधनसञ्चारेऽस्मिन् सङ्कटसमये अहमेव जगत्प्राणः समभवम्। साक्षिरूपेण मया जगति यावद्भ्रान्तं न तावदन्यः कश्चिद् भ्रमेत्, तर्हि वदत कथमहं जगत्साक्षी नास्मि? अहं हि असूर्यम्पश्यानां यवनसम्राण्महिषीणां राजसौधानि कतिधा प्राविशम्। लोकेष्वद्वितीयसुन्दरीं सम्राट्प्रियतमामसम्वृतावस्थायां साक्षात्सम्राडपि न सर्वदा पश्यति परमहं तासामपि संनिधिमकण्टकमगच्छम्। बन्दीकृत्वाऽऽनीये अवरोधगृहेषु स्थापिता राजमहिला अपि मां निभृतमात्मनः समीपे न्यवासयन्। सम्भ्रान्ता अन्तःपुराधिकारिण्यः कौशेयवस्त्रावृतं मां कञ्चुकीष्वस्थापयन्। कथयत किमवशिष्यते?

दुर्दान्तस्य यस्य यवनसम्राजः समीपे गमनं महामहतां भूमिपालानामपि भाग्ये नाभवत् तस्यैव भारतचक्रवर्तिनः करकुलिशे न तु करकमले कृषीवलोपायनीकृतोऽहं बहुधा प्रायासिषम् कस्य वा दौवारिकस्य दर्पो भवेत् यो मां निरुध्यात्? प्रत्युत यदि कञ्चिदन्यमपि कश्चिन्मम मुखमदर्शयत्, मन्मुखं दृष्ट्वैव ससम्भ्रमं स (दौवारिकः) दूरमपासरत्, सादरं च तं जनं प्रावेशयत्।

महामहाप्रतापिनं सम्राजमारभ्य, दीनहीनस्य जीर्णशीर्णकुटीपर्यन्तमपि निःशङ्कमहमभ्राम्यम्। अहं यद्यात्मनो भ्रमणस्य पूर्णां कथामुल्लिखेयं तर्हि शकटिवाह्य एको ग्रन्थः सम्पद्येत। महाभारतं किल पञ्चानां पाण्डवानां चरित्रतया प्रख्यातम्, परं मद्भ्रमणकथायां प्रक्रान्तायां तु केवलं ममैवैकस्य चरित्रेण द्वितीयं महा महाभारतं प्रस्तूयेत। विवेकिनो ह्येतावत्कालव्यापिनो मद्भ्रमणस्य विस्तारं स्वयमनुमिनुयुः, अत एव परित्यजामि तमेनं

विस्तरम्। किन्तु मम प्रभावः सर्वत्र व्याप्तोऽभूदिति सर्वैः सारतया सन्धार्येत नूनम्।

यद्यपि ममातङ्कस्तस्मिन्काले सर्वेषु प्रासरत्, सर्वत्र च मम समादरः समभवत्, परं बर्बराः सत्यं बर्बरा एव। आधुनिकशिक्षितास्तानेतान् यवनानशिक्षितानादुस्तदिदं प्रायः सम्यगेव। मयाप्येतदनुभूतम्। एतेषां समये मम पर्याप्तरूपेण सम्मानः समभवत्परं सर्वदा मम प्राणसंशयोऽप्यवर्तत। आवश्यकतायां सत्यामेते अविचारितमेष मामग्नौ न्यपातयन्! मम शरीरं शुद्धधातुविधृतमिति कृत्वा तदेतद्वह्नौ विलाप्य नानाविधभूषणानि निरमान्, मनसि महामहोत्सवं चाऽन्वभवन्। मुनिना दधीचिना वज्रनिर्माणार्थमेकवारमेवात्मशरीरं देवेभ्यो दत्तं स्यात् यत्परिवर्ते तेनाक्षया कीर्तिरप्युपार्जिता, परं मया बहून् वारानात्मशरीरं मनुष्येभ्यो दत्तम्। परं घोरमकृतज्ञता मनुष्यजातेः! यत्कीर्तिर्दूरे, प्रत्यहमकीर्तिकालिम्ना मम चरित्रमेभिर्दूषितम्। एते हि मां 'श्वेतडाकिनी'ति व्यपदिशन्तो लोकेषु घोरं कलङ्कयन्ति। मम निन्दायां बहूनि काव्यान्येव निर्मितान्येभिः।

न केवलमयं प्राणसङ्कट एव, आसीन्न्यूनताप्यस्मज्जातेः। अस्मिन्कालेऽस्माकं यथा संख्यावृद्धिर्जाता नासीत्तथा पूर्वम्। एकोऽपि मम भ्राता यस्य सविधे बभूव, स एव 'मन' द्वयतोऽप्यधिकमन्नं लेभे, यद्धि एकः पुरुषो वोढुमपि नालं बभूव। लोकास्तामिमामुन्नतिं व्यपदिशन्ति, परमहं तु स्पष्टं पश्यामि, यदेतेन अस्मज्जातेर्न्यूनताऽभवत्। अस्मद्भ्रातर्णां संख्यावृद्धेस्तादृशोऽवसर एव नाभवत्। इदानीं मम परिवर्ते तावदेव अन्नं लभ्यते यावदसौ सुखेन कक्षे कृत्वा भ्रमितुं प्रभवेत्। परमेतेन मम जातिवृद्धिः कियदभवदिति परितो दृश्यताम्। देशे सर्वतो मज्जातिरेव भ्राम्यन्ती विलोक्यते। किमासीदेतत्पूर्वम्?

***

# श्रीहनूमतः आदर्शचरितम्

भगवान् वाल्मीकिरादिकविः प्रख्यातः। एतन्निर्मितं श्रीरामायणमादिकाव्यमिति निखिलेऽपि भूमण्डले महद् गौरवमावहति। अस्मिन् पवित्रतमे पुस्तके प्रत्येकपात्रस्य चरित्रमादर्शभूतम्। इदमेव कारणमस्ति यद् रामायणकथायाः समस्तेऽपि भूमण्डले सर्वतोऽधिकः समादरः। केवलं भारतीयभाषास्वेव न, विश्वस्य यावन्मात्रसभ्यभाषासु रामकथा अनुवादरूपेण सर्वतः प्रचरति इति हि लोकसाहित्यस्य मर्मज्ञा वैदेशिका अपि कथयन्ति। रामायणेऽस्मिन् भगवान् हनूमान् प्रधानतमं पात्रम्। रामायणरूपस्य शरीरस्य मेरुदण्डस्वरूपं श्रीहनुमतश्चरित्रमिति नातिशयोक्तिः। कथानायकस्य श्रीरामस्य यत्र यत्र कठिनं सङ्कटं समागच्छति तत्र तत्रैव श्रीहनुमान् सहायकरूपेण समुपतिष्ठति। युद्धादिषु वीरताकार्येषु हनूमान् विश्वमात्रेऽपि सुप्रसिद्धः। अत एव हि हनूमान् वज्राङ्गः (बजरङ्ग) इति नाम्ना प्रसिद्धो जातः। अपि पुरातनेषु इतिहासेषु अन्यस्यापि कस्यचित् प्राप्यते एवंविधा वीरता? चरित्ररक्षायाम्, इन्द्रियवशीकरणे हनूमान् विश्वविख्यातः। किं बहुना, 'हनूमान् जती' (यतिः) इति हि साधारणजनोऽपि जल्पति। सत्यवादिता, दया, धैर्यम्, चतुरता, नीतिः, अवसरज्ञता, इत्यादयः सर्वेऽपि सद्गुणाः श्रीहनूमतश्चरित्रे स्थाने स्थाने प्राप्यन्ते। स्वामिभक्तिस्तु विश्वमात्रेऽपि विख्याता। श्रीरामचन्द्रस्य कार्यार्थं निजस्य प्राणानपि न परिगणयति भगवानयम्। अद्भुताया एतस्यास्तपश्चर्याया एव तदेतत्फलं यत् सेवकोऽपि भगवान् हनूमान् अद्य जगन्मण्डले सर्वेषां सेवनीयः, प्रत्यक्षफलदायको देवः सञ्जातः। कथानायकस्य भगवतः श्रीरामचन्द्रस्य पिता, पुत्रः, अन्यत् किं, लक्ष्मणसदृशो भ्रातापि तादृशः पूज्यो न जातो यादृशो भगवान् पवनतनयः। एतस्योपासना भूमण्डले सर्वत्रापि प्रचलति। अपि प्राचीनेषु इतिहासनिबन्धेषु दृश्यते एवंविधमुदाहरणम् अन्यदपि?

सर्वाऽपेक्षयाऽपि आश्चर्यभूतो गुणः– बुद्धिमत्ता, नीतिचतुरता, विवेकः इत्यादिकः। यो हि मल्लकार्यं करोति तस्य मस्तिष्कं बुद्धिकार्यस्य कृते अतिप्रशंसनीयं न भवतीति शरीरपरीक्षकाः प्राहुः। यावज्जीवं सङ्ग्रामे शस्त्रपरिचालको योद्धा अतिमार्मिको बुद्धिमान् नीतिकुशलोऽपि भवेत् इति हि दुर्लभं नूनम्। किन्तु भगवान् हनूमान् बुद्धिकार्येषु अपि सर्वाधिकः। रामकथायाः स्थले स्थले अयं श्रीरामचन्द्रस्य मन्त्री इति प्रत्यक्षं प्राप्यते। लोकभाषायां तु 'रामदीवान' इति हि साधारणेषु अपि प्रसिद्धः। अतीव विस्तारसापेक्षः सोऽयं विषयः, किन्तु निबन्धेऽस्मिन् एकेनैव उदाहरणेन तदिदं दर्शयितुं प्रयत्नं करोमि।

हनुमतश्चातुर्येण रामसुग्रीवयोर्मित्रता जाता। ऋक्षाणां वानराणां च अपारं सैन्यमादाय भगवान् श्रीरामचन्द्रः सागरस्य तटे समागच्छत्। अधुना समुद्रस्योल्लङ्घनं कथं भवेत्, वानरसेना परपारे कथं गच्छेत्, लङ्कायां विजयः कथं भवेत् इत्येव विचारः प्रचलति। सेनापतीनां मन्त्रिणां च विचारसभा सन्निविष्टा। सेनापतिः सुग्रीवः, जाम्बवान्, अङ्गदः, नलः, नीलः, मैन्दः, शरभः, श्रीहनूमान् अन्याये च प्रधानप्रधानवानराः सङ्गताः। मध्ये च लक्ष्मणेन सहितः

श्रीरामचन्द्रस्तिष्ठति। अतीव मार्मिको गुप्तश्च विचारः प्रचलति। विचारसभायामस्यां कस्यापि न साम्प्रतमवसरः प्रवेशस्य। सेनापतेः साङ्ग्रामिकेण आदेशेन महावीराः सेनाध्यक्षाः साम्प्रतं विचारसभायां द्वारदेशे समवस्थिता। कस्य वा सामर्थ्यं भवेद् यत् सभायामस्यां बलात् प्रवेशस्य साहसं कुर्यात्?

अस्मिन्नेव समये द्वारोपरि धीरः, प्रशान्तः, करुणः, किन्तु बलव्यञ्जकः स्वरः अश्रूयत–

**'निवेदयत मां क्षिप्रं राघवाय महात्मने।**
**सर्वलोकशरणाय विभीषणमुपस्थितम्।।'**

विभीषणः कः? सीताऽपहारकस्य रावणस्य भ्राता? यस्य शत्रोः पराजयाय समुद्रोल्लङ्घनादयः कठिन-कठिना उपाया विचार्यन्ते, तस्यैव शत्रोः भ्राता अयम्? सोऽपि अस्माकं गुप्तमन्त्रणां ज्ञातुम्, रावणाय तत्संवादं दातुं च अस्यां सभायामेव समागतः? अहह, वीराणां शस्त्राणि शत्रोर्दमनाय उत्थितान्यभूवन्। रावणसदृशस्य दुष्टस्य भ्राता रामसेनायां स्वीकृतो भवेत्, विचारसभायां मन्त्रणादाता च भवेत् इति को वा सम्मतिं दद्यात्? सुग्रीवः साम्प्रतं न केवलं सेनापतिरेव, स हि अग्निं साक्षीकृत्य भगवता रामचन्द्रेण प्रियतमः सुहृत् कृतः। तेन सुग्रीवेण अतिसंरम्भपूर्वकं विभीषणस्य घोरो विरोधः कृतः। अस्मिन् अतिसतर्कतावसरे शत्रोः सहोदरो भ्राता सहसैव स्वीकृतो भवेदिति किं काचिन्नीतिः? साङ्ग्रामिकी आज्ञा जाता–

**'रावणेन प्रणीतं हि तमवेहि विभीषणम्।**
**वध्यतामेष तीव्रेण दण्डेन सचिवैः सह।।'**

भगवता रामेण अङ्गद-मैन्द-शरभप्रभृतीनां सर्वेषामेव सम्मतिर्गृहीता। किन्तु एकमुखेन सर्वैरेव विभीषणस्वीकारस्य घोरो विरोधः कृतः। अन्यत्किम्, प्रौढवयस्को जाम्बवानपि महान्तं विरोधमेव कृतवान्। यस्य जाम्बवतः कृते वाल्मीकिना प्रोक्तम्– 'जाम्बवांस्त्वथ सम्प्रेक्ष्य शास्त्रबुद्ध्या विचक्षणः।' अयं शास्त्रविचक्षणोऽपि निःसंशयां सम्मतिं ददौ–

**''अदेशकाले सम्प्राप्तः सर्वथा शङ्क्यतामयम्।''**

श्रीहनूमान् आसीत्तूष्णीमवस्थितः। स हि सर्वमिदमशृणोत्। विचारसभायामस्यां नानाविधैः सचिवैर्याः याः सम्मतयो दत्ताः श्रुत्वा विचारशीलस्य हनूमतः खेदोऽभवत्। किन्तु 'अनवसरोऽयम्' इति विचार्य मारुतिस्तूष्णीमभूत्। अन्ते–'स्वामिनः कार्यावसरे तूष्णीभावः कार्यविनाशक' इति विचार्य श्रीमान् पवनतनयो निजसम्मतिं ददौ। श्रीहनूमतः सम्मतेर्विषये वाल्मीकेरक्षराणि।

**'अथ संस्कारसम्पन्नो हनूमान् सचिवो रामः।**
**उवाच वचनं श्लक्ष्णमर्थवान् मधुरं लघु।। शुद्ध.१७/५०'**

अर्थात् नीतिशास्त्रस्यानुसारम् अन्यान्यसचिवानां बुद्धौ या वार्ताः समायाताः सर्वाः तैः अविकलं कथिता। किन्तु श्री हनुमता तस्या नीतेरपि निजविवेकस्याऽऽधारेण संस्कारः (परिष्कार) कृतः। अर्थात् नानाविधनीतीनां मध्ये संस्कृता उदारा परिष्कृता च या नीतिरासीत्तस्या आधारेणैव श्रीमारुतिना निजसम्मतिर्दत्ता। अत एव भगवता वाल्मीकिना विशेषणं दत्तम्–

'संस्कारसम्पन्नः'। द्वितीयं विशेषणमस्ति– 'सचिवोत्तमः'। अर्थात् विचारसभायाम् अस्यां निजनिजमतेरनुसारं सर्वेऽपि मन्त्रणादातारः सन्त्येव। किन्तु श्रीहनूमान् तेषु सर्वेषु उत्तमः। यतो हि केवलं 'नीतिः, नीतिः' इति आडम्बरमात्रेण नाऽयं भ्रमितो भवति। अपि तु हनूमान् स्वबुद्ध्या स्वयं विवेकं करोति– यदयं समागतो विभीषणो व्यक्तिगतरूपेण दोषी अस्ति, निर्दोषो वा? पुरुषपरीक्षायाश्चातुर्यं स्पष्टं तेन सूचितं यत्–

**न त्वस्य ब्रुवतो जातु लक्ष्यते दुष्टभावना।**
**प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः।।'**

अस्य मुखे प्रसन्नभावः स्पष्टं प्रतिभासते यो हि कपटकारिणो मुखे न कदाचित् दृश्यते। अयं निःशङ्कः सन् स्वस्थभावेन अस्माकमभिमुखे समागच्छति। अस्य वाणीमध्येऽपि भयकपटचिह्नानि न सन्ति। यस्तु हृदयमध्ये कपटभावं नीत्वा समायाति स हि सशङ्कः सन् उद्भ्रान्तचित्त इव समागच्छति। तस्मान् मम तु विभीषणं प्रति संशयो नास्ति। वाल्मीकेरक्षराणि सन्ति–

**'अशङ्कितमतिः स्वस्थो न शठः परिसर्पति।**
**न चास्य दुष्टा वागस्ति तस्मान्मे नास्ति संशयः।।' १८/६३**

राजचर्चाचतुरेण अङ्गदेन प्रोक्तमासीत्– 'गुणदोषयोः परीक्षां कृत्वा विभीषणस्य स्वीकारः कर्तव्यः' इति। किन्तु सचिवोत्तमो हनूमान् कस्यचिन्नामनिर्देशमकृत्वा तन्मतं खण्डयति यत्– विभीषणस्य स्वीकारार्थे गुणदोषपरीक्षाया अवकाश एव नास्ति। यतो हि यावत्कालं कस्मिंश्चित्कार्ये कस्यचित्पुरुषस्य नियुक्तिर्न क्रियते तावत्कालं तस्य पुरुषस्य सामर्थ्यस्य, तद्गतगुणदोषादीनां च परीक्षा कथं सम्भवेत्? नवाऽऽगतस्य कस्मिंश्चित्कार्ये सहसा नियुक्तिरपि नोचिता। अत एव गुणदोषयोः परीक्षां कृत्वा स्वीकारः कर्तव्य इति कथनं सर्वथा नोचितम्।

(अङ्गदस्य मतमासीत्–गुणदोषयोः परीक्षां कृत्वा विभीषणस्य स्वीकारः कर्तव्य इति। मारुतिस्तस्य खण्डनं करोति यत् अस्मिन्मते अन्योन्याश्रयनामको दोषोऽस्ति। यतो हि यावत्कालं गुणदोषयोः परीक्षा न क्रियते तावत्कालमस्य स्वीकारो न सम्भवति, न चायं कस्मिन्नपि कार्ये नियोक्तुमेव शक्यते। यावत्कालं च अस्य नियुक्तिः कस्मिन्नपि कार्ये न भवेत् तावत् अस्य गुणदोषयोः परीक्षैव कथं सिध्येत्? अत एव परस्पराश्रयमेतत्।)

इदानीं प्रौढवयस्कस्य जाम्बवतोऽपि मतस्य समालोचनमेव किम्, सम्यक्समालुञ्चनं क्रियते। किन्तु विनयवशान्नामनिर्देशं न करोति। मारुतिः कथयति– ''अयम् अदेशकाले प्राप्तः। अत एव अस्य विश्वासो न कर्तव्यः'' इत्यपि न युक्तम्। यतो हि अनेन विभीषणेन रावणे बहवो दोषा एव दृष्टाः। श्रीरामचन्द्रस्य गुणाः पराक्रमादयस्तु बालिसदृशवीराणां दमनेन जगत्प्रसिद्धा जाताः। अत एव दोषिणः निजतिरस्कारिणश्च त्यागं कृत्वा जगत्प्रसिद्धपराक्रमस्य भवतः समीपे आगमनं किम् अनवसरोऽस्ति?

दूतं प्रेषयित्वा 'कस्त्वम्, कथमागतोऽसि' इत्यादि प्रश्नः पूर्वं क्रियताम्' इति मैन्दस्य मतमपि नामनिर्देशमकृत्वा विनयेन खण्डयति यत्–नवीनागतः पुरुषो यदि वास्तवे मित्रमेव

भवेत्तर्हि आगमनमात्रे एव तं प्रति 'त्वं कथमागतः' इति प्रश्नः सर्वथा रुक्षः। यतो हि स्नेहपूर्वकं समागमस्य स्थाने 'त्वं कथमागतः' इति प्रश्नेन मित्रस्य हृदये दुःखमुत्पद्यते। गमनमात्रेणैव तु दूतः परीक्ष्य हृद्गतं भावं कथं जानीयात्। अत एवंविधे अवसरे सचिवानां मार्मिकी बुद्धिरेव सहायिका भवति।

अहं तु विभीषणस्याऽऽगमनं देशकालोपपन्नं मन्ये। यदा हि विभीषणेन श्रुतं यद् बालिसदृशं पराक्रमिणं वीरम् अनायासमेव हत्वा तत्स्थाने रामेण सुग्रीवः स्थापितः, तेन सह दृढा मैत्री च कृता, तदा निरन्तरं दोषयुक्तं जगन्मात्रस्य प्रपीडकं च रावणं त्यक्त्वा हृदयस्थितया कयाचित् आशया अयमत्र आगतो भवेदिति किं न सम्भवति? अत एव मम तु सम्मतिरस्य स्वीकारपक्षे एवास्ति। अग्रे श्रीचरणाः प्रमाणम्। श्रीमदपेक्षया अधिको नीतिज्ञो कोऽन्योऽस्ति?

एतदनन्तरं सुग्रीवेण त्रीन् वारान् विरोधः कृतः, परं प्रशान्तचित्तेन श्रीरामेण त्रिषु वारेष्वेव विरोधस्य समाधानं कृत्वा। विभीषणस्य स्वीकारे एव निजसम्मतिर्दत्ता। एतस्य इतिहासलेखस्य अन्ते इदमेव तात्पर्यं यत् सर्वेषां महामान्यानामपि सचिवानां विरोधकरणेऽपि श्रीहनूमता तादृशी सम्मतिर्दत्ता या कथमपि उल्लङ्घनीया नाऽभवत्। यतोहि पवनतनयः श्रीरामस्य दयालुत्वभावम्, युद्धसमये रावणस्य गृहपरिस्थितेः परिज्ञानस्याऽऽवश्यकतादि च सर्वं विचार्य तादृशीं मन्त्रणां ददौ, यया हि श्रीरामस्य विजयः, सीतायाः समागमः, विभीषणोपरि च चिरकालार्थमुपकारः, श्रीरामस्य दयालुतायाः प्रसारश्च सर्वदार्थमभवत्।

श्रीहनूमतश्चरित्रमारम्भादन्तपर्यन्तं लोकानां शिक्षाप्रदं, भारतीयानामनुकरणीयं चास्ति। विवेकिनः, पुरुषाः किमस्मात् लाभं न गृह्णीयुः?

***

# हंसवाहना सरस्वती मयूरवाहना कथं जाता ?

ज्ञानाधिदेवता भगवती सरस्वती वाचामधिष्ठात्रीति सुप्रसिद्धं संस्कृतवाङ्मयेऽस्मिन्। अत एव हि वाग्विलासमयेऽस्मिन् काव्यजगति शैववैष्णवसम्प्रदायनिर्विशेषं सर्व एव कवयो भगवतीमिमामादितोऽभिवादयते। बालपाठ्यं पुस्तकं यथा 'नत्वा सरस्वतीं देवी' (**लघुकौमुदी।**) प्रारभ्यते तथा वाङ्मयाचार्याणामपि। 'सरस्वत्येवैषा घटयति यथेष्टं भगवती'। सेयं सितसरोरुहासना शुभ्रवस्त्रा शारदेन्दुसुन्दरकान्तिः, हस्तेऽस्याः कच्छपीवीणेत्यादि सुप्रसिद्धमेतस्या वर्णनं साहित्यसेविसमाजेऽस्मिन्। नैतस्मिन् प्राग् वर्णने भगवत्याः सरस्वत्या वाहनस्य विशेषतश्चर्चा समुपलभ्यते। अत एव हि प्राचीनकाव्यनाटकादितः सङ्गृहीते सुभाषितरत्नभाण्डागारे दत्तानि सरस्वत्यास्त्रयोदशपद्यानि मङ्गलप्रसङ्गे किन्तु नैतेषामेकस्मिन्नपि सरस्वतीवाहनस्य चर्चा नूनम्। राजशेखरस्य काव्यमीमांसायां भगवती सरस्वती काव्यतनयस्यान्वेषणाय दूरदूरं प्रस्थितापि न क्वचिद्वाहनमपेक्षते। किन्तु प्राचीनकविवर्णनायां यत्र यत्र सरस्वत्या वाहनस्य चर्चा प्राप्यते तत्र तत्र सर्वत्रापि सोऽयं हंस एव समुपलभ्यते इति तु निश्चप्रचम्।

न केवलं कविवर्णनायामेव, अपि तु पूजापद्धतौ यत्र यत्र सरस्वत्या ध्यानमासाद्यते तत्र वाहनप्रसङ्गे भगवती सरस्वती सेयं हंसवाहनैव। अत एव 'शब्दार्थचिन्तामणि'कोषेऽपि सरस्वत्या ध्यानात्मकमिदमवाप्यते पद्यम्-

**'वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभां**
**चन्द्रार्द्धाङ्कितमस्तकां निजकरैः संबिभ्रतीमादरात्।**
**वीणामक्षगुणं सुधाढ्यकलशं विद्याञ्च तुङ्गस्तनीं**
**दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे।।'**

न केवलमत्रैव, 'दक्षिणामूर्तिसंहिता' यामपि सरस्वत्या हंस एव वाहनमवालोकि-

**'हंसारूढा हरहसित-हारेन्दुकुन्दावदाता**
**वाणीमन्दस्मिततरमुखी मौलिबद्धेन्दुरेखा।**
**विद्यावीणामृतमयघटाक्षस्त्रजदीप्तहस्ता**
**शुभ्राब्जस्था भवदभिमतप्राप्तये भारती स्यात्।।'**

न च केवलं वर्णनस्यैव कथा, प्रत्यक्षं प्राचीनतमचित्रेष्वपि सरस्वती हंसमेव वाहनमधिरूढा। कलाभवनेषु दृष्टानि प्राचीनतमदाक्षिणात्यचित्राणि, वङ्गदेशीयचित्राणि येषु सरस्वत्या हंस एव वाहनमालिखितः एतस्य प्रमाणान्यग्रेऽहमुद्धरिष्याम्येव। किन्तु वर्तमानसमये सर्वमिदं प्राचीनकालस्येव सामग्री जायमानास्ति। संस्कृतसाहित्यसेवका मुखतो यत्किञ्चिद्वदन्तु किन्तु किम् उत्तरभारते किं वा दक्षिणभारते सर्वत्राप्यधुना भगवती सरस्वती प्रत्यक्षं मयूरवाहना समपद्यत। यतो हि सरस्वतीपूजोत्सवेषु यत्र यत्र सरस्वत्याश्चित्रमवलोक्यते तत्र तत्र हंसमुड्डाय्य बहिर्दर्शनीयः सोऽयं बर्हिण एव बलादधिकृतोऽभूत्। महाराष्ट्रमण्डले

वसन्तपूजायामहमभूवमेकदा निमन्त्रितः। आसीत्तत्र रविवर्मचित्रितं भगवत्याः सरस्वत्याश्चित्रं प्रधानपीठे विराजितं यत्र हि प्रवहत्सलिलायाः सरितस्तटे वीणां झङ्कारयन्ती सरस्वती प्रसन्नमुखमासीदवस्थिता, समीपे च लम्बायमानपिच्छो मयूरः समवाऽस्थित। अहह, तदैव विद्यार्थिभिः स्तुतिरगीयत–

''वाणीं पूर्णनिशाकरोज्ज्वलमुखीं.... हंसाधिरूढां भजे।।'' इति प्रत्यक्षं मयूरे सम्मुखावस्थितेऽपि सरस्वती सेयमस्तूयत– 'हंसाधिरूढाम्'इति!

मुद्रणालयेषु यान्ति ब्लाकचित्राणि तेष्वपि भगवत्याऽनया सरस्वत्या सोऽयं मयूर एव वाहनत्वेनानुगृहीतः, हंसस्तु मन्ये पुराण इति कृत्वा विश्रमार्थं दूरतो विसर्जित इव। मुद्रणालयेषु च सर्वत्र सेयं सरस्वती सम्प्रति मयूरवाहनैव संवृत्ता। दृश्यतां विचारविधया साम्प्रतम्। सर्वदेशीयेष्वपि मुद्रणालयेषु (तत्रत्यब्लाकचित्रेषु) कुत्रचित्प्रसारितकलापं बर्हिणमारूढा भारती, कुत्रचित्तु कवरपुच्छः सोऽयं मयूरः समीप एवावस्थितः वराको हंसस्तु ऐतिहासिकसामग्री समपद्यत।

मयूरो वाहनं कस्या अपि देव्या नास्तीति न मे तात्पर्यम्। अस्ति हि मयूरोऽपि वाहनं देव्याः, किन्तु न सा सरस्वती, अपि तु कौमारी शक्तिः ('कौमारी शक्तिहस्ता च मयूरवरवाहना' 'माहेश्वरी वृषारूढा कौमारी शिखिवाहना')। सरस्वती हि संस्कृतसाहित्ये भगवतो विरिञ्चेः पत्नी परिगण्यते। यथा–

**'सिद्धान्तं सर्वविद्यानां शुद्धान्तं परमेष्ठिमः।**
**शोणाधरमहः किञ्चिद्वीणाधरमुपास्महे।।'**
**आशासु राशीभवदङ्गवल्ली-**
**भासैव दासीकृतदुग्धसिन्धुम्।**
**मन्दस्मितैर्निन्दितशारदेन्दुं**
**वन्देऽरविन्दासनसुन्दरि त्वाम्।।**

अस्ति हि भागवतादिपुराणेषु ब्रह्मणः पुत्रीत्वेनापि वाग्देव्या वर्णनं यथा–

**'वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः।**
**अकामां चकमे दत्तः सकाम इति नः श्रुतम्।।'**

किन्त्वेतद्वैज्ञानिकं रहस्यं नेतिहास इति जानन्त्येव मार्मिकाः। ब्रह्मवैवर्तपुराणस्य प्रकृतिखण्डे पञ्चमाध्याये सरस्वती नारायणस्य पत्नी, गङ्गालक्ष्मीश्च तत्सपत्न्यौ। तत्र सरस्वती गङ्गायामधिकं पत्युः प्रेम विशङ्क्य ईर्ष्यया तां शशाप, कलहे मध्यस्थां पद्मामपि च। गङ्गापि तां प्रतिशशाप। ततो नारायणः सर्वासामपि कलहदोषात्क्रुद्धस्ताः शापेनादण्डयत्। सरस्वतीं प्रति शापो यथा–

**'गङ्गाशापेन कलया भारतं गच्छ भारति।**
**कलहस्य फलं भुङ्क्ष्व सपत्नीभ्यां सहाच्युते।।**
**स्वयं च ब्रह्मसदनं ब्रह्मणः कामिनी भव।**
**गङ्गा यातु शिवस्थानमत्र पद्मैव तिष्ठतु।।'**

सरस्वती अनुतप्ता वल्लभं नारायणमुवाचः विदायं देहि मे नाथ दुष्टाया जन्मशोधनम्। ''सत्स्वामिना परित्यक्ताः कुतो जीवन्ति काः स्त्रियः। देहत्यागं करिष्यामि योगेन भारतेऽद्धुतम्।।'' ततः पद्मा मध्यस्था भूत्वा नारायणं शापविमोकं प्रार्थयामासे। नारायणोऽपि मृदुर्भूत्वा प्रोवाच– 'भारती यातु कलया सरिद्रूपा च भारतम्। अर्द्धांशा ब्रह्मसदनं स्वयं तिष्ठतु मद्गृहे।'

एवं च विरिञ्चिपत्नीत्वेन भगवत्याः सरस्वत्या हंसवाहनत्वमेवोपपद्यते, मयूरस्य वाहनस्य तु न कश्चित्प्रसङ्ग इति संस्कृतसाहित्यशीलकानां नाऽपरोक्षम्। एवं सत्यपि प्रबलतमेन मयूरेणानेन हंसायार्द्धचन्द्रं प्रदाय सरस्वत्या वाहनत्वे कथमात्मनोऽधिकारः सम्पादित इत्यवश्यं कौतुकाय भवेद्यदि ते विचाराभिमुखं मनः कुर्युः। किन्तु संस्कृतभारत्या नाधुना तादृग् भागधेयं येन संस्कृतानुशीलका एवंविधविषयेष्वग्रगामिनो भवेयुः। अत्राप्यन्ये मार्गमादर्शयन्ति। पूनास्थ 'भण्डारकरीयप्राच्यगवेषणाधिकृतः' (क्यू रेवराञ्चाक् भण्डारकर ओरिएण्टल् रिसर्च इन्स्टिट्यूट ) श्रीमान् पी.के. गोडे महोदयः पाठकानां नाऽपरिचितः स्यात्, तस्य नासाभूषणसम्बन्धिनी गवेषणा प्रकाशिता पुरा रत्नाकरे। श्रीअवनीन्द्रनाथटागोरपरिचालित– 'ओरिएण्टल इण्डियन आर्ट सोसाइटी' पत्रे प्रकाशितमेतेनैतद्विषयकमन्वेषणमवदधतु किञ्चित्पाठकमहाभागाः।

संस्कृतसाहित्ये हंसस्य सरस्वत्याश्चानेके प्रसङ्गाः समुपलभ्यन्ते। हरिदासभट्टाचार्यः 'विद्यादेवीसरस्वती'(Sarswati The Godess of Learning) नामके निबन्धे सहस्राधिकवर्षाणामितिहासमवतार्य सरस्वत्या सह हंस-कमल-सिंहादीनां चर्चां प्रस्तावीत्। सरस्वती स्वयं श्वेतसर्परूपे हंसरूपे वा परिपूज्यते इत्यपि तत्र प्रसङ्गोऽवाप्यते। एलिसगेटी 'उत्तरीयबुद्धधर्मस्य देवता' नामके पुस्तके सरस्वतीं स्वयं मयूरवाहनामाह, किन्तु सा बौद्धानां देवता।

१५८३ तमख्रिष्टीयवत्सरे हस्तलिखिते 'द्रव्यावलीनिघण्टौ' सरस्वत्या एकं चित्रमुपलब्धं यत्र सा हंसवाहनैव चित्रिता शिल्पिना। 'सरस्वतीं तां सितपद्मकीरौ वीणां च पुस्तं च करे दधानाम्' इत्यादि पद्यं तु चित्राद्विसंवाद्येव केनचित्प्रक्षिप्तम्। १६१३ तमे ख्रिष्टवत्सरे मुस्लिमेतिहासलेखकः सिकन्दरबिनमोहम्मदो गुर्जरदेशस्येतिहासं लिखन् सुलतानस्य प्रियनर्तकीचम्पाबाईद्वारा सरस्वत्या अभिनयस्यापि प्रसङ्गमलिखद् यत्र सरस्वत्या वाहनं हंसमेवाऽयमाह, न मयूरम्।

नेमिदत्तनामको जैनलेखकः १५३० तमख्रिष्टवत्सरविरचिते 'आराधनाकथाकोषे' निम्नलिखितश्लोकेन सरस्वतीं मयूरवाहनामवर्णयद्–

**'श्रीमच्चारुमयूरवाहनपरा पद्मासना निर्मला**
**मिथ्याध्वान्तभरप्रणाशविलसद्भास्वत्प्रभाभासुरा।**
**भव्याम्भोदवनप्रमोदजननी सन्मार्गसंदर्शिनी**
**देवेन्द्रादिसमर्चिता जिनपते जीयात्सतां भारती।।'**

जैनलेखकेनानेन १५२८ तमे ख्रिष्ट संवत्सरे 'श्रीपालचरितं' निरमायि। ततश्च हंसवाहनायाः सरस्वत्याः प्रसङ्गः सर्वतः प्रथमं १५३० तमे संवत्सरे श्रुतिगोचरो भवतीति निश्चीयते। एम.आर.मजुमदारः पञ्चदश्यां शताब्द्यां हस्तलिखिते गीतगोविन्दपुस्तके सरस्वत्याश्चित्रमेकं वर्णयति यत्र सरस्वत्याश्चरणसन्निधौ हंस एवाङ्कितः। एवमेव प्रो. ब्राउनः निजलिखिते 'कालककथा' नामके पुस्तके सरस्वत्याश्चित्रमेकं वर्णयति सरस्वत्याः समीपे हंस एवास्ति न मयूरः। इदमपि चित्रं पञ्चदशशताब्दीलिखितम्।

ब्राउनोऽस्मिन् ग्रन्थे तालपत्रोपरि एकादशशताब्द्यां लिखिते पुस्तकेऽपि सरस्वत्याश्चित्रमेकं सूचयति यस्मिन् सरस्वत्या ऊर्ध्वयोर्हस्तयोः कमलम्, अधरयोश्च स्फटिकमाला-पुस्तके स्तः, सम्मुखे चाऽस्या हंसो विलोक्यते। कश्चिदैतिहासिकश्चित्रमिदं महावीरस्य शासनदेव्याः स्वीकरोति, कश्चिच्च चक्रेश्वर्याः, या हि प्रथमतीर्थंकरस्य शासनदेवी।

कह्लणो राजतरङ्गिण्याः प्रथमभागे ३५ पृष्ठे (ए.डी. ११४८) स्वयं सरस्वतीमेव श्वेतहंसरूपामाह-

**'देवी भेडगिरेः शृङ्गे गङ्गोद्भेदशुचौ स्वयम्।**
**सरोऽन्तर्दृश्यते यत्र हंसरूपा सरस्वती।।'**

कह्लणकृतं हंसरूपे सरस्वत्याश्चित्रणमिदं सरस्वत्या सह हंसस्य सरसश्च निकटसम्बन्धं सूचयति येन हि तया 'सरस्-वती' इति पदवी लब्धा। ततश्च सरस्वत्या हंसवाहनता पुरातनेतिहाससम्बद्धेति शक्यते निश्चेतुम्।

जितेन्द्रनाथबनर्जीमहोदयः सरस्वत्या हंसवाहनत्वे प्राचीनमुद्राप्रमाणमप्याह। तथा हि कलिकत्तास्थविचित्रवस्त्वगारस्य (म्यूजियम) गुप्तकालिकस्वर्णमुद्राया उपरि एलन साहिबो लक्ष्मीदेव्याश्चित्रमेकं सूचितवान्, किन्तु बनर्जीमहोदयश्चित्रे हंसं दृष्ट्वा 'सरस्वत्याश्चित्रमिदम्' इति समर्थयते। ततश्च यदि बनर्जीमहोदयस्य कथनं सत्यं भवेत्तर्हि सरस्वत्या हंसवाहनत्वे षष्ठशताब्दीस्थमप्येकं प्रमाणमुपलब्धं यद्धि उपरिसूचितद्वादशशताब्दीचित्रैः परिपुष्टं भवति।

चतुर्दशशताब्द्यां विद्यारण्यः शृङ्गिगिरौ विद्यामन्दिरमास्थापयद् यत्र हि तेन शारदाया अपि प्रतिमावस्थापिता, किन्तु न तस्यां किञ्चिदपि वाहनं दृश्यते। बी.सी. भट्टाचार्यो 'जैनमूर्तिविद्या' नामके निबन्धे जैनानां श्रुतदेवीं सरस्वतीदेवीं वा वर्णयति- ''इयं देवी श्वेताम्बराणामनुसारं हंसोपरि तिष्ठति, चतुर्भिर्हस्तैः कमलवरपुस्तकमालाश्चावहति। दिगम्बराणां ग्रन्थेषु च सेयं मयूरवाहना। दिगम्बरै हंसस्य स्थाने मयूरः स्थापितः। दिगम्बराणां विचारानुसारं महामानसी यक्षिणी, विद्यादेवी वा मायूर-हंसमालादीनि चिह्नानि संवहति''इत्यादि।

कालक्रमानुसारमुद्धृतैरुपरिलिखितप्रमाणैः सुस्पष्टं भवति यद् ब्राह्मणादिग्रन्थेषु भगवती सरस्वती हंसवाहनैव सर्वत्राऽऽलक्षिता। सर्वतः प्रथमं जैनैः विशेषतश्च दिगम्बरजैनैरेव सेयं मयूरवाहना समवर्णि। भारतवर्षेऽस्मिन्नासीत्सोऽपि समयो यत्र दिगम्बरजैनानां सर्वतोऽप्यपरिभवनीयः प्रभावो देशमात्रं व्याप्नोत्। दक्षिणदेशे गुर्जरदेशे च तादृशः सुदृढः प्रभावः समन्तात्प्रासरद् यत् शतशतवत्सरेषु व्यतिगतेष्वपि, लोकेषु वैदेशिकशिक्षाप्रभावितेष्वपि सोऽयं साम्प्रतमपि तत्रान्यान्यधर्मापेक्षया भूयस्तरामुपचितो विलोक्यते, जयपुरराज्यमेवेदमालोक्यताम्, अत्र हि न केवलं नगर एव अपि तु राज्यस्य तेषु तेषु प्रान्तेषु

जैनमन्दिराणि जैनानामुपाश्रयाश्च निजभग्नावस्थायामपि महान्तं प्रभावमावेदयान्त्यात्मनः कस्मिन्नपि काले। ततश्च स्पष्टमेव परिज्ञातुं शक्यते यन् मयूरवाहना सेयं सरस्वती ब्राह्मणकालिकमूर्तिनिर्माणकलाया उपरि जैनकालिकमूर्तिकलायाः सर्वाङ्गीणविजयस्यैव परिणामः। दक्षिणादिदेशेषु मूर्तिचित्रणकला सेयं जैनकलाया तथा प्रभाविताभवद् यथा प्रसिद्धश्चित्रशिल्पी श्रीमान् राजा रविवर्माऽपि भगवतीं सरस्वतीं मयूरवाहनामेवाङ्कयामास। रविवर्मचित्राणामेकस्मिन् काले सर्वत्रापि देशेऽक्षुण्णः प्रभावो व्याप्नोदिति को वा न जानाति? अत एव मुद्रणालयेष्वपि स एव प्रवेशमवापत्। मुद्रणालयमुद्रितचित्राणां च देशमात्रे प्रचारात्सर्वस्यापि भारतस्य कोणे कोणे भगवत्या सरस्वत्या सह मधुरदर्शनस्य मयूरस्यास्य नवीनः सम्बन्धः स्थापितोऽभवत्। बङ्गादिदेशेषु (यत्र दाक्षिणात्यचित्रकलाया न तादृक्प्रसारः) कुत्रकुत्रचिद्वराकस्य हंसस्यास्य सरस्वतीसेवायामुपस्थितेरवकाशः प्राप्यते।

मयूरवाहनायाः सरस्वत्याः स्थाने स्थाने प्राप्यन्ते प्रमाणानि जैनग्रन्थेषु–शोभनद्वारा दशमशताब्द्यामारचिते 'स्तुतिचतुर्विंशतिका' नामके ग्रन्थे–

**'भारति द्राग् जिनेन्द्राणां नवनौरक्षतारिके।**
**संसाराम्भोनिधावस्मान्, अवनौ रक्षितारिके।।५९।।'**

इति सरस्वत्याः स्तुतिरवाप्यते। सूरतनगरात् कापडियाद्वारा सम्पादिते 'शोभन' ग्रन्थे वर्णचित्रितमेकमालेख्यमप्यस्ति यत्र सरस्वती (प्रज्ञप्तिः) पादलिप्तसूरिद्वारारचित 'निर्वाणकलिका' या निम्नलिखितलेखेन सह मयूरासनैव चित्रितास्ति–

'प्रज्ञप्तिं श्वेतवर्णां मयूरवाहनां चतुर्भुजां
वरदशक्तियुक्तदक्षिणकरां, मातुलिङ्गशक्तियुक्तवामहस्तां, चेति' (पृष्ठ १८४)

शोभनोऽयं देवीं प्रज्ञप्तिं स्पष्टमेव मयूरवाहनां स्तौति, यथा–

**'केकिस्था वः क्रियाच्छक्ति-करा लाभानयाचिता।**
**प्रज्ञप्तिर्नूतनाम्भोज करालाभानयाचिता।।६०।।'**

शोभनस्य भ्राता धनपालः (ए.डी. ६७२) लेखमिमं व्याख्यातवान्– 'केकिस्था मयूरस्था वः युष्माकम्' इत्यादि। कापडियामहोदयो जैनानां मयूरवाहनसरस्वतीसम्बन्धे अन्यदप्युद्धृतवान्–

**शक्तिसरोरुहहस्ता मयूरकृतयानलीलया कलिता।**
**प्रज्ञप्तिर्विज्ञप्तिं शृणोतु नः कमलपत्राऽऽभा।।**

निबन्धेऽस्मिन् भगवत्याः सरस्वत्या विषये साहित्यकथैव सेयमवतारिता, किन्तु भारताद् बाह्येषु देशेषु सरस्वत्या मूर्तिनिर्माणे परस्परं विलक्षणा ये ये शिल्पस्य नानाप्रकाराः प्राप्यन्ते शिल्पकलामार्मिकतया तेषां सुसूक्ष्मविचारे कृते भारतीयमूर्तिनिर्माणविद्याया उपर्यपि तत्तद्देशीयमूर्तिनिर्माणकलानां प्रभावो भूयस्तरामनुमातुं शक्यते। अस्तु, संस्कृतपण्डितानां तान्त्रिकाणां च समक्षमुपस्थापिता सेयं मे विचारणा। सुदृढं विश्वसिमि यदत्र भवेत्तेषामवधानपूर्वकं लेखन्या अवतरणं, येन स्यादलङ्करणं रत्नाकरस्यास्येत्यलम्।

***

# भारतीयं भोजनशास्त्रं शष्कुली 'जलेबी' च

संस्कृतभाषेयं भारतीयानां व्यवहाराद् यत:प्रभृति दूरीभूता तत आरभ्यैव व्यावहारिकशब्दानां स्थानं रिक्तीभूतम्। रेल-तार-ग्रामोफोन-रेडियोप्रभृतीनि यानि वस्तूनि साम्प्रतमेवाऽऽविष्कृतानि तान्यवश्यम् इदंप्रथमतया संस्कृते प्रवेश्येरन्। किन्तु येषां वस्तूनां व्यवहार: शतसहस्रवत्सरेभ्य: प्रचलितस्तेषामपि नामसु संस्कृतपण्डिता: शून्यदर्शिन:। कालिदासादिभिर्वसन्ते वर्ण्यमानं किं किल 'कुरबकम्'? को वा कारण्डव:? मक्का, जुवार, बाजरा प्रभृतीनि केन नाम्ना व्यपदेश्यानीति नाद्यापि निश्चिनुम:। भोजगोष्ठीषु 'फेनी' घेवर, मोहनभोगप्रभृतीनि सशिर:कम्पं प्रशंसन्तश्चिरादाकण्ठमकुण्ठं भुञ्ज्महे किन्तु किमेषां संस्कृते नामधेयम्, कुत: प्रभृत्येषामाविष्कार इति जिज्ञासैव मनसि नोदेति। अहो अस्माकमध्यापकानामौदार्यं, पाठ्यक्रमस्य च महत्त्वं यत् 'वृक्षविशेष: पक्षिविशेष:' इति कृत्वैव शिक्षार्थिनां जिज्ञासान्धकारमिमे समाच्छादयन्ति।

आसीदस्मत्सुहृतत्पण्डितमण्डल्यां भोजगोष्ठी। सप्रमोदमभिभुञ्जानां प्राचलत्संलापप्रसङ्गो यद् 'जलेबी' भोज्यं कियत्प्राचीनं किं चास्य नामधेयम्? गोष्ठ्या एतस्या: प्रमुख: आयुर्वेदमार्तण्ड: श्रीमान् लक्ष्मीरामस्वामिमहाभागो दिवमारूढ:, अन्येऽप्येकद्वा: परलोकपथिका: संवृत्ता:। ये सन्ति तेऽपि कदाचिदेव मन्ये संस्मरेयुर्वृत्तान्तमिमम्। किन्तु मया प्रोक्तमासीत् 'प्राचीनसाहित्यस्य मर्मतो विमर्शनेन सेयं 'जलेबी' शष्कुलीपदव्यपदेश्या। साहित्ये यत्र यत्राप्यस्य शब्दस्य प्रयोगस्तत्र मार्मिकविचारे कृते 'जलेबी' पक्वान्नस्यैव सम्बन्ध: सन्धीयते।' किन्तु पण्डितमालाया: सर्वेऽपि रत्नालङ्कारा: समभूवन्विरुद्धा: सचिक्कण 'पण्डितेषु यथा प्रसिद्धं तथा भारते परित: प्रसिद्धा अमी विद्वांसोऽपि प्रतिध्वनिमकुर्वन् यत् 'शष्कुली' तु 'पूरी' पदवाच्या भवति। नेयं 'जलेबी', इत्यादि।

अद्याऽस्य शब्दस्यान्वेषणाय समवाप्त: प्रसङ्गोऽप्यनुकूल:। भाण्डारकरीयप्राच्यगवेषणाध्यक्षम् (क्यूरेटर भण्डारकरओरिएण्टलरिसर्च इन्स्टिट्यूट, पूना) श्रीमन्तं पी.के.गोडे, एम.ए. महोदयं परिचिन्वन्ति रत्नाकरपाठकमहाभागा:, यस्य हि पर:शतानां गवेषणानामनुक्रमिणका प्राकाशि स्थानान्तरेऽस्यां सञ्चिकायाम्। महाभागेनानेन 'न्यूइण्डिया एण्टिकेरी' पत्रिकायां नवम्बरमासे (स. १९४३) जलेबीभोज्यस्यास्येतिहासो रुचिरमभूद् गवेषित:। तत्प्रेषितस्याङ्गलभाषामयगवेषणापत्रस्य संस्कृते समपेक्षितं सारं समुद्धृत्य, तत: परस्तादहं साहित्ये स्वसन्दृष्टं जलेबी भोज्यस्य समुल्लेखं यथाशक्ति संदर्शयिष्यामि।

## पी.के. गोडेमहोदयस्य गवेषणा

भारतीयभोजनशास्त्रस्येतिहासे बहुतरा वार्ता: साम्प्रतमज्ञाता:। विषयोऽयं पाकशास्त्रसम्बन्धिपुस्तकेभ्यो भैषज्यग्रन्थेभ्यो ब्राह्मण-जैन-बौद्धानां ग्रन्थद्वारतश्च सङ्ग्राह्य:[१]

१. श्रीमती सावित्री जोशी 'गृहिणीशिक्षके' (१९२९) एतद्विषयकाणि निम्नाङ्कितपुस्तकानि समुल्लिलेख- 'अष्टाङ्गहृदयम्' (वाग्भट:) भावप्रकाश:, वनौषधिगुणादर्श:, पाकदर्पण: (नलस्य), पाकशास्त्र (हिन्दी, यशोदादेवी) रिकामपणजी कामगिरी (रामबाई गर्गे) गृहिणीमित्र (लक्ष्मीबाई धुरन्धर) चर्यापद्माकर (सत्यशोधक प्रेस) पाकदर्पण, चर्याचन्द्रोदय (दत्तरामपाठक) रसव्यञ्जनप्रकाश (गङ्गाविष्णु) व्यञ्जनपाकप्रदीप, भोज्यदर्पणकला, महाराष्ट्रीस्वयंपाक (बडौदा स्टेट) पाकशास्त्रचर्यादर्पण (पं. रघुनाथप्रसाद)

स्यात्। पारसीप्रभृतीनां प्रान्तीयभाषाणां च यावान् सम्पर्को भारतीयभाषयाऽद्यावधि संवृत्तस्तस्याऽऽलोचनया तु साहाय्यं प्राप्येतैव, किन्तु वैदेशिकसंस्कृतेः सम्पर्कादस्माकं भोजनसामग्र्यां या या वृद्धिः समभवत्तस्या अपि क्रमिक इतिहासः शक्येतानेन संलब्धुम्। अस्तु, सम्पूर्णायाः पक्वान्नसामग्र्या गवेषणा भूयान् विस्तृतो विषयः। अत एव प्रत्येकविषयस्यै- तिहासिकीं गवेषणां निदर्शयितुमुदाहरणरूपेण 'जलेबी' भोज्यस्य विषयमुपस्थापयामि-

इदं मिष्टान्नं महाराष्ट्रेषु विशेषतया पूनानगरे भूयस्तथा प्रचलितं लोकानामभिरुचितं व मोल्सवर्थ महोदयो निजनिर्मिते मराठी- अंग्रेजीकोषे भोज्यस्यास्य विषये 'एकप्रकारकं मिष्टान्नम्' इत्येव लिलेख। 'यूल, वर्नैल कृते 'हाब्सन् जाव्सन्' सङ्ग्रहे(पृ. ४५८) जलेबीशब्दः 'ज़लाबिया'इति आरव्यशब्दस्य 'जलीबिला' पारस्यशब्दस्य चापभ्रंशःस्थिरीकृतः। आकृतिरस्य वलयायिताप्युल्लिखिता। 'चिवर्स'कृत' राजनियमविज्ञाने'(पृ. १७८) 'जलेबी'नामके मिष्टान्ने विषसम्मिश्रणस्य कथोल्लिखिता।

उक्तप्रमाणैर्यदि हिन्दी-मराठी-'जलेब'शब्दस्योद्गमो ज़लाबिया' आरव्यशब्दात् स्वीक्रियते तर्हि एतस्याः प्रथमाधिकारः आरव्यभाषाविदुषामेवाधिकं विज्ञातः स्यात्। इह तु भारतीयभोजनसामग्र्यां कदाऽस्याः समावेशोऽभवदित्येव विचारयितुं प्रयत्येत।

( २ )

प्राचीने मध्ये च युगे भोज्यस्यास्य व्यवहारः शब्दप्रयोगश्च कुत्र कुत्र कदा कदा चाभवदिति भाषावैज्ञानिकाः शब्दानामैतिहासिकाश्च विवेचयेयुः, किन्तु निबन्धेऽस्मिन् एतदेव समर्थयितुं यतिष्ये यद् भोज्यमिदं भारतवर्षे ५०० वर्षेभ्यः प्रचलितम्।

महाराष्ट्रशब्दकोषः साम्प्रतम् (१९३४) अपूर्यत। एतस्य ३ भागे १९०९-१० पृष्ठे 'जलेबी'शब्दे लिखितम्- 'जिल (ली)बी स्त्री, गोधूमसूक्ष्मचूर्ण (मैदा) निम्बुरस-घृत- दधि-शर्कराभिर्निर्मितमेकं मिष्टान्नम्। इयं वलयाकृतिः। हिन्दुस्थानी 'जलेबी, जिलेबी'।

सावित्रीबाईजोशीकृते गृहिणीशिक्षके पक्वान्नमिदं द्विविधं लिखितम्- 'जिलबी, केला- जिलबी (एतस्यां गोधूमसूक्ष्मचूर्णेन सह पक्वं कदलीफलमपि मिश्र्यते) रावजीश्रीधरगोंडलेकृते सूपशास्त्रे(पृ. ३३, ३४)प्यस्या उल्लेखः। तथैव राजकीये हस्तलिखितपुस्तकागारेऽपि हिन्दीभाषानिर्मितं हस्तलिखितं पाकशास्त्रं (यस्य हि लिपिः २०० वर्षपुरातनी) अस्ती तस्य पृ. १६, १७ द्विविधा जलेबी उल्लिखिता। सम्प्रति तदिदमन्वेषणीयमस्ति यत् महाराष्ट्राणां सामाजिककार्येषु धार्मिकोत्सवेषु च प्रयुज्यमानस्यास्य पक्वान्नस्येतिहासः कियत्प्राचीन इति।

गोडेमहोदयेन स्थानेऽस्मिन् कतिचित्पत्राणामुल्लेखः कृतः। तेषु प्रथमं पत्रं काश्मीरवासिनः प्रो. सिद्धेश्वरवर्मणोऽस्ति। महोदयेनानेन लिखितम्-उत्तरभारते 'जलेबी' भोज्यं बहु प्रचलितम्। इदं सूक्ष्मगोधूमचूर्णेन (मैदा) शर्करया च निर्मीयते, घृते च परिपच्यते। एतद्देशीयाः पण्डिताः प्राचीनस्य 'कर्णशष्कुली' शब्दस्यानुवादं 'कर्ण-जलेबी'ति कुर्वन्ति। शष्कुलीपदस्यार्थं जलेबीति वदन्ति। यतो ह्यस्याकृतिः कर्णेन बहुतरं संवदते। भारतीये मध्यकालिकसाहित्ये, आरव्यपारस्यसाहित्ययोश्च 'जलेबी' भोज्यस्य प्रकरणं तेन दृष्टं स्यादिति

नासौ स्मरति।

द्वितीयं पत्रं डा.डी.सी. सरकार, एम.ए., पी.एच.डी. महोदयस्यास्ति। एतेन हि जलेबीशब्दस्योद्गमो 'जलाबिया' इत्यारव्य शब्दादेषु समुचितो मेने। मिष्टान्नमिदं भारतस्य सर्वेष्वेव भागेषु प्रचलितम्, प्रान्तानुसारं जिलेबी, जिलिपी, जिलापी, जलापीनामभिः परिचितम्। वङ्गप्रचलितः 'जिलापोर पाक' इत्याभाणकः (कहनावत) भोज्यस्यास्य वलयाकारं संस्थानमाधारीकृत्य कस्यचिद्वक्रतायामवतरति। इदं चूर्णकदलीफल-सूपपिष्टकैर्निर्मीयते, नारिकेलकपाले निक्षिप्य घृतेन पच्यते, ततः सितालेहे (चाशनी) सन्तर्प्यते। वङ्गसाहित्ये भूयस्तरां प्रयुक्तमिदम्।

तृतीयं पत्रं कार्णाटक- डा.ए.पी. कर्मार्कर एम.ए., एल.एल.बी., पी.एच.डी. महोदयस्य। एष लिखति- कर्णाटकस्य सर्वेष्वेव प्रान्तेषु जलेबी प्रचलिता। सा हि जिलाविलु जिलेबी, तथा जिलेब्बु इति प्रसिध्यति। मद्रासविश्वविद्यालयात् प्रकाशिते तामिलशब्दकोषे लिखितम्- 'तमिलदेशे सेयं जिलेपीति प्रोच्यते। अयं शब्दो हिन्दी जलाबिया अथवा जलाबी इत्यस्मादपभ्रष्टः।'

विवरणैरमीभिः स्पष्टीभवति यद् भोज्यमिदं भारतस्य कोणे कोणे प्रसिद्धम्।

डा.एस.बी. केतकरकृत 'मराठी' शब्दकोषे न किञ्चिल्लिखितं जलेबीभोज्यविषये, यद्यपि हाब्सन-जाब्सनमध्ये तदिदमुल्लिखितम्। महाराष्ट्रेतिहासस्य 'पेशवा-कालं वर्णने धर्मशास्त्रानुसारं ब्राह्मणेषु कथं व्यवहर्तव्यमिति पदे पदे निदर्शितम्। ततश्च १७०० ई. आरभ्य १८१८ ईसवीपर्यन्तं पेशवानां समये ब्राह्मणभोजनस्य दक्षिणादेश्चोल्लेखपत्रैः जलेबीभोज्यानुसन्धानस्य भूयसी सम्भावना। महाराष्ट्रविद्वद्भ्यः प्रार्थना यत्ते १७००तमात्ख्रिष्टवत्सरात्पूर्वस्य प्रमाणस्य चेदन्वेषणं कुर्युस्तां तत्समधिकमुपयुज्येत।'

एतदासन्ने एव समये (१६७६-७७ख्रि.) रघुनाथपन्तहनुमत्कृते राज्यव्यवहारकोषे भोज्यवर्गे जलेबीभोज्यस्य न कोऽप्युल्लेखः (कोषो छत्रपतेः शिवाजिनः कृते निरमीयत्। अस्मिन् तत्कालप्रचलितानां महाराष्ट्रशब्दानां सङ्ग्रहः, यो हि दशवर्गेषु विभक्तः- राजकार्यस्थान-भोज्यशास्त्र-चतुरङ्ग-सामन्त-दुर्ग-लेखन-जनपदपण्येति। मुगलशासनकाले देशीयभाषास्वपि यवनभाषाया आक्रमणस्य दृश्यतां स्पष्टं निदर्शनां पण्डितानां मनोविनोदाय भोज्यवर्गस्य दीयते काचिद्वर्णिका-

**'अथ पाकालयं <u>मुद्बख्खानेति</u> परिभाषितम्।**
**मुब्दखी पाककारः स्याच् चासणीकार नाम तु।।८०।।**
**रुचिग्राही, पाककर्मी तु स्याद् <u>दवादवी</u>।**
**<u>रसोयी</u> स्यात्तु सिद्धान्नं <u>कन्दोरी</u> त्वन्नमुच्यते।।८१।।**
**पानकादिरसस्थानं <u>शर्बतखाना</u> प्रकीर्तितः।**
**फलजाते तु <u>मेवा</u> स्यात् <u>खुष्तरं</u> खाद्यवस्तुनि।।८६।।**

पण्यवर्गे–

**अरालिको भटारी स्यात् भर्जकस्तु फुटाणगार।**
**आपूपिकः शिरीन्गारो भुसारी धान्यविक्रयी।।७६।।'**

किन्तु राज्यव्यवहारकोषे नासीदित्यनेन देशे तस्मिन्समये 'जलेबी'- भोज्यस्य प्रचार एव नासीदिति न शक्यते विज्ञातुम्। 'भाण्डारकर ओरिएण्टल-रिसर्च-इन्स्टिट्यूट, हस्तलिखितपुस्तकालये पाकशास्त्रस्यैकं तादृशं दुर्लभं पुस्तकमुपलब्धं यस्य लिपिः १६७८ तमे विक्रमाब्दे (१७३४ ई.) संवृत्ता। मूलपुस्तकं तु कदाचित् चतुर्दशपञ्चदशशतकादपि पुरातनी कृतिः। ग्रन्थेऽस्मिन् 'जलेबी' भोज्यस्य न केवलं नाम निर्देश एव, अपि तु मिष्टान्नस्यास्य निर्माणप्रकारोऽपि विस्तरेण वर्णितः-

(हस्तलिखितप्रतिसंख्या ६४१-१८८७-९१। पत्रसंख्या १४)

**अथ जलेबी कुण्डल संस्कृते**

**द्विप्रस्था शुद्धशमिता चतुर्गोधूमगालिता।**
**मिमर्घयपसा( पयसा ) स्थाप्या यावदम्लत्वमाप्नुयात्।।**
**सच्छिद्रे नारिकेरस्य पात्रे तप्तकमाहरेत्।**
**परिभ्राम्य घृते तप्ते पचेत्तन्मन्दवह्निना।।**
**सुपक्वां कङ्कणाकारां सितालेहे निपातयेत्( विनिक्षिपेत्)।**
**सा तु कुण्डलिका[१] नाम्ना क्वचिच्च जलवल्लिका।**
**जलवल्ली सरा वृष्या बृंहणी हृष्टिपुष्टिदा।।**
**धातुस्तन्यकरी हृद्या विशेषा बलतुष्टिदा।''**

उपरिलिखितानि गुण्यगुणबोधिन्याः' पद्यानि महत्त्वपूर्णानि, ततो ह्यस्मात् प्राचीनं पाकशास्त्रविषयकं पुस्तकं न मयोपलब्धम्। भारतीयभोज्यशास्त्रस्य विद्वांसः कदाचित् १००० तमात् खिष्टीयवत्सरादुत्तरं निर्मितस्य ग्रन्थस्य कुर्युरनुसन्धानम्। 'गुण्यगुणबोधिनी' १६०० खिष्टवत्सरात्पूर्वभवा कृतिः। साम्प्रतमितः पूर्वो 'जलेबी' भोज्यस्येतिहासो गवेषणीयो नूनम्।

जिनसूरिरचितः 'प्रियङ्करनृपकथा' नामको जैनग्रन्थः षोडशशतकात्पूर्वं निर्मितः। एतस्मिन् श्रेष्ठिनैकेन दत्तो महाभोजो विस्तृत्य वर्णितः। अस्मिन् पक्वान्नैरन्यै; सह 'जलेबी' भोज्यस्याप्युल्लेखः-

(प्रौफेसरकापडियाद्वारा सम्पादितम् संस्करणम् पृ. २८-२९)

---

१. जलवल्लिका-जलवल्ली इत तु 'जलाबिया'इत्यारव्यशब्दादपभ्रंश्य संस्कृते विनिर्मितम् ('कुण्डलिका' आकारानुरूपं नाम, कदाचिदिदमेव प्राचीनकाले व्यवहृतं भवेदिति (गोडेमहोदयटिप्पणी

''ततः श्रेष्ठी भोजनावसरे सर्वस्वजनानां स्थालीवर्तुलिकादि मण्डयित्वा शर्करापानीयं पूर्वं परिवेषयामास। ततः कुङ्कण-कदलीफल-केहिलापाक-खारिक खजुर-खांड-गुंदवडा-घेवर-चारवी-चारोली-जलेबी-टुप्पर-करमीरु ? द्राख नीलीद्राख-दाडिमकुली-पनीस ? फीणी-पोउआवसोला वायम-पिस्तां अषोड-सेलडी-शृङ्गाटक-प्रमुखफलावली परिवेषिता।....''

प्रोफेसर एच.आर. कापडियाद्वारा सम्पादितमिदं संस्करणम्। श्रेष्ठिदेवचन्दलालभाई। जे.पी-धनराशि (फण्ड)पुस्तकमालायाः ८० तमो ग्रन्थः (सूरतनगरात्प्रकाशितः १९३२) चायम्। अस्य प्राक्कथने (पृ. १०) प्रो. कापडिया लिखति- 'जिनसूरिर्बीसलराजसूरेः शिष्यः। आसन् बीसलराजस्य बहवः शिष्याः। तेषामेकतमः १५१२ विक्रमाब्दे (१४५६ ख्रि.) वीतरागस्तोत्रोपरिपञ्जिकामलिखत्। ततश्च जिनसूरेः समयः १५१२ वि. (१४५६ ख्रि.) त आरभ्य १६०० वि. (१५४४ ई.) पर्यन्तो भवेत्। यदि जिनसूरिविषये प्रो. कापडियामहोदयस्यानुमानं सम्यक् तर्हि प्रियङ्करनृपकथाया निर्माणकालः १४०० ई तः १५०० ई. पर्यन्तः। एतस्मिन्नुलिखितं जलेबीवर्णनं १५०० ई. तःसुतरां प्राचीनम्।

सप्तदशशताब्द्यां लिखिते पाकशास्त्रग्रन्थे 'भोजनकुतूहले' 'जलेबी' निर्माणप्रकार एवं वर्णितः- (पत्रं २०)

**'नूतनो( ? ) घटमादाय तस्यान्तः कुशलो जनः।**
**प्रस्थार्धे परिमाणेन दध्नाम्लेण प्रलेपयेत्।।**
**द्विप्रस्थां समितां तत्र दध्यम्लं प्रस्थसम्मितम्।**
**घृतमर्धशरावं च घोलयित्वा घटे क्षिपेत्।।**
**आतपे स्थापयेत्तावत् यावद्याति तदम्लताम्।**
**ततस्तत्प्रक्षिपेत्पात्रे सच्छिद्रे भाजनेन तत्।।**[१]

---

१. पाकशास्त्रविषयकं संस्कृतपुस्तकमिदमतिप्राचीनम्। लिखितपुस्तकालये उपलब्धस्यास्य साधारणलेखकलिखिताया लिपेः प्रारम्भोपसंहारौ एवं तावदविकलौ।'श्रीगणेशाय नमः। अथ भक्तादिप्रकरणम्।''जले चतुर्दशगुणे क्वथिते सखे वरान्। तन्दुलानम्भसा धौतान् द्विस्त्रिर्वा मौक्तिकाकृतीन्। पृथौ शरावे शाल्यास्यस्थिते सविवरे दृढे। परितो वस्त्रखण्डेन विसंधिपरिवेष्टिते। इत्यादि। समाप्तिस्तु- 'इति भोजनप्रकरणम्। श्रीः श्रीः संवत् १७३४ वर्षे चैत्रासितनवमी कर्मवाट्यां लिखितेयं पुस्तकम् ?।'

मार्मिकाणां प्रमोदाय पुस्तकस्य प्रकरणानि सूच्यन्ते- अथ नानाभक्तगुणाः (१-२) अथ मण्डः (२) अथ जूषाः (३) सूपाः (३-४) पापरगुणाः (४-५) यायसगुणाः (५) पोलिकागुणाः (५) मण्डिका (५) यमलरोटिकाः (६) पूरिकाः (६) कचवल्ली (६) वटकः (६) पक्ववटी (७) पानकम् (८) रागखाण्डवम् (८) शिखरणी (८) वासवती (८) सन्धानगुणाः (८) फेणिका (९) लड्डुकाः (१०) बिन्दुमोदकाः (११) दुग्धकरञ्जिकाः (१२) पयःशृङ्गारकाः (१२) क्षीरशाकम् (१२) लापसी (१२) चन्द्रहासी (लपसिका) (१३) घेवरः (१३) अपूपकः (१३) दधिवटिका (१३) जलेबी (१४) माठः (१४) इन्दुरसा (१४) कसार (१४) शक्तुः (१५) कुलमाषाः (१५) कोहरी (घुंघुटी इति लोके) (१५) धानाः (१५) बहुरी (१५) उम्बिका (१५) चणकहोलकः (१५) लारी (१५) मांसरन्धनप्रकारगुणाः (१६) भृष्टादिलक्षणम् (१६) सर्वमांसप्रक्षालनप्रकारः (१७) वेसवारः (१७) इति गुण्यगुणबोधिन्यां भक्तादिप्रकरणम्। एवं किल १७ पत्रेषु प्रकरणमिदं समाप्तम्।

पाकशास्त्रविषयकम्. इत्यादिका सेयं टिप्पणी गतसञ्चिकायाः पृ. ३१३ 'गुण्यगुणबोधिनी' विषयिकास्ति। एषा तत्रैव पाठकैर्बोध्या (सम्पादकः)

**परिभ्राम्य परिभ्राम्य तत्सन्तप्तघृते क्षिपेत्।**
**पुनः पुनस्तदावृत्य विदध्यात् मण्डलाकृतिः( ?)।।**
**तां सुपक्कां घृतान्नीत्वा सितापाके तनुद्रवे।**
**कर्पूरादिसुगन्धं च श्रपइयित्वोद्धरेत्ततः।।**
**एषा कुण्डलिनानाम्ना पुष्टिकान्तिबलप्रदा।**
**धातुवृद्धिकरी वृष्या रुच्या चेन्द्रियतर्पणी।। ( इति जलेबी )'**

भोजनकुतूहलस्य तिथिः शक संवत् १७२५ (१८०३ ई.) 'शके १७२५ रुधिरोद्गारी नाम संवत्सरे चैत्रकृष्णचतुर्दश्यां सौम्यवासरे इदं ग्रन्थः समाप्तिमगमत्।' (हस्तलिखितपुस्तकम्, यत्र ५९) भोजनकुतूहलनिर्मातुर्नाम अनन्त देवादयपुत्रो रघुनाथः। Burnell बर्नैलेन (पृ. ७३) लिखितम्– 'एतस्यानावश्यकपुस्तकस्य मिथ्याभिमानी सङ्कलयिता दक्षिणभारतस्य निवासी। एतस्य समयः सप्तदशशताब्द्याः (ई) अन्तः, अष्टादश्या आदिर्वा भवेत्। तञ्जोरस्य हस्तलिखितपुस्तकानां सूचीपत्रेऽपि (भागः १६, १९३६ ई.) भोजनकुतूहलस्य प्रतिलिपिर्वर्तते (क्रमसंख्या ११२३८ तः ११२४३। ११२३८ तमा प्रतिः १७५० ई. लिखिता)'

भोजनकुतूहलस्य प्रोक्तानि पद्यानि भावप्रकाशेऽपि प्राप्यन्ते। एतेषामाधारेणैव 'मुल्कराज आनन्दनाम्ना निजपुस्तके जलेबीनिर्माणप्रकारो लिखतः। पद्यानीमानि पाकशास्त्रस्य लिप्याम् (१६७८ ई.) अपि प्राप्यन्ते। भूयस्तरां सम्भवो यद् भोजनकुतूहलकर्ता रघुनाथः पाकशास्त्रपद्यान्येव दृष्टौ दृढीकृतवान्। यदीदं तथ्यं तर्हि भोजनकुतूहलमवश्यमेव १७०० ई. आसन्नकाले निर्मितम्। पाकशास्त्रस्य विषये लिखितं पुरा यत्पुस्तकमिदं १६८० ई. तः पूर्वमलेखि। एतस्य निर्माता सन्तरामदासस्य दृढं मित्रम्। समयोऽस्य १६४० ई. तः १७१२ ई. मध्यगतः। रघुनाथेन साधारणतया तान्येव नामानि पक्वान्नानां दत्तानि यानि साम्प्रतं महाराष्ट्र्यां प्रयुक्तानि। एतेषां सूची अतिदीर्घा यस्या उद्धरणमिह कठिनमनावश्यकं च।'

एतदग्रे गोडेमहोदयेन महाराष्ट्रेषु प्रचलिताया भोजनसामग्र्या दीर्घैका सूची दत्ता। सेयं नागपुरस्थ एच्.एन. नेनेसम्पादित– 'लीलाचरित्र' (१९३६ ई.) स्याधारेण। चरित्रमिदं त्रयोदशशताब्द्याः। यद्यप्यस्मिन्– 'जलेबी' भोज्यस्य न दृश्यते नाम, तथापि समयेऽस्मिन् देशे कियन्ति भोज्यपक्वान्नानि प्राचलन्निति सम्यग् विज्ञायते। सूच्या एतस्या दर्शनादिदमपि ज्ञायेत यत् त्रयोदशशताब्दीमारभ्याद्यावधि महाराष्ट्रे भोजनसामग्रीषु नाधिकं परिवर्तनम्। उपरि सूचितमस्ति यत् षोडशशताब्द्यां गुर्जरदेशे जलेबीभोज्यमिदं प्राचलत्। सम्प्रति गवेषकैरन्वेष्यं यत् जलेबिभोज्यमिदं कस्मात् (देशात्) कस्मिन् समये चास्माभिरात्मीयीकृतम्।

## शष्कुली

जलेबीभोज्यस्येतिवृत्तमेतदवधि समधिगतं गवेषणामार्गेण पाठकमहाभागैः। साधनसम्पन्नानामनुभविनां 'गवेषकाणां' सम्मुखे निःसाधनाः केवलं यत्किञ्चित्साहित्यधनाः किं वा प्रगल्भेरन्? किन्तु साहित्ये पक्वान्नस्यास्य कुत्र कुत्र वर्णनसम्बन्धः समुपलब्ध इति स्वयं गोडेमहाभागोऽपि जिज्ञासते किञ्चित् साहित्यज्ञेभ्यः। अत एव प्रारम्भे किञ्चित् प्रस्तुतं

प्रसङ्गादिह निवेदयितुमिच्छामि। मम दृष्टौ पक्वान्नमिदं संस्कृतसाहित्यस्य प्रचारमध्ययुगे भारतीयजनतायाः सुपरिचितं पण्डितानां प्रयोगभुक्तं चासीत्। यद्यपि प्रान्तीयभाषाणामुज्जृम्भणसमये हिन्दी- (व्रज) भाषायाः साहित्यक्षेत्रव्यापनकाले च विनोदप्रियपण्डितमण्डले 'कुण्डलिका-जलवलि-जलवल्ली'त्यादयः शब्दा अपि प्रावर्तन्त किन्तु ते 'जलेबी'ति भाषाप्रसिद्धशब्दानुकरणेनैव। यथा सुप्रसिद्धकवीन्द्राणां जयपुरराजवैद्य-श्रीश्रीकृष्णरामभट्टानां 'सिद्धभेषजमणिमालायाम्' ''जलवलिवलयानि प्रौढपित्तक्षयानि'' इत्यादि। किन्तु संस्कृतसाहित्ये पुरा प्रायुज्यत 'शष्कुली' इत्येव शब्दो जलेबीत्येतदर्थम्। 'कर्णशष्कुली'ति साहित्ये सन्दर्भणं बहोः कालात्प्रचलितम्। प्रायोजि बाणादिभिरपि तदिदम्। वेणीप्रभृतिनाटकेषु तु प्रायः पदे पदे समुपलभ्यते। सेयमौपम्योक्तिः कर्णस्य जलेबीभोज्यस्य चाऽऽकारसाम्येन प्राचलदिति न केवलं मादृशा एव, अपि तु गवेषकप्रवर-प्रो. सिद्धेश्वरवर्मणापि पूर्वमुल्लिखितम्।

काश्मीरः शारदादेश इति प्रोचुर्बिह्लणादयः। सत्यं तत्र (काश्मीरेषु) गवेषणे कृते 'संस्कृतगिरः प्रयोगप्रवाहो निभृतं निगूढ इव प्राप्यते। अद्यापि तत्र संस्कृतज्ञमण्डले जलेबीभोज्यार्थं 'शष्कुली' प्रयोगः प्रसिध्यति। शुद्धपण्डिताश्च 'कर्णशष्कुली'त्यस्य 'कर्णजलेबी'त्यनुवादं विदधति। परम्पराप्रचलितः प्रयोगप्रवाहोऽयं न किं प्रमाणयति प्राचीनकालेऽपि भोज्यस्यास्य सत्ताम्?

''शष्कुलीशब्दमात्रेण किं दूरं योजनत्रयम्'' इति हि साधारणकक्ष्यायां प्रचलितो भोजनभट्टानां परिहासोऽप्यास्वादविशेषेणाऽऽकर्षकतया 'जलेबी' भोज्यमेवोपस्थापयति व्यवहारप्रवाहे। 'शष्कुली'पदस्य 'पूरी'त्यर्थस्तु 'सचिक्कण' पण्डिताई एव। साहित्ये न केवलं 'कर्णशष्कुली'त्येव प्रयोगः, प्रेक्षितः, प्राप्यते प्रातिस्विकरूपेण पक्वान्नस्यास्य कृते 'शष्कुली'पदप्रयोगोऽपि निःशङ्कम्। साहित्यपदसंघटनायां मूर्द्धन्यं स्थानमधिष्ठिताया वैदर्भरीतेर्ज्वलदुदाहरणभूता अनन्तकविनिर्मिता ''भारतचम्पूः'' संस्कृतसाहित्यस्य मौलिमण्डनभूता। हन्त एतद्देशीयाः केचन जनतामान्या अपि महापण्डितास्तामिमामप्रसिद्धां जानन्ति। हन्त नैते वराकास्तादृशे देशे वातावरणे च प्रालिताः। दक्षिण-गुर्जरादिप्रान्तेषु व्युत्पत्तये प्रधानपाठ्येयं चम्पूः। अस्ति च काश्यादिषु परीक्षायामपि नियता। अत्र अर्जुनद्वारा खाण्डववनदाहे रुचिरतममुक्तमनन्तकविना। बहोः कालात्पूर्वं पठितमपि मम हृदयपटलेऽद्यावध्यपि चित्रितमिव। जलेबीभोज्ये उपरितः किञ्चित्कर्करता ('कुरकुरापन') अन्तश्च रसनिर्भरता प्रशस्यते। अनन्तकविराह-

**'ज्वालतापभरकुण्डलिताङ्गीः क्ष्वेडसारघृतसेचनमृद्वीः।**
**सर्पपुङ्गवततीरतिहृष्टः शष्कुलीरिव चचर्व कृशानुः।।'**

महाराष्ट्रष्टीकाकारो व्याख्याति- 'कोडबली इति जिलीबी इति च प्रसिद्धपदार्थानिव'।

तापात् कुण्डलाकारेण स्थितानां सर्पाणां राशिर्हन्त जलेबीभोज्याकारेण प्रेक्ष्यतां कियत्संवदते? अहह स्वल्पचर्मावृते सर्पशरीरे अभ्यन्तरं रक्तवसापूर्णता 'जलेबी' भोज्यं कियदनुहरते?

जलेबीत्येतद्बोधनाय न केवलं 'शष्कुली'शब्दप्रयोग एव प्राप्यते संस्कृतसाहित्ये, कर्णस्याकारसाम्येन चित्रं 'कर्णशष्कुली'त्यपि व्यपदेशो दृष्टः साहित्ये। अध्यात्मरामायणं को वा भूमण्डले न वेत्ति संस्कृतस्य। एतस्य 'बालकाण्डे' भगवतो रामचन्द्रस्य वर्षवृद्ध्यादिमहोत्सवेषु मङ्गलार्थमभ्युदयार्थं च जननी कौसल्या यत्र वायनानि ददाति तेषु कर्णशष्कुल्याः प्रेक्ष्येत प्रयोगः प्रेक्षावद्भिः। अत्र 'कचोरी'त्यस्यापि प्राप्यते व्यवहारो यथा–

**''कौसल्या जननी तस्य मासि मासि प्रकुर्वती।**
**वायनानि विचित्राणि समलङ्कृत्य राघवम्।।५०।।**
**अपूपान् मोदकान् कृत्वा कर्णशष्कुलिकास्तथा।**
**कर्णपूरांश्च विविधान् वर्षवृद्धौ च वायनम्।।५१।।''**

विवादशीलमहोदयानां नात्र विवादस्याऽप्यवसरः। 'गीताप्रेस, गोरखपुरः' तः अध्यात्मरामायणस्य यत्संस्करणं साम्प्रतमेव प्रकाशितं तत्र भाषान्तरकर्त्रा मुनिलालमहोदयेन 'कर्णशष्कुली'त्यस्य 'जलेबी' कर्णपूरपदस्य च 'कचौडी'त्यनुवादो विहितः।

न चायं प्रयोगप्रवाहः प्रावहत्केवलं साहित्यसौरभोद्याने एव। अनुवर्तते सोऽयं गहनजटिले शास्त्रार्थप्रान्तरेऽपि। न्यायव्याकरणपण्डितेष्वपि 'शष्कुली' पदं जलेबीभोज्यस्यैव कृते समवातरत्। न्यायमुक्तावल्यां द्रव्यनिरूपणप्रकरणे मनसोऽणुत्वसाधने– ''न च दीर्घशष्कुलीभक्षणादौ नानावधानभाजां च कथमेकदा–नानेन्द्रियज्ञानम्'' इति जलेबीभोज्यस्यार्थे स्पष्टं प्रायोजि शष्कुलीशब्दः। हन्त, संस्मरामि खेदेन, यदेकेन न्यायाचार्येण शष्कुलीपदस्य 'कचोरी'त्यर्थोऽकारि। शष्कुली 'पूरी', दीर्घशष्कुली च 'कचौरी'ति मन्ये महाभागस्य हृदयम्। किन्तु तदिदं नैयायिकानां परम्पराप्रचलितं व्युत्पन्नत्वं सूचयितुमेवाऽलम्। कदाचिदत्र तर्ककर्कशमतयः केचिच्छास्त्रार्थायाऽपि सन्नह्येरन्, किन्तु विद्याकेन्द्रभूतायां काश्यां समधीतन्यायादिदर्शनशास्त्रेण निर्मल पं.स्वामिगोविन्दसिंहसाधुना मुक्तावल्यां या हिन्दीटीका निर्मिता, या च १९७२ विक्रमाब्दे वेङ्कटेश्वरमुद्रायन्त्रालये मुद्रिता तस्यां 'शष्कुली' शब्दस्य जलेबीत्येवाऽर्थोऽकारि। एष हि महाभागः काशीस्थपण्डितमण्डल्यां प्रासिध्यत्तस्मिन् समये। टीकायामेतस्यां भारतप्रसिद्धं काशीस्थपण्डितप्रवररामिमिश्रमहाभागानां सम्मतिरप्यासीदिति संस्मरामि।

अस्तु, नाधिकविस्तरेण प्रयोजनम्। किन्तु व्यावहारिकशब्दानां विषये वर्तमानसंस्कृतज्ञाः किंकर्तव्यविमूढा इव। केचिदविकृतान् भाषान्तरशब्दानेव संस्कृते प्रवेशयितुं यतन्ते। अपरे संस्कृतशैल्या तान्परिष्कृत्य जिघृक्षन्ति। किन्तु सन्ति संस्कृतसाहित्ये व्यवहृताः प्राचीना एव व्यावहारिकशब्दा भूयांसो ये ह्यनुशीलनाभावादस्मत्तो दूरीभूताः। तेषामन्वेषणाय संस्कृतसेविभिः किञ्चित्परिश्रमितव्यं स्यादित्यलं विस्तरेण।

***

# विच्छित्तिवैपुल्यवैभवम्

## आमुखम्

मञ्जुनाथोपाह्वानां भट्टश्रीमथुरानाथशास्त्रिणां साहित्यसाधनासङ्कल्पेष्वन्यतमोऽभूत् संस्कृतभाषाया ''मृतभाषात्व'' प्रख्यापनस्य यः प्रक्रम आधुनिकभाषाशास्त्रज्ञैः कतिपयैरक्रियत तस्य सबलं प्रत्याख्यानम्। एतदर्थं तैः 'गन्धर्वसेनस्य स्वर्गयात्रा' 'अपि नाम सेयमव्यावहारिकी' इत्यादि शीर्षकैर्निबन्धैः स्पष्टीकृतमभूद् यत् हित्ती (हिटाइट)-प्राचीन 'ग्रीक'-'लैटिन' वत् कतिपयासां भाषाणां 'मृतत्वस्य' 'केवलपुस्तकस्थत्वस्य' च यः प्रचारो भाषाविज्ञानज्ञैरक्रियत, तस्यामेव च कोटौ संस्कृतस्यापि मृतत्वव्यपदेशोऽक्रियत, स नूनं मृषा, यतो हि ता भाषाः केवलं प्राचीनाः, पुस्तकस्थाः, न भाष्यन्ते, न तासु पत्र पत्रिकाः-प्रकाश्यन्ते, न लोकव्यवहारः किन्तु संस्कृतं जीवन्ती, जागृता, प्रयुक्ता, आधुनिकी, भाषाऽस्ति यतोऽस्यां नूतनसाहित्यं सृज्यते, पत्रपत्रिकाः प्रकाश्यन्ते, लोकव्यवहारो भवति, अध्यापनस्य माध्यममियं भाषेत्यादि।

अनेन घण्टाघोषेण सह यत् संस्कृतभाषा विश्वस्य प्राचीनतमा भाषाऽस्ति किन्तु जीवन्ती, नूतना, प्रयुज्यमाना चाऽप्यसि, तेषामपरो घण्टाघोषोऽभूद् यत् संस्कृतं विश्वस्य समृद्धतमा भाषाऽप्यस्ति। अन्यासां भाषाणां शब्दभाण्डागारस्य गणना कर्तुं शक्या , कामं समृद्धास्ता भवन्तु भाषाः, किन्तु संस्कृतायाः शब्दभाण्डागारोऽपरिगणनीयः, अनन्तः। अत एवास्यां सेयं शक्तिरद्यापि विद्यते यदेकस्यार्थस्याभिव्यक्तिरस्यां शतशः सहस्रशो वा रूपैर्विधाभिः, प्रकारैः, शब्दशय्याभिर्वा कर्तुं शक्यते। संस्कृतभाषायाः समृद्धेरस्याः प्रदर्शनाय तैः काश्यां १९३० ई. वत्सरे विद्वत्सभायामेकस्यामेकः प्रयोगः प्रादर्शि यत्र तैर्घोषितं यद् हिन्दीभाषायामेकाऽभिव्यक्तिरस्तिः।

**'जब आकाश बादलों से घिरा था तब मैं साहित्य सम्मेलन के लिए घर से रवाना हुआ।'**

अस्यार्थस्य कतिभिः प्रकारैराङ्गलभाषायां हिन्द्यामन्यस्यां वा कस्याञ्चन भाषायामभिव्यक्तिः कर्त्तुं शक्यते इति कश्चन प्रदर्शयतु, अन्यथाऽहमत्रैव प्रदर्शयामि यत्कतिशोऽस्याभिव्यक्तिः संस्कृते कर्तुं शक्या। तदनु तैस्तत्रैव प्रायस्त्रिशतप्रकारेषु विभिन्नान् शब्दान् (पर्यायान्) प्रयुज्यार्थस्यास्याऽभिव्यक्तेः कृते त्रिशतं वाक्यानि निरमीयन्त। वाक्यानीमानि वाराणसेये संस्कृतमासिके 'सुप्रभातम्' इत्याख्ये (नवम्बर १९३९) प्रकाशितान्यपि, सुविदितमिदं वृत्तं तत्कालीनां विदुषाम्।

तेषामत्राऽऽकूतमिदमपि भवेद् यत् हिन्द्यामाङ्गलभाषायां वा 'बादलों' 'आकाश' इत्यादीनां कृते पर्यायद्वयं स्यात् त्रयं वा (आङ्ग्ल्यां क्लाउड, स्काई इत्येव शब्दद्वयं, कुत्र सन्ति पर्यायाः ?) किन्तु संस्कृते शतशः पर्याया एतत्कृते।

इत्थं हि संस्कृतभाषायाः समृद्धतमभाषात्वख्यापनमपि तेषामभियानेष्वेकतममासीत्।

ते कथयन्ति स्म यदस्यां भाषायामेकस्यार्थस्य कृते शतशः शब्दाः, पर्यायास्तु सन्त्येव, अभिव्यक्तीनामपि शतशः प्रकाराः सन्ति। अत एव काव्यनाटकादिषु समर्थाः सर्जका विविधैः प्रकारैः, छटाभिः, विच्छित्तिभिरेकस्यार्थस्य भावस्य वाऽभिधानं, प्रस्तुतीकरणं वा कुर्वन्ति स्म। तदिदमपि गीर्वाणगिराया अस्या देवभाषात्वस्य, समृद्धतमत्वस्य च प्रमाणम्। पद्यनिर्माणसमये लघु-गुरु-वर्णसंरचनाया अनुरोधेन बहुधा शब्दस्यैकस्य कृते विविधपर्यायप्रयोगस्य वाञ्छनीयताऽनुभूयते स्म कविभिः। अतोऽभिव्यक्तीनां सुरुचिरा, ललिता, हृदयग्राहिणश्च प्रकारा उपलब्धुं शक्यते परःसहस्रवर्षपुरातनेऽस्या भाषायाः साहित्ये।

भाषाया अस्यास्तादृशाभिव्यक्तिप्रकारबहुलत्ववाहकस्य सामर्थ्यस्य प्रदर्शनाय विभिन्नानामर्थानां कृते कथं खल्वाशयस्यैकस्य विविधाः प्रकाराः विच्छित्तयश्च परिकल्पयितुं शक्यन्ते समर्थैः सर्जकैः (कविभिः कथाकारैर्नाटककारैर्वा) इति प्रस्तोतुं तैर्विशालो निबन्धो व्यलेखि यत्र बहूनि तादृशान्युदाहरणानि सूचीबद्धानि कृतानि। स्वर्गारोहणस्य प्रायोऽष्टवर्षपूर्वमयं विस्तृतो निबन्धो विलिखितोऽभूत्। नाऽयं तेषां जीवनकाले कुत्रचनापि पत्रपत्रिकासु प्रकाशमगात्, न वा कस्मिंश्चन ग्रन्थे प्राकाश्यत। राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरात् (यस्तदानीं केन्द्रीय संस्कृत विद्यापीठ, जयपुर इतिनाम्ना ज्ञायते स्म) प्रकाशिते प्रबन्धपारिजाताख्ये ग्रन्थेऽपि (१९८७ ई.) नायं प्राकाशि यतस्तत्र छात्राणां मार्गदर्शनाय वर्णनात्मक-विमर्शात्मक-ललितनिबन्धप्रभृतयः सुप्रचलिता निबन्धा एव प्राकाश्यन्त। सर्जकाणां मार्गदर्शकोऽयं निबन्धो न समावेश्यत तस्मिन् ग्रन्थे।

दिल्लीस्थ-लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य (मानितविश्वविद्यालयस्य) कुलपतिभिः डॉ. वाचस्पत्युपाध्यायैर्विद्यापीठस्य प्रकाशनयोजनासु भट्टमथुरानाथशास्त्रिणां काव्यशास्त्रीयनिबन्धसंग्रहस्य प्रकाशनं यदा प्रास्तावि, तदा तस्मिन् निबन्धसङ्ग्रहे विच्छित्तिवैपुल्यविवेचकस्यास्य निबन्धस्य प्रकाशनमभूत् सपद्येव। एवंविधानां विच्छित्तिविशेषाणां प्रस्तुतिरन्यत्र न कुत्रापि दृष्टा स्यादद्यावधि संस्कृतभारत्या इतिहासे कदापि केनचनेति नूतनस्याऽभूतपूर्वस्य चाऽस्य प्रबन्धस्याऽत्र प्रस्तुतिर्विशिष्टं महत्त्वमादध्यात्, प्रसादयेच्च गुणज्ञान् सुधियो जिज्ञासून् पाठकांश्चेति समुदाह्रियतेऽयं प्रबन्धोऽत्र।

(देवर्षिकलानाथशास्त्री)

***

## विच्छित्तिवैपुल्यं, विविधा विधाश्चाभिव्यक्तेः

छन्दोनिबन्धकानां कवीनां रचनाशैली निबन्धनीयविषयानुसारं नानाविधान्मार्गानादायाऽग्रसरीभवति। कुत्रचित् स्वल्पमप्यर्थं विपुलं विस्तृत्य स वर्णयति, क्वचित्तु भूयांसमप्यर्थं प्रतिभाचातुर्येण भृशतरं लघूकृत्य समुपस्थापयति। एतावल्लाघवमाश्रयति यद् विस्तृतवाक्येन बोधनीयमर्थं केवलमेकमात्रेण पदेनोपनिबध्नाति। पुरातनैः कविभिर्निजरचनासु भूयः परिशीलितोऽयं प्रकारः वामनादिभिर्विस्तारप्रकारोऽयं 'व्यास'नाम्ना, संक्षेपप्रकारश्च 'समास'नाम्ना सूचितः। प्राञ्चः कवयः प्रकारैरेभिर्भूयान्सं लाभं प्रायुः किन्तु मध्ययुगस्य साहित्यशास्त्रान् (अलङ्कारशास्त्रान्, रीतिग्रन्थेभ्यः) एवंविधा विषयास्तिरोहिता बभूवुः। तत्स्थानम् अन्यान्यशास्त्रैः सह विवादमया विषया अवरुरुधुः।

उपरिसूचितसाहित्यरचनार्थमुपयुक्ता भाषा अपेक्ष्यते। भाषायाः सम्पत्तिस्तु अर्थान् तादृशसम्पत्त्यर्थं साधकानि यथेष्टमर्थदातारः शब्दा धातवश्चेति को वा न जानाति ? संस्कृतभाषाया नामानि (प्रातिपदिकानि) धातवश्च तथा कामधेनवो यथा एभिर्निबद्धा रचना अद्भुतं प्रभावमुत्पादयामास सहृदयानां हृदये। अपेक्ष्यते तु तत्र साहित्यनिबन्धकस्य कवेः प्रतिभाचातुर्यं नूनम्। 'कल' कामधेनुरिति प्रसिद्धो वैयाकरणवर्गे। अर्थात् 'कलयति' इति क्रियां करणरचनस्थापनविचारणादिनानार्थेषु प्रयुयुजुः प्राञ्चः कवयः। एवं किल यथेच्छ विस्ताराय सुखं स्वातन्त्र्यं लब्ध्वाऽपि यथामनोरथमर्थसम्पत्तये पुनरग्रे प्रासरन् प्राचीनाः प्रतिभासम्पन्नाः। ते हि एकस्य धातोः प्रयोजनमन्येनाऽपि धातुना यथेष्टं सम्पादयामासुः। एतदर्थमेव दार्शनिकगोष्ठ्यां प्रपञ्चिता लक्षणाव्यञ्जनादीनां मार्गाः साहित्यसीमायामपि प्रविविशुः, यैर्हि नानाविधविचित्रार्थसम्पत्तिः कविभिरधिगता। एतस्या अर्थसम्पत्तेरधिगमाय साहित्यरीतिग्रन्थेषु लक्षणाव्यञ्जनादीनां भूयांसो भेदाः प्रकाराश्च प्रचलिता यैस्तावदलङ्कारग्रन्थानां भूयान् भागोऽवरुद्धः। किन्तु तेषामुपयोगं यथावदजानतां साम्प्रतिकसाहित्याध्यायिनां कृते रीतिग्रन्थानां सोऽयं भागः केवलं घोषणाय कण्ठशोषणायैव।

विवादमात्राय फक्किकाग्रन्थान् सञ्चिन्वन्तो नवीनवैयाकरणा अपि मार्गमिमं विस्मृतवन्तः। किन्तु यथार्थतो व्युत्पन्नैः प्राचीनवैयाकरणैर्निजनिबन्धेषु पद्धतेरेतस्या दिग्दर्शनं यथावद् विहितम्। समर्थैः कविभिश्च सोऽयं मार्गः संस्कृतभाषाया व्यवहारप्रवाहे प्रचारितश्च पूर्वम्। वर्णिका ('बानगी') प्रदर्शनार्थमेवंविधा धातवः केचिदधो निर्दिश्यन्ते। नानाविधानां छन्दसां गतेरनुसारं नानाभङ्गीनि वाक्यानि विरचयितुं विवशाः, अत एव हि रचनासमये स्वोपयुक्तान् शब्दान् धातूंश्च गवेषयन्तो रचनानिबन्धकाः कवय एतेषामुपयोगमवसरे परिज्ञास्यन्ति। प्रयोक्तॄणां सौकर्याय नानावाक्यानि स्वयं विरचय्य धातूनाममीषां प्रयोगप्रक्रियां रचयमहं सूचयामि। दिग्दर्शनेनाऽनेन व्युत्पन्नाः कल्पयेरन्नन्यान्येषामपि धातूनां प्रयोगम्।

## ''पश्यति'' इत्यभिव्यञ्जयितुं

१. नेत्रपर्यायैः शब्दैः सह अतिथि–गोचर–प्राघुणिक–विषय–प्रभृतीन् उपयुक्त शब्दान् संयोज्य ते यदि 'कर्म' कारकाणि निर्मीयन्ते तर्हि करणार्था अपि धातवो दर्शनार्थकानां धातूनां कार्यं कुर्वन्ति।

२. नेत्रपर्यायाः शब्दाः 'करण' कारकाणि भूत्वा पानार्थकैर्धातुभिः सम्बध्यन्ते तर्हि पानार्थका अपि धातवो दर्शनार्थकानां धातूनां कार्यं कुर्वन्ति। यथा– नेत्रयोरतिथिं करोति। लोचनगोचरं विदधाति। लम्भयति लोचनातिथिताम्। प्रापयति प्रेक्षणप्राघुणिकताम्। उपनयति नयन विषयताम्। नयति नयनयोरतिथिताम्। निर्माति नेत्रविषयम्। नयति नयनसीमनि। विदधाति नयनयोरतिथिम्। आतनुते प्राघुणकं नेत्रयोः। लोचनयोर्गोचरमुपानयति। विदधाति विलोचनविषयम्। उपनयति नयनपथम्। प्रापयति प्रेक्षणपथम्। चक्षुषोः प्राघुणकमातनुते। गमयति गोचरं चक्षुषोः। नेत्रातिथिमुपकल्पयति। नयनयोरवतारयति। दृशोरुपनयति। दृशोरानयति गोचरम्। निर्माति नेत्रयोरतिथिम्। आनयति नयनयोर्गोचरम्। रचयति लोचनयोरतिथिम्। दयया दृशोरूपहरति। दृष्टिमुपनयति। वितनोति नेत्रयोरतिथिम्। दृशोर्गोचरमुपगमयति। नेत्रातिथिमारचयति। लम्भयति लोचनान्तिकम्। आनयति नयनयोरभिमुखम्। दृशोगोचरी करोति। दपया दृग्गोचरं तनुते। विरचयति नेत्रयोरतिथिम्। विदधाति वीक्षणविषयम्। आचरति गोचरं चक्षुषोः। निर्माति नयनयोर्विषयम्। गमयति गोचरमक्ष्णोः। अवतारयति दृशोः। उपहरति चक्षुषोः। नयति नयनविषयम्। अधिनमयति नयनाङ्गणम्। अतिथिमातनोति नयनयोः। प्राघुणकमारचयति चक्षुषोः। आपातयत्यन्तिकं चक्षुषोः। वीक्षणाङ्गणमुपस्थापयति। सङ्गमयति नयनाभ्याम्। उररीकरोति चक्षुर्भ्याम्। अधिगमयति प्रेक्षणपुटपरिसरम्। लम्भयति नेत्रप्राघुणकताम्। प्रापयति लोचनविषयताम्। ढौकयति नेत्रयोः। प्रणयति प्राघुणकं प्रेक्षणयोः।

दृग्भ्यामापिबति। लेढि लोचनाभ्याम्। रसयति नयनाभ्याम्। आचमति लोचनचषकेण। रसयति दृग्भ्याम्। आरसयति नयनपुटकेन। आचमति लोचनाभ्याम्। प्रेमतः प्रपिबति प्रेक्षणपुटकेन।

### शृणोति

३. उपरि सूचितप्रकारेण नेत्रपर्यायाणां शब्दानां स्थाने श्रोत्रपर्यायाः शब्दा यदि निवेश्यन्ते तर्हि करणार्थाः, तथा अन्यान्ये च धातवः श्रवणार्थकधातोः कार्यं साधयन्ति। एवं श्रोत्रपर्यायाणां करणत्वे पानार्थका अपि श्रवणार्थका भवन्ति श्रोत्रयोरतिथीकरोति। कर्णगोचरमुपकल्पयति। आनयति श्रवसोरन्तिकम्। करोति कर्णयोर्गोचरम्। कल्पयति कर्णयोः प्राघुणकम्। आनयति कर्णयोरभ्यर्णम्। कुरुते कर्णातिथिम्। अन्तिकमानयति श्रवसोः। श्रवणपथातिथी करोति। श्रवसोरवतारयति। कलयति कर्णयोरुपकण्ठम्। श्रवणसमीपमुपनयति। प्रणयति प्राघुणकं श्रवसोः। आपिबति कर्णपुटकेन। श्रुतिमुपनयति। श्रवसोर्गोचरीकरोति। प्रापयति श्रवणप्राघुणकताम्। विदधाति श्रवणविषयम्। श्रवणातिथिमनुतिष्ठति। गमयति गोचरं श्रवसोः।

आचमति श्रवणचषकेण। तनोत्यतिथिं श्रवसो:। विरचयति विषयं श्रवसो:। प्रापयति श्रवणपथम्। अवतारयति श्रवसो:। ढौकयति कर्णयो:। अभिमुखमानयति श्रवसो:। कलयति कर्णगोचरम्। श्रुत्यामत्यादरेण सन्नयति। प्रापयति कर्णाभ्याशम्। विदधाति विषयं श्रवणयो:। प्रापयति श्रवणपरिसरम्। श्रवसो: सन्नयति गोचरम्। उपनयति श्रवणाङ्गम्। रसयति श्रवणपुटकेन। कलयति श्रोत्रयोरतिथिम्।

### जल्पति

४. उपरिनिर्दिष्टप्रकारेण नेत्रपर्यायाणां शब्दानां स्थाने वाक्पर्याया: शब्दा यदि निवेश्यन्ते तर्हि ग्रहणार्था अपि क्रिया (धातव:) जल्पनार्थानां क्रियाणां प्रयोजनं साधयन्ति।

५. प्राक्तनै: कविभि: क्षुण्णे संस्कृतवाण्या व्यवहारमार्गे आदान-गमन-आगमन-सेवन-प्राप्ति-धारण-प्रकाशनार्थका:, तथा चुम्बन-आलिङ्गनाद्यर्थकाश्च धातवो युक्त्या प्रयुज्यमाना ग्रहणार्थकधातुवद् व्यवह्रियन्ते(एतेषां प्रयोगस्योदाहरणान्यधस्ताद्विलोक्येरन्)-

गिरमादत्ते। वाक्यं विन्दति। गृह्णाति गिरम्। वच: प्रतिपद्यते। वाणीमुपादत्ते। भारतीं प्रकाशयति। गिरमूरीकरोति। विसृजति वाणीम्। वाचमुत्सृजति। वितरति वाणीम्। विसृजति सरस्वतीम्। भारतीमुपादत्ते। वचनमुरीकरोति। वाग्भङ्गीभङ्गी करोति। वाचमादत्ते। वाचं प्रतिपद्यते। विन्दति सरस्वतीम्। वचनमुरीकरोति। विश्राणयति वाणीम्। प्रकटीकरोति वाचम्। प्रकटयति वाणीम्। गिरं प्रकटीकरोति। गिरमुररीकुरुते। रचयति वचनानि। गिरं परिगृह्णाति। वितनोति भारतीम्।

### हृष्यति

६. उपरिनिर्दिष्टप्रकारेण हर्षवाचका: शब्दा: आदान-गमन-आगमनाद्यर्थकानां धातूनां चेत् कर्मतां प्रतिपद्यन्ते तर्हि प्रमोदनार्थकानां धातूनामर्थ: स्पष्टं प्रतीयते-

मुदमधिगच्छति। मुदमधिरोहति। मुदमालिङ्गति। मुदमाचुम्बति। मुदमुपयाति। प्रमोदमधिगच्छति। बिभर्ति परितोषम्। परिशीलति परितोषम्। सम्मदमालिङ्गति। आमोदमधिगच्छति। प्रमदमुपयाति। प्रमोदमुपारोहति। सम्मदमुपैति। याति परितोषम्। सम्मदमधिगच्छति। हर्षमुपयाति। प्रमोदमुपैति। चुम्बति निर्वृतिम्। हर्षमधिश्रयति। मुदमूरीकरोति। प्रमदमालम्बते। प्रीतिमादत्ते। विन्दति सन्तोषम्। मुदमासेवते। मुदमधिविन्दति भजति मुदम्। धरति परितोषम्। बिभर्ति सम्मोदम्। परिचुम्बति परितोषम्। मोदमायाति। प्रीतिमधिगच्छति। प्रयाति परितोषम्। हर्षमश्नुते। आनन्दमधियाति। वहति हर्षम्। सम्मदमाविन्दति। प्रीतिमुररीकरोति। सम्मदमासादयति। प्रमोदमालिङ्गति। प्रीतिमुपवहति। प्रमदमधिगच्छति। मुदमवाप्नोति। दधात्यानन्दम्। प्रयाति प्रमदम्। मुदं दधत्ति। आनन्दमासादयति। दधाति सम्मदम्। प्रीतिमुपैति। आमोदमधिवहति। वहति प्रमदम्। हर्षमभिचुम्बति। मोदमुपवहति। अधिविन्दति सम्मोदम्। मुदमयते।

७. मुदित-हृष्ट-प्रभृतय: शब्दा यदि कर्तुर्विशेषणानि भवन्ति तर्हि सम्पत्त्यर्था अपि क्रिया मोदनार्थकक्रियाणां प्रयोजनं सम्पादयन्ति। यथा-

भवति प्रसन्नः। सम्पद्यते सन्तुष्टः। जायते प्रीतः। जायते प्रमुदितः। सम्पद्यते प्रसन्नः। निष्पद्यते प्रमुदितः। भवति मुदितः। भवत्यानन्दितः। सञ्जायते मुदितः। प्रभवति सन्तुष्टः। प्रभवति प्रीतः। सम्पद्यते प्रमदभाक्। जायते परितुष्टः।

## बिभेति

८. उपरिसूचितप्रकारेण भयवाचकाः बिभेति शब्दा आदान-गमन-आगमनाद्यर्थकानां धातूनां चेत्कर्मतां लभन्ते तर्हि भयार्थकानां धातूनामर्थं प्रत्यायन्ति।

भयमधिगच्छति। भयमधिरोहति। भयमालिङ्गति। भयमाचुम्बति। भयमुपयाति। त्रासमुपैति। बिभर्ति भयम्। त्रासमासादयति। भीतमश्नुते। भयमुपैति। चुम्बति त्रासम्। साध्वसमासादयति। भीतिमुपैति। उपयाति साध्वसम्। परिचुम्बति साध्वसम्। भीतिमाचुम्बति। भीतिमधिगच्छति। साध्वसमालम्बते। साध्वसमाप्नोति। भीतिमासादयति। त्रासमुपयाति। भीतिमूरीकरोति। दधाति भीतिम्। सन्त्रासमालिङ्गति। भीतिमासेवते। भयमवाप्नोति। धरति दरम्। बिभर्ति भियम्। भियमभियाति। भजति भीतिम्। भियमुपैति। भयमाविन्दति। भियमधिरोहति। उपैति साध्वसम्। विन्दति सन्त्रासम्। भजति भियम्। भियमश्नुते। दधाति सन्त्रासम्। भियमालम्बते। भजति सन्त्रासम्। अधिगच्छति भीतिम्। भियमभिचुम्बति। त्रासमभिपद्यते। दरमाबिभर्ति। वहति भीतिम्। उपयाति भियम्। बिभर्ति सन्त्रासम्। भियमुररी कुरुते। भीतिमेति। साध्वसमुपवहति। दधाति भियम्। बिभर्ति भीतिम्। साध्वसमभिचुम्बति। भयमभिपद्यते। भयमयति। भयमनुभवति। अधिरोहति सन्त्रासम्। प्रतिपद्यते भीतिम्।

९. एवमेव भीतादयः शब्दा यदि कर्तुर्विशेषणानि भवन्ति तर्हि सम्पत्त्यर्था अपि क्रिया भयार्थकानां धातूनामर्थं प्रत्याययन्ति-

भवति भीतः। सम्पद्यते सन्त्रस्तः। भीतः सम्पद्यते। जायते त्रस्तः। भवति भयभाक्। भवति भीरुः। भवति भयभुग्नः। त्रस्तो भवति। सम्पद्यते भीतिभाक्। भीलुको भवति। सञ्जायते भीरुकः।

## जिह्रेति

१०. पूर्वोक्तप्रकारेण ह्री-लज्जादयः शब्दा यदि आदान-गमन-आगमनाद्यर्थकानां धातूनां कर्मकारकतां प्रतिपद्यन्ते तर्हि लज्जार्थकानां धातूनामर्थं साधयन्ति।

लज्जामुपयाति। ह्रियमधिगच्छति। आलिङ्गति लज्जाम्। ह्रियमाचुम्बति। ह्रियमुपयाति। व्रीडामुपैति। बिभर्ति लज्जाम्। ह्रियमधिरोहति। त्रपामुपयाति। अपत्रपामुपैति। व्रीडामश्नुते। ह्रियमुररीकरोति। लज्जामासादयति। दधाति व्रीडाम्। चुम्बति मन्दाक्षम्। ह्रियमाप्नोति। अधिरोहति व्रीडाम्। उपयात्यपत्रपाम्। वहति लज्जाम्। दधाति ह्रीणताम्। धत्ते व्रीडाम्। मन्दाक्षमासादयति। व्रीडामभिपद्यते। भजति लज्जाम्। उपैति ह्रियम्। अश्नुते लज्जाम्। त्रपामुपागच्छति। ह्रियमायाति। व्रीडामूरीकरोति। ह्रियमाबिभर्ति। अश्नुते ह्रियम्। व्रीडामालम्बते। ह्रियमेति। त्रपां बिभर्ति। ह्रियमयते। ह्रियमासादयति। प्राप्नोति त्रपाम्। धत्ते ह्रीणताम्। अयते व्रीडाम्। अभिपद्यते लज्जाम्। प्रपद्यते व्रीडाम्। प्रयाति लज्जाम्। आलम्बते लज्जाम्। व्रजति व्रीडाम्। लज्जामयते। विन्दति

व्रीडाम्। ह्रियमभिपद्यते। त्रपामुपारोहति। ह्रियमादत्ते। प्रतिपद्यतेऽपत्रपाम्। प्रयाति व्रीडाम्। धरति त्रपाम्। श्रयति लज्जाम्। भजति व्रीडाम्। लभते लज्जाम्। धत्ते त्रपाम्। उपैत्यपत्रपाम्।

११. एवमेव ह्रीण-लज्जितादयः शब्दा यदि कर्तुर्विशेषणानि भवन्ति तर्हि सत्तार्थका अपि धातवो लज्जार्थकानां धातूनां कार्यं सम्पादयन्ति। यथा-

जायते लज्जितः। भवति व्रीडितः। सम्पद्यते ह्रीणः। भवति लज्जालुः। निष्पद्यते व्रीडितः। सञ्जायते व्रीडाभाक्। भवति लज्जितः। जायते त्रपावनतः। लज्जितः सम्पद्यते।

## विस्मयते

१२. उपरिनिर्दिष्टप्रकारेण विस्मयार्थकाः शब्दा यदि-आदान-गमन-आगमनाद्यर्थकानां धातूनां कर्मतां लभन्ते तर्हि विस्मयावबोधकानां धातूनामर्थः प्रतिपन्नो भवति।

विस्मयमायाति। आश्चर्यमुपैति। लभते विस्मयम्। प्रयात्याश्चर्यम्। विस्मयमुपैति। बिभर्ति विस्मयम्। आश्चर्यमधिगच्छति। विस्मयमवाप्नोति। चुम्बति विस्मयम्।

आश्चर्यमश्नुते। अवाप्नोति चित्रम्। अद्भुतमधिगच्छति। चुम्बत्याश्चर्यम्। अभिपद्यते विस्मयम्। विस्मयमूरीकरोति। चित्रमुपैति। दधाति विस्मयम्। विस्मयमालम्बते। आश्चर्यमासादयति। अयते चित्रम्। विस्मयमुपारोहति। चित्रमाबिभर्ति। भजति विस्मयम्। विस्मयमासादयति। अधिरोहति चित्रम्। विस्मयश्नुते। दधाति चित्रम्। विन्दति विस्मयम्। भजत्याश्चर्यम्। उपयात्यद्भुतम्। चित्रं बिभर्ति। अधिगच्छति विस्मयम्। आश्चर्यमालिङ्गति। शीलति विस्मयम्। प्रपद्यते चित्रम्। धरत्याश्चर्यम्। एति विस्मयम्। एवमेव कर्तुर्विशेषणीभूतैर्विस्मितादिशब्दैः जायते विस्मितः। भवत्याश्चर्यितः। सम्पद्यते विस्मयभाक्। भवति विस्मयभाक्। विस्मितो निष्पद्यते। सम्पद्यते चित्रितः। आश्चर्यभाग् भवति। सञ्जायते विस्मययुक्।

## व्यथते

१३. पूर्वोक्तप्रकारेण व्यथा-पीडादयः व्यथते शब्दा आदान-गमन-आगमनाद्यर्थकानां धातूनां चेत्कर्मतां प्रतिपद्यन्ते तर्हि व्यथार्थकानां धातूनां प्रयोजनं सम्पादयन्ति।

व्यथामुपैति। पीडामुपयाति। दुःखमधिगच्छति। आलिङ्गति बाधाम्। वेदनामुपयाति। व्यथामाचुम्बति। बाधामुपैति। बिभर्ति वेदनाम्। पीडामालिङ्गति। व्यथामूरीकरोति। दुःखमधिरोहति। व्यथावाप्नोति। दुःखमश्नुते। दधाति बाधाम्। व्यथामायाति। अधिगच्छति वेदनाम्। कृच्छ्मधिगच्छति। अभिपद्यते कष्टम्। पीडामयते। अभियाति दुःखम्। उपैति कृच्छ्रम्। अश्नुते कष्टम्। भजति बाधाम्। धत्ते पीडाम्। क्लेशमालम्बते। दुःखमभिपद्यते। व्यथानुपारोहति। कष्टमेति। पीडामालम्बते। विन्दति वेदनाम्। व्रजति व्यथाम्। वहति व्यथाम्। क्लेशमासादयति। प्रपद्यते व्यथाम्। बाधामभिचुम्बति। क्लेशं लभते। कष्टमाप्नोति। प्रयाति पीडाम्। बिभर्ति बाधाम्। क्लेशमयते। लभते व्यथाम्। कष्टमुपयाति। धरति बाधाम्। श्रयति व्यथाम्। प्रपद्यते पीडाम्। क्लेशमश्नुते। धत्ते व्यथाम्। दुःखमेति। पीडामुपैति। कष्टं विन्दति। व्यथां लभते। क्लेशमभिपद्यते। व्यथामसादयति। बिभर्ति सङ्क्लेशम्। कृच्छ्रमुपयाति।

एवमेव व्यथितादिशब्देषु कर्तुर्विशेषणीभूतेषु सम्पत्त्यर्थकैर्धातुभिः- सम्पद्यते दुःखी। जायते क्लिष्टः। भवति दुःखितः। सम्पद्यते क्लेशभाक्। पीडितो भवति। सञ्जायते क्लेशभुक्। भवति व्यथितः। जायते बाधायुक्। निष्पद्यते पीडितः।

### प्रतीक्ष्यति

१४. हर्षवाचकाः शब्दा यदि दान-उत्पादनार्थकानां धातूनां चेत्कर्मकारकतां भजन्ते तर्हि ते धातवः प्रीणनार्थकानां धातूनामर्थं बोधयन्ति।

मुदमुत्पादयति। हर्षं जनयति। प्रमदं विदधाति। मोदमादधाति। प्रसौति प्रमदम्। आमोदमुद्गमयति। प्रमदं प्रवर्तयति। प्रीतिमाविर्भावयति। प्रमोदं निर्माति। आनन्दमुद्भावयति। प्रसौति सम्मदम्। प्रकटयति प्रमदम्। प्रोद्भावयति प्रीतिम्। सूते सुखम्। शर्म निर्माति। प्रमदं ददाति। सुखं दिशति। प्रमोदमर्पयति। आनन्दं वितरति। प्रददाति पीडाम्। जनयति कृच्छ्रम्। दिशति दुःखम्। कष्टमुद्भावयति।

### तुलयति

१८. औपम्य-उपमिति-तुला-तुलना-साम्य-उपमानादिशब्दसमूहे कर्मकारकतां गते सति पूर्वनिर्दिष्टैः आदान-गमन-आगमन-सेवा-प्राप्ति-धारणाद्यर्थकैरपि धातुभिः तुलनार्थकानां धातूनामर्थः सम्यक्तया प्रतीयते-

साम्यं दधाति। सादृश्यमासादयति। उपमामुपयाति। तुलनां विन्दति। सादृश्यमधिरोहति। साम्यमायाति। तुलनां लभते। प्रतिमां प्रपद्यते। तुलां गच्छति। उपमामुपैति। तुलां धत्ते। दधाति सादृश्यम्। भजति साम्यम्। धरति तुलाम्। समेति समताम्। व्रजति सादृश्यम्। गच्छति साम्यम्। दधात्युपमाम्। श्रयति साम्यम्। प्रपद्यते तुलनाम्। बिभर्ति तुलाम्। चुम्बति समताम्। दधात्यौपम्यम्। अधिगच्छति समानताम्। वहति सादृश्यम्। उपमामश्नुते। विन्दति तुलाम्। कलयति तुलनाम्। साम्यमालम्बते। समतामयते। तुलनामुपैति। औपम्यमधियाति। उपमानमारोहति। तुलामादत्ते। बिभर्ति सदृशताम्। तुलनामूरीकरोति। साम्यमवाप्नोति। तुलामालिङ्गति। उपमामभिपद्यते। तुलामालम्बते। उपमितिमुपारोहति। उपमामुपगच्छति। भजते तुलाम्। साम्यमेति। प्रयाति प्रातिनिध्यम्। दधाति सदृशताम्। भजति समभावम्। तुलामधिरोहति। तुलां लभते। समतामधिगच्छति। अश्नुते तुलनाम्। लभते समभावम्। तुलामवाप्नोति। प्रतिपद्यते तुलनाम्। विन्दति समानताम्। तुलनां वहति। एति तुलाम्। सादृश्यमादत्ते। साम्यमासादयति। अयति तुलनाम्।

यथा-वाणी सुधासाम्यं दधाति। वाक् सुधासादृश्यमासादयति। वाणी पीयूषोपमामुपयाति। सुभाषितं सुधया तुलनां विन्दति। सूक्तिः सुधासादृश्यमधिरोहति। सतामुपदेशः सुधासाम्यमायाति इत्यादिकमुदाहरणं कोविदैरञ्जसा सम्पादयितुं शक्यम्।

१९. कवयो मैत्री-सौहृदादिशब्दैरपि तमिममर्थं निबध्नीयुः-

सौहार्दं दधाति। मैत्रीं कलयति। सौहृदं सम्पादयति। स्नेहमासादयति। सौहृदमाधत्ते। स्नेहमधिरोहति। प्रीतिमुपयाति। प्रणयं प्रतियाति। सख्यमाबध्नाति। स्नेहं घटयति। मैत्रीं निर्माति।

सख्यमुपकल्पयति। प्रीतिं प्रयाति। सौहृदमूरीकरोति। प्रतिपद्यते प्रणयम्। दधाति सख्यम्। सौहार्दमधिगच्छति। मैत्रीमुपारोहति। विन्दति वयस्यताम्। दधाति सौहृदम्। व्रजति सख्यम्। समधिगच्छति सब्रह्मचारिताम्। समेति सौहार्दम्। उपैति प्रणयम्। बिभर्ति मैत्रीम्। दधाति सतीर्थ्यताम्। वयस्यतां व्रजति। स्नेहमश्नुते। प्रेम प्रतिपद्यते। वहति वयस्यभावम्। शीलयति सौहार्दम्। भजति प्रणयम्। प्रणयमयति। कलयति सौहृदम्। प्रणयमुपयाति। मैत्रीमधियाति। प्रेम सम्पादयति। स्नेहमयते। मैत्रीमश्नुते। बिभर्ति सब्रह्मचरिताम्। संयाति सौहार्दम्। प्रीतिमुपैति। प्रणयमादत्ते। प्रणयमुपारोहति। धरति वयस्यभावम्। सख्यमधिगच्छति। संयाति सतीर्थ्यताम्। स्नेहमाबिभर्ति। मैत्रीमङ्गीकरोति। सौहार्दं कलयति। आचुम्बति स ब्रह्मचारिताम्। सौहृदं धत्ते। प्रणयमाबध्नाति।

यथा– दधाति सुधया सौहार्दं वाणी। कलयति सुधया मैत्रीं भारती। सूक्तिः सुधायाः सौहार्दं सम्पादयति। वचनं पीयूषेण प्रणयं प्रतिपद्यते। भारती अमृतेन सख्यमाबध्नाति। भारती बिभर्ति सुधासब्रह्मचारिताम्। सूक्तिरमृतेन सौहृदमाकलयति। सतामुपदेशः सुधया स्नेहमाबध्नाति। सुभाषितानि समधिवहन्ति सुधायाः सतीर्थ्यताम्। कविसूक्तिः पीयूषेण प्रणयं प्रतिपद्यते। सूक्तिरमृतेन विन्दति बन्धुभावम्। कविवचो मधुना मैत्रीमाघटयति। वनमालिनो वदनं वहति विधुना वयस्यभावम्।

२०. प्रतिमल्लादिपदैरपि सोऽयमर्थः समभिधीयते सहृदयैः–

सुधया प्रतिमल्लतामाबध्नाति कविसुभाषितम्। प्रवहति पीयूषेण प्रतिद्वन्द्वितां सुभाषितमिदं साधूनाम्। दधाति शशलक्ष्मणः प्रतिपक्षतामिदमाननं ते। वदनमिदं प्रतिपद्यते पङ्केरुहस्य प्रतिपक्षताम्। परिचुम्बति पार्वणसुधाकरस्य प्रतिपन्थिनामाननमानतनयनायाः। प्रार्थिनां कामपूरणे पारिजातप्रतिमल्लतां प्रयाति ते करः। प्रत्यर्थिपरिमर्द्दने पुरन्दरप्रतिभटतामुपैति भूपालोऽयम्। कांस्यपात्रे पारदप्रतियोगितामुपयान्ति समराङ्गणे ते तुरङ्गमाः। भुवो भारधारणे भगवतः शेषस्य प्रतिबध्नाति प्रतिद्वन्द्वितां बाहुदण्डोऽयम्।

२१. विभ्रम–विलासादिशब्दैरपि तुलनार्थमाबध्नन्ति कवयः–

विभ्रमं बिभर्ति। श्रियमधिगच्छति। शोभामालिङ्गति। श्रियमाचुम्बति। कान्तिमुपयाति। लक्ष्मीमालिङ्गति। श्रियमयते। कान्तिमुपैति। विलासमालिङ्गति। लक्ष्मीमालम्बते। रुचिमूरीकरोति। लावण्यमालिङ्गति। सुषमामासादयति। द्युतिमधिरोहति। शोभां लभते। विभ्रमं विन्दति। द्युतिमादत्ते। लावण्यं लभते। श्रियमभिपद्यते। बिभर्ति शोभाम्। विन्दति विलासम्। व्रजति विभ्रमम्। छविमभियाति। लभते लक्ष्मीम्। छविमभिपद्यते। लक्ष्मीमाकलयति। विभ्रममेति। श्रियमुपारोहति। आलिङ्गति शोभाम्। व्रजति रुचिम्। विलासमासादयति। कान्तिं बिभर्ति। सुषमामवाप्नोति। रुचिमाचुम्बति। भजति विभ्रमम्। श्रियमेति। कान्तिमाविन्दति। विलासमश्नुते। द्युतिमाप्नोति। प्रपद्यते सुषमाम्। भजति शोभाम्। दधाति कान्तिम्। प्रयाति लक्ष्मीम्। श्रियमङ्गीकरोति। विलासमालम्बते। शीलयति शोभाम्। द्युतिं दधाति। विभ्रमङ्गीकुरुते। श्रियमश्नुते। भजति विलासम्। रुचिमालिङ्गति। बिभर्ति श्रियम्। द्युतिं धरति।

रुचिमयते। श्रियमधिरोहति। द्युतिमयते। लक्ष्मीमेति। विलासमभिपद्यते। सुषमामापूरयति। विच्छित्तिमभ्येति। कान्तिमाश्रयति।

यथा- कीर्तिर्विधुविभ्रमं बिभर्ति। यशश्चन्द्रश्रियमधिगच्छति। कीर्तिः शशिशोभामालिङ्गति। कीर्तिश्चन्द्रश्रियमाचुम्बति। कविकीर्तिः कलानिधिकान्तिमुपयाति। यशस्ते शशाङ्कलक्ष्मीमालिङ्गति। कीर्ती राकापतिकान्तिमुपैति। यशश्चन्द्रलक्ष्मीमालम्बते।

२२. गुण-सौभाग्य-महिमादिशब्दसाहाय्येनापि तुलनार्थमभिव्यञ्जयन्तः कवयो दृश्यन्ते-

यथा- सौभाग्यमभियाति। गुणमनुगच्छति। महिमानमुपारोहति। सौभाग्यं बिभर्ति। माहात्म्यमुपयाति। पदवीमुपैति। गुणं शीलयति। भजति सौभाग्यम्। दधाति माहात्म्यम्। गुणमालम्बते। सौभाग्यमाश्रयति। वहति महिमानम्। गुणमालिङ्गति। पदमाधत्ते। सौभाग्यं लभते। व्रजति महिमानम्। शीलयति सौभाग्यम्। महिमानमभिपद्यते। माहात्म्यमधिविन्दति। गुणमाकलयति। महिमानमश्नुते। माहात्म्यमाप्नोति। गुणमाचुम्बति। लीलामालिङ्गति। गुणमयते। पदमालम्बते। गुणमधिरोहति। माहात्म्यमङ्गीकरोति। सौभाग्यमभिपद्यते। गुणं लभते। महिमानमालम्बते। गुणं गृह्णाति। सौभाग्यमेति। महिमानमासादयति। सौभाग्यमभिभजते। गुणान् धरति। माहात्म्यमनुरुन्धे। शीलयति लीलाम्। महिमानमनुगच्छति। वैभवमभ्येति।

यथा-सूक्तिः सुधासौभाग्यमभियाति। वाणी पीयूषगुणमनुयाति। सुभाषितममृतमहिमानमुपारोहति। सतामुपदेशः सुधासौभगं बिभर्ति। अवसरे सुभाषितममृतमाहात्म्यमुपयाति। कविसूक्तिः सुधापदवीमुपैति। सुदृढमभ्यस्तां विमला कला रत्नरामणीयकमनुशीलयति। साधुवाणी सुधागुणं वहति। नीतिभाषितं भजति रसायनसौभाग्यम्। कविसूक्तिर्दधाति सुधासारस्यम्। साधुसङ्गतिः कलयति पारिजातमहिमानम्।

## निर्जयति

२३. न केवलं तुलनार्थमेव, निर्जयार्थमपि छेदन-विध्वंस-स्तेय-अपनयाद्यर्थकैर्धातुभिरभि-व्यञ्जयन्ति कवयः। अर्थगुम्फनलालित्याय अत्रापि विभ्रम-विलासादिशब्दाः कर्मकारकताम्, निर्जेतव्यः प्रतिद्वन्द्वी च सम्बन्धितां धारयति। यथा-

विभ्रममपनयति। विलासमुज्जासयति। शोभामवमृद्नाति। श्रियमाचूर्णयति। कान्तिमाहन्ति। लक्ष्मीं लुम्पति। शोभां शकलयति। सुषमां समापयति। छविमाच्छिनत्ति। द्युतिमवदारयति। रुचिमवचूर्णयति। विभ्रमं भिनत्ति। लावण्यं लुनाति। कान्तिं कृणन्ति। द्युतिं दमयति। लक्ष्मीं लुनाति। रुचिमाचामति। कृन्तति कान्तिम्। श्रियमुष्णाति। लावण्यं लुण्ठति। द्युतिं दलयति। क्षुनत्ति लक्ष्मीम्। कान्तिमपनयति। निर्दलयति श्रियम्। विलासमुन्मूलयति। मथ्नाति लक्ष्मीम्। विध्वंसते विलासम्। रुचिं चोरयति। द्रुह्यति द्युतिम्। सुषमामवमृद्नाति। अपहरति कान्तिम्। मुकुलयति लक्ष्मीम्। पोषयति लावण्यम्। विलासमुद्वासयति। मर्दयति विभ्रमम्। शमयति शोभाम्। निर्मूलयति लावण्यम्। हिनस्ति मनोरमताम्। शृणाति शोभाम्। विहन्ति विलासम्। रुचिमपनयति। संहरति कान्तिम्। विभ्रममवचूर्णयति। खण्डयति लावण्यम्। विध्वंसते कान्तिम्। निवर्तयति शोभाम्। विलासमुन्मर्दयति। धुनोति कान्तिम्।

दलयति लक्ष्मीम्। अपनयति लावण्यम्। मुष्णाति रुचिम्। विहन्ति विभ्रमम्। अपकर्षति शोभाम्। विदारयति द्युतिम्। विलासमुच्छिनत्ति। मथ्नाति सुषमाम्। अपोहति सौन्दर्यम्। क्षपयति सौलक्षण्यम्। विडम्बयति सुन्दरताम्। धिक्करोति रुचिम्। भिनत्ति शोभाम्।

यथा- सुधाविभ्रममपनयति ते वाणी। सुधाविलासमुज्जासयति ते सुभाषितम्। कविसूक्तिः सुधाश्रियमाचूर्णयति। सतामुपदेशः शमयति शोभां सुधायाः। मुखं ते मृद्नाति लावण्यं मृणालानाम्। चरणस्ते लुण्ठति लक्ष्मीं कमलानाम्। हस्तस्ते शकलयति शोभां किसलयस्य। मुखं ते शमयति शोभां शशाङ्कस्य। साधुसुभाषितं सुधाविभ्रमं भिनत्ति। मुखलक्ष्मीस्ते कमलविलासमुन्मूलयति। मुखमाधुर्यं मे शकलयति शशाङ्कशोभाम्।

२४. कर्मीभूतानां गुण-सौभाग्य-महिमादिशब्दानां साहाय्येनापि तमितमर्थमाबध्नन्ति सत्कवयः- सुधागुणानवमृद्नाति सुभाषितं कवीनाम्। सतां सूक्तिः समापयति सुषमां सुधायाः। समये समीरिता सूक्तिः संहरति सौभाग्यं सुधायाः। सुरभारतीयममृतमहिमानमामर्दयति। धीरता ते जलधिमाहात्म्यमुद्वासयति। मुखं ते मृगाङ्कमहिमानमुन्मूलयति। गाम्भीर्यं ते समुद्रमाहात्म्यमपनयति। मुखं ते मुष्णाति महिमानं मृगाङ्कस्य। सुकविसूक्तिः सम्मथ्नाति गुणानमृतस्य। हस्तस्ते लङ्घयति लीलां कल्पतरोः। वाणी ते पिनष्टि पीयूषगुणान्। सुभाषितं ते शमयति सौभाग्यममृतस्य। मुखं ते शकलयति सौभगं शशाङ्कस्य। पाणिस्ते व्यपोहति लीलां पल्लवस्य। दमयति महिमानमम्बुराशेस्तवाऽगाधगाम्भीर्यम्। मुद्रयति महिमानमम्बुनिधेस्ते गुरुगाम्भीर्यम्। लुण्ठति लीलां नीलाम्बुजयोस्ते नयनयुगलम्। तिरोदधाति सुधामाहात्म्यमिदं साधुजनसुभाषितम्। व्यपनयति वदान्यस्ते बाहुर्वैभवं देवतरोः।

२५. कर्मीभूतैः कीर्तिवाचकैर्दर्पपर्यायैश्चापि शब्दैस्तमेनमर्थमभिव्यञ्जयन्ति कविताकोविदाः-

दर्पमपहन्ति। गर्वं खर्वयति। अभिमानमपनयति। अहङ्कारमुन्मूलयति। मानमवमर्दयति। मदमुपमृद्नाति। गर्वमुच्छिनत्ति। दर्पं ध्वंसयति। मानं मुष्णाति। मदमपहरति। दर्पमाहन्ति। मदमवचूर्णयति। गर्वमवदारयति। हिनस्त्यहङ्कारम्। दलयति दर्पम्। कृणत्ति मानम्। संहरति दर्पम्। चूर्णयति चित्तोद्रेकम्। मर्दयति मदम्। मानमुत्सारयति। दर्पमुच्छिनत्ति। मानं मथ्नाति। अभिमानं शकलयति। गर्वं खण्डयति। अभिमानं विहन्ति। दर्पं दमयति। मदमवमर्दयति। अभिमानं हिनस्ति। निर्धुनोति दर्पम्। गर्वमुज्जासयति। मदमपोहति। अवलेपं लुम्पति। मानमवदारयति। गर्वमपनयति। दर्पमपसारयति। लुनात्यवलेपम्। हरत्यहङ्कारम्। शकलयत्यवलेपम्। अभिमानमपहरति। खण्डयति चितोद्रेकम्। दूरयति दर्पम्। अहङ्कारमुपमर्दयति। निबर्हयति गर्वम्। सूदयति दर्पम्। उन्मूलयत्यवलेपम्। भिनत्त्यभिमानम्। आहरत्यहङ्कारम्। शकलयति मानम्। अवमथ्नाति दर्पम्। मदमवसूदयति। गर्वमवलुण्ठति। अहङ्कारमुत्सारयति। कीर्तिं कृणत्ति। यशो लुम्पति। कीर्तिमुत्सारयति। यशः शमयति। कीर्तिं कृन्तति। यशो हिनस्ति। कीर्तिं मुष्णाति। यशः क्षिणोति। कीर्तिमपहरति। यशः संहरति। कीर्तिमाच्छिनत्ति। यशो लुम्पति। अवलेपमपनयति।

यथा- उदन्वतो दर्पमपहन्ति ते गाम्भीर्यम्। सुधागर्वं खर्वयति ते वचोमाधुर्यम्।

वदान्यताभिमानमपनयसि कल्पतरोः। रतिपतेरहङ्कारमुन्मूलयसि सौन्दर्येण। मानमवमर्दयसि मृगाङ्कस्य मुखशोभया। सुधामदमुपमृद्नाति ते वचोमधुरिमा। गिरेरपि गर्वमुच्छिनत्ति ते गाम्भीर्यम्। सुधादर्पं ध्वंसयति सुभाषितम्। मृगाङ्कमानं मुष्णाति ते मुखमाधुर्यम्। मदनमदमपोहति ते सौन्दर्यम्। अवलेपं लुम्पसि जलधेर्धीरतया। सूदयति दर्पं सुधायाः साधुभाषितम्। सुरपतेरहङ्कारमुत्सारयसि निजानुभावेन।

२६. अतिक्रमण-प्रतिषेध-निमीलन-निन्दाद्यर्थकैरपि धातुभिर्निर्जयार्थं निबध्नन्ति कविकोविदाः- कीर्तिरतिक्रामति कुमुदकान्तिम्। कीर्तिरतिशेते शशाङ्कशोभाम्। कीर्तिराक्षिपति शशाङ्कसुषमाम्। वाणी ते विलङ्घते पीयूषम्। कविसूक्तिराक्षिपति द्राक्षामाधुर्यम्। वाक् प्रवाहस्ते अत्येति सुरसरिद्धाराम्। यशस्ते विलङ्घयति कलानिधिम्। उपदेशः सतामतिशेते पीयूषम्। सुरभारतीयमत्येति सुधाधाराम्। यशस्ते शशधरशोभामतिशेते। कीर्तिरतियाति राकापतिम्। सुकविसूक्तिरत्येति सुधाम्। यशस्तव लङ्घयति कलानिधिम्। सुरसरस्वतीयमतिक्रामति पीयूषम्। सतां सङ्गतिरत्येति कल्पलताम्। सम्पदियमुलङ्घयति कुबेरविभवम्। सुतामुपदेशः प्रत्यादिशति पियूषम्। कीर्तिस्ते निरुणद्धि सुधाकरम्। वाणीयमपाकरोति पीयूषम्। यशस्ते निराकरोति निशानाथम्। सूक्तिस्ते प्रत्याख्याति पीयूषम्। कीर्तिरियं नियन्त्रयति निशाकरम्। साधुभाषितमपाकरोति क्षपाकरम्। कीर्तिस्ते निमीलयति निशाकरम्। दानकरः करस्ते सङ्कोचयति कल्पपादपम्। मुखं ते मुद्रयति मृणालम्। मधुरमिदमाननं ते मुकुलयति कमलम्। मुखं ते निन्दति निशानाथम्। सुकविसुभाषितमपवदति पीयूषम्। साधूसूक्तिर्जुगुप्सते सुधाम्। कीर्तिरियमाक्षिपति चन्द्रमसम्। मुखमिदमपवदति सुधाकरम्।

२७. कविमार्गे वर्जन-तर्जन-व्यर्थीकरण-हसन-लज्जितीकरणादीन्यपि विजयार्थेऽन्तर्भवन्ति। अतो वर्जनाद्यर्थकैर्धातुभिरपि निर्जयार्थं प्रकटयन्तः कवयः प्रेक्ष्यन्ते। एतत्प्रयोगस्य दिग्दर्शनं यथा-

वर्जयसि सुधां निजवचोमाधुर्येण। हसति ते करः कल्पपादपम्। व्यर्थयसि पीयूषं निजसुभाषितेन। लज्जयति ते कीर्ती राकासुधानिधिम्। तर्जयति पूर्णिमाशशाङ्कं ते कीर्तिः। कीर्तिविभा ते तिरोदधाति शारदसुधाकरम्। लज्जयति कल्पपादपं भूपते ते करः। हससि पयोनिधिं निजगाम्भीर्येण। व्यर्थयति सुधां साधुभाषितम्। तर्जयति दन्तद्युतिस्ते कुमुदकान्तिम्। भर्त्सयति भानुमन्तं ज्ञानविद्योतः। लघयति कलाधरं ते यशः। लज्जयति सुधामिमां कविसुभाषितम्। गलहस्तयति द्राक्षां ते वचोमाधुर्यम्। नमयसि निशाकरं निजयशःशोभया। अधरयति सुधामिदं ते साधुभाषितम्। ह्रेपयसि कर्णमपि निजवदान्यतया। भर्त्सयसि भीममपि पराक्रमेण। विफलयति दानशौण्डस्ते करः कल्पपादपम्। वर्जयसि वीरतया विक्रमादित्यमपि। निम्नयसि निजचारित्र्येण नलभूपतिमपि। तृणीकरोषि कर्णमपि दातृतया। अवहेलयसि हिमालयमपि धीरतया। कदर्थयति कर्णमपि दानकरस्ते करः। अवधीरयति धीरता ते हेमाचलमपि। निराकरोति करोऽयं ते कल्पपादपमपि। वदान्यतया नीचैः करोषि कर्णादीनपि। त्रपयसि वाचस्पतिमपि मतिवैभवेन। हसति हिमांशुमपि यशस्ते। न्यञ्चयति काञ्चनाऽचलमपि

धैर्यं ते। तर्जयसि वीरसिंह नादस्ते जलधरध्वानमपि।

२८. कविवर्णनायां शमनार्थः पानार्थकैः स्तेयार्थकैश्चापि धातुभिरभिद्योत्यमानः साहित्यसीमनि समवाप्यते। एतस्य दिग्दर्शनं यथा–

तरङ्गमारुतोऽयमाचामति मुखकमले ते स्वेदलवं सुन्दरि! प्रपिबति पवनः प्रस्वेदलवं लोलाक्षि! कालिन्दीमन्दमारुतोऽयमाचामति श्रमसलिलमिन्दीवरनयने!। मुष्णाति मधुमासोऽयमधुना धीरतां मम। मुष्णाति शत्रूणां शौर्योष्माणमियं ते क्रूरा कृपाणलता। लुण्ठति शत्रूणां धैर्यमयं चपलश्चन्द्रहासः। द्विषामुत्साहमापिबति परश्वधोऽयं मे। मुष्णाति मलयपवनः पथिकानां धैर्यमत्र मधौ। चोरयति चपलनयने चन्द्रमसो मनोरमतामिदमाननं ते। बलाल्लुण्ठति कङ्केलिपल्लवानां लालित्यमयं ते मनोहरः करः।

२९. लोकसङ्केतप्रवाहमेवाऽनुवर्तमानानां वैयाकरणादिप्रमुखानामन्यान्यभाषावैज्ञानिकानामपेक्षया कवीनां भाषा काञ्चिदलङ्कारझाङ्कारिणीमेव सरणीमनुवर्तमाना निसर्गतः समवाप्यते। ते हि निवासार्थक धातूनां स्थलेऽपि अवसरमाहात्म्यात् नृत्य-विश्राम-क्रीडनाद्यर्थकैरपि धातुभिरुपनिबन्धन्ति निजवक्तव्यम्। यथा–

नृत्यति भगवती लक्ष्मीरङ्गणेषु चरित्रवताम्। विश्राम्यति कल्पलता दानरसवर्षिणि भवत्करे। क्रीडति कमलालया कवीनामावासेषु भवत्प्रभावात्। विलसति रसनाग्रे सरस्वती साम्प्रतम्। नृत्यति निकेतने कमलालया भवद्वरदानाम्। सुखं विश्राम्यति लक्ष्मीर्भवनेऽस्मिन् भवतः। इन्दिराऽसौ नृत्यति मन्दिराऽन्तर्व्यवसायिनाम्। विश्राम्यति भगवती भारती भवद्वदनान्तः। विहरति वणिजामावासे सेयमिन्दिरा सम्प्रति सुखेन खेलसि वणिजामङ्गणेषु मातः कमलालये। त्वदुरसि रसाद्विश्राम्यति भगवती सेयं सरस्वती। नृत्यति निलयेषु लक्ष्मीरियं पश्चिमदिग्देशे। नृत्यति भगवतो भक्तिर्भवतो हृदयाङ्गणे। मुखं विश्राम्यति राष्ट्रे तव भगवान्धर्मः। क्रीडति कलिर्वाक्कीलानां वाग्विलासे।[१]

३०. गुम्फनीयस्य निजविषयस्य परिष्कारार्थं, महनीयस्य कस्यचिद्वर्णनीयस्यादरदर्शनाय च अन्यार्थकधातूनां स्थाने अन्यार्थकधातूनां प्रयोगः प्रायः प्रसिध्यति कविगोष्ठयाम्।

यथा– आगमन विषये प्रायः प्रोच्यते प्रतिभावद्भिः– 'भाव! विभूषय मे भवनं क्षणं चरणार्पणेन। कृतार्थय कुटीरं मे कियतेचित् कालाय। सनाथीकुरु मे सदनं सम्प्रति। पवित्रय मे प्रकोष्ठकं पादार्पणेन। पुनीहि दीनगृहं देव। ममाऽऽवासमपि साम्प्रतं कृतार्थीकुरु। दासनिवासमिमं पावय प्रभो। नाथ सनाथय निवासमिमं दासस्य। मण्डप ममावासं सम्प्रति सुरपते। अलङ्कुरु कुटीरमिदं दासस्य। देव दीननिवासं सम्भूषय साम्प्रतम्।'

**दिङ्मात्रमिदमुदाहृतमत्र मनीषिणां मार्गप्रसाधनाय।**

***

१. कङ्केल्लिरशोकः।

# मृत्यो! त्वमागतोऽसि

अरे साम्प्रतमेव ? पूर्वतो न काचित् सूचना दत्ता ? विनाऽऽह्वानम् ? विनाऽपेक्षाम् ? मा मैवम्। गच्छ, परावर्तस्व। नाहमधुना मर्तुं वाञ्छामि। अरे! एकान्तं शिरस्येव कथं समारोहसि ? किञ्चित् पश्चादपसृत्य तिष्ठेः। क्षणमपेक्षस्व, यावदहमेकं श्वासं गृह्णामि। अरे कण्ठमेव किमिति निर्दयमामर्दयसि ?

अपि स त्वमेवाऽऽसीः ? एकवारं देहि मे पूरितनयनं विलोकनस्याऽवकाशम्, कीदृक् ते रूपम् ? पुरा कतिवारान् त्वमाहूतोऽसि। मनो मे मामबोधयद्यत्सर्वदुःखानामुत्क्रान्तिः शान्तिस्ते समीपेऽस्ति, सर्वकष्टानां त्वमुपरामः, सर्वरोगाणां त्वमौषधम्। किन्तु नाऽऽगतस्त्वं तस्मिन्समये। सम्प्रति सङ्कटान्यपगतानि। किमधुना ते कार्यम् ? नैव नैव। नाधुनाऽहं त्वां वाञ्छामि। अपेहि, व्यपगतानि तानि दिनानि। हन्त, कियद्दीर्घो जीवनपथो मयाऽतिवाहितः। समग्रेऽप्यस्मिन् मार्गे ललसयाऽहमुत्तेजित, आशया समाकृष्टः, सफलतया च चिरं वञ्चितः। सिद्धेः स्थाने सर्वदाऽर्द्धचन्द्रो मया लब्धः। व्यचारयमहम्–यदा यात्रा मया प्रारब्धा तदा प्राप्यस्थानमवाप्यैव विरतो भविष्यामि। न मयाऽनृतमवलोकितं न चापि सत्यं समालोचितम्। न पापमवधारितं तर्हि न पुण्येऽपि दृष्टिर्दत्ता। केवलं सिद्धेराराधना विहिता। येन केनापि प्रकारेण धर्मस्य हत्या कृता, आत्मसम्मानः पादघातमाहतः, स्वास्थ्यं स्वहस्तेनैव चूर्णितम्, सुखं शान्तिश्चापि दुर्वचनपूर्वकमपसारिते। अन्ते सिद्धिर्मिलिता ? मिलिता क्व ? मिलितुं कवलं सा प्रासीदत्। हन्त, एतस्मिन्नेव लाभसमये त्वं कथयसि– ''चल, अविलम्बितं चल''। नैव नैव, नाधुना गन्तुं कामये।

भोजनपत्रावली सम्प्रति सम्मुखे समागता, त्वं च गन्तुमाकर्षसि। हन्त! न तेऽपराधः। सम्पूर्णोऽपि समयः साधनायामेव व्यगमत्, सिद्धमेव भोजनं विलम्बेन, एतावद्विलम्बेन, यावता क्षुधैव सम्पूर्णा व्यरमत्। जठराग्निर्जठरमेव जरयित्वा निर्वाणः। मनः परिश्रान्तं सत् स्वयमस्वपत्! परं भोजनमिदं यदा सिद्धमेव तदा किमित नाहं भुञ्जीय? केवलं किञ्चिदास्वादयाम्येव। एतावत्साधनाभिः सिद्धं वस्तु हन्त परित्यज्यते कुहचित्? सम्प्रति कृपां कुरु कञ्चित्कालम्। गच्छ साम्प्रतम्। ममाऽऽवश्यकतायां पुनस्त्वामहमाकारयेयम्। पूर्वमपि तु त्वं मयाऽऽहूतः, बहुवारानाहूतः। शपथस्तुभ्यम्, विनाऽऽह्वानं न पुनरुपैष्यसि। व्यतिगतानि दुःखदिनानि। सम्प्रति कस्य मर्तुं वाञ्छा ?

किमु न शक्नोषि परावर्तितुम् ? न केनाऽप्युपायेन ? हन्त ते सोऽयं महानत्याचारः। वद, अस्ति कश्चित्प्रतीकारः ? हन्त, मया यात्रोपकरणमपि तु न किञ्चित्संघटितम्। यात्राऽपि कीदृशी ? महायात्रा। यात्रायामेव व्यतीतमियज्जीवनम्, तदुपरि पुनरीदानीं महायात्रा ? भगवन्! कीदृशोऽयं संसारः ? शास्त्राणि कथयन्ति– 'चक्रमिदम्'। भवतु तदिदं तथा। यदि चक्रमिदं तर्हि कामं भ्रमतामिदम्, कस्याऽनेन हानिः ? परमिदमन्यान् भ्रामयति किमर्थम् ? केन प्रयोजनेन, केन वाऽधिकारेण ? अयं तु नूनं बलात्कारः, महानत्याचारः। यावज्जीवामस्तावत् संसारयात्रा,

जीवनयोग्यतायां च समाप्तायां सेयं परलोकयात्रा। दुर्भाग्यो जीवः किमु केवलं नित्ययात्री? यस्य विश्रामं कर्तुमधिकार एव न सृष्टः। हन्त, यदि पूर्वमेव तदिदमज्ञास्यम्, तर्हि इमानि हर्म्याणि, एताः सुखसज्जाः, अमूनि राजोपकरणानि, इमान् मिथो मोहमैत्रीव्यवहारान् किमित्यहमवर्धयिष्यम्?

हन्त! हर्म्याणामेतेषां पृष्ठे कियतां दीनानां रक्तमन्तर्हितम्? एतेषां स्रस्तराणामधस्तात् कियज्जनानां भोजनमाच्छन्नम्? एतस्याः सुखशय्यायाः पादतले कियतां लोकानां सर्वस्वमवचूर्णितम्? हन्त! यदि पूर्वमिदं पर्यज्ञास्यं तर्हि किमिति सर्वमिदमकरिष्यम्? तदा तु दीर्घदर्शितया विचारितं मयका–'यदेकस्य दिनस्य, स्वल्पस्य वा कालस्य वा तु नेदं कार्यं यद् यथाकथञ्चित् सुखं दुःखं वा व्यतिगमयामि। दीर्घमिदं जीवितव्यम्। स्वैरं म्रियन्तां मुमूर्षवः। गृहाऽऽगतां लक्ष्मीं किमहमपगमयेयम्?' किन्तु सर्वमधुना विपर्यस्तम्। क्वाऽधुना दीनान् तानुपलभेय? हन्त, मुधैव दीनानामेषामभिशापो मयाऽर्जितः। मृत्यो! विलम्बस्व किञ्चित्। साम्प्रतमियं सम्पत्तिर्विफलैव। तिष्ठ! यावदिमां तेभ्यो विभजेयं येषां कण्ठमध्यादियमाच्छिन्ना। किन्तु तेषां मध्याज्जीवन्त्येव कियन्तः? कियन्तः क्षुत्पीडया विलोठन्तः प्राणान्विजहुः। कियन्तश्च कारागारे चक्रिकां चालयन्तश्चेलुः कृतान्तस्य सदनम्। तेषां योषाभिर्यौवन एव विधवाभिर्भूत्वा मह्यमुत्कटोऽभिशापो दत्तः। तदिदमङ्गीकरोमि यदासीत्तेषामुपरि मे महदृणम्। नासीत्तेषामुपरि साक्षादृणम्। सत्यं सत्यं नासीत्तेषामुपरि मे ऋणम्। किन्तु यद्यासीदपि, तथापि किं ते कारागारे निपातयितव्याः? कशाघातैस्ताडनीयाः? भोज्यकवलं परिधानीयवस्त्रमपि तेषामपहरणीयमासीत्? सर्वसम्पन्नस्य मे काऽऽसीन्न्यूनता? हन्त, महदनुचितमकार्षम्। अब्रह्मण्यम्, अब्रह्मण्यम्!

हे ममाधमर्णा भ्रातरः! क्षमध्वम् क्षमध्वम्। सर्वामप्यर्थसम्पदं परित्यज्य पश्यत परियाम्यहमेकाकी। मृत्यो! मृत्यो! किमस्याः स्वल्पमप्यंशं नाहं सह नेतुं शक्नुयाम्? अहो यत्किञ्चिन्मात्रम्, तदपि केवलं मनस्तोषाय। अस्ति कश्चिदुपायः? हा हन्त मृत्यो! ददाम्यहमर्द्धं सर्वसम्पदः, त्यज मामस्मिन् समये। अरे! सर्वस्वमपि मे गृहाण किन्तु परिमुञ्च नूनं माम्।

हन्त, पणं -पणं कष्टात् सञ्चित्य यो धनराशिर्मया प्राङ्गणस्य भूतले निखातः सोऽयमपि त्वपूर्णः, अस्पृष्टः, अभुक्तः, अपरिज्ञातस्तथैव तिष्ठति। किं मया एतदासीदवधारितं, यज्जन्मावधि सञ्चितं द्रव्यमस्पृष्टमेव कराद् गच्छेत्? नृशंस! पश्य नास्मान्मया कष्टसहस्रेऽप्येकः पणो निर्विष्टः[१] पुत्रः परिवारोऽनुजीविजनश्चापि मया प्रतारिताः परं नास्मान्मया काकिण्यपि निःसारिता। बहुतरेष्ववसरेषु निरुपदेश[२] मुदरस्थाऽक्रियत केवलं मया रोटिकैव परं नास्मात्किञ्चन व्ययितम्। किं तस्यांशांशमपि नोपयोक्तुमवसरं दास्यसि? पिण्डप्रदाः सुतास्तु न्यायादप्येतदधिकारिणः। हंहो निर्दय! सूचयाम्यमुं तेभ्यस्तु। वितर मे क्षणमवसरम्।

१. उपभुक्तः, 'निर्वेशो भृति-भोगयोः'।

२. उपदंशः-उपरोचनार्थं सहभोज्यम्, तद्रहिता।

तिष्ठ निष्ठुर! यो निधिर्भवनभूतले मान्त्रिकेभ्योऽवगतः प्रत्यक्षमवलोकितश्चापि, केवलमेतस्यैवाऽनुसन्धानं दातुमनुमन्येथाः सुतेभ्यः! न चाधिकं याचामि ते समयम्। किमु कर्णेऽपि किञ्चित्कथयितुं न प्रसीदसि? हन्त नासि केवलं निर्दयः, स्पष्टं निर्विचारोऽपि त्वमसि!

इयं पुष्पवाटिका, एतन्मध्यगं मौक्तिकहर्म्यं तु साम्प्रतमेव मया निर्मितम्। किमेतयोरप्युरपभोगं न कर्तुं शक्नुयां कतिचिन्मासानपि? अये निष्ठुर! कस्ते विवेको न्यायश्च, येनोपार्जितं कष्टान्निर्मितं च तमेवोपभोगावसरे बलाद्वञ्चयसि? अपेहि, न त्वामहमभिरोचयामि क्षणमेकमात्रमपि।

हरे राम! न त्वं दयसे किञ्चिन्मात्रमपि। हन्त, कीदृग् वज्रनिष्ठुरोऽसि। मूर्तिमती नृशंसतैवाऽसि केवलम्। अरे! उपर्येव किं निपतसि। मा, मा मां स्प्राक्षीः। न स्पर्शय मे करमप्यङ्गेषु। तव स्पर्श एव परित्यजेयुर्मां प्राणाः। हा हन्त! सर्वमत्रैव निपतितमतिष्ठत्। प्रतिष्ठे सोऽहमेकाकी। हा हन्त! यदि पूर्वतो विदितमभविष्यत्तर्हि यात्रायाः पर्यकल्पयिष्यं काञ्चित्सज्जामप। अकीर्तयिष्यं नामान्येव भगवतः। समाचरिष्यं पुण्यान्येव कानिचित्। हा हन्त, यैः किञ्चित्प्रोक्तमपि न तेषु मे विश्वासः समभूत्। न शास्त्रमहर्षीणां वचनेषु विश्रम्भमस्थापयम्। हन्त! प्रज्ञापराधादेव न किञ्चित्कर्तुमशकम्। विश्रामस्थलमवाप्य यावच्छ्वासमात्रमपि सन्तोषान्न गह्णामि तावदेव क्रूरेण मे कण्ठो निर्दयमामोडितः। हे भगवन्! हे विश्वम्भर! हे दीनबन्धो! हे स्वामिन्! हा नाथ! हे नाथ! त्वमेवासि-त्वमेवासि-त्वमेवा..........सि...............मे साम्प्रतम्............।

***

# अपि नाम सेयमव्यावहारिकी ?

**सुस्थिरा साधुसाहित्यसमृद्धा सर्वसंस्तुता।**
**सरला सर्वतोभद्रा सेव्या सुरसरस्वती।।**

सकलभाषामौलिमुकुटायमाना सेयं संस्कृतसरस्वती सर्वतः पुरातनीति सबहुमानमभिनन्दिता, सर्वतः प्रथमं ज्ञानालोकजननीति विनीतिपुरस्सरमभिवन्दिता, गौरवस्य सौष्ठवस्य माधुर्यस्य सौभाग्यस्य औदार्यस्य गाम्भीर्यस्य माङ्गल्यस्य नैर्मल्यस्य मार्दवस्य चाधिष्ठानभूमिरिति सादरमुपच्छन्दिता, शिक्षाप्रसङ्गे हृदयपरिष्करणाय चाऽप्रतिद्वन्द्वं सुप्रगल्भेति सत्यं सत्यमिन्दिता[१] चेति न नाम विद्वत्सु विस्तरस्याऽऽवश्यकता। किन्तु शिक्षागौरववाहिनः केचिन्महाभागाः सङ्गिरन्ते यत् 'सेयं संस्कृतभाषा नासीत्कदाचिदपि लोकेषु व्यवहारप्रवृत्ता, केवलमियं साहित्यपरिगृहीता पुस्तकावस्था चेति।' अवश्यमिदं विचारस्रोतः पश्चिमदिग्देशादुद्गतम्। नात्रत्यानां वराकाणां मस्तिष्कमहिमा सोऽयम्। परं भवतु वा यतः कुतोऽपि विचारोद्गमः सोऽयम् आलोचनमस्य कर्तुं प्रयतामहे। नवशिक्षितसमाजे सफलता त्वस्मिन्विषये कदाचिदेवाशास्या, वराकाणां तेषामस्वतन्त्रत्वात्, पाश्चात्त्यमुखनिःसृतवाक्सुधाप्रतीक्षित्वात्।

वेदेभ्यः पुरातनं न किञ्चिद् वाङ्मयमद्यापि भूमण्डलेनोपलब्धमिति गवेषकमूर्धन्यानां सम्मतिः। वेदाश्च यस्यां भाषायामुद्भूताः सैव समयोपयोगिना संस्कारेण संस्कृता सती वर्तमानसंस्कृतभाषा सञ्जाता। ततश्च वेदा यदा आर्याणां साहित्यभाषाभूताः प्रत्यक्षमुपलब्धास्तदा व्यावहारिक्यपि तेषां भाषा किञ्चिदपरिष्कृता सैव (यस्यां हि वेदानां जन्म, सा गैर्वाणी) समुपगन्तव्या। न हि विजातीयभाषाभाषिणां विजातीयं साहित्यं भवितुं युक्तिसङ्गतम्। यदि तु ततोऽन्या काचिद्भाषाऽऽसीदिति भवन्तः साधयितुं प्रयतरन् तर्हि तद्भाषायाः सत्तासूचकं किञ्चित्प्रमाणमप्यावश्यकम्। विना प्रमाणं हि नाधुना किञ्चित्साधयितुं शक्यम्, न च तत्सम्मान्यं नवीनैर्नूनम्। ततश्च निराधारा कस्यचिद्भाषान्तरस्य सत्ता कथं नाम सिध्येत् ?

संस्कृतभाषायाः प्राचीनं साहित्यं भूतले प्रचलितानां सर्वासामपि भाषाणामपेक्षया सुमहद् विस्तृतं सर्वाङ्गपूर्णं च। अस्याः साहित्ये धर्मदर्शनज्यौतिषायुर्वेदादीनामनन्तो ग्रन्थराशिरासीदिति तु जानन्त्येव सर्वेऽपि। किन्तु कलाशिल्पविज्ञानादीनामपि बहवोऽद्भुताद्भुता ग्रन्थास्तेषु प्रान्तेषु प्राप्यन्ते येषु वैदेशिकानामुपद्रवा भूयसा नाऽभवन्। शिल्पशास्त्रस्यैकः संस्कृतभाषानिबद्धो ग्रन्थो मद्रासप्रान्तादन्विष्य मुद्रापितो जयपुरीय-कलाविद्यालयस्य' (स्कूल ऑफ् आर्ट्स एण्ड क्राफ्ट्स) अध्यक्षस्य श्रीमदसितकुमारहालदारस्य समीपे प्रसङ्गवशान्मया प्रत्यक्षमवलोकितोऽभूत् ?। अद्यापि प्राचीनसाहित्यान्वेषणाधिकृतैर्बहवोऽप्यलभ्या ग्रन्था अन्विष्यन्ते लभ्यन्ते चापि। नेपालादधुनैव आयुर्वेदविषयिणी काश्यपसंहिता प्राप्ता, मुद्रिता च। व्याकरणादिविषये तु भूयानेव विस्तरोऽभूदत्र।

प्राचीनसाहित्यान्वेषणाधिकृतेन स्वगतमहामहोपाध्यायश्रीहरप्रसादशास्त्रि-महाभागेन अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य सभापतिपदाद् या वक्तृता प्रादीयत तस्यां प्रोक्तमासीद् यत् शताधिकानि तु भिन्नभिन्नानि व्याकरणान्येवाधिगतानि, येषां मध्यात् पाणिनीयाद्यानां कतिपयानामेव लोके साम्प्रतं प्रचारः।

काव्यनाटकादिग्रन्थास्तु अद्यावध्यपि प्रतिवर्षं नवीननवीना अन्विष्य प्रकाश्यन्ते। आर्याणां बहवो ग्रन्था भारताद् बहिर्नीताः, बहवश्च देशे एवास्मिन् धर्मद्रोहभावनया क्षयमुपनीताः। बहवश्च भयभीतैर्ग्रन्थस्वामिभिः स्वबुद्ध्या गोपिता अपि वर्षावह्न्याद्युपद्रवैः स्वतो नष्टाः। हिन्दुधर्मद्वेषिणामवरङ्गजेबादीनां समये भूयांसो ग्रन्था वह्निसादक्रियन्त इत्यैतिहासिका जल्पन्ति। कतिपयमासपर्यन्तं पुरातनग्रन्थप्रज्वालेनैव वह्निसाध्यानि कार्याणि केषाञ्चिद् वैदेशिकराजानां समये समभवन्निति सर्वतः प्रसिद्धम्। एवमादिरूपेण न स्वल्पकालपर्यन्तम्, अपि तु सहस्रवर्षपर्यन्तं सर्वतो ग्रन्थकर्मनाशानद्यां प्रबलं प्रवाहितायामपि यस्याः साहित्यमद्यापि सर्वापेक्षया विस्तृतमाख्यायते, मध्योन्नतिसमये तु कियान् वा विस्तरोऽस्य स्यादिति निष्पक्षपातैः सुधीभिः स्वयमेव समालोच्यम्। विचार्यमिदानीम्, या भाषा भाषाव्यवहारेऽव्यवहृता स्यात्, अपि भवेत्तस्याः साहित्यमेतावद्विस्तृतम्? व्यवहारगतां काञ्चिदावश्यकतामनुभूयैव साहित्ये ग्रन्थस्य कस्यचिदवतारो भवति। या भाषा व्यवहारेऽनुपात्तैवाऽभूत् तस्या अपि साहित्यमेतादृक् सर्वाङ्गपूर्णं सम्भवेदित्यपि किं बुद्धौ समाविशेत्?

आवश्यकता हि प्रसवित्री तत्तत्पदार्थानाम्। यस्मिन् समये यस्य वस्तुनः समाजेऽपेक्षा तदेव लोके आविष्कृतं भवेत्। अनपेक्षितस्य वस्तुनः सङ्ग्रहस्य का कथा, स्मरणमपि कदाचित्तस्य न भवति। ततश्च विभिन्नविभिन्नवर्गे विभक्तस्य जनसमाजस्य यद् यदावश्यकम्, स्वीयलोके च यद् यत् प्रचारणीयं भवति तत्तदेव साहित्येऽपि परिगृहीतं भवति। संस्कृतभाषायाः साहित्ये च धनुर्वेदार्थशास्त्रशिल्पकलावैद्यकज्यौतिषकामशास्त्रसूदशास्त्रप्रभृतयस्तस्मिन् समये विभिन्नविभिन्नसमाजस्यापेक्षिताः सर्वविषयका एव निरमीयन्त ग्रन्थाः। किं बहुना, पक्षिणां मिथः सम्भाषाप्रभृतयोऽपि विषया नात्र परित्यक्ताः। एवं किल प्राचीनभारतस्य सर्वेष्वेव वर्गेषु संस्कृतभाषायाः सम्बन्धमवेक्ष्याऽपि कथमियमव्यवहार्या ज्ञायतां नूनम्? सर्ववर्गेषु प्रचारमवेक्ष्यैव प्राचीनैः पुरुषैः प्रोच्यते स्म-

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।इति।**

तर्काभाससम्पर्काः केचिदेवमपि प्रजल्पन्तः श्रूयन्ते- ''संस्कृता सेयं भाषा कदापि व्यावहारिकी नाभूत्। तत्रभवतः पाणिनेरुत्तरकालमेवैतस्या भाषायाः संस्कृतमिति व्यपदेशोऽधिगम्यते, नेतः पूर्वम्। तथा च व्याकरणकृतसंस्कारकालादारभ्य सेयं भाषा स्वयं साहित्यसिंहासनमधिरोहन्ती व्यवहारक्षेत्रं प्राकृतापभ्रंशभाषादिभ्यः समर्पितवती। ततः कथङ्कारं वा व्यावहारिकी साधयितुं शक्या?'' इति।

सम्यगिदमुपन्यस्तं श्रीमद्भिः। किन्तु यस्यां भाषायां तत्रभवत्पाणिन्यादिभिः संस्कारं

सम्पाद्य संस्कतमिति व्यपदेशः प्रवर्तितः सा मूलभाषा संस्कृतात्पृथक्कर्तुं किं शक्येत श्रीमद्भिः? व्याकरणेन हि आदिकालादारभ्याद्यावधि वर्तमानायास्तस्याः परिष्कार एव कृतो नाविष्कारः। अन्यथा चेत्, वैयाकरणा अमी भाषायाः सृष्टिकर्तारः प्रोच्येरन्, न संस्कर्तारः। तथा च वेदाविर्भावादारभ्याद्यपर्यन्तं वर्तमाना सेयं गैर्वाणी एकैव भाषा सिध्यति, न भिन्ना भाषा। संस्कारसम्पत्त्या न किल वस्तुनः पूर्वसत्ता विनिवर्तते। यज्ञदत्तस्य पुत्रः शिक्षादिसंस्कारे जाते न किल न भवति, नाऽन्यो वा भवति। अपि तु शिक्षितः सन् स एव संस्कारवानिति लभते व्यपदेशमात्रम्। 'द्विजः' 'पुनर्जन्म' इत्यादयो व्यवहारास्तु संस्काराणां सामर्थ्यविशेषख्यापका आहार्या एव। यथा व्याध्यादिसङ्कटविशेषान्निर्मुक्तः 'पुनर्जन्म अस्याऽभवत्' इति भाषणभाजनं भवति।

अस्तु, तथ्यमिदं नाभ्यधिकं समर्थनमर्हेत्। वर्तमाना राष्ट्रभाषा 'हिन्दी' त्रयोदशतम(खि.) शताब्दीतोऽपभ्रंशभाषासकाशाद् विभिद्य पृथग्रूपविकासं लेभे। आरम्भिकमस्याः स्वरूपं तथाविधमस्ति यस्य हि वर्तमानकालिकेन रूपेण न लेशतः संवादः संस्तवश्च। तथापि त्रयोदशशताब्दीत आरभ्य वर्तमानकालिक-'हिन्दोस्थानी' पर्यन्ता सा एकैव 'हिन्दी' व्यवह्रियते, न भिन्ना। तथैव वैदिककालादनन्तरं व्यवहृतामार्यभाषामारभ्य वर्तमानकालपर्यन्तं सा देवभाषा एकैवास्तीति स्वीकारे कथङ्कारं वा भवेद् विप्रतिपत्तिः? 'सहस्रशीर्षा पुरुषः' इति प्राचीनस्वरूपे वर्तमानसंस्कृतस्वरूपे च मौलिकधातुजन्यः को वा भेद इति किमनाग्रहिलः कश्चित् साधयितुं प्रभवेत्?

आङ्गलभाषा ह्याङ्ग्लानां राज्यकालाद् भारतेऽस्मिन् प्रवृत्ता। विस्तरस्त्वस्या एष्वेव परिगणितेषु वर्षेषु देशेऽस्मिन् जात इति सर्वविदितम्। इतः पूर्वं तत्तत्प्रान्तेषु स्वस्वप्रान्तीया भाषाः प्रचलिता आसन्। सार्वदैशिकं तु कार्यं संस्कृतभाषयैव समसिध्यत्। मध्यभारताद् रामेश्वरयात्रायां गतो मनुष्यो न मद्रासीयैर्जनैः स्वप्रान्तीयया भाषया व्यवहर्तुमशकत्। संस्कृतया भाषया तु तत्रापि व्यवहारसौकर्यं प्रत्यक्षमुपालभ्यत। बङ्गादिप्रान्तेष्वप्येवम्। अत एवाऽस्मद् भ्रातरो बहवः ('संस्कृतम्', 'श्रीः', 'मधुरवाणी' सम्पादकाः) कथयन्ति यत् 'संस्कृतमेव राष्ट्रभाषा, प्रत्यक्षं सर्वेष्वेव प्रान्तेष्वेकरूपं प्रचलितत्वात्'। ततश्चानायासं बोद्धुं शक्यते-यदीयं भाषा भारतीयानामव्यवहार्याऽभविष्यत् तर्हि कथं देशस्य एककोणमारभ्यापरपर्यन्तं सर्वत्र व्याप्ताऽभविष्यत्। देशे सर्वत्र आत्मीयानां भावानां प्रकाशनाय सेयं यदा परिगृहीता ततः कथमियमव्यवहार्या नूनम्?

भाषावैज्ञानिकैस्तु यूरोपपारस्यादिभाषाशब्दानामपि मूलं गैर्वाणभाषाया मौलिकशब्दा एवाऽऽख्यायन्ते। किन्तु भारतीयभाषाशब्दानां तु संस्कृतभाषैवोपादानमिति हि सर्वेणापि शिक्षितसमाजेनाऽभ्युपगतम्। संस्कृतभाषैव स्वाभाविकविपरिवर्तननियमानुसारं शनैः शनैः प्राकृतादिभाषास्वरूपमधिगत्यान्ते तत्तत्प्रान्तीयभाषारूपे परिणता। एकस्या भाषाया अन्यभाषारूपे परिणमनं हि शनैः शनैर्व्यवहारप्रवाहेणैव कालक्रमाज्जायते। न हि कस्यचिदाज्ञावाक्येनाविष्कारेण वान्या भाषान्यभाषारूपे परिणमति। ततश्च न किमिदं बोद्धुं शक्येत यत् संस्कृता (अर्थाद्

गैर्वाणी) भाषा पूर्वं सर्वतः प्राचरत्। ततः कालक्रमानुसारं शनैः शनैः सा प्रान्तीयभाषारूपमवापत्। इदानीं भाषाविपरिवर्तननियमं परिज्ञायापि किं साधयितुं शक्येत यत् संस्कृता भाषा सेयं देशेऽव्यवहार्याऽभवदिति।

सर्वेष्वेव भारतस्य प्रान्तेषु किं राज्ञां किं वा प्रजानां सर्वाण्यपि व्यवहारकार्याणि संस्कृतभाषायामेवाऽभवन्निति मर्मतो विचारे विचारशीलैर्बोद्धुं पार्येत। अतिप्राचीनानि राज्ञां शासनानि सर्वलोकेषु प्रचारार्थं शिलासु ताम्रपत्रेषु च लिखितानि गवेषणाविभागेनान्विष्य प्रकटीकृतानि क्रियन्ते च, यैरितिहासस्य भूयानंशः प्रमाणितः क्रियते। एतेषामुद्देश्यं सर्वत्र प्रसारो नाम। यदीयं भाषाऽव्यवहार्याऽभविष्यत्तर्हीयता परिश्रमेण राजानस्तामिमां पाषाणादिषूत्कीर्णां कर्तुं प्रायतिष्यन्त किम्? न हि लोकेष्वप्रचलितां भाषां सर्वलोकेषु प्रचुरप्रचारकामुकः कोऽपि समुपदद्यात्। गच्छतु प्राचीनकथा, राज्ञां पारस्परिकव्यवहारः संस्कृतभाषयैव मोगलशासनकालपर्यन्तमपि प्राचलत्। आम्बेराधिपतिमहाराजश्रीजयसिंह-देवादिभिः सहच्छत्रपतिशिवाजीप्रभृतीनां संस्कृतभाषयैव मिथः पत्रव्यवहारः प्राप्यते। सन्त्येवंविधानि संस्कृतपत्राणि जयपुरराज्यस्य 'दीवानी हजूरी'-विभागे।

किं वाधिकेन। गच्छति काले प्रान्तीयभाषासु राजशासनानां लेखने सम्प्रवृत्तेऽपि राज्ञां स्वहस्तलेखः संस्कृतभाषायामेवाऽभवत्-'स्वहस्तोऽयं मम जयसिंहदेवस्य' इत्यादि। जयपुरराजकीयव्यवहारपत्रेषु त्वद्यापि प्रारम्भे लिख्यते-'दीवानवचनात्' इत्यादि। प्रजास्वपि परस्परमृणदानाऽऽदानादिपत्रेषु प्रारम्भिकलेखः 'लिखतंग' 'लिखतम्' इत्यादिनैवारभ्यते। सर्वकार्यनिश्चये सम्पन्ने 'लिखतं पढतं तक हो गई' इत्याख्यायते। संस्कृतभाषाप्रवृत्तिः प्रजासु एतावत् प्राचरत् यदिदानीं पर्यन्तमपि 'लिथो' मुद्रालयमुद्रितेषु साधारणपुस्तकेषु 'अथ हीरा राँझा को ख्याल लिख्यते' 'अथ राजा रिसालू को ख्याल लिख्यते' इत्यादि निर्विशङ्कं प्राचलत्। यदि व्यवहारकार्येषु संस्कृतभाषायाः प्रचारो नाभविष्यत्तर्हि तस्य ध्वंसावशेषाः कथमिमेऽधिगम्येरन्?

वापीकूपतडागादिसार्वजनिककार्याणां याः शिलालिपयः प्राप्यन्ते तास्वपि सेयं भाषा समुपलभ्यते। परस्सहस्रमुद्रा व्ययीकृत्य पुण्येन साकमात्मनः कीर्तिमपि विश्वस्मिन् प्रख्यापयितुमिच्छुः पुरुषस्तानेवोपायान् करोति, तयैव च भाषया लेखयति, येषां सर्वलोकेषु परिचयो भवेत्। यदीयं संस्कृतभाषाऽव्यवहार्या, लोकेष्वप्रचरिता वाऽभविष्यत्तर्हि किं प्राञ्चो धनिकाः प्रमत्ता आसन् यमिमामव्यवहार्यां भाषां प्रयत्नपूर्वकं शिलास्वलेखयिष्यन्? क्षणमवधानपूर्वकं विचार्यताम्-आर्याणां विवाहादिषु मङ्गलकार्येषु, मरणादिष्वशुभकार्येषु च सर्वेष्वेवाधुनापि संस्कारपरम्परा संस्कृतभाषयैव सम्पाद्यते। संस्कृतमयकर्मकाण्डपद्धतेरद्यापि सम्बन्धो न विच्छिन्नः। एवं सत्यपि चित्रं चित्रमिदं सम्प्रधारयामि यन्न नाम वर्तमानकाले, अपितु प्राचीनेऽपि काले श्रीमद्भिः साधयितुमिष्यते- यत् संस्कृतभाषां सेयमव्यवहरणीया समभवदिति। आर्यजातौ स्त्रीणामपि ये आचाराः, धार्मिकव्रतानि, 'त्यौहार' इति ख्याता उत्सवाः, विवाहादीनां गीतानि एवेमादिषु सर्वेष्वेव संस्कृतभाषायाः सम्बन्धो निरवच्छिन्नोऽनुवृत्तोऽनुमीयते

(एतेषामुद्धरणानि विस्तरभयान्न दीयन्ते, सति सम्भवे लेखान्तरे दीयेरन्)। ग्राम्यजनेषु स्त्रीप्रभृतिषु च ये व्यवहाराः प्राप्येरन् ते हि पूर्वप्रवाहानुगताः स्वाभाविका एव भवन्तीति जानन्ति सर्वेऽपि। ततश्चारम्भादद्यावधि व्यवहारप्रवाहं प्रत्यक्षमुपलभ्यापि किं सेयमार्यभाषाऽव्यवहार्या कस्मिन्नपि कालेऽप्रचरिता च साधयितुं युज्यते?

'संस्कृतभाषा न कदाचिद् व्यवहार्याऽभवत्' इति वैदेशिकमहाभागानां तत्पदाङ्कानुवर्तिमहोदयानां च वक्तव्यस्य तदैवाऽयमवसरोऽभवद् यदा ह्ययं देशो नानाविधाभिर्वैदेशिकजातिभिराक्रान्तः परवशस्थितिं प्रगतो विच्छिन्नैकताशक्तिरितस्ततो विशृङ्खल एवासीत्। स्वातन्त्र्यकाले तु भारताद्बहिरपि मानवमण्डलैर्मुकुटतटघटितशासनानां सार्वभौमभूपालानां समये शासनधर्मादीनां विषये नैसर्गिकसूक्ष्मभेदसत्तायामप्येकतासूत्रमेकं निभृतं तथा प्राचरद् येन सर्वेऽप्यात्मानं मिथःसङ्घटितं विदन्ति स्म। तस्मिन् हि समये प्रान्तीयमवान्तरभेदं संस्पृशन्त्यपि देशेऽस्मिन् एकतासूत्रमपरिज्ञातं संघटयन्ती सर्वतोऽपि प्रचचार गैर्वाणी वाणी। अस्यैव हि समयस्य स्मरणमकारि परस्ताद् भाविभी राजशेखरादिभिः-

**नातिस्पष्टो न चाश्लिष्टो न रूक्षो नातिकोमलः।**
**न मन्द्रो नातितारश्च पाठी गौडेषु वाडवः।।**
**रसः कोऽप्यस्तु काऽप्यस्तु रीतिः कोऽप्यस्तु वा गुणः।**
**सगर्वं सर्वकर्णाटाष्टङ्कारोत्तरपाठिनः।।**
**गद्ये पद्येऽथवा मिश्रे काव्ये काव्यमना अपि।**
**गेयगर्भे स्थितः पाठे सर्वोऽपि द्रविडः कविः।।**
**सुराष्ट्रत्रवणाद्या ये पठन्त्यर्पितसौष्ठवम्।**
**अपभ्रंशवदंशानि ते संस्कृतवचांस्यपि।।**
**शारदायाः प्रसादेन काश्मीरः सुकविर्जनः।**
**कर्णे गुडूचीगण्डूषस्तेषां पाठक्रमः किमु।।**
**ततः पुरस्तात्कवयो ये भवन्त्युत्तरापथे।**
**तेमहत्यपि संस्कारे सानुनासिकपाठिनः।।**
**मार्गानुगेन निनदेन निधिर्गुणानां**
**सम्पूर्णवर्णरचनो यतिभिर्विभक्तः।**
**पाञ्चालमण्डलभुवां सुभगः कवीनां**
**श्रोत्रे मधु क्षरति किञ्चन काव्यपाठः।।इति।**

(काव्यमीमांसा-अधि. १ अ. ७)

अद्येव न सर्वदासीदस्माकं विशृङ्खला सामाजिकी शक्तिः, भारतीयानां राज्ञां शासनकाले सुशृङ्खलतार्थं परितः प्रचरन्ती वर्णाश्रमव्यवस्था शिक्षादिविषयेषु सर्वतोऽपि सुव्यवस्थितं व्यापिनं चैव क्रमं प्रवर्तयामास येन शिक्षिताः सर्वेऽपि देशवासिनः स्वत एव एकतासूत्रे सङ्ग्रथिता इवासन्। पूर्वप्रघट्टकानुसारं प्राचीनकाले सर्वतोऽपि प्रचलिता सेयं संस्कृतैव भाषा शिक्षाया

भाषासीदिति विचारेण पर्यवस्यति। त्यज्यतामयं विशृङ्खलप्रायः सर्वथाऽशान्तिमयो वर्तमानसमयः, परं भगवत्पाणिनिसमयपर्यन्तं तु गैर्वाणभाषैव सेयं व्यावहारिक्यभूदिति सुदृढं प्रमाणितं भवति। अत एव तत्रभवता पाणिनिना जनेषु सर्वतो व्यवह्रियमाणा सेयं भाषा सामान्यतो 'भाषा' पदेन व्यपदिष्टा। यथा-'प्रथमायाश्च द्विवचने भाषायाम्', 'भाषायां सदवसश्रुवः' इत्यादि। प्रतिदिनव्यवहारतो दूरीभूताया वैदिकभाषायाः प्रातिद्वन्द्वे प्रतिदिनव्यवहृता सेयं गैर्वाण्येव सामन्यतो 'भाषा'-पदव्यपदेशनीयाऽभवत्। अस्मदादीनामेव किम्, पाश्चात्त्यविदुषामप्यन्वेषणानुसारं भगवतः पाणिनेः समयः ख्रिष्टजन्मतः कतिचनशतकपूर्ववर्ती। ततश्च वैदेशिकप्रचारितयाऽशान्त्या विरहिते तस्मिन् समये संस्कृतमेव भारतेऽस्मिन् शिक्षाभाषासीदिति स्वीकार्यं स्यात्। अन्यथा कथमेवमविशेषितं प्रयुयोज तत्रभवान् पाणिनिः 'भाषा' इति। किञ्च यस्या भाषाया वैदिकभाषातो विलक्षणं संस्कारमापाद्य सेयं 'समपाद्यत सापि तस्मिन्काले नेतोऽधिकं पृथग्भूतासीत्। अत एवैकेन व्याकरणेन द्वयोर्भाषयोर्बोधाय प्रायतत पाणिनिः, प्रवर्तयति च बहून्येव संस्कृतविभागीयानि सूत्राणि वैदिकभाषायामपि निजे व्याकरणे।

अयं समयः संस्कृतभाषायाः कृते कीदृगिति विचारशीलानां न मन्ये भवेत्परोक्षम्। उपरितः संस्कृतभाषाया भक्तिः प्रचुरं प्रकाश्यतां सामयिकमहाभागै, ''स्वतन्त्रे भारते भारतस्य भाषा संस्कृतं भवेत्'' इति मुखतः समुद्घोष्यतां चाऽपि, किन्तु कार्यरूपे किं परिणमतीति क्षणं प्रत्यक्षमालोक्यताम्। शासनादिषु प्रवृत्तानां शिक्षितमहाभागानामाङ्ग्लभाषानुरागो नाद्यापि समाप्यते। अथवा 'टाइप राइटर'-द्वारा शासनादीनां प्रचारसौकर्यं नाद्यापि ते परित्यक्तुं सहन्ते। अत एव राजकीयव्यवहारस्य प्रबले प्रवाहे संस्कृतस्य का कथा, संस्कृतशब्दबहुला वराकी हिन्द्यपि स्थानं न लभते। तस्याः परिवर्ते 'हिन्दोस्थानी'-नाम्ना काचित्सङ्करभाषा तैः स्थापयितुमिष्यते। एवं दुर्धर्षयुगेऽपि प्रगत- (अर्थादितः पूर्वभव-) जनगणनायां (सेन्सस रिपोर्ट) मद्रासप्रान्ते पञ्चाशत्कुटुम्बानां मातृ- (व्यवहार) भाषा साम्प्रतमपि संस्कृतं लेखनीयाभवत्। ततः केन वा मुखेन साधयितुं प्रगल्भ्यते यत् 'संस्कृतं कदाचिदपि व्यवहारभाषा नासीत्' इति।

आम्, एतत्त्ववश्यं विवेकतो निश्चेतव्यं यद् यादृशी संस्कृतभाषा वर्तमानकाले श्रीमद्भिः पुस्तकेष्वलोक्यते तादृश्येव भाषा सर्वदासीदिति तु न विचारशीलानामाग्रहः। यतो हि जानन्त्येव भाषावैज्ञानिका यद् व्यवहारपरिगृहीताया भाषायाः स्वल्पस्वल्पे एव समयान्तराले व्यवहारप्रवाहतो जायमानानि शैलीवस्तुनामादीनां परिवर्तनानि नूनमनिवार्याणि नाम। किन्तु न तेन सा भाषैव द्वितीया भवति। ततश्चैवं नानापरिवर्तनानि पश्यद्भिरपि किं कैश्चित्साधयितुं शक्येत यद् गीर्वाणभाषा सेयं कदाचिदपि व्यवहरणीया नाभवदिति ?

**भ्राजन्ती भूरिभूभागे भाग्यभोगविभासिता।**
**भवने भवने भूयो भारते भातु भारती।।इति शम्।**

***

# यात्रावृत्तान्तात्मका निबन्धाः

१. अमरकण्टकः

२. व्योमविहारः

३. अस्माकमुत्तराखण्डयात्रा

४. विश्वस्य असाधारणं तीर्थस्थलं भगवान् श्रीअमरनाथः

५. भगवतः श्रीकृष्णचन्द्रस्य लीलाभूमिः श्रीवृन्दावनम्

## अमरकण्टकः
(नर्मदाया उद्‌गमतीर्थम्)

भारतवर्षस्य नदीनां सप्त सुप्रसिद्धाः-गङ्गा, यमुना, सरस्वती, गोदावरी, नर्मदा, सिन्धुः, कावेरी चेति। अत एव स्नाने पूजने च तदिमाः समावाह्यन्ते श्रद्धालुभिः। यथा ह्यद्यत्वे सर्वासु सुप्रसिद्धतमा पूज्यतमा च सेयं भगवती गङ्गा तथा वैदिककाले ह्यासीत्प्रभाववती भगवती सरस्वती। किं यजुः किं वा ऋक्, सूक्तैरेतस्याः सर्वतोऽपि सुसमृध्यतः। काव्येष्विव सालङ्कारं रुचिरतमं चास्याः स्थाने स्थाने वर्णनं समुपलभ्यते संहितायाम्। वैदिककार्याणां भारतदेशीयत्वं साधयता श्रीमता सत्यव्रतसामश्रमिणा प्राचीनार्यावर्तस्य यद्वर्णनमन्विष्टं तत्र-सिन्धुनाम्ना यथा सम्प्रति सि(हि)न्धुस्थानमिति नामकरणं तथा सोऽयं सारस्वतो देश इति पुरा व्यपदेशमर्हतीति साधितोऽस्या महिमा। काव्यसाहित्येऽपि पुरातने स्थाने स्थाने समुपलभ्यते सरस्वत्या माहात्म्यम्। किन्तु हन्त! गभीरा सुदीर्घतमा चापि सेयं नदी सम्प्रत्यन्तःस्रोताः सती विलुप्तैवैकान्ततो भारतात्। अनुमीयतां परिवर्तनेनानेन वैदिककालस्य प्राचीनत्वं प्रभूतत्वं च।

गङ्गायमुनयोरुत्तरं प्रभूतो महिमा नर्मदाया अपि। कुर्वन्त्येतस्याः प्रदक्षिणां श्रद्धावन्तः। ते ह्येतस्या उद्गमस्थानमारभ्य यस्मिन् स्थाने सेयं समुद्रगामिनी भवति तदुत्तरतटमालम्ब्य पुनःपरावर्तन्ते ह्येतस्या उद्गमस्थानमेव। महती सेयं नर्मदा नदी। मध्यदेशे भारतस्य प्रवहमाना सेयं विभजते भारतं द्वयोर्भागयोः। तटे ह्येतस्या भूयांसि नगराणि, बहुतराणि रम्यस्थानानि, मनोहरा घट्टा मन्दिराणि च कियन्ति सन्ति। घट्टेषु 'भेडाघाट' प्रसिद्धतमम्। नर्मदाया ब्रह्माण्ड (बरमान)घट्टोपरि महानेको मेलकोऽपि संयुज्यते। नदी सेयममरकण्टकनामकात्पार्वत-प्रदेशादुद्गता। अयमेव गिरिस्तस्या उद्गमभूमिः। अत एव तदिदं स्थानमभिमन्यते पूज्यतमम्। प्रतिवर्षं परस्सहस्राः पुरुषाः कुर्वन्त्येतस्य यात्राम्। तदिदं स्थानमद्यावधि धार्मिकदृष्ट्यैव महत्त्वपूर्णम्, किन्तु साम्प्रतमैतिहासिकमहत्त्वमपि भाग्यभुक्तमस्य कर्तुं प्रयतन्ते बहवः। कियतः कालादारभ्य कतिचित्पुरातत्त्वविदः पण्डिताः स्थानमिदं प्राचीनं लङ्काद्वीपं साधयितुं प्रयस्यन्ति। भारतस्य लङ्कायाश्च मध्ये शतयोजनानाम् (चतुःशतक्रोशानाम्) अन्तरालमिति रामायणे प्रसिद्धम्। अत एव अमरकण्टकस्यास्य सविध एव लङ्कास्थानं साधयद्भिरेभिर्मध्यवर्तिनी दूरता सा समीक्रियते। इहैव तैः समुद्रस्य, वानराणामृक्षाणां चाप्यनुसन्धानमाविष्कृतमिति चित्रीयतां चतुरैः। अस्तु. अमरकण्टकाय तदिदमैतिहासिकं महत्त्वं मिलेन्न वा, किन्तु यत्स्थानं पुरातत्त्वज्ञगवेषणायामेतावदधिरूढं तस्य यत्किञ्चित्परिचयस्तु संस्कृतज्ञैरपि प्राप्तव्य एव।

'बङ्गाल-नागपुरधूमशकट्याः' एका शाखा कटनीतो विलासपुरपर्यन्तं गता। तदुपरि पेण्डरा-रोडनामकमेकमवमोचन[१]मस्ति, एदस्मादमरकण्टकः सप्तक्रोशान् (१४ मील) दूरे।

मध्यमार्गोऽयं पार्वतः कान्ताराकीर्णश्च, परं मध्ये मध्ये हरितक्षेत्राण्यपि दृष्टिपथमुपयान्ति। अवश्यं वैशाखज्येष्ठादिमासेषु नेमानि दृश्यन्ते किन्तु वर्षासु प्रायः सर्वत्रैव हरिता भूमिरवलोक्यते। मार्गे साधुतापसानां कुटीराणि दर्शनीयानि। प्राकृतदृश्यानां तु कथैव का? क्वचित्प्रचण्डो नालको घोरध्वनिं कुर्वन्प्रवहति तर्हि कुत्रचिद् विशालशिलाशीर्षेभ्यो घर्घरारावं कुर्वत्पानीयं प्रपतति। अवनतभूमिषु स्थाने स्थाने विशालजलकुण्डाः शोभन्ते। गगनचुम्बिनो वन्यमहीरुहाश्चेद् दृष्टिमाकर्षन्ति तर्हि सरणीनाम् (सडक) उभयपार्श्वे प्रफुल्लिता अर्द्धारण्यकवृक्षाः समाहरन्ति निजशोभया मनांसि मानवानाम्। सन्ति मार्गे ग्रामा अपि मध्ये मध्ये, येषां बहुषु पथिकानां निवासाय धर्मशाला अपि दृश्येरन्। सुदीर्घस्यैकस्य नालकस्य तटे तु विशालविशालाः शतशो रसाला बहुदूरपर्यन्तं पङ्क्तिनिबद्धाः समालोक्यन्ते। सारं त्विदमेव, यत्कियद्दूरपर्यन्तं तु मार्गः प्राकृतिकसुन्दरतया नितरां मनोहार्येव, किन्तु यतः पर्वतस्य प्ररोहः प्रारभ्यते तत आरभ्य पदातीनां पथिकानामवश्यं कष्टसम्भावना। वाहनमारुह्य यात्रां कुर्वाणास्तु सुखेन समुपगच्छेयुरमरकण्टकमिति न वाचा वक्तव्यम्।

अमरकण्टको रीवाँ–राज्यान्तर्गतः। निवसन्त्यत्र राज्यस्य कतिचित्कर्मचारिणः। पुरा तदिदं स्थानमासीदतिदुर्गमं किन्तु साम्प्रतमियं दुर्गमता गता भवति शनैः शनैः। सुभगसरणयो निर्मिताः स्थाने स्थाने। यद्यपीमा न सन्ति तथायताः किन्तु यात्रिणां यातायातयोः कृते प्रचुरं पर्याप्ताः। प्रधानसरणेरुभयतः सन्ति कियन्ति सुन्दराणि मन्दिराणि। सन्ति व्यापारिणां प्रगुणा आपणा अपि येषु पानभोजनयोः सर्वमेवोपकरणमासाद्यते यात्रिभिः। शालयस्त्वन्यदेशापेक्षया रुचिरा एव समासाद्यन्ते। न च न्यूनता घृतदुग्धादेरपि। सायं प्रातरमरकण्टकदेवालयेषु दृश्यते दर्शनार्थिनां भूयसी सङ्कुलता। यतस्ततः समाकर्ण्येत कोलाहलः, अनुभूयेत भूयानानन्दोत्सवो भक्तानाम्। जनसंघे यत्र तत्र गौडभिल्लाद्यसभ्यजातीयाः पुरुषा अपि बहवो विलोक्येरन् येषां शरीरवर्णः कृष्णः केवलं कटिकौपीनेनैव च ये वस्त्रवन्तः।

अमरकण्टके प्रधानं तीर्थस्थानं नर्मदायाः कुण्डः, तत्सविधसरण्यामेव श्रीनर्मदाया मन्दिरं च। एतन्मन्दिरस्य सम्मुखमेव प्रसिद्धमेकमन्यत्मन्दिरमस्ति भगवतः श्रीशङ्करस्य। उद्गमस्थानान्निःसृत्य नर्मदाया जलमस्मिन् कुण्ड एवैकत्र भवति।

अमरकण्टके नास्ति न्यूनता देवालयानाम्। महाराज्ञ्या अहल्याबाईतिख्याताया धर्मशालापि तत्र सुप्रथिता। परमयं महान् खेदस्य विषयो यद् यत्कालिकोऽयं निबन्धलेखस्तस्मिन् समये भूयांस एव मन्दिरधर्मशालादयो भग्नावस्थायामासन्। मन्येऽहं, रीवाँराज्येनावधानमवश्यमस्मिन् विषये कृतं स्यात्। न चेत्कृतं तर्हि साम्प्रतमवश्यं तत्कर्तव्यम्। यानि स्थापत्यकार्याणि नाधुनापि नष्टानि तेषामेव चेद्रक्षणावेक्षणं क्रियेत तर्हि तीर्थस्थानस्याऽस्याऽमरकण्टकस्य महत्ता भूयस्स्वंशेषु सुरक्षिता स्यात्। राज्यस्यावधानम–

१. धूमशकटिविश्रमस्थानम् (स्टेशन)।

स्मिन्विषये समाकृष्टमित्यनुमीयतेऽपि। यतस्तत्प्रयत्नेन प्रतिवर्षमत्र शिवरात्रेर्मेलकोत्सवः संयुज्यते यत्र दूरदूरतोऽपि यात्रिणः समागच्छन्ति। आपणाः समायान्ति दूरदूरेभ्योऽपि नगरेभ्यः। कतिचिद्दिनानि भवति भूयान् समारोहः। पेण्डरा-रोडस्थानादारभ्य अमरकण्टकपर्यन्तं रक्षापुरुषाणां निरीक्षणं भवति, लभ्यन्ते च तदा सर्वविधान्येव वाहनानि।

अमरकण्टकात्कपिलधारा सार्द्धक्रोशं दूरे। तत्र त्रिंशद् 'गज'समुन्नताद् गिरिशृङ्गान्निपतति निबिडा नर्मदानीरधारा निम्ने यस्या घोरनिर्घोष श्रूयते दूरदूरतोऽपि। परममनोहरमिदं दृश्यम्। मध्ये निपतन्ती नीरधारा परितश्च नानावनस्पतिनिबिडमकृत्रिमं वनम्। यत्र प्रफुल्लिता नानावनलता, परस्सहस्रप्रकाराणि काननकुसुमान्याहरन्ति हृदयं च घ्राणं च नयनं विलोकयताम्। पार्श्वपर्वतिकायाः समीप एव विलसन्ति वन्यजननिवासाः कतिचिल्लघवो ग्रामा अपि। प्रकृतिदेव्या नानाविधविहारस्थलीं सेयं नाकर्षेद्धृदयं सहृदयानाम्?

कपिलधारातः क्रोशार्द्धदूर एव दृश्यते दुर्लभदर्शना दुग्धधारा अत्रापि यात्रिजनशर्मदा नर्मदा समवतरति समुन्नतादचलशिखरान्मन्द्रमधुरशब्दमधस्ताद्। परं नेदं पर्वतशिखरं समतलभूमितस्तादृशमुन्नतं यादृशं कपिलधारायाम्, अत एव नाऽत्र घोरो ध्वनिराकर्ण्यते निपतन्त्या सलिलधारायाः।

अमरकण्टकशैलमालातो न केवलं नर्मदैव नदी निःसरति, शोणभद्रनदोऽप्यस्मादेव समुद्भवति। नर्मदाया उद्गमस्थानतो ह्यनुत्तरवर्ती तदुद्भवप्रदेशः। अनयोः सरिदुद्गमयोर्मध्ये सार्द्धैकक्रोशमन्तरालम्। एष हि शैलमालाया द्वौ विशालौ शिखरौ, मध्ये च निम्नो भूयानवकाशो यो 'घाटी'व दृश्यते। अत्रैव पर्वतशृङ्गारदेकस्मान्निपतति शोणभद्रधारा निराधारा नीचैः। अन्यस्मिन्समये साधाराणाकाराऽपि सेयं धारा वर्षासु विपुलाकारा भवति, या भयानकरूपेण निम्ने निपतन्ती समुद्भावयति भैरवं घोरावरम्, यो हि निस्तब्धनिशासु क्रोशक्रोशान्तरादपि विकटं श्रूयते।

शोणभद्रादर्द्धक्रोशान्तरे मञ्जुलमेकमुपवनम्, यद्धि भगवत्या नर्मदायाः सुखदा पुष्पवाटिकेति प्रख्यातं लोकेषु। अस्मादेवोपवनात्प्रत्यहं भगवत्या नर्मदायाः पूजायै प्राप्यन्ते पुष्पाणि। अत्रैव 'बकावली-पुष्प'-अपि ('गुलेबकावली') लभ्यते यद्धि स्थानमिदं विहाय नान्यत्र कुत्रचित् प्राप्यत इति प्रसिद्धम्। पीतवर्णमिदं कुसुमं नेत्ररोगेष्वमोघमित्यपि लोके ख्यातिः। पाठकेषु बहुभिरुर्दूभाषाप्रसिद्धं बकावलीपुष्पोपाख्यानं 'किस्सा गुलबकावली' भवेत्कदाचिदाकर्णितम्। श्रूयते यद् येषां दुरधिगमप्रदेशानां गुहानां च वर्णनं तत्र प्रसिद्धं तानि स्थानान्यत्रैवासन्।

अमरकण्टकः पर्वतप्रदेशः। इह न्यून एव निदाघोष्मा, प्राकृतदृश्यान्यपि नान्यत्र द्रष्टुं शक्यानि तथाविधानि। प्रावृषि पर्वतशोभा सेयमलौकिकी किन्तु तस्मिन्नृतौ स्थानमिदमुपगन्तुं भवति पथिकानां कष्टसम्भावना बाल्येन यतस्तस्मिन्नवसरे प्रवर्द्धन्ते स्थाने स्थाने नदी-नद-नालकावेगेन। परमन्येषु ऋतुषु निरायासमेव यात्रिणः समुपगम्य देशान्तरे दुर्विमृश्ये प्राकृतदृश्यैः शक्नुयुर्मनांसि रञ्जयितुमिति विदितं विदाम्।

* * *

# व्योम-विहारः
## पूर्वार्धम्
## नभोवृत्तानि

(1)

भूमिचरेणानेन नरेण स्वतः शतगुणितबलेष्वपि पशुषु विजयं प्राप्य यथा रथादिना स्थलयात्रा प्रारब्धा, तथा बलाच्छैलहरेष्वपि जलचरेषु विजयमवाप्य नौकादिना जलयात्रापि बलादधिकृता। किन्तु जले स्थले चाप्यधिकारं लब्ध्वापि नरस्यास्य न व्यपगतमनयाऽधिकारतृष्णया। एष हि बुद्धिबलेन गगनतलेऽप्यधिकारं लब्धुं चिरात्प्रायस्यत्। कृत्रिमैश्छत्रैरयमुड्डीनः, धूमभृतैर्गोलिकैरप्ययमगाद् गगने, यन्त्रयानैरप्ययमारोढुमैच्छन्नभः। हन्त, हन्त! बहूनां बलिनां बलयोऽप्यस्मिन्नभूवन्। किन्तु मनुष्येणानेन नेयमधिकारेच्छा वा व्योमविहारेच्छा वा पर्यत्याजि। नाधिकः समयो व्यतीतः, कैशोर्यदशायामस्माभिरेव पत्रेषु गगनारोहणप्रयत्ना इमे साभिरुचि सकौतूहलं चाऽपठ्यन्त यत्र हि सरस्वत्यादिपत्रेषु सेयं सम्पादकटिप्पण्यपि निरगाद् यत् – ''अपि भवेदीदृशमपि दिनं यत्र हि विहरेयुर्विहायस्यपि मानवा अमी।'' दिष्ट्याऽस्मिन्नेवायुषि कतिभिरेव वत्सरैस्तद्दिनमिदमस्माभिरेवाऽलोकितम्। सम्प्रति मानवेनानेन जले स्थले गगनतले चापि बुद्धिबलेनाधिकारो लब्ध इति सावलेपं शक्यते वक्तुम्।

ततश्च साहित्ये जलयात्रा स्थलयात्रा च यथा स्थानमलभत, तथा गगनतलयात्रापि सम्प्रति वर्णनावकाशं लेभे। प्रबलवेगं भूमियानमधिरूढस्य जनस्य दृष्टौ पर्यन्तदृश्यं कीदृशं वा भवेदिति वर्णनं यथा कौतुकाय तथा दृष्टिपथाऽतियानं विमानमधितिष्ठतो दृष्टौ भूतलदृश्यं कीदृशं वा सम्भवेदित्यपि निबन्धनं कौतूहलाय। वशीकृतगवीनां संस्कृतकवीनां दृष्टितो नेदमपि तारतम्यमभूत्तिरोहितम्। द्वयमपीदं मिथस्तुलनात्मकदृष्ट्येव वर्णितवानेकस्मिन्नेव स्थले (ग्रन्थे) महाकविः कालिदासः–

**''यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां**
**यदर्द्धे विच्छिन्नं भवति कृतसन्धानमिव तत्।**
**प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-**
**र्न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात्॥''**

यत्पूर्वं सूक्ष्मं भवति प्रबलवेगस्य वाहनस्य गतिवशात् तन्महाविपुलं दृश्यते, मध्ये विच्छिन्नोऽपि पदार्थो गगनवेगान्नूनं नीरन्ध्र इवालोक्यते, इत्यादिर्वस्तुस्वभावः कियन्मधुरो वर्णितस्तदेतदनुभवनिकषेण मार्मिकैः परीक्ष्येत नाम। व्योमविहारवर्णनमपि दृश्यताम् –

**शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी**
**पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात्पादपाः।**
**सन्धानं तनुभागनष्टसलिल-व्यक्तया व्रजन्त्यापगाः**
**केनाऽत्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते॥**

गगनादतिदूरतो दर्शने भूमिस्तद्गताः शैलाश्चाऽप्यव्यक्ततया एकीकृता इवालोक्यन्ते, शैलाः पृथिव्यां मन्ये निमग्नाः, किन्तु यथैव वयं नीचैरवतरामस्तथैव पृथिवीतः शैलानां भिन्नता बुद्धिगता भवति। ततश्च पृथिवीमध्ये निमग्ना इव पूर्वं दृश्यमानाः शैला उन्मग्ना इवोपर्यागच्छन्ति। एवं सति या पृथिवी पर्वतैरेकीभूतासीत्सा पर्वतेभ्योऽवतीर्य स्वसीमनि दृश्यते। उपरितो दर्शने पादपानां पत्राण्येव दृश्यन्ते अत एव पत्रेषु पादपा विलीना इव भवन्ति, किन्तु यथैवाऽग्रे समवतीर्यते तिर्यग्दृष्टिपातश्च भवति, तथैव वृक्षस्कन्धानां प्रत्यक्षीभावाद्वृक्षाः पूर्वोक्तां विलीनतां जहति। नदीनामतिसूक्ष्मा या जलवेणा उपरितो दूरदर्शने लुप्तेवासीत्, अत एव नदीनामप्यनुसन्धानं दुष्करमासीत् किन्तु निकटागमने सा सलिलरेखा व्यक्ता भवति। ततश्च नदीनामपीदानीं सन्धानमभूत्सुकरम् इत्यादि कियदनुभवैकवेद्यमिदं वर्णनमिति को वा नाभिनन्देत्? किन्तु टीकाकारस्य वीरराघवस्यात्र वीरता विलोकनीयैव। स हि व्याख्याति – ''उन्मज्जताम् ऊर्ध्वं नमतां शैलानां शृङ्गात् शिखरात् पृथिवी अवरोहतीव अधो नमतीव।'' नमनम् अधो भवति ऊर्ध्वं वा? प्रह्वीभावार्थकस्य नमनस्य ऊर्ध्वमिति विशेषणं सत्यं विवेकिमूर्धन्यतां सूचयति। अस्तु, प्रस्तूयते प्रकृतम्।

यदिदं व्योमविहारवर्णनं खेचरगोचरं कविवरगोचरं वा केवलमासीत्पूर्वं तदधुना भौतिकविज्ञानस्य कृपया प्रत्येकनरगोचरं भवितुमर्हति मानसिकसारो रूप्यकझणत्कारो वा चेत्सहायकोऽत्र। अन्यथा तु गगनमुड्डीयमानस्याऽस्य दूरतो वर्णनेनैव कवित्वाभिमानः शक्यः साधयितुम्। यथा हि मम –

घनाक्षरी –

**''उत्पतत्पतङ्ग[1] इव पारिप्लव[2]-पक्षद्वयो**
**याति निर्भयोऽयमतिवेगं गगनालये**
**मीनाकृतिमध्यदेशमारोहन्ति साहसिनो**
**भ्रमणविलासिनो नियुद्धे निपुणाश्च ये।**
**मञ्जुनाथ मन्त्रमिव लब्ध्वा[3] वाष्पयन्त्रबलं**
**चुङ्करोति घोरं व्योम्नि गगनजवोदये**
**वर्तमान-वैज्ञानिक-लोकस्याभिमानभूमि-[4]**
**माकाशे विमानमयमानमवलोकये॥''**

किन्तु यानस्वरूप-वर्णनमात्रान्न यात्रानुभवः शक्यो विज्ञातुमिति भारतस्य पूर्वतः पश्चिमपर्यन्तं (कलिकात्तातो योधपुर-पर्यन्तम्) विमानेन गगनं गाहमानस्य, सज्जनस्य स्वानुभूतो भ्रमणवृत्तान्तोऽनुपदमेव प्रकाश्यते। (उत्तरार्धे विमान-यात्रा शीर्षके।)

१. पक्षीव।

२. चञ्चलपक्षतिद्वयः।

३. वाष्पयन्त्रबलं मन्त्रमिव सद्यः सिद्धिदं लब्ध्वा।

४. वर्तमान-वैज्ञानिकानामभिमानकारणम्। अयमानं गच्छन्तं विमानम्, अवलोकये।'आकाशे भूमिमवलोकये' इति श्रवणेऽपि द्वयोः सामानाधिकरणं चित्रमेव।

# उत्तरार्धम्

## विमानयात्रा

उत्तररात्रस्य त्रिवादन एव शयनीयं विसृज्योदतिष्ठम्। नासीदतिप्रत्यूषे जागरणस्याभ्यास:। अत एव यात्रारम्भात्पूर्वतन: कार्यकलाप: (अभ्यवहारादितो निवृत्तिरूप:) कथमिव तदानीमासीत्सुकर:? तथापि द्वित्रान्[१] रसगोलकान् सरभसं गलाध: कृत्वा मण्डूकप्लुत्या मरुत्तरयानमारुह्य व्योमयानं ''विमान-पत्तनं[२] (विमानाऽवमोचनम्)'' प्रत्यधावम्। प्रात: पञ्चवादने व्योमयानं विहारमारभेत। आसीदिदानीमपि रात्रेरवसाने विलम्ब:। तदुपरि[३] कुज्झटिकया व्याप्तोऽभूत्पर्यन्तदेश:। अत एव चरकस्येव तदिदं[४] विमानस्थानं मे दुर्लभमभूत्। अस्तु, इतस्ततोऽनुसंधानेन यथाकथंचिदवाप्नवमहं विमानविश्रमस्थलम्। भवनकपाटावुद्घाट्य वायुयानस्य बहिर्निस्सारणाय प्राचलत्प्रयत्नस्तस्मिन्समये। अस्तु, बाहुशालिभिर्हस्ताहस्तिकयाऽवहेल्य वर्तमानकालिकमिदं ''पुष्पक'' विमानं निरसार्यत बहि:।

अञ्जनानां[५] विमानयन्त्राणां च परीक्षणे संवृत्ते सुहृद्भिर्विसर्जितोऽहमारोहं विमानमिमम्। द्वारकपाटं सरभसमुद्रयत्। सर्वप्रथममियमासीन्मे विमानयात्रा अत एव नासीत्परिसीमा कौतूहलस्य। अभूद्यात्रारम्भ:। पूर्वं घर्घरारावं विमुञ्चद्वायुयानं प्रान्तरस्य विपरीतदिशि भूतले प्रद्रवणमारेभे, यतोहि वायुयानं वायोर्विपरीतदिशं विहाय नोत्पतनारम्भे प्रभु। अत एव हि प्रत्येकविमानभवनस्य शिखरदेशे वायुगतिसूचकयन्त्रमास्थितं भवति। भूतले प्रधाव्य यानमिदं वायोर्विपरीतदिश्यभूदवस्थितम्। त्रिष्वप्यञ्जनेषु सहसैव भयङ्कररूपेण गर्जनारम्भ: समभवत्। एतस्मिन्नेव समये सहकारिसञ्चालको मत्समीपमागत्य वातायनद्वारमुदघाटयत्, अवदच्च मां हस्तवस्त्रमान्दोलयितुम्।

वायुयानं पूर्वमतिवेगेन भूमावधावत् ततस्तथान्दोलितमभवद्यथा घोटको धावति धारागत्या। इदमिदानीं भूमिं विहाय विहायसि रोहदासीत्। मध्ये मध्ये भुवं विहायोपर्युद्गच्छति पुनश्च चक्ररूपैश्चरणैर्भुवं स्पृशति। त्वरितमेव सर्वमिदमान्दोलनं पर्यशाम्यत्। अधोदेशदर्शनाद्विदितं यत्[६] भूमेर्द्वित्रवंशानुपरि सञ्चराम:। किञ्चिदेवोपर्यारोहणे सर्वमपि विमानस्थानदृश्यमद्भुतमेवाऽऽलोक्यत। पर्यन्तत: सस्यक्षेत्राणि, भूमि:, पादपानां पङ्क्तय:, भवनानि, कुटीराणि, सर्वाण्येन वामनावतारमधारयन्। कतिभिरेव क्षणै: सहसा प्रतीतमभूद्यत् क्षेत्राणि पर्यन्तभूमयश्च सर्वाण्यपि[७] पार्श्वमिव परिर्वयन्ति। अतिनीचैर्विमानविश्रमस्थले - अनेकानि हस्तवस्त्राण्युत्तरीयाणि चान्दोल्यमानान्यासन्। मम कनीयान् भ्राता हस्तावुत्थाप्य मां प्रत्यौत्सुक्यमसूचयत्। क्षण एव वयमत्युच्चैरारोहाम प्राचलाम च गङ्गां प्रति। कुज्झटिकावगुण्ठने कालिकातानगरमिदं सम्प्रति शयानमासीत्।

---

१. रसगुल्ले। २. हवाई अड्डा 'एरोड्रोम'। ३. कुहासा, कोहरा। ४. चरकसंहिताया एकमस्य मध्यविच्छेदस्य संज्ञा। ५. एन्जिन।
६. वेणु: (परिमाणाय) ७. मानों करवट ले रहे हों इति हिन्दी-भाषायाम्।

भूमितो वायुयानस्योच्चताया अनुमानं नासीद् बुद्धिगम्यम्। न चासीत्प्रश्नस्या-प्यवकाशः। यतो हि यन्त्राणि तथा प्रबलवेगेन सिंहगर्जनामकुर्वन् येन व्याकुलाः सर्वेऽपि कर्णरन्ध्रे तूलेनापूरयन्। तथापि पर्वतोपर्युड्डयनानुमानेन ज्ञातं यद् द्विसहस्रपादोच्चा (फीट) वयमुदलङ्घयाम गङ्गाम्। अतिविप्रकृष्टस्तस्या सेतुरप्यालोक्यत। सर्पिणीव वक्रोपसर्पिणी गङ्गाया धारा कुज्झटिकायामावृताऽभूत्। गङ्गामुल्लङ्घितवतामस्माकं दृष्टौ क्षेत्राणि भूमयश्च ''शतरञ्ज'' क्रीडापट्ट इवाभान्।

त्रयाणामप्यञ्जनानां भयङ्कराखेण विमानमिदं कातरभावादिवावेपत। मध्ये मध्ये च वायोर्विघट्टनेन हिन्दोलकमिवोच्चावचं गच्छदासीत्। अतिनीचैर्लघ्वाकाराणि सरांसि, क्षेत्राणि, पर्यन्तभूमयश्चाऽवालोक्यन्त येषां मध्ये मध्ये पांसुमुच्छालयत्पशूनां वृन्दं पिपीलिकापङ्क्तिरिव प्रतीयते स्म। यत्र स्थाने गहना वृक्षश्रेणिरासीत्तत्र घनो हरिवर्णः प्रत्यैयत। उपरितो नीचैर्विलोकयतामपर इव सम्पद्यते दृष्टिकोणः।

लोकेष्वासीत्प्रसिद्धं यद्वायुयानं धूमशकटिलेखाभिः सहैव व्रजतीति, किन्त्वतीव सूक्ष्मेक्षिकया दर्शनेऽपि वायुयानस्य मार्गे न क्वापि वाष्पयानस्य मार्गचिह्नमवालोक्यत। अवश्यं मध्ये-मध्ये वाष्पशकटेः प्रधानविश्रमस्थानान्यभूवन् दृग्गोचराणि, एकदा सामान्यावमोचनस्थलमप्यालक्ष्यत। सहकारि-सञ्चालको [1]वितन्त्रिविद्युद्यन्त्रं विहाय समायासीन्मदन्तिके, [13]पत्रनिर्मिते पानपात्रे चोष्णोष्णं चायरसमापूर्य मत्सम्मुखमतिष्ठिपत्। सस्मितमवादीच्च-सम्यगहं जाने यत् [2]''सैण्डविच'' स्वादाद् भवान् सर्वथा वञ्चितः परं पत्ररसस्तु महामुनीनामप्युपादेय एव। स्मितेनैव सभ्यतागर्तरन्ध्रं समीकृत्य दर्शनीयेषु पुनर्मनोयोगमकार्षम्।

एतेषां भोजनव्यापारोऽयमपारः। समयासमयावविचार्य-अदुग्धशर्करश्चायरसः, रोटिका, नवनीतम्, विषकूटाः, [3]पुटकपिहिता मत्स्याः, कदलीफलानि, नागरङ्गाणि, अण्डाः, शीतमामिषम् इत्यादीनामनवधिवस्तूनां नैवेद्यमहर्निशं चलति। स्वल्प एव समयान्तराले स एव महाभागः पुनर्दर्शनमदात्। आसीदस्य हस्ते प्रश्नपत्रं ''मम परिमाणं कियत्'' इति। मम जिज्ञासायां सूचितमनेन यत्सम्पूर्णयानस्य साम्प्रतं कियत्परिमाणमिति निश्चेतव्यं नाम। प्रश्नस्योत्तरं प्रदायाऽहमपि प्रतिप्रश्नमकरवम् ''सम्प्रति वयं भूमितः कियदुन्नताः''। सञ्चालक (पायलट) सविधान्निश्चित्याऽवोचदसौ - 1,100 मीटर, अर्थात् 3,500 पादपरिमितम्। आश्चर्यम् इयदुपरि प्रवहणेऽपि नासीदुष्णतायां विशिष्य न्यूनता काचित्।

पश्यत एव मेऽधोवर्तिनः कच्छस्य हरितो धूसरश्च वर्णः शनैररुणे पर्यणमत्। वृक्षघनतापि विरलतामगात्। मध्ये मध्ये सरः सरस्यस्तथा प्रतीयन्ते स्म यथा काष्ठचतुराधारे जटिताः स्वच्छमुकुराः। तेषां सविध एव कृषक-कुटीरमया ग्रामाः शिशुक्रीडागृहाणीव प्रत्यभान्। भूमिः क्वाप्यासीदुर्वरा क्वचिच्चोषरा। विदितमभूद् यद् वीरभूमिप्राञ्चलमुल्लङ्घयामः साम्प्रतम्।

१. रेडियो (बेतार का तार) यन्त्र। २. कागजनिर्मिते। ३. पकौडी-सदृशं सलवण। ४. डिब्बा-बन्द।

अदूर एवोच्चावचाः शिशुशैला अदृश्यन्त, किन्तु स्वल्प एवान्तरे विशाला पर्वतश्रेणिरारभ्यत। दूरे-दूरे च बालुकापूर्णा नद्यः। पर्वतमेकमालोक्य पर्यचिनवं यदयं काशीपुर-पञ्चकोट्टशैल इति। तदनन्तरं पर्यायेण पर्वताः, पर्वतिकाः, वनानि, कान्ताराणि, ऊषराणि चामिलन्। अन्तरान्तरा च बालुकावक्षसि रौप्यरेखेव कुटिलगामिनि काचित्तटिन्यप्यगाद्दृशोर्गोचरम्। अन्ते च सर्वमेकमयमिवाऽभवत्, मन्ये भगवतीं प्रकृतिं विहाय मानवमहोदयस्य कृतिरत्र विश्रान्ता।

(3)

नव-सार्द्धनववादने पर्वत-परिवृता सरिदेकाऽऽलोक्यत। अतिदूरतो दर्शनेऽपि स्थानस्यास्य परिचयो न शक्यो विस्मर्तुम्, यतो हि शोणनदी रोहिताश्वशैलश्चैकवारमालोकितौ न हृत्पटलमुज्झतो विलोकयितुः। सरितः समीपे विमानमस्माकं जातु नीचैरवाऽरोहत्। अधुना गोमहिषीणां व्रजाः, सैकतेषु गोपबालकानां धावनक्रीडाः, सरिति लोकानामवगाहनम्, महिलानां पटप्रक्षालनादिकं सर्वमपि सुस्पष्टमभूद्दर्शनीयम्। बालुकामये विशाले वक्षसि शोणजलवेणी सेयं खेलन्तीव प्रवहन्ती बभूव। अपरपारे च पर्वतश्रेणिर्विमानतोऽप्युच्चतराऽवलोक्यत। एतावत्कालमिमां पृथ्वीमपरिचितभावेन नीचैश्चिरमवलोक्य साम्प्रतं सहजभावेनोन्नत-मवलोकयतो मे चक्षुषी शीतलतामिवान्वभवताम्। वैमानिकवत्पुष्पकमिदमधितिष्ठतो मनस्यवश्यं गर्वोदयो भवति किन्तु समस्तेन परिचितजगता सह सहसैव विच्छेदमयो भावश्चेतसि विषादरेखामप्यङ्कयत्येव किञ्चित्। सत्यमिदमुच्यते यत् स्वहस्तधृतदण्डमातपत्रमिव उच्चैः पदमशान्तिमपि सह करोतीति।

नदीमुल्लङ्घ्य वायुयानं शनैः शनैरुपर्यारोहत्। इतः पर्वताग्रे पर्वतस्थता सममिलद्यथैषामन्त एव न भवेत्। प्रत्येकपर्वतस्याग्रे काचित्समतला भूमिस्तदग्रे पुनः पूर्वतोऽपि विशालः पर्वतः। पर्वतश्रेणिरियं दानवानां निश्रेणिरिवाऽभात्। अस्तु, अत्युन्नतमारुह्य विमानमिदमुदलङ्घयत्पर्वतश्रेणिमिमाम्। पुनः प्रान्तरं समतला भूमिश्चालोके न्यपतत्। स्थाने स्थाने कुटीरमया ग्रामाः, एकद्वे लघु-नगरे, द्वित्राः स्वल्पसरितश्चाभवन् दृग्गोचराः। एकादशवादने व्यलोक्यत कालिन्द्याः सुनीला धारा। तामुल्लङ्घयतामस्माकमपततां दृशि यमुनायाः सेतुः प्रयागदुर्गं च। स्वल्पकाल एव प्रयागीय-म्योरमहाविद्यालयस्य शीर्षकघटीयन्त्रम् खुसरोमहोपवनम्, अन्यान्यानि च चिरपरिचितस्थानान्यवालोक्यन्त। किन्तु कतिभिरेव क्षणैर्महाभागः प्रयागः पर्यलङ्घयतास्माभिः। अहह, एतावतैव सम्मुखगगनेऽस्मत्तोऽप्युच्चतरे स्तरे वेगादुड्डीयमान किञ्चिदवालोक्यत वस्तु। चित्रितोऽहं व्यचारयम् अपि किञ्चिदन्यद्व्योमयानम्, कश्चिद् विहङ्गमो वा?

अस्मिन्नेव समये यन्त्राणां शब्दः विलीनोऽभवत्। दृश्यमानं तद्वस्त्वपि नेत्रयोरन्तर्हितमासीत्। किन्तु परस्मिन्नेव क्षणे दृष्टं यदेकं वायुयानमस्माकमग्रभाग एव शनैः शनैरधोऽवतरतीति। व्योमयानस्य नीचैरवतरणमतिसुखावहम्। न तदा कम्पते, न चान्दोलते। नाऽऽघाता न चोद्घातास्तदाऽनुभूयन्ते। यानयन्त्राणां नीरवतया न च कोऽपि कलकलः कर्णयोररुन्तुदो भवति। भूमितलस्पर्शस्य पूर्वक्षणपर्यन्तं सर् सर् इति शब्दायमानं व्योमयानं

समवतरति शनैः शनैः। किन्तु भूतलं स्पृष्टवत्येव याने पुनः परिचालनीयानि भवन्ति यन्त्राणि। ततोऽञ्जनगर्जनारम्भे पुनः सवेगमुद्घाताऽवघाताः प्रारभ्यन्ते, यन्त्राणां घर्घरारवः पूरयति कर्णकुहरम्, विच्छायमुच्छलति च घोटक इव वायुयानम्। किन्तु परक्षण एव तलवर्तिना चक्रद्वयेन भूमिमास्पृश्य यानमिदं धावति धारागत्या। अथ स्वाभीष्टस्थलोपगमे यानस्याञ्जनमवरुद्धक्रियं क्रियते निरुध्यते च व्योमयानम्।

आसीत्प्रयागे महानूष्मा। विमानविश्रमस्थलमिदं नगरात्पञ्च-क्रोशान्तरे बनरोली-ग्रामे महामहत्येकस्मिन्प्रान्तरेऽवस्थितम्। वायुयानतोऽवतीर्य पदातिरहं चङ्क्रमणेन पदयोर्गतिमकार्षं पुनर्यथावस्थिताम्। एतस्मिन्नेवान्तरे पूर्वसूचनानुसारं मत्सुहृद्देवनायकः पानभोजनसामग्रीमादायोपातिष्ठत्। तस्य मरुत्तरयानमधिष्ठायैव वयं भोज्यसामग्र्याः सदुपयोगमकरवाम। भुञ्जानैरवलोकितमस्माभिर्यद् धूसरवर्ण एको विमानः शनैः शनैस्तथैवाऽवतरतीति। अन्वेषणेन विदितं यदिदं फ्रांसदेशीयं वायुयानं सैगनम् (इण्डो चाइना) अभिगच्छति। मन्ये, तदेवेदमासीद् यन्नभस्युड्डीयमानं मया विलोक्यमानमभूत्। परिसमाप्य साङ्गोपाङ्गं भोजनमहमदर्शयमिदं व्योमयानं प्रियसुहृदे देवनायकायाऽन्यान्येभ्यश्च किन्त्वेतावतैव पुनर्घोरगर्जनमारभ्यत विमानस्याञ्जनेन। सञ्चालकमहोदयमूर्ध्वबाहुमा-लोक्यैवाऽवेदिषं यत्सर्वं सज्जीभूतमिति। अस्तु, पुनरयं तत्रैवावलम्बितो वेतालः। चचाल च वायुयानम्।

(4)

नदीर्नदान्, क्षेत्राणि, प्रान्तराणि, जनशून्यानि कान्ताराणि, पुराणि, ग्रामांश्चापि नीचैरवलङ्घयद्विमानमिदमधावद् घोरघूङ्कारेणापारे वियति। उपरि वायोर्गतिर्विरुद्धदिश्यासीत्। अतो नीचैःस्तर एव (त्रिचतुःसहस्रपादोन्नतौ) प्रावहद्यानमिदम्। अश्रौषं यत्सहकारि-सञ्चालकमहाभागो वितन्त्रिणा शब्दविद्युद्यन्त्रेण भारतावस्थितैः सकलैरेव वायुग्रहैः (मेटीओरोलॉजिकल ऑफिस) सह प्राकृतिकपरिस्थितेः सम्बन्धे वार्तालापं करोतीति। एकवारमेको महान् ह्रद इव किञ्चिददृश्यत, सुदूरायां क्षितिजरेखायामालोक्यत शैलानामस्पष्टा छायापि। ह्रदमिमं परितः सरला रेखा इव नालिकाः काश्चिदासन्। बोधितमिदं मे यदितः क्षेत्रसेचनार्थाः कुल्याः।

कुल्या [1]इमा अभितो हरितहरितान्यासन् क्षेत्राणि, तत्सन्निधौ च महामहान्ति प्रान्तराण्यासन् येष्वसंख्या गोमहिष्यो घास चरन्त्यो विचरन्त्यश्चाभूवन्। मध्ये मध्ये राशीकृतानि क्षेत्रसस्यान्यालोक्यन्त। छिन्नसस्यानीमानि क्षेत्राणि बभुः संमृष्टान्यङ्गणानीव। वायोर्विपरीतवाहितया प्राचलदतिनीचैर्वायुयानम्। अत एव लोकानां मुखान्यप्यालोक्यन्त सुस्पष्टम्। ते ह्यस्माकमिदं वायुयानमालोकयन्तोऽभूवन्साभिलाषम्, अदर्शयच्चाऽपरः सङ्केतमन्यम्। अद्यावध्यहमपि सकौतुहलमपश्यं वायुयानमदर्शयं चान्यान्। अयं मे प्रथम एवासीदवसरो यद् दर्शकश्रेणितोऽहं दृश्यश्रेणिभुक्तोऽभूवम्।

१. अभितो योगे द्वितीया।

गवामजानां च समजा [१]वायुयानस्य घर्घरनादमाकर्ण्य चकिताश्चतुर्दिक्षु पलायन्त। ऊर्ध्वदर्शनस्य नासीत्तेषां मतिः, किन्त्वस्मिन्विषये महिष्यो गभीराशयाः प्रत्यभान्। तासामधिकसंख्याः स्वमुखमुन्नमय्य निजसहचरीणामिमकाण्डसभ्रमं सस्मितमिवाऽवैक्षन्त, धीरभावेन च पुनर्जठरपूजाकार्ये दत्तचित्ता अभूवन्। बह्वयस्तु मुखोन्नयनेऽप्युपेक्षाभावमदर्शयन्।

शनैः शनैरधस्तनमृत्तिकाया रूपरागयोरलक्ष्यत परिवृत्ति। वृक्षगुल्मा अपि लोपमस्पृशन्। लघुमहान्तः शैला अप्यलक्ष्यन्त। विदितमभूद्-राजपुत्रप्रदेशमधिविशामः। पुरुषाणामुष्णीषे स्त्रीणामावरणवस्त्रेषु च नानारङ्गाणां व्यलोक्यत बाहुल्यम्। क्षेत्राणां मध्ये मध्ये रक्त-नारङ्ग-कर्बुरवर्णान्धोंऽशुकान् नीलवर्णानि चोत्तरीयाणि दधतः स्त्रीणां समूहाः समपतन् दृशोर्गोचरम्। शनैरवर्धत शैलसंख्या। गिरयोऽमी 'अजन्तातः' 'एलोरा' गमनमार्गे विन्ध्याद्रेरुपपर्वता इवासन् समतलपृष्ठाः श्रेणीबद्धाश्च। व्यभादेवं मनसि यथा एकोत्तरमेकेति क्रमबद्धाः समुद्रस्य लहर्य इव घनीभावमापद्य याताः पाषाणताम्। लम्बग्रीवाणामुष्ट्रमहोदयानामप्यभूद्दर्शनम्। क्वचित्क्वचिद्धूराणामुत्सङ्गे गण्डशैलान्तरिता नीलपयोवाहिन्यो वाहिन्योऽप्यगुर्दृष्टिपथम्। एकस्तथाविधोऽप्यमिलन्महीधरो यस्योपत्य-कामारभ्याऽधित्यकापर्यन्तमशेषोऽपि प्रदेशो जीर्णैः कृष्णवर्णैर्मेघमसीमलिनैर्मन्दिरैर्मठैश्चाच्छाद्यत। प्रायः पञ्चवादने सायं योधपुरराजधान्याः समुन्नतं दुर्गं तदधस्तादावासितं नगरं चावालोक्यत दूरात्। पञ्चवादने वयमवापाम योधपुरम्।

प्रयागादारभ्य योधपुरं यावन्मारुतस्य तीव्रतया विपरीतदिग्वाहितया च वायुयानमतीवाऽऽकम्पत। मारुतहिन्दोलेष्वापतितमलोठद् गगनस्योच्चावचस्तरेषु। व्योमयानस्य सहसैव नीचैरवतरणस्यानुभवो न विशिष्य सुखावहः। तथा प्रतीयते यथा चरणयोरधस्तन आधारः केनाप्यपसारितो भवेत्, गात्रस्य पश्चार्द्धमधः प्रवेशोन्मुखं वा स्यात्। महावात्यया समुद्रकल्लोलानामुत्तालोत्तालदशायां पोतमारुह्य सुदृढनिस्पन्दायां तटभूमौ यदा पदं दध्मस्तदा प्रतीयते यथा भूमिरपीयमुत्कम्पते। अवरोहणस्याऽव्यवहितक्षण एव प्रधानसञ्चालकेन समागत्य जिज्ञासितम्- 'अपि भृशमुद्घातिनी सेयमनुभूता यात्रा ? ननु भवतः सोऽयं प्रथमावसरः, अपि न किञ्चित्प्रकृतेरस्वास्थ्यम् ?'

प्रत्यवादिषम्- मैवम्, न किञ्चित्तथा।

***

# अस्माकम् उत्तराखण्डयात्रा

अस्माकं देशे ग्रीष्मर्तौ धार्मिकजनानां प्रमुखः कार्यक्रमो भवति, उत्तराखण्डस्य तीर्थयात्रायाः। हिमाचलाञ्चलस्थानां तीर्थानां यात्रा केवलं ग्रीष्मर्तावेव सम्भवति यतोऽन्यर्तुषु गिरिशृङ्गस्थानीयानि तीर्थानि हिमाच्छादितानि तिष्ठन्ति। अतोऽस्माभिर्ग्रीष्मे उत्तराखण्डयात्रायाः कार्यक्रमस्तस्मिन् वर्षे निरधार्यत। समग्रामपि यात्रां ये 'बस' शकटिद्वारा कुर्वन्ति न ते गिरिरामणीयकं, हिमाचलवनप्रान्तरसुषमां च द्रष्टुं शक्नुवन्तीत्यस्माभिर्निर्धारितं यदधिकतमं पदयात्रामेव वयं करिष्यामः। यद्यपि अस्माकं दले महिलाः, वृद्धजनाश्चाप्यभूवँस्तथापि हिमाचलोपत्यकापर्यन्तं वाहनैर्यात्रां कृत्वा वयं हिमाचलारोहणयात्रां पद्भ्यामेव विधास्यामः, इत्यभूदस्माकं निश्चयः। पदयात्रायां भूयान् समयावधिरपेक्ष्यते यतो हि समुल्लासमये, शीतलेऽपि तस्मिन् स्थले प्रतिदिनं दशक्रोशाधिका पदयात्रा महिलाजनैर्वृद्धजनैश्च न कर्तुं शक्या, पर्वतारोहणस्य श्रमसाध्यत्वात्। एवं हि प्रायो मासमेकं सेयमस्माकं यात्रा पर्यचलत्। अस्यामस्माभिरुत्तराखण्डस्य बहूनां स्थलानां सौन्दर्यमवलोकितम्। यात्राया अस्याः उत्तराखण्डस्य कतिपयतीर्थानां च विवरणमत्र प्रस्तूयते।

**हृषीकेशः लक्ष्मणझूला च**

उत्तराखण्डयात्रायाः शुभारम्भो हृषीकेशयात्रया भवति। सुरम्यमिदं स्थलं हिमाचलोपत्यकासु गङ्गातटे विद्यते। अत्रत्यं गङ्गाजलं शुद्धमतिशीतलं स्वच्छं चास्ति। अत्र बहुभिः साधुभिः, संस्थाभिश्च कीर्तनागाराः, धर्मशालाः, मन्दिराणि, अन्यानि च सार्वजनिकधर्मस्थलानि निर्मापितानि सन्ति यत्र यात्रिणो विश्रम्योत्तराखण्डयात्राया आरम्भं कुर्वन्ति। गीताप्रेसाख्या गोरखपुरीया संस्थाऽत्र 'परमार्थनिकेतन'– स्वर्गाश्रमादिनामभिः सुरम्याणि यात्रिस्थलानि निर्मापितवती यत्र ग्रीष्मर्तावन्यान्यसमयेष्वपि च निरन्तरं प्रवचनकथादिधर्मकार्याणि प्रचलन्ति। यात्रिनिवासव्यवस्थाऽप्यत्र वर्तते। बाबाकालीकमलीवाला इत्याख्यसंन्यासिना स्थापितायाः संस्थायाः शाखाः हृषीकेशे सर्वत्रोत्तराखण्डे च प्रसृताः। ता अपि यात्रिणां सौकर्यार्थं तत्पराः प्राप्यन्ते।

हृषीकेशस्य मीलत्रयदूरान्तरे सुप्रसिद्धं 'लक्ष्मणझूला' स्थानमस्ति यद्धि मानवकौशलेन सह दैवचमत्कारस्यापि प्रतिसूचकम्। सेयं दन्तकथा यतस्ततः श्रूयते यत् श्रीरामचन्द्रस्य भ्रात्रा लक्ष्मणेन अस्मिन्नेव स्थाने अक्रियत तपः। तेनैव च देवतानां पवित्रस्थाने मानवयात्रां सुगमां कर्तुं भगवत्या गङ्गाया उपरि सोऽयं सेतुरास्थापितः। हरिद्वारादर्धक्रोशदूरे एव 'भीमगोडा' नामकमैतिहासिकं तीर्थं, यस्य विलोकनाय समायान्ति यात्रिणः बहवः। अत्र हि पाण्डवेन

भीमसेनेन निजं-जानु (गोडा) सहसा समारोपितमभूदिति किंवदन्ती। एवमेव 'मोटर' द्वारा हृषीकेशयात्रायां प्रक्रान्तायां, सप्तमीलदूरान्तरे मार्गे एव सत्यनारायणस्य भगवतो मन्दिरमपि मिलति यत्र हि यात्रिण: सर्वेऽप्यवतीर्य भगवद्दर्शनाय गच्छन्ति। सत्यनारायणस्य गौरी मनोहरा च मूर्तिरतिहारिणी वर्तते। इह हि यात्रिणो भक्तिपूर्वकं सत्यनारायणस्य पूजनमुपहारादिकं च कुर्वन्ति। सत्यनारायणदर्शनं कृत्वा अग्रे प्रस्थितेषु यात्रिषु, अग्रे 'सौंग' नाम्नी नदी मिलति याहि 'घोडा पछाड' नाम्नापि प्रसिद्धा।

हृषीकेशस्य 'त्रिवेणी' नामके गङ्गातटे यात्रिणां समवायो बाहुल्येनाऽऽलोक्यते, यतो हि स्थानेऽस्मिन् स्नानदानादेर्विशिष्टं फलमुपकीर्तयन्ति। एतस्य समीप एव भरतस्यातिप्राचीन मन्दिरमस्ति, यस्य सविधे बहूनां साधुमहात्मनां दर्शमुपलभन्ते श्रद्धालव:। किञ्चिद् दूर एव 'मुनि की रेती' नामकं स्थानम्, यत्र हि शत्रुघ्नस्य सुप्रसिद्धं मन्दिरम्। इत: स्थानादेव यात्रिणो भारवाहकस्य कुली 'डंडी' (पृष्ठे मानववहनस्य), एतदादे: प्रबन्धं कुर्वन्ति। स्थानादस्मात् १० मीलदूरे मरुत्तरयानस्य संसरणं लभ्यते यद्धि नरेन्द्रनगरं प्रयाति।

**देवप्रयाग:**

हृषीकेशाद्देवप्रयागपर्यन्तं ४४ चतुश्चत्वारिंशन्मीलमितं मार्गं साम्प्रतं मोटरयानद्वाराऽति-वाहयन्ति यात्रिण:। सेयं यात्रा भूमण्डले अनुपमशोभाशालिनी, किन्तु सहैव रोमाञ्चकारिण्यपि। पर्वतघाट्यां सर्प इव लहर्याकारेण वक्रवक्रेण मार्गेण यदा मरुत्तरयानं प्रयाति तदा एवंविधयात्रायामनभ्यस्ता: पुरुषा मनोविकृतिमनुभवन्ति। बहूनां वमनानि भवन्ति। किन्तु, एवं सत्यपि मार्गस्योभयतो यद् दृश्यं चक्षुषोरुपगच्छति तद्धि सर्वदाऽर्थं हृदयपटलेऽङ्कितं भवति। मार्गस्यैकतो गगनचुम्बिहिमगिरे: शिखरमवलोक्यते यस्य शिरोभागश्चन्द्रधवलो विलोक्यते दूरत:। श्वेतभागादधोदेशे हरितहरितै: पार्वतमहीरुहैराच्छन्न: स हिमालयदेश:। द्वितीयपार्श्वे चेत् दृष्टिर्निक्षिप्यते तर्हि पातालतलमिव महागभीरो गिरिगर्त:, यस्मिन् कलकलध्वनिबहुला सर्वदैव फेनायमाना वेगवाहिनी जलवेणी प्रवहति। मम विचारे यात्रायामस्यां सोऽयं भागो महाभयावह:। यतो हि मरुत्तरशकटिचालकस्य हस्तो यदि स्वल्पमपि कम्पितो भवेत्तर्हि मरुतयानं प्रस्तरविशङ्कटे पातालतले पतितं भवेद् यत्रास्य एकैकमप्यङ्गं पृथक्पृथग् भूत्वा अन्वेषणीयमेव भवेत्। यदि तु अपरपार्श्वे हस्त: कम्पितो भवेत्तर्हि हिमगिरे: शिलाभिराचूर्णितं खण्डखण्डमेव भवेत्।

अत्र हि पङ्किलजलवाहिनी अलकनन्दा, विमलसलिलवाहिनी भागीरथी चेत्युभे अपि द्वे सख्याविव अतीव प्रेमाऽऽवेगेन मिलत:। दृश्यमिदमतीव रमणीयं विलोकयताम्। भागीरथ्या: परपारे गङ्गोत्तरीं प्रति प्रयाति पन्था:। मार्गस्योपरिभागे यात्रायां प्रसिद्धं श्रीरघुनाथमन्दिरमस्ति। एवमन्यान्यपि कतिचित्प्राचीनस्थानानि दर्शनीयानि। स्थानादस्मात् एको मार्ग: टेहरीनगरे भूत्वा गङ्गावतरणं प्रति प्रयाति। अयमेव मार्गो गङ्गोत्रीयात्रिणां कृते प्रशस्त:। देवप्रयागे अलकनन्दाभागीरथ्यो: सङ्गमोऽयं परं पवित्र: परिगण्यते। अत्र हि सर्वेऽपि यात्रिण:

श्रद्धया स्नान्ति, पितृभ्यः पिण्डदानं च कुर्वन्ति। रावणवधस्य पश्चाद् भगवता रामचन्द्रेण स्थानेऽस्मिन्नात्मशुद्धेः कृते कञ्चित्कालं निवासः कृतः, इति हि अत्रत्यानां किंवदन्ती।

देवप्रयागः प्रशस्ता वसतिः। अयं हि द्वयोर्भागयोर्विभक्तः। अलकनन्दाया अस्मिन्पारे कालीकमलीवालास्वामिनो धर्मशाला, अन्नक्षेत्रं चास्ति। नगरे लघीयान् राजपथः। दण्डविभागीयानामास्थानम् (पुलिसचौकी), प्रेषण-विभागः (डाकघर), विद्युद्वृत्तप्रेषणालयः (तारघर) तथा राजप्रबन्धेन स्थापित औषधालयश्चास्ति। अलकनन्दासेतोः परस्मिन्पारे तीर्थपुरोहितानाम् (पंडे) प्रशस्ता वसतिः। श्रीबदरीनाथयात्रिणां दर्शनतीर्थपूजनादिपौरोहित्यकार्यं सम्पाद्य शीतकालमिमे देवप्रयागे एव यापयन्ति। पुरीक्षेत्रे हि- एषां कार्यं वैशाखमारभ्य आषाढश्रावणयोरेव प्रायः परिसमाप्यते। तीर्थपुरोहितानामेषां भारतस्य नानाप्रदेशेषु परिभ्रमणात्तेषामेषा वसतिस्तत्प्रदेशीयानामन्यान्यनगराणामपेक्षया सौष्ठवेन आवासितेव। यत्र किल मरुत्तरयानं विश्राम्यति तस्मात्स्थानात्किञ्चिद्दूरेऽवस्थिता उपरि स्थले निविष्टा चैषां गृहमाला दूरतो रमणीया प्रतीयते। विशेषतश्च-उच्चावचेषु जनशून्येषु गिरिशिखरेषु निराशं भ्रमन्ती लोकानां लोचनमाला यदा हि दूरतः सुनिविष्टामिमां वसतिलेखां विलोकयति तदा भृशमुत्कण्ठितेव प्रेमतस्तामिमामालोकयति। स्थानस्याऽस्या भामिन्यो जलाहरणार्थं नदीतटमुपयान्ति। तासां सहजा सरलता, नैसर्गिकी सुन्दरता च प्रदेशान्तरवासिनामतीव हारिणी भवति। देवप्रयागः सोऽयं तीर्थपुरोहितानां दुर्गमिव। एते हि प्रत्येकं प्रकारेण सर्वेषामपि यात्रिणां समुचितं साहाय्यं विदधति। वर्तमानकाले समयोचितां विद्यामधीत्य इमे पूर्वतोऽपि शिष्टाश्चतुराश्च सम्पन्नाः।

देवप्रयागादस्मात् 37 मीलदूरे रुद्रप्रयागः। किन्तु एकोनविंशतिमीलान्तरे मध्ये कीर्तिनगरमस्ति, यत्पर्यन्तं मोटरयानं गच्छति। इतोऽग्रे श्रीनगरपर्यन्तं पद्भ्यामेव गन्तव्यं भवति (अत्र हि गङ्गाया उभयतः पार्श्वे अतीवोच्चावचो मार्गः, अत एव तत्र सेतु निबध्य मार्गस्य सूल्लङ्घयतां कर्तुमिच्छन्ति देशाधिकारिणः। साम्प्रतं तु तत्र निमार्णकार्यं प्रचलत् परिलोक्यते)। श्रीनगरमिदं गढवालप्रान्तस्य लघुनगरं, यद्धि काश्मीरप्रदेशीय-श्रीनगराद् भिन्नम्। इदं हि उन्मुक्ते प्रान्तरे आवासितम्। अत्र हि भगवान् कमलेश्वरः शिवो यात्रिणां दर्शनीयः। बाबाकालीकमलीवालामहाभागस्य धर्मशाला अत्र यात्रिणां साहाय्यमाचरति। श्रीनगरात् ऊनषष्टि (59) मीलान्तरे ''चमोली'' पर्यन्तं पुनर्मोटरयानस्य मार्गः। श्रीनगरादग्रे मध्ये ''गुलाबरायचट्टी'' लभ्यते। मार्गेऽस्मिन् मुहुर्मुहुरारोहणं, पुनः पुनरवतरणमिति उच्चावचता प्राप्यते।

**रुद्रप्रयागः**

'गुलाबरायचट्टी' तः सार्द्धमीलान्तरे रुद्रप्रयागः प्रसिद्धं तीर्थम्। रुद्रप्रयागः अलकनन्दा-मन्दाकिन्योः सङ्गमोपरि अवस्थितः। सङ्गमे यात्रिणः स्नात्वा, शतशतसोपानैर्दुरारोहं तटमारुह्य भवगतः श्रीरुद्रनाथस्य दर्शनं कुर्वन्ति। अत्र हि सम्पूर्णैराभूषणैः सुशोभितं भगवतः शिवस्य मुखं यस्य दर्शनस्य महन् माहात्म्यं कीर्तयन्ति पौराणिकाः। अस्य समीप एव पितृणामुद्धारकारिणी वैतरणी अस्ति, यत्र पितृणामुद्धारकामनया पिण्डदानं कुर्वन्ति श्रद्धालवः। इतः पश्चिमदिशि गोस्थलं तीर्थं यद्धि गोपेश्वरनाम्ना विख्यातम्। तत्र हि एकं त्रिशूलमस्ति,

बलपूर्वकं यदि कश्चित् तत् त्रिशूलं परिचालयितुमिच्छेत् तर्हि तस्य स्पन्दनमात्रमपि न शक्यते कर्तुम्। किन्तु यदि भक्तिभावेन तत् स्पृशति तर्हि कनिष्ठिकयाऽपि तत् परिचाल्यते। तत्र कुन्दस्याऽप्येको वृक्षोऽस्ति यो हि प्रत्येकसमये पुष्पितस्तिष्ठति।

रुद्रप्रयागे अलकनन्दा-मन्दाकिन्योः सङ्गमः। तत्र हि अलकनन्दातो बदरिकाश्रमं प्रति, तथा मन्दाकिनीतः केदारनाथं प्रति मार्गः प्रयाति। केदारनाथदर्शनं विना बदरीनाथयात्रा न पूर्णा भवतीति प्रायः केदारेश्वरदर्शनं कृत्वैव जना बदरिकाश्रमं प्रयान्ति। रुद्रप्रयागात् 20 मीलपर्यन्तं सरलः (उच्चावचो न) मार्गोऽस्ति। इत एव एको मार्गः 'चमोलीं' मध्ये कृत्वा, साक्षाद् बदरीनाथं प्रत्यपि प्रयाति। किन्तु वयं सम्प्रति केदारेश्वरमार्गस्य वर्णनं कुर्मः। रुद्रप्रयागात् सप्तमीलान्तरे रामपुरग्रामः। ततोऽग्रे अगस्त्यमुनेराश्रमः, यत्र मुनेरस्य मन्दिरमस्ति। ततः किञ्चिद्दूरे गुप्तकाशी अस्ति यत्र भगवतः शङ्करस्य दर्शनं क्रियते। यावत्स्मरामि तावत् केदारनाथस्य तीर्थपुरोहितानामयमेव निवासभूमिः। केदारनाथस्य पौरोहित्यकार्यं सम्पाद्य शीते तीर्थपुरोहिता अमी गुप्तकाश्यामेव तिष्ठन्ति। काश्यामस्यां यात्रिणां कृते निवासस्य सौकर्यम्। बहव आपणाः सन्ति। प्रेषणालयः (डाकघर) अप्यस्ति। मन्दाकिन्याः परपारे 'ऊखीमठः' अस्ति। काशीतः सार्द्धमीलान्तरे 'नालाचट्टी' अस्ति। इत एव केदारेश्वरं प्रति गम्यते। केदारेश्वरात्पुनः अस्मिन्नेव च स्थाने परावृत्यते। 'नालातः' सार्द्धमीलत्रये 'व्यूंगचट्टी' प्राप्यते। अत्र हि काष्ठनिर्मितानि, नानारागै रञ्जितानि पात्राणि यात्रिणः क्रीणन्ति। 'व्योंग' तः मीलद्वये मैखण्डास्थले महिषमर्दिन्या मन्दिरमस्ति यत्र भगवत्या दर्शनं कुर्वन्ति यात्रिणः।

मीलद्वयान्तरे 'फाटा' स्थानमस्ति। इतो मीलत्रयान्तरे रामपुरमस्ति। रामपुरे कालीकमलीवालास्वामिनो धर्मशाला, अन्नक्षेत्रं चास्ति। यात्रिणः प्रायः प्रतिदिनव्यवहारादधिकं वस्तुजातमस्मिन् रामपुरे एव स्थापयन्ति, यतो हि केदारनाथात्प्रत्यावृत्य पुनरस्मिन् स्थाने एव आगन्तव्यं भवति।

**त्रियुगी नारायणः**

रामपुरग्रामात् सार्द्धचतुष्टयमीलान्तरे त्रियुगिनारायणतीर्थमस्ति। मध्ये 'पाटागाडस्य' सेतुरेको लभ्यते। सेतोरस्मात् उपरितः सपादमीलत्रयान्तरे (3 1/4 मील) भगवतस्त्रियुगि-नारायणस्य दर्शनमस्ति। सर्वोऽप्ययं मार्गः आरोहात्मक एव। अत एव त्रियुगिनारायणस्य मन्दिरं समुद्रतलादत्युन्नते प्रदेशेऽवस्थितम्। अत एवास्मिन् स्थाने शीतमत्यधिकं भवति। अत्र भगवतः अतिप्राचीनं मन्दिरमस्ति। नारायणस्य नाभेर्जलं प्रवहति, यद्धि बहिर्निस्सृत्य कुण्डे तिष्ठति। अत्र 'भगवत्याः पार्वत्याः विवाहकाले योऽग्निः प्रज्वालितः सोऽद्यापि होमकुण्डे प्रज्वलति' इति तीर्थपुरोहितानामुक्तिः। अत एव यात्रिणोऽस्मिन् अग्नौ हवनमपि कुर्वन्ति। अत्र ब्रह्मकुण्ड-रुद्रकुण्ड-विष्णुकुण्ड-सरस्वतीकुण्डमिति चत्वारो जलकुण्डाः सन्ति। एतेषु कस्मिंश्चित्स्नानम्, कस्मिंश्चित्तर्पणम्, कस्मिंश्चिच्च आचमनादिकं कर्तव्यं भवति। सरस्वतीकुण्डे पीतवर्णाः सर्पा जले भ्रमन्तो दृश्यन्ते, किन्तु ते स्वतः एव मनुष्येभ्यो दूरे

भवन्ति, न तेभ्यो भयस्यापेक्षा। नारायणमन्दिराभ्यन्तरे प्रकाशागमनस्य नास्ति मार्गः। अत एव प्रायोऽन्धकार एव भवति। विद्युद्दीपा टार्चादिद्वारा यात्रिणो दर्शनसौकर्यं लभन्ते। त्रियुगिनारायणस्य आरोहमार्गं प्रत्यारुह्य (अवतीर्य) मीलत्रयान्तरे गौरीकुण्डोऽस्ति। कुण्डस्याऽस्य जलमुष्णं तीक्ष्णं चास्ति। अस्य पर्यन्ततो मृत्तिका रक्तवर्णास्ति। कुण्डस्याऽस्य तटे गौरीश्वरस्य मन्दिरम् यस्य दर्शनं कृत्वा यात्रिणो मृत्तिकया शिरसि तिलकं धारयन्ति। गौरीतीर्थाद्दक्षिणदिशि एकक्रोशान्तरे वैनायकं द्वारमस्ति, यत्र भगवतो गणेशस्य दर्शनं कुर्वन्ति। स एवायं भगवान् गणेशो यो हि अङ्गरागं कृत्वा गात्रोद्धृतेन मलेन स्वहस्तेन निर्माय भगवत्या द्वारे धृतः। स्वयं च स्नानेच्छया अन्तः प्राविशत्। ततः पार्वती दर्शनेच्छया समागतेन भगवता शङ्करेण निरोधं कुर्वतस्तस्य बालकस्य शिरश्छिन्नं, पुनः पार्वत्यनुरोधेन हस्तिशिरः संयोजितं च। गौरीकुण्डादेकमीलान्तरे 'चीरवासा भैरवः'। अयमेव केदारक्षेत्रस्य रक्षकः कोट्टपालः। अमुं हि वस्त्रोपहारं दत्त्वा प्रीणयन्ति, अन्यथा सोऽयं केदारदर्शनपुण्यमपहरति। भैरवादेकमीलान्तरे ''भीमसेनशिला'' तत्समीपे भगवत्याः कालिकाया दर्शनम्। इमां प्रणम्यैव केदारक्षेत्रे व्रजन्ति यात्रिणः। गौरीकुण्डाच्चतुर्मीलान्तरे ''रामबाडा'' नामकं विश्रमस्थानमस्ति। इदं हि केदारक्षेत्रस्य सन्निहितमस्ति। केदारेश्वरे भयानकं शीतम्। अत एव प्रायो यात्रिणः प्रातः केदारनाथे गत्वा सायमस्मिन् स्थान एव प्रत्यावर्तन्ते।

**श्रीकेदारनाथः**

रामबाडास्थानामीलत्रयान्तरे भगवतः श्रीकेदारनाथस्य पावनं दर्शनम्। केदारनाथस्य मार्गः आरोहात्मक एव। केदारमन्दिरं समुद्रतलात् 11753 (सार्द्धसप्तशताधिक-एकादशसहस्र-''फिट'' समुन्नतम्)। अत एवात्र पूर्णं शीतम्। रामबाडास्थानात् मीलद्वयान्तरे देवदर्शनी (देवदिखनी) स्थानम्। अस्मात्स्थानाद् भगवतः केदारेश्वरस्य मन्दिरं, मन्दिरस्य विपुलश्चूडाप्रदेशश्च दृश्यते। भगवतः केदारनाथस्य मन्दिरं पाण्डवैर्निर्मापितम्। मन्दिरे भगवतः शङ्करस्य लिङ्गं पिण्डं वा नास्ति। किन्तु मध्ये उन्नता श्यामवर्णा एका शिला इवास्ति यस्या उपरि पूजया सह घृतमालिप्यते। (पुराणकथाऽऽधारेण अत्रत्याः कथयन्ति यत् महिषरूपस्य पृष्ठभागः अस्मिन् केदारेश्वरे। द्वितीयकेदारे (मध्यमहेश्वरे) नाभिः, तुङ्गनाथे बाहू। रुद्रनाथे मुखम्, तथा कल्पेश्वरे जटाः सन्ति। एते एव पञ्च केदाराः सन्ति)। नेपाले पशुपतिनाथनाम्ना शिरोभागोऽस्ति। अत्र हि (केदारनाथे) बदरीनाथपुरीतोऽप्यधिकं शीतम्। पुर्यामस्यां प्रेषणालयः (डाकघर) विद्युत्प्रेषणालयश्चास्ति। अतितुङ्गतया सेयं पुरी षण्मासान् यावत् हिमाऽऽच्छादिता तिष्ठति।

केदारेश्वरमन्दिरस्य समीपे एव ''उदककुण्डम्'' अस्ति, यत्र चरणामृताऽऽचमनस्य माहात्म्यमधिकं कीर्तयन्ति। अत्र भृगुपथ-मधुगङ्गा-क्षीरगङ्गा-वासुकिताल-भैरवशिलाप्रभृतीनि कतिचित्पूजास्थानानि सन्ति।

पुराणे प्रसिद्धमस्ति यन्महाभारतयुद्धे गोत्रहत्यापातकात्परं खिन्नाः पाण्डवाः पापक्षयनिमित्तं भगवन्तं शङ्करमविषयन्तः अत्राऽऽगच्छन्। अत्रागतान् तान् वीक्ष्य तेषां धैर्यपरीक्षार्थं

भगवानत्रापि धरायामन्तर्हितोऽभूत्। भूमौ प्रविशन्तं शिवमालोकितवन्तः पृष्ठानुगतास्ते पाण्डवाः। ततश्च भूमौ प्रविशतः शिवस्य पृष्ठभागं ते स्पृष्टवन्तः। पृष्ठभागस्य संस्पर्शेनैव ते गोत्रहत्यापातकान्मुक्ता बभूवुः।

तद्दिनादारभ्य भगवतः पृष्ठभागोऽत्र तिष्ठतीति पातकनिवृत्तये घृतेन विलिप्य वक्षसा सर्वेऽपि यात्रिणः स्पृशन्ति तमिमं भागम्।

शिवमन्दिरात्किञ्चिद्दूरे पूर्वदिशि हंसकुण्डोऽस्ति, यत्र हंसरूपं धृत्वा भगवान् ब्रह्मा समागतः। कुण्डोऽयं पितृणामुद्धारकारकः। अत एव यात्रिणः कुण्डेऽस्मिन् पितृभ्यः पिण्डदानं कुर्वन्ति।

**केदारनाथाद् बदरीनाथस्य मार्गः**

श्रीकेदारनाथाद् बदरीनाथदर्शनम् एकाधिकैकशतमीलान्तरे। केदारनाथदर्शनं विधाय बदरिकाश्रमयात्रार्थं पुनः ''नालाचट्टी'' स्थाने एव परावर्तनीयं भवति (यथा हि पूर्वं सूचितमपि)। गुप्तकाशीतो मीलत्रयान्तरे, एवं नालाचट्टीतोऽपि मीलत्रयान्तरे ''ऊखीमठः'' अस्ति। अस्मिन् मार्गे अर्द्धमार्गः पूर्वमवतरणात्मकः प्राप्यते ततो मन्दाकिन्याः सेतुमुल्लंघ्य अवशिष्टोऽर्धमार्गः (1 मीलात्मकः) आरोहात्मकोऽस्ति। तत आरोहमार्गं परिसमाप्य ''ऊखीमठः'' प्राप्यते। शीतकाले हिमैराच्छादिते केदारेश्वरे तस्य पूजा अस्मिन्मठे एव भवति। ''ऊखीमठः'' बाणासुरपुत्र्याः उषायाः (उषसः) मन्दिरम्। अत्र मन्दिरे अनिरुद्धस्य, चित्रलेखायाश्च (उषसः सख्याः) मूर्ती स्तः, ययोर्दर्शनं कुर्वन्ति यात्रिणः। समीपे एव ओंकारेश्वरस्याऽपि मन्दिरमवलोक्यते। अस्मिन् जनपदेऽपि प्रेषणालयः, शासकद्वारा परिचालितश्चिकित्सालयोऽप्यस्ति। वसतिरियं रमणीया, आपणा अपि सर्ववस्तूनामत्र विलाक्येरन्। अस्मात् स्थानात् किञ्चिद्दूरे मध्यमहेश्वरं गन्तुं मार्गोऽस्ति, यो हि आरोहात्मकः। मध्यमहेश्वरो द्वितीयकेदारेश्वरनाम्ना विख्यातः, यो हि पञ्चकेदाराणामन्यतमः। विशिष्टश्रद्धाशालिनः केचिदस्य महेश्वरस्य दर्शनं कुर्वन्ति।

**तुङ्गनाथः**

ऊखीमठात् सपादमीलत्रयोपरि गणेश (कन्था) चट्टी। एतदुत्तरं मीलत्रयोपरि ''पोथीबासा''। किन्तु मार्गे मीलद्वयोपरि ''ग्वालिया बगड'' एकं दर्शनीयं स्थानम्। पोथीबासातो मीलत्रयोत्तरं ''चोपता'' विश्रमस्थानम्। मार्गे आरोहणस्य परिश्रमो भूयान् भवति किन्तु मार्गे स्थाने स्थाने प्रस्रवन्तो जलनिर्झराः, नयनरमणीयानि वनानि च दृश्यन्ते। ''चोपता'' चट्टीतो मीलत्रयात्मकम् आरोहमार्गमुल्लङ्घ्य तृतीयकेदारस्य भगवतस्तुङ्गनाथस्य दर्शनं लभ्यते। अयं भगवान् अतितुङ्गे पर्वतशिखरेऽवस्थितः। मन्ये, अत एव भवेत्तुङ्गनाथ इति नामधेयम्। इह हि भयानकं शीतम्। यदा तु यात्रासमये वृष्टिरप्युपयाति तदा तु यात्रिणां प्राणपरीक्षणमिव। तदुपरि सङ्कटमिदं यत् आरोहात्मकेऽस्मिन् मार्गे वृक्षस्तावदेकोऽपि न लभ्यते। पङ्क्तीनामासां लेखको यदा स्वकीयेन संघेन सह तुङ्गनाथस्याऽऽरोहमार्गमुल्लङ्घयन्नासीत्तदैवाऽकस्माद्

वृष्टिरुपागात्। न केवलं जलवृष्टिरेव, अपितु सहैव करकावृष्टिरप्यभूत्। नासीन्मार्गमध्ये वृक्षः कश्चिद् यस्य व्यवधाने वराको मनुष्यः स्वात्मानं रक्षेत्। सवेगो झञ्झावातो मार्गमारोहतां पादौ इतस्ततः कम्पयति स्म। सार्थेऽस्मिन् वृद्धाः, अवरोधवासिन्यः स्त्रियः, स्तनन्धय एको बालकश्चासीत्। अत एव आरोहस्य मध्यभागे एव आकस्मिकमिममुपद्रवं प्राप्य महत् सङ्कटमुपातिष्ठत्। शीघ्रं मार्गोल्लङ्घनस्य प्रत्याशया त्वरितं चलन्तः सर्वेऽपि संघस्था मनुष्याः प्रायः पृथक्-पृथक् बभूवुः। वृद्धवयस्का एका पुरन्ध्री करकावर्षायां शीतेन कम्पमाना मार्ग एव निपपात। न चासीत्समीपे वृक्षपाषाणदिकमावरणाय किञ्चित्। किन्तु रक्षा इयमेवाऽऽसीद् यदिदानीं मार्गः स्वल्प एवावशिष्टोऽभूत्। अत एव एकः पुरुषः प्रधाव्य तुङ्गनाथमन्दिरपरिसरे प्रापत्। एकं च ''कण्डी'' वाहकमानीय, कण्डिकायां स्थापयित्वा तामिमां तुङ्गनाथसमीपे प्रापयत्।

बदरीनाथयात्रा प्रतिवर्षमेव समारोहेण भवति। किन्तु अस्मिन् वर्षे (सन् 1956) यात्रिणां प्रवाहस्तावता समारोहेण संघीभूतोऽभूद् यथा विश्रामस्थलीषु जनानां महाकष्टतोऽपि समावेशो दुष्करोऽभूत्। अत एव यथाकथञ्चित् तुङ्गनाथमन्दिरसविधे प्राप्तावपि निवासस्थानसमस्या कठिनाऽभवत्। प्रथमं तु शिखरदेशे आवासितस्य अस्य परितः परिधिरेव परिमितोऽभूत्। तदुपरि यात्रिणां संख्याबाहुल्यम्। ततोऽपि जलवृष्टिरासीत्। अत एव सर्वाण्यपि स्थानानि यात्रिभिरवरुद्धान्यासन्। किन्तु प्रारम्भादेव दीनसहायकः श्रीजगन्नायकः सङ्कटानि स्वत एव संहरति स्म। अत एव अत्रापि भगवान् पूर्वत एव मार्गद्वारमुद्घाटयति। आरोहमार्ग एव तीर्थपुरोहित एको मिलति स्म, यो हि पञ्चाम्बुविश्वविद्यालयस्य शास्त्री। संस्कृतभाषयैव संलपन् स हि निजपरिचयमदाद् यत्सः महामहोपाध्याय-श्रीगिरिधरशर्म-चतुर्वेद-महोदयस्य शिष्यो मैठाणीति गोत्राऽवटङ्कः। अत एव पंक्तीनामासां लेखकस्यास्य नाम श्रुत्वैव स हि अस्मत्सार्थस्य सहायकोऽभूत्। तेन हि आत्मविश्रामोचितमेकं स्थानमस्मत्कृते स्थिरीकृतम् यस्मिन् कटः प्रावृत आसीत्। अग्निश्च प्रज्वलन्निवारयति स्म मार्गजातं शीतसंघातम्। तत्प्रदत्तैः कम्बलैः कृतशीतावरणा सा रात्रिर्व्यतीयाव।

मैठाणीमहोदयेन यथानियमं व्यवस्थां कृत्वा भगवतस्तुङ्गनाथस्य कारितं दर्शनम्। विशालं शिवलिङ्गं श्यामवर्णम्। अन्येऽपि देवाः सन्ति दर्शनीयाः। अमृतकुण्डः, आक्रोशकुण्डश्चास्ति समीपे एव यत्र स्नानं तर्पणं च कुर्वन्ति यात्रिणः। अस्माकं सार्थेन शिवदर्शनं कृत्वा यथानियमं तीर्थपुरोहितादीनां पूजनमपि व्यधायि। सर्वकार्येभ्यो निवृत्त्य यथैवाऽग्रे प्रस्थानस्य प्रबन्धं कुर्मस्तथैव अतर्किता शोचनीयैका घटना समघटत।

अस्माकं संघे श्वासरोगिणी एका वृद्धाऽऽसीत्। एतावत्कालं सा हि यथावस्थितमुत्साहपूर्वं यात्रामकरोत्। किन्तु तुङ्गनाथस्य तुङ्गमिदं शिखरं समवाप्य, वृष्टिकरकावृष्ट्योः सम्मुखयुद्धे श्वासस्तस्याः प्रवृद्धिमगच्छत्। किन्तु धीरतया नैषा काञ्चिद् विकृतिमदर्शयत्। किन्तु भगवतस्तुङ्गनाथस्य दर्शन-पूजनादिकं कृत्वा, पुरोहितपूजामपि यथावद् विधाय, यथैव सेयं 'कण्डिकाम्' आरोहणाय उपसर्पति तथैव प्रोक्तमनया- ''मम चित्तं

सम्प्रति विकृतिमेति, शिरो धूर्णते।'' इत्युक्त्वैव सा भूमावस्वपत्। चक्षुषी उद्वृते अभूताम्। कतिपयक्षणैरेव सा लोकमिमं पर्यत्यजत्!! भगवतस्तुङ्गनाथस्यैव दर्शन-पूजन-प्रतीक्षायां सा जीवितमद्यावधि दधार। पुनः किमासीत्? सर्वेऽपि वयं तस्याः सम्बन्धिनः। अत एव अग्रे यात्राप्रबन्धं त्यक्त्वा स्वर्गताया एतस्याः शिवलोकयात्रायाः आनुषङ्गिकप्रबन्धे चिन्तिता अभवाम। आसीत्तस्मिन् दिने मेघाच्छन्नमम्बरम्। परितः शीतस्यासीत्साम्राज्यम्। अस्मिन् दुर्दिने कः कुर्यादन्नशुष्ककाष्ठादीनां प्रबन्धपूर्वकं स्वर्गताया और्ध्वदैहिककार्याणि? किन्तु मैठाणीमहोदयः सर्वमन्यत्कार्यं परित्यज्य एतस्या दाहकार्ये व्यस्तोऽभवत्। अस्माकं सार्थे एक एवाऽऽसीत्पुरुषः। कथमेकेन नदीतटपर्यन्तं भवेन्निर्हरणम्? किन्तु मैठाणीमहोदयः स्वयमपि संयुज्य निर्हरण-दाहादिकार्यं परिसमापयत्। किं विस्तरेण, दिनत्रयं तत्रैव निवासोऽभवत्। पुरोहितकर्मकाण्डिनामनुमत्यनुसारं दिनत्रयकार्यम् अस्थिसञ्चयादिकं तत्रैव निरवर्त्यत। केवलं प्रधान-प्रधानानि कानिचिदस्थीनि दशगात्रकृत्यार्थं नीत्वा, स्वर्गतायाः पिण्डदानाधिकारी भ्रातृव्यः (पत्युः भ्रातृव्यः) अग्रे यात्रामकरोत्।

**बदरिकाश्रमः**

उत्तराखण्डस्य यमुनावतरणम् (यमुनोत्तरी), गङ्गावतरणम् (गंगोत्तरी), केदारनाथः, श्रीबदरीनाथः इति चत्वारि प्रमुखतीर्थानि। परःसहस्राणि वर्षाण्यारभ्य धर्मप्रेमिणः श्रद्धालवः पर्वतस्य दुर्लङ्घ्यं मार्गमारुह्य तीर्थानामेषां यात्रां कुर्वन्ति। पूर्वं यमुनावतरणं दृष्ट्वा गङ्गावतरणे यात्रां कुर्वन्ति। ततो द्वयोरपि तीर्थयोर्यात्रां विधाय साम्प्रतं 'टेहरी' नगरे परावर्तन्ते। ततो मरुत्तर ('मोटर') शकट्या कीर्तिनगरम्, श्रीनगरम्, पश्यन्तो जनाः 'केदारनाथम्' पश्यन्ति। तां यात्रां सविधि समाप्य 'चमोली', 'पीपलकोटी' स्थानयोः मरुत्तरशकट्या 'ज्योतिर्मठम्' ('जोशीमठ') प्राप्नुवन्ति। इत एव स्थानात् बदरीनाथयात्रां चिकीर्षन्तो जनाः पद्भ्यां व्रजन्ति।

ज्योतिर्मठात् 'बदरिकाश्रमः' दशक्रोशान्तराले। मार्गमेनं दिनद्वये उल्लङ्घयन्ति। ज्योतिर्मठात् नव 'मीला'न्तरे 'पाण्डुकेश्वरः'। अत्र रात्रौ विश्राम्यन्ति यात्रिणः। सर्वविधा भोजननिवासादेः सुविधा चाऽप्यत्र। स्थानेऽस्मिन् महाभारतकालिकस्य महाराजस्य पाण्डोः स्मारकमेकं मन्दिरम्, यत्रानेकाः प्राचीनमूर्तयो विद्यन्ते। पाण्डुकेश्वरात् नातिविप्रकर्षे विनायकचट्टी, या हि यात्रिणां सौकर्याय साम्प्रतमेव प्रचलिता। पाण्डुकेश्वरात् बदरीकानाथधाम सार्द्धदश मीला'न्तरे। प्रभाते प्रस्थाय यात्रिणो मध्याह्ने बदरिकाश्रमं प्रायः प्राप्नुवन्ति। मार्गोऽयं तथा कठिनोऽपि नास्ति।

अलकनन्दायाः सेतोरग्रे 'बदरीनाथपुर्याः' प्रारम्भो भवति। अत्र हि रथ्याम् (बाजार) उल्लङ्घ्य बदरीनाथस्य मन्दिरम्, तत्सम्बद्धा धर्मशालाश्चावलोक्येरन्। अत्रत्या रथ्या यात्रिणां प्रायः सौकर्याय। चूर्ण- तण्डुल-घृत-शाकादीनि सर्वाण्येवाऽत्र लभ्यन्ते। वणिजो रात्रिविश्रमाय स्थानम्, किञ्चिद् द्रव्यप्रदाने आस्तरणावरणाद्यर्थं कम्बलादीन्यपि प्रददति। पर्वतोत्पन्नाः मूल-कन्दादय औषधयश्चाऽप्यत्र प्राप्यन्ते।

**तप्तकुण्डः**

बदरीनाथमन्दिरस्यैव समीपे तप्ततोयस्य अनेकानि स्रोतांसि सन्ति। तान्येकत्र कृत्वा 'मन्दिर-समित्या' एकः सुन्दरः कुण्डो निर्मितो यत्र यात्रिणः सुखेन स्नान्ति। कुण्डस्य समीप एव अलकनन्दा प्रवहति, किन्तु नितान्तशीतलेऽस्याः सलिले कश्चिदेव स्नाति। किञ्च तप्तकुण्डस्य स्नानमेवाऽत्र माहात्म्याय। रोगनिवारकमपि चात्र स्नानम्। पर्वतस्रोतोनिःसृतं तदिदमुष्णं जलं बहूनां रोगाणां प्रशमाय। तप्तकुण्डस्य समीपे एव भगवतो बदरीनाथस्य मुख्यः पूजकः (रावलजी) निवसति, यो हि दक्षिणप्रान्तीय 'नम्बूद्रि' ब्राह्मणजातीयः। महाभागोऽयं विनम्रः, आचारवान्, मृदुभाषी चास्ति। मन्दिरस्य सर्वोऽपि प्रबन्धः एतस्यैवाधीनः। अयमस्ति नैष्ठिक-ब्रह्मचारी। परं साम्प्रतं श्रूयते यत्-बदरीनाथमन्दिरस्य सर्वोऽपि प्रबन्धः, व्यवस्था च उत्तरप्रदेशीयसर्वकारस्य कार्यकर्तृभिरेव क्रियते।

भगवतः पूजायाः प्रकामं विस्तृतः कार्यक्रमः। सन्ति एतस्य पूर्वतो नियता नियमाः। धनिनो मानिनश्च श्रद्धालवः पूर्वतो नियतं द्रव्यराशिं 'भाण्डागारे' समर्प्य भगवतः पूजादिषु विविधकार्येषु सम्मिलिता भवन्ति। साधारणतया तु मन्दिरे दर्शनं प्रत्येकपुरुषः कर्तुं शक्नोति। मन्दिरस्य पार्श्वत एवैको मार्गः 'तिब्बत' देशं प्रति प्रयाति। उत्तराखण्डयात्रायाः अनुक्रमे बदरीनाथयात्रा चरमं प्रस्थानं परिगण्यते, ततश्च यात्रिणः स्वगृहान् परावर्तन्ते। प्रायो मासमेकं हिमाचलस्थतीर्थान्यवलोक्य वयमपि स्वगृहान् परावृत्ताः।

***

# विश्वस्य असाधारणं तीर्थस्थलं भगवान् श्रीअमरनाथः

(1)

दिव्याभिश्चन्द्रकलाभिः सह वर्धनक्षयणशीलं भगवतः श्रीअमरनाथस्य 'हिमशिवलिङ्गं' पुण्येऽस्मिन् भारते भक्तजनानां भवभयविमुक्तये सर्वतो महनीयमनुपमं दर्शनीयम्। तदिदं गगनचुम्बिनां काश्मीरपर्वतानां मध्ये सागर-तटात् अष्टादशसहस्र ''फुट'' तुङ्गे शैलशृङ्गे समवस्थितम्। श्री अमरेश्वरस्याऽस्य साधारणतया यस्यां कस्याञ्चन पूर्णिमातिथौ दर्शनं कर्तुं शक्यम्, किन्तु श्रावणपूर्णिमायाम् दर्शनस्य महत्वं विशेषतोऽवगम्यते धार्मिकैः। अत एव जम्बू-काश्मीरयो राज्यसर्वकारपक्षात् पूर्णिमायामस्यां भक्तयात्रिणां सुखसुविधायै प्रबन्धविशेषो विधीयते। काश्मीरमहाराजस्य स्वीयविभागस्य प्रबन्धकानां निरीक्षणे विशिष्टः प्रबन्धो भवति। तत एव सेयं यात्रा प्रतिवर्षं सुव्यवस्थितरूपेण श्रावणपूर्णिमायामेव भवति। सहस्रशो यात्रिणो दूरदूरतोऽस्मिन्नवसरे भगवतो दर्शनेनाऽऽत्मानं पावयन्ति। रम्यस्थल-दर्शन-कौतुकिनां वैदेशिकानामपि कृते तदिदं विशेषतः आकर्षकं नूनम्।

श्रीअमरनाथस्य पावनी सेयं गुहा श्रीनगरात् 88 मीलदूरे, सागरतलाद् 18000 'फुट' तुङ्गे शैलशृङ्गे विराजमाना। 'भृङ्गीशसंहितायां दशमपटले भैरव-भैरवी-संवादे अमरेश्वरस्य कथा विस्तरतो वर्णिता। तस्याः सारः-आदौ परब्रह्मणः सकाशात् नियतिरुत्पन्ना। तस्याः सकाशादेव देव-मनुष्य-राक्षस-गन्धर्वप्रभृतिः चतुर्दशप्रकारा सृष्टिरुद्भूता। यदा सेयं सृष्टिः सर्वाऽपि मृत्युना आक्रान्ता, तदा सर्वेऽपि सम्भूय भगवतः शङ्करस्य शरणं ययुः। विविधाभिः स्तुतिभिः स्तूयमानो भगवानाशुतोषस्तानुवाच - ''कथं भवन्तः समुपगताः, किं च सम्प्रति वाञ्छथ''। देवैरखिलैर्मृत्योर्भयमावर्णितम्। तदा शम्भुः स्वशीर्षस्थां चन्द्रकलामामोटयामास। शिरःशीर्षस्थचन्द्रकलातः सुपवित्रा 'अमरावती' सरित्प्रावहत्। ततो भगवता निजस्य लिङ्गरूपमाविष्कृतम्, यद्धि हिमरूपं स्वल्प एव समये जलरूपमभवत्। ततः खिन्नैर्देवैः पुनर्भगवतः स्तुतिरारब्धा। ततः प्रसन्नेन गङ्गाधरेणाज्ञप्तम् - 'इतः प्रभृति ममेदं लिङ्गम्' 'अमरेश्वर' नाम्ना प्रसिद्धं स्यात्। ये किल तदिदं-द्रष्टुं शक्नुयुस्ते प्राप्नुयुरमरपदम्।

श्रीअमरनाथस्य यात्रा रक्षाबन्धनात् पूर्वतः कतिचिद्दिनेभ्यः प्रागेव श्रीनगरात् 'शिवध्वज' (छड़ी') रूपे प्रचलति। यात्रायामस्यां प्रायशः साधवः संन्यासिन एव बहुलायन्ते। साधारणजनास्तु 'बस' द्वारा 'पहलगाँव' स्थाने (60 मील विप्रकृष्टे) शिवध्वजयात्रायामस्यां सम्मिलन्ति। अमरनाथयात्रायास्तदिदं 'प्रथमं' विश्रमस्थलम्। तदिदं समुद्रतलात् 72000 (फुट) उच्चे पर्वतशृङ्गेऽस्ति। इतोऽग्रे न केनचिद् यानेन गन्तुं शक्यम्। सर्वेऽपि पदचारेणैव गन्तुमभिमन्यन्ते। अशक्त प्रायः घोटकेन, 'दण्डिकया' ('डाँडी') वा अग्रे व्रजन्ति।

'पहलग्राम'तो द्वितीयं विश्रमस्थलं 'चन्दनबाड़ी'ति, यद्धि अष्ट 'मील' दूरे। 'मील'द्वयान्तरे 'लिदरघाटी'। तदिदमतिरमणीयं प्राकृतस्थलम्, अस्याऽधस्तादेव लिदरनदी

प्रवहति। एतस्याः प्राक्तनं नाम 'नीलगङ्गा', यस्यां स्नानमतिपवित्रं परिगण्यते। 'चन्दनवाटी' स्थलपरिसर एकमीलात्मकः, यो हि समुद्रतलात् 9500 'फुट' समुन्नतः। एतस्य प्राकृतिक-सौन्दर्यमत्यन्तमाकर्षकम्। अष्ट 'मीला'न्तरितं पर्वतमार्गं समुल्लङ्घ्य यात्रिणो यदा स्थानेऽस्मिन् प्राप्नुवन्ति, तदा ते महतीं सान्त्वनां प्रमोदं च लभन्ते। मार्गश्रमं ते सहसैव विस्मरन्ति। द्वितीयदिने सहस्रसहस्रायात्रिणां दलमिदं 'शेषनाग' ह्रदस्थलाभिमुखं भवति, यद्धि चन्दनवाटीतः सप्त 'मील' दूरस्थम्। किन्तु मध्ये 'बिस्सू घाटी' आरोहणमतिक्लिष्टम्। मार्गोऽत्यन्तं सङ्कीर्णः। तिर्यग्वक्रा गमनपथाः सन्ति, किन्तु श्रद्धालवो यात्रिणः 'हर हर महादेव', 'जय अमरनाथ स्वामिन्' इति भक्तिनादैः एकादश-सहस्र-'फुट' समुन्नतं शिखरं श्रद्धाबलाऽवलम्बनेन सम्यक् समारोहन्ति।

एतस्याऽऽरोहस्योत्तरम् अवतरणमुपलभ्यते। तदुत्तरं पुनः कठिनतममारोहणं कर्तव्यं भवति। इदानीं 13000 'फुट' समुन्नतौ (शेषनागह्रदः) समुपलभ्यते, यस्य हि प्राकृतिकसौन्दर्यमतिमनोहारि। एतस्य पृष्ठे त्रिभिः शिखरैर्मण्डितो महानेकः पर्वतः। तत्रत्य-पौराणिक-परम्परानुसारं शिखराणीमानि ब्रह्म-विष्णु-महेशानां प्रतीकभूतानि।

एतदनन्तरम् 'महाङ्कुश' पर्वतस्य सुमहानारोहः, यो हि 14000 'फुट' समुन्नतः। एतदनन्तरं पुनः अवरोहणम् ('उत्तरार्द्ध') पञ्च-'मील'-परिमितं प्राप्यते। इतोऽग्रे पञ्चतरणीनामकं विश्रमस्थलमुपलभ्यते, यद्धि प्राकृतशोभया सुतरां रमणीयम्।

पच्चतरणीमुल्लङ्घ्य सर्वेऽपि यात्रिणः साम्प्रतं भगवतः श्रीअमरनाथस्य दर्शनाय परमामुत्कण्ठामावहन्ति। भगवतः श्रीअमरनाथस्य पवित्रां गुहामभिमुखीकृत्य नानाविधैर्जयजयकारैस्ते अग्रसरा भवन्ति। किन्तु सोऽयं मार्गो 'मील' पर्यन्तमतिसङ्कीर्णः, स्थाने स्थाने तिर्यग्वक्रः क्लेशकरश्चास्ति। एतदग्रे 'मील'पर्यन्तं दृढतरः(ठोस) हिमव्याप्तो मार्गः। इमं पन्थानमुल्लङ्घ्य भगवतः श्रीअमरनाथस्य पावनी गुहा दृशोर्गोचरीभवति। वामभागे चास्य पर्वतात्प्रपतन्ती अमरावती नदी समवलोक्यते।

स्थलेऽस्मिन् किञ्चिद्विश्रम्य श्रद्धालवो यात्रिणः 'अमरगङ्गायाम्' (अमरावती) स्नान्ति। ततः पवित्रीभूता यात्रिणो भगवतः श्रीअमरनाथस्य पावनीगुहां प्रविशन्ति। अभ्यन्तरे प्रविष्टैर्यात्रिभिर्भगवतः श्रीअमरनाथस्य रमणीयतमस्य सुप्रभावशालिनश्च हिमलिङ्गस्य दर्शनं क्रियते, यद्धि सुतरां कान्तियुक्तम् पञ्च 'फुट'-समुन्नतं चाऽस्ति। एवमेव दक्षिणभागे षट्'फुट'समुन्नतः, वामभागे च एको लघीयान् हिमपिण्डः श्रद्धालुभिः समवलोक्यते, यो हि क्रमशः श्रीगणेशः, श्रीपार्वती चेति, सश्रद्धमखिलै प्रणम्यते।

चमत्कारश्चायं सर्वैरवलोक्यते यत् त्रयोऽप्यमी हिमपिण्डाः यथा यथा चन्द्रमाः सोऽयमभिवर्द्धते तथा तथा अमी अपि वर्धन्ते। यथा यथा च सोऽयं चन्द्रः क्रमशः क्षीयते तथा तथा त्रयोऽप्येते ह्रस्वा भवन्ति।

सर्वथा नमोऽस्मै भगवते अमरेश्वराय अमरनाथाय॥ शुभम्॥

***

# भगवतः श्रीकृष्णचन्द्रस्य लीलाभूमिः श्रीवृन्दावनम्

श्रीवृन्दावनं भारतवर्षस्य तादृक् पावनस्थलमस्ति यस्य नामश्रवणेऽपि भावुकानां हृदये गद्‌गदता भवति, यस्य च दर्शनेन प्रत्येकमास्तिकः पुरुषः श्रद्धयाऽवनतो भवति। प्राचीना प्रसिद्धिरस्ति यत्–श्रीवृन्दावने समागत्य भक्तकविशिरोमणिः श्रीतुलसीदासः तादृक् प्रभावितः समभूद् यद् वृन्दावनस्य सम्मुखे वैकुण्ठमपि लघु लक्ष्यते स्म। महाभागेन अनेन बुद्धितुलया सन्तुलय्य प्रोक्तम्–

**'वृन्दावन वैकुण्ठ स्यों तोल्यो तुलसीदास।**
**गरुओ हतो सो भुईं रह्यो हलको उठ्यो अकास।''**

[बुद्धितुलया तोलनेन गुरुतरं वृन्दावनं निम्ने (भूमौ) अतिष्ठत्, लघुतरं वैकुण्ठम् उपरि आकाशे अगच्छत्।] पौराणिकान् भक्तकवीनारभ्य अद्यपर्यन्तं ये ये कवयः समभवन्, तेषां हि वृदावनमालम्ब्य नानाविधाः सूक्तयः सुप्रसिध्यन्ति। प्राचीनसाहित्यात् प्रतीयते यत्पुण्या सेयं व्रजभूमिः द्वयोर्भागयोर्विभक्तेवाऽऽसीत् यस्यां हि द्वादशवनानि, चतुर्दश च उपवनान्यासन्, ययोर्नामनी बृहद्‌वनम् वृन्दावनं चेत्यास्ताम्; श्रीयमुना च द्वयोरनयोर्मध्यगता बभूव।

श्रीमद्‌भागवतात्प्रतीयते यत् प्राक्तनं वृन्दावनमद्यतनाद् वृन्दावनात्सुविस्तृतं, सङ्कुलं चासीत्। तस्मिन् समये वृन्दावनं स हि समग्रोऽपि भागः परिगण्यते स्म, यत्र हि अद्यतनवृन्दावनादतिरिक्तः श्रीगोवर्द्धनः, काम्यवनम्, वरसानुः (बरसाना), नन्दग्रामप्रभृतयो वसतयः आवासिताः सन्ति। पुराणेषु–वृन्दावने गोवर्द्धनपर्वतस्य स्थितिः सुस्पष्टाऽस्ति, यो हि वर्तमानवृन्दावनात् कतिक्रोशान्तरितोऽस्ति। प्रकारेणानेन क्षेत्रदृष्ट्या वर्तमानकालिकं वृन्दावनं पुराणकालिकवृन्दावनस्य खण्डभूतमेव परिगण्येत नूनम्।

वर्तमानवृन्दावननाम्ना यो भूभागोऽस्माभिः परिज्ञायते, तस्य एवंरूपे स्थापनायाः श्रेयो महाप्रभो श्री चैतन्यदेवस्याऽस्ति। चैतन्यमहाप्रभुर्यस्मिन् समये श्रीवृन्दावनपरिसरे समागतवान् भगवतः श्रीकृष्णस्य लीलास्थलानि चाऽवलोकितवान् तदा स हि वृन्दावनस्य तरुलतावल्लरीषु तथा प्रभावितः समभूद् यथा तस्य देहाऽनुसन्धानमपि नासीत्। कालियह्रदस्य 'कालीदह' श्रीयमुनायाः उत्तालतरङ्गाणां लीलाखेलमवलोक्य उन्मदिष्णुः स हि यमुनायामेव झम्पामदात्, यत्र तस्य सहचरैस्तस्य शरीररक्षा व्यधीयत। श्रीचैतन्यदेवो व्रजभूमेः सर्वेष्वेव स्थलेषु यात्रामकरोत् परन्तु वर्तमानकालिकं वृन्दावनमेव महाप्रभोरस्य सर्वापेक्षयाऽधिक–माकर्षकमभूत्। तस्य व्रजप्रवासस्य भूयानवकाशः श्रीवृन्दावने एव व्यतीतोऽभूत्। तस्मिन् समये वृन्दावनमिदं घनघोरविपिनमभूत्। अत एव रात्रिसमये श्रीचैतन्यदेवस्याऽनुचरास्तमेनम् 'अक्रूरघट्टम्' अनयन्। किन्तु महाप्रभुः प्रातरुत्थायैव पुनः श्रीवृन्दावनाभिमुखोऽभवत्, यत्र लतावृक्षाणामालिङ्गनं विधाय श्रीकृष्णसन्निधानस्येव सुखमविन्ददसौ।

सुखावहः संयोग सोऽयमभूद् यत् श्रीचैतन्यदेवस्यानन्तरं तस्य शिष्याः श्रीरूपसनातनगोस्वामिप्रभृतयोऽपि श्रीकृष्णानुरागाद् वृन्दावनमुपगतास्तदा ते अत्रैव सुभृशमानन्दिता भूत्वा कीर्तनसेवनादिना भूमिमिमाममण्डयन्। तदनन्तरं क्रमशो मन्दिराणामपि

निर्माणमत्र प्रारभ्यत। शनैः शनैर्भक्तानामत्र निवासः प्रावर्द्धत। प्रयाति समये सेयं स्थितिरभूद् यद् य एव श्रीकृष्णभक्त्यानुप्राणितोऽभवत्, स एव वृन्दावने वसतिमाकांक्षति स्म। स्वामी श्रीहरिदासः, महाप्रभुः श्रीहितहरिवंशः, 'कृष्णगढ़' नरेशो नागरीदासः, ओरछाराजपुरोहितः कविवर-हरिराम व्यासः, मुहम्मदशाहस्य (रंगीले) 'मीरमुंशी' घनानन्दसदृशाः अनेके भक्ता गृहं विहाय वृन्दावनमाश्रयन्। सेयं परम्परा उत्तरोत्तरमवर्द्धत। आम्बेरधराधीशस्य वर्तमानजयपुर-नगर-प्रतिष्ठापकस्य महाराजाधिराज-श्रीजयसिंह-देवस्य परमसम्मानितः श्रीमान् देवर्षि श्रीकृष्णभट्टकविकलानिधिरपि श्रीजयसिंह-ईश्वरीसिंह-माधवसिंहानां शासनकाले सर्वविधसम्मानं राज्ञां परस्परकलहादिकं च सर्वमनुभूय अन्ते श्रीवन्दावनक्षेत्रे विश्राममाकांक्षत। किन्तु माधवसिंह-महाराजेन स्नेह-गौरव-विश्रम्भादिकारणान्नायं बहिर्गन्तुमन्वमन्यत। अत एव निर्विण्णेन श्री कविकलानिधिमहाभागेन 'पद्ममुक्तावल्याम्' प्रोक्तम् -

**''मिथ्याकथन-दुरत्यय-नृपवर-कृतरक्षण-व्यथादुष्टः।**
**हा वृन्दावन! भवता सम्प्रति दूराद्विमुक्तोऽस्मि॥''**

अद्यापि सेयं यथावत् प्रवर्तमानाऽस्ति। एवं किलं तदिदं वृन्दावनं शनैः शनैः नगरस्य रूपमधारयत्। वर्तमानमिदं वृन्दावनं भगवतोः श्रीराधाकृष्णयोश्चरणचिह्नाङ्किता तयोर्विहारभूमिः, रसकेलिस्थली, रासक्रीडास्थलीरूपे सर्वतः सुप्रसिद्धमस्ति। वृन्दावनविषये सर्वतः सुप्रसिद्धं यद्वृन्दावने एकमपि ईदृशं भवनं नास्ति यत्र भगवतः श्रीकृष्णस्य मन्दिरं न भवेत्। वास्तवे वृन्दावनस्य प्रत्येकं गृहे भगवतः सेवापूजा निर्विशङ्कं शक्यते विलोकयितुम्। भगवतः श्रीकृष्णस्य नानाविधलीलासम्बन्धिन्यः अनेकाः स्थल्यो भक्तिमार्गस्याऽऽचार्यैः स्थापिताः सन्ति, या हि सर्वेषामेव श्रद्धाभक्त्योर्भाजनानि सन्ति। एतदतिरिक्तम्-वृन्दावने भक्तकवीनाम् प्राचीनकलाकाराणां, भक्तमहात्मनामनेकाः कुट्यः विश्रामस्थलानि समाधिस्थानानि च विद्यन्ते, येन हि न केवलं भक्तानाम्, अपितु कलाप्रेमिणाम्, साहित्यकाराणां चापि तदिदं तीर्थस्थलमस्ति।

लोकरङ्गमञ्चस्य दृष्ट्या वृन्दावनं रासमण्डलीनां निकेतनं परिगण्यते। साहित्यसाधकानां दृष्ट्याऽपि अत्रत्येषु प्रत्येकं देवमन्दिरेषु, प्राचीनानां गोस्वामिनां भवनेषु, पारम्परिकपण्डितानामालयेषु हस्तलिखितानां ग्रन्थानामेवंविधानि भाण्डागाराणि निह्नुतानि सन्ति, येषां दर्शनेन, ग्रन्थानामध्ययनेन च बहूनां विद्याव्यसनिनां भूयान् कालः साम्प्रतमपि सम्यक् संव्यतीयेत। श्रीवृन्दावनस्य महत्त्वमनेकदृष्ट्या अनेकविधं प्रतीयेत, किन्तु जनसाधारणस्य कृते नगरस्याऽस्य सर्वप्रमुखमाकर्षणम् अत्रत्यानि मन्दिराणि। वृन्दावनस्य प्राचीनमन्दिरेषु-श्रीगोविन्द-गोपीनाथ-मदन-मोहन-राधावल्लभ-युगलकिशोराणां महान्ति मन्दिराणि। मन्दिराण्येतानि रक्तपाषाणनिर्मितानि, कारुकार्यकृते सर्वप्रशसंनीयानि। एतेषु सर्वश्रेष्ठं स्थापत्यं श्रीगोविन्दमन्दिरस्यास्ति। तदिदं मन्दिरम् आम्बेरनरेशेन श्रीमानसिंहमहाराजेन निजगुरोः गोस्वामिश्रीरूपस्याऽऽज्ञया निर्मापितम्। स्थापत्यदृष्ट्या उत्तरभारतीयमन्दिरेषु तदिदमद्वितीयं परिगण्यते। एतस्य निर्माणं सन् 1590 वर्षे पूर्णमभूत्। उत्कृष्टकलापूर्ण एतस्योपरितनो भागो विविधचित्राङ्कितत्वेन दर्शनीयोऽस्ति। मन्दिरस्य विभिन्नेषु भागेषु विभिन्नमूर्तीनां सौन्दर्यस्य

तत्सम्बन्धि-नानामुद्राणां च शिल्पकला वर्तमानसमयेऽपि कलामार्मिकाणां सुतरां विस्मापयित्री। एतस्मिन् प्रतिष्ठितः श्रीगोविन्दस्य श्रीविग्रहस्तु यवनेभ्यो रक्षानिमित्तं स्थानादस्मात् जयपुरे नीतः, यो हि राजहर्म्यमालायाः सम्मुखस्थे विशाले मन्दिरे सम्प्रति विराजते, यस्य दर्शनार्थं कालिकाता-विहार-वृन्दावनादि-प्रदेशेभ्यः शतशो वङ्गीयभक्ताः प्रतिवर्षं समायान्ति। 15, 20 तमशताब्द्योः निर्मितानि बहूनि मन्दिराणि सन्ति, किन्तु सर्वेष्वेतेषु विशालतावैभवादीनां दृष्ट्या श्रीरङ्गमन्दिरं सर्वप्रमुखं परिगण्यते। एतद्धि मथुरानगरस्थेन श्रेष्ठिलक्ष्मीचन्द्रेण मद्रासप्रदेशीयश्रीरङ्गमन्दिरस्यानुकृत्या निर्मापितभूत्। मन्दिरेऽस्मिन् 50 'फुट' उन्नतः सुवर्णस्य महान् स्तम्भः अत्रत्यवैभवस्य प्रतीकमिव प्रकाशते। मन्दिरेऽस्मिन् प्रायः उत्सवा भवन्ति। सप्तभिः आवरणैः (परकोटा) परिवेष्टितं तदिदं दुर्गमन्दिरं रामानुजसम्प्रदायस्य सर्वप्रमुखं केन्द्रमिव विभासते।

द्वितीयं प्रमुखमन्दिरं तरङ्गायितानां मर्मरपाषाणस्तम्भानामुपरि राजहर्म्यमिव सुशोभते, यद्धि लखनऊनगरस्य कुन्दनलाल-फुन्दनलालशाह-महोदयाभ्यां निर्मापितम्। द्वावपीमौ अवधनवाबानां सम्मानितौ, अतिपरिष्कृत-रुचिशालिनौ धनिकावास्ताम्। यौ हि श्रीकृष्णभक्तया अनुप्राणितौ, अन्ते श्रीवृन्दावने एव निवासमकल्पयताम्। आभ्यां भक्तिविषयिणी अतिमधुरा हिन्दीकाव्यरचनाऽपि कृताऽभूत् या हि ललितकिशोरी-ललितसरसमाधुरी-नाम्ना प्रख्याता। १९९६ तमे ख्रिष्टीयवत्सरे ग्वालियरनरेशेन निर्मापितं ताम्रशिखरमन्दिरम्, लालाबाबूमन्दिरम्, राधादामोदरमन्दिरम्, राधावल्लभ-राधागोपाल-दाऊजी, गोपेश्वर-महादेव-मन्दिरम् एतत्प्रभृतीनि वृन्दावने प्रमुखानि परिगण्यन्ते।

परमेषु दिनेषु वृन्दावने सर्वतोऽधिका यस्य मान्यता तद्धि 'श्रीबाँकेबिहारी' मन्दिरम्। मन्दिरेऽस्मिन् भगवतो मूर्तिरतिमनोहारिणी। सोऽयं श्रीविग्रहः हरिदासस्वामिना निजनिवासस्थले 'निधिवने' प्राप्त इति प्रसिद्धम्। एतदतिरिक्तम्, लतापताकाभिराकर्षकतमं 'निधिवनं' 'सेवाकुञ्जः' चापि दर्शनीयतमः। निधिवनं स्वामीश्रीहरिदासमहाभागस्य निवासः। सेवाकुञ्जस्य वर्तमानरूपे स्थापना श्रीहितहरिवंशमहाभागेन अकारि। भक्तानां साम्प्रतमपि भावना यत् रात्रौ नित्यं भगवान् श्रीकृष्णो रासलीलां विधत्ते। अत्र मयूरा वानराश्च सर्वतोऽधिकाः क्रीडन्ति।

एतदतिरिक्तम् -भगवतः श्रीकृष्णस्य लीलास्थलेषु वंशीवटः, शृङ्गारवटः कालियह्रदः, चीरघट्टः, ब्रह्मकुण्डः, धीरसमीरः, रासमण्डलम्, इत्यादीनि स्थलानि विशिष्योल्लेखनीयानि यत्र हि प्रत्येकं भक्तो मस्तकमानमय्य हृदयोल्लासमाप्नुवन् जीवनस्य धन्यतां मन्यते। एवं किल तदिदं वृन्दावनधाम मथुरातः क्रोशत्रितयान्तराले (६ मील) समवस्थितम्, जनसंख्यायां स्वल्पमपि सत् निजमहिम्ना नूनमद्वितीयमेवाऽस्ति। श्रीवृन्दावनेऽस्मिन् वर्तमानकाले ब्रह्मचारिमहाभागस्य शिष्येण वैष्णवशिरोमणिना जयपुरमहाराजाधिराजेन श्रीमाधवसिंहदेवेन निर्मापितं प्राचीनवृन्दावनपरिसरे निर्मितं विशालं तन्मन्दिरमपि धाम्नोऽस्य शोभायै, यस्य हि शिल्पकार्यं समस्तेऽपि भारते प्रशंसनीयं यस्य च विशालः प्रारूपो दूरत एव चक्षूंषि कर्षति।

***

# निरूपणात्मका निबन्धाः

१. मानवसभ्यतायां जीवनस्य किमुद्देश्यं स्यात् ?

२. वर्तमानयुगस्य परीक्षाप्रणाली च संस्कृतशिक्षा च

३. निबन्धलेखस्य विराट् प्रवाहः

४. लिपिविषये निवेदनम्

# मानवसभ्यतायां जीवनस्य किमुद्देश्यं स्यात् ?

पूर्वपश्चिमादिषु सर्वेष्वेव देशेषु शिक्षिता निजजीवनस्योद्देश्यं स्वस्वमत्यनुसारं स्थिरीकुर्वन्ति। तत्तत्साहित्यानि हि समुपदिशन्ति मानुषं यत्स कर्तव्यपथान्न किञ्चिदपि विचलेत्। वयं सर्वेऽपि स्वजीवनं व्यतिगमयन्तो यत्किञ्चित्कार्यमवश्यं कुर्मः कर्तुं वा विवशा भवामः। जगन्मात्रस्य हिताय प्रवर्तमानानि विश्वसाहित्यानि (गीतादीनि) सोच्चैर्घोषमाघोषयन्ति– 'न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।' परं यदि शास्त्रनिकषे तत्कार्यं परीक्ष्यते तर्हि परिज्ञातं भवेद् यत् तत्कार्यं सर्वात्मना न निर्दोषं परिगण्यते। प्रत्येक मनुष्यः स्वकर्तव्यपथात्किञ्चित्किञ्चित् विमुखो वर्तते। हन्त! तर्हि किं सर्वेऽपि मनुष्याः कर्तव्यमार्गतो विभ्रष्टाः सन्ति? आम्, यदि सत्योत्तरश्रवणे न कश्चित्सङ्कोचस्तर्हि स्पष्टमहं वक्ष्यामि यत्सर्वैऽप्यधिकांशेन कर्तव्यविभ्रष्टाः सन्ति। सभ्यमात्रस्य प्रधानं प्रश्नोऽस्ति, वयं कस्य कृते जीवामः? अस्माकं जीवनस्य किं लक्ष्यम्? किं चास्माकं हितानुबन्धि कर्तव्यं भवेत्?

संसारस्य निखिलान्यपि कार्याणि सम्भवन्ति देशकालानुसारीण्येव। अत एवास्माकं जीवनस्योद्देश्यमेवविधं तु न कदाचित्सम्भवेद् यद् यस्य पूर्तये जगदिदमयोग्यं भवेत्। यथा हि मत्स्यस्य जीवनयात्रायां किञ्चिदपि कर्तव्यं तथा न भवितुमर्हति यस्य हि सम्बन्धो जले न भवेत्, यच्च न शक्येत जले सम्पादयितुम्। एवमेव यदा वयं संसारे निवसामस्तर्ह्यस्माकं जीवनस्योद्देश्यं तादृशमेव भवितुमर्हति यस्य पूर्तिः संसार एव सुसम्भवा। किञ्चमानवसृष्टिरनादि-कालात्। अनन्तकालपर्यन्तं च परिचलेदग्रेऽपि। अत एवास्माकमुद्देश्यमेवंविधमेव सम्भवेद् यस्य पालनं वयं प्रत्येकसमय एव शक्नुयाम् कर्तुम्। नैवंविधं कार्यमस्माकं जीवनस्य लक्ष्यं भवितुमर्हति यस्मिन् हि समयस्य परिवर्तनं, राष्ट्रसम्बन्धिन्य उत्क्रान्तयो वा बाधिकाः स्युः। अत एव सर्वमिदं लक्ष्यीकृत्य साम्प्रतं समीक्षणीयं भवेद् यदस्माकं जीवनस्योद्देश्यं किं वा भवितुमुचितम्?

पाश्चात्यविपश्चितः कथयन्ति यज्जगतः प्रधानमुद्देश्यं जगत्सम्बन्ध्येव भवितुमर्हेत्। एतदर्थमेव हि संसारोऽयं समुचितं स्थानम्। वैभवार्जनम्, सम्मानैश्वर्यादेः प्राप्तिः, नानापदवीसन्धारणमित्याद्येव तु संसारेऽस्मिन्नस्माकमुद्देश्यं भवेत्। दृश्यतेऽपि लोकानां व्यवहारप्रवृत्तिरपि तथैव। किमेतदतिरिक्तमपि किञ्चिदस्मज्जीवनस्योद्देश्यं भवितुमर्हेत्? किन्तु विचारदृष्ट्या समीक्षिते सति स्पष्टमिदमवभासेत यदयं विचारः स्पष्टं भ्रमात्मकः। जीवनस्योद्देश्यं सांसारिकं न कदाचित् स्थिरीकर्तुं शक्यते। न च संसारोऽयं तत्कृते समुचितं स्थानमेव। कस्मैचित्कार्याय तदेव समुचितं स्थानं शक्येत् वक्तुं यत्राहि तत्कार्यं सरलतया, सौष्ठवेन, स्वल्पप्रयाससहनेनैव च सम्पादयितुं शक्येत। यत्र तु नानाविधानां दुर्लङ्घ्यविघ्नानां साम्मुख्यं

सर्वदैव, नानाविधक्लेशानां समावेशः सार्वत्रिकः, मानसचिन्तानामन्यान्यबाधानां चाक्रमणमनिवार्यं तदेतत् सांसारिकक्षेत्रमुद्देशसिद्धेः स्थानं भवितुमर्हेत् ?

प्रथमं तु धन-मान-भोगादि-सम्प्राप्तेः सामग्रीसंघटने एवानेकानि दुःसहकष्टानि भवेयुः सोढव्यानि। यथाकथञ्चित्तत्प्राप्तावपि तेषां सुरक्षिता-स्थायितासम्पादने निरन्तरचिन्ता-आर्थिकहानिः स्वास्थ्यहानिः- मानसिकक्लेशा अनिवार्याः। कदाचित्कदाचित्तु परिस्थितिवशादात्मनोऽपि हननमापतति कर्तव्यम्। एवं सङ्कटानि सुप्रसिद्धानि लोके, धनाढ्याः पदवीधारिणश्च सुपरिचिताः सर्वे सर्वेषाम्। धनमेव परिगृह्णीत पूर्वम्। एतस्यार्जनं संवर्द्धनं च मनुष्यमात्रमभिजानात्यात्मनः कर्तव्यम्। परमेतस्य कृते कियत्यः कठिनताः, कियन्तः क्लेशाः शारीरिक-मानसिक-आत्मिकाः सोढव्या भवन्ति एवं विपत्तीनां कष्टानां च सहनेऽपि कियन्तो मानवा स्वेच्छानुसारं, धनार्जने भवन्ति पूर्णतया सफलाः ? पुनरनन्तकष्टैः सङ्गृहीतमपि धनं न केचिच्चिरकालपर्यन्तं स्वकीयं कर्तुं प्राभवन्। चक्षुषोर्निमीलने सर्वं शून्यम्! यावज्जीवं च दुःसहकष्ट साम्मुख्यम्।

योऽद्य राजा स एव श्वो रङ्कः सम्भवति। यदद्य गृहं धनधान्यपूर्णं तस्यैव जनाः श्वः पथि भिक्षुकाः प्रेक्ष्यन्ते। एवं दुर्घटसम्बन्धे धनप्राप्तिः कथं मानवजीवनस्योद्देश्यं सिध्येत्? इयमेव परिस्थितिर्मानवैभवपदप्राप्त्यादीनामपीति मन्ये न पृथग् बोधनीयं भवेत्। साम्प्रतं समयपरिवर्तनात्- राज्यशासनविपर्यासात्, देशविप्लवादेः कारणाच्च यानि हृदयविदारकाणि परिवर्तनानि प्रेक्ष्यन्ते तानि तु सुस्पष्टमेव सर्वेषाम्। एतानि सर्वाणि सुसमीक्ष्य को वा विवेकी साधयितुं समीहेत यत् मानवजीवनस्योद्देश्यं धनमानवैभवादेः प्राप्तिरिति।

**तर्हि किमस्माकं जीवनस्योद्देश्यम् ?**

विवेकतो विचार्य सम्प्रति- वयं यत्किञ्चिदपि कार्यं कुर्मः परिणामे तस्य प्रभावोऽस्माकं जीवनोद्देश्ये पतति। तेन चास्माकं सर्वेषां कार्याणां कर्ताऽस्माकमन्तरात्मा प्रभावितो भवति। यैः कार्यैरात्मा उन्नतो भवति तानि सत्कार्याणि, यैश्चावनतस्तान्यसत्कार्याणि सिद्धयन्ति। उन्नते ह्यात्मनि सर्वं सुखकरम्, अवनते तु सर्वमपि दुःखमयमवभासते। उन्नतेनान्तरात्मना सर्वतोऽपि सुखमयमवालोक्यते। सुखमेव च मानवमात्रस्योद्देश्यमिति न नाम विस्तरेण बोधनीयं भवेत्। ततश्च जीवने ह्यस्मिन् यैः कैश्चिदप्युपायैरात्मन उदारतायाः, उन्नततायाश्च सम्पादनं भवेत्तदेवाऽस्माकमुद्देश्यं जीवनस्य। उन्नतता-सम्पादने ह्यस्मिन् समयपरिवर्तनं देशविप्लवादि किञ्चिदपि न भवेत् प्रतिबन्धकम्। संसारे सर्वतोऽपि समीक्ष्यतां विवेकदृशा-किञ्चित्कार्यं हार्दिकवेदनाभिः परिपूर्णं तर्हि किञ्चित्कार्यं मानसिक्या अशान्तेः सार्वत्रिकं रङ्गस्थलम्। यदि कुत्रचित् आर्थिक-शारीरिक-हानयश्चरमसीमापर्यन्तमुपगतास्तर्हि कुत्रचिदात्मनः पतनं नीचैः सोपानपर्यन्तमुपनतम्। पर्यन्ततो निजात्मन उदारतासाधनं तादृशं कर्तव्यं सिध्येद् येन् भवान् परिणामे सुखं शान्तिं च पूर्णतया समधिगच्छेत्।

अत्र शङ्का सेयमुपतिष्ठति- यद्यात्मन उदारतासाधनमेव जीवनस्योद्देश्यम्, आत्मोन्नतिसाधनं च तत्सर्वदा सुखदायकमेव तर्हि गौतमबुद्धादि-महापुरुषैरपि निजजीवनकाले

कथं कष्टान्यवाप्तानि, जनता कथं काले काले तेषां विरोधाय समुत्थिता? अन्यदेशेष्वपि समवलोक्यताम्, महात्मा सुकरात: दिव्यात्मा ईशुख्रिष्टश्च किं नास्तामुदारात्मानौ, पुन: कथं ताभ्यां घोराद्घोरतमं कष्टमधिगतम्? एकेन विषपानं कृतम्, अन्य: शूलारोपेण प्राणान् व्यसृजत्। भवन्मतानुसारमात्मन औदार्यसाधनमिदं यदि सुतरां निष्कण्टकं निष्प्रतिबन्धं च तर्हि कथं जनास्तयोरेकान्तत: सपत्ना: समभूवन् येन तयो: प्राणान्तमेव कृत्वा तृप्तिरभूत्तेषाम्?

अत्र हि नैतदपि समाधानं सम्भवति यज्जनास्तेषां विषये घोरतरमन्यायमेव कृतवन्त:। तयोर्निर्दोषत्वनिरीहत्वेऽपि जनास्तयो: कृते दौरात्म्यमेव समवलम्बितवन्त इति। विप्रतिपत्तिरियमेवात्र समुत्तिष्ठति यत् महात्मनाम् (उन्नतात्मनाम्) जीवनोद्देश्यं कण्टकशून्यमेव चेत्प्रतिपद्यते तर्हि पूर्वोक्तानां महापुरुषाणामीदृशा: शत्रव एवं कथङ्कारं समपद्यन्त यै: कृतस्तेषां जीवनस्यान्त एव?

तर्हि श्रूयतामवधानेन–महात्मनां जीवनस्य सुखदु:खानि वयमात्मन: सङ्कुचितैर्विचारै-स्तुलयाम:। अस्माकं यानि सुखदु:खानि तैरेव तेषामपि सुखदु:खानामनुमानमुपकल्पयाम:। किन्तु सुस्पष्टोऽयं भ्रमोऽस्माकम्। महापुरुषाणामन्तरात्मा नितरामुन्नतो भवति, स हि निजसमयादग्रिमम्, भूयस्तरामागामिनमपि समयं लक्ष्यीकरोति। अत एव भविष्यत्समये भाविनीनां यासां घटनानामनुभवं ते निजजीवने कुर्वन्ति वयं तासामनुमानमपि कर्तुं न प्रभवाम:। अद्य यानि कार्याणि वयं सुखदु:खयोर्विषयमवधारयामस्तान्यागामिनि काले न तेषां सुखदु:खयोर्निमित्तानि तेषां सुखदु:खे ह्यस्मदपेक्षया विभिन्ने एव, विभिन्नश्च तयोर्विषय:। लघीयान् शिशुर्निजदु:ख-कष्टे एव केवलमनुभवति मातृ-भगिन्यो:, समीपपरिचारकाणां चाऽपि दु:खकष्टयोर्न तस्याऽनुभव:। किन्तु यथा यथा संवर्द्धते तथा तथा निजकुटुम्बिनामपि दु:खादीनामनुभवस्तस्य जायते। पूर्णवयस्के तस्मिन् जाते तु न केवलमात्मीयस्वजनादीनामेव दुखकष्टान्यसौ जानाति, अपितु समाज-स्वदेशादीनामपि कष्टान्यसौ आत्मन: परिबुध्यते। एवमेवास्माकमन्तरात्मा शनै: शनैरुन्नतो भवति। पर्यन्ते स समयोऽस्माकमागच्छति यदा हि निश्छला प्रतीतिरस्माकं चेतस्युदेति-

**अयं निज: परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**

महात्मनामन्तरात्मा तु उन्नतावस्थायाश्चरमसीमानमधिरूढो भवति। ते हि स्व-स्वकुटुम्बसमाजादीनां दु:खे न निक्षिपन्ति नेत्रे अपि। एते हि निज क्षणिकदु:खं विस्मृत्य संसारमात्रस्य दु:खदूरीकरणे तथा निश्चलनिलीना भवन्ति यत् स्व स्वसम्बन्धिनां भानं दूरत: परिहरन्त: प्राणपर्यन्तमपि सुखं विसृजन्ति। निजमनोऽभिलाषसिद्धौ तेषां तथाऽऽनन्दो भवति यस्याग्रेऽस्माकं क्षणिकसुखस्य न काचिद् गणना। अस्तु, ये विषया अस्माकं कृते दु:खकारका भवन्ति, यानि च दु:खानि निजमानसिकभावनयाऽनुभवन्तो वयं बहुधा कथयामो यदेतेषां महात्मनां जीवनं दु:खमयं व्यत्येत्, तादृशदु:खानामुपरि नैतेषां महात्मनां भ्रूक्षेपोऽपि। सोऽयमस्माकं महान् भ्रमो यदात्मनोऽनुमानेन-महात्मनामपि दु:खकष्टादीनां वयं कुर्म:

कल्पनाम्। तेषा मनस्तादृशे उच्चभावे विहरति यदलौकिकदुःखानां प्रतीतिरेव तच्चेतसि न जायते। हालाहलो विषो योऽस्माकं कृते जीवननाशकतया भयङ्करः स हि निजकर्तव्यपालनावस्थायां महात्मनामेषां समक्षममृतायितः। सुखसामग्रीव दुःखसामग्र्यपि महापुरुषाणां कृते भिन्नप्रकारैव, न सा सङ्कुचितहृदयानामस्माकमिव।

अस्तु, प्राचीनेतिहासेषु महापुरुषाणां चरित्राण्यस्मभ्यमिमामेव शिक्षां वितरन्ति यन्निजात्मानमुदारमुन्नतं च सम्पादयेदित्येव नूनं जीवनस्योद्देश्यम्। सत्यस्य स्थायिनो निष्कण्टकस्य च सुखस्यायमेव महानुपायः। शाश्वतिकशान्तेरयमेव सर्वोत्तमो मार्गः। अस्माकं शिक्षादीक्षादिकमस्मदात्मनः परिष्कारस्यैव साधनम्। गुरुभिः प्रदत्ता शिक्षा, जन्मावधि समभ्यस्तं शास्त्रम्, कष्टसहनपूर्वकं परिशीलता साधुचर्या चास्माकमान्तरात्मनमेवोन्नमयति, यस्मिन्नुन्नते सति सर्वमप्युन्नतमस्मभ्यमवभासते। उन्नतात्मनां समक्षे न कस्यचित्सामर्थ्यं प्रभवति यत्सम्पादयेत्तेषां विपरीतम्। यदि किञ्चिद्विपरीतमपि सम्पादयेत्तदपि सोऽयमात्मनोऽनुमानेनैव। महात्मानस्तु निश्चलनिरवद्यया लोकहितप्रवणया निजजीवनचर्यया न तद्विपरीतं परिगणयन्ति। तत् कथं तेषां दुःखोदयः? अत एवोच्यते-

**उद्धरेदात्मनाऽऽत्मानं नाऽऽत्मानमवसादयेत्।**
**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।**

***

# वर्तमानयुगस्य परीक्षाप्रणाली च संस्कृतशिक्षा च

भारतवर्षे शिक्षायाः क्षेत्रं पुरा एतावद्विस्तृतं नासीदिति स्वीकर्तुं शक्नुमः, किन्तु एतेन सहैव एतदप्यवश्यमासीद्यत् सा पुरातनी शिक्षा सेवावृत्त्यर्थं द्वारं द्वारमाहिण्डमाना घोरतममपमानमपि कदाचिदेव असहिष्ट। प्राक्तनशिक्षायाः कृते यद्यपि भूयान् समयोऽपेक्षितोऽभवत्, कष्टान्यप्यनेकानि सोढव्यान्यभूवन्, परं सा शिक्षा स्थायिप्रभावा बहुमूल्या चाभवत्। एषु दिनेषु कालेजस्था विद्यार्थिनो हसन्तः क्रीडन्तश्च स्वल्प एव वयसि एम्.ए अथवा आचार्यपदकाङ्क्षिता भवन्ति, किन्तु पूर्वमाचार्यतासम्पत्त्यर्थं भूयसः समयस्य अनल्पस्य चानुभवस्यावश्यकताऽभवत्। एतदर्थं ते गुरुकुले तीव्रां तपस्याम्, कठिनां च गुरुशुश्रूषामकुर्वन्। गुरुकुले तदेतत्क्लेशसहनं काचिन्निन्दनीया वार्ता नासीत्, प्रत्युत अस्मिन् भूयानभिमानो गौरवं चाऽगण्यत। अनर्घराघवस्य कर्ता मुरारिकविः साभिमानमाह– ''गुरुकुलक्लिष्टो मुरारिः कविः।''

गुरुगृहस्थो विद्यार्थी यस्मिन्समये स्वाभिमतां विद्यां परिसमापयत् तस्मिन् समये स निजमनसि कामं कीदृशीमपि कृतकृत्यतामभ्यमन्यत्, परं गुरुकृतां परीक्षां विना विद्यायां कृतकृत्यता न कथञ्चिदप्यमन्यत्। यद्यपि शिष्यस्य योग्यता गुरोः सकाशान्न कथञ्चिदप्यपरिचिता तिष्ठति, परम् अध्ययनानन्तरं गुरवः पुनरप्येकवारं विद्यार्थिनां परीक्षामकुर्वन्। वास्तविकपरीक्षानन्तरं विद्यार्थी गुरुकुलाद्विसृष्टोऽभवत्। देवोत्सवे, तीर्थस्थानेषु, राजसभादिषु च अवसरानुसारं यत्र यत्र पण्डितानां समवायः समभवत् तत्रैव गुरुकुलागतानां तेषां नवीनपण्डितानां परीक्षा शास्त्रविचारद्वारा समभूत् । ये किल तस्यां परीक्षायां सफलाः समभवन् तेषां नाम नानादेशेभ्यः समागतानां पण्डितानां तद्विद्यार्थिनां च द्वारा देशदेशान्तरेष्वतिशीघ्रमेव प्रासिद्धयत्। ते हि सर्वस्मिन्नपि देशे तद्विषयस्य आचार्याः स्वीकृता अभवन्।

यथा यथैव समयस्य परिवृत्तिरभूत् तथा तथैव शिक्षायाः प्रकारेष्वपि परिवर्तनमभवत्। गुरूणां गृहात् आश्रमेभ्यश्च शिक्षा निर्वासितेवाऽभवत्। विदुषां शिक्षालयाः 'टोल' नाममात्रार्थमवशिष्टा अभवन्। वर्तमानेन राजभाषायाः प्रवाहेण तेषां स्थाने 'स्कूलानाम् कालेजानाम्' च सृष्टिरक्रियत। तेषु प्रतिवर्षं सहस्रसहस्रसंख्यासु शिक्षिताः समवेताः समभवन्। एतावद्विस्तृतायाः संख्यायाः पूर्वमिव सहसैव परीक्षणमपि नासीत्सामान्यं कार्यम्। अत एव एतेषां शिक्षितानां परीक्षणाय नानाविधपरीक्षाणां सृष्टिरभवत् । मन्येऽहम्, परीक्षायुगस्याऽस्यारम्भः षष्टिसप्ततिवर्षेभ्यः पूर्वमेवासीत्। परीक्षायुगस्यारम्भे साम्प्रतमिव परीक्षानियमेषु कामं कठिनता न भवत्, पाठ्यग्रन्थेष्ववश्यं कठिनताऽऽसीत्। किन्तु तस्मिन् समये यादृशी परीक्षासु कठिनताऽऽसीत् तथैव तत्परीक्षासु परीक्षिता विद्यार्थिनोऽपि वर्तमानसमयापेक्षयाऽधिकतरं योग्याः सम्पन्ना अभवन्। संख्यायां कदाचन न्यूना अवश्यं भवेयुः परं विद्यायां न्यूना न कदाचिदभवन्।

भारतीयैस्तत्तद्विश्वविद्यालयैर्यानि किल विवरणानि (रिपोर्ट) वर्तमानवर्षेषु प्रकाशितानि तेषां द्वारा, प्रत्यक्षानुभवेन च विवेकिभिः सज्जनैस्तदिदं निर्धारितमस्ति यत् वर्तमानपरीक्षाभिः परीक्षिता अधिकांशा विद्यार्थिनो न तादृशव्युत्पत्तिशालिनो निष्पद्यन्ते यादृशाः किल ते अपेक्ष्यन्ते। राजभाषाया इव संस्कृतभाषाया अपि शिक्षाः परीक्षाश्च साम्प्रतं नवीनेनैव प्रकारेण प्रचलिताः सन्ति। अत एव एतया परीक्षाप्रणाल्या वर्तमानसमये संस्कृतशिक्षायाः का दशा समजनि, एतस्यां च शोधनस्यावश्यकतास्ति न वा, एतस्मिन्विषये संस्कृतपण्डितानामवधानमाकर्ष्टुं वर्तमानायाः परीक्षाप्रणाल्याः सम्बन्धे किञ्चिदधस्तान्निवेदयामि। मन्ये, संस्कृतहितैषिणः पण्डितास्तदेतत्सम्यग्विचार्य, अनन्तरकरणीयाय सज्जा भवेयुरिति।

वर्तमानायाः परीक्षाप्रणाल्याः प्रवर्तकैः एम. ए. अथवा आचार्यपरीक्षा सर्वाभ्यः परीक्षाभ्य उत्कृष्टा परिगणितास्ति। इमां परीक्षां यदा किल प्रविशति विद्यार्थी, ततः पूर्वमेव क्रमानुसारं स हि तद्विषयस्य बहुतरान् ग्रन्थान् परिसमापयति। एतस्यां परीक्षायां प्रविष्टेन तेन तद्विषयस्य उच्चतमा कठिनाश्च ग्रन्था अध्येतव्या भवन्ति। एतस्यां परीक्षायां कठिनकठिनानाम् उत्कृष्टोत्कृष्टानां च ग्रन्थानां स्थापनेन तदिदमाशास्यते यत् एतद्ग्रन्थानामध्ययनेन स परीक्षार्थी तथा योग्यो भविष्यति यथा अवशिष्टान् तद्विषयकग्रन्थान् स स्वयमेव द्रक्ष्यति, तेषां तत्त्वञ्च स्वयमेव भोत्स्यते इति। एतन्नास्ति यत एव ग्रन्थास्तद्विषयस्य सर्वस्वभूता इति। यद्येवमभविष्यत् तर्हि 'व्याकरणाचार्यः' 'न्यायाचार्यः' इत्यादिव्यापकं नामधेयं नाभविष्यत्। न्यायस्याथवा व्याकरणस्याचार्यो न भूत्वा स ह्याचार्योऽभविष्यत्केवलानां तेषां ग्रन्थानामेव। यथा ग्रन्थविशेषोपरि पूर्णाधिकारेण 'भाष्यब्रह्मचारी' 'नैषधपण्डितः' इत्यादिप्रसिद्धिः पूर्वकालात्प्रचलितास्ति। किन्तु आचार्यपरीक्षामुत्तीर्णवन्तो जनाः स्वविषये तु पूर्णपण्डिता ह्यमन्यन्त एव किन्तु तज्ज्ञानबलेन ते सर्वस्मिन्नपि संस्कृतसाहित्ये निःशङ्कं व्यहरन्, तत्र च पूर्णतां प्रापन्।

परीक्षायुगस्य मध्यसमये सोऽयं संक्षेपप्रकारः प्राचलत् यत् परीक्षार्थिनः स्वपरिगृहीतायां परीक्षायामेव नियतान् ग्रन्थान् यथावदभ्यस्यन्, तेष्वेव च पूर्णमधिकारं प्राप्नुवन्। परीक्षोत्तरणानन्तरं तु जीविकाद्युपार्जनकार्येषु संसक्ततया एकस्मिन्नेव शास्त्रे रुचेः प्रबलतया वा, इतोऽधिकानां ग्रन्थानां विलोकनस्य न तेषामवकाशः समभवत्। परं पठितेषु ग्रन्थेषु तेषां पूर्णोऽधिकारः समभवदत्र तु न सन्देहः।

इतोऽग्रे शनैः शनैः सोऽयं प्रकारः प्रारभ्यत-यत् परीक्षानियतेषु ग्रन्थेष्वपि मुख्यमुख्या अंशा एव सपरिश्रममधीयन्ते स्म, न किल पूर्णास्ते ग्रन्थाः। परीक्षाप्रवर्तकैरधिकारिभिः कठिनकठिनास्त एते ग्रन्थाः अनेनाभिसन्धिना नियमिता आसन् यत् एतेषां ग्रन्थानामध्ययनेन तद्विषयस्यान्ये ग्रन्थाः सहजमेव बुद्धिगता भविष्यन्तीति। किन्तु संक्षेपप्रवर्तकैः परीक्षाचतुरैर्नरैः सेयं युक्तिराविष्कृता-यत् 'परीक्षानियतेषु ग्रन्थेष्वपि एतानि स्थलानि स्वयमेव बुद्धिगतानि भवेयुरेव। तथा च परीक्षायां नियतः सोऽयं ग्रन्थस्तदेतेन प्रकारेणावगत एव। एवं च इतोऽन्ये एतद्विषयका ग्रन्थाः परीक्षोत्तीर्णविद्यार्थिनामञ्जसैव बुद्धिस्था भवेयुरिति सोऽयं परीक्षोत्तीर्णः स्वविषयस्य पूर्णापरिज्ञाता भवेदिति स्पष्टमेव।' यत्किमप्यस्तु, परीक्षार्थिनो जना यद्यपि

परीक्षानियतेषु ग्रन्थेषु मुख्यमुख्यानुपयुक्तविषयानेव परिश्रमेण सह अध्यैयत, यतस्त एव विषया: परीक्षासु प्रष्टव्या आसन्, परं नियतग्रन्थस्य अन्यान्यस्थलान्यपि ते गुरुमुखादवश्यम-पठन्। एतन्नासीद् यत् पूर्णो ग्रन्थस्तस्मिन् समये पाठित एव नाभूदिति।

वर्तमानसमये तु संक्षेपस्यापि पराकाष्ठा परिकल्पिता लोकै:। संक्षेप: किम्, ग्रन्थानां प्रक्षेप:, परिसमाप्तिमेव वा परिकल्पिता तै:। मुख्यमुख्यानामथवा कठिनस्थलानां का कथा, या: किल वार्ता: परीक्षायां प्रष्टुं शक्या:, अथवा गतवर्षाणां प्रश्नपत्रेषु ये ये विषया: पृष्टा:, तानेव बहव: परीक्षार्थिनोऽभ्यस्यन्ति, लोकेभ्यश्च तान्परिपठन्ति। परीक्षानियतग्रन्थानामूलचूडं पठन्त्येव न । यदि केनचित्कारणेन बलात् पठनीया अपि भवन्ति तर्ह्यपिग्रन्था अवगता भवेयुरिति धारणया न पठ्यन्ते। पठ्यन्ते केवलं परीक्षाप्रदानार्थमेव । इदानीं भवन्त एव कथयन्तु, परीक्षार्थिनां व्युत्पति: कथङ्कारं भवेत्?

अस्माकं महर्षीणां सर्वत: प्रधानं लक्ष्यमासन् भगवन्तो वेदा:। ते हि बलपूर्वकमाज्ञापयन्ति 'ब्राह्मणेन निष्कारणो धर्म: षडङ्गो वेदोऽध्येयो ज्ञेयश्च।' अस्माकं प्रतिष्ठाऽऽसीद् दर्शनग्रन्थै: । अस्माकमाध्यात्मिकतत्त्वोपरि उन्नतम्मन्या अपि वैदेशिका: साम्प्रतमपि पूर्णतया न प्रगतवन्त:। आर्षग्रन्थानामनुवादेन यद्यपि तैर्भूयानुपकार: कृत: परं तन्मर्मपर्यन्तमद्यापि ते यथावन्न प्राप्तवन्त: । ये वैदेशिका विद्वांसोऽस्माकं दर्शनानां यत्किञ्चन तत्त्वमधिजग्मुस्ते उन्मुक्तहृदयेन प्रशंसति– ''यस्मिन् देशे उपनिषत्सदृशानि ग्रन्थरत्नानि प्रसूयन्ते, अवश्यं स देशो ज्ञानज्योतिषामाकरभूत:।'' कथनस्य सारमेतदेव यद् भारतीयानामार्याणां चरमं ध्येयमासीदात्मतत्त्वम्।

आत्मतत्त्वपर्यन्तां गतिं सम्पादयितुम्, भाषाया उपरि अधिकारमधिगन्तुं प्रथमतो व्याकरणस्य न्यायस्य चाध्ययनं प्रचलितमभूत्। यतोहि व्याकरणादि परिज्ञानं विना शास्त्रग्रन्थेषु सम्यक्तया प्रवेशयोग्यता न भवति । अत एव पण्डितमण्डल्यां प्रसिद्धमभूत्–''काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्।'' इति ।

पुन: किञ्चित्समयानन्तरमिदमभूत् यद् व्याकरणन्यायसदृशे एकस्मिन् शास्त्र एव लोकानामध्ययनविरामोऽभवत्। तेषां मनसि दृढाग्रहोऽभवत् यत् यावत्किल व्याकरणन्यायसदृशानां गहनशास्त्राणां पूर्णतत्त्वज्ञा न भवाम तावत्पर्यन्तं शास्त्रज्ञतैव कीदृशी। एवं किल मध्यसमये एकैकशास्त्राणां पाण्डित्यं बहुलतया प्राचलत्।

अस्तु नाम, एतदपि सम्यगेवसीत्। अस्माकमेकैकशास्त्राणां रक्षा तु यथाकथञ्चिदभवत्। यद्येकैकशास्त्रेष्वेव निपुणा बहवो विद्वांसो भवेयु: कश्चन न्याये, कोऽपि व्याकरणे, कश्चिच्च मीमांसायां धुरन्धर: स्यात्तर्हि तेषां द्वारा पठनपाठनप्रचारे सति पूर्वोक्तानां रक्षा सहजमेव सम्भवेत्। परमग्रे गत्वा अस्यामपि प्रणाल्यां संक्षेपप्रकार: सोऽयं कर्तव्योऽभूद्यदत्रापि परीक्षाप्रकारो नियमनीयोऽभवत्। परीक्षार्थिनो बाला: लघुकौमुद्यादित आरभ्य भाष्यपर्यन्तान् कठिनकठिनग्रन्थान् पूर्वं गुरो: सकाशादपठन् ततो ग्रन्थाधिगमोत्तरं तास्ता: परीक्षा: अददु:। परीक्षोत्तरणानन्तरं तु गुरुसकाशादधिगतस्य ज्ञानस्य बलेन अन्यान्यानपि

ग्रन्थान् स्वयमवलोक्य अपेक्षितं वैदुष्यं सम्यक् सम्पादयामासुः।

एतेषु परीक्षाप्रकारेष्वपि क्रमशः सङ्क्षेपे प्रचलति–प्रचलति साम्प्रतमियत्पर्यन्त–मुन्नतिरभूत् यत्परीक्षैव सम्प्रति एकतमं शास्त्रं सञ्जातास्ति। बहवो महात्मानः प्रगतवर्षाणां प्रश्नपत्राण्येव सम्यग् रटित्वा परीक्षाप्रदानस्य साहसं कुर्वन्ति, संयोगाच्च ते तस्यामुत्तीर्णा अपि भवन्ति। सम्प्रति हि प्रायः सर्वासामेव परीक्षाणां गतवर्षीयाणि प्रश्नपत्राणि मुद्रितान्युपलभ्यन्ते। पण्डितमहाभागैः द्रव्यलाभलोभेन तदुत्तराण्यपि मुद्रापितानि सन्ति । अनेनैव प्रकारेण, सिद्धान्तकौमुद्याः पङ्क्तीनां व्याख्या अपि 'पङ्क्तिप्रकाश' 'पङ्क्तिचन्द्रिका' दिनानानामधारिण्यो मुद्रिताः सन्ति। गतवार्षिकेषु प्रश्नपत्रेषु पृष्टानां पङ्क्तीनां विशदीकरणमेभिरेव पुस्तकैः परीक्षार्थिनो रटन्ति, तासामाशयस्तेषां हृदयेऽङ्कितो भवेन्न वा इति त्वन्यत्। परीक्षायां येन केनचित्प्रकारेण उत्तरणमेव तेषां चरमं लक्ष्यम्। यतो हि शतपूर्णाङ्केषु त्रयस्त्रिंशद्योग्य–ताङ्कलाभ एव तेषां कृते शास्त्रज्ञतायाश्चरमा सीमा। ये पण्डितमहोदयाः संस्कृतोपरि किञ्चित्कृपां कृत्वा स्वयमपि किञ्चित्परिश्रमं कर्तुं वाञ्छन्ति ते परीक्षायां नियतानि यानि काव्यानि सन्ति तच्छ्लोकानां व्याख्यां स्वयं लिखित्वा निजसमीपे स्थापयन्ति। परीक्षाकाले सन्निहिते ते पञ्जिकामेतां विद्यार्थिभ्यः समर्पयन्ति येन ते तां व्याख्यां लिखित्वा रटेयुः।

प्रथमं तु परीक्षाप्रवर्तकैरेव पाठ्यग्रन्थेषु सरलतायाः परिसीमा समापितास्ति। काश्यादिस्थानेषु सिद्धान्तकौमुद्याः परीक्षा चतुर्भिर्वर्षैर्भवति। पूर्वपूर्ववर्षेषु कौमुद्याः यो भागः पठ्यते (नहि नहि यस्य भागस्य परीक्षा दीयते) अग्रिमवर्षेषु स भागो विद्यार्थिभिः स्पृश्यतेऽपि न, यतो हि अग्रतनवर्षेषु पूर्वभागस्य परीक्षा न भवति। यस्मिन् समये विद्यार्थी चतुर्थखण्डे कौमुद्या अन्तिमभागस्य परिक्षां ददाति तावत्पर्यन्तं प्रथमखण्डे पठितं भागं स हि बहुतरं विस्मरति। प्रकाशं तु स सिद्धान्तकौमुदीं समापयति परम् इतो बोधविषये स तां सर्वकालार्थं विसर्जयति। आचार्यपरीक्षायामयं नियम आसीत्पूर्वम् यत् परीक्षार्थी स्वेच्छानुसारं खण्डविनिमयं कर्तुमशकत्। स यद्यवाञ्छत् तर्हि चतुर्थं खण्डं प्रथमददात् पुनः स्वसौकर्यानुसारं चरमसमये प्रथमखण्डस्य स्पर्शमकरोत्। अस्तु, इदानीं तु परीक्षार्थिभिरस्मिन् विषये एतावदुन्नतिः कृता यत्ते पाठ्यग्रन्थैः साकमेव अधिकं सम्बन्धं न स्थापयितुं वाञ्छन्ति। ते हि तैर्विषयैः स्थलैर्वा सहैव ऐच्छिकं सम्पर्कं पुष्णन्ति ये किल परिक्षासु प्रष्टुं शक्यन्ते। अत एव ते पुरातनप्रश्नपत्राणां द्वारा, अथवा गुरुमहोदयस्य हस्तलिखितानां पञ्जिकानां द्वारा तत्तत्स्थलानि बुद्धिस्थानि कुर्वन्ति, तैर्ग्रन्थैः साकं तेषां साक्षात्सम्बन्धः कियान्?

मम परिचिता एके महोदया आसन् येषां नामप्रकाशनेनापि न किञ्चित्फलम् यतो हि तेषां देहावसानं जातमस्ति। ते प्रथमप्रथमं साहित्यस्याचार्यपरीक्षामुदतरन् किन्तु तदनन्तरं ते प्रायः प्रत्येकवर्ष एव यस्य कस्यचिद्विश्वविद्यालयस्य आचार्यपरीक्षां वा तीर्थपरीक्षां वा अवश्यमददुः। ते हि 'आत्मैव गुरुरात्मनः' इत्याभाणकस्य प्रत्यक्षमुदाहरणमासन्। स्वबुद्धिबलेनैव ग्रन्थान् दृष्टवा वेदान्तसांख्यन्यायादीनां, न जाने कियतां कियताञ्चन शास्त्राणां तैः परीक्षा दत्ता अभूवन्। एकदा मया पृष्टास्ते मित्रतायाः सम्पर्कान्मामवोचन्–यदा हि परीक्षाया

दिनानि सन्निहितानि भवन्ति तदाहमेकवारं नियतग्रन्थानेतान् सामान्यतया विलोकयामि। मम तावाननुभवः सञ्जातोऽस्ति यत् अस्मिन्ग्रन्थे एतान्येतानि स्थलानि प्रष्टुं शक्यन्त इति। अथाहं स्वयम्, अन्येषां पण्डितानां वा साहाय्येन तानि स्थलानि परीक्षोपयुक्तानि सज्जीकरोमि।

एवं किल पूर्वोक्तप्रकारेण व्याकरणादिशास्त्राणां परीक्षा उत्तीर्यन्ते किन्तु व्याकरणाध्ययनस्य फलं यत् शब्दसाधुत्वं व्युत्पत्तिर्वा, तत् कथमपि न भवति। अस्यां दशायां 'व्याकरणाचार्या' इत्यनुक्त्वा 'परीक्षाचार्य' इत्युक्तिः समञ्जसा स्यात्, अथवा 'व्याकरणं पठितम्' एतस्य स्थाने 'तत्परीक्षा पठितास्ति' इति कथनमुचितं भवेत्।

पूर्वं हि रक्तपीतादिवर्णैः रत्नानां भस्मौषधानां वा बाह्या परीक्षा समभवत् किन्तु सम्प्रति कृत्रिमोपायैस्तान् तान् रक्तपीतादिवर्णानुत्पाद्य कृत्रिमरत्नानि भस्मौषधयो वा चतुरैः सृज्यन्ते यानि हि समर्घमूल्येन देशेऽस्मिन्नितस्ततो विकीर्यन्ते। एवं किल प्रत्यक्षं पश्यतामेवास्माकं कृत्रिमसृष्टिः (इमीटेशन) प्रारब्धास्ति। धावनादिना शरीरस्वास्थ्यं भवतीति विचार्य किञ्चिद्दूरस्य यत्किञ्चित्परिमाणं स्थिरीकृत्य तत्र हि सङ्केतितं किञ्चिद्वस्तु स्थाप्यते, घोष्यते च यो वा जन एतद्वस्तु नियतसमये समानेष्यति स एव वीरः परिगणयिष्यत इति। किन्तु चतुरम्मन्या नराः स्वास्थ्यस्य विचारमकृत्वा येन केनापि धौर्त्येन सङ्केतितं तद्वस्त्वेव आनेतुं वाञ्छन्ति तावद्दूरं धावनस्य कष्टं न ते सोढुमिच्छन्ति। परं शारीरिकव्यायामेन यः किल लाभो भवेत्स एतस्यां प्रवञ्चनायां कुतः सम्भवेत्?

मम विचारानुसारम् एतस्मिन्व्यतिकरे परीक्षार्थिनां तावान् दोषो नास्ति यावान् किलाध्यापकमहाभागानाम्। अनेन अकर्मण्येन अध्यापनरूपप्रतारणेन वयं बालकानां जीवनं सर्वथा क्षतिग्रस्तं कुर्मः यतो हि संस्कृतमधीयाना जनाः संस्कृते व्युत्पत्तिशैथिल्यात् आत्मतत्त्वाद्यन्वेषणद्वारा जायमानमदृष्टलाभमपि न प्राप्नुवन्ति। तथा स वै दृष्टलाभोऽपि (सांसारिकलाभः) तेषां दुष्प्रापो भवति यो हि राजभाषाद्यध्ययनद्वारा साम्प्रतमुपलभ्यमानो विलोक्यते। एवमुभयतो भ्रष्टास्त इमे संस्कृताध्यायिनः स्वाध्यापकानपि घोरतरापराध-स्योत्तरदायिनो निर्मान्ति।

उचितवयः सम्पन्नानां तेषां विद्यार्थिनां कथां साम्प्रतमहं परित्यजामि-ये किल उच्चपरीक्षाप्रदानार्थमस्मत्समीपे समागच्छन्ति। ये मुग्धा बालकाः प्रथमां परीक्षां दातुमस्माकं पाठशालायां समागच्छन्ति तैः साकं वयं किं कुर्मः? वयं हि स्वपरिश्रमस्य समयस्य च लाघवाय पुरातनलिखिताः पञ्जिकाः प्रश्नपत्राणि च घोषयित्वा तान्परीक्षातो यथाकथञ्चिदुत्तारयामः। परमेतेन तेषां किञ्चिज् ज्ञानं सम्पन्नम्? स हि अव्युत्पन्नो जडमतिरेव अनेनैव प्रकारेण उच्चपरीक्षास्वपि यथा कथञ्चित् प्रक्षिप्तं पाठान्तरमिव रिङ्गन् रिङ्गन् बलात्प्राप्नोत्येव। एतस्मिन्काण्डे मूलतोऽपराधो कोऽस्ति? अहं जाने बालकस्यात्रापराधो नास्ति। भवन्तो बालस्य लक्षणं कुर्वन्ति-'अनधीताऽमुकशास्त्रो बालः' इति। एव हि अज्ञोऽस्ति तदैव तु भवत्सविधे समागतोऽस्ति। इदानीं श्रीमतामेव कर्तव्यमस्ति यत्तस्मै भवन्तः समुचितं पन्थानमुपदिशेयुरिति। किन्तु भवन्तस्तम् इति भ्रष्टं कृत्वा परित्यजन्ति। यदि स श्रीमतामनुग्रहेण

पाठ्यपुस्तकस्य बोधेऽपि समर्थः स्यात्तदापि किञ्चित्चत्कार्यं जातमिति कथञ्चित्सन्तोषः स्यात्। परं भवन्तस्तु तद्द्वारा केवलं परीक्षामेव दापयन्ति, बोधविषये तु शून्यतैव सर्वथा विलोक्यते। भवतामिदमविदितं नास्ति 'यत् अयं बालः पुस्तकविषयं किञ्चिदपि न बुद्धवानस्तीति'। अत एव तु भवन्तः पूर्वप्रश्नपत्राणामुत्तराणि तं रटयन्ति। यदि तज्ज्ञानस्योपरि भवतां विश्वासोऽभविष्यत् तर्हि भवन्तः शुष्करटनार्थं घोरामिमामाज्ञां कदापि न अदास्यन्।

स्पष्टकथनं चेत्क्षन्तव्यं भवेत्तर्हि अहं सविनयं निवेदयिष्यामि यत् बहवः स्वयं पण्डिता एव एतेनैव प्रकारेण परीक्षामुत्तरन्तः प्रमाणपत्राणां बलेन अध्यापकपदं लब्धवन्तः सन्ति। देवमन्दिरे धर्मपूर्वकं चेत्पृच्छ्येत तर्हि स्वयं त एव आत्मनस्तादृशीं योग्यतां स्वीकर्तुं न शक्नुयुः। परं पाठशालायाः सञ्चालकस्य श्रेष्ठिमहोदयस्यानुरोधेन, जीविकाया लोभेन, किं वा अप्रतिष्ठाया भयेन ते आत्मानं तदभिज्ञं प्रख्यापयन्तो महामहाग्रन्थानप्यध्यापयितुं बाध्या भवन्ति। इदानीं श्रीमन्त एव विचारयन्तु, यद् वराकाणां तेषां सविधे सम्प्रति एतमुपायमन्तरा का वाऽन्या गतिरस्ति यत्ते येन केनाप्युपायेन तान् विद्यार्थिनः परीक्षामुत्तीर्णान् कारयेयुः। अत एव ते ग्रन्थस्य वास्तविकतत्त्वं बोधयितुमप्रभवन्तोऽपि बाह्यैरुपायैः स्वशिष्यान् परीक्षासूत्तारयन्ति। ते च शिष्याभासाः अनया प्रवञ्चनया उत्तीर्णाः सन्तोऽस्माकं मिथ्याकीर्तिस्थापनस्य निस्सारसाधनानि सम्पद्यन्ते। वयमुपरितः सन्तुष्यामो यदस्माकं शिष्यः शास्त्रिपरीक्षायामुत्तीर्णः परं जगत्साक्षिण्याः सरस्वतीदेव्याः सन्निधाने भगवतो धर्मस्य च दृष्टौ अस्माकमन्तरात्मा नितान्तं व्यथते यद्वयमज्ञाः सन्तोऽपि मुधैव पाण्डित्यदम्भं कुर्मः।

प्राचीनपण्डितानां श्रूयते वृत्तं यत्ते पाठनीयग्रन्थेषु यत्स्थलमसंलग्नमभविष्यत्तर्हि तदर्थं ते स्पष्टमकथयन्-यत् इदं स्थलं समयान्तरे सम्यग् दृष्ट्वा पुनः कथयिष्यामः। अथवा इदं स्थलममुकपण्डितस्य सविधे पठ इत्यादि। परमेतदर्थमपि अध्यापकस्यात्मबलमपेक्ष्यते। ये वराकाः आदित आरभ्य अन्तपर्यन्तमपक्वाः सन्ति ते एतादृग् बलं कथमिव लभेरन्?

अस्तु, इदानीमेतदेव कर्तव्यं प्रतीयते यत् परीक्षोत्तीर्णानां संख्यावृद्धौ अधिकमवधानं न क्रियेत। सम्यग् ग्रन्थाभ्यासे सत्येव विद्यार्थिभ्यः परीक्षादानार्थमनुमतिर्दीयेत। परीक्षा किल शास्त्रज्ञानस्य परिचयिकामात्रम्। सा निजस्थान एव तिष्ठतु नाम। सा स्वयमेव शास्त्रस्वरूपं न धारयेदिति अवधातव्यं भवेत्। यदि भवतां सकाशाद् द्वावप्युत्तमौ विद्यार्थिनौ परिनिष्ठितौ भविष्यतस्तर्हि भवद्भ्यः कीर्तिमाशीर्वादं च दद्याताम्। रत्नं किल एकमप्युत्तमम्। प्रस्तराणां राशिस्तु द्वारोपान्ते एवमेव सुलभोऽरून्तुदश्च। भवन्त एव तु कथयन्ति-'एकः शब्दः सम्यग् ज्ञातः स्वर्गे लोके कामधुग् भवति'। श्रीमन्तस्तावदपक्वान् इमान् पण्डिताभासानुत्पाद्य असाधुशब्दसृष्टेरक्षय्यमाकरमिव निष्पादयन्ति येन हि कालान्तरेऽपि असाधुशब्दसृष्टिर्न निरुद्धा भवति। किमेष व्यतिकरोऽस्मान् नरकं न दर्शयेत्?

अहं पूर्वं लिखितवानस्मि सत्सैषा परीक्षाप्रणाली नाऽद्यतनी। अस्याः किल प्रचलितायाः व्यतीतानि बहुतराणि वर्षाणि। परं प्राक्तनाः पण्डिताः स्वशिष्यं सम्यक्तया शास्त्रेषु विनयन्ति स्म। प्रतिदिनं पूर्णपरिश्रमं कृत्वा कारयित्वा च ग्रन्थानामभ्यासं विद्यार्थिभ्यो

दृढतरं कारयन्ति स्म। ततः समये लब्धे सति परीक्षाप्रकाराणामपि तान् विद्यार्थिनः परिचितानकार्षुः गतवार्षिकाणि प्रश्नपत्राणि दर्शयित्वा पठितग्रन्थानामावृत्तिं विद्यार्थिभिः कारयन्ति स्म। एतन्नासीद् यत्ते प्रश्नपत्रद्वारा अनुचितं लाभमुपार्जयामासुरिति। यस्मिन् समये तेषां शिष्यः पठित्वा परिनिष्ठितोऽभवत्, ततस्ते यत्र कुत्रापि कठिनात्कठिनेऽपि परीक्षकविश्वविद्यालये तमेतं विद्यार्थिनं परीक्षार्थं प्राहिण्वन्। अकथयन् यदिदमस्माकं सुवर्णं विशुद्धमुच्चकोटेश्चास्ति। यः कोऽपि स्वर्णपरीक्षकस्तदेतन् निकषेण स्वैरं परीक्षतां नाम, काऽस्माकं भीतिः ?

किन्तु अद्यत्वे वयमीदृशं विश्वविद्यालयमन्वेषयामो यस्मिन् हि परीक्षायामत्यन्तमेव सारल्ये भवेत् 'खण्डे खण्डे च पाण्डित्यं' प्राप्य शीघ्रमेव आचार्यः संपद्येत। इदृशेभ्यः परीक्षास्थानेभ्यो वयं बिभिमो येषु हि एकवारमेव सर्वेषां ग्रन्थानां परीक्षा भवति, प्रतिवर्षं च प्राक्तनपठितानामपि भागानां परीक्षार्थमावृत्तिः करणीया भवति। वयं वाञ्छामो यद्विद्यार्थी द्वित्रैरेव ग्रन्थैः 'तीर्थो' भवेत्। इदमवसरान्वेषणमेव सूचयति-यद् भवतां वस्तुनि काचित्त्रुटिरस्तीति। यदि भवतां सुवर्णं विशुद्धं सत्यं चास्ति तर्हि अन्धप्रायं नाणकपरीक्षकम् (सर्राफ)किमित्यन्वेषयथ ? मध्येराजमार्गं परीक्षणं किमिति न कारयथ ?

अहं हि परीक्षाप्रणाल्या अन्धविरोधी नास्मि। यतो ह्यहमपि एतस्मिन्नेव परीक्षायुगे शिक्षितगोष्ठ्यामन्तर्गणनायोऽस्मि संवृत्तः। यदा ह्यस्मिन्समये वर्तमानं परीक्षाप्रकारं विना एतावत्संख्याकानां लोकानां शिक्षासमीक्षणं सम्भवत्येव न, तदा एतं प्रकारं विहाय अन्य उपाय एव कः ? किन्तु वर्तमानेषु कतिपयवर्षेषु परीक्षार्थिभिर्जनैः परीक्षाप्रकारस्य योऽयमेकान्ततो दुरुपयोग आरब्धस्तस्याहमवश्यं विरोधी अहमेव किम्, संस्कृतशिक्षाप्रचारमभिलषन् प्रत्येकं सज्जन एव मन्ये एतस्य विरोधी भवेत्। बहवः किल सज्जनाः परीक्षायुगमेवाऽन्यदृष्ट्या पश्यन्ति। मयापि 'साहित्यवैभवे' प्रोक्तम्-

**( छप्पय )**

**''यदि गतिमुरीकरोषि सखे शिक्षासुखसिन्धौ**
**चिरतरममरीकरणगुणाऽमृतझरीसुबन्धौ।**
**तर्हि चपलफलकरी रीतिरुररीकरणीया**
**यदिह परीक्षातरी परीक्षणयुगेऽवनीया।**
**अयि मञ्जुनाथ नवयुगपरीवाहविपुलवैभवकरी**
**वरविद्यासिन्धूपरिचरी नौरियमधुना जयकरी।।''**

चिरकालार्थममरीकरणगुणस्य या अमृतझरी (प्रवाहः)तस्य मित्रभूते शिक्षासिन्धौ यदि गच्छसि तर्हि शीघ्रफलकरी इयं रीतिः स्वीकार्या यत् परीक्षातरिः (नौका) रक्षणीया। नवयुगप्रवाहे- विद्यासिन्धोः उपरिगामिनी इयं परीक्षारूपा नौकैव जयकरी। उपरिचरीत्यनेन- परीक्षया शास्त्रसिन्धोस्तलस्पर्शो न भवति, उपरितो गतिर्भवतीति सूच्यते इत्याशयः।

पूर्वं शास्त्रविचारेण योग्यतापरिचयोऽभवत् इदानीं परीक्षाप्रमाणपत्रैर्भवति। शास्त्रविचारः कुत्रापि भवतु तदर्थमवसरान्वेषणं नाभवत्। इदानीमपि व्युत्पत्तिं वास्तवज्ञानं च वाञ्छद्भिर्जनैः

कठिनात्कठिनेऽपि विश्वविद्यालये परीक्षाप्रदानान्न विमुखीभवितव्यम्। भवन्तः सुवर्णसङ्ग्रहसमये कियतीं वा परीक्षां न कारयन्ति? भवन्तो नाणकम् (सिक्का) कियद्वा परीक्षयन्ति, इदं न भवेत् यत् अवसरे एतदयोग्यं कूटं च सिध्येत्। एवमेव निजान् बालकान् वास्तवव्युत्पत्तिशालिन एव किमिति न सम्पादयथ? सरलतरपरीक्षास्थानान्वेषणात्तु एतदेव प्रतीयते यद् भवन्तः केवलं परीक्षाप्रमाणपत्रमेव वाञ्छन्ति येन कुत्रचिद् भृतिकार्यं लभ्येत। ज्ञानस्य नाऽपेक्षा प्रतीयते।

विद्याध्ययनस्य मुख्यतमं फलं हृदयपरिष्कारो ज्ञानं च। समयमहिम्ना ये किल महोदया धनलाभमेव शिक्षायाः प्रधानं प्रयोजनं मन्यन्ते तेषां कृते उपरि वर्णितं नेदं सर्वम्। किन्तु धनलाभार्थमेव चेद्विद्याऽधीयते तर्हि पठ्यतां सामयिकी विद्या! अथवा यदि धनोपर्येव प्रधानं लक्ष्यं दृढतरं बद्धमस्ति तर्हि क्रियतां तूलग्रन्थ्यादीनां व्यापारः। आश्रीयतां 'तेजीमन्दी' व्यवसायः! किं वा सर्वतः शीघ्रमेव धनिकतासम्पादको द्यूतापरपर्यायः फाटका, नीलाम, फीचर्स व्यापारो वा निषेव्यतां यस्मिन्नध्ययनकृतः परिश्रम एव न सोढव्यो भवति। किन्तु विवेकिनो जना जानन्ति यत् एभिः कार्यैर्धनमवश्यं लभ्यते, परं ज्ञानरूपो निधि येन हि हृदये प्राञ्जलभावः समेति, न हस्तगतो भवति। नवीनशिक्षाप्रणाल्या देशे शिक्षायाः स्वरूपमेव विपरिवर्तितम्; उद्देश्यमेवान्यथा सम्पादितम्। अद्यत्वे हि नवीनपद्धत्या शिक्षिता अपि लोकाः शिक्षाया वास्तविकं फलं नाधिगच्छन्ति। घोरपरिश्रमं कृत्वापि नाममात्रार्थं लाभो भवति एतद्विषये मम ये विचारास्ते 'साहित्यवैभवे' अंशतः प्रकाशिता मया। मन्ये, अत्र तेषां सूचना पाठकानां नारून्तुदा भवेदिति कतिचित्पद्यानि भावार्थसहितानि अधस्तादुद्धरामि –

**कवित्त-घनाक्षरी**

**चित्तपरिष्कारे या हि शिक्षा भूरिदक्षाऽभव-**
**द्वित्तपुरस्कारेणैव साऽद्य सुपटीयसी**
**पूर्वपुरुषाणां पुरा पद्धतिः प्रकृष्टाऽभव-**
**न्नव्यपुरुषाणामद्य सरणिर्गरीयसी।**
**मञ्जुनाथ जानीयाम दूरदूरदेशकथां**
**'को धर्मोऽथ, के वयम्'कथेयं तु दवीयसी**
**वर्तमानकाले बत शिक्षावधूभालेऽलेखि**
**कालेजेन चारुचित्रमालेयं महीयसी।। १।।**

या शिक्षा चित्तस्य परिष्कारे शोधने निपुणा आसीत् सा अद्य धनप्राप्त्यैव उत्तमा गण्यते। पूर्वं हि पुरातनपुरुषाणां रीतिरुत्तमा अगण्यत, अद्य तु नवीन-लोकानां पद्धतिरेव महती मन्यते। वयं भूगोलेतिहासपुस्तकानां द्वारा दूरदूरदेशानां कथां जानीमः परं वयं के, अस्माकं धर्मः कः, इत्याद्यात्मकथा तु दवीयसी-अतिदूरस्था अत एव 'कालेजेन' शिक्षावध्वा ललाटे इयं चित्रमाला (यत् आत्मानमपि वयं न जानीमः, इति आश्चर्यमयी, आलेख्यमयी च) अलेखि।। १।।

**बाल्यादेव भूरि भूरि पुस्तकानि घोषन्तोऽपि**
**शिक्षायां न सन्तोषं सृजन्ति जना मीयताम्**
**पूर्वपरिचयाय पाठ्यमितिहासाद्यपि**
**देशभाषां त्यक्त्वा हूणभाषया ह्यधीयताम्।**
**सर्वमेतत्सोढ्वापि च भ्रम्यतां बुभुक्षावशात्**
**शिक्षाफलमाध्यात्मिकशान्तिः क्वोपनीयतां**
**मन्दतममाटीकितविद्यावृक्षवाटीसुखा**
**वर्तमानशिक्षापरिपाटीयं निपीयताम्।।२।।**

बाल्यादारभ्य बहूनि पुस्तकानि परीक्षार्थमधीयाना अपि जनाः शिक्षायां सन्तोषकरं फलं न दर्शयन्ति, इत्यनुमीयताम्। पूर्वजानां परिचयाद्यर्थम् इतिहासो भूगोल च पठ्यते, परं नवीननियमानुसार सोऽपि इंग्लिशभाषाद्वारैव पठ्यताम्। एतत्सर्वं सहित्वापि भृतिकार्यस्याऽलाभे बुभुक्षापरवशैर्भृतिकार्यान्वेषणार्थं भ्रम्यताम्। ततश्च शिक्षायाः फलम् या आध्यात्मिकी शान्तिः सा क्व उपलभ्यताम्? अत एव अतिमन्दं यथा तथा आटीकितं (प्राप्तम्) विद्यारूपायाः वृक्षवाट्याः सुखं यया ईदृशी। वर्तमानशिक्षाप्रणाली, निपीयताम् अतिशयेन परिशील्यताम्।।२।।

**वैदेशिकभाषाचाकचक्याऽऽचान्तचित्तस्थले**
**रोहति,विमोहजलैः सिक्तो यो विधीयते**
**आत्ममातृभाषात्यागखाद्यपरिपुष्टो यो हि**
**गौरवगरिष्ठो गर्वशाखाशतैर्गीयते।**
**चित्रं बहुकालाज्जात-'बी.ए.एम.ए.' पुष्पोदयो**
**नेत्रद्युतिमन्दताऽऽमयोऽपि सह नीयते**
**भाग्यतोऽभिरूढराजतन्त्रभृतिभिक्षाफला-**
**द्वर्तमानशिक्षाकुब्जवृक्षात्को महीयते?।।३।।**

वर्तमानशिक्षारूपो यः कुब्जः (लघुर्वक्र श्च) वृक्षः तस्मात् को वा जन महीयते महितो भवति? न कोपीऽत्यर्थः। इदानीं शिक्षायां वृक्षस्य रूपकं साधयति-वैदेशिकभाषायाः चाकचक्यम् (नेत्रमोहकचमत्कारः 'चमक')तेन आचान्ते अभिभूते चित्तरूपे स्थले स वृक्षः रोहति। विमोहः आत्मभाषागुणेषु अगुणत्वदर्शनम् स एव जलम्। तादृशैर्जलैः सिच्यते। आत्ममातृभाषायाः त्यागः एव खाद्यम् (वृक्षाणां कृते 'खाद') तेन परिपुष्टो यः अभिमानरूपैः शाखाशतैः गौरवगरिष्ठो विपुलोन्नाहः गीयते कथ्यते। बी.ए., एम.ए. रूपाणि पुष्पाणि चिरादुत्पद्यन्ते, किन्तु एतेन सहैव नेत्रद्युतेर्मन्दतारूपः रोगः सह नीयते। भाग्यतः अभिरूढं राजतन्त्रसकाशात् भृतिभिक्षाप्राप्तिरूपं फलं यस्य। अर्थात् राजतन्त्रसकाशाद्वैतनिकताप्राप्तिरूपं यदस्याः शिक्षायाः फलं परिगण्यते तत्तु भाग्यादेव भवति।।३।।

अस्मिन् धनलोलुपताया अपि युगे सत्यं सत्यान्वेषणं यदा क्रियेत तदा साधारणबुद्धिरपि जनो धनापेक्षया ज्ञानस्य गौरवं सुस्फुटमभिमन्येत। निष्किञ्चनावस्थायां निवसतो ज्ञानिनः अद्यापि

जना आदरं कुर्वन्ति। 'खद्दर'मयं कौपीनं धारयन् आध्यात्मिकतासम्पन्नो ज्ञानी अद्य समस्तेऽपि विश्ववलये महापुरुषः परिगण्यते। यदा च ज्ञानस्य शिक्षायाश्च गौरवं धनेन न परिमातुं शक्यते तदा वास्तवज्ञाननिधिः सेयं संस्कृतशिक्षा कस्मान्न समीक्ष्यते श्रीमद्भिः ? भारतायैव किं समस्तस्य विश्वस्य कृते आध्यात्मिकताया मनुष्यसभ्यतायाश्च आदिमशिक्षयित्री संस्कृतभाषां विहाय काचिदन्या दृश्यते ? यदि नास्ति तर्ह्येतस्या वास्तविकतत्त्वोपरि किं न दृष्टिः श्रीमताम् ? केवलं परीक्षासु तल्लब्धप्रमाणपत्रेष्वेव श्रीमतां सतृष्णा दृष्टिः किमिति निपतति ? परिश्रमपूर्वकं साधुरीत्या शास्त्रमधीयताम्। ग्रन्थाभ्यासे सति, उत्साहितेन बलपूर्णेन च ह्यदयेन परीक्षासु प्रविश्यताम्, उत्तमश्रेणौ चोत्तीर्यतां येन परीक्षोत्तरणानन्तरं ज्ञाननिधिरपि श्रीमतां सविधे सन्निहितो भवेत्।

लोकाः परीक्षासम्पत्तिं विना परिश्रमं स्वल्पश्रमेण वा अधिकर्तुमिच्छन्ति। कतिपयकाकिणीभिरेव निधिमाहर्तुमिच्छन्ति। एतत्किल एतेनैव सिध्यति यत्परीक्षानियमेषु दिनं दिनं कठोरता करणीया भवति। ''अमुकपरीक्षोत्तरणानन्तरम् अग्रिमा परीक्षा द्वाभ्यामेव वर्षाभ्यां दातुं शक्येत। पाठशालायां प्रतिशतम् एतावत्य उपस्थितय अपेक्ष्यन्ते।'' इयत्पर्यन्तमेतस्य नियमस्य कठोरता यत् स्वयमधीयानानाम् (प्राइवेट) अपि परीक्षार्थिनां कृते समयनियमोऽपेक्ष्यते। यतो हि पूर्ववर्णितयुक्तीनां द्वारा द्विचतुर्मासैरेव लोकाः तत्तत्परीक्षामुल्लङ्घयितुमिच्छन्ति। अत एव, अनिच्छासत्त्वेऽपि नियमपारवश्यादेव किञ्चिन्न किञ्चित्तु अवश्यं पठितव्यं भवेदेतस्मादेव कारणात् परीक्षासु समयनियमः कृतोऽस्ति। यदि सत्या ज्ञानलिप्साऽभविष्यत्तर्हि कतिपयमासेषु एवं विधानां परीक्षाणां प्रदानमेव कथं सभूतमभविष्यत्, यदर्थमेवंविधा नियमार्गला अपेक्षणीया भवेत्।

इदानीं तु नाममात्रपरीक्षाणामपि परिश्रमं जना न सोढुमिच्छन्ति। संप्रति हि विना परीक्षामेव 'साहित्यधुरीण' 'विद्याभास्कर' 'महोपाध्याय' 'साहित्यरत्न' इत्यादयः पदव्यो लभ्यन्ते, यासां द्वारा बाह्यमाडम्बरं सज्जयन्तश्चतुराः प्रतिष्ठायास्तद्द्वारा च जीविकाया मार्गं प्रशस्तं कर्तुमिच्छन्ति। यत्किमप्यस्तु, वर्तमान-परीक्षायुगस्य यथादृष्टमिदं वृत्तं श्रीमद्भयो निवेदितम्। अस्मिन् हि भगवत्याः संस्कृतभाषायाः सत्यानुरागिणां पण्डितमहाभागानां दृष्टिनिक्षेपो नितान्तमावश्यक। यद्ययमेव क्रमो निर्निरोधं प्रक्रान्तो भवेत्तर्हि स्वल्पेष्वेव वर्षेषु उपाधिधारिणस्तु बहवो लभ्येरन् किन्तु तत्तच्छास्त्रीयग्रन्थरहस्यबोद्धारो जना इतिहासपुस्तकानां पत्रेष्वेवान्वेषणीयाः सम्पद्येरन्। सर्वेश्वरो भगवान् मैवं क्रियात्। एवं विधदुर्दिनस्य सम्भवात्पूर्वमेव संस्कृतपक्षपातिनः पण्डिताः प्रतीकारार्थं सन्नद्धा भूयासुरित्यलम्।

***

# निबन्धलेखस्य विराट् प्रवाहः

निबन्धरचनाया इतिहासे महात्मन ईशुख्रिष्टस्य सेयं विंशी शताब्दी 'क्रान्ति' - कारकरूपेणस्माकं सम्मुखमुपतिष्ठते। अस्यां हि शताब्द्यां सर्वस्मिन्नपि भूमण्डले इतस्ततः सर्वत्रापि, निबन्धरचनायाश्चर्चा शिक्षितसमाजे समाकर्ण्येत। धार्मिके विषये, सामाजिके प्रसङ्गे, साहित्यक्षेत्रे, शिक्षायाः प्रचारे, वैज्ञानिके वाऽऽविष्कारे सर्वत्रापि साम्प्रतं निबन्धगुम्फनस्य सर्वतोमुखः प्रचारः परिदृश्यते। धार्मिकं वा सामाजिकं वा यं कञ्चन नवीनं परिष्कारं प्रजासु प्रचारयितुमिच्छन्ति जनास्तदा तद्विषये लघुलघून् निबन्धलेखान् 'ट्रेक्ट' प्रकाशयन्ति तदधिकारिणः। साहित्यक्षेत्रं तु निबन्धानां पूरोपप्लव एव ('बाढ') सम्प्रति समुपस्थितोऽस्ति। प्रत्येकं सम्मेलने निबन्धपाठः अनिवार्यरूपेण प्रबन्धनीयो भवति। कामं निबन्धपाठसमये सामाजिकमहाशयाः परस्परं संलापसुखं निद्रां वा केवलमनुभवन्ति, परं निबन्धपाठोऽपि सम्मेलनस्यैकमावश्यकमङ्गं परिगणनीयमस्ति।

प्रसिद्धप्रसिद्धानि मासिकपत्राणि प्रतिवर्षमात्मनो 'विशेषाङ्कान्' प्रकाशयन्ति बृहत्कायाः किलैते महाङ्का दीर्घदीर्घां निबन्धमालां वहन्तः साहित्ये नवीनामेवच्छटां विच्छुरयन्ति। कतिपयमासतः पूर्वमेव दीर्घतरा सेयं निबन्धसूची सम्मुद्रय्य प्रसिद्धप्रसिद्धानां साहित्यसेविनां सविधे सम्प्रेष्यते। ये किल नामाङ्किताः साहित्यमहारथिनो भवन्ति तेषां द्वारे एतस्याः निबन्धसूच्यास्तया साकं प्रेषितस्य प्रार्थनापत्रस्य च बहुकालं यावत् प्राप्तिसूचनैव दुष्प्रापा भवति। बहून् वारांस्तु अयमपि सन्देहो भवति यत् प्रार्थनापत्रं न तेषां सविधे प्राप्तमस्ति। मध्य एव केनचिदलक्ष्येण पत्रप्रेषणः (डाक) पिशाचेन तन्निगीर्णमस्तीति। द्वित्रिवारान् पुनः पुनरनुरोधपत्रप्रेषणेन-'कार्यव्यस्तस्य न मे समयः, तथापि भवदादेशानुरोधात् यतिष्ये'' इत्येवंविधान् नानारूपविभ्रमविलासान् प्रदर्शयन्तस्ते पत्रप्रेषकस्य मस्तके पूर्णमुपकारभारं समर्प्य अत्यन्तानुनयविनयैर्यथाकथञ्चित् प्रबन्धलेखं स्वीकुर्वन्ति। नियतो निबन्धप्रेषणस्यावधिः कतिपयान् मासानुल्लङ्घ्य तेषां प्रतीक्षया बद्धाञ्जलिस्तिष्ठति। पत्राणां का कथा, तडित्पत्रं यदा प्रेष्यते यत् - ''निबन्धा बहवो मुद्रिताः, अतिशीघ्रं प्रतिज्ञातो निबन्धः प्रेष्यताम्'' तदा सागरस्यापि धीरगम्भीरतां लङ्घयन्तस्ते यथाकथञ्चिदात्मनो निबन्धं प्रेषयन्ति।

यदि मम विश्वासो न भ्राम्यति तदाहं स्पष्टमेव निवेदयिष्यामि यत् सुप्रसिद्धेषु साहित्यमहारथिषु विरला एव तावत् समयोपरि तात्कालिकनिबन्धरचनायां श्रमं स्वीकुर्वन्ति। अन्यथा केचित् पुरालिखितं यं कञ्चन निबन्धं प्रेषयितुं प्रत्युत्तरयन्ति, केचित्तु स्वीकृतस्य निबन्धस्य स्थूलं विषयनिर्देशमेव (आउट-लाइन) कृत्वा आत्मनः कृतितां प्रदर्शयितुमिच्छन्ति। निबन्धप्रकाशकास्तु ''नामाङ्कितानां तेषां यदि पङ्क्तिद्वयमेव प्रकाशनाय लभ्येत तर्हि सफलता भवेत्'' इति हृदये बहुमन्यमानं तं निबन्धाभासं बहुगौरवेण स्वीकुर्वन्ति प्रकाशयन्ति च। प्रत्यक्षं किल विलोक्यते यत्सम्प्रति साहित्यक्षेत्रे ख्यातिरेव बहुधा पूज्यते। ये किल उदीयमाना

नवलेखकाः सन्ति, येषां ख्यातिः साहित्यसेवकेषु साम्प्रतं प्रचलन्ती अस्ति, त एव परिश्रमपूर्वकं निर्दिष्टनिबन्धलेखे पाटवं प्रकाशयन्ति। तेषामेव च निबन्धा अन्वेषणपूर्वकं लिखितत्वादुपयोगि-नोऽपि भवन्ति। ये तु देशे प्रख्यातिं लब्धवन्तः, साहित्यक्षेत्रे कृतकार्यतया प्रसिद्धा अभूवँस्ते तु प्रार्थनाया उपरि निबन्धलेखनोपयुक्तं समयमेव न प्राप्नुवन्ति, अथवा सत्यपि समये तथा कर्तुं न वाञ्छन्ति।

प्रत्यक्षं पश्यामः-सुप्रसिद्धानां पत्राणां ये वा विशालकायाः विशेषाङ्काः प्रकाशिता भवन्ति तेषु नामाङ्कितमहोदयैर्लिखितानां निबन्धानां मध्ये विरलेष्वेव स्थायितया सङ्ग्रहणीयः सारभागो भवति, अन्यथा तु केवलं 'शीर्षक'-मात्रसारा भवन्ति। शीर्षकं भवति 'ईश्वरसिद्धिः' इति। सर्वविश्वविद्यालयमहनीय-पी.एच.डी. इत्यादिपदकविभूषिता एतस्य लेखकमहोदयास्तु पादोनपृष्ठ एव उपक्रमोपसंहारसहितं सम्पूर्णं निबन्धं परिसमाप्य ईश्वरसिद्धिमेतां प्रदर्शयन्ति, सदैव च अलौकिककर्मसाधने मणिमन्त्रन्यायस्मारिकामात्मनोऽप्यद्भुतां सिद्धिं प्रकाशयन्ति। कुतो वा न स्यात्? 'सर्व हि महतां महत्'।

तत्त्वतो विचारे नायं सर्वोऽपि दोषो वराकाणामेषां सुप्रसिद्धलेखकमहोदयानामेव। सोऽयं दोषो गड्डरिकाप्रवाहस्यैव। सर्वेऽपि प्रकाशका वाञ्छन्ति यदस्माकं पत्रे प्रसिद्धप्रसिद्धपुरुषाणां निबन्धा भवेयुः। तेषां मध्ये कश्चन सारो भवेन्न वा, परं प्रसिद्धिं प्राप्तवतां लेखकानां नामधेयं दृष्ट्वा प्रकाशकाः पाठकाश्चेत्युभयमेव व्यामुग्धा भवन्ति। 'गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः' इत्यादय आभाणकाः केवलं पुस्तकस्था एव। व्यवहारे तु प्रसिद्धिरेव पूजास्थानमिति स्पष्टमवलोक्यते। इदानीं स्पष्टमिदं प्रत्येतव्यं भवति यत्-देशप्रचलितेषु सर्वेष्वेव पत्रेषु निबन्धप्रदानार्थं ते वराकाः समयं कस्य वा विधातुः सकाशादानेष्यन्ति ? फलमिदं भवति यत्प्रकाशकैर्बहुधा अनुरुध्यमानास्ते यत्किञ्चिल्लिखित्वा प्रेषयन्ति। बुभुक्षिताः प्रकाशकाश्च स्थूलस्थूलैरक्षरैः 'अमुकमहोदयेन लिखितो निबन्धः' इति सगर्वघोषणं सूचयन्तस्तं बहुमानेन प्रकाशयन्ति। अस्मादृशानां स्थूलमतीनां दृष्टौ तु नेदं साहित्यस्य गौरवाय प्रत्युत साहित्यविषयकदारिद्र्यदर्शनायैवेदम्। किन्तु प्रसिद्धिप्रलोभनचक्रिकाया घर्घरारवे को वा ईदृशानुपदेशान् प्रति कर्णं दातुं शक्नुयात्? अस्यां हि चक्रिकायां नवनवोत्साहिनां बहूनामेवाभिनवलेखकानामुदीयमाना भूयांस एव निबन्धाश्च तत्सम्बन्धिन उत्साहाश्च निर्दयतया चूर्ण्यन्ते।

एष किल शुद्धस्य साहित्यक्षेत्रस्य लिख्यमानानां निबन्धानां वृत्तान्तः। यदि त्वस्मिन् साहित्ये अर्थकरी काचिद्विद्यापि सम्मिलिता भवति तर्हि तु तन्निबन्धानां मूल्यमवाङ्मन-सगोचरमिव भवति। अनुमीयतां यदि आयुर्वेदसम्बन्धिनां निबन्धानां कश्चित् प्रामाणिकः सङ्ग्रहः प्रकाशनीयो भवेत् तर्हि तदर्थे काः का वा संघटनाः कर्तव्या भवेयुः ? अस्मिन् हि क्षेत्रे प्रसिद्धिं प्राप्ता निबन्धलेखका महामहान्तो वैद्यकविराजा एव प्रार्थनीया भवेयुः। एते च सर्वे धनकुबेरायिता एव। सुप्रसिद्धो गुणवान् वैद्यविद्यापरिनिष्ठितश्च यदि भिषग्वरो भवेत्, अवश्यं स हि प्रभूतस्य धनस्य स्वामी अपि भवेत् अन्यथा तस्य ख्यात्या वैदुष्येण च किं

फलमुपलब्धम्? एतेषु हि महाभागेषु एवंविधा अपि भाग्यवन्तः सन्ति ये एकदिनस्य चिकित्सार्थं प्रत्यहं सहस्रं मुद्राः केचिच्च पञ्चशतानि मुद्राणां गृह्णन्ति। एकवारस्य रोगिदर्शनस्य निष्क्रयं चतुःषष्टिरूप्यकाणि प्राप्नुवन्ति। इदानीमेतेषां महापुरुषत्वं स्वयमनुमातव्यं स्यात्।

श्रीमत्याः लक्ष्मीदेव्याश्च यः स्वभावः सोऽपि विश्वविदित एव। एषा हि पुराणमपि पुरुषं भोगशयानं विदधाति। कर्णवन्तमपि दीनवचःश्रवणे अकर्णमिव सम्पादयति। एतदुपर्यपि कुष्ठे खर्जूः सेयं यदेते सिद्धाः प्रसिद्धाश्च वैद्यकविराजाः सन्ति। परःसहस्रमुद्रोपहारेण यथैते धनिकांश्चिकित्सन्ते तथा शतवारान् निजदेहली-प्रणामं कारयित्वा मध्यवित्तान् दीनांश्चापि भेषजैरनुगृह्णन्ति। आतुरः किलैते प्राणाभिसराणामेषामवसरं प्रतीक्षमाणा निजनिजदुःखसंकथाः सङ्कीर्तयन्त्येषां पुरतः। एते तु निरन्तरं परवेदनाश्रवणाभ्यासितया शनैः शनैस्तथा धीरोदात्तहृदयाः सम्भवन्ति यथा एकद्विवाराणां प्रार्थना तु नैषां महोदयानामाभिमुख्यमपि सम्पादयति। यावदनुभवी प्रसिद्धो धनिकश्च वैद्यो भवेत्तावदेव तस्य धीरगम्भीरतापि अनिवार्या स्यात्। निरन्तराभ्यासदृढीभूता सा मनस्वितैव निबन्धलेखसिद्धावपि अर्गलायिता भवति।

नानाविधसाध्यसाधनाभिर्निजसमकक्षस्य कस्यचन वैद्यपुङ्गवस्य भूयसाऽनुरोधेनापि सर्वदेशप्रसिद्धानां महामहावैद्यानां निबन्धास्तु बहुशोऽप्राप्या एव। अस्ति हि तेषां सिद्धान्तः- 'महावैद्यस्य देहोऽयं क्षुद्रकामाय नेष्यते'। तेषु ये केचिल्लोकानुग्रहकाम्यया केनचिदभिसन्धिना वा निबन्धप्रेषणे मनः कुर्वन्ति तेऽपि महतानुग्रहेण कञ्चन निजं विद्यार्थिनं प्रेरयन्ति। स एव तेषां मनोभावान्निबन्धरूपेण सङ्गृह्य, विशृङ्खलरूपेण पूर्वलिखितं तेषां सन्दर्भं वा निबन्धशृङ्खलया नियम्य प्रेषणानुकम्पां करोति। प्रेषणावधिस्तु तेषामिच्छानुसारं स्वैरं दीर्घदीर्घतरीभवतीति तु अकथितमपि विज्ञैर्बोध्यमेव। हन्त! एवं विधतपश्चर्याभिः प्राप्तोऽपि सोऽयं निबन्ध, प्रकाशकस्य कृते पुनः परिश्रमप्रसूर्भवति। मुद्रणयन्त्रालयस्थाः कथयन्ति 'नायं लेखः पठितुं शक्यते। विरामविच्छेदचिह्नान्यपि लुप्तानि। यत्र तु कृतानि तत्र विरुद्धमेव भावं सृजन्ति'। अन्ततो गत्वा तस्य लेखस्य पुनः प्रतिलिपिः कारणीया भवति। परं प्रतिलिप्या किं भवेत्? विधातृलिपिर्यदि सहसा सर्वैर्वाचनीया भवेत् तर्ह्यस्यामपि चञ्चुप्रवेशो भवेत्। कुत्रचित् कुत्रचिदक्षराण्येवं लिखितानि भवन्ति-'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।' सन्देहे सति निबन्धलेखकमहाभागं प्रति प्रश्नस्तु समुद्रं प्रति पारगमनप्रार्थनाप्रश्नः! स्वल्पतमेऽमिस्मन्नवकाशे अतलस्पर्शिनोऽस्य लेखस्य कं कं वा सन्देहं कथं केन वा प्रकारेण पृच्छेद्वराकः? धैर्यस्य दृढकपाटं भित्त्वा यावत्तेषामुत्तरं प्राप्येत तावता प्रकाशनस्य समय एव सर्वो व्यतिगच्छेत्। इतो यन्त्रालयस्थाः प्रतिदिनं नानाविधयन्त्रणां प्रदद्युः। अत एव शोधकस्य क्रोधः, निजभाग्यं प्रत्यनुतापो वा वराकस्य हृदय एव जीर्यति।

अशुद्धे मुद्रिते प्रकाशकस्य शिरसि जनतादत्तः कलङ्कलेपस्तु सुस्थिर एव, परं निबन्धलेखकानां पक्षादपि तस्या अशुद्धेर्दायित्वभारः प्रकाशकस्योपर्येवापतति। निबन्धेन सह तेषां कृपापत्रमागच्छति-'अस्माकमवकाशो नास्तीति पूर्वं सूचितमेवासीत् परं श्रीमतामाग्रहातिशयात् सोऽयं निबन्धोऽतिशयशीघ्रतया लेखितः, अत एव यदि काचिदशुद्धिः

स्यात्तर्हि सानुकम्पं शोधनीया। परिश्रमार्थं क्षमामभ्यर्थये इत्यादि''। निबन्धमालाप्रकाशनस्य सुखप्रदं परिणामं प्रतिपदं भावयन् वराकः सर्वमिदं यावच्छक्यं करोति, बलाद्वा कर्तव्यं भवति। किन्त्वेतत् सर्वं सहित्वापि निबन्धैर्लाभः सामान्यप्राय एव भवति। यतो हि येषां महानुभवशालिनां निबन्धैर्जनताया भूयानुपकारः प्रतीक्षितोऽभूत ते सिद्धवैद्यास्तु औषधव्यवस्थापत्रं विहाय लेखनीचालनस्य शपथमेव कृतवन्तः। इदानीं ये निबन्धाँल्लिखन्ति, उपयुक्तांश्च लिखन्ति ते तादृशा एव सन्ति ये वैद्यव्यवसायक्षेत्रे प्रविविक्षवः सन्ति, प्रविष्टमात्रा वा सन्ति। एतेऽपि यदा अनुभविवैद्यपदमधिकरिष्यन्ति तदा एतेषामपि लेखावकाशः खपुष्पायितो भविष्यति, लेखनी वा हस्ताद्विसर्जिता भविष्यति। अधुना तु–वैद्यसमाजेऽस्माकं प्रसिद्धिः स्यादित्युत्साहेन एते गवेषणापुरस्सरं लिखन्ति निबन्धान्। एतेषामेव चोत्साहेन एवंविधा निबन्धमाला गुम्फितापि भवति, अन्यथा महामहावैद्यानां कृपया तु अस्याः सूत्रमेव विच्छिन्नं स्यात्का वा कथा गुम्फनस्य ?

ये किल महोदया मत्कथनमत्युक्तिकोटौ संघटयेयुः ते हि प्रतिवर्षभाविनीषु अखिलभारतीयवैद्यसम्मेलनसदृशीषु संस्थासु परीक्षां कुर्वन्तु। अत्र हि प्रतिवर्षं निबन्धपाठो नियततया निर्द्धारितोऽस्ति। परं तत्र निबन्धपाठको लेखकाश्च त एव भवन्ति ये वैद्यव्यवसायक्षेत्रमचिरात्प्रवेक्ष्यन्ति साम्प्रतमेव प्रविष्टा वा। सिद्धास्तु निबन्धपाठसमये साक्षिवत्तटस्था एव भवन्ति। उचितमपि चेदम्–यावता कालेन ते निबन्धे मस्तिष्कं क्षपयेयुस्तावता ते यदि कस्यचन महाजनस्य चिकित्सां कुर्युस्तर्हि कियान् लाभो भवेत् ?

एवं किल साहित्यक्षेत्रे नानासुखैः प्रबलतमं प्रवहति निबन्ध-सिन्धुप्रवाहे वर्तमानयुगेनानेन पुनरेका प्रोद्दामतमा लहरी तस्मिन्प्रवर्तिताऽस्ति। अधुना हि कस्यचिद्विशिष्टपुरुषस्याऽभिनन्दनार्थमपि निबन्धानामुपयोगिता सञ्जातास्ति। पूर्वं हि कविताभिः प्रशस्तिपत्रैश्चाप्यभिनन्दनकार्यमक्रियत, परं सम्प्रति तु निपुणतमैः साहित्यशिल्पिभिर्गुम्फितां निबन्धमालामेव वक्षसि ससमादरं समर्प्य निजाभिनन्दनीयस्य पुरुषस्य सम्मानं प्रकटीकर्तुं शिक्षितं शिक्षितैः।

शिक्षायाः क्षेत्रे तु निबन्धलेखप्रबन्धो बहोः कालादेव प्रचलितोऽस्ति। स्कूलकालेजेषु हि प्राथमिकशिक्षात आरभ्य उन्नतोन्नतशिक्षापर्यन्तं सर्वास्वेव परीक्षासु निबन्धलेखस्य नियमो निर्धारितोऽस्ति। संस्कृतशिक्षायामपि निबन्धरचनायाः सर्वतोमुं साम्राज्यम्। संस्कृतशिक्षाया युगक्रमानुसारी इतिहासो न केनचित्प्रकाशितोऽस्ति,येन वयं स्पष्टं जानीमो यत्प्राचीनकाले पाण्डित्यस्य परिमाणार्थं को वा मानदण्डो निरधार्यत तैः। किन्तु मध्यकाले वर्तमानशताब्द्याः पूर्वपर्यन्तं शास्त्रविषयकैर्वादानुवादैरेव संस्कृतपण्डितानां वैदुष्यपरिचयः प्रसिद्धोऽभूद्देशे, यस्याः किल प्रथाया भग्नावशेष इदानीमपि काश्यादिस्थानेषु यत्किञ्चिदवलोक्येत, यस्याश्च पद्धत्या लिखितप्रमाणानि नवीनन्यायस्य व्याकरणस्य च क्रोडपत्त्राणि सन्ति यानि हि वादमात्रपाण्डित्यानां वावदूकमहाभागानां जीवितस्थानीयान्यभूवन्। एतानि हि निजविजयस्य प्रधानशस्त्राणीति मनसि सुभृशमाश्वस्य पण्डितमहाभागैर्न कस्मैचिददर्श्यन्त। स्वान्तेवासिभ्योऽपि

सेवारूपां पूर्णदक्षिणामादायापि नोन्मुक्तहृदयेन निःशेषं प्रदातुमशक्यन्त। अस्तु, विवादतो दूरं पलायमानेऽस्मिन् समये अनधिकारिपुत्रमहाशयहस्तपतितान्येतानि अवकरबन्धनान्यासेवन्ते मूषकमहोत्सवाय वा जायन्ते।

गतः स समयः। सम्प्रति लेखपरीक्षायुगेऽस्मिन् निबन्धैरेव पाण्डित्यपरिचयः प्राप्यते मार्मिकैः। कीदृशोऽपि शास्त्रविषयो भवतु, परीक्षणकाले व्युत्पत्तिप्रदर्शनं तु तावन्निबन्धैरेव भवेत्। अत एव तदर्थं परीक्षासरितमुत्तितीर्षूणां विद्यार्थिनां नितान्तमिह चिन्तासन्तानो विलोक्यते। पाठ्यग्रन्थानामुल्लङ्घनार्थं तु अव्यभिचरितप्राया नानाविधा उपाया आविष्कृताः परीक्षार्थिभिः,येषु हि गतवर्षीयाणां प्रश्नपत्राणां विमर्शः, परीक्षणीयग्रन्थेषु प्रष्टव्यस्थलानामनुसन्धानमित्यादयः प्रमुखा उपायाः प्रसिद्धा एव। किन्तु निबन्धलेखदिने तेषां चञ्चुप्रवेशो नांशतोऽपि भवति। यत्किञ्चन व्युत्पत्तिं विना बाह्यैरुपायैस्तद्दिने साफल्यलाभः प्रायो दुष्प्राप एव। यद्यपि निबन्धरचनापत्रे यदि कस्यचित्काव्यादेरपि निवेशो भवेत्तर्हि तद्व्याख्याऽनुशीलनेन उत्तरणोपयोगियोग्यताङ्कलाभः सम्पाद्यते तैस्तयापि व्युत्पत्तिप्रदर्शनदिने सेयं प्रबन्धरचनापिशाची तेषां हृदयदेशमुत्पीडयत्येव। एतदर्थमपि नानाविधोपायानामारम्भः सञ्जातोऽस्ति। निबन्धरचनादर्शः, प्रबन्धचिन्तामणिः इत्यादीनि पुस्तकानि निर्मितानि निर्मीयन्ते च येषामनुशीलनेन संस्कृतशिक्षार्थिनो निबन्धरचनाविषये बहुतरं साहाय्यं लभेरन्। हिन्दीभाषायां तु एतद्विषयकाणि बहून्येव पुस्तकानि सन्ति, निर्मीयन्ते च सम्प्रति। अस्तु, सोऽयं विषयः स्वतन्त्रोऽस्ति। नास्मिन् लेखे तल्लेखनप्रकारो निदर्शनीयो मे। सेयं रचना काव्यसंघटनैवाऽन्यतमा। अत एव एकद्वैर्निबन्धैः सहसा सेयं निरूपयितुमपि न शक्येत। किन्तु ये महोदया निबन्धान् लिखन्ति प्रेषयन्ति च ते लिप्यामेव कीदृशीं विशृङ्खलतामुत्पादयन्ति, चिह्नानां कीदृशं दुरुपयोगं कुर्वन्तीति प्रसङ्गतस्तदेतत्प्रकटयितुमिच्छामि।

***

# लिपिविषये निवेदनम्

**सुवाच्यलिपिः**

'निबन्धरचना' स्वतन्त्र एको विषयोऽस्ति। तन्निबन्धनशैलीप्रदर्शनं नास्य लेखस्य विषय इति पूर्वं निवेदितवानस्मि। किन्तु निबन्धरचनोत्तरं प्रकाशकस्य सविधे प्रेषणे,ये ये बाह्याश्चावश्यकाश्च विषया उपतिष्ठन्ते तत्सम्बन्धे यत्किञ्चिन्निवेदयितुमिच्छामि। सर्वतः पूर्वं लिपेः प्रश्न उपस्थितो भवति। लिपिर्मौक्तिकानुकारिभिः सुन्दराक्षरैर्मनोहरा यदि न भवेत्तर्हि सुवाच्या त्ववश्यं भवेदिति को वा न मंस्यते? अस्माकं नागराक्षराणां लिपिर्दर्शने मनोहरा, पठने च निर्भ्रमेति सर्वसम्मतम्। अस्यां यद्विलिख्यते तदेव पठ्यते। अन्यान्यलिपिवत् अन्यल्लिखितम् वाचकैरन्यदेव पठ्येत इति घोरारम्भो नास्ति किन्तु भारतीयसाहित्ये निबन्धरचनायाः क्षेत्रवृद्धिर्यथा यथा भवति तथा तथा लिपिसौष्ठवस्य क्षेत्रं प्रत्यहं सङ्कुचितं भवतीति दृश्यते। मुद्रायन्त्राणामाविष्कारेण सुन्दराक्षरलेखकानां लिपिकराणामुद्भवस्तु बहोः कालादेव निरुद्धः। साम्प्रतं तु–अक्षराणि वाचयितुं शक्येरन् एतावदेव लेखकस्य कृतित्वं परिबुध्येत। परं वर्तमानसमये अस्मिन्विषयेऽपि उत्तरोत्तरं ह्रास आरब्धोऽस्ति। लेखकमहोदया यथा यथाधिकान् लेखान् लिखन्ति तथा तथैव समयाय संक्षेपमभिलषन्तो नागराक्षराणां रूपमेवान्यथा सम्पादयन्ति। ये ये महान्तः पत्रसम्पादकाः सन्ति, ये वा नामङ्किता लेखकाः सन्ति तेषु साम्प्रतं विरला एव तादृशाः लभ्येरन् ये हि धैर्येण यत्किञ्चिल्लिखेयुः। अन्यथा लोहमुखीं लेखनीं पत्रोपरि हरिणीप्लुतैः प्लावयन्तस्ते तादृशं लिखन्ति यत् पठनकाले अन्यस्तु भ्रमं गच्छेदत्र आश्चर्यमेव किं परं कदाचित्कदाचित्स्वयमपि तत्पठने व्यामुह्यन्ति। प्राचीनमाभाणकं[१] ते सर्वथा सत्यं कुर्वन्तीति बहुवारान्मया प्रत्यक्षमनुभूतम्।

सोऽयमेकतायाः समय इति मनसि कृत्वैव पूर्वं पूर्वमक्षरम् उत्तरोत्तरेण तथाऽऽश्लिष्टं स्थापयन्ति यथा अद्भुतैव एका सरणिरालोक्यते। अथवा 'जीवनसङ्ग्रामः' इति पाश्चात्यशिक्षां प्राप्तवन्तस्ते अक्षरलिप्यामपि तथा दृश्यं दर्शयन्ति यथा महाभारतस्य युद्धचित्रमिव पत्रं परस्पराक्षरसङ्कुलं चित्रलिपिपूर्णमिवाऽलोक्यते। सनातनधर्मिणो लोकाः समाजाद्वर्णसाङ्कर्यं यथा यथा निवारयितुं प्रयतन्ते तथा तथा तत्प्रतिस्पर्द्धयेव लिप्यामप्येते वर्णसाङ्कर्यं प्रत्यह सृजन्ति। रेफः कोष्ठकचिन्हमिव '(' वक्ररेखामात्रे परिणतोऽस्ति। महाराष्ट्राणामिव 'ण' कारं लिखन्तस्ते द्रुतलिप्यां तं पकाररूपे परिणामयन्ति। यकारपकारयोर्लिपिप्रकारस्तथा संश्लिष्टः प्रचलितोऽस्ति यथा अर्थप्रसङ्गेनैव तयोर्भेदः परिज्ञातो भवति। ख'कारस्य, रव इति रेफवकारयोश्च लेखने तथा लाघवं प्रदर्शयन्ति यथा द्वयोः परस्परं भेदो विचारमार्गप्रहितेन चेतसैव परिगृह्यते। एतस्य फलमिदं भवति यत् 'खण्डं खण्डं युयुर्घनाः' इति लिखितेऽपि 'रवण्ड रवण्डं पपुर्धनाः'

---

१. 'वाचयति नान्यलिखतं लिखितमनेनापि वाचयति नान्यः।
सखि मम भर्ता विद्वान् स्वयमपि लिखितं स्वयं न वाचयति।।'

इत्यव्युत्पन्नैः पठ्यते। सर्वोदाहरणप्रदर्शनेन लेखे अतिप्रसङ्गो भवेत्परम् अनया द्रुतलिप्या कीदृशी वा अर्थबोधे कठिनता प्रचारितास्तीति स्थालीपुलाकन्यायेन विवेकिभिर्विज्ञातमेव भवेत्।

बहवो महाभागा मनसि मन्यन्ते यदक्षरलेखनस्य एतदेव प्रयोजनं यदन्यो यथा कथञ्चित्तत्पठेत्। तत्र निरर्थक सौन्दर्य-सम्पादनं समयस्य दुरुपयोग एवेति। एतस्योत्तरे किञ्चिद्विस्तारेण निवेदयितुमिच्छामि। महाभागाः! निबन्धगुम्फोऽयमेकप्रकारेण गद्यकाव्ये-ऽन्तर्गतो भवति। काव्यं तु प्रसादपूर्णं तदेव प्रशस्यते यस्य दर्शन-श्रवण-मात्रेणैवार्थप्रत्ययो भवेत्। अत एव हि द्राक्षापाकः प्रशस्यते, यस्यास्वादमात्रे झटिति रसप्राप्तिर्भवति। न तु पाषाणपाकमभिरोचयन्ति यत्र हि कष्टशतैरर्थबोधसम्भवः। अर्थाधिगमे क्लेशप्राप्तिरेव रसस्य बाधिकेति सर्वस्य सारः। सन्दिग्धनिहतार्थादिषु (काव्यदोषेषु) विलम्बेनार्थबोधकतैव दूषकताबीजम्। एवमेव भ्रामकलिप्यामपि अर्थबोधे महत्काठिन्यमु-पतिष्ठते, ततश्च किं रसास्वादो न विहतो भवेत्? पुस्तकपाठे रसाविष्ट एकः पाश्चात्यलेखकोऽ-लिखत्- ''मुद्रायन्त्रालयकर्मचारिभिः अच्छिन्नपत्रं तत्पुस्तकं पठन् स्वहस्तेनैव च क्षुरिकया पत्राणि पृथक्कुर्वन्, रसास्वादे अतीवान्तरायमगणयम्। क्रोधाविष्टस्य मे मनस्यभवत् यत् अनया क्षुरिकयैव तस्य कर्मचारिणो वक्षः स्थलम्....''। हन्त! यदा पत्रपृथक्करणमेव अर्थव्याघातकतया तादृशक्रोधकारणं मन्यते तदा नानाविधैरूहापोहैर्यत्र अर्थसङ्गतिः करणीया भवति तादृशी दुर्लिपिः किं वाचकस्य हृदये चन्दनचर्चेव शान्तिकारिणी सिध्येत्?

किञ्च-यथाकथञ्चिद्वाचनमेव अक्षरलिपेः प्रयोजनमिति ये महाभागाः कथयन्ति, तत्राप्यस्ति सन्देहः। अर्थबोधे जातेऽपि सुन्दरलिप्या मानसस्योपरि यः प्रभाव उत्पद्यते, तस्यापलापः कर्तुं न शक्येत। जानन्त्येव सर्वेऽपि-यत् काव्यगताः शब्दाः स्वीयमर्थमुपस्थाप्य पठितुश्चेतसि तत्तादृशं चमत्कारं सृजन्ति। ततश्च तादृशचमत्कारं प्रति अर्थस्यैव कारणत्वम्। शब्दास्तु अर्थबोधनमात्रप्रयोजनका न स्वातन्त्र्येण कारणभूताः। एवं सत्यपि-जगति काव्यगतानामक्षराणामभ्युपगम्यत एव कश्चित्प्रभावः, अर्थे समाने सत्यपि एवं विधैरक्षरैरयमयं रसो वा भावो वा भृशमभिव्यक्तो भवतीति। अत एव अर्थबोधे समाने सत्यपि सभ्यसमाजन सुन्दराः सुश्राव्या एव शब्दाः प्रयुज्यन्ते न साधारणाः। एवमेव सुश्राव्यशब्दानां द्वारा अर्थबोधेन सह सुन्दरलिपेः प्रभावोऽपि दुरपह्नव एव। यद्यर्थबोध एव अक्षराणां प्रयोजनमभविष्यत्, तर्हि सुन्दरलिपिसम्पादनार्थमेतावान् प्रयत्नो निरर्थक एवाभविष्यत्। अद्य हि मुद्रिताक्षराणां मनोहरतासम्पादनाय यन्त्रालयाध्यक्षाः परःसहस्रमुद्राणां व्ययं कुर्वन्ति। वयमपि च नयनमनोहारिणमेव मुद्रणप्रकारमभिरोचयामो न दरिद्रप्रायम्। एतस्यैव कारणेन प्राचीनाः 'लिथोमुद्रायन्त्रालयाः' सर्वदार्थं निमीलितनयनाः समभवन्। इदानीं कथयत अर्थबोधे नास्ति किं लिपेः प्रभावः कश्चित्?

अपि च-द्रुतलिप्या व्याजेन येयं भ्रष्टलिपिः साम्प्रतं प्रचरितास्ति, तस्या अन्तरालेऽप्येकं निगूढमस्माकमकर्मण्यतायाः कारणमन्तर्हितमस्ति। जानन्त्येव सर्वेऽपि विवेकिनो

यन्नवीनशिक्षिता हिन्दीलेखकमहाभागा हृदयेन पाश्चात्त्यरीतिमेव अभिरोचयन्ति। 'हौणी' लिपिलेखकाः पाश्चात्त्याश्च-'लेखनसमये लेखनी नोत्थापनीया भवेत्, किन्तु परस्पराश्लिष्टानामक्षराणां तथा सरणिरङ्कनीया, यथा गोमूत्रिकासरणिरिव एका व्रततिशृङ्खलेव मध्ये मध्ये विरता अक्षरलेखा सम्पद्यते, एतादृशीं लिपिमेव कारणविशेषैः प्रचारयितुमिच्छन्ति। तेषामक्षराणां लेखनप्रकारोऽपि स्वभावतस्तादृश एव। अत एव ते सुवाच्यतापेक्षया समयन्यूनतामेव बहु मानयन्तस्तादृशीं लिपिमङ्गीकुर्वन्ति। एतस्य फलमिदं जातं यत्स्पष्टलेखनस्य प्रकार एव विच्छिन्नोऽभूत्, तदर्थं च 'अक्षरलेखकयन्त्रस्य' (टाइपराइटर) आविष्कारोऽभवत्। इदानीं न कोऽपि सभ्यमानी लिखित्वा पत्रं प्रार्थनापत्रं वा प्रेषयितुमिच्छति। न्यायालये, व्यापारे, परस्परव्यवहारादिषु च सर्वत्रैव 'टाइपराइटिङ्ग'मेव व्यवहृतमभवत्। एतत्कारणात्स्वक्षरलेखका जनास्तत्समाजे गवेषणीया अभवन्। अनुकरणपरा भारतीयमहोदया अपि तामेव पद्धतिमनुव्रजन्ति। नागराक्षराणां पृथक् पृथग् लेखनीयत्वेऽपि आङ्ग्लानुकरणेन साम्प्रतिका महामहोदयास्तथा लिखन्ति, यथा नागरलिपिरपि- दूरत आङ्ग्ललिपिमनुहरति। अत एव स्पष्ट-सुन्दरलिपेः कृते नागराक्षरलेखकयन्त्रम् (हिन्दी टाइपराइटर) इहाप्यावश्यकमभूत्। इदमतिसन्निहितमस्ति जातप्रायं चापि, यत् स्पष्टसुन्दरनागराक्षरलेखकाः सहस्रेषु गवेषणीयाः सम्भवेयुः। एतदर्थं वयमपि 'टाइपराइटरस्य' मुखप्रेक्षका भविष्यामः। अस्तु, स्पष्टलिपेरुपरि अवधानमावश्यकमिति वक्तव्यस्य सारः। ये महाशयाः साम्प्रतमनुकरणरसान्धा न किञ्चिच्चेतयन्ते, तेऽप्यग्रे दुष्फलमनुभूय अनुतप्स्यन्ते इति भविष्यतो गर्भे निलीनमस्ति।

**विराम-विच्छेदौ**

प्राचीना परिपाटी आसीद्यद् अक्षराणां पङ्क्तौ मध्ये स्वल्पोऽपि विच्छेदो न भवेत्, मौक्तिकस्रगिव सा वर्णपरम्परा आरम्भादन्तपर्यन्तमेकधारा भवेदिति। परं सेयं सरणिर्वर्तमानयुगे भ्रमपूर्णा सिध्यति। इदानीं हि पदच्छेदपूर्वको लेख एव सामान्यैरप्याद्रियते। यत्र हि पदद्वयमध्ये स्वल्पमप्यन्तरं न भवेत्तत्र सम्प्रति समासभ्रमो भवति। यथा 'मधुसूदन वेणुना विनोदः' अत्र मधुसूदनेति सम्बोधनपदेन सह 'वेणुना' पदं यदि व्यवधानरहितं लेखिष्यते, तर्हि मधुसूदनस्य वेणुरिति समासभ्रमेण भूयानर्थभेदः स्यात्। त्रिंशच्चत्वारिंशद्वर्षेभ्यः पूर्वपर्यन्तं यानि पुराणादिपुस्तकानि मुद्रितानि तेषु पदच्छेदो नास्त्येव, तानि हि धाराप्रवाहरूपेण मुद्रितानि। किन्तु साम्प्रतं किञ्चिदपि पदविच्छेदाभावे लोकानामरुचिरुत्पद्यते। एतद्विषये अधिकलेखनस्य नास्त्यावश्यकता। 'पुरा पत्राणि महर्घाण्यासन्। एतदर्थं तालपत्रेष्वपि लेखनमावश्यकमभूत्। ततश्च पत्रसङ्कोचादेव धारालिपिः प्रचरिताऽभूदिति' तु न वयं कल्पयितु प्रभवामः। अस्ति हि मनोरुचिः सेयम्। पुरातना अविच्छिन्नामेव लिपिं प्राशंसन्। किन्तु तस्यां पदच्छेदादिकल्पनापूर्वकमर्थप्रतीतौ भूयान् मनोव्यापारः समयव्ययश्च भवतीति को वा अनाग्रही न मन्येत?

**सन्धिः**

एवमेव सन्धिसम्बन्धेऽपि बहु विचारणीयमस्ति। सहस्रद्विसहस्रवर्षेभ्यः पूर्वलिखितानि पुस्तकानि तु न सर्वेषां प्राप्याणि। तानि यदि भवेयुस्तर्हि पुरातनवस्तुसङ्ग्रहालये (म्यूजियम-पुरातत्त्वविभाग) निबिडनिबद्धानि भवेयुः। किन्तु बहुपुराणसमयस्य यानि तन्त्रादिपुस्तकान्युपलभ्यन्ते, तेषु व्याकरणस्य घोरनियमानुसारीणि सन्धिकार्याणि न विलोक्यन्ते। सर्वेषां सरलतया स्याद् बोध इत्येव तेषां तात्पर्यम्। सर्वेष्वेव पुस्तकेषु सुबोधताया उपरि प्रधानतया दृष्टिर्दत्तास्ति। भाषैव तेषां दृश्यतां कीदृशी सरला सुबोध्या चास्ति यां साधारणव्युत्पन्नोऽपि सम्यग् बोद्धुं पारयति। अत एव तेषां यदि तात्पर्य सर्वबोध्यताया उपर्यस्ति, तर्हि अर्थस्य दुर्बोधतासम्पादकानि क्लिष्टानि सन्धिकार्याणि तेषामिच्छानुसारीणि न सन्तीति स्पष्टं सर्वैः प्रतीयेत। तेष्वपि पुस्तकेषु यदि घोरव्याकरणनियमानुरोधीनि सन्धिकार्याणि कृतान्युपलभ्येरन्, तर्हि मध्यकालिकानां लेखकमहाशयानां सेयं हस्तचातुरीति स्पष्टं प्रत्येतव्यं भवेत्। मध्यकाले (यस्मिन् हि समये एकैकशास्त्राणां क्लिष्टं पाण्डित्यमेव प्रतिष्ठायै अभूत्) शास्त्रानुगमदर्शनार्थं प्राचीनैः पण्डितैर्बलादाकृष्याकृष्य क्लिष्टातिक्लिष्टानि सन्धिकार्याण्यवश्यं कृतान्यभूवन्। आसीत्सोऽपि समयो यत्र हि पुस्तकस्यान्ते-'आलोकटीका समाप्तिमफाणीत्' इत्यादीनि मनोहराण्यक्षराणि लेखितव्यान्यभूवन्। सन्धिकार्यस्य केवलप्रपञ्चार्थमेव 'संस्कर्त्ता' इत्यस्य अष्टोत्तरशतं रूपाणि कल्पितानि, विद्यार्थिद्वारा घोषितानि च। परं प्रगतः स समयः।

भगवती संस्कृतभारती साम्प्रतमस्माकं भागधेयैर्विरलप्रचारा संवृत्ता। द्वितीयभाषारूपेणैव सम्प्रति साधारणजनतया यदि स्कूलकालेजेषु सेयं पठ्येत, तर्हि महद् भागधेयं परिगण्यते। ब्राह्मण्यजीविकामात्राश्रयाः केचन विप्रपरिवारास्तामेतां एतस्याः प्रतिदिनभाविनं विरलप्रचारं दृष्ट्वा एतत्सेवका एतस्याः प्रसारक्षेत्रवृद्धयर्थं प्राणपणेन प्रयतन्ते। यथास्याः सर्वसाधारणेषु प्रचारो भवेत्, यथा चास्यां लोकानामनुरागः स्यात्तदर्थं नानाविधा उपायास्तैरनुष्ठेयाः, यदि वास्तवं ते गीर्वाणवाणीसेवकाः। अस्मिन् हि समये एतस्या सर्वबोध्यतैव कामनीया, न पुनर्जटिलता। अत एव सरलसुबोधपदप्रयोगद्वारा यथा सेयं सरला सम्पाद्यते तथैव सन्धिकार्यैर्जायमानाप्येतस्याः क्लिष्टतापि परिहरणीयैव। नाधुना समयो यत् सन्धिकार्यसूत्रेषु विकल्पाज्ञायामपि वयं बलात् 'अमुमुयङ्ख्षण्मुखः' प्रयुञ्ज्मः। किं नु भवाञ्च्शास्त्रीति 'साम्प्रतं सुबोध्यं भवेत्? किन्तु सन्ति तादृशा अपि महानुभावा ये रामः पठति' अत्र विसर्गस्थाने उपध्मानीयावेव नियमेन लिखेयुः। निबन्धप्रेषकेष्वपि एतादृशानां त्रुटिर्नास्ति।

सर्वे जानन्ति यदेतेषां व्याकरणबलं सारस्वतपूर्वार्द्धम्। एतदनन्तरं च निजप्रज्ञाबलेन अध्यापनकार्यार्थं परीक्षार्थं वा लघुकौमुद्यपि दृष्टा। किन्तु तेऽपि निजस्य व्याकरणाभिज्ञतां साधारणेषु ख्यापयितुं स्वकाव्ये लिखन्ति-'वसन्तसमीपे न हि जातु दध्यौ' 'दाक्षिण्यवान्त्सोऽस्य कृते' इत्यादि। किं वा फ्लमनया चपलचर्यया? उक्तौ हि प्रसादः प्रशस्यते न तावदकाण्डे क्लिष्टता। ननु-अस्माकं व्याकरणस्य नियमशृङ्खला विच्छिन्ना भवेत्। यदि सरलतादृष्ट्या सर्वेऽपि तादृशान् प्रयोगान् परिहरेयुस्तर्हि तादृशप्रयोगो कुत्रचिद् दृष्टे कथं वा लोकानामर्थबोधो

भवेत्। अत एव एतादृशाः प्रयोगा आवश्यका एव' इत्यप्याज्ञापनं न मे दृष्टौ सम्यक्। महानुभावाः! यत्र हि शास्त्रानुगमो दर्श्यते श्रीमद्भिः स्ववैयाकरणताप्रकाशस्य वा योऽवसरस्तत्र कामं प्रयुज्यतां तादृशं यदि प्रयुयुक्षाव्याकुलो भवान्। किन्तु ये निबन्धाः सहृदयानां मनस्तोषाय, साधारणानां च संस्कृतरुचिवर्द्धनाय मासिकादिपत्रेषु दृश्यन्ते तेषु यदि सन्धीनां घोरप्रयोगो न भवेत्तर्हि प्रत्यवायो भवेत्? अस्ति विकल्पाज्ञया तस्मिन्व्याकरण एव प्रत्यवायपरिहारोऽपि। अस्तुं प्रसङ्गेन बहु प्रोक्तवानस्मि। अस्मिन्विषये विशेषतो वक्तव्य स्वतन्त्रे निबन्ध एव निवेद्येत। इह तु एतदेव निवेदनीयं यत् संस्कृतभाषायाः सरलतासम्पादनार्थं सन्धीनां क्लिष्टता परिहरणीयैव। मादृशाः स्वल्पबुद्धयस्तु-यदि सन्धिकार्यं न क्रियेत पृथग् द्वयोः पदयोः प्रयोगश्चेत्क्रियेत तदापि न दोषः, सुबोध्यतैव सर्वात्मना सम्पाद्येति सम्मन्यन्ते। निबन्धलेखकमहाभागा यथारुचि समनुतिष्ठेयुः। पृथक् पदयोर्मध्ये 'वा पदान्तस्य' इति विकल्पानुशासनात्सन्धिकल्पनं क्लिष्टकल्पनैव।

पदच्छेदोत्तरं 'प्रघट्टक' विच्छेदस्य (पैराग्राफ) कथा उपस्थिता भवति। कैश्चिन्महोदयैः प्रेषितानि निबन्धस्य पत्राणि तादृक्सङ्कुलतया भरितानि भवन्ति यत्र मध्ये प्रघट्टकविच्छेदस्य चिह्नमपि नावलोक्यते। प्रकरणविच्छेदावसरे सत्यपि तेषां लेखसौष्ठवे बाधको भवति 'पूर्वोऽभ्यासः'। प्राचीनरीतेरनुगततया ते मध्ये-मध्ये सन्दर्भविच्छेदं न विरचयन्त्येव, अथवा वाञ्छन्तोऽपि कर्तुं न प्रभवन्ति। पङ्क्तेरादिभागे द्वित्राङ्गुलिपरिमितो भागश्चेदलिखितस्त्यज्येत तर्हि नवीनः प्रघट्टकः प्रारभ्यत इति मुद्रणालयस्थानां सङ्केतः। एवं कृते सति वाचक-महाभागानां पाठरुचिर्न व्याहन्येत। अन्यथा अदृष्टपारे पारावारे इव पाठकमहाभागानां प्रवृत्तिर्भयाकुलेव अनिच्छया व्याप्रियेत। भोजनपत्रावल्यां मनुष्यभोजनोचितं भोज्यमेकवारमेव परिवेष्य कश्चित्सहृदयश्चेद्भोक्तुमादिश्यते तर्हि भोजनरुचिः प्रतिहता भवतीति बहूनां स्वभावः। तदेवं भोज्यं कमशः कतिवारांश्चेत्परिवेष्येत, तर्हि सरुचिसुखं स भुंक्ते। एवमेव प्रघट्टकविच्छेदेन पुरस्कृतः पाठ्यविषयो न वाचकानां रुचिविघातको भवतीति वाचकमहोदयानां श्वासग्रहणावकाशदानार्थं प्रघट्टकविभागेऽपि अवधातव्यं स्यात्।

**चिह्नविचारः**

मुद्रणीयनिबन्धेषु साम्प्रतं लेखचिह्नानामुपयोगोऽप्यावश्यकः सम्पन्नः। चत्वारिंशद्-वर्षेभ्यः पूर्वं यानि पुस्तकानि निबन्धा वा मुद्रिताः, न तेष्वेतावान् चिह्नानामतीव मार्मिकी मीमांसा प्रारब्धाऽस्ति। द्विशतवर्षेभ्यः पूर्वं लिखितेषु अर्द्धविराम-कोष्ठक-संयोजकप्रभृतिचिह्नानां चिह्नं नावलोक्यते किन्तु सम्प्रति घट-पटादिसाध्यताऽवच्छेदकाऽऽच्छन्ना अपि, 'जौ है शौ हिन्दीभाखा गौर्वाणी की बिरोधिनी है' इत्यादि वाक्यामृतं वर्षन्तः पण्डितपर्जन्या अपि पूर्णविरामचिह्नम् 'पाई'(।) इत्याख्यं तु स्वलेखे प्रयुञ्जत एव। न्यायस्य व्याकरणस्य वा 'फाकी'-(फक्किका)-विषयं मुद्रणाय प्रेषयन्तो महाभागा अपि साम्प्रतं पूर्वोक्तचिह्नानामुपयोगं स्वलेखे कुर्वन्तो दृश्यन्ते। अन्यचिह्नस्य स्थाने अन्यकृत्वा 'विनायकं प्रकुर्वाणो रचयामास वानरम्' इत्यस्य दृष्टान्तभूता भवन्ति इति त्वन्यत्। परमेवंविधानां चिह्नानां प्रयोगस्तल्लिखित-पत्रेष्ववश्यं दृश्यते इति तु सर्वेऽपि द्रष्टारः साक्षिणो भवेयुः। एवंविधचिह्नानामाङ्ग्लभाषा-प्रचारकाल एवोपलभ्यमानत्वादन्वयव्यतिरेकाभ्यां राजभाषासम्बन्धिसामग्री सेयमिति मादृशानां

बुद्धौ स्फुरति। एतस्या अपि मूलं केषुचिदार्षग्रन्थेषु चेत्केचिदाविष्कुर्युस्तर्हि किमतः परं सौभाग्यम्? अस्तु,

एतेषां चिह्नानां प्रयोगविषये निबन्ध-कवितादिप्रबन्ध-लेखकमहाभागानां सेवायां सविनयं निवेदनं साम्प्रतमावश्यकं संवृत्तम्। यतो हि बहुष्वेव निबन्धेषु-मुद्रणात्पूर्वं तच्छोधनं कर्त्तव्यमापतति। अत एव प्रतिवाक्यमावश्यकानां प्रधान-प्रधानचिह्नानामुपयोगस्थलं किञ्चिन्निवेदयितुमिच्छामि। यद्यपि हिन्द्यादिभाषासु एतद्विषयकाण्यपि कानिचित्स्वल्पकायानि पुस्तकानि मुद्रितानि सन्ति, परं संस्कृतप्रकाण्डपण्डिता न तानि व्यवहारे आनयन्तीति तेषां सदयदृक्पातमाकर्ष्टुं सोऽयं व्यवसायः। किञ्च-यदि मद्बुद्धौ तदुपयोगविषये भ्रमो भवेत्सोऽपि तन्मार्मिकैः पण्डितैर्निरस्येत इत्याशया अंशतस्तदुपयोगस्थलमधस्तादुल्लिखामि। ये महोदया निबन्धलेखनविषये सर्वप्रकारैर्मल्लायिता न तेषां कृते सोऽयमारम्भः, किन्तु ये तद्रङ्गस्थले व्यायाममेवारब्धवन्तश्चिह्नानामुपयोगे स्वैराचारं चिकीर्षन्ति तेषां सविधे तदिदं निवेदनम्-

**पूर्णविरामः**- वाक्यस्य पूर्णतायामवसाने सरलैकरेखाकारं-( ।)-तदिदं चिह्नं प्रयुज्यत इति नास्य विषये निवेदनीयम्।

**अर्द्धविरामः** 'कॉमा' इति। यत्र वाक्यस्य सर्वथा समाप्तिर्न भवति किन्तु तदन्तर्गतम् अवान्तरवाक्यमेकं समाप्यते तत्रेदं प्रधानतया प्रयुज्यते। यथा-'न हि मृतेयं संस्कृतभाषा' मृतास्तु वयमेव ये नास्याः प्रभावोर्जितं महिमानमाकलयामः।'अत्र' न हि मृतेयं संस्कृतभाषा' इत्यवान्तरवाक्यस्य समाप्तिसूचनाय अर्द्धविरामचिह्नम् (' ') एतदाकारकं प्रयुज्यते। एकस्मिन् वाक्ये बहूनां पदानां समवाये सति पदानां पृथग्विभागार्थमप्यस्य चिह्नस्योपयोगः क्रियते। यथा-'यः त्यागी,कुलीनः,विद्यारतः, कलानां च स्थानम् भवेत्स एव नायकः प्रशस्यते'। अत्र हि त्यागी कुलीनः इत्यादिपदानामवान्तरविभागप्रकटनार्थमस्योपयोगः कृतोऽस्ति। अस्य चिह्नस्योपयोगे कृते चिह्नादग्रिमेण पदेन सह सन्धिकार्यं नोचितम्। यतो ह्ययं विराम इत्युच्यते। विरामे च द्वयोः खण्डयोः संहिताऽभावात्सन्धिकार्यस्यौचित्यं न। यथा 'धनमत्तो न गुरून्, न पूजनीयाः स्त्रियः, न चावसराऽनवसरौ, अर्थमनर्थं वापि नावेक्षते'। अत्र अर्द्धविरामचिह्नस्य प्रयोगे सन्धिकार्यं न कृतमिति प्रत्यक्षमेव।

**उद्धरणचिह्नम् ( इन्वरटेड कॉमा )**- यत्र हि कस्यचिद् भागस्य अविकलमुल्लेखः कर्तव्यो भवति तत्रेदं चिह्नम् उद्धरणीयभागस्याद्यन्तयोः(' ') प्रयुज्यते। यथा -आचारः परमो धर्मः' इति ह्यस्माकं घण्टाघोषः'। अत्र आचारः परमो धर्मः इति शास्त्रीयं वाक्यमपरिवर्तितरूपे इहोद्धरणीयमस्तीति तच्चिह्नचिह्नितमिह प्रयुक्तम्। उक्तिप्रत्युक्त्योरपि तदिदं प्रयुज्यते। यथा-'हे बालिके किं तत्र न गन्तासि?' 'राजन्! अधुनैव तत्र प्रतिष्ठे'। शिष्टप्रयोगानुसारं द्विगुणमपीदं प्रयुज्यते यथा-(" ") इति।

परं दृश्यते-बहवः शिष्टायिता महाभागा अपि अर्द्धविरामादि-चिह्नानामुपयोगेऽपि सन्धिकार्यं कुर्वन्तीति। यथा-'वासस्थानं,वयो, विवाहितत्वाऽविवाहितत्वे, रोगपरीक्षाया सहायका भवन्तीति'। अत्र यदा विभाजकचिह्नस्योपयोगः कृतस्तदा मकारस्थानेऽनुस्वारः, 'वयः' इति विसर्गस्य स्थाने रुत्वोत्वकार्यं नोचितमेव। निर्णयसागरसदृशविवेकिमुद्रणालयेष्वपि

कुत्रचिदुपर्युक्तचिह्नयोरुपयोगे सन्धिसम्भेदरूपो भ्रमो दृष्टः। यथा-'धर्मः सहायको भवती' त्येव तद्विवक्षितम्'। पर्वतो वह्निमान् धूमादि'ति। इत्यादि। एवंविधस्थलेषु चिह्न विभाजकचिह्नस्योपयोगे संहिताकार्य न कथमप्युचितम् यदि च सन्धिरिष्टस्तर्हि एवं विधनामुपयोगो न कर्तव्यः। न हि उत्फुल्लगल्लत्वं सशब्दं हास्यं च युगपदेकस्मिन्पुरुषे सम्भवतः। तस्मादेवंविधस्थले 'धर्मः सहायको भवति' इत्येव। 'पर्वतो वह्निमान् धूमात्' इति असन्धिकः प्रयोग एव चिह्नोपयोगे सति समीचीनः।

**प्रक्रमसम्बन्धसूचकं (डेश) चिह्नम्**- यथा-भगवान् पुनरवोचत्-'स्वागतं वो महाभागाः'। अत्र भगवान् पुनर्यदवोचत् तद्विषयस्यारम्भसूचनाय अग्रेतनभागेन च तस्य सम्बन्धसूचनाय (-) आयतरेखाकारमिदं चिह्नमुपयुक्तमस्ति। यथा वा-'महर्षिणा मनुना धर्माचरणविषये यदुक्तं तद्यथा- अत्र मनोर्वचनस्य प्रक्रमः अग्रतनेन च सम्बन्धो वक्तुरभीष्ट इति सूचनाय तदिदं चिह्नं प्रयुज्यते। यथा-'पुण्य-पाप-सुख-दुखादीनि कर्मभ्यो जायन्ते'। अत्र पुण्यपापेत्यादिपदानां परस्परसम्बद्धत्वसूचनाय तदिदं चिह्नं मध्ये प्रक्षिप्तमस्ति। पत्रस्यायुर्भागे (मार्जिन) यत्राक्षरपङ्क्तिस्तु समाप्यते परं पदं न समाप्यते तत्र द्वितीयपङ्क्तिगतभागेन सह सम्बन्धसूचनाय स्वल्परेखाकारम् 'हाइफन' (-) तदिदं चिह्नं व्यवह्रियते। यथा-'रामो द्विर्नाभिभाष' इत्यक्षरैरेव यत्र पङ्क्तिः पूर्यते तत्र द्वितीयपङ्क्तेरादिभागे स्थितस्य 'ते' इत्यक्षरस्य सम्बन्धसूचनाय तदिदं चिह्नं प्रयुक्तमस्ति।

बहवो महाभागा अस्यापि चिह्नस्यास्थाने उपयोगं कुर्वन्ति। केचिद्वाक्यस्यान्ते विरामचिह्नमिव सर्वत्र प्रयुज्यते। अपरे च-रामः यास्यति इत्यादि पदयोर्मध्ये अकारणमेव तदिदं चिह्नं प्रक्षिपन्ति,येनाक्षरयोजकानां नानाभ्रमो भवति।

**सम्बोधनप्रश्नचिह्नम्**-सम्बोधनपदस्याग्रिमपदात् पार्थक्यसूचनाय(!) तदिदं चिह्नं प्रायः प्रयुज्यते विज्ञैः। यथा-'कृष्ण! गोपगणमीक्षसे न किम्'। अत्र निर्विभक्तिकं कृष्णपदं गोपपदेन न संयुज्येत, किन्तु तदिदं सम्बोधनपदमस्तीति सूचनाय तदिदं व्यवहृतमस्ति। आश्चर्यादिप्रबलभावविशेषसूचनायापि तदिदं चिह्नं द्विस्त्रिर्विभज्य वाक्यस्यान्ते दीयते। यथा 'अहो एकस्मिन्पल एव सर्वो हिमो द्रवीभूतः! हं हो कीदृग् भीषणस्तापः!!' इत्यादि।

यत्र वाक्येन प्रश्नार्थः परिफलितो भवति, तत्रान्ते (?) इदं चिह्नं प्रयुज्यते यथा- 'एतस्मिन् धनस्य कियान् भागो व्ययितो भवेत्, एतद्विचिन्तितं केनापि?' यद्यपि काक्वा, किम्शब्दादिप्रयोगेण वा सोऽयं प्रश्नार्थो बुध्यत एव सर्वैः, परं स्पष्टप्रतिपत्तिसौकर्याय तदिदं चिह्नं प्रायः सर्वैरेव व्यवहर्तुमारब्धम्।

अस्तु, एवं किल नानाविधानि चिह्नानि मुद्रणीयेषु निबन्धेषु विज्ञैः प्रयुज्यन्ते, प्रयोक्तव्यानि च भवन्ति। तदुपयोगविषयस्तद्विषयकैः पुस्तकैरेव बोद्धव्यो नात्र तेषां सर्वेषां व्यवहारस्थलं निदर्शयितुं निबन्धमारब्धवानस्मि, परं प्रतिपदमावश्यकानां प्रधानप्रधानचिह्नानां स्थूलस्थूलं प्रयोगविषयमेवं निदर्शितवानस्मि, येन महाभागानामुपयोगभ्रमो न भवेत्। सोऽयं निबन्धलेखस्य विराट् प्रवाहः संस्कृतक्षेत्रे सुफलप्रसूर्भूयादिति शम्।

***

# शोधात्मका निबन्धाः

१. अपि नासाभूषणमिदमासां यवनजातीनां सहवासादनुकृतम् ?

२. काव्यलक्षणं तद्विषये विभिन्नमतानि च

३. रसस्वरूपं विभिन्ना रससिद्धान्ताश्च

४. काश्मीरकमहाकविर्बिह्लणस्तत्काव्यं च

# अपि नासाभूषणमिदमासां यवनजातीनां सहवासादनुकृतम् ?
## ( नवीनगवेषणा )

नासिकालङ्कारोऽयमार्यमहिलानां शृङ्गारस्याऽनुपमं वस्तु। सीमन्तिनीनां सौन्दर्यसागरोऽनेन समुद्वेलितो भवतीत्येव केवलं न, अपितु सौभाग्यवतीनां सौभाग्यस्यापि तदेतत्प्राधानतममाभरणम्। नासिका हि मुखसौन्दर्यस्य यथा प्रधानतमं केन्द्रं तथा सम्मानराजधान्या अपि सेयमभेद्यतमं दुर्गम्। एतस्या भङ्गे सम्मानस्याऽप्यवसानमवसीयते। नासिकाच्छेदो यथा ह्यमङ्गलं तथा न्यक्कारस्यापि पराकाष्ठा। समाजे स्वनासिकासंरक्षणं परिगण्यत इव परमपुरुषार्थः। नासिकाच्छेदेन विरूपमुखां शूर्पणखां निबन्ध्नन् भगवान् वाल्मीकिर्लङ्कायाअपि विनाशशङ्कामङ्कुरयामास।

किं वा विस्तरेण भूयसा। अन्येषामवयवानामुत्तमाङ्गता भवेद् भूतल एव प्रसिद्धिं गता नाम, किं तु लोकभाषायामिदमङ्गं साक्षात् 'नाक'[1] नाम्नैव प्रख्यायते। अङ्गेषु यथा नासिकायाः प्रधानाऽऽसिका[2] तथैव तस्या भूषणमपि भूषणानामखिलानां भूषणम्। 'नथ' इति ख्यातस्य नासिकालङ्करणस्य हि सौभाग्यभूषणेषु विशेषतो महत्त्वं नाम। नवयुगेनानेन नासिकातो 'नथ'मपनीय तत्स्थाने 'लवङ्ग' 'नासामणि' 'नासामौक्तिका' दीनि कामं निवेशितानि किन्तु प्राचीनपुरन्ध्रीभिः साम्प्रतमपि सौभाग्यभूषणेषु 'नथाय' एव निमन्त्रणं दीयते न नाम नासामौक्तिकादिभ्यः। शिक्षिताः सन्त्वर्द्धशिक्षिता वा, किन्तु येषु परिवारेषु साम्प्रतमपि धार्मिकदृशा प्राचीनप्रथानां समादरस्तेष्वद्यापि 'चतुर्थी' प्रभृतिषु सौभाग्यमहोत्सवेषु कामं स्वल्पकालायैव किं न भवेत्परं नासामौक्तिकादीनां स्थाने 'नथम्' विनिधायैव विधीयते गौरीपूजा सौभाग्यवतीभिः।

एतावद्दीर्घभूमिकया मुखबन्धस्येदमेवाकूतं यन्नवीनमिदं युगं नासाभूषणस्यास्य गौरवमुरीकर्तुं सर्वथा विप्रतीपम्। प्राचीनकालादारभ्याऽद्यावध्यपि काममभ्युपगतं भवेन्महत्त्वं नासिकायाः किं तु तदीयभूषणस्यास्य गौरवं न तत्स्वरूपे स्वीकर्तुमिष्यते साम्प्रतम्। प्रचीनप्रथापक्षपातिनः पुरुषाः प्राचामाचार्याणां समयादेव नासिकालङ्कारायाऽस्मै सौभाग्यभूषणस्य महत्त्वमर्पयन्ति स्म, किं तु सामयिकी 'गवेषणा' निर्णयति यदेतस्याः प्रथाया गुरवो यवनाः। काममधुना भवन्तो न केवलमिदं सौभाग्यभूषणमेव, अपि तु साक्षात्सौभाग्यदेवतामेव किं नाऽभ्युपगच्छन्तु किन्तु सामयिका विद्वांसो गवेषणानिकषे निर्णयन्ति यत्सेयं नासावेधप्रथा प्रचलिता तावद्यवनानां संसर्गात्। ''कामं कुतोऽप्यनुवृत्ता स्यात्किन्तु साम्प्रतमियमस्माकं धार्मिकी प्रथा संवृत्ता'' इत्याग्रहेण काममात्मीयीक्रियतां श्रीमद्‌भिः किन्त्वार्याणामिदं प्रातिस्विकं धनमिति

---

1. स्वर्ग। 2. प्रधानम् आसिका, प्रमुखं स्थानम्।

यदस्यामासीदात्मीयत्वगौरवम्, आस्माकीनमिदं विज्ञानमित्यासीद् हृदये योऽयमुत्साहः, अवश्यं किल तत्र महीयानाघातः। वयं सामयिकाविष्कारेभ्यो यथाऽपरिचितास्तथा सामाजिकगवेषणानामप्यनभिज्ञाः प्रायः सम्पद्यामहे। यदा तु नवयुगचाकचक्यमोहिताया जनतायाः श्रद्धा नवनवगवेषणासु दृढं विनिबद्धा भवति तदनन्तरं वयं जागृमः। किन्त्वेकदा प्रवृत्तः प्रवाहो न शक्यः सहसा विनिरोद्धुम्। अत एव तथ्यबोधनाय बहुतरं प्रयतमाना अपि न तद्विषये लब्धसम्माना भवामः।

वक्ष्यमाणाया नासाभूषणविषयकगवेषणायाः प्रारम्भिकमितिवृत्तं त्वेवम्–

श्रीमान् पी. के. गोडे M.A. महोदय आङ्गलभषायां यथा विद्वांस्तथा संस्कृतसाहित्येऽप्यभिनिविष्टः। पुण्यपत्तने भाण्डारकरप्राच्यगवेषणाविभागस्य (भाण्डारकर ओरिएंटल रिसर्च इन्स्टिटयूट, पूना) सोऽयं व्यवस्थापकः। पुण्यपत्तनीयनगरनिरीक्षणसमित्या अध्यक्षेण संलापप्रसङ्ग नासावेधप्रथाया अस्या विरोधे बहुतरमुदीरितमेकदा। सिद्धान्तरूपेण साऽयं निर्णीतवान्–'हिन्दुनारीभिर्नासाभूषणमिदमेकान्ततो हेयम्, अनेन हि मालिन्यमुपयान्ती नासिका स्वास्थ्येऽपि समुद्भावयति वैगुण्यम्'।

साधारणी सेयं घटना पी. के. गोडे–महोदयस्यावधानमित आकृष्टवती प्रोद्भावितवती च प्रश्नं हृदि–'किमियमेतादृशी सामान्या प्रथा यत्सहसैव समाजादपसारयितुं शक्या? यदीयमैतिहासिकी पुरातनी च, ततः कथमेतस्या आग्रहः समाजादपनेयः'। अयमेतद्विषयकाण्यैतिहासिकप्रमाणानि समुद्यतः सङ्ग्रहीतुम्। यान्यपि प्रमाणान्यलभ्यन्त तान्यपूर्णानि विकीर्णस्वरूपाणि च, निबन्धेऽस्मिन्नुचितक्रमेण विन्यस्तुमहमायते।

वयमेतस्याः शैल्यास्तथाऽभ्यस्ताः समभवाम यथा नास्याः समुद्भवोपरिलक्ष्यमेवा–स्माकमभूत्, किन्तु वैदेशिकानामवधानं सर्वतः प्रथममेतस्या उपरि सप्तदशअष्टादशशताब्द्योर–जायत। 'ईस्ट इण्डिया संघ' (कम्पनी) स्य स्थापनोत्तरं लैफ्टिनेंट मूरो यः किल विद्वानन्वेषकश्चासीत् टीपूविरोधे परशुरामभाऊ पटवर्द्धनायाऽलिखत्–'हिन्दुजातेः स्त्रियो नासिकायामेकं कुण्डलं[१] मणिं वा परिदधति यद्धि

'नथ' नाम्ना व्यपदिश्यते। युरोपवासिनः कामं किमप्यालपन्तु किन्तु सुन्दरे मुखे प्रवर्द्धतेऽनेन शोभा। यदि तद्यथास्थानं भवेद्विन्यस्तम्'।

टेवर्नियरः पारस्ययात्रापुस्तके (पर्शियन ट्रेवल्स) लिलेख–'अरब–नारीणां नासिकामध्यं केवलं भूषाधारणायैव भवति यत्र ता लघु कुण्डलमेकं दधति। कदाचित्तु तन्महदायासमपि भवति यत्र संहताङ्गुलिः करोऽपि निविशते।' एवमेव 'प्रशियायात्रा' पुस्तके (ट्रेवल्स इन प्रशिया, भाग 1पृ. 230) 'हैन्बे' ऽप्यवर्णयत्, किन्तु तत्सौन्दर्यादपरिचितः प्रशियावासिनीनां नासावेधप्रथां नाभिनन्दति समादरदृशा।

प्रमाणमन्विष्यतां दृष्टौ स्पष्टमिदमवभासते यदेतस्याः प्रथाया लिखितं प्रमाणं सर्वतः

---

१ छल्ला।

प्रथममरबदेशे लभ्यते। भारतवर्षे त्वेतस्य प्रचारः, साहित्येऽमुष्य वर्णनम्, शिल्पकलायामेतस्याऽवस्थानं भारतेतिहासे तदोपलभ्यते यदा मोगलानां प्रारभ्यते शासनसमयः। यद्यपि वैदेशिकगवेषितान्यन्यान्यपि सन्ति प्रमाणानि (यथा 'कस्टम्स् ऑफ मुसल्मान्स आफ् इण्डिया' पुस्तके 'मोहर्रम' याचकानां वर्णनम्, नासाभूषणभूषितानां स्त्रीणां तत्र परिभ्रमणम्, सम्मानितव्यक्तेर्नाम्ना निजशिशूनां 'नथी' निधानमित्यादि) किन्तु तान्यपि मोगलकाल एवान्तर्भवन्ति।

यस्मिन् काले तदिदमन्विष्यमाणमासीद्दैवयोगात्तस्मिन्नेव समये 'बनारस हिन्दुविश्वविद्यालयस्य' पत्रे (भागो 2, पृ. 399-422, सन् 1918) डा. आल्तेकरः प्राकटयत् 'हिन्दूस्त्रीणामाभूषणानि वस्त्राणि च' इति शीर्षकं निबन्धम्। किन्तु सोऽपि नासावेधप्रथां वैदेशिकीमेव साधयति। अयं किल तन्निबन्धस्य सारभागः-

"1. नासाभूषणमवश्यं सौभाग्यस्य चिह्नम्, किन्तु नाटयशास्त्रे (23 अध्याये) महिलाभरणानां या सूची दत्ता, न तस्यामेतदुल्लेखः। 2. संस्कृतस्य कवयो लेखकाश्च नास्य भूषणस्य परिचयमावहन्ति। 3. 'चूड़ामणि' कुण्डल-ललन्तिकाकाञ्चीकटक-नूपुरादिवत् संस्कृतभाषायां नास्य कृते किञ्चिन्नामधेयम्। 4. 'नथ, नथिया, नथ्या, नथांग' इत्यादयः शब्दा देशीयभाषायाः, नैतेषां संस्कृतेन प्राकृतेन वा कश्चित्सम्बन्धः। अयं शब्दः 'नाथ' (पशोर्वशीकरणाय या नासारज्जुः) पदादपभ्रष्टः। 5. उदयगिरिः, भुवनेश्वरः (उडीसा), बुद्धगया (पटना), [भुरहुट (BHURHUT), सांची, मथुरा (यू. पी.), तक्षशिला (टेक्सिला, पञ्जाब), ] अजण्टा, बादामी, यलोरा, मद्रासप्रान्तस्य अमरौती आदिस्थानानां चित्रकलासु स्त्रीणामन्यान्यप्रकाराण्याभरणान्यवाप्यन्ते, न तावन्नासाभूषणम्। 6. सर्वतः प्रथमं 'जगन्नाथपुरी-राजपुत्रप्रान्तयोः' चित्रकलायां नासाभूषणमुपात्तम्। सैषा चित्रशैली मोगलशासनकालिकी। 7. तदेतैः सिध्यति यन्नासाभरणं मोहम्मदेभ्योऽनुकृतम्। महदिदं चित्रं यद्वैदेशिकी सेयं प्रथा सौभाग्यस्यावश्यकतममङ्गं कथङ्कारं वा संवृत्ता?"

गोविन्दाचार्यलिखित 'सङ्ग्रहसौदामिन्याम्' (सन् 1740) सङ्गीतशास्त्रीयरागाणामेका सूची, तत्र हि नासाभूषणस्य विषये सेयं पंक्तिरालोक्यते-

'नासिकाभूषणीमेलान्नासामणिरजायत।'

व्याकरणाद्यनुसारमिदं कीदृशमपि भवेत् किन्तु नासामणेरर्थो नासिकायां विधृतो मणिः, स चोपमाविधया रागस्य कृते ग्रन्थकर्त्रा प्रयुक्तः।

'पर्णालपर्वतग्रहणाख्यान' नामकं काव्यं यद्धि छत्रपतिशिवाजिनः सैनिकद्वारा कोल्हापुरसमीपवर्ति 'पन्हाल' नामकदुर्गस्य विजये व्यरच्यता तस्मिन् 'प्रतापगढ' प्रतिष्ठित-भवानीदेव्या वर्णनमस्ति यत्र भवानीपरिधृतस्य नासाभूषणस्याप्येवमुल्लेखः-

**'नासामुक्ताफलं यस्या दन्तोष्ठद्युतिपाटलम्।**
**दध्रे शुकाऽऽस्यसंसक्त-पक्वदाडिमबीजताम्।।'**

एस्. एम्. दिवेकरः काव्यस्यास्य प्रकाशकः सम्पादकश्च। स हि रचनामिमां सन्

1673 कालिकीं मनुते। किन्तु शिवाजीसमये नासाभूषणमिदं तदाराध्याया भवानीदेव्या अपि पवित्रतमेऽङ्गे स्थानमलभतेत्यनेन सिध्यति।

रघुनाथपण्डितेन महाराष्ट्रराजस्य शिवाजिनः कृते 'राज्यव्यवहारकोषः' व्यरच्यत, तस्मिन्नधोलिखितं पद्यं नासाभरणस्य विषये प्राप्तम्। देशभाषाविमिश्राऽस्य रचनाशैल्यपि विनोदजननी। तथा हि–

**'नासामणिर्नथो, मुक्ताफलं मोती, फुलीति तु।**
**नासापुष्पं बाहुमणिर्बाजूबन्धाभिधायकः।।' (कार्यस्थानवर्गः)**

हंसमिथ्यूरचिते 'हंसविलासे'ऽपि (सन् 1738) 'अलङ्करणीपकर' वर्गोऽस्ति, तस्मिन्नपि नासाभूषणस्यायं प्रसङ्गः–

''लसन्मौक्तिकयुगलोल्लसिताभिः अरूणरत्नरुचिराभिः नासाभूषाभिः नासिकाः परिष्कृत्य''।

'कांगडा' प्रान्तीयचित्राणि यानि हि साम्प्रतं कलिकातास्थ–विचित्रवस्त्वागारे (म्यूजियम ऽवस्थितानि तेष्वपि ब्रह्मादिदेवतानामृषीणां च सन्ति चित्राणि। एषु भगवती पार्वती त्रयाणां चतुर्णां वा मौक्तिकानां 'नथ' भूषणं दधती प्राप्यते। इदं चित्रमेकेन राजपुत्रेण (क्षत्रियेण) अंकितम्। एवमेव योधपुरप्राप्तस्य हस्तलिखितश्रीमद्भागवतस्य चित्रेष्वपि (सन् 1611) मौक्तिकमण्डितं 'नथ'–भूषणं दधतीनां सीमन्तिनीनामालेख्यानि सन्ति। सर टामस रो–सहचरेण एडवर्ड टेरीनाम्नापि 1616–19 तमख्रिष्टीयवत्सरेषु भारतवर्षयात्रा व्यधायि, तत्रापि माहम्मद–महिलानां नासासु नासाभूषणस्य वर्णनमवाप्यते। मि. मोतीचन्द्रेणापि दक्षिणभारतीयप्राचीनचित्रेषु स्त्रीणामन्यान्यभूषणैः सह नासाभूषणस्याप्युल्लेखो व्यधायि।

सप्तदशशताब्दीतः पूर्वं षोडशशताब्द्यामपि नासाभूषणस्य सम्बन्धे प्राप्यते प्रमाणम्। हस्तलिखिता किरातार्जुनीयस्यैका टीका या एकानाथभट्टेन 1483 ख्रिष्टाब्दे लिखिता तस्यामपि द्वित्रमौक्तिकानां 'नथ' भूषणं धारयन्ती भगवती सरस्वती चित्रिता। कतिपयवत्सरेभ्यः पूर्वं ट्रावनकोरराज्ये षोडशशताब्दीलिखितानि कानिचित्स्त्रीणां चित्राण्यधिगतानि, तेष्वपि 1, 3 संख्याङ्किते फलके (प्लेट) नासाभूषणधारिणीनां रमणीनां चित्राणि। एतानि हि चित्राणि जीर्णतमस्य राजभवनस्य भित्तावुत्कीर्णान्यासन्।

दक्षिणभारते चतुर्दशशताब्द्यां नासाभूषणसत्तासूचकं प्रमाणं तिरूवाम्बादीतीर्थस्य पद्मनाभस्वामिनो मन्दिरस्य भित्तावुत्कीर्णेभ्यश्चित्रेभ्यः समवाप्यते। अत्र हि स्त्रीणामेकः 'सङ्गीतसंघः' चित्रितः तस्मिन् वामनासायां 'नथ' भूषणं धारयन्त्यः सन्ति बह्वयो नार्यः [4 संख्याकः फलकः ट्रावन्कोरराजकीयगवेषणाविभागस्य विवरणम्]।

डा. आल्तेकरमहोदयेनोल्लिखितं यत् संस्कृतभाषायां नासाभूषणस्य कृते न किञ्चिन्नामधेयमिति। किन्तु सैषा प्राचीनां न्यूनता नवीनैः संस्कृतलेखकैः 'नासामौक्तिक–नासामुक्ताफल,–नासामणि'–प्रभृतिशब्दान् घटयद्भिरपनीता। शार्ङ्गधरपद्धति–सुभाषितरत्न–भाण्डागारयोर्यानि नासाभूषणपद्यानि सङ्गृहीतानि तेष्वेतानि नामान्युपलभ्येरन्नन्वेषकैः–

**नासामौक्तिकमबले किमधरबिम्बेन विद्रुमं कुरुषे।**
**दृष्ट्या गुञ्जाबीजं शिव शिव भूयस्तदेव हसितेन ।।१।।**

**श्लेष्मागारे वसतिर्जाताऽस्माकं तदत्र मायात।**
**आन्दोलनच्छलादिह निवारयन्तीव मौक्तिकानि विटान्।।२।।**

**सुधामयोऽपि क्षयरोगशान्त्यै नासाग्रमुक्ताफलकच्छलेन।**
**अनङ्गसञ्जीवनदृष्टिशक्तिर्मुखामृतं ते पिबतीव चन्द्रः।।३।।**

**आकाशत्पतितं पुनर्जलनिधौ मध्ये चिरं संस्थितं**
**पश्चाद्दुःसहदेहरन्ध्रजनितक्लेशान्वितं मौक्तिकम्।**
**वाले बालकुरङ्गलोचनयुगे घोरं तपः सञ्चर-**
**न्नासाभूषणतामुपैति सखि ते बिम्बाधरापेक्षया।।४।।**

**अस्याः कामनिवासरम्यभवनं वस्त्रं विलोक्यादरा-**
**न्निश्चित्येव सुधाकरं प्रियतमं भूमीगतं शोभनम्।**
**नासामौक्तिककैतवेन रुचिरा तारापि सा रोहिणी**
**मन्ये तद्विरहासहिष्णुहृदया तत्सन्निधिं सेवते।।५।।**

(सुभाषितरत्नभाण्डागारे)
'शार्ङ्गधरपद्धतौ' परिशिष्टभागे-
**'अस्याः कुशेशयदृशः शशिशुभ्रशुभ्रं नासाग्रवर्ति नवमौक्तिकमाचकास्ति।।'**
**'मुक्ताफलं शशिसमस्य मुखस्य तस्या हेमोर्मिकान्तगतमञ्चति नासिकान्ते।।'**
इति जोनराजस्य]

**'आश्यानतामुपगतोऽस्य रुचा चकास्ति नासाग्रमौक्तिकमिषादमृतस्य बिन्दुः।।**
इति श्रीबकस्य।
इत्यादिरूपमप्युपलभ्यते नासाभूषणग्रहणम्।
षोडशशृङ्गाराः सर्वेभ्यः श्रूयन्ते, तेष्वपि नासाभूषणमिदमस्ति-
**'आदौ मज्जनचीरहारतिलकं नेत्राञ्जनं कुण्डले**
**नासामौक्तिककेशपाशरचना सत्कञ्चुकं नूपुरौ।**
**सौगन्ध्यं करकङ्कणं चरणयो रागो रणन्मेखला**
**ताम्बूलं करदर्पणं चतुरता शृङ्गारकाः षोडश।।'**
पूर्वोक्तेषु भाण्डागारस्थपद्येषु 'सुधामयोऽपि.' इत्यादि पद्यं शार्ङ्गधरपद्धतावपि ३३०५

संख्यायां दत्तम्। तत्र हि 'वैद्यनाथस्य' इति कर्तुर्निर्देशः। वैद्यनाथस्य च समयः १३६३ तः १२५८ तमखिष्टाब्दमध्यगः, यतो हि तदिदं पद्यं भगदत्तजह्लणस्य 'सूक्तिमुक्तावलावपि' वैद्यनाथनाम्ना सङ्गृहीतम्। लक्ष्मीदेवस्य पुत्रो जह्लणः कृष्णराजस्यासीदमात्यः। कृष्णराजश्च १२४७ तमे खिष्टाब्दे राज्यसिंहासनमधितष्ठौ। एतदमात्यस्य जह्लणस्य कृते भानुनाम्ना वैद्येन ११७९ तमशकसंवत्सरे [सन् १२५८] सूक्तिमुक्तावलिः [सुभाषितावलिर्वा] सङ्गृहीता–

**'शाकेऽङ्काद्रीश्वरपरिमिते वत्सरे पिङ्गलाख्ये**
**चैत्रे मासि प्रतिपदि तिथौ वासरे सप्तसप्तेः।**
**पृथ्वीं शासत्यतुलमहसा यादवे कृष्णराजे**
**जह्लस्यार्थे व्यरचि भिषजा भानुना सेयमिष्टा।।'**

सूक्तिमुक्तावलेरारम्भिकेषु ४१ पद्येषु जह्लणस्य वंशावलिर्दत्ता, यस्याः समुल्लेखेन नात्र सम्बन्धः। किन्तु १२५८ तमे शाकसंवत्सरे सङ्गृहीतात् 'सुधामयोऽपि.' इति वैद्यनाथस्य पद्यात् तथा निम्ने निर्दिश्यमानेभ्यस्त्रिभ्यः पद्येभ्यश्चाविभ्रान्तं सिध्यति यदेतत्समयपर्यन्तमार्यमहिलानां नासाभूषणस्य साहित्येऽपि सुप्रसिद्धिरासीत्। पद्यत्रयं च यथा–

**पुण्डरीकमिवाऽऽभाति नासावंशगमौक्तिकम्।**
**कुचसिंहासनस्थस्य सारभूपस्य सुभ्रुवः।।**

[क्षेमेन्द्रस्येति 'ग' पुस्तके]

**'ललाटे लोलाक्ष्यास्तिलकमिषधारी विधुरयं**
**स्वमापूर्णं वाञ्छन्नधरसुधया देवहितकृत्।**
**अतो नासाग्रेऽसौ तदुपहतये मौक्तिकमिषात्**
**स्फुटं दैत्यामात्योऽधरशशभृतोरन्तरं गतः।।**
**'तस्या वदनचन्द्रस्य कान्तिरन्यैव जायते।**
**कलङ्कतुलनां धत्ते यत्र नासाग्रमौक्तिकम्।।'**

[भानुपण्डितस्य]

त्रयोदशशताब्द्यामपि–आर्यमहिलासु नासाभूषणप्रचारस्य प्रमाणं महानुभाव'–जातेः प्राचीनपुस्तकात् 'लीलाचरित्रात्' उपलभ्यते, यत्र हि एतत्सम्प्रदायप्रवर्तकस्य चक्रधरस्य जीवनचरितमावर्णितम्। अत्र हि महाराष्ट्रभाषामयमेकं वाक्यं देव्या महालसायाः सम्बन्धेऽस्ति–

''**कांकर्णेः कलाविया सोनयाची तानवडें भँवरिया भांगुः टीला नाँकी मोंती**''

[लीलाचरित्रम्, लीला १७२]

अत्र हि 'नांकी मोती' इत्यविकलं संस्कृतस्य 'नासाग्रमुक्ताफलम्'। अनेनापि सिध्यति यन्न केवलमार्यमहिलास्वेव, अपि तु महालसादेव्या अप्यङ्गे तदिदमाभूषणमासीत्तस्मिन् काले। एतस्मात्पूर्वम्–११ शताब्द्यामपि नासाभूषणप्रचारस्य प्रमाणं मि. एन् एन् दासगुप्तमहोदयः

[कार्तिकमासस्य 'प्रवासी' वङ्ग संवत् १३४१, पृ १०९] लक्ष्मणदैशिकरचित 'शारदातिलके' ददाति। तत्र हि आन्ध्र (तैलङ्ग) महिलामेकामावर्णयता ग्रन्थकारेण प्रोक्तम्–यस्याः किल नासाभूषस्य (नथ) मौक्तिकं श्वासेनाऽऽकम्पते'। प्रो. विंटरनीज कृतस्य 'भारतीयसाहित्येतिहास'स्य प्रथमभाग पृष्ठ ६०४ तः [कलकत्ता यूनीवरसिटी, १९२७] प्रमाणयति मि. एन् एन् दासगुप्तमहोदयो यत् 'शारदातिलकम्' एकादशशताब्द्या रचनेति।

श्रीमतः पी. के. गोडेमहोदयस्य कथनमस्ति यत् 'शारदातिलकम्' न मया विलोकितं नापि च तन्मे प्राप्यम्। किन्तु श्रीमतो दासगुप्तस्य कथनानुसारमहमङ्गीकरोमि यत् ११ शताब्द्यां नासाभूषणस्य प्रचारः सम्भवीति। यतो हि विन्सेंट स्मिथः (आक्सफोर्ड हिस्ट्री आफ् इण्डिया, संवत् १९२८, पृष्ठ १९०) कथयति यत् दशमशताब्द्या अवसानपर्यन्तं भारतस्य हिन्दुराज्येषु नाभूद्विदेशीयानामाक्रमणम्। भारतस्य सीमनि सर्वतः प्रथममाक्रमणं सुबुक्तगीनेन ९८६-७ तमे खिष्टीयसंवत्सरे कृतम्। भारते नासाभूषणप्रचारस्य प्रमाणं तु दशमशताब्दीपर्यन्तस्य कालस्याऽवाप्यते। प्रशियाऽरबप्रान्ते नासाभूषणप्रचारस्य प्रमाणानि एतदनन्तरकालिकानि। ततश्च आरव्यदेशीयाः प्रशियाप्रान्तीयाश्च विपश्चितो निजसाहित्यद्वारा दशमशताब्दीतः पूर्वं स्वदेशे नासाभूषणप्रचारं न यावत्साधयेयुस्तावन्नेदं सिद्धान्तयितुं शक्यते यन्नासाभूषणस्य प्रचारो यवनेभ्यः समजनीति।

मि. दासगुप्तमहोदयो लिखति यत् वल्लभदेवविरचितायाः 'सुभाषितावल्याः' 27 संख्याकं 'नासाग्रे नवमौक्तिकम्.' इत्यादिपद्यं यस्मिन्नासाभूषणस्य निर्देशोऽस्ति, बिल्वमङ्गलकृते 'कृष्णकर्णामृते' ऽपि प्राप्यते। लीलाशुकोपनामको बिल्वमङ्गलश्च नवमशताब्दीजातः। अस्तु इतः परस्तादप्यस्य काले स्वीकृतेऽपि तदिदं निःसङ्कोचं सिध्यति यद् भारतीयेतिहासस्य हिन्दुकाले नासाभूषणस्यासीत्प्रचार इति। भारतीयेतिहासस्य हिन्दुकालो दशमशताब्द्या सह समाप्यते, यदा हि सर्वप्रथममाक्रमणं भारतसीमनि सुबुक्तगीनेन व्यधायि। बिल्वमङ्गलस्य सम्बन्धो यदि नवमशताब्द्या सह साध्यते ततस्तदीयपद्येन निर्भ्रान्तमिदं सिध्यति यन्नासाभूषणमिदमार्याणां वस्तु। माहम्मदप्रचारिता सेयं प्रथेति वादिनां मतं निर्मूलम्।

यदा ह्येकमात्रेऽस्मिन्पद्य एव सर्वं निर्भरं भवति तदाऽस्य पद्यस्य पूर्णपरामर्शः साम्प्रतमत्यावश्यकः सम्पन्नः। डा. पीटर्सन-सम्पादितायां 'सुभाषितावल्याम्' 27 संख्याकं तदिदं पद्यमेवमस्ति–

**'कस्तूरीतिलकं ललाटफलके वक्षःस्थले कौस्तुभं**
**नासाग्रे नवमौक्तिकं करतले वेणुं करे कङ्कणम्।**
**सर्वाङ्गे हरिचन्दनं सुविमलं कण्ठे च मुक्तावलिं**
**बिभ्रत्स्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः।।'**

किन्तु वयमालोकयामो यत् डा. एस्. के. दे महोदयेन टीका-टिप्पणीयुक्तं यत्संस्करणं 'कृष्णकर्णामृतस्य' साम्प्रतमेव प्रकाशितं तस्य मूलकवितायां नेदं पद्यम्। 'पायल्लयस्य' सूरेः कृष्णकर्णामृतस्य (दक्षिणभारतीय-संस्करणम्) द्वितीयतृतीयाश्वासयोः परिशिष्टश्लोकेषु

तदिदमुपलभ्यते, यत्र हि नासाभूषणस्य सम्बन्धे तदिदमपि पद्यमवाप्यते–

**'मौलौ मायूरबर्हं मृगमदतिलकं चारुलालाटपट्टे**
**कर्णद्वन्द्वे च तालीदलमतिमृदुलं मौक्तिकं नासिकायाम्।**
**हारो मन्दारमाला परिमलभरिते कौस्तुभस्योपकण्ठे**
**पाणौ वेणुश्च यस्य व्रजयुवतियुतः पातु पीताम्बरो वः।।**

पूज्यतमः श्रीमांश्चैतन्यः कृष्णकर्णामृतं दक्षिणपश्चिमभारतादानीतवान् वङ्गदेशे। तद्धि केवलमेकशतकस्य पुस्तकम्। वङ्गसम्प्रदायस्य परम्परा द्वयोरनयोराश्वासयोः सम्बन्धे न किञ्चिज्जानाति। एवं परिस्थितौ द्वयोरनयोः शतकयोः सम्बन्धे ये हि केवलं दक्षिणभारतीय-संस्करण एवाप्येते, शङ्कासम्भवः स्वाभाविकः। किञ्च पायल्लयसूरिर्मल्लिनाथमप्युल्लिखति यो हि चतुर्दशशताब्दीजातः। एवमवस्थितौ केवलमेकमात्रेणानेनैव पद्येन नेदमभ्युपगन्तुं सुकरं यद्विदेशीयाक्रमणतः पूर्वं नासाभूषणस्यासीद् भारते प्रचार इति। प्रत्युत माहम्मदकालात्प्राक्तन्यां चित्रकलायां नासाभूषणस्यानवाप्तिर्बलादस्मान् विवशीकरोति यत्सेयं प्रथा हिन्दुकाला-त्परस्ताद्भाविनीति।

आम्, एकादशशताब्द्यां नासाभूषणस्य प्रमाणं महाकवेर्बिह्लणादप्यवाप्यते। डा. बुल्हरस्य मतेन 'विक्रमाङ्कदेवचरितम्' विद्यापतिबिह्लणेन एकादशशताब्द्या अष्टमेऽंशे निर्मितम्। अत्र हि करहाटराजकुमार्याश्चन्द्रलेखायाः स्वयंवरवर्णनमतितमां रोचकम्। तत्रैवाष्टमे सर्गे नासाभूषणस्याप्येवं वर्णनम्–

**नासावंशविनिर्मुक्त-मुक्ताफलसनाभिना।**
**भाति भालतलस्थेन बालचन्दनबिन्दुना[१]।।**

'नासावंशविनिर्मुक्तमुक्ताफल' पदं जह्लणस्य 'सूक्तिमुक्तावलेः' (स. 1258) निम्नलिखितं पद्यमपि स्मारयति–

**'पुण्डरीकमिवाभाति नासावंशगमौक्तिकम्'**

अनेन हि स्पष्टं सिध्यति यत् 1080 तमे खिष्टसंवत्सरे, यदा हि बिह्लणेन

---

१. यद्यपि 'ज्ञानमण्डल, काशी'तः प्रकाशिते पण्डित रामावतारपाण्डेयद्वाराऽनुष्ठिते द्वितीयसंस्करणे 'बाला चन्दनबिन्दुना' इति पाठः। किन्तु 'भाति भालतलस्थेन बालचन्दनबिन्दुना' इत्यत्र 'भाल' 'बाल' पदानुप्रास एव कवेस्तात्पर्यम्। कर्तृपदं तु प्रकरणादपि तत्र सुस्पष्टं किन्तु मुक्ताफलसमानतासूचनार्थं 'बाल' (लघु) पदमावश्यकम्, अनुप्रासोऽपि चानायासोपगतः। अस्तु. एतत्किलाऽनुषङ्गिकम्। गोडेमहोदयेन नासाभूषणसम्बन्धी योऽर्थोऽत्र कल्पितः सोऽपि सम्यगेव, किन्तु पद्यस्यास्यार्थः–'उत्तुङ्गसरलत्वान्नासारूपो यो वंशस्तस्माद् विनिर्मुक्तं प्रच्युतं यन्मुक्ताफलम् (कवीनां सम्प्रदाये वंशादपि मुक्तानामुत्पत्तिः) तत्सदृशेन भालतलस्थेन लघुचन्दनबिन्दुना (सा राजकुमारी) भाति, भाले चन्दनबिन्दुस्तथा प्रतीयते यथा नासारूपवंशादेकं मुक्ताफलमेव विनिर्गतं भवेदित्यर्थः। अत्रार्थे नासाभूषणस्य सम्बन्धो न भवति। किन्तु नानेन मे तात्पर्यं यद् बिह्लणसमये नाभून्नासाभूषणप्रचार इति। अहं त्वितोऽपि पूर्वं तत्सत्तां स्वीकरोमि, तदग्रे उपसंहारे स्पष्टं स्यादित्यलम्।

काव्यमिदमारचितं तदा भारतीयार्यमहिलासु नासाभूषणस्यासीत्प्रचुरं प्रचारः।

एतद्विषयकमेवैकं मनोरञ्जकं प्रमाणं शङ्कराचार्यग्रन्थादप्युपलभ्यते। तत्पद्यं यस्मिन्प्रसङ्गस्यास्य वर्णनं दृश्यते, 'त्रिपुरसुन्दरीमानसपूजास्तोत्र' स्यान्तर्गतम्। यथा–

**मध्यस्थारुणरत्नकान्तिरुचिरां मुक्तामुगोद्भासितां**
**दैवाद् भार्गवजीवमध्यगरवेर्लक्ष्मीमधः कुर्वतीम्।**
**उत्सिक्ताधरबिम्बकान्तिविसरैर्भौमीभवन्मौक्तिकां**
**मद्दत्तामुररीकुरुष्व गिरिजे नासाविभूषामिमाम्।।**

भगवत्यै नासाभूषणसमर्पणार्थमुपगुम्फितं पद्यमिदमतिचमत्कारककल्पनापूर्णम्। 'नथ'रूपेऽस्मिन्नाभरणे मुक्तायुगस्य मध्येऽरुणवर्णमेकं रत्नं तथा प्रतीयते यथा शुक्लवर्णयोर्भार्गव (मङ्गल) जीव (बृहस्पति) योर्मध्ये अरुणवर्णो रविर्भवेत्। उत्सिक्तस्य शोभागर्विष्ठस्य अधरबिम्बस्य कान्तिपूरैर्मौक्तिके अपि यत्र भौम (मङ्गल)–रूपतां धारयतः। मुक्तायुगेन उद्भासितां मध्यगतारुणरत्नरुचिराम्, अत एव मङ्गलबृहस्पत्योर्मध्यगामिनः सूर्यस्यापि शोभां बिडम्बयन्तीम्। रक्तस्याधरोष्ठस्य कान्तिपूरैर्मौक्ति अपि यत्राऽरुणवर्णतया भौमग्रहशोभां धारयतः, ईदृशीमिमां नासाविभूषां गृहाणेत्याशयः। [अत्र डा. बेल्वालकरस्यानुरोधेन पी. के. गोडे महोदयेन 'मुक्तामुगोद्भासिताम्' इत्येव पाठः स्थापितः, मुग, मूंग, मुद्गेत्यादिश्चार्थश्चिकीर्षितः। किन्तु ग्रन्थकर्तुर्मुक्तायुगेत्येव पाठे तात्पर्यम्। यतो हि 'मध्यस्थ' पदस्य तदैव स्वारस्यं मुक्ताद्वयस्य मध्ये अरुणरत्नं स्यादत एव सेयं पाठो न मार्मिकाणां मनस्तोषायेत्यलं भूयसा]

डा. बेल्वलकरः (Belwalkar त्रिपुरसुन्दरीस्तोत्रं 210 संख्यकेषु तेषु स्तोत्रेष्वन्तर्भावयति यानि किल आद्यभगवच्छङ्कराचार्यकृतानि न स्वीक्रियन्ते। यदि कश्चिदाद्यशङ्कराचार्यकृतमिदं स्तोत्रं साधयेत्तर्हि–'आर्यशासनकालेऽपि नासाभूषणस्य भारतेऽभूत्प्रचारः' इति शक्यं स्वीकर्तुं किन्तु यावदिदं न प्रमाणीक्रियते तावत्कारणन्तरैरिदमेव स्वीकर्तुं विवशाः स्मो यन्नासाभूषणमिदं यवनसहवासादेवानुवृत्तमिति। अमरसिंहो निजरचितेऽमरकोषे (अष्टमशताब्द्याम्) मनुष्यवर्गे आभूषणानामेकां सूचीं प्रददाति, न तेषु नासाभूषणस्य नाम। ततोऽपि सुस्पष्टीभवति यन्नासीन्नासाभूषणस्य प्रचारोऽमरसिंहसमये।

पी. के. गोडे महोदयो निजनिबन्धस्योपसंहारे कोष्ठकचक्रमेकं दत्तवान् यत्र एकादशशताब्द्या बिह्लणसामयिकं प्रमाणमारभ्य, अष्टादशशताब्द्याः 'कानूने इस्लाम्' पर्यन्तस्य प्रमाणानि नासाभूषणप्रचारविषये एकत्र कृतवान् येन हि पाठकानां प्रकृतार्थपरिज्ञाने सौकर्यं भवेत्।

एतन्निबन्धस्य निःशेषीकरणोत्तरं डा. ककतीमहोदयः पी. के गोडे–महाभागस्य सविधे सूचनां प्राहिणोद्यत् 'आसामदेशीयचित्रकलायामपि नासाभूषणस्य न किञ्चिदुपलभ्यते प्रमाणम्' किन्तु पूनास्थभाण्डारकरीयगवेषणालयस्थो मि जी. एन्. श्रीगोडेकरो विष्णुशास्त्री चिपलूणकरद्वारा 'चित्रशाला, पूनातः' प्रकाशितायां 'निबन्धमालायाम्' उद्धृतेऽविदितनाम्नः कस्यचन कवेः पद्येऽपि दृष्टिमाकृष्टवान् यत्र नासाभूषणप्रसङ्गः सङ्गृहीतोऽस्ति। यथा–

**इन्दीवराक्ष्याः स्फुटविद्रमौष्ठ्याः सङ्केतमुद्दिश्य वने चरन्त्याः।**
**चौराः समस्ताभरणानि हृत्वा नासामणिं नापहरन्ति चित्रम्।।**

पद्यमिदं सुभाषितभाण्डागारेऽपि सङ्गृहीतं किन्तु तत्रापि निर्मातुर्नाम न निर्दिष्टम्।

रायबहादुरः के. वी. रङ्गस्वामी अय्यङ्गार, एम. ए. महाशयः सूचनां प्रैषयद् गोडेमहोदयसविधे–''दक्षिणभारते त्रिप्रकारकाणि नासाभूषणानि प्रचरितानि। एकं भ्रमच्छलाकाकारम् ('पेचनुमा') यद्धि नासारन्ध्रे प्रवेश्यते। एतस्य संज्ञा 'मोकूं खूटी' अर्थात् नासाशङ्कुः। विवाहिताः स्त्रियो द्वयोरपि नासिकयोरिदं धारयन्ति, कुमार्यस्तु केवलमेकतः। 'बुलाक, नथ' इति प्रथितयोः प्रकारयोस्तु नाधिकः प्रचारः, नामनिर्देशेन प्रतीयते चापि यदिदं प्रकारद्वयमुत्तरभारतादेवेहानुगतमिति।

आश्चर्यं यत्प्राचीनमन्दिरादीनां शिल्पे नास्योपलभ्यते चिह्नम् कदाचित् नासाभूषणसदृशस्य सूक्ष्मवस्तुनः पाषाणोपरि क्षोदनकाठिन्यमत्र कारणं स्यात्। किन्तु शङ्कुशलाकाकारं नासालङ्कारमहं दृष्टवानस्मि ट्रावन्कोरराज्यस्य पाषाणशिल्पकलायाम्। अत एव मम विचारोऽस्ति यन्नासाभूषणस्यास्य प्रचारो भारते प्राचीन एवास्तीति''

'चम्पूभारत' निर्माता कविरनन्तभट्टः पञ्चदशशताब्द्यां जातः। सोऽपि भारतचम्प्वां नासाभूषणमिदं वर्णयति, सुमधुरं च वर्णयति–

**अधिनासिकाशिखरमाकलितं नवमौक्तिकं नरपतेर्दुहितुः।**
**शुशुभे मुखाम्बुरुहमध्यचरस्मितहंसिकाजनितमण्डमिव।**[१]

(द्वितीयस्तबके 89 श्लोकः)

एस.पी. कॉलेज, पूना इत्यस्याध्यापको लड्डू (Laddu) महोदयः प्राचीनहिन्द्याः 'नकफूली' शब्देऽवधानमाकृष्टवान् यो हि नागरीप्रचारिणीसभा, काशीतः प्रकाशिते 'ढोलामारू रा दूहा' (पृ. 191) इत्यत्र समुपात्तोऽस्ति–

**'सुन्दरी चोरे संग्रही, सब लीया सिणगार।**
**नकफूली लीधी नहीं, कहि सखि कवण विचार।।**

भाषापद्यमिदं निबन्धमालायामुद्धृतेन अज्ञातनाम्नः कवेः पद्येनाऽविकलं संवदते। यथा–

**इन्दीवराक्ष्याः स्फुटविद्रुमाक्ष्याः सङ्केतमुद्दिश्य वने चरन्त्याः।**
**चौराः समस्ताभरणानि हृत्वा नासामणिं नापहरन्ति चित्रम्।।**

द्वयोरेको भावः। किन्तु निबन्धमालायां प्रहेलिकारूपेण केवलं प्रश्न एवोपनिबद्धः, 'दूहा' पुस्तके तु तस्योत्तरमपि 'दूहा' पद्य एव मधुरमुपनिबद्धम्–

**'अहर-रंग रत्तनु हुवई, मुख काजल मसि बन्न।**
**जाण्यउ गुञ्जाहल अछइ, तेण न ढूकड़ मन्न।।**

---

१. नासिकाया अग्रभागे स्थापितं मौक्तिकं मुखरूपकमलस्य मध्यचरी या स्मितरूपा हंसी तया जनितमेकम् अण्डमिव शुशुभे।

सम्पादकस्य रामसिंहस्य मतेन 'ढोलमारू रा दूहा' विक्रमसंवत् १०००-१६१८ (सन् ९४४-१५६२) काले रचितानि। सम्पादकस्य मतानुसारं ९४४ तमः खिष्टवत्सरः कवितानायकस्य 'ढोला' इत्यस्य समयः सम्भवति किन्तु किमत्र प्रमाणं यत्पुस्तकमप्येतत्समकालिकमेवास्तीति ? अत एव नासाभूषणस्याऽयं प्रसङ्गो भारतवर्षेऽस्मिन् १०००-१३९४ पर्यन्तस्य शक्यः साधयितुम्। दशमशताब्द्याः परतश्चात्र वैदेशिकानामाक्रमणान्युपक्रान्तानि। एवं च श्रीयुत पी. के. गोडे महोदयो निजगवेषणया निर्णयति यत्- इयं नासाभूषणप्रथा वैदेशिक्यति, मोगलानामागमनात्परं चास्याः समभूद् भारते प्रचारः' इति।

सम्यक् भवेदेवम्। इष्टमेव पाठकैर्यद् बिह्लणसामयिकमेकादशशताब्द्याः प्रमाणमारभ्य अष्टादशशताब्द्याः 'कानूने इस्लाम' पर्यन्तस्य यत्रतत्रोपलब्धानि यत्किञ्चिद्भाषामयान्यपि प्रमाणानि नासाभूषणविषये सङ्गृहीतानि गोडेमहाभागेन किन्तु न केवलमियन्त्येव प्रमाणानि। सन्ति संस्कृतसाहित्येऽन्यान्यपि। यथा शार्ङ्गधरपद्धति-सुभाषितभाण्डागारादिषु सङ्कलितानि तथाऽलङ्कारग्रन्थेष्वपि यत्र तत्रोदाहृतानि। यथा कुवलयानन्द एवाऽप्रस्तुतप्रशंसायाम्-

**अङ्गासङ्गि मृणालकाण्डमयते भृङ्गावलीनां रुचं**
**नासामौक्तिकमिन्द्रनीलसरणिं श्वासानिलाद् गाहते।**
**दत्तेयं हिमबालुकापि कुचयोर्धत्ते क्षणं दीपतां**
**तप्ताय: पतिताम्बुवत्करतले धाराम्बु संलीयते।।**

कस्येदं कियत्प्राचीनं चेति टीकादिद्वारा नास्मदादिभिर्निर्णेतुं शक्यम्। किन्तु नेदमप्पयदीक्षितस्य स्वनिर्मितम्। अपितु प्राचीनं, तस्मिन् काले साहित्ये सुप्रसिद्धं चेत्यत्र न संशयः। अत एव हि दीक्षितेन सङ्ग्रहीतुमवकाशोऽलभ्यत। स्वयं दीक्षितमहाभागेनापि नासाभूषणमिदं स्मृतम्। किं वा, इतः पूर्वभवेन चन्द्रालोककारेणैव वा उपनिबद्धं यथा तद्गुणे- 'पद्मरागायते नासामौक्तिकं तेऽधरत्विषा' इति। रसगङ्गाधरे जगन्नाथपण्डितराजोऽप्युपमायामुदाहृतवान्-

**'विलसत्याननं तस्या नासाग्रस्थितमौक्तिकम्**
**आलक्षितबुधाश्लेषं राकेन्दोरिव मण्डलम्'।।**

प्रत्यनीकेऽपि-

**'निजमौक्तिकसम्पदां रदानां सहवासेन परां मुदं ददानाम्।**
**विरसादधरीकरोति नासामधुना साहसशालि मौक्तिकं ते।।'**

अस्तु. एवंविधानि सर्वाण्यपि प्रमाणानि खि. दशमशताब्दीतो न प्राक्तनान्यत एव मन्ये नैतेषां सङ्ग्रहाय प्रयतितं गोडेमहोदयेन। गवेषणाविभागस्य राजनियमानुसारं श्रीयुत पी. के गोडेमहोदयो दशमशताब्दीतः प्राक्तनं किञ्चित्साहित्यसम्बन्धिप्रमाणमपेक्षते। किन्तु सर्वेषामेव साहित्यानुशीलकानां सविधे न भवति सुविधा प्राचीनपुस्तकानां शिलालेखादीनां च। अतिविस्तृतमपि संस्कृतसाहित्यमिदमियद्विकीर्णं गुप्तप्रायं च यदस्य नोपलभ्यन्ते सर्वे ग्रन्थाः। किन्तु तत्तद्देशगवेषणासु साम्प्रतमपि प्रतिदिनं ग्रन्थास्तु नवनवाः प्राप्यन्त एव। एवं परिस्थितौ

'साहित्यसेविनो न दातुं' शक्नुवन्ति प्रमाणम् एतावन्मात्रेणैव चूडान्तनिर्णये न वयं सत्यसिद्धान्तमधिगन्तुं शक्नुमः। एन. एन. दासगुप्तमहोदयस्यानुसारं 'कस्तूरीतिलकम्' इत्यादीनि 'कृष्णाकर्णामृतादीनां यदा प्राप्यन्ते प्रमाणानि, 'ब्रह्मवैवर्तपुराणा' दीनामपि दत्तैव प्रमाणसूचना कैश्चित्, तदा एतेषां पुराणादीनामेव अर्वाचीनत्वकल्पनोद्योगः सोऽयं मार्गान्तरमेव संवृत्तम्।

भवद्भिः स्वयमेव स्वीकृतं पूर्वम्- 'भारतस्य हिन्दूराज्यानि दशमशताब्दीपर्यन्तं वैदेशिकानामाक्रमणात्सुरक्षितान्यासन्। अरब-पर्शियादिषु च नासाभूषणसत्ताप्रमाणानि दशमशताब्दीतः परस्ताद्भावीनि' एवं । परिस्थितौ (नवमशताब्द्यां नासाभूषणप्रचारस्य भारते सिद्धतया) नासाभूषणमिदमार्यप्रथेत्येव पर्यवसानमुचितं प्रतीयते।

श्रीमद्भिः स्वयं विद्यापतिबिह्लणस्य समयात् (१०८० ई.) पूर्वपर्यन्तं नासाभूषणप्रथाया एतस्या एतावान्प्रचारः समर्थितो यदेका राजकुमार्यपि महामहत्यां स्वयंवरसभायामपि धारयति तदिदमाभरणं महता गौरवेण। तस्मिन्काले सेयं प्रथाऽभिनवप्रचरितासीत्, अथवा तदिदं यवनानामनुकरणमित्यपि न कथञ्चिच्छक्यं स्वीकर्तुम्। भारतीयार्याणां स समयस्तादृग्दाढ्र्यमयोऽभूद्यत्र हि निजमर्यादाया उपरि प्राणानां बलिरपि स्वीकृतोऽभू त्तेषाम्। विशेषतश्च प्राचीनरूढीनां स्वभावादेव दृढपक्षपातिनि स्त्रीसमाजे तु निजप्रथाया उपरि कियानाग्रहः स्यात्तस्मिन्समये, कियच्च वैमुख्यं भवेद्वैदेशिकरीतिभ्य इति हि स्वयमेवानुमातुं शक्यम्। सुदृढशिक्षायामपि नार्य इमाः पुरुषाणामपेक्षया स्वभावादेवाऽऽग्रहिला भवन्ति प्राचीनप्रथानाम्। भारतीयासु सामाजिकप्रथासु यदिदं परिवर्तनमालोक्यते साम्प्रतं तदिदमुपविंशानां वर्षाणां घटनेति परिज्ञायेत विचारेण । ततश्च सहस्राधिकवत्सरेभ्यः पुरातनो धार्मिकदृढता तु साम्प्रतमनुमानसीमानमप्यतिक्रामति।

साम्प्रतमपि नवनवे वेषविन्यासे नूतनीषु प्रथासु चात्मसमर्पणं कृतवत्यः स्त्रियो नवीनसभ्यतानुगामिषु कुटुम्बेष्वेवालोक्येरन्, नैतस्मिन् समाजे। विमृश्यतामिदानीम्, प्राचीनार्यप्रथानां प्राणपणेनापि संरक्षकस्य करहाटनरेन्द्रस्य राजपरिवारे, तत्रापि च महिलासु, काचिदनार्यरीतिरेव किम्, म्लेच्छानां प्रथा काचित्तत्कालमेव प्रचलिता स्यादिति किं बुद्धिगम्यं कस्यचित्? अत एव विद्यापतिबिह्लणसामयिका सेयं नासाभूषणप्रथा यदि म्लेच्छरीतिः साधयितुमिष्यते चेत्तदर्थं शतद्विशतवर्षेभ्यः पूर्वं म्लेच्छानां समाजे एतस्याः प्रचारः प्रमाणनीयः स्यात्। किन्तु यदा नेदम्, विद्यापतिबिह्लणसदृशाश्च प्रामाणिका आर्यमहाकवयस्तामेतां प्रथामार्यमर्यादासंरक्षकेषु राजपरिवारेष्वपि चिरप्रचलिता दर्शयन्ति तदा नासालंकरणमिदं म्लेच्छानां रीतिरिति न कथञ्चिन्मानयितुमुचितम्।

श्रीमतः सविधे दक्षिणभारतादपि, यद्धि म्लेच्छानामाक्रमणाद् भूयस्तरां संरक्षितमासीत् के. वी. रङ्गस्वामी अय्यङ्गारमहोदयोऽपि सूचयति यत् 'ट्रावन्कोरराज्यस्य पाषाणचित्रेषु शलाकाकारं नासाभूषणामालोकितं मया' स्वयं चापि तामेतां प्रथां प्राचीनामेवाभिमन्यते, तदा पूर्वोक्तपुराणस्य 'कृष्णकर्णामृतस्य' च प्रमाणानि तान्येकत्र कृत्वा विचार्यतां निभृतं यदेकसहस्रवर्षेभ्योऽपि महाकवेर्बिल्हणस्य समये धार्मिकराजपरिवारेष्वपि प्राचीनप्रवाहरूपेण

प्रचलिता सेयं प्रथा न किं पुरातनी ? दशमशताब्द्यां प्रविष्टेभ्यो यवनेभ्य एव किं गृहीता ?

अवशिष्यते साम्प्रतममरकोषस्य विमर्शः। किन्तु तस्मिनन्यान्येऽप्यावश्यका विषया न दृश्यन्ते ये ह्यासन्नपि तस्मिन्समये समाजे प्रचलिताः। अमरकोषे न प्रचलित इत्येतावन्मात्रेण चेत्काचिद् गवेषणा प्रमाणीक्रियते तर्हि बहुषु विषयेषु रूपान्तरं स्यात्। लेखप्रसङ्गे लेखनस्यैव विषयो गृह्यताम्। अमरकोषे न क्वचित् 'कागजस्य' नाम 'पत्र' शब्दश्चतुःस्थानेषु तत्र गृहीतः । एकार्थः पल्लवः – पत्रं पलाशं छदनम्। इत्यादि। द्वितीयस्थाने पक्षिणां पक्षोऽर्थः। 'पत्रं पतत्रं च तनूरुहम्' इति। तृतीयस्थाने वाहनम्– 'यानं युग्यं च धोरणम्' इति । चतुर्थस्थाने नानार्थानामेकत्र करणस्य प्रकरणेऽपि – 'पत्रं वाहनपक्षयोः' इत्यादिना 'वाहनपक्षयोः' एवार्थयोः स्मरणं कृतम्। किन्तु राज्यव्यवहारास्तदापि प्राचलन्नेव। परस्परं पत्रलेखप्रचारः प्रमाणित एव तस्मिन्समये। स्वयमयममरसिंह एव राज्ञ एकस्य (विक्रमस्य) नवरत्नेषु परिगणितः। अपि राज्यव्यवहारा अमी निर्वाह्येरन् विना लेखनम् ?

यत्किञ्चिदस्तु। नासाभूषणस्य सम्बन्धे वर्तमानकालिकमिदमन्वेषणम्, ममापि चेदं विनीतनिवेदनं स्थापितमेवं पाठकानां पुरतः। एतन्निर्णयविषये साम्प्रतमभिज्ञगणा एव प्रमाणमित्यलम्।

***

# काव्यलक्षणं तद्विषये विभिन्नमतानि च

संसारेऽस्मिन् मानवसभ्यताप्रवर्तकानामार्याणां वेद-उपनिषत्-स्मृत्यादिभिर्ग्रन्थैर्यथा सर्वतो महत्त्वं स्थापितमभूत्, तथा भारतीयैः काव्यैरपि आर्याणां गौरवं भूमण्डले सर्वतो विख्यातमभूत्। न केवलं भारतवासिन एव, अपि तु पारेसमुद्रवासिनः पाश्चात्य पण्डिता अपि महाकविकालिदासादीनां काव्यैः प्रभाविताः सन्ति। एतेषां काव्यानां विवेचनार्थं, काव्यानामेषां निर्माणार्थं च साहित्यशास्त्रस्याऽविर्भावोऽभवत्। पूर्वकाले साहित्यशास्त्रमिदम् अलङ्कारनाम्ना प्रसिद्धमभूत्। यतस्तस्मिन् समये सहृदयानामाकर्षकतया अलङ्कारा एव काव्येषु प्रधानतामलभन्त। किन्तु काव्यानां मीमांसापरेऽस्मिन् साहित्यशास्त्रे प्रारम्भतः प्रभृति अद्यपर्यन्तं काव्यानां विषये अतीव गम्भीरमालोचनमभूत्। यथा यथा च मार्मिकमालोचनमभूत् तथा तथैव साहित्यशास्त्रस्याऽस्य उत्तरोत्तरं वृद्धिरभूत्। साहित्यशास्त्रस्य तत्त्वसमृद्ध्या च काव्येऽपि उत्तरोत्तरं चमत्कारवृद्धिरभूत्। यतो हि साहित्यशास्त्रे गम्भीरमालोचनमेव जीवितस्थानीयमुक्तं कोविदैः। यथा हि सुप्रसिद्धमिदम्-

**''सङ्गीतमथ साहित्यं सरस्वत्याः स्तनद्वयम्।**
**एकमापातमधुरमन्यदालोचनाऽमृतम्।।'' इति।**

अनेन साहित्यशास्त्रेण आलोचनां कृत्वा काव्येषु कीदृशं साररूपममृतं निस्सारितमिति भवतां पुरस्तान्निवेद्यते-

**काव्यस्य स्वरूपम्**

सर्वतः पूर्वं काव्यसम्बन्धी विचारः अग्निपुराणे प्राप्यते। तत्र हि काव्यस्वरूपमुक्तं सङ्क्षेपात् - **''वाक्यमिष्टार्थव्यवच्छिन्ना पदावली''** 'काव्यम्'। अर्थात् यः किलाऽस्माकं विवक्षितोऽर्थो भवति, तस्य ईदृशैपदैः प्रकाशनं भवेद् येषु पदेषु आवश्यकतातोऽधिको विस्तारो न भवेत्। न च अर्थबोधविषये काचिन्न्यूनतैव भवेत्। तथा च अभीष्टार्थबोधकः पदसमूह एव काव्यमिति अग्निपुराणसम्मतं काव्यलक्षणम्।

एतदनन्तरम् अलङ्काराचार्येषु सर्वतः पुरातनेन दण्डिना काव्यादर्शे काव्यस्वरूपं विचारितम्। किन्तु वामनोऽपि अग्निपुराणसम्मतमेव काव्यलक्षणं स्वीचकार तस्य मते काव्यस्य शरीरमस्ति- 'इष्टार्थव्यवच्छिन्ना पदावली।' अर्थात् अभीष्टार्थबोधकः पदसमूह एव काव्यम्। अत्र इदं दृढतया सर्वैरवधेयं स्यात् यत् सर्वतः प्रथमम् आरम्भे स्वरूपमासीत् ''पदावली काव्यम्'' इति। अर्थात् अभीष्टार्थबोधकः शब्दसमूह एव काव्यनाम्ना व्यवह्रियते स्म।

एतदनन्तरम् आलङ्कारिकमूर्धन्यस्य रुद्रटस्य काव्यसम्बन्धी विचारोऽस्माकं सम्मुखमायाति। तेन हि विस्तृत्य काव्यस्वरूपं प्रकटीकृतं यत् ''शब्दस्य पद्यस्य वा स्वरूपे पदसङ्घटनारूपं यत्काव्यं कविरुपस्थापयति, तेनाऽस्माकं हृदये कविवर्णितः अर्थोऽपि हि

चमत्कारजनकेन रूपेण उपतिष्ठति। अर्थात् अभीष्टार्थबोधिका पदावली यथाऽस्माकं हृदये उपतिष्ठति, तथा चमत्काररूपेण संघटितः अर्थोऽपि अस्माकं हृदये समागच्छति। यतोहि चमत्कारेण पदसमूहो यथा कविना संघटितः, तथा तेषां पदानामर्थोऽपि च तेन कविनैव संघटितः। ततश्च **''शब्दश्च अर्थश्चेति शब्दार्थौ काव्यम्''** इति रुद्रटः काव्यस्वरूपमाह। इत आरभ्यैव शब्देन सह अर्थस्यापि काव्यकोटिभुक्तत्वं प्राचलत्, इति न विस्मर्तव्यं प्राज्ञैः।

एतदुत्तरं साहित्यशास्त्रे सुप्रथितस्य वामनस्य काव्यसम्बन्धी विचारः समुपगच्छति। अयमपि कविना संघटितौ शब्दार्थौ एव काव्यतया स्वीकरोति। किन्तु एतयोः शब्दार्थयोर्मध्ये चमत्कारकता अपेक्षिता। यावत्कालं शब्दार्थयोर्मध्ये कापि आकर्षतकता न भवेत् तावत्कालं कोऽपि सहृदयः काव्यं श्रोतुमभिमुखो न भवेत्। ततश्च शब्दार्थयोर्मध्ये चमत्कारोत्पादनार्थं गुणोलङ्कारौ संयोजनीयौ। शब्दार्थयोर्दोषाश्च दूरीकरणीयाः। वामनेन प्रोक्तं निजसूत्रेषु– **''सौन्दर्यमलङ्कारः**। स हि दोषगुणालङ्कारहानादानाभ्याम्।'' अर्थात् दोषाणां हानेन (त्यागेन), गुणालङ्काराणां च आदानेन सः अलङ्कारः अर्थात् सौन्दर्यं भवति। ततश्च **''दोषहीनौ गुणालङ्कारसंस्कृतौ शब्दार्थौ काव्यम्''** इति वामनसम्मतं काव्यलक्षणं सिद्ध्यति।

एतदनन्तरं साहित्यशास्त्रेऽस्मिन् युगान्तरं प्रवर्तते। एतद्युगप्रवृत्तेः पूर्वं काव्ये चमत्कारजनकं तत्त्वं गुणालङ्कारौ आस्ताम्। किन्तु आनन्दवर्द्धननामाचार्येण मार्मिकीमालोचनां कृत्वा एतत्तत्त्वमन्विष्टं यत् केवलं सुन्दरशब्दार्थसंघटनेनैव काव्ये चमत्कारोत्पत्तिर्न भवति। किन्तु अन्येषां शास्त्राणमपेक्षया कविसंघटितयोः शब्दार्थयोर्मध्ये एको महान् विशेषोऽस्ति, स हि व्यङ्ग्यार्थरूपः। यावत्कालं ध्वनिपर्यायो व्यङ्ग्यार्थो न भवति तावत् काव्ये वास्तवश्चमत्कारो नाऽऽविर्भवति। आनन्दवर्धनाचार्यस्य ग्रन्थे ध्वन्यालोके ध्वनेर्निरूपणमेव प्रधानो विषयः। किन्तु प्रसङ्गाऽऽपतितैस्तेषामक्षरैः प्रतीयते यत् तेऽपि– **''शब्दार्थशरीरं तावत् काव्यम्''** इति स्वीकुर्वन्ति।

एतदुत्तरं साहित्ये सुप्रस्थितस्य भोजराजस्य काव्यविचारः सम्मुखमुपैति। तस्याऽपि 'सरस्वती कण्ठाभरणे'

**''निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।**
**रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति।।''**

इति लक्षणेन स्पष्टं प्रतीयते यद् भोजराजोऽपि शब्दार्थयोरेव काव्यत्वमङ्गीकरोति। यतः स हि 'रसान्वितम्' इति काव्यस्य विशेषणमाह। रसस्य च सम्बन्धः साक्षात् अर्थेनैवाऽस्ति। एवमेव अलङ्कारा अपि शब्दे अर्थे चेत्युभयत्र तिष्ठन्ति। ततश्च भोजोऽपि शब्दार्थयोरेव काव्यत्वं स्वीकरोतीति निश्चेतव्यं भवति।

एतदुत्तरं सर्वजगत्प्रसिद्धस्य आलङ्कारिकशिरोमणेर्मम्मटाचार्यस्य सुप्रसिद्धं काव्यलक्षणं सम्मुखमागच्छति। एष हि वामनसम्मतं ''दोषहीनौ गुणालङ्कारसंस्कृतौ शब्दार्थौ काव्यम्'' इत्येव काव्यस्वरूपं स्वीकरोति। किन्तु एतन्मते अलङ्काराणां नित्यं वर्तमानता नाऽवश्यकी। यदि कुत्रचित् अलङ्काराः स्पष्टं न प्रतीयेरन्, तत्रापि काव्यत्वस्य हानिर्न भवति। अत एव –

''**तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि**'' इति मम्मटसम्मतं काव्यलक्षणम्। अर्थात् दोषरहितौ गुणसहितौ, प्राय: सालङ्कारौ, कुत्रचित्तु अस्पष्टालङ्कारौ अपि शब्दार्थौ काव्यं भवत:। मम्मटस्येदं तात्पर्यं यत् सहृदयानामाकर्षणार्थं शब्दार्थयोर्मध्ये कश्चिच्चमत्कार आवश्यक: ततश्च यत्र अलङ्कार: स्पष्टं न प्रतीयते यथा ''य: कौमारहर: स एव हि वर:'' अत्र स्पष्टो न कश्चिदलङ्कार:। किन्तु विप्रलम्भशृङ्गारस्य: स्फुटत्वात् रसकृतश्चमत्कार: सहृदयानाकर्षतीति अस्य काव्यत्वे न काचिद् बाधा।

एतदग्रे पीयूषवर्षेत्युपाधिधारिण: चन्द्रालोककारस्य जयदेवस्य काव्यलक्षणं समागच्छति। जयदेवात्पूर्ववर्तिभिरालङ्कारिकै: शब्दार्थयो: शोभाकारका ये ये धर्मा: प्रकाशितास्ते ते सर्वेऽपि महाभागेनानेन निजकाव्यलक्षणे निर्दिष्टा:। अत एव विविधविशेषणविशिष्टं सुदीर्घमेतन्निर्मितं लक्षणमस्ति। यथा- ''**निर्दोषा लक्षणवती सरीतिर्गुणभूषणा। सालङ्काररसाऽनेकवृत्तिर्वाक् काव्यनाम भाक्।**'' अर्थात् निर्दोषत्वादिविशेषणविशिष्टा वाक् अर्थात् शब्दार्थौ काव्यम्, इति।

एतस्मात्परम्- साहित्यदर्पणकारस्य विश्वनाथस्य काव्यलक्षणमस्माकं विचारार्थमुपतिष्ठति। मया हि प्रारम्भे अलङ्काराऽपरपर्यायस्य साहित्यशास्त्रस्य सोऽयं विशेष: सूचितोऽस्ति यत् साहित्ये यावत्किल मार्मिकमालोचनं भवति तावदेव साहित्ये उत्तरोत्तरामृतस्याऽऽविर्भावो भवति। एतदनुसारं साहित्येऽस्मिन् आनन्दवर्धनाचार्येण वस्तु-अलङ्कार-रसेति त्रिविधो ध्वनि: काव्यस्यात्मा स्वीकृत:। मम्मटभट्टादिभिश्चालङ्कारिकै: काव्यलङ्कारादिषु स्वीयेषु ग्रन्थेषु एतेषां त्रिविधानामपि व्यङ्ग्यानां चमत्कारकतया जीवितस्थानीयत्वं स्थापितम्। किन्तु उत्तरोत्तरं मार्मिकाऽऽलोचनप्रक्रियया शनै: शनैर्गभीरगवेषणायां जातायां त्रिविधानामपि व्यङ्ग्यानां मध्ये चरमव्यङ्ग्यस्य रसस्यैव काव्ये चमत्काराधायकत्वं सिद्धमभूत्। अतएव विश्वनाथेन काव्यलक्षणं निर्धारितं यत् ''**वाक्यं रसात्मकं काव्यमिति।**'' अर्थात् सर्वेषु व्यङ्ग्येषु प्रधानभूतो रसो यस्मिन् चमत्कारकतया जीवनाधायको भवति तादृशं वाक्यं काव्यमित्युच्यते।

काव्ये रसस्य आत्मत्वं (जीवनाधायकत्वम्) साहित्यदर्पणेनैव प्रथमतया साधितमिति सर्वत: प्रसिद्धि:। किन्तु एतस्मात्पूर्वं केशवमिश्रेण ''अलङ्कारशेखरे'' तदिदमुद्धृतं यत्- ''अलङ्कारसूत्रकारो भगवान् शौद्धोदनि: काव्यस्वरूपमेवमाह- ''काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्।'' अर्थात् यस्मिन् वाक्ये रस:, आदिमदग्राह्या: अलङ्काराश्च भवन्ति, तत्काव्यम्। अलङ्कारसूत्रकारस्य मतेन यस्मिन् काव्ये चमत्कारजननाय रसो भवेत्, तदभावे अलङ्कारो वा भवेत्, तद् द्विविधमपि ''काव्य'' पदं बोध्यं भवति। साहित्यदर्पणकारेण तु केवलस्य अलङ्कारस्य सत्तायां काव्यत्वं न स्वीकृतम्। अत एव ''रसादिमद्वाक्यं'' एतद् गतेन आदिशब्देन 'भावारसाभासादयो गृहीता:।' ततश्च रस-भाव-रसाभासादयो यस्मिन् वाक्ये चमत्कारकारका भवन्ति तादृशं वाक्यं काव्यमिति विश्वनाथेन काव्यलक्षणं प्रसेधितम्।

**काव्यलक्षणस्य विमर्शः**

अग्निपुराणमारभ्य साहित्यदर्पणपर्यन्तं सर्वैरेव आलङ्कारिकैः काव्यस्वरूपं विचारितम्। प्रारम्भे येन शब्दसमूहेन अभीष्टार्थस्य अर्थात् लोकानामाह्लादकस्य मनोरमस्याऽर्थस्य प्रतीतिर्भवति तादृशः पदसमूहः काव्यम्, इत्यासीत् काव्यलक्षणम्। ततः क्रमेण विचारक्षेत्रस्य विस्तारः अभूत् यत्-काव्यत्वेन स्वीकृतः स पदसमूहः केवलं मनोरमस्य अर्थस्य प्रतिपादक एव न भवेत्, अपितु तस्मिन् पदसमूहेऽपि मनोरमता अपेक्ष्यते। ततश्च रमणीयस्य अर्थस्य प्रतिपादको मनोरमः शब्दसमूहः काव्यम्, इति विस्तारः प्रारब्धः। शब्दसमूहस्य मनोरमता च सुन्दररूपेण शब्दानां सङ्ग्रथनम् अर्थात् कुत्रचित् एकरूपाणाम्, एक स्थानिकानामक्षराणां विन्यासेन श्रवणयोः सुखोत्पादनम्, कुत्रचित्स्वरव्यञ्जनयोरेकाकारतया चमत्कारोत्पादनम्, क्वचित् आपाततः पदमेकमिव दृश्यते, किन्तु विचारे कृते अर्थभेदो भवेदिति विस्मयोत्पादनम्। क्वचिद् दीर्घसमासता, क्वचित् असमस्तानि पदानि पृथक् पृथक् सङ्घटितानि भवेयुरित्यादिरूपेण पदानां गुम्फनस्य प्रकारोऽपि यत्र चमत्कारोत्पादकः स्यात् इति पदरचनापि यत्र मनोरमा स्यात्। तथा च सौन्दर्यपूर्णस्य अर्थस्य सौन्दर्यपूर्णं वर्णनमेव लोकानामाकर्षकतया काव्यत्वेन स्वीकृतमभूत्। तथा च सारः सिध्यति यत् प्रारम्भे केवलं शब्दसमूहस्य काव्यता आसीत्। किन्तु अग्रे गत्वा मनोरमस्य अर्थस्य मनोरमं वर्णनं काव्यमिति रूपेण शब्दार्थयोरुभयोरेव काव्यत्वं प्राचलत्।

**रसगङ्गाधरस्य काव्यलक्षणम्**

एतावति समये काव्यग्रन्थानां लोकप्रियता सर्वत्र व्याप्ताऽभवत्। 'यस्य पदगुम्फनस्य श्रवणे कृते हृदये आनन्दोद्बोधो भवेत् तादृशी शब्दसंघटना काव्यम्' इति सर्वतः प्रसिद्धिरभूत्। तथा च-चमत्कार-आह्लाद-आनन्द- हर्ष-प्रमोदाद्यनेकपर्यायः प्रसन्नताविशेषः काव्यस्य जीवितस्थानीयः सर्वतः स्वीकृतोऽभवत्। अत एव प्राकृतभाषायामपि ''उक्तिविसेसो कव्वी भाषा जा होइ सा होइ'' इति प्रसिद्धमभूत्। तत एव च सर्वैरेव ऐकमत्येन निर्धारितम् - 'काव्ये सारश्चमत्कारः' इति।

एवं काव्यस्य तद्गतगुणानां च सर्वतः परिचयस्य प्रख्यातेश्चानन्तरं सर्वशास्त्रविषयकपाण्डित्यसम्पन्नतया वस्तुतः 'पण्डितराज' पदार्हस्य जगन्नाथस्य समयः समुपतिष्ठति। पण्डितराजो जगन्नाथो मार्मिकस्तार्किकः, सुदृढो वैयाकरणः, तत्त्वविचारशाली दार्शनिकश्चासीत्। एतस्य समयात्पूर्वं साहित्यशास्त्रे ये ये काव्यविषयविचारका अभवंस्ते ते, तस्मिन् समये प्रचलितया सरलसुबोधया शैल्या काव्यलक्षणं कृतवन्तः। अपरतः-साहित्यविषये पण्डितानां या या आलोचनाः क्रमक्रमेण प्रवृत्ता आसन् ताः पण्डितराजस्य समये अतितमां मर्मस्पर्शिन्यः समभवन्। यतो हि यथा यथाऽस्मिन् विषये नानापण्डितानां नानाविधा मतयः

प्रावर्तन्त तथा तथा अन्तस्तलस्पर्शिनी विचारणा प्रवृत्ताऽभूत्। पण्डितराजस्य च समयः सोऽभूद् यस्मिन् भारतीयपण्डितसमाजमध्ये नव्यन्यायस्य विजयः पूर्णतया समभवत्। समये तस्मिन् एकैकमप्यक्षरं तर्कस्य सुदृढतमां विचारणामनुभूय कस्मिंश्चिल्लक्षणे प्रविशति स्म। अत एव काव्यस्य लक्षणानि यानि पुरातनैरालङ्कारिकैः कृतानि, तेषु अतितमां मार्मिकविचारणायाः सोऽयमासीत्समयः।

किञ्च–पण्डितराजस्य योऽयं ग्रन्थः साहित्यविषयकविचाराय प्रवृत्तस्तस्य नाम पण्डितराजेन निर्दिष्टं 'काव्यमीमांसा' इति। अस्यां हि काव्यसम्बन्धिनां विषयाणामतिगभीरतमा आलोचना ग्रन्थकर्त्रा प्रतिज्ञाता। स हि भूमिकायां वदति यत् मननसमुद्रस्य गभीरतमे अन्तस्तले प्रविश्य अतितमां क्लेशेन दुर्लभमणिसदृशोऽयं ग्रन्थो मया लोके आविर्भावितः। ततश्चास्मिन् ग्रन्थे काव्यविषयिणी प्रकामं मार्मिकी आलोचना कृताऽस्तीति सुस्पष्टम्। सेयमालोचना तर्कशास्त्रस्य प्रगाढं पाण्डित्यं पुरस्कृत्य प्रवृत्ता, इत्यपि न वक्तव्यं पण्डितपुरन्दराणां पुरतः। यतो हि स समयो नव्यन्यायस्य पूर्णप्रचारमयोऽभूद् भारतवर्षे।

अन्यशास्त्रीयाः पण्डिताः साहित्यशास्त्रं सरलतमम्, नव्यन्यायस्य सुदृढविचारेण रहितमिति कृत्वा उपेक्षया तदेतदालोचयन्ति स्म। किन्तु अलङ्कारशास्त्रस्य महत्त्वस्थापकः सोऽयं पण्डितराजो नैतामवहेलां सहते स्म। अत एवाऽनेन पण्डितराजेन समये प्रगाढतया प्रसृतस्य नव्यन्यायस्य सरणिमवलम्ब्य काव्यमीमांसापरनामा सोऽयं ग्रन्थस्तादृशेन सन्नाहेन प्रणीतो यथा नाऽत्र साधारणपण्डितानाम् आलोचनाचञ्चाः प्रवेशस्याऽवकाशः। प्रोक्तं हि मया सरलाटीकायाः परिसमाप्तौ –

**''पुरा प्रविश्याऽत्र निजप्रसङ्गादन्ये व्यजृम्भन्त बुधाः कदाचित्।**
**अद्याऽनया पण्डितराजशक्त्या त्वसाधि साहित्यमभेददुर्गम्।।''**

अतएव काव्यलक्षणेऽपि स्वसमये प्रगाढतया प्रसृतस्य नव्यन्यायस्य शैली परिगृहीता। तार्किका यथा एकैकं पदमतितमां विचारपूर्वकं विन्यस्यन्ति, तथा अत्र प्रत्येकं पदमतिमीमांसापूर्वकं स्थापितम्। यावती अत्र आकाङ्क्षाऽस्ति तदपेक्षया न न्यूनम्, नापि चाऽधिकं किञ्चित्पदं विन्यस्तम्। यावदेव सङ्क्षेपो भवेत्तावदेव पाण्डित्यमपि महद् भवेत्, इत्यभूत्तस्मिन् समये स्पर्द्धा। नव्यन्यायेन प्रगुणितमतयो वैयाकरणाः। यथा– ''अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते'' इत्याहुस्तथा तामेव प्रत्येकाक्षरसङ्क्षेपवाहिनीं ग्रन्थनिर्माणशैलीमादाय प्रवृत्तः पण्डितराजः। अत एव अग्निपुराणमारभ्य पण्डितराजस्य समयं यावत् ये ये आलङ्कारिकाः काव्यलक्षणं प्रणीतवन्तस्तानि सर्वाणि आलोचनाचक्रे संस्थाप्य पूर्णेन विवेकेन, अतीव मार्मिकतया च, स्वं काव्यलक्षणं प्रणीतवान्।

काव्यस्य कालिदासादिवत् कीर्तिः, अलौकिकः आनन्दः, स्वगुरोः, स्वाश्रयस्य राजादेः, स्वसेव्यस्य देवतादेः, प्रसादनादीनि अनेकानि प्रयोजनानि सन्ति ईदृशस्य काव्यस्य

तत्त्वबोधनं काव्यनिर्मातुः कवेः, तथा तदिदं काव्यं बुध्वा आनन्दप्राप्तेरिच्छुकस्य सहृदयस्य च आवश्यकमस्तीति तस्य लक्षणमाह पण्डितराजः-पूर्वेषां रीत्या तदिदं काव्यं गुणालङ्कारादिभिर्विशिष्टं भवति। ततश्च गुणालङ्कारादिकाणां विशेषणानां विशेष्यं तत् काव्यं किंस्वरूपमस्तीति बोधनाय पण्डितराजः काव्ये लक्षणं निर्दिशति-'रमणीयार्थप्रतिपादकशब्दः काव्यम्' इति।

## पूर्वाचार्यकृतलक्षणानाम् आलोचना

दीर्घां भूमिकां विस्तृत्य मया पूर्वमिदमेव निवेदितमासीत्, यत् तस्मिन् समये प्रसृतां नव्यन्यायशैलीमाश्रित्य पूर्वेषामलङ्कारिकाणां विचारस्य निष्कर्षस्वरूपं स्वलक्षणं स्थापितं पण्डितराजेन। अग्निपुराणमारभ्य साहित्यदर्पणकारं यावत् सर्वेषां लक्षणकाराणां तात्पर्यमिदमासीद् ''सौन्दर्यपूर्णस्याऽर्थस्य सौन्दर्यपूर्णं वर्णनं काव्यमस्ति'' इति। तस्य सारतया पण्डितराजेन निर्दिष्टं यद् रमणीयस्य अर्थात् अलौकिकाह्लादजनकतया सौन्दर्यपूर्णस्य अर्थस्य प्रतिपादकः यः शब्दः (शब्दसमूहः, वाक्यम्, पदैःसन्दृब्धं वर्णनम्) स एव काव्यम्, इति। ततश्च ''अभीष्टार्थस्य बोधिका पदावली काव्यम्'' इति अग्निपुराणस्य। ''इष्टार्थव्यवच्छिन्ना पदावली काव्यम्'' इति दण्डिनः। ''गुणालङ्कारसंस्कृतौ शब्दार्थौ काव्यम्'' इति वामनस्य। 'शब्दार्थशरीरं काव्यम्', इति आनन्दवर्धनाचार्यस्य। ''सगुणौ निर्दोषौ शब्दार्थौ काव्यम्'' इति मम्मटभट्टस्य। इति सर्वेषामेव पूर्वाचार्याणां लक्षणस्य तत्त्वमस्मिन् लक्षणे सन्निविष्टम्। यतः अलौकिकानन्दजनकस्य अर्थस्य बोधको यः शब्दसमूहो भवेत् स हि अवश्यं सौन्दर्यपूर्णो भवेत्। शब्दे सौन्दर्यं च साहित्यपरिभाषितैर्गुणालङ्कारादिभिरेव भवति। ततश्च अलौकिकाह्लादजनकत्वेन सौन्दर्यपूर्णे यः अर्थः, तादृशार्थस्य प्रतिपादकः शब्दसमूहोऽपि गुणालङ्कारैर्विशिष्टतया सौन्दर्यपूर्णः अवश्यं भवेदेव। एवं च ''सौन्दर्यपूर्णस्य अर्थस्य सौन्दर्यपूर्णवर्णनं काव्यम्'' इति प्राचीनाचार्यैर्यो लक्षणस्य सारः सूचितः, स ह्यस्मिन् लक्षणे स्पष्टतया समाविष्ट इति सुस्पष्टमेव भवेत्प्रतिभावताम्।

रमणायार्थप्रतिपादकेत्यादिलक्षणस्य विशदा व्याख्या त्वेवम्-रमणीयो यः अर्थः, तस्य प्रतिपादकः (बोधकः) यः शब्दः अर्थात् शब्दसमूहः, यतो ह्येकस्य शब्दस्य संज्ञा काव्यमिति न भवति ततश्च तादृशः शब्दसमूहः काव्यम्। अर्थे रमणीयता च- लोके अननुभूयमानो य आनन्दः, तादृशानन्दस्य जनकं यद् ज्ञानं तादृशज्ञानविषयता। ततश्च अलौकिकाह्लादजनकं यज्ज्ञानम् अर्थाद् भावना (अर्थस्य पुनः पुनरनुसन्धानम्) तादृशभावनाया विषयीभूतो योऽर्थः तस्य प्रतिपादकः (बोधकः) शब्दसमूहः काव्यमिति फलितम्। आह्लादे अलौकिकता विशेषणदानस्य प्रयोजनमस्ति यत्- 'पुत्रस्ते जातः, अपारां धनसम्पत्तिं ते दास्यामि' इत्यादिभिः शब्दैरपि आनन्दो भवति। ततश्च इदमपि काव्यपदवाच्यं भवेत्। किन्तु सोऽयमानन्दो लौकिकः। अस्मदभीष्टया कविकल्पनया प्रसूतो नास्ति। एवं च

लोकोत्तराह्लादजनकस्य ज्ञानस्य गोचरीभूतो योऽर्थ:, तादृशार्थप्रतिपादकशब्दसमूह: काव्यमिति सर्वनिष्कृष्टं लक्षणम्। एतस्य विशदा व्याख्या–अलौकिकाह्लादापरनाम्न: चमत्कारस्य जनिका या भावना, तादृशभावना विषयीभूतो योऽर्थ:, तत्प्रतिपादक: शब्दसमूह: काव्यम्।

अत्र शङ्का भवति। यत् एक: ईदृश: शब्दसमूहोऽस्ति यस्मिन् धारावाहिकरूपेण अर्थात् सामान्यप्रवाहरूपेण आह्लादजनिकाऽपि भावना अस्ति, तथा तद्विरुद्धा आह्लादस्य अजनिकाऽपि भावना अस्ति। ततश्च धारावाहिकरूपेण अयं शब्दसमूह: चमत्कारजनकभावनाविषयकस्य अर्थस्य प्रतिपादको जात:। अत: अस्यापि काव्यत्वं भवेत्। अत: एतस्या अतिव्याप्ते: निरासाय लक्षणस्य द्वितीय: प्रकार: पण्डितराजेन सूच्यते यत् – ''यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वं काव्यत्वम्। अर्थाद् येन यैर्वा शब्दैरूपस्थापितस्य (अर्थात् यादृशशब्दानुपूर्वी प्रतिपादितस्य) अर्थस्य भावनया (पुन: पुनरनुसन्धानेन) चेतसि चमत्कारजननं भवति, तादृशचमत्कारजनकताया अवच्छेदकं तादृशानुपूर्वीमत्त्वमेव काव्यत्वं भवति। अर्थात् यादृशी शब्दानुपूर्वी (शब्दपरम्पराम्) श्रुत्वा अलौकिकचमत्कारजनिका भावाना उद्भवति, तादृशानुपूर्वी विशिष्ट: शब्दसमूह एव काव्यं भवति। ततश्च यत्र सम्पूर्णया आनुपूर्व्या चमत्कारजनिका भावना न भवति ,किन्तु धारावाहिकरूपेण तद्भिन्ना अचमत्कारजनिका अपि भावना तादृशस्थलस्य वारणं जातम्।

इदानीं नैयायिकशैल्या लघुभूतं काव्यलक्षणमाह– 'स्वविशिष्टजनकतावच्छेदकार्थ प्रतिपादकतासंसर्गेण चमत्कारत्ववत्त्वमेव काव्यतत्त्वम्।' एतस्य साधारणभाषायामयं सार:– यत् सर्वेषां चमत्काराणामवच्छेदकं (असाधारणधर्म:) य चमत्कारत्वम्, तद्विशिष्टत्वेन काव्यत्वम्। तत् चमत्कारत्ववत्त्वं च स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण बोध्यम्। यतो हि स्वं चमत्कारत्वं, तादृशचमत्कारत्वविशिष्टा विषयतासम्बन्धावच्छिन्ना अर्थनिष्ठा या भावनानिष्ठजनकतावच्छेदकता, तद्रूपेण संसर्गेण, इत्याशय:। सर्वस्य लक्षणस्यायं निष्कर्ष:– ''यादृशशब्दानुपूर्व्या: (शब्दपरम्पराया:) पुन: पुनरनुसन्धानात्मकेन भावनाविशेषेण चमत्कारापरपर्यास्य अलौकिकानन्दस्य जननं भवति, तादृशशब्दानुपूर्वीमत्त्वं काव्यत्वम्।

## लक्षणस्य मूलाक्षराणि

''रमणीयार्थप्रतिपादक: शब्द: (अर्थात् शब्दसमूह:) काव्यम्'' इति न विस्मरणीयम्। इदानीं मननसमुद्रे अन्तर्निमज्ज्य काव्यविषयिणी कीदृशी मीमांसा (अर्थात् मार्मिकता) फलितराजेन उद्भाविता, तस्या: परिचयो गृह्यताम्। प्राचीनैराचार्यै: यानि काव्यलक्षणानि दर्शितानि, तेषु बहवो दोषा: सन्ति। प्रथमतस्तु– आलङ्कारिकशिरोमणिना श्रीमता मम्मटभट्टेन ''शब्दार्थौ काव्यम्'' इत्युक्त्वा शब्दश्च अर्थश्चेति द्वयोरेव काव्यत्वं लक्षणे प्रतिपादितं, तदेतन्न घटते। प्रमाणाभावात्। ''काव्यं श्रुतम्, काव्यमुच्चै: पठ्यते, काव्यादर्श: अवगम्यते'' इत्यादि व्यवहार: सर्वजनेषु प्रसिद्ध:। सोऽयं व्यवहार: शब्दस्य काव्यत्वे एव सङ्गच्छते। यतो हि,

श्रवणं शब्दस्य भवति। पठनमपि (व्यक्तवाचनमपि) शब्दस्यैव भवेन्न अर्थस्य। 'काव्यात् अर्थः अवगम्यते' इत्युक्तौ काव्यं च अर्थश्चेति द्वयमपि पृथगिति प्रतीतिर्भवति। अन्यथा अर्थस्यापि काव्यत्वे 'अर्थात् अर्थः अवगम्यते' इत्यर्थबोधे असङ्गतिः प्रसज्येत्। ततश्च शब्दस्यैव काव्यत्वं वक्तव्यम्, न शब्दार्थयोः। लक्षणया शब्दमात्रे काव्यत्वव्यवहारो निर्वाहणीय इत्यपि न सम्भवति। यदि पूर्वं शब्दार्थयुगले काव्यशब्दव्यवहारस्य किञ्चित्प्रमाणं स्यात्तर्हि युगलमध्ये, एकस्य कृते लक्षणा भवेत्। किन्तु व्यवहारः शब्दे एव काव्यत्वस्य प्रवृत्तिं बोधयति, ततः कथं लक्षणायाः प्रसङ्गः ?

ननु ''शब्दार्थौ काव्यम्'' इति प्रकाशकारेण स्वग्रन्थे प्रोक्तम्। अतएव मम्मटोक्तिः सेयं शब्दरूपा प्रमाणम्, इत्यपि न शक्यते वक्तुम्। यतो हि 'शब्दार्थौ काव्यम्' एतद्विचारे एव तु संशयः समापतितः। ततो विमतस्य आचार्यस्य वाक्येन निर्णयः कथं समुचितः स्यात्? एवमेव-उपरि प्रदर्शिताभिरूपमतिभिः वेदपुराणादिनामपि लक्षणं शब्दमात्रे एव विश्राम्यति अर्थाद् वेदपुराणादीनां शब्दानुपूर्वी एव वेदः पुराणं चेति।

कतिपये 'आस्वादोद्बोधकत्वं काव्यत्वम्' इत्याहुः। अर्थात् आस्वादस्य रसस्य उद्बोधकम् (आत्मानन्दस्य जागरणकारकम्) काव्यपदवाच्यम्। एतदपि लक्षणं न सम्भवति। यतो हि आस्वादस्य रसस्य उद्बोधकाः वसन्तहिन्दोलप्रभृतयो रागा अपि भवन्ति। स्वीकृतं चैतद् ध्वनिकारादिभिरपि। एवमेव नाट्यस्य अङ्गानि नृत्य-गीत-वाद्यानि सर्वाण्येव रसस्योद् बोधकानि। ततश्च तान्यपि काव्यपदवाच्यानि भविष्यन्ति। तानि चमत्काराधायकानि किन्तु न काव्यानि अतः शब्दे, अर्थे च काव्यत्वसङ्ग्रहार्थं यत् 'आस्वादद्बोधकत्वं' लक्षणं कैश्चित्कृतं तदपि परास्तम्। किञ्च-शब्दस्य अर्थस्य चेत्युभयोः काव्यत्वस्वीकारे-अयमपि प्रश्नः प्रोद्भवति यत् 'मिलितौ शब्दार्थौ काव्यम्', अथवा 'शब्दः अर्थश्च पृथक्-पृथक् काव्यम्?' यदि मिलितयोः शब्दार्थयोः काव्यत्वं, तर्हि श्लोकस्य वाक्यं (शब्दः) काव्यपदवाच्यं न भवेत्। यतो हि एकः एकः इति मिलित्वा द्वे भवतः। ततश्च द्वि-पर्याप्तं काव्यत्वम्, एकस्मिन् शब्दे अर्थे वा न सम्भवेत्। यदि तु प्रत्येकस्मिन् शब्दे अर्थे च पृथक् काव्यत्वं, तर्हि एकस्मिन् पद्ये शब्दस्य अर्थस्य पृथक्तया 'काव्यद्वयमिदम्' इति व्यवहारः प्रसज्येत। तस्मात् 'शब्दः काव्यम्'। न तु शब्दार्थौ।

शब्दार्थयोरुभयोरेव काव्यत्वसमर्थनाय नागेशभट्टमहोदयेनात्र प्रोक्तं यत् ''यथा काव्यं श्रुतं, काव्यं पठितमिति लोके व्यवहारः, तथा 'काव्यं बुद्धम्? इत्यपि व्यवहारः। बोधश्च अर्थस्यैव भवति, न तु शब्दस्य। तस्मात् शब्दार्थयोरुभयोरेव काव्यत्वं स्वीकार्यम्। किञ्च वेदपुराणत्वमपि न केवलं शब्दमात्रस्य, अपि तु शब्दार्थयोर्द्वयोरेव। अतएव 'तदधीते तद्वेद' इति पाणिनि सूत्रस्य भाष्ये 'यः अधीते (पठति), यश्च 'वेद' जानाति, सोऽपि वैदिकः वैयाकरणो वा भवति। अर्थस्यापि काव्यत्वे द्वितीया आपत्तिः सेयम्, यत् द्वयोरपि काव्यत्वे, 'एको न द्वौ' इति बोधे, प्रत्येकस्य काव्यत्वं न स्यात् इति। अत्र लक्षणया प्रत्येकमपि काव्यत्वं भवेदिति, शब्दार्थयोर्द्वयोरपि काव्यत्वे न कोऽपि दोषः'' इति।

एतदपि न किञ्चित्। ''रमणीयार्थप्रतिपादक: शब्द: काव्यम्'' इत्युक्तौ अर्थोऽपि शब्देन सह आगच्छति। अतस्तस्यापि बोधविषये अन्वय: सम्भवत्येव। ततश्च 'तदधीते तद्वेद' इत्यादौ अर्थस्यापि सङ्ग्रहे भाष्योक्ति: सङ्गच्छते एव। किञ्च-शब्दार्थयोर्द्वयोरेव काव्यत्वं स्वीकृत्य- 'लक्षणया प्रत्येकस्य काव्यत्वं भविष्यति' इति समाधानमपि परास्तम्। यतो हि ''शब्दार्थयुगले काव्यशब्दाशक्तेर्दृढतरप्रमाणकाभावान्न लक्षणा'' इति पूर्वमुक्तमेव। तत: कथं लक्षणा? 'काव्यं बुद्धम्' इति व्यवहारस्तु-शब्देन सह तत्सहकृत: अर्थोऽपि गौणतया समागच्छति। न किल काव्यरूप: शब्द: दुन्दुभिप्रभृतीनां शब्दवत् अव्यक्तौ नाद:। ततश्च प्रधानतया काव्यत्वं शब्दस्यैव, तत्सहकृततया अर्थश्चापि सङ्गृह्यते इति ग्रन्थाशय:।

लक्षणो हि मुखत: शब्दनिवेशेऽपि, शब्दस्य रमणीयार्थप्रतिपादकता विशेषणदानात् स शब्दो रमणीयार्थहितो गृह्यते। ततश्च शब्दस्य अर्थस्य चेति द्वयोरपि काव्यता स्वत: सिध्यति। लक्षणे शब्दस्यैव निवेशे कारणं तु-काव्ये निर्मिते: (अर्थाद् गुम्फनस्य) साक्षाद् विषय: सुललितसन्निवेषे विशेशशालितया माधुर्योद्‌बोधको विशिष्ट: शब्द एव। शब्दस्य अर्थस्तु न कविना निर्मियते। स तु अनादिप्रवाहात् ईश्वरेच्छारूपस्तस्य स्वाभाविक एव। ततश्च कालिदासेन निर्मितं रघुवंशमित्युक्तौ- 'वागर्थाविव संपृक्तौ'-इत्याद्यारभ्य 'भर्तुरव्याहताज्ञा' इति पर्यन्त: कालिदासकृत: शब्दगुम्फएव श्रोतृणां बुद्धौ उपारोहित। पार्वतीपरमेश्वरवन्दनरूप: शब्दानामर्थस्तु तेन गुम्फेन सह स्वयमेव समायाति। तथा च ''रघुवंशनिर्माणम्'' इत्यस्यार्थ:- ''वागर्थाविव सम्पृक्तौ'' -इत्याद्यारभ्य 'भर्तुरव्याहताज्ञा' इति पर्यन्तस्य पदगुम्फनस्य निर्माणम्। अर्थात् अनादिशक्त्या स्वयमुपतिष्ठत्येवेति मुखतो नोच्यते केनचित्। एवं स्थितौ 'रमणीयस्य अर्थस्य प्रतिपादक: शब्दा:' इति कथने अर्थस्य सङ्ग्रह: तत एव सिध्यति। ''शब्दार्थौ काव्यम्'' इति अर्थस्य निवेशमकृत्वा लक्षणे केवलशब्दस्य स्थापनं तु तर्कपाण्डित्याभिमानिनां कृते-तर्कपद्धत्या सुदृढसंक्षिप्तलक्षणनिर्माणपाटवमेव।एवं च मननजलधेरन्तस्तलं प्रविष्टस्य पण्डितराजस्य लक्षणं किञ्चिन्मननं कृत्वैव बोधगम्यं भवेत्, न उपरित: परामर्शमात्रेण। तथा च शब्द: काव्यमित्युक्तावपि अर्थसहित: शब्द: काव्यकोटौ स्वयमुपतिष्ठतीति पण्डितराजस्य तात्पर्यम्।

एवं किल प्रधानतया शब्दमेव निर्दिशत: परममार्मिकस्य पण्डितराजस्य निगूढं तात्पर्यमिदमस्ति यत्काव्ये शब्दसौष्ठवविषये विशेषतो यतनीयम् कविना। अर्थस्तु मधुरशब्दसन्निवेशस्वयमुपस्थास्यत्येव यतो हि काव्यमिदं कान्तासम्मितोपदेश: परिगण्यते। येषां विनेयानां प्रभुसम्मितवेदादिषु साम्मुख्यं न भवति, तेऽपि काव्यस्य मधुरतया आकृष्टा: सन्तो गुडजिह्विकया 'रामादिवद् वर्तितव्यं न रावणादिवत्' इत्यादिकमुपदेशं गृह्णीयु:। इदानीं द्रष्टव्यं यत् श्रोतृणां समाहरणार्थं कवे: काव्ये सर्वत: पूर्वं शब्द एव कर्णगोचरो भवति, वा? ततश्च मधुरशब्दशय्यया अभिमुखीभूत: श्रोता काव्यं शृणोति तद्- गतानुपदेशांश्च गृह्णातीति वस्तुस्थिति:। एवं च ''विनेयानामभिमुखीकरणार्थं कविसंरम्भगोचरस्य शब्दस्यैव प्राधान्यम्'', इति सूचनाय लक्षणे 'शब्द: काव्यम्' इति पण्डितराजेन निबद्धम्।

किञ्च–अत्र काव्यानां प्रचारसूचकम् अन्यदपि ऐतिहासिकं रहस्यमस्ति। पण्डितराजस्य समयं यावत् काव्येषु भूयस्तमामुत्त्थानपतनान्यभूवन्। पूर्वमलङ्काराणां प्राधान्यमभ्युपगतं प्राचीनैर्भामहादिभिरालङ्कारिकैः। ततो ध्वनेराविर्भावः। ततो वस्तु अलङ्काररस–इति त्रिविधानामपि ध्वनीनां काव्ये जीवितस्थानीयत्वं घोषितमभूत्। एतदनन्तरं रसस्यैव आत्मत्वप्रख्यातिः। किन्तु प्रारम्भतः प्रभृति रसयुगपर्यन्तं सर्वस्याऽपि काव्यस्य मुखभागे शब्दस्य प्राधान्येन सन्निवेशो न केनचिदालङ्कारिकेण प्रतिरुद्धः। यतो हि आपाततः काव्यस्य शब्दं श्रुत्वैव सहृदयाः समाकृष्टा भवन्ति। यदि सर्वतः प्रथमकर्णयोरुपगते तस्मिन् शब्दे एव मनोहरता न भवेत्तर्हि वेद–धर्मशास्त्रादिभ्यो विमुखीभूय समागता विनेयाः कथमभिमुखीभूता भवेयुः ? अतएव वेद–पुराणप्रभृतीनारभ्य सर्वस्मिन्नपि साहित्ये विशिष्टस्य शब्दस्यैव प्राधान्यं सुस्थिरमभूत्।

एतद्ग्रन्थनिर्मातुः पण्डितराजस्य साहित्यनिर्माणसमयः सोऽयमस्ति यस्मिन् मोगलसम्राजः शाहजहांनस्याऽऽसीद् भारते शासनम्। पण्डितराजोऽपि ''दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः'', 'दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः' इत्यादिना तत्सामयिकीं परिस्थितिं सूचयामास। शाहजहांनस्य समयं यावत् संस्कृतसाहित्यं तु पूर्णतया परिनिष्ठितमभूदेव, किन्तु हिन्दीपर्यायक–वज्रभाषासाहित्यमपि परमां प्रौढिं प्रापत्। तस्मिन्नेव समये 'सतसई' निर्माता बिहारी, कुलपतिमिश्रादयो व्रजभाषाकवयः स्वकीयेन कवितापाटवेन राजसंस्थानेषु असाधारणीं प्रतिष्ठां प्रापुः। संस्कृतभाषायाः साम्राज्यसूर्यः तस्मिन् समये पूर्णमध्याह्नमनुभूय अवतरणोन्मुख इवाऽभवत्। व्रजभाषासाहित्यं च जनानामनुरागभाजनमभूत्। तत्सामयिकाः सहृदयाः, कवीनामाश्रयदातारो राजानश्च व्रजभाषाकाव्यैरेव प्रसन्ना अभूवन्। व्रजभाषानिबद्धेषु तेषु काव्येषु च अर्थस्य चमत्कारे सत्यपि आपाततः शब्दानामेव सौन्दर्यं सहृदयानाचकर्ष। यथा विहारिणो दोहापद्यम्–

**''नभलाली चाली निसा चटकाली धुनि कीन।**
**रति पाली आली अनत आये वनमाली न।।''**
**''रे गायन! गायन चतुर ये गायनपरवीन।**
**ये गाहक करवीन के, लै बैठ्यो कर बीन।।''**

यथा वा, तदुत्तरभावी भारतसुप्रसिद्धः पद्माकरः–

**कूलन में केलि में कछारन में, कुञ्जन मे,**
**क्यारिन में कलित कलीन किलकन्त है।**
**कहै 'पद्माकर' परागन में पौन हूँ में,**
**पातन में पिक में पलासन पगंत है।**
**द्वार में दिसान में दुनी में देस देसन में**
**देखो दीप दीपन दिपत दिगन्त है**

**वीथिन में व्रज में नवेलिन में बेलिन में**
**बनन में बागन में बगर्यो बसन्त है।। १।।**

मनन जलधेरन्तस्तलं प्रविश्य तत्त्वसमाहरणपण्डितः पण्डितराजः साहित्यस्य सर्वां प्रगतिं पूर्वाऽपरतः सम्यक् समीक्षाञ्चक्रे । शब्दसौष्ठवं प्रति सहृदयानां स्वाभाविकमनुरागं नासौ अपलपितुं समर्थो बभूव। प्रत्यक्षमयमनुभूतवान्–यत् काव्यं शृण्वन् सहृदयः पूर्वं शब्दसौन्दर्येणैवाकृष्टो भवति। पूर्वेऽपि कवयः शब्दमाधुर्य परम्परागतः प्राशंसन्।

**''अविदितगुणाऽपि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।**
**अनधिगतपरिमलापि हि हरति दृशं मालती माला।। १।।''**

ततश्च सर्वशास्त्रेषु प्रगाढपण्डितस्य, तथा काव्यरचनायामपि दिगन्तविश्रान्तकीर्तेः पण्डितराजस्य काव्यरचनासमये शब्दसौष्ठवं प्रति यदि समाकृष्टं भवेन्मानसं तर्हि नेदमाश्चर्यम्। यतो हि–अर्थचमत्कारं पूर्णतया प्रकटयन्नपि सोऽयं निजपद्येषु क्वचित् शब्दचमत्कारमवश्यं दर्शयामास। एतस्य शिखरिणीछन्दस्तु प्रसिद्धमेव–

**'यदन्तः खेलन्तो बहुलतरसन्तोषभरिता**
**न का का नाकाधीश्वर नगरसाकाङ्क्षमनसः।**
**निवासाल्लोकानां जनिमरणशोकापहरणं**
**तदेतत्ते तीरं श्रमशमनधीरं भवतु नः।। १।।'**
**विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं**
**न याभ्यामालीढा नयनरमणीया तव तनुः।**
**अयं हि न्यक्कारो जननि मनुजश्रवणयो-**
**र्ययोर्नान्तर्यातस्तव लहरिलीलाकलकलः।। २।।**

किन्तु अन्यान्यपि पद्यानि शब्दसौन्दर्ययुक्तान्येव भवन्ति। यथा हि मालभारिणी–

**''नितरां हितयाऽद्य निद्रया मे बत यामे चरमे निवेदितायाः।**
**सुदृशो वचनं शृणोमि यावन्मयि तावत्प्रचुकोप वारिवाहः।। १।।**
**कुसुमानि शरा, मृणालजालान्यपि कालायसकर्कशान्यभूवन्।**
**सुदृशो दहनायते स्म राका, भवनाऽऽकाशमयथाऽभवत्पयोधिः।। २।।''**

शार्दूलविक्रीडितम्–

**''वलाद्गाण्डिवमुक्तकाण्डवलयज्वालावलीताण्डव-।**
**भ्रश्यत्खाण्डवरुष्टपाण्डवमहो को न क्षितीशः स्मरेत्।।''**

इन्द्रवज्रा–

**''तीरे तरुण्या वदनं सरसं नीरे सरोजं च मिलद्विकासम्।**
**आलोक्य धावत्युभयत्र मुग्धा मरन्दलुब्धालि किशोरमाला।।''**

उपेन्द्रवज्रा–

**'अवश्यमाकाङ्क्षितकृष्णवर्त्मा भीषो महात्माऽजनि माघतुल्यं।।'**

अनुष्टुप्–

**''गुञ्जापुञ्जधरः पायादपायादिह कोऽपि वः।''**

किं बहुना। पण्डितराजस्य कविताप्रवाहे तत्समयप्रचलितः शब्दप्रवाह एव केवलं नाऽगच्छत्। कुत्रचित्कुत्रचित् अर्थोऽपि व्रजभाषासाहित्यमनुहरते। यथा–

विहारिणः पद्यम्–

**'छिप्पौ छबीलो मुख लसै नीले आँचल चीर।**
**मनौ कलानिधि झलमलै कालिन्दी के नीर।।'**

पण्डितराजस्य गङ्गाधरे पद्यमस्ति–

**'नीलाञ्चलेन संवृतमाननमाभाति हरिणनयनायाः।**
**प्रतिबिम्बित इव यमुनागभीरनीरान्तरेणाङ्कः।।'**

एतद्धि विहारिपद्येन अविकलं संवदते। अन्यकवीनां रचनागन्धं मनसाऽपि परिहरन्, नितान्तमभिमानशाली पण्डितराजः, तत्सामयिकस्य भाषाकवेः पद्यच्छायां इच्छया अनुचकार, अथवा सामयिकः प्रभावो यदृच्छयाऽस्य रचनायामागच्छत्? इति अन्वेषणशीलाः पण्डितमहाभागा एव गवेषयन्तु। किन्तु सामयिको युगप्रवाहः सर्वथाऽनुल्लङ्घनीयो भवतीत्येव मे कथनस्य तात्पर्यम्।

ततश्च प्रारभतोऽद्यावधि सर्वामपि साहित्यस्य परिसीमां दृष्टवान् मार्मिकः पण्डितराजो मननसमुद्रे निमज्ज्य रसगङ्गाधरनाम्नीमिमां काव्यमीमांसां विरचयामास। अतएव काव्यलक्षणे अर्थस्य समावेशार्थं पण्डितराजेन विचारो न कृतः स्यात्, इति को वा विचारशीलो वक्तुं पारयेत्। किन्तु तार्किकम्मन्यानां संक्षिप्त–सुदृढलक्षणनिर्माणगर्वं खर्वं कुर्वन् सुदृढ–संक्षिप्तं लक्षणं निबबन्ध– 'रमणीयार्थप्रतिपादक शब्दः काव्यम्' इति।

यत्किञ्चित्काव्यं शब्दतः शृण्वतां पाठकमहाभागानाम् अर्थचमत्कारस्तु पुरस्तादनुभवगम्यो भवेदेव, किन्तु कर्णाभ्यां श्रुतमात्रैव सुन्दरशब्दशय्या सहृदयानाकर्षतीति

वर्णिका (बानगी) रूपेण नवीनानि पद्यानि कानिचित् सम्मुखमुपस्थापयामि। एवंविधरचनाविषये काश्यादिषु सुप्रसिद्धेषु संस्कृतसाहित्यकेन्द्रेषु काव्यगतसौष्ठवविषयमवलम्ब्य पूर्णो विमर्शः समभूत्। विचारोत्तरं रचनामार्मिकैरनुगृहीता सेयं रचना प्रमोदप्रकटनरूपपुरस्कारेण। अस्तु, कविता सेयम्-

**मूर्द्धनि मनोज्ञमणिमञ्जुलमुकुटधारी कुन्तलकलापमनोहारी मुखपद्धतौ**
**चञ्चलानुकारी कटिदेशे भाति पीतपटो मोदमुपयाति गोपनारी जनसंहतौ।**
**मञ्जुनाथ दारुणदवौघपरिहारी सतां भक्तजनमानसविहारी साधुसङ्गतौ**
**मनसि मुनीनामपि मन्दमन्दचारी चिरात् सोऽयं सुखकारी मे मुरारी रमतां मतौ।।**
**भूरुहा वहन्ते मञ्जुमञ्जरीर्भजन्ते चारुवल्लरीर्मदन्ते मधुपायिनोऽद्य मानस**
**रम्यामारभन्ते मञ्जुपम्पापुलिनान्ते चराः सुभगसमीराः संजुषन्ते रसिका रसे।**
**काकलीः श्रयन्ते युवकोकिलाविलासभृतो बाणाः संरभन्ते कुसुमेषोरपि नीरसे**
**प्रणतिरियं ते वच्मि भूयः कान्त क्विते ननु विरहिदुरवन्ते किं वसन्ते गन्तुमीहसे।।**
**मानवसमाजे सभ्यतायाः साधयित्री सेयममितमगाधज्ञानराशिजनयित्रीयम्**
**विश्वमण्डलेऽस्मिन्नखिलेऽपि प्रभवित्री बभौ भरतभगीरथादिभूपोद्भावयित्रीयम्।**
**श्रीमद्रामकृष्णपदपङ्कजैः पवित्रीकृता भीमप्रमुखानां धर्मधीराणां सवित्रीयम्**
**वीराणां वरित्री चिन्तनीयचरितानां चारुचेतसि चरित्री भाति भारतधरित्रीयम्।।**

एवं च-अर्थ चमत्कारो पूर्णतया सत्यपि पदगुम्फने सुललितशब्दसौन्दर्यं बलादिव सहृदयानां हृदयमाकर्षतीति सर्वसम्मत्या सिद्धो निष्कर्षः। एतां सर्वां साहित्यपरिस्थितिम् असाधरणेन मननेन सुदृढीकुर्वन् पण्डितराजः स्वीये काव्यलक्षणे रमणीयमर्थं प्रथमत एव निर्दिशन्नपि तर्कपाण्डित्यप्रकटनाय सुदृढ-संक्षिप्तं लक्षणं निबबन्ध-'रमणीयार्थ प्रतिपादक शब्दः काव्यम्'।

एतद्विरुद्धं 'शब्दार्थौ काव्यम्' इति यत् प्राचीनानां काव्यलक्षणमासीत् तस्य समर्थनं स्वर्गवासिभिः काशीस्थैर्महामहोपाध्यायैः पण्डित श्रीगङ्गाधरशास्त्रिमहाभागैरक्रियत। प्रोक्तं च तैर्यत् ''शब्दमात्रस्य काव्यत्वे तु शब्दमात्रगतानां दोषगुणालङ्कारध्वनीनां निरूपणौचित्येन, अर्थगतानां तेषां निरूपणस्य उन्मत्तप्रलापत्वापत्तिः'' इत्यादि।

एवमेव 'हिन्दी रसगङ्गाधर' नाम्ना रसगङ्गाधरस्य हिन्दीटीकां कुर्वद्भिश्चतुर्वेदिमहाभागैर्यत् ''शब्दः काव्यम्'' इति पण्डितराजस्य काव्यलक्षणं समालोचितम्। प्रोक्तं च यत्- ''मम विचारे अलौकिकाह्लादजनकयोः शब्दार्थयोरेव काव्यत्वं युज्यते, न केवलस्य शब्दस्य। अन्यथा दृश्यकाव्यभेदकरणमप्यसङ्गतं स्यात्। यतो हि दर्शने अर्था एव आगच्छन्ति, न शब्दाः। एवमेव अर्थालङ्कारनिरूपणमपि तदैव सार्थकं स्यात्। अन्यथा शब्दमात्रस्यैव काव्यत्वे अर्थालङ्काराणां साहित्ये निरूपणं व्यर्थं स्यात्।'' इत्यादि।

किन्तु–अत्र मार्मिकविचारस्याऽऽवश्यकता। पण्डितराजस्य लक्षणमस्ति –रमणीयस्य अर्थस्य प्रतिपादको यः शब्दः, तत्काव्यम्। ततश्च काव्यत्वेन स्वीकृतो यः शब्दः, शब्दसमूहो वा भवेत्तेन सह अर्थोऽप्यवश्यमागच्छति न हि सोऽयं शब्दो ढक्कामृदङ्गादिशब्दवत् अव्यक्तः (अनर्थकः)। ततश्च– 'अलौकिकाह्लादजनकस्य अर्थस्य प्रतिपादकः शब्दः काव्यम्' इति मुखतः अर्थमपि निर्दिशता पण्डितराजेन प्रतिपक्षिभिरुद्भाविताः दृश्यकाव्य–अर्थालङ्कारविषयका दोषाः कथमपि न प्रसज्यन्ते। इदं हि स्थूलममस्ति। यतो हि विश्वनाथकृतस्य काव्यलक्षणस्य खण्डनं कुर्वता स्वयमेव प्रोक्तं पण्डितराजेन यत् 'वस्तु–अलङ्कारप्रधानानां काव्यनामकाव्यत्वं स्यात्' इति। 'मननसागरे निमज्ज्य रसगङ्गाधरनामा मणिर्मयालोके उद्भावितः' इति विचारसागरस्य तलस्पर्शाभिमानी पण्डितराजः सुस्पष्टं दृश्यमानामिमामापत्तिं न कथञ्चित्पश्येदिति किं सुसम्भवम्?

ततश्च यदा 'शब्दार्थौ काव्यम्' इति सम्मतं, तदा 'शब्दः काव्यम्' इति कथनस्य इदमेव तात्पर्यं यत्पण्डितराजे नवीनन्यायस्य धुरन्धरान् सूचयति यद् भवन्तः अतिसंक्षेपेण भूयः अर्थस्य (अव्याप्ति–अतिव्याप्तिरहितम्) सङ्ग्राहकं लक्षणं परमोत्तममिति साभिमानं मन्यन्ते। इदानीं 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति मम लक्षणे 'रमणीयार्थप्रतिपादकोक्त्या' अर्थस्याऽपि सङ्ग्रहः स्वतो भवत्येव। ततश्च भवत्स्वीकृतसंक्षेपपद्धत्या 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इत्युक्तावपि अर्थसहितस्य शब्दस्य काव्यत्वं सिध्येत्येव। किं मुधा शब्दाडम्बरवर्धनेन? एवं च तर्कव्याकरणाफक्किका पण्डितानां प्रातिद्वन्द्व्यदर्शनार्थमेव तथा संक्षिप्तं लक्षणं 'रमणीयार्थप्रतिपादकः शब्दः काव्यमिति स्थापितं पण्डितराजेन।'

मुखतः शब्दमेव निर्दिशतः पण्डितराजस्य तात्पर्यं काव्ये शब्दस्यैव प्राधान्यं, कविसंरम्भगोचरत्वं चेति पूर्वं सूचितवानेवाऽस्मि। न त्वनेन विनिगमनीयं यत् पण्डितराजः शब्दमात्रप्राधान्यवादी। वस्तुतो रमणीयतापदार्थं विवृण्वता तेन यद् व्याख्यातं तद् व्यापकतया काव्यास्वादप्रक्रियां विशदीकरोति। रमणीयता लोकोत्तरमाह्लादं जनयतो ज्ञानास्यानुभवो भवति। किं च तल्लोकोत्तरत्वम्? चमत्कारस्यानुभवः। येन पुनः पुनस्तत्र प्रवृत्तिः स्यादित्यादिना विवेचनेनेदं प्रथमतया मानसीं प्रक्रियां प्रकटीकुर्वाणेन पण्डितराजेन सारभूतं काव्यसौन्दर्यास्वादव्याख्यानं प्रतिपिपादयिषितं येन सार्वदैशिकः सार्वकालिकी च काव्यास्वादव्याख्याविमर्शः सम्पद्यते, पाश्चात्यानां पारसीकानां वा काव्यानामपि, सङ्गीतादीनां कलानामपीति दरमुकुलितलोचनं विदां कुर्वन्तु सहृदयाः।

***

# रसस्वरूपं विभिन्ना रससिद्धान्ताश्च

## ( जगन्नाथप्रदर्शितदिशा )

अयं मनुष्यो यदाऽस्मिन् संसारे उत्पद्यते तदा शरीरेण साकम् अस्य अन्त:करणमपि समुत्पद्यते। ततश्च हृदयसहित: सोऽयं मनुष्यो नानाभावाननुभवति कदाचित् केनचित्सह प्रीतिं करोति, कदाचित् कस्यचन वस्तुनो नाशे शोकमनुभवति, कदाचिच्च कस्यचन वस्तुनो लाभाय वीरतां प्रदर्शयन् उद्यमेऽस्मिन् उत्साहमनुभवति। एतेषां रति-शोक-उत्साहिदीनां भावानां संस्कारास्तस्य मनुष्यस्य हृदये वासनारूपेण अङ्किता भवन्ति। एते हि चित्तवृत्तिरूपा मनोभावा: साहित्ये स्थूलगणनया 'त्रयस्त्रिंशत्' परिगणिता:। यद्यपि- 'मात्सर्य-उद्वेग-ईर्ष्या-विवेक-विनयादय: अन्येऽपि भावा: सन्ति, ये तत्तस्थलेषु प्राय: सवैरेव जनैरनुभूयन्ते। किन्तु अन्ये ते सर्वे भावा भरतमुनिपरिगणितेषु एष्वेव भावेषु अन्तर्भवन्ति। यथा- मात्सर्यम् असूयायाम् उद्वेग: त्रासे, ईर्ष्या अमर्षे, विवेक: मतौ, विनयो लज्जायामन्तर्भवितुं शक्नोति। ततश्च मुनिवचनानुरोधात् प्रमुखप्रमुखा इमे त्रयस्त्रिंशदेव भावा: साहित्ये परिगण्यन्ते।

एतेषु त्रयस्त्रिंशद्भावेषु रतिहासशोकादय: अष्टौ भावा: प्रमुखा: सन्ति, ये हि तथा प्रबला: सन्ति, यत् विरुद्धै: अविरुद्धैश्चापि अन्यान्यैर्भावैरभिभूता न भवन्ति। एतेषां प्रभावो हृदयात्सहसा नाऽपगच्छति। अत एव एते अष्टौ भावा: स्थयिभावा इत्युच्यन्ते। केषाञ्चिन्मते नाट्ये अनभिनीयमानोऽपि नवम: एको निर्वेदोऽप्यस्ति स्थायिभाव:। एते रतिहासाद्या नव भावा मनुष्यस्य हृदयपटले वासनारूपेण सुस्थिरतया स्थिता भवन्ति। स्वानुकूलां स्थितिं प्राप्य एते समये समये जागृता भवन्ति। यथा मार्गे गच्छतामस्माकं यदि कश्चिद् वृथैव आक्रोशम्, आघातादिकं वा करोति, तर्हि वासनारूपेण स्थित: स क्रोधो जागरूको भवति। एते वासनारूपेण स्थिता रत्यादय: स्थायिभावा यदा स्वत: प्रकाशमानेन आत्मन: स्वरूपेण आत्मानन्देन सह अनुभूयमाना (अर्थात् स्थायिभावोऽपि आस्वाद गोचरोभवति, तथा आत्मानन्दोऽपि) भवन्ति तदा साहित्ये परिभाषितस्य रसस्य रूपे परिणमन्ति।

'सत्-चित्-आनन्देति' आत्मन: स्वरूपं सर्वत: प्रख्यातम्। एषु आत्मन: प्रधानरूपम् आनन्द: अज्ञानकृतेन आवरणेन आच्छादितस्तिष्ठति। यावत्कालं च आत्मन: स्वस्वरूपस्य आनन्दस्य, रतिहासादिभि: स्थायीभावै: सह एककाले अनुभवगोचरता न भवति तावद् वासनारूपाणां रत्यादीनामनुभवो न भवति। ततश्च साहित्यशास्त्रे स्वीकृतेन विभाव- अनुभाव-सञ्चारिणां संयोगेन (अभिव्यञ्जनाख्येन व्यापारेण) तत् अज्ञानकृतमावरणं दूरे भवति। तत्प्रभावेण आत्मानन्दाऽनुभवकर्तु: 'परिमितिप्रमातृभाव:' (अल्पज्ञता) विनश्यति। सांसारिको भेदभावश्च विलुप्यते। ततश्च तन्मयीभूत: स: अनुभवकर्ता आत्मानन्दसहितस्य रतिहासादिरूपस्य स्थायिभावस्य अनुभवं करोति। आत्मानन्देन सह अनुभूयमान: स स्थायिभाव एव साहित्यशास्त्रे ''रस:'' इत्याख्यायते।

रतिहासशोकादेः स्थायिभावस्य कारणानि साहित्येऽस्मिन् 'विभाव' पदेन उच्यन्ते। कारणं च द्विविधम्, आलम्बनम् उद्दीपनं च। यथा शृङ्गाररसे-रतिरूपस्य स्थायिभावस्य उत्पादिका शकुन्तला आलम्बनकारणम्, चन्द्रोदय-वसन्त-उद्यानादीनि उद्दीपनकारणम्। रतेः अनुभवकर्तुः दुष्यन्तस्य विरह चेष्टादीनि कार्याणि अनुभावाः। तथा रतिरूपेण स्थायिभावेन सह स्वप्रेमपात्रस्य (शकुन्तलादेः) प्राप्त्यर्थं क्रियमाणाः चिन्ता-व्रीडा-विषादादयः सहकारिणः व्यभिचारि (सञ्चारि) शब्देनोच्यन्ते।

### कोऽसौ रस इति प्राकृतिकगवेषणा

इदमत्र तत्त्वं यत्- 'रसो' यथा श्रव्यकाव्ये अनुभूयते तथैव दृश्यकाव्येऽपीति वास्तवी परिस्थितिः। किन्तु दृश्यकाव्ये (नाटकादिरूपकेषु) नायक-नायिका-विदूषकादीनां पात्राणां द्वारा कथानकस्य स्वसमक्षम् अभिनीयमानतया, काव्यस्य समग्रं चरित्रं चक्षुषोरग्रे सुस्फु टमुपस्थितं भवति। ततश्च तदिदं प्रत्यक्षी कुर्वतः साधारणस्यापि जनस्य रसानुभवः स्पष्टतया प्रतीतिगम्यो भवति। श्रव्यकाव्ये तु नायकनायिकादीनां सर्वापि चरित्रसामग्री केवलं मानसी (आन्तरिकी) भवति, न चक्षुर्गम्या। तत्र हि निर्मलान्तःकरणा बुद्धिमन्त एव तत्त्वग्रहणे समर्था भवन्ति। ततश्च सर्वबोध्यरूपेण रसस्य स्वरूपं हृदयङ्गमं कारयितुं दृश्यकाव्यमवलम्ब्यैव रस विषयकविवेचनमत्र कृतम्।

ततश्च नाटके (दृश्यकाव्ये) येन वस्तुना आनन्दः प्राप्यसे सः ''रस्यते आस्वाद्यते असौ रसः'' इति व्युत्पत्त्या दृश्य काव्यस्य आत्मभूतः जीवातुभूतः रसः।

१. तत्र 'कोऽसौ रसः' इति प्राकृतिकरूपेण प्रथमगवेषणायाम्-यदा वयं नाटकं पश्यामस्तदा अभिनयं कुर्वन्तं नटं दृष्ट्वा, अस्माकं प्रेमालम्बनस्य (तत् स्त्री वा स्यात्पुरुषो वा) स्मरणं भवति। वारं वारं च नाटके नटेन कृतात् अभिनयात् तस्यैव अस्मत्प्रेमालम्बनस्य अनुसन्धानं, स्मरणं भवति। तादृशेन स्मरणेन चेतसि आनन्दस्याविर्भावो भवति। अत एव रतिहासादेः (अमर्षस्य, उत्साहादेर्वा) आलम्बनरूपः स विभाव एव आनन्दरूपत्वाद् 'रसः' इति रससम्प्रदायस्याविर्भावः।

२. यदि आलम्बनविभाव एव आनन्दायकः स्यात्तर्हि अभिनयरहितदशायाम् (अर्थाद् यदा स नटः दुष्यन्तादेरभिनयं न करोति, किन्तु गृहकार्यलग्नः, पठने वा व्यापृतः) तदा तं दृष्ट्वा अस्माकं न तादृश आनन्दोद्गमः। किन्तु यदा स दुष्यन्तादेर्वेषभूषाचेष्टादिकं करोति ,तदैवाऽऽनन्दाऽवाप्तिः।। ततश्च विचारपरम्परया लोकैः स्थिरीकृतं यत्- ''वारं वारं भाव्यमानाः आलम्बनस्य चेष्टाः (अनुभावाः)'', अर्थात् अङ्गानां विक्षेपणम्, मुखादेर्नानापरिस्थितयः एव आनन्दजनकत्वात् रसरूपाः।

३. पूर्वम् उक्तवानस्मि यत्-साहित्ये यथा यथा गभीरमालोचनं क्रियते तथा तथा तादृशगभीराऽऽलोचनेन आनन्दाऽवाप्तिर्भवति।

एतदनुसारम् विभावस्य-अनुभावस्य विचारोत्तरमपि निगूढं विचारे कृते आनन्दाऽवाप्तेर्मूलं न वास्तवतया प्राप्तम्। यतो हि कीदृशोऽपि चतुरो नटः पर्याप्ताः (पूर्णाः) शरीरचेष्टाः, नानाविधान् मुखविकारांश्च दर्शयेत् किन्तु येषां दुष्यन्तादीनामभिनयं नटः करोति, तेषामन्तःकरणस्य चित्रं यदि दर्शकानां समक्षे न स चित्रयितुं प्रभवेत् तर्हि अनुभाव (चेष्टा) सहस्रेणापि दर्शकानां न आनन्दोद्भवः। किन्तु यदि यत्किञ्चिच्चेष्टयाऽपि प्रकृतस्य दुष्यन्तादेश्चित्तवृत्तिं चित्रयितुं स समर्थो भवेत् (अर्थात् लोकानां समक्षे स्पष्टमिदं प्रतीतं भवेद् यत् शकुन्तलाविरहे दुष्यन्तः एवं विकलः, एवमुत्कण्ठितः, एवं सन्तप्तश्चाभवत्) तदैव दर्शकानामानन्दः। ततश्च- ''पुनः पुनरनुसन्धीयमानः (भाव्यमानः) सञ्चारी एव रसः'' इति समभूत्तत्त्वाऽऽविर्भावः।

एतदनन्तरं पुनस्तत्त्वालोचनं साहित्येऽस्मिन् प्रवृत्तम्। तथा कृते सति दृष्टं यत्-कस्मिंश्चित् अभिनये विभाव-अनुभाव-सञ्चारिषु सर्वेषु यथावत्। वर्तमानेऽपि आनन्दाविर्भावो न भवति। किन्तु कुत्रचिद् विभावेनैव, कुत्रचित् अनुभावेन, क्वचित्तु सञ्चारिणैव आनन्दोद्गमो भवति। एतदुपरि गूढविचारे कृते निर्धारितं यत् त्रयाणां मध्ये विभावः, अनुभावः सञ्चारी वा यः कश्चित् चमत्कारकारी, लोकानामानन्दजनको भवति एव, आनन्दोत्पादकत्वाद् 'रस' रूपो भवति। यदि तु एकोऽपि चमत्कारकारी न स्यात्तर्हि कोऽपि रसरूपतया न परिणमति।

एतदनन्तरं भावसञ्चारिभावानामपि शनैः शनैर्गवेषणमारब्धम्। उद्वेग-विवेक-मात्सर्यादयोऽन्येऽपि बहवो भावा अभूवन्, किन्तु तेषु ८ अथवा ९ भावा रत्यादयः प्रमुखाः सन्ति, येषां सम्पूर्णेऽपि नाट्ये सर्वतः प्रतीतिर्भवति। इमे भावा अन्यैर्भावैः अभिभूता न भवन्ति। प्रत्युत अन्ये भावाः , सेवका इव इमान् भावान् भूषयन्ति। ततश्च नाट्यमात्रे स्थिरत्वात् 'स्थायि भावाः' इति प्रसिद्धा अभूवन्। अन्ये तु हर्ष-स्मृति-लज्जाद्याः कुत्रचित् प्रतीयन्ते, कुत्रचिन्न इति ते सामान्यतः सञ्चारिभावास्त्रयस्त्रिंशत् परिगणिता अभूवन्। उद्वेग-विवेक-मात्सर्यादयः एष्वेव अन्तर्गता अभूवन्निति नाट्याचार्यस्य मुनेर्भरतस्य त्रयस्त्रिंशदिति भावगणना सुस्थिरा भवति।

इतः परं स्थायिभावानां गवेषणानन्तरं, बहूनामभिनयानां दर्शनोत्तरं विचारशीलैर्मीमांसितं यत् पूर्ववर्णिता विभाव-अनुभाव-व्यभिचारिभावाः पृथक् पृथक्, अथवा सम्मिलिता सन्तोऽपि रसरूपेण न परिणमन्ति। यतो हि सर्वस्मिन् अपि अभिनये यः आनन्दः अस्माभिरनुभूयते, सः केवलं विभावानुभावसञ्चारिभिः न प्रतीयते। किन्तु तस्याऽऽनन्दस्य कारणमस्ति सा चित्तवृत्तिः, यस्य नाम रति-हास-शोकादि स्थायिभावः। किन्तु रतिहासादयस्तदैव आनन्दरूपे परिणमन्ति यदा विभावः (शकुन्तलादिः) रत्यादिरूपां चित्तवृत्तिम् उत्पादयति, अनुभावाः (चेष्टादयः) रतिरूपस्थायिनः सकाशात् उत्पद्यन्ते (अर्थात् स्थायिनः कार्याणि), चित्तादयः सञ्चारिणश्च तं रत्यादिस्थायिभावं परिपुष्टं कुर्वन्ति। ततश्च स्थायिभावः सर्वेष्वेषु प्रमुखः, अन्ये उपकरणभूताः। किन्तु विभावादीनामेषां संयोगे सति सः रत्यादिः स्थायिभावः रसरूपः सन् अस्मान् आनन्दयति।

सोऽयं परम्परातः प्रचलितो रसगवेषणात्मको विमर्शो, नाट्यशास्त्रस्य परमाचार्येण भरतमुनिना 'नाट्यशास्त्रे' सूत्ररूपेण स्थिरीकृतः- ''**विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः**'' इति। एतदनन्तरं मीमांसकनैयायिकादयोऽनेके आचार्याः सूत्रस्याऽस्योपरि निजनिजान् विचारान् प्रकटय्य, अनेकेषां सम्प्रदायानां सृष्टिमकार्षुः। पठनपाठनादिषु सर्वतः प्रख्याते काव्यप्रकाशे सर्वतः प्रथमः सम्प्रदायो मीमांसकस्य भट्टलोल्लटस्य नाम्ना निर्दिष्टः। तेन हि सूत्रस्यास्य व्याख्या कृता- 'कामिन्यादिभिः आलम्बनविभावैः रत्यादिः स्थायिभावः उत्पाद्यते, उद्यानवसन्तादिभिः उद्दीपनविभावैः स उद्दीप्यते। कटाक्षादिभिः अनुभावैः सः प्रतीतियोग्यः क्रियते (यतो हि आश्रयस्य दुष्यन्तादेः चेष्टां दृष्ट्वा सर्वैरपि प्रतीयते यत् अस्य दुष्यन्तस्य शकुन्तलायां रतिः अस्ति)। उत्कण्ठादयः सञ्चारिणश्च तं रतिभावं परिपुष्टं कुर्वन्ति। तथा च क्रमेण-जन्यजनकभावात्, गम्यगमकभावात्, पोष्यपोषकभावरूपात् च संयोगात् विभावानुभावसञ्चारिणां सम्बन्धात् स्थायिभावरूपस्य शृङ्गारादिरसस्य क्रमेण उत्पत्तिः, प्रतीतिः पुष्टिश्च भवतीति तस्य तात्पर्यम्।

अस्मिन् मते-रसस्योत्पत्तिः दुष्यन्तादौ एव भवेद् यतः विभावादयः (शकुन्तलादयः) दुष्यन्तसम्बन्धिन एव। ततश्च अतत्सम्बन्धिभिः विभावादिभिः सामाजिकानां कथं रसोद्भवः। इति शङ्का मनसिकृत्य श्रीशङ्कुकस्य नाम्ना नैयायिकानां मतम्। तेषामनुसारम्- 'स्थायिनो रत्यादेः विभावादिभिः सह अनुमाप्य-अनुमापकभावरूपसम्बन्धात् रसस्य निष्पत्तिः अनुमितिः भवति' इति।

यथा कुज्झटिकाव्याप्ते प्रदेशे धूमस्याऽभावेऽपि धूमसहचरितस्य वह्नेरनुमानं भवति। तथा नाट्यनिपुणस्य नटस्य चातुर्येण 'ममैवेते विभावादयः' इति रूपेण प्रदर्शितैः (वास्तवतया नटे असद्भिरपि) विभावादिभिस्तन्नियता रतिः अनुमीयते। यद्यपि लोके अनुमानेन न आनन्दो भवति, अपितु प्रत्यक्षेणैव। किन्तु नाट्यप्रदर्शितानां रति तद्विभावादिपरदार्थानामीदृशं सामर्थ्यं यत् अन्यानुमानस्थलाद्विलक्षणतया, अनुमीयमानाऽपि सा रतिः सामाजिकान् आनन्दयति, इति तेषां मतस्य निष्कर्षः।

श्रीशङ्कुकादीनां नैयायिकानां मते रसस्याऽनुमानं क्रियते तदिदं लोकप्रतीतितो विरुद्धम्। अनुमानेन न आनन्दोद्भवः, अपितु प्रत्यक्षेण। अत एव सांख्यशास्त्रानुसारेण भट्टनायकादीनां तदिदं मतम्-

शब्दस्य तिस्रो वृत्तयः (व्यापाराः) अभिधा,भावना, भोगश्च, इति। काव्ये नाट्ये वा-अभिधया शकुन्तलादिशब्दानां मुनिकन्यादिरर्थः। ततो भावकत्वव्यापारेण अनुसन्धाने कृते काव्यवर्णितानां नायकनायिकादीनां दुष्यन्तशकुन्तलादित्वं निवृत्तं भवति। ते सामान्यतया पुरुष-रमणीत्वेन उपतिष्ठन्ति। ततश्च शकुन्तलादिषु परनारीत्वेन अगम्यात्वस्य या प्रतिबन्धिका-प्रतीतिरासीत्तस्या निवृत्तिर्जायते। तृतीयेन भोजकत्वव्यापारेण रजस्तमसोः आर्विभावो भवति। सत्त्वस्य च उद्रेको भवति। ततश्च सत्वजनितः चैतन्यरूपः आनन्दः (दुःखेभ्यो विश्रान्तिः, निवृत्तिः) जायते। तादृशेन साक्षात्कारेण (अनुभवेन) विषयीकृतो रत्यादिः स्थायिभावो रसरूपो भवति। अस्मिन् मते भावकत्वव्यापार एव नवीनः स्वीक्रियते। भोगस्तु

व्यञ्जनास्थानीयः। यथा व्यञ्जनया अज्ञानावरणम् अपसार्य, भग्नावरणचिद्विशिष्टो रत्यादिः, रत्यवच्छिन्ना भग्नावरणा चिदेव वा रसत्वेन अनुभूयते, तथा भोजकत्वव्यापारेण सत्त्वोद्रेके सति नित्यचित्स्वभावनिर्वृत्तिरूपेण अनुभवेन विषयीकृतो रत्यादिः रसत्वेन स्वीक्रियते।

'नव्यास्तु' इति शीर्षकेण अन्येषां विदुषां मतमुपतिष्ठति। एते कथयन्ति यत् काव्ये अथवा नाटके, शकुन्तलादिविभावानामभिधया ज्ञाने सति, व्यञ्जनावृत्त्या शकुन्तलादिषु विभावेषु दुष्यन्तादेः रतिः अस्माभिः प्रतीयते। तदनन्तरं नाटकद्रष्टृणां सहृदयतारूपेण पुनः पुनरनुसन्धानरूपेण भावनाख्यदोषेण अस्माकमन्तःकरणमज्ञानाच्छादितं भवति। तेन वयमात्मानं दुष्यन्तं भावयामः। ततश्च कल्पितदुष्यन्तत्वाच्छादिते आत्मनि सदसद्विलक्षणः साक्षिमानः शकुन्तलादिरतिरूपः स्थायी उत्पद्यते (प्रतीयते)। प्रतीयमानः स रत्यादिः स्थायी एव रसो भवति। यथा अज्ञानावृते अन्तःकरणे सति शुक्तौ रजतस्य प्रतीतिः, तथा अज्ञानावृते अन्तःकरणे स्थायिनो रत्यादेः प्रतीतिरिति नव्यानां मतम्।

एतदनन्तरं स्वल्पं भेदमादाय परे तु इत्यादीनि अन्यान्यपि मतानि रसगङ्गाधरे प्रतिपादितानि, येषां संख्यः एकादशः परिगण्यते। किन्तु प्रधानतया अभिनवगुप्तमम्मटभट्टादीनां मतानि प्रतिपादितानि। सर्वेषां च मतानुसारं 'विभावानुभावव्यभिचारिसंयोगाद् रस निष्पत्तिः' इति भरतसूत्रस्य व्याख्यानं दर्शितं पण्डितराजेन।

पण्डितराजस्वीकृतं रसस्वरूपं, तद्व्याख्या च सेयं समुचितललितसन्निवेशचारूणा अर्थात् रसवर्णनोचितसुन्दरवर्णमयेन काव्येन उपस्थापितैः। रसानुभवकर्तुः सहृदयस्य सहृदयतावशात् प्रादुर्भूतस्य भावनाविशेषस्य माहात्म्येन 'इयं शकुन्तला दुष्यन्तस्य रमणी पत्नी' इत्यादौ परिमितप्रमातृभावे दूरीभूते सति, मनसि आविर्भूतैः, अतएव लोकतो भिन्नतया अलौकिकैः साहित्ये विभावशब्दव्यपदेश्यैः शकुन्तलादिभिः आलम्बनकारणैः, चन्द्रिकादिभिः उद्दीपनकारणैः। एवं रसानुभवकर्तुः तन्मयीभावात् निजप्रेमालम्बनस्य विरहे सञ्जातैः अश्रुपातादिभिः कार्यैः, (अनुभावशब्द व्यपदेश्यैः)। तथा आलम्बनस्य विरहे समुद्भूतैः चिन्तादिभिः सहकारिभिः (साहित्ये व्यभिचारिसञ्चारिपदव्यपदेश्यैः) च। एतैः विभावानुभावसञ्चारिभिः त्रिभिरपि सम्भूय (अर्थात् रसव्यञ्जनाख्यस्य अलौकिकव्यापारस्य उत्पादनकार्ये सङ्गत्य) सः अलौकिकः व्यञ्जनाख्यो व्यापारः उद्भाव्यते प्रकटीक्रियते। तेन व्यञ्जनाख्यव्यापारेण आत्मनः स्वस्वरूपस्य आनन्दांशस्य आवरणम् अज्ञानं निवर्त्यते। ततश्च निवृत्तम् अज्ञानं यस्य ईदृशेन। अतएव परिमितप्रमातृभावं परित्यज्य अपरिमित-प्रमातृभावविशिष्टेन प्रमात्रा (रसानुभवकर्त्रा सामाजिकेन, कर्तृभूतेन) स्वस्वरूपम् (रसानुभवकर्तुः आत्मनः वास्तवं स्वं रूपम्) यः आनन्दः। (यतोहि आत्मा सत्-चित्-आनन्दस्वरूपः) तेन आनन्देन सह गोचरीक्रियमाणः, पूर्वतो वासनारूपेण स्थितः रत्यादिस्थायी रसः। अर्थात् यस्मिन् समये रत्यादिस्थायिभावः अनुभूयते तस्मिन् समये, व्यञ्जनाख्येन अलौकिकव्यापारेण अज्ञानरूपस्य आवरणस्य निवृत्त्या आत्मस्वरूपः आनन्दोऽपि गोचरीक्रियते। ततश्च आत्मानन्देन सह गोचरीक्रियमाणो रत्यादिस्थायिभाव एव रसः इति पण्डितराजकृतलक्षणस्य आशयः।

**पण्डितराजकृतलक्षणस्य विशेषः**

पण्डितराजकृतस्यास्य लक्षणस्य विशेषस्त्विदमस्ति यदिदं प्रथमतया स मानवीयां मानसीं वृत्तिं विश्लिष्यन् रसास्वादस्वरूपं विशदीकरोति। तस्याऽऽशयोऽयमेव यद् रसचर्वणायां य आनन्दः स किंस्वरूप इति जिज्ञास्यमाने तदिदमनुगन्तव्यं यत्सहृदयहृदये या भावप्रवणता संस्काररूपेण विराजते तद्बलाद् विभावादिचर्वणा गहनतया समुद्भवति, प्रथमतोऽन्तःकरणे, तदनु रत्यादयः स्थायिभावाश्रितस्वरूपस्याऽऽनन्दस्योपधात्वेन तत्सहचारिणो भवन्ति। तमुपगूहन्ति, ततश्च तत्तत्स्थाय्युपहिताऽऽनन्दद्वाराऽनुभूतिरर्थात् आनन्दानुभूतिरुपजायते। सा च किमाकारा ? समाधाविव योगिनः। सर्वमिमं दर्शनानुगतं शब्दाटोपं लौकिकेनैकेन सुबोधेन वाक्यांशेन स्पष्टीकुर्वन् पण्डितराजो यद्वक्ति तत्कियत्सरलं सर्वजनबोध्यं चेति द्रक्ष्यन्ति भवन्तः। ''तन्मयीभवनमिति यावत्।'' इदमेव हि रसानुभूतिर्यद् विभावादिचर्वणावशाच्चित्तवृत्तिस्तन्मया भवति। चित्तवृत्तिरिमन्तःकरणवृत्तिरेवेत्यभ्युपगन्तव्यं स्यात्, मनसश्चित्तस्य बुद्धेश्चाऽन्तःकरणत्वेनाभ्युपगमात्, किन्तु स्थाय्युपहितस्वरूपो य आनन्दांशोऽत्र विवक्षितः स नाऽन्तःकरणवृत्तिरूपः। अलौकिकत्वात्तस्य। इत्थं च तादृशी तन्मयता यादृशी योगिनो भवति, रसस्य वास्तविकी मूर्त्तिरिति स्पष्टीकरणं पण्डितराजस्य प्रातिभं कौशलं व्यनक्ति।

सेयं तन्मयता ख्यातिः सर्वविधं रसास्वादं व्याख्याति, सर्वविधं काव्यास्वादं प्रतिनिदधाति, सर्वविधं कलाऽऽस्वादमप्युपगूहतीति नापरोक्षं प्रेक्षावताम्। भग्नावरणाचिदेव रस इति विवृण्वन् पण्डितराजो रसस्य मौलं यत्स्वरूपं व्याख्याति तस्य त्रिकालाबाधितत्वं, सर्वदेशसङ्गतत्वं च स्फुटमेव। चित्तवृत्तेस्तन्मयीभवनमेवाद्वैतादिवेदान्तविधानां शब्देषु चिदंश–आवरणभङ्गादिभिर्विविधैः पदैरभिव्यज्यते तेन। तन्मयीभवनं सर्वविधसौन्दर्यास्वादसाधारणमिति पण्डितराजस्य सुचिरमननमन्थनोद्गतनवनीतरूपम्। अत एव स मननतरितीर्णविद्यार्णवः।

अयं हि रसोऽलक्ष्यक्रमव्यङ्ग्यः। पानकरसन्यायेनाऽस्य संश्लिष्टा समन्विता च चर्वणा भवति किन्तु तत्तत्स्थाय्युपहितत्वादुपाधिभेदेन शृङ्गारादयोऽस्य भेदा उदाहृताः प्राग्भिः। अष्टावेव रसा नाट्येष्विति केचित्। अपरे नवरसानामनन्ति। नव्यास्तु भक्तिवात्सल्यादीनन्यानपि रसभेदानूचुः। सोऽयं विषयस्तेषु पाठ्यग्रन्थेषु सुशको द्रष्टुम् रसानामेषां काव्येषूपनिबन्धनं सुगृहीतनामधेयैर्बहुभिः कविभिः कृतमस्ति। पण्डितराजेनापि स्वनिर्मितैरेव पद्यैरुदाहृताः सर्वे रसभेदाः। अत्र निदर्शनविद्यया रसप्रभेदाऽऽधृतानि कतिपयानि मामकीनामनि पद्यानि प्रस्तुवनुपसंहरामि प्रबन्धमिमम्।

**शृङ्गारो यथा**

**याता निजजनकनिकेतमपुयाता, पतिरुषति विदेशान् मति याता शपितोऽधुना।**
**श्वश्रूरियमन्धा, निशि शय्यायांनिमग्नाभवेत्, देवरोऽपि कार्यप्रतिबन्धादयितोधुना।।**
**मञ्जुनाथ मेघमण्डलेन मेचकाभं नभो भवनेऽनेका न भोः सुस्था भयतोऽधुना।**
**क्षम्यतां दिनान्तसमयागत चतुर पान्थ विवशा नितान्तमहमावासे यतोऽधुना।।**

अत्र स्वयं दूतिका नायिका सायंकालोपगतं कश्चित्पान्थं प्राप्य स्वाभिलाषं युक्त्या सूचयति। विभावानुभावा:, उत्कण्ठाचिन्तादय: सञ्चारिणश्च सर्वेऽपि सम्भूय, स्वयंदूतिकाया: पान्थालम्बनां रतिं व्यञ्जयन्तीति स्पष्टशृङ्गार:।

किन्तु यत्र विभाव:, केवलाऽनुभाव:, केवल: सञ्चारिभावा भवन्तित्तय: इतरद्वयस्य आक्षेपेण, विभावानुभावसञ्चारिणां त्रयाणां सहभावं सम्पाद्य शृङ्गाररसस्य अभिव्यञ्जनं स्वीकार्यम्। इति साहित्यकाराणां समय:।

केवलोऽनुभावो यथा–

**नयनविलोक एव हृदयविलीनं प्रियं जानती न मौग्ध्याद् हृदयं च कुचबन्धुरम्।**
**ताम्यति नवीनरोमरेखया सहैव जातमेषा विदती न मानसस्य महदन्तरम्।।**
**सपदि सुसज्जसुखसदनेऽपि मञ्चगता मानसिकभावै: श्रिता पञ्चशरपञ्जरम्।**
**अधुनाऽनधीननवनायके निलीनमना दूयते नवीनमीननयना निरन्तरम्।।**

अत्र हि अज्ञातयौवनाया मुग्धाया: प्रियानुरागे चेष्टादिकमेव प्रधानतया वर्ण्यन्ते। नायकरूपस्यालम्बनस्य, सञ्चारिणां च सुस्पष्टो न निर्देश:, इति प्रकरणवशात्तेषामाक्षेप: स्वतो भवति।

यथा वा– विरहिणी

**कृशकरकञ्जशायिकोमलकपोलतला मुकुरमनञ्जनदृङ्मन्थरमवेक्षते**
**सदयसखीभिरुपनीतं वेषभूषादिकमुष्णमुच्छ्वसन्ती विपरीतं पर्यवेक्षते।**
**मञ्जुनाथ काञ्चनपिशङ्गदूनदेहलता मनुजगतागतेषु तमिव प्रतीक्षते**
**निबिडनिबद्धामेकवेणीमियमन्यमना वारं वारमेणी चलनयना निरीक्षते।।**

अत्र विरहिण्या विषादेन स्थिति:, उष्णोच्छ्वासा:, प्रियतमस्य मार्गनिरीक्षणम्, जटीभूतकेशानां वारं वारमालोकनं चेत्यादय: अनुभावा एव प्रधानतया वर्णिता:। आलम्बनविभावसञ्चारिणौ च प्रकरणाद् आक्षेप्यौ।

केवलो विभावो यथा–

**कज्जलमलिनजलवाहकनिबिडघटा गाहते गगनतटान्तमतिगहना**
**पुष्पितकदम्बवनवीथीगन्धवाहिनीयं वाति वायुलहरी समिद्ध कामदहना!**
**श्यामलजलदशतचञ्चला चमत्कुरुते निकषनिहितहेमरेखा रुचिवहना**
**नायकविरहपञ्चसायकविकलमना नेक्षते नवीनवधूरम्बरमसहना।।**

अत्र विरहिण्या: कृते मेघाडम्बरादिरुद्दीपनविभाव एव प्रधानतया वर्ण्यते।

***

# काश्मीरकमहाकविर्बिह्लणस्तत्काव्यं च

भारतीयं काव्यसाहित्यमखण्डेऽपि भूखण्डे सर्वतोऽपि विश्रुतं नूनम्। वेदोपनिषद्दर्शनाद्यार्षविज्ञानैरुन्मीलितलोचनाः पारेसमुद्रवासिनो वैदेशिका अपि यथा प्रणमन्ति प्राच्यविपश्चितस्तथा सकलसहृदयानामन्तःकरणं वशीकुर्वद्भिः संस्कृतकाव्यैरपि विस्मापितमखिलं विवेकिजगत्। महाकविकालिदासादेः शाकुन्तलरघुवंशादिकं भक्तिगद्गदं स्तुवद्भिः पश्चात्यविपश्चिद्भिर्डिण्डिमघोषमाघोषितो भारतीयमहिमेति कस्य वा न विदितम्? वशीकृतवाणीनां पुराकवीनां बहूनि किल काव्यरत्नानि साम्प्रतमप्यविदितानि किन्तु चिराद्वैदेशिकशासनविदलितेऽस्मिन्भारते सम्प्रति दुष्प्रापाणि तानि नूनम्। सुप्रसिद्धैः पञ्चकाव्यैरेव व्युत्पन्नाः प्राच्यपण्डिताः शनैः शनैर्गवेषणया आविष्कृतानां मयूर-साहसाङ्क-भर्तृमेण्ठ-क्षेमेन्द्र-राजशेखर-भासादिकाव्यानामपि रुचिरं रसज्ञाः समभवन् इति क्रमशः समुपलब्धां भारतीयकाव्यसमृद्धिं को वा नानुमिनुयात्?

सोऽयं काश्मीरश्चिराद्विद्यापीठमार्यावर्तेऽस्मिन्। अत्रैवाविष्कृतेर्नानातन्त्राऽऽगमैरुद्भासितं भारतीयं पण्डितजगत्। इहैवानुपमगिरस्ते कवयः समभवन् ये कुङ्कुमकेसराणामिव कविताविलासानामप्येकमात्रं काश्मीरमेव प्ररोहस्थानमभिमन्वते। तेषां भर्तृमेण्ठ-भल्लट-मयूराद्याः प्रथमाः, बिह्लणाभिनन्द-क्षेमेन्द्रपरिमलगुप्तादयो मध्यकालिकाः, मङ्खजह्लण-जगद्धरादयोऽवरकालिकाः प्रसिध्यन्ति। तेष्वयं वेदे व्याकरणेऽलङ्कारशास्त्रे च विशेषाभिमानशाली श्रीमान् बिह्लणः प्रमुखतां धत्ते यं हि कर्णाटकराजधान्याः कल्याणनगर्याः स्वामी पर्माडिभूपतिविक्रमाङ्को 'विद्यापति' विरुदेनालञ्चक्रे। आह बिह्लणः-

**''साङ्गो वेदः फणिपतिदृशा शब्दशास्त्रे विचारः**
**प्राणा यस्य श्रवणसुभगा सा च साहित्यविद्या।**
**को वा शक्तः परिगणयितुं श्रूयतां तत्त्वमेत-**
**त्प्रज्ञाऽऽदर्शे किमिव विमले नास्य सङ्क्रान्तमासीत्।।'' (१८/८२)**
**''चक्रं यस्याऽक्रियत वदनप्रेक्षि विद्यावधूनां**
**श्रीवाग्देव्याश्चरणरजसो कार्मणत्वं गतेन।**
**याताः सार्द्धं दिशि दिशि पुनर्बन्धुराः सर्गबन्धाः**
**कीर्तेः पारिप्लवविदलने सौविदल्ला बभूवुः।।'' (१८/८३)**

**(बिह्लणस्यात्मपरिचयः)**

प्राकृतशोभाप्रवीरस्य काश्मीरस्य सहजसुषमाधरेषु नगरेषु 'प्रवरपुरं' सर्वप्रधानम्। यद्धि वितस्तासिन्ध्वोः सङ्गमे समधिविष्टम्। एतद्धि न केवलं लौकिकनगरातिशाय्येव, अपितु अलकालङ्काऽमरुवतीभ्योऽपि पराजयप्रदम्। पवित्रं तत्पुरं विद्वद्भिर्ब्राह्मणैरलङ्कृतम्। न तत्र

कदाचिदुष्णता बाधते। तत्र हि भट्टारकमठ-सङ्ग्रामकक्षेत्रमठ-क्षेमगौरीश्वरमन्दिराणि जगति दर्शनीयानि।

प्रवरपुरस्य सार्धक्रोशद्वयान्तरे जयवनं नाम प्रदेशः। तस्यैव निकटे खोनमुखो ग्रामः, यत्र हि कुङ्कुमस्य मृद्वीकानां चाधिक्येनोत्पत्तिः। तत्र कौशिकगोत्रीयब्राह्मणानां निवासः। तस्मिन्वंशे महाप्रभावो मुक्तिकलशो नाम विप्रमणिः। तत्पुत्रो राजकलशः। तत्सुतो ज्येष्ठकलशो यो हि साहित्यस्य जन्मभूः, शब्दशास्त्रस्याचार्यो महाभारतस्य प्रणिनाय व्याख्यामेकाम्। तस्मान्नागादेव्यां विह्लणः सोऽयमजनि। साङ्गं वेदम्, विशेषतश्च साङ्गं व्याकरणं, सम्पूर्णं साहित्यशास्त्रं चायत्तीकृत्य सोऽयं दिग्विदिक्षु प्रथितयशाः समभूत्।

काश्मीरेषु सर्वतः स्वयशः प्रसार्य प्रायासीदसौ विदेशान्। पाञ्चालेषु किञ्चिदध्युष्य तत्काले वैदुष्याय प्रथितां मथुरां प्रययौ तत्र निर्जिगाय निखिलान्पण्डितान्। ततो वृन्दावने न्यवात्सीकञ्चित्कालम्। तत्राधिवसत एवास्य परितोऽपि दूरदूरप्रान्तेषु तस्य कविता लोकप्रियासीत्। आबालवृद्धवनितास्तस्य कवितां प्रणयतः पेठुः कश्मीरेषु प्रमोदे चाऽमाद्यन्। इत इव तस्य कीर्तिरगच्छत्कान्यकुब्जानपि। प्रभूतं द्रव्यमुपार्ज्यापि सर्वस्वं तत्प्रयागे प्रददौ भूसुरेभ्यः।

ततः स काशीमुपगत्य दुःशीलनरपतीनां मुखालोकोद्भवं दुरितं देवतटिन्यामक्षालयत्। तत्र कालञ्जरविजेत्रा दाहलाधीशेन कर्णेनाऽसौ समगच्छत। एतस्य कवितावृत्तमास्वाद्य निर्ववौ दाहलनरेशः। तस्याऽऽस्थानपण्डितं प्रसिद्धकविं गङ्गाधरमसौ मध्येसभं पराजिग्ये। ततो वागमृतेनायोध्यां शीतलीकृत्य गुर्जरान्प्रययौ। मार्गमध्ये स भोजस्य राजधानीधारां कार्यवशात्परिजहार। एष हि गुर्जरभूनिर्जरैर्न मनागपि तुतोष। आह स्म सः-

**'कक्षाबन्धं विदधति न ये सर्वदैवाविशुद्धा-**
**सद्भाषन्ते किमपि भजते यज्जुगुप्सास्पदत्वम्।**
**तेषां मार्गे परिचयवशादर्जितं गुर्जराणां**
**यः सन्तापं शिथिलमकरोत्सोमनाथं विलोक्य।।' (१८/९७)**

अनेकनरपालानां समागमलालसया प्रययौ स दक्षिणापथं रामेश्वरावधि। लघून्नरपालान् दृक्पातेनाऽप्यनभिनन्दन्, प्रवरनरपालानामास्थानं च निजवैदुष्येनाभिमण्डयन्नसौ चालुक्यवंशीयस्य विक्रमाङ्कदेवस्य सभामुपययौ। गुणवशीभूतौऽसौ सर्वतोऽधिकं सम्मानयामास तस्मिन्। अलञ्चकार चासौ 'विद्यापति' पदकेनाऽमुम्। स हि कर्णाटकपुरन्दरस्य विक्रमाङ्कदेवस्योपहाराय निर्ममौ तदिदं चरितकाव्यम्। देशदेशान्तरेभ्यो लब्धकीर्तिरधिगत प्रभूतसम्पत्तिरपि सस्मार जन्मभूमिम्। स्वयमयमात्ममुखेनाह-

**'लब्धा कीर्तिर्दिशि दिशि कृताः सम्पदः साधुभोग्याः**
**प्राप्ता योग्यैः सह कलहतः कुत्र नीच्चैर्जयश्रीः।**

**गोष्ठीबन्धः सपदि सुजनैः सारनिष्कर्षदक्ष-**
**प्रज्ञालब्धस्तुतिभिरचिरादस्तु काश्मीरकैर्मे।।' (१८/१०३)**

सर्वथा सर्वत्र लब्धसाफल्योऽप्यन्ते भजति भागीरथीमन्तरात्मना-

**'आरुक्षाम नृपप्रसादकणिकानद्राक्ष्म लक्ष्मीलवा-**
**न्किञ्चिद्वाङ्मयमध्यगीष्महि गुणैः कांश्चित्पराजेष्महि।**
**इत्यज्ञानमयीमकार्ष्म कियतीं नानर्थकन्थां मनः**
**स्वाधीनीकृतशुद्धबोधमधुना वाञ्छत्यमर्त्यापगाम्।' (१८/१०४)**

कर्णभूपालस्य राजधानी दाहिलनाम्ना निरदिक्षद्बिह्लणः। बहवः किल चेदि अथवा चँदेरीत्यस्यैव दाहलेत्युपनाम जगुः। यत्किञ्चित्स्यात् किन्तु दाहलमिदं बुन्देलखण्डान्तर्गतं किञ्चिद्राजसंस्थानमिति प्रतीमः। यतो हि राज्ञः (कर्णस्य) कालिञ्जरविजेतृत्वमयं वर्णयामास। तदिदं प्राप्यतेऽत्रत्येतिवृत्तेषु। कालिञ्जरं 'बाँदा' निकटवर्ति, यत्रत्यं प्राचीनदुर्गमद्यापि वर्तमानम्। नासीद्दाहलाद् धारा दूरे, किन्तु भोजप्रख्याति शृण्वन्नपि नायं तत्र ययौ। प्राचीनशिलालेखैरवगम्यते यद् अनहिलवाडस्य राज्ञा भीमदेवेन (प्रथमेन), कर्णेन चानेन सम्भूय भोजोपर्यकारि पुराऽऽक्रमणम्। अत एव कर्णस्य भोजस्य च मिथो वैमनस्यं विचार्यैव विह्लणोऽयं न गतः स्याद्धारानगरीम्। रामेश्वरावधि दक्षिणापथे भ्रान्त्वा परावृत्तः सोऽयं कल्याणनगर्यां विक्रमाङ्कस्याश्रयऽप्राययौ यत्र वृद्धावस्थापर्यन्तमविच्छिन्नं न्युवास। अत एव हि विक्रमाङ्क-चरितस्यान्तिमसर्गे गङ्गातटोपरि निवासहेवाकमसौ प्राचीकटत्। अनेन चेदमप्यनुमीयते यद्बिह्लणो वार्द्धक्य एव विक्रमाङ्कचरितं विरचितवान्।

विक्रमाङ्कस्योपनाम 'विक्रमादित्यः'। एष कल्याणनगर्यां खि०सं० १०७६ तममारभ्य ११२७ पर्यन्तं राज्यमधिशशास। काश्मीरेषु राज्ञोऽनन्तरस्य, कलशस्य, हर्षस्य च वर्णनेन प्रमाणितं भवति यत् एकादशशताब्द्या उत्तरार्द्धे पर्यटितवान् बिह्लणोऽयं नानादेशान्। यत्र किल बिह्लणो वर्णितवाननन्तदेवं तत्र भूतकालिकप्रयोगेणानुमीयते यस्मिन् समये काव्यमिदं व्यरच्यत तस्मिन् समये नासीदनन्तदेवः। यथा हि-

**'सत्यत्यागप्रमुखनिखिलोत्कर्षसम्पत्तिसीमा**
**तस्मिन्नासीदवनिवनितावल्लभोऽनन्तदेवः।**
**वैरिस्तम्बेरमघनघटागर्जितानामगम्ये**
**चक्रे धारापयसि यदसेः कीर्तिहंसी निवासम्।।' (१८/३३)**

राजतरङ्गिणीतः प्रतीयते यद् अनन्तदेवः पञ्चविंशतिवर्षाणि राज्यं प्रशास्याऽन्ते निजपुत्रं कलशं न्यवीविशत्सिंहासने, किन्तु पञ्चदशवर्षाणि स्वयं राज्यप्रबन्धं निरैक्षत। अन्ते पुत्रस्य दुःशीलतया दुःखितो विससर्ज स्वयमात्मनाऽऽत्मानम्। जनरल कनिंहामस्यानुसारमनन्तः १०२८ तमखिष्टाब्दे सिंहासनमध्यारुरोह, १०८० तमे च दिवमारुरोह। अतएव

'आसीदवनिवनितावल्लभोऽनन्तदेवः' इति भूतकालिकप्रयोगेण १०८० तमख्रिष्टाब्दादनन्तरं विक्रमाङ्कचरितरचना सुस्थिरा भवति। एकमन्यदपि प्रमाणमस्ति यदीतः पूर्वं काव्यमिदं निरमास्यत तर्हि १०८८ तमख्रिष्टाब्दे जाताया विक्रमाङ्कस्यास्य मध्यभारतोपरि विजययात्राया अपि वर्णनमत्राऽभविष्यत्। किन्तु नेयं युद्धयात्रा वर्णिता काव्ये। प्रभावशालिनी सेयं यात्रा 'एशियाटिक सोसाइटी' द्वारा प्रकाश्यस्य पत्रस्य चतुर्थभागे प्रत्ताऽस्ति। अत एव १०८८ तमख्रिष्टाब्दात्पूर्वम्, १०८८ तमवत्सराच्चानन्तरं विक्रमाङ्कचरितमिदं व्यरच्यतेति सुस्थिरं भवति।

किञ्च राजतरङ्गिण्यां कलशनरेशस्य काले बिह्लणस्य काश्मीरेभ्यो निर्माणं हर्षदेवस्य समये च पुनः परावर्तनं वर्णितम्, यथा–

**'काश्मीरेभ्यो विनिर्यान्तं राज्ये कलशभूपतेः।**
**विद्यापतिं यं कर्णाटश्चक्रे पर्माडिभूपतिः।। ९३६**
**प्रसर्पतः करटिभिः कर्णाटकटकान्तरे।**
**राज्ञोऽग्रे ददृशे तुङ्गं यस्यैवातपवारणम्।। ९३७**
**त्यागिनं हर्षदेवं सः श्रुत्वा सुकविबान्धवम्।**
**बिह्लणो वञ्चनां मेने विभूतिं तावतीमपि।। ९३८'**

कल्याणस्य त्रिभुवनमल्लोऽयं विक्रमादित्य एव 'पर्माडि' नामा। ततश्च यस्मिन्समये कलशो नाममात्रार्थं राजासीद् राज्यप्रबन्धं च स्वयमनन्तदेवो निरीक्षते स्म तस्मिन् समये (१०६२ तमख्रिष्टाब्दादनन्तरम्) बिह्लणः काश्मीरेभ्यो विनिर्ययौ। एतदनन्तरं विंशति–पञ्चविंशति वर्षाणामन्तराले नानादेशेषु भ्रान्त्वा, कल्याणे निर्भरं न्युष्य, पुनः परावर्वृते काश्मीरान् बिह्लणः।

ततश्च कलशराज्यकालादनन्तरम् अनुमानतः १०६४ तमख्रिष्टवत्सरस्याऽऽसन्नमयं काश्मीरान् विजहौ, प्रौढवयः प्राप्तौ अनुमानतः १०८५ तमवत्सरस्य सन्निधौ च सोऽयं विक्रमाङ्कचरितं प्रणिन्ये। काव्यस्यान्तिमसर्गे सकलसांसारिकसुखभोगोत्तरं सम्प्रति गङ्गातटनिवासलालसस्य वार्द्धक्यं न चेदथापि कवेः पञ्चाशदुत्तरं वयोऽवश्यमनुमातव्यं भवति।

**बिह्लणस्यान्ये ग्रन्थाः**

विक्रमाङ्कदेवचरितमन्तराऽन्येऽपि ग्रन्था बिह्लणेन प्रणीताः, यतो हि शार्ङ्गधरपद्धतौ बिह्लणनाम्नाऽनेके श्लोका उद्धृता ये नास्मिन्काव्ये प्राप्यन्ते। ततोऽन्यस्यापि ग्रन्थस्यानुमानं भवति परं नाद्यावधि कस्याऽप्यनुसन्धानम्। प्रोफेसर आफरेटो बिह्लणकृतमलङ्कारग्रन्थमप्येकमाह। विक्रमाङ्कचरितात्पूर्वं 'बिह्लणपञ्चाशिका'तो बिह्लणस्यासीत्परिचयः पण्डितेषु। क्वचिदस्याश्चौरपञ्चाशिकेति नामापि प्रख्यातम्। पञ्चाशिकायाः प्राचीनपुस्तके सेयमाख्या प्रख्याता, यत्–

गुर्जरधराधिपतेर्वीरसिंहस्यासीच्चन्द्रलेखा (शशिकला) नाम्नी तनया, यामसौ

बिह्लणोऽध्यापयाञ्चकार। दैवयोगादभूद् द्वयोः प्रणयः, अत एव बिह्लणो गान्धर्वविवाहेन तामिमां परिणिन्ये। राजगौरवाभिमानी वीरसिंहस्तमिमं संवादमाकर्ण्य भृशं कुपितः, प्राणदण्डमाज्ञापयामास बिह्लणस्य। दृढप्रणयो बिह्लणः शशिकलां स्मरन् वधस्थानप्रयाणावसर एव पञ्चाशिकामिमां निर्ममौ। दैवात्सोऽयमपि संवादः प्रायासीद्वीरसिंहस्य कर्णयोः। कवितारसज्ञोऽसौ पञ्चाशिकायाः प्रौढपरिपाकात्प्रसन्नो न केवलं बिह्लणस्यापराधमेव चक्षमे, अपि तु बिह्लणेन सह निजतनयायाः परिणयमपि विधिवच्चकार। अनहिलवाडे चासीद्वीरसिंहनामा नरपालो नूनम्, किन्तु फार्ब्समहोदयस्य रासमालानुसारं तस्य मृत्युः ९२० तमे खिष्टाब्दे अर्थात् बिह्लणकालाच्छतवर्षपूर्वमेवासीत्। अत एव वीरसिंहसविधे बिह्लणस्याश्रयो न प्रमाणसिद्धः। न च कुत्रचिद् बिह्लणेनैवात्मकथायामस्य वृत्तस्योल्लेखोऽकारि।

क्वचित्पुस्तके प्राप्यते यत्– मदनाभिरामनरपालस्य यामिनीपूर्णतिलका नाम्नी तनयामुद्दिश्य सेयं पञ्चाशिका प्राणायि कविना बिह्लणेन। स च नरपालः पाञ्चालदेशस्य लक्ष्मीमन्दिरनामके नगरेऽभवत्, किन्त्वितिहासेषु शिलालेखेषु वा नास्य नरपालस्य कुत्रचिदुल्लेखः। अन्ये कथयन्ति यत्पञ्चाशिकाया अस्याः प्रणेता चौरनामकः कश्चिदन्य एव कविरासीत्, किन्तु नास्यापि किञ्चित्प्रमाणमुपलब्धम्।

'रहस्य सन्दर्भे' लक्ष्मीमन्दिरस्य राजकुमारी यामिनीपूर्णतिलकामालम्ब्य बिह्लणस्य स्नेहसंरम्भोऽन्येनैव प्रकारेणाऽवर्णितः। राजा मदनाभिरामो युवकं बिह्लणं निजतनयायाः शिक्षकं नियोक्तुमैषीत्। अत एव द्वयोः परस्परं निरीक्षणं न स्यादिति बुद्ध्या स राजकुमारी कुष्टरोगिणीमगदत्, बिह्लणं च जन्मान्धं तस्यै निरदिक्षत्। द्वयोर्मध्ये जवनिकां निपात्य प्रारभ्यताऽध्यापनकार्यम्। आसीद्राजकुमारी परमबुद्धिमती, अतएव स्वल्पैरेव दिनैः सा भावपूर्णस्य काव्यस्य निर्माणे समभूत्समर्था। एकदा सायं राकाशशाङ्कमालक्ष्य प्रोवाच बिह्लणः–

**'नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः।**
**नायं शशी कुण्डलितः फणीन्द्रो नायं कलङ्कः शयितो मुरारिः।। ',**

पुनरन्त्यपद्यं प्रोवाच–

**'इन्दुमिन्दुमुखि लोकय लोकं भानुभानुभिरमुं परितप्तम्।**
**वीजितुं रजनिहस्तगृहीतं तालवृन्तमिव नालविहीनम्।।'**

पद्यद्वयेऽस्मिन् चन्द्रमसो रूपसंस्थानवर्णनेन प्रत्यभिजज्ञौ राजकुमारी यद्बिह्लणो न कदाप्यन्धः। अत एव सा जवनिकान्तरालादालोकयामास बिह्लणम्। रूपमुग्धयोरनयोस्त–द्दिनादारभ्य मिथः सन्दर्शनं प्रेम सम्भाषणं च प्रावर्तिष्ट। ततः शनैः निर्वृत्ते द्वयोर्गान्धर्वविवाहः। अन्ते च गुप्तरहस्यमिदं विदित्वा प्रकुपितो राजा बिह्लणस्य प्राणदण्डमादिदेश। प्रणयी बिह्लणश्च तामिमां पञ्चाशिकां तदैव प्रणिनाय।

बिह्लणो विक्रमाङ्कचरितस्याष्टादशे सर्गे निजवृत्तं निजुगुम्फ, किन्तु न किञ्चिदप्यस्या आख्यायिकाया विषयेऽसौ सञ्जगाद। अत एवाऽऽख्यायिकाया अस्याः सत्यत्वपरीक्षा पाठकानामेवायत्ता। कविता विक्रमाङ्कचरितेन सह किञ्चित्संवदते। पद्धतिकारः शार्ङ्गधरः

पञ्चाशिकाया अस्याः कतिचित्पद्यानि निजग्रन्थे उल्लिलेख, यो हि चतुर्दशशताब्द्याम् अर्थात् बिह्लणस्य चतुःशतवर्षेभ्योऽनन्तरं जज्ञे। बिह्लणनाम्ना पञ्चाशिकापद्यानामुल्लेखात्सेयं कृतिर्बिह्लणस्येति स्वीकर्तव्यमापतति।

पञ्चाशिकापद्यैः सेयमाख्यायिका सत्येव प्रतीयते, यतस्तस्यामाह–

**'अद्यापि तां नृपतिशेखरराजपुत्रीं**
**सम्पूर्णयौवनमदालसघूर्णनेत्रीम्।**
**गन्धर्वयक्षसुरकिन्नरनागकन्यां**
**स्वर्गादहो निपतितामिव चिन्तयामि।।**
**अद्यापि तां स्वभवनान्मयि नीयमाने**
**दुर्वारभीषणकरैर्यमदूतकल्पैः।**
**किं किं तया बहुविधं न कृतं मदर्थे**
**चक्षुर्न वार्यत इव व्यथते मनो मे।।'**

पद्येनानेन सूच्यते यद् वधिकद्वारा राजपुत्र्याः सदनादनीयत बिह्लणः। सा च बिह्लणाय स्निह्यन्ती तदर्थे बहुधा परिशुशोचेति पूर्वोक्ताया आख्यायिकायाः सत्यतां सङ्केतयति। बध्यशिलायां वधस्य पूर्वक्षणेऽपि यस्य बुद्धिर्न विक्षुभ्यति, सुरुचिरं च कवयति, को न तं महाकविं व्यपदिशन् सङ्कुचेत्?

**विक्रमाङ्कचरितस्य कथासङ्क्षेपः**

एकदा समाधिस्थं पितामहं ययाचे मघवा यत्सम्प्रति मर्त्यलोके भूयान्प्रवृद्धोऽधर्मः। **शनैर्विलुप्ये**त मखमुखां स्वाहाकारः। अत एव धर्मसंरक्षकस्तत्र कश्चिदवतारणीयो भवतेति–

**'पुरन्दरेण प्रतिपाद्यमानमेवं समाकर्ण्य वचो विरञ्चिः।**
**सन्ध्याम्बु पूर्णे चुलुके मुमोच ध्यानानुविद्धानि विलोचनानि।। (१-४६)**
**अथाविरासीत्सुभटस्त्रिलोकत्राणप्रवीणश्चुलुकाद्विधातुः।।'**

तस्माच्चालुक्यानां वंशः प्रववृते। एतस्य प्रथमपुरुषो हारीतो जज्ञे। एतद्वंशीयानामादिराजधानी अयोध्याऽऽसीत्। एतद्वंशीया राजानो दिग्विजयं कुर्वाणा दक्षिणपर्यन्तमगुः। अत्रैव वंशे तैलयो नाम महाप्रतापः पृथ्वीपुरन्दरोऽभूद् यस्य कालः ९९७ खिष्टसंवत्सरमारभ्य १००८ पर्यन्तः। ततो जयसिंहोऽभून् महाप्रतापस्य यस्य कण्ठे स्वयं पुरन्दरेण पारिजातमाला प्रतिमुक्ता–

**'यशोऽवतंसं नगरं सुराणां कुर्वन्नगर्वः समरोत्सवेषु।**
**न्यस्तां स्वहस्तेन पुरन्दरस्य यः पारिजातस्रजमाससाद।।' (९१-८६)**

ततस्तस्य तनय आहवमल्लोऽभूद् यस्योपनाम त्रैलोक्यमल्लेत्यपि। एष चोलान्विजिग्ये। मालवानभिचस्कन्द। धाराधिपं भोजं विद्रावयामास। दाहलधराधिपतेः कर्णस्यापि राज्यमाच्छिदत्। काञ्चीनरपालं पराजित्य परतश्चक्रे। निजराजधानीं कल्याणपुरीं प्रासादैर्देवमन्दिरैश्च प्रसाधयामास।

वैभवशिखरारूढोऽप्याहवमल्लो निःसन्तानतया भृशं सन्तप्य महिष्या सह महादेवमारराध। प्रसन्नः पुररिपुः पुत्रत्रयं ते भावीति वरं ददौ। यथासमयमाहवमल्लस्य महिषी सुषुवे प्रथमतनयं यस्य नामाऽभूत्सोमेश्वर इति। द्वितीयगर्भधारणसमये राज्ञी दधेऽश्रुतानि दोहदानि। कदाचिद्दिग्गजानां पृष्ठानि पदा परामर्ष्टुमैच्छत्। कदाचिदप्सरोभिः पदसंवाहनमभ्यलषत्। कदाचिच्च खड्गानां धराजलं निपातुमाकाङ्क्षत्। एवं सूचितशुभोदर्कः शुभे मुहुर्ते प्रादुरासीदस्य द्वितीयस्तनयः। अभ्यवर्षन्नमरा दिव्यकुसुमानि। सप्रमोदमनदन् दिवि देवदुन्दभयः। आसीदस्यैव बालकस्य नाम विक्रमादित्य इति। शनैः प्रवृद्धः स शैशवक्रीडायामपि भाविनी वीरतामङ्कुरयामास। कदाचिद्धंसानग्रहीत्, कदाचिच्च पालितसिंहशिशूनबाधिष्ट। स्वल्पेनैव कालेन विद्यासु धनुर्वेदे चायमलभत कौशलम्। विक्रमानन्तरं राज्ञस्तृतीयः पुत्रोऽभूद् यस्य नाम जयसिंह इति।

सर्वापेक्षयाऽपि लब्धगुणातिशयं तनयं विक्रमाङ्कं यौवराज्येनालङ्कर्तुमैच्छद्भूपालः। परं निसर्गविनीतोऽसौ ज्येष्ठव्यतिक्रमेण नाऽभिरोचयामास यौवराज्यम्। प्राबोधयत्पिता यद् भगवान् भूतभावनस्त्वामेव प्रजापालनयोग्यमसूचयत्, परं नासौ कथमप्यनुमेने। विवशो नरपालो ज्येष्ठं सोमेश्वरमकरोद् युवराजम्। परं राजलक्ष्मीः पितुः प्रणयश्च विक्रममेवाऽन्वगमत्।

पितुरनुज्ञया विक्रमादित्यो दिग्विजययात्रामकरोत्। स हि चोलान्पराजित्य तद्राजधानीं काञ्चीमलुण्ठत्। अपगतस्य निजराज्यस्य प्राप्तये प्रार्थयमानाय मालवेन्द्राय स प्रददौ साहाय्यम्। गौडं कामरूपं चाऽप्यसौ व्यजेष्ट। सिंहलस्य नरपालं निरवासयद्देशात्। अभ्यामर्दयाञ्चकार चन्दनवनानि मलयाचलस्य। केरलदेशनरेशं प्रास्थापयत्परलोकम्। गाङ्गकुण्डं चक्रकोटं वेङ्गिं चाप्यजयत्।

विजययात्रातो गृहं परावर्तमानो मार्गमध्य एव कृष्णातटे दुर्निमित्तैर्व्याकुलः कल्याणादागच्छतः सन्देशहरात्पितुः परलोकप्रयाणरूपममङ्गलवृत्तमश्रौषीत्– 'भवतो दिग्विजयानन्दसंवादात्प्रमुदितोऽकस्मादेव दुरुद्धरेण ज्वरेणाऽऽक्रम्यत। अनपनेयं तमिममालक्ष्य दक्षिणगङ्गायां तुङ्गभद्रायां शरीरविसर्जनं मन्त्रिभिर्मन्त्रयामास। तैरनुमतः स सर्वेषामग्रतस्तुङ्गभद्रातरङ्गेषु शरीरं विससर्ज। नवीना सेयं घटना यत्–

**'प्रविश्य कण्ठदघ्नेऽथ सरित्तोये जगाम सः।**
**कल्लोलतूर्यनिर्घोषैश्चन्द्रचूडामणेः पुरीम्।। (४/९८)'**

पितुर्निधनमाकर्ण्य विह्वलोऽसौ न किञ्चिदचेतयत्। अतिकष्टेन लब्धसान्त्वः कृष्णातटे चकार पितुरन्त्यक्रियाम्। ततो ज्येष्ठं सोमेश्वरं सान्त्वयितुमुपागमत्कल्याणम्। न्यवसतां तत्र द्वावपि कश्चित्कालमतिप्रेम्णा। लघुरपि विक्रमादित्यः सोमेश्वरात्सर्वेष्वपि विषयेष्वासीत्प्रगल्भतरस्तथापि तस्मिन् सम्मानेनाऽवर्तिष्ट। किन्तु स्वल्प एव काले सोमेश्वरो

दुराचरणरतः प्रजास्वन्यायमाचरत्। राज्याधिकृतैर्गर्हणीयात्तस्माच्चालुक्यराजलक्ष्मीः कलङ्कसङ्कुलेवासीत्। ज्येष्ठेन निष्पीडितो विक्रमो लघीयांसं जयसिंहं सहादाय कल्याणपुराद्बहिरभूत्। किन्तु तत्पृष्ठे सेनां सम्प्रेष्य सोमेश्वरस्तं मुहुरखेदयत्।

ज्येष्ठेन समरमनिच्छन्नप्यन्ते विवशस्तत्सेनां सर्वथा निर्विमूल्य तं मूकीचकार। ततस्तूर्यनादेन मलयान् कम्पयन्, कोङ्कणपतिना जयेकेशिना नानोपायैः सम्मानितः, आलुपदेशनरेशमधीनीकुर्वन् ,केरलकामिनीः पूर्वविक्रमस्मारणेन विक्लवीकुर्वन् ,समाससाद विक्रमश्चोलसीमानम्। चोलनरपालो दूतं सम्प्रेष्य मैत्रीं प्रादर्शयत्, तामिमां मैत्रीमात्मकुमारीसमर्पणेन सुदृढां चाकरोत्, चोलेन्द्रनन्दिनीं परिणीय पराववृते विक्रमो निजदेशम्। किञ्चित्कालानन्तरमेव चोलमहीपतिभर्तुर्निधनम् ,विरोधिनां विप्लवं च श्रुत्वा स प्रययौ पुनर्दक्षिणां दिशम्। तत्र विप्रतीपान्पराजित्य निजश्यालं निवेशयामास राजपीठे।

गाङ्गकुण्डमुपगत्य, चोलसपत्नान्निर्मूल्य, कतिचिद्दिनानि काञ्चीमध्युष्य, पुनरसौ तुङ्गभद्रामवाप। तत्र निजश्यालस्य परलोकप्रस्थानम्, वेङ्गिदेशनरेशेन राजिगेन काञ्चीपराजयं चाधिगम्य त्वरितमेवासौ काञ्चीमभ्यषेणयत्। एतदन्तरे राजिगो दूतं सम्प्रेष्य विक्रमज्येष्ठं सोमेश्वरमपि स्वपक्षे कृत्वा विक्रमस्य पराजयाय प्रायतिष्ट। चोलचालुक्ययोश्चिरवैरं जानन्नपि दुर्बुद्धिः सोमेश्वरो विक्रमवैरनिर्यातनाय तेन समगंस्त। विक्रमो दुर्गाहिनीं वाहिनीमादाय प्रययौ शत्रुसम्मुखम्। इतः सोमेश्वरः कल्याणात्प्रस्थाय विक्रममनुप्रययौ तत्सन्निधौ। विक्रमाङ्को भ्रातुर्दुरभिसन्धिमिममाकर्ण्य युद्धाद्विरन्तुं तं मुहुर्मुहुरबोधयत्। किन्तु बहिः सान्त्वं प्रदर्शयन्नप्यन्तर्विक्रमाङ्कनिर्दलनाय समचेष्टिष्ट सोमेश्वरः। ततोऽपि ज्येष्ठं सम्मुखसमरे योधयितुं नैच्छद्विक्रमः। किन्तु नक्तं नीलकण्ठेन योद्धुमादिष्टोऽसौ प्रातः प्रायासीत्समराङ्गणम्। तत्र घोरं सङ्ग्रामं विधाय विजयलक्ष्मीमयमालिलिङ्ग। समरविध्वस्तः पलायिष्ट राजिगः। जीवग्राहमग्रहीत्सोमेश्वरम्।

ज्येष्ठं सोमेश्वरं पुनः कल्याणराज्ये स्थापनाय वाञ्छन्नपि, सक्रोधं शङ्करेणादिष्टोऽसौ तदिच्छया राज्यसूत्रं स्वकरे कृत्वा दक्षिणापथस्य प्रभावशाली शासकोऽभूत्। निजं लघीयांसं जयसिंह वनवासदेशस्याऽधिपतिमकरोत्।

विक्रमादित्यः परावर्तिष्ट विरहिदुरन्ते वसन्ते कल्याणम्। तस्मिन् कालएव तत्कर्णयोः संवादः प्रापद्यत् करहाट (वर्तमाने 'कराड') राजकुमारी चन्द्रलेखा पार्वत्या आदेशात्स्वयंवरं चिकीर्षति। प्रासिध्यत्तस्याः सौन्दर्यं सर्वत्रापि तस्मिन्प्रान्ते। अत एवोत्कण्ठितो विक्रमो दूतं सम्प्रेष्य तत्रत्यं संवादमानाययामास। ज्ञातमनेन यद् विक्रमस्य विक्रममाकर्ण्य राजकुमारी पूर्वत एव सम्मुग्धा। करहाटेन्द्रोऽपि तदिदं सम्मन्यते।

स्वयंवरस्याऽऽसीत्सन्निहितोऽवधिः। अत एव ससम्भारं यात्रां विधाय प्राप्नोत्करहाटं विक्रमाङ्कः। तत्र करहाटनरेश्वरेण सत्कृतः प्रायासीत्स्वयंवरमण्डपम्। प्रतीहारी पुरस्कृत्य प्रययौ कुमारी चन्द्रलेखाऽपि ततोऽयोध्या-चेदि-कान्यकुब्ज-कालिञ्जर-मालव-गुर्जर-पाण्ड्य-चोलादि नरेशेषु सर्वतः कीर्त्यमानेष्वपि नातुष्यत्कुमारी। यदा तु विक्रमस्य सम्मुखमुपागात्तदा

स्वयमेव सन्तुष्य ''पतिंवरा संवरणस्रजं तां श्रीविक्रमार्कस्य चकार कण्ठे।''

ततः करहाट एव चन्द्रलेखया सह सुखं विहरन् सप्रमोदमयापयद्वसन्तम्। ग्रीष्मारम्भे चन्द्रेलेखां सहादाय परावvृते कल्याणम्। (अत्रैव ग्रीष्म-तच्चर्या-जलविहारादिवर्णनम्)। वर्षर्तोरनन्तरे प्राप्तः संवादो विक्रमेण यद्वनवासदेशाधिकारी लघीयान् जयसिंहः सम्प्रति विरोधे शस्त्रं गृह्णातीति। चरैरेतत्संवादस्य सत्यतां निश्चित्य दूतैस्तमेनं भूयोभूयः प्राबोधयत्, परं दुर्दैवप्रेरितो नाऽबुध्यत जयसिंहः। समागच्छरत् (अत्रैव शरद्वर्णनम्)। अनेकैर्माण्डलिकनरपालैः सह सन्धाय विपुलवाहिनीसमेतो जयसिंहो युद्धाय समागमत्कृष्णाऽभिमुखम्। मार्गे मदोन्मत्तो भूयस्सु ग्रामेष्वत्याचरत्। विक्रमेण पुनः पुनः प्रतिबोधितोऽपि यदा नागमन्मार्गे तदा प्रायासीद्विक्रमोऽपि रणाङ्गणम्।

समघटत करिघटाबहुलयां जयसिंहपृतनया विक्रमाङ्कस्य भीषणः समरः। पूर्वं किञ्चित्प्रस्फुरन्नप्यन्ते पराजितः पलायिष्ट जयसिंहः। न ततोऽपि तेन सह दुर्व्यवहारं चकार विक्रमः।

विक्रमे कल्याणं प्रतिनिवृत्ते समागमच्छिशिरः (शिशिरवर्णनम्, मृगयादिवर्णनमत्र)। एवं सर्वतः शत्रून्पराजित्य तद्राज्येष्वात्मनः शासनं प्रवर्तयामास विक्रमः। अदृश्यत सर्वतोऽपि शान्तिः। समये प्रावर्षत्पयोदाः। नाभूत्तस्य शासने किञ्चिदपि कष्टं प्रजानां समये प्राप्तं पुत्रं विक्रमाङ्कः। स्वकीर्तिस्मारणाय देवस्थानधर्मशालादिकमकारयद्विक्रमः-

'कृतो निवासः कमलाविलासिनः क्षमाभुजा तेन नितान्तमुज्ज्वलः' इत्यादि। एतस्यान्तिके महान्तं तडागमखानयत्। निजनाम्ना पुरं चाऽऽवासयत्-'निरन्तरं ब्रह्मपुरीभिरावृतं चकार तत्रैव पुरं स पार्थिवः'। एकवारं पुनर्युद्धयात्रां व्यदधाद्विक्रमः। चोलभूपालः पुनः प्रतीपतामदर्शयत्। अत एव काञ्चीमाक्रम्य पुनः पराक्रमं प्राकटयद्विक्रमः। ततः काञ्चीमायत्तीकृत्य विजयमण्डितो मण्डयामास पुनः कल्याणपुरीं विक्रमादित्यः।

**विक्रमाङ्कदेव चरितस्य-सर्गकथा**

१. मङ्गलम्। कवेः काव्यस्य प्रशंसा। आहवमल्लस्य तत्पूर्वजानां च वर्णनम्।

२. चालुक्यराजधान्याः कल्याणपुर्या वर्णनम्। सन्ततये आहवमल्लस्य तपः, शङ्करवरप्रदानम्, सोमेश्वरस्य जन्म।

३. विक्रमाङ्कजननम्, बालचरितम्। जयसिंहजन्म। सोमेश्वरस्य युवराजपदप्राप्तिः।

४. विक्रमदिग्विजयः, आहवमल्लमृत्युः, सोमेश्वरराज्यप्राप्तिः। विक्रमस्य पुनः कल्याणे प्रत्यावृत्तिः। सोमेश्वरस्याऽन्यायः, असदाचरणम्। जयसिंहमादाय विक्रमस्य च कल्याणान्निर्गमः। सोमेश्वरसेनाया विक्रमद्वारा पराजयः।

५. विक्रमस्य द्रविड-चोल-केरलादिगमनम्। आयत्तीकरणं तद्देशानाम्। द्रविडेश्वरकन्यया तुङ्गभद्रातटे विक्रमस्य विवाहः।

६. चोलेश्वरमृत्युः, वेङ्गिनरेशस्य (रजिगस्य) चोलोपर्याक्रमणम्। चोलेशतनयस्य युद्धे मृत्युः। विक्रमविरोधे सोमेश्वर-वेङ्गिनरेशयोर्मन्त्रणा। विक्रमस्य ताभ्यां युद्धम्, विजयः। सोमेश्वरस्य ग्रहणम्। जयसिंहाय वनवासप्रदेशार्पणम्। विक्रमस्य कल्याणाऽऽगमनम्।

७. वसन्तः, होला।

८. चन्द्रलेखारूपवर्णनम्।

९. चन्द्रलेखाविरहे विक्रमव्यथा। दूतप्रेषणम्, स्वयंवरे गमनम्, स्वयंवराया वर्णनम्। राज्ञां चेष्टाः, प्रतीहार्याश्चरितकीर्तनम्। विक्रमाय वरमाल्यार्पणम्।

१०. वनविहार-जलविहार-पुष्पावचयाः।

११. सन्ध्याचन्द्रोदयवर्णनम्। चन्द्रोपालम्भप्रभातादिवर्णनम्।

१२. ग्रीष्मे करहाटात्कल्याणगमनं विक्रमस्य। पौरनारीणां चेष्टाः, ग्रीष्मः, शीतोपचारः, वापीविहारादयश्च।

१३. चन्द्रलेखां सम्बोध्य वर्षावर्णनम्।

१४. जयसिंहस्य शत्रुता, शरद्, दूतद्वारा जयसिंहोपदेशः। राज्यसमर्पणायापि विक्रमस्य सज्जीभावः। तथापि जयसिंहस्याऽस्वीकारः। उभयतो रणसज्जा। कृष्णातटे शिबिरसन्निवेशः।

१५. विक्रमजयसिंहयोर्युद्धम्। जयसिंहस्य पराजयः पलायनं ग्रहणं च।

१६. हेमन्त-शिशिर-मृगया-वर्णनम्।

१७. विक्रमस्य दानं धर्मानुष्ठानम्। तडाग-नगर-मन्दिरादिनिर्माणम्। सन्तानोद्भवः। चोलशासकेन पुनः सङ्ग्रामः। विक्रमविजयः। किञ्चिच्चोले स्थित्वा पुनः कल्याणे प्रत्यावर्तनम्।

१८. काश्मीरवर्णनम्। राज्ञः अनन्तरस्य कलशस्य हर्षस्य एवमादीनां वर्णनम्। कविपूर्वजानां कवेः स्वचरितस्य च वर्णनम्। देशपर्यटनम्, इत्यादि।

**ग्रन्थगुम्फनस्यालोचना**

ग्रन्थस्यास्य विस्तारोऽलङ्कारशास्त्रीयनियमानुसरणार्थम्, कवीनां नियतेषु ऋतुवर्णनादिविषयेषु स्वरचनाचातुर्यमभिप्रथयितुं च ऋत्वादिवर्णनप्रभृतिभिर्वर्द्धितो भूयान्ग्रन्थकारेण। अन्यथा चरितानुवर्णनं सप्ताष्टाभिरेव सर्गैः शक्येत समापयितुम्। आलोचकानामिदमपि कथनं यच्चरितकाव्यमप्येतत् नार्हति नूनमविकलमितिहासपदम्। महाकाव्यलेखनेन स्वपाण्डित्यप्रख्यातिः कवेर्मुख्यमुद्देश्यम्। तत्र निजाश्रयस्य राज्ञ एव नायकत्वेनालम्बेन कृत्वा साहित्यनियमैः परिपूरितमिदं चरितम्। ऋतुवर्णनमिदं काव्यशोभासामग्रीमाग्रहेणैव परिकल्पयति कविः। षडपि ऋतवो वर्णनीया इत्येव वर्णितास्तावदखिला ऋतवः। शरत्तु स्फुरमस्थान एव वर्णिता। जयसिंहो लघुर्भ्राता युद्धाय दुर्मतिं कृतवान्, अत एव युद्धनिरोधाय नायकस्य यत्नश्चिन्ता च। तत्र मध्य एव शरदो वर्णनम्, तदपि लम्बलम्बायितम्। पाठतामालोचकचित्तानामिदमरून्तुदं नूनम्।

युद्ध सन्नाहो भिन्नभिन्नदेशेषु भवेद्भिन्नभिन्नो नूनम्। किन्तु वीरता प्रकरणे न तावदवतारणा शृङ्गारस्येति सामान्यतया कविवर्णनापद्धतिः। यद्यपि न मिथो विरोधो वीरशृङ्गारयोः किन्तु मध्ये प्रसङ्गमवतार्यैव कविः शृङ्गारं वा वीरं वा प्रकटयतीति दृष्टं वर्णनकाव्येषु। संस्कृतकाव्येषु बहुत्र युद्धयात्रावर्णने राजपत्नीनामपि सह प्रस्थानमवगतं तावत्। बिह्लणोऽपि युद्धावसरे राजभिः सहान्तःपुरप्रस्थानस्य पक्षपाती। यतः शोभासज्जया वर्णयति नायकेन सहान्तःपुरप्रयाणं कविः। न किल तदिदं भारतीया भूपाला एव चक्रुः। मोगलसम्राड्भिरप्येवमक्रियत। कदाचित्पराजये सति नाऽवरोधो विरोधिनां हस्तगः स्यादित्येव प्रकाश्यमाकूतं तस्य। किन्तु वेश्या अपि सेनया सह गच्छन्तीत्यद्भुतः क्रमो बिह्लणस्य। यथा–

**'वाराङ्गनास्तस्य तुरङ्गमेषु भ्रूकार्मुकारूढकटाक्षबाणाः।**
**विरेजिरे दिग्विजयोद्यतस्य सेना इवाऽनङ्गनराधिपस्य।।' (१६/३०)**

**कालिदासश्च बिह्लणश्च**

बिह्लणो महाकविः, सर्वथा सर्वत्र समर्थश्च। तथापि स्थाने स्थाने कालिदासस्यार्थान् शब्दांश्चानुजहार। नवमसर्गस्थं स्वयंवरवर्णनं रघोः षष्ठसर्गस्थमिन्दुमतीस्वयंवरमविकलमनुकरोति। रघौ सुनन्दानाम्नी प्रतीहारी इन्दुमत्या सह राज्ञां परिचयमकारयत्, अत्राऽप्यसूचितनामधेया प्रतीहारी राज्ञां वर्णनमवतारयति। रघौ इन्दुमतीदर्शने तल्लिप्सूनां राज्ञां नाना चेष्टा वर्णिताः, अत्रापि तथा षोडशसर्गस्थं मृगयावर्णनं रघोर्नवमसर्गस्थस्याऽनुकरणम्। विक्रमाङ्कऽस्य नगरप्रवेशे कोमलाङ्गीनां भावभङ्गीवर्णनं, रघोः सप्तमसर्गस्थं तद् भूयस्तरामनुकरोति नात्रौदाहरणप्रदर्शनेन निबन्धविस्तरो नूनमावश्यकः। आलोचनमार्मिकाः स्वयमिदमवगच्छेयुः।

रघुः अथाप्यंशतो निबन्धनशैलीसाम्यं निदर्श्यते–**विक्रमाङ्कचरितम्**

**'तां प्रत्यभिव्यक्तमनोरथानां**
**महीपतीनां प्रणयाग्रदूत्यः।**
**प्रवालशोभा इव पादपानां**
**शृङ्गारचेष्टा विविधा बभूवुः।।' (६/१२)**

**'पाण्ड्योऽयमंसार्पितलम्बहारः**
**क्लृप्ताङ्गरागी नवचन्दनेन।**
**आभाति बालातपरक्तसानुः**
**सनिर्झरोद्गार इवाद्रिराजः।।' (६/६०)**

**'अनेन सार्द्धं विहराम्बुराशे-**
**स्तीरेषु तालीवनमर्मरेषु।**
**द्वीपान्तरानीतलवङ्गपुष्पै-**
**रपाकृत चिदलवा मरुद्भिः।।' (६/५७)**

'तस्मादयावर्तत दूरकृष्टा-
मित्येव लक्ष्मीः प्रतिकूलदैवात्।' (६/५८)
'निसर्गभिन्नास्पदमेकसंस्थ-
मस्मिन् द्वयं श्रीश्च सरस्वती च।।' (६/२८)
'ततस्तदालोकनतत्पराणां
सौधेषु चामीकरजालवत्सु।
बभूवुरित्थं पुरसुन्दरीणां
त्यक्तान्यकार्याणि विचेष्टितानि।।' (७/५)
'तदीयवक्त्रेऽनुविलोकनेन
सान्द्राल्लसद्रागपयोनिधीनाम्।
तत्रागतानां पृथिवीपतीना-
मासन्विचित्राणि विचेष्टितानि।।' (८/७५)
'श्रीखण्डचर्चा परिपाण्डुरोऽथ
पाण्ड्यः प्रकामोन्नतचारुदेहः।
क्षीरोदधिक्षीरपरिप्लुतस्य
चातुर्यमाचामति मन्दराद्रेः।।' (९/११९)

उभयत्रापि पाण्ड्यस्यैव चन्दनचर्चापाण्डुरत्वमेकया शैल्या वर्णितं दृश्येत।

'अनेन मैत्रीं यदि मन्यते ते
मनोभवस्तामरहायताक्षि।
लीलावने चन्दनपादपानां
श्रयन्तु नित्यं मलयानिलास्त्वाम्।।' (९/१२)
'तत्रापि साऽभूद् गुणभाजनेऽपि
पराङ्मुखी श्रीरिव भाग्यहीने।।' (९/१२१)
'वदामि सौभाग्यगुणं किमस्य
यत्रास्थिते श्रीश्च सरस्वती च।।' (१/१३७)
'अस्मिन् क्षणे कुन्तलपार्थिवस्य
प्रवेशमाकर्ण्य पुराङ्गनानाम्।
आसन् विलासव्रतदीक्षितानां
स्मरोपदिष्टानि विचेष्टितानि।।' (१२/२)
'अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्ष्यीचकार।
सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे
रतिविगलितबन्धे केशपाशे सुकेश्याः।।' (८/९७)

**'लक्ष्यीकृतस्य हरिणस्य हरिप्रभावः**
**प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम्।**
**आकर्णकृष्टमपि कामितया स धन्वी**
**बाणं कृपा मृदुमनाः प्रतिसञ्जहारः।।' ( ९/५७ )**
**'अपि शराधिविकृष्टैश्चिच्छिदे कङ्कपत्रै-**
**र्निकटमपि न रोहिद्गर्भिणी चक्रवालम्।**
**स्मरणसरणिमागाद् गर्भभारालसानां**
**विलसितमबलानां यद्बलाद्भूमिभर्त्तुः।।' ( १६/४५ )**
**'रुद्धं विलोक्य हरिणं हरिणी गताऽपि**
**व्यावृत्त्य बाणविषये नृपतेश्चचार।**
**प्रायेण देहविरहादपि दुःसहोऽयं**
**सर्वाङ्गसंज्वरकरः प्रियविप्रयोगः।।' ( १६/४० )**

प्रजापालकानां भूपालकानां का कथा, प्रेमवशादन्योऽन्यं प्राणपरित्यागे प्रगल्भं हरिणमिथुनं दृष्ट्वा हिंसाशीलो व्याधोऽपि धनुर्मुञ्चतीति गाथापि स्मृतिपथमायाति-

**'एक्कक्कमपरिरक्खण प्रहारसंमुहे कुरङ्ग मिठुणम्मि।**
**वाहेण मण्णु विअलन्तवाहधोत्रं धणुं मुक्कम्।।' ( ७/१ )**

कालिदासानुकरणेऽपि बिह्लणपद्यस्यास्योत्तरार्धं स्वाभाविकं हृदयाकर्षि च। उत्कृष्यते च पूर्वार्द्धादिति किं वा मार्मिकेषु मुधा पुनस्तथा।

**बिह्लणस्य काव्यकला**

बिह्लणकाव्यं सरसं सरलं च। काव्ये वैदर्भी रीतिः। माधुर्यव्यञ्जिका ललिता रचना च वैदर्भी नूनम्। प्रसादगुणोऽपि बहुत्र। साधारणोक्तया सर्वमेव काव्यं काव्यसाहित्ये निजविशेषं पुष्णाति, किन्तु आहवमल्लस्य मृत्युः, मदमत्तस्य सोमेश्वरस्याऽनीतिः, वर्षादिवर्णनमत्युत्तम्।

काश्चिदुक्तयो यथा-

**'प्रौढिप्रकर्षेण पुराणरीतिव्यतिक्रमः श्लाघ्यतमः पदानाम्।**
**अत्युन्नतिस्फोटितकञ्चुकानि वन्द्यानि कान्ताकुचमण्डलानि।।' १/१५**

कल्याणनगरकामिनीवर्णनं यथा-

**अविस्मृतत्र्यम्बकनेत्रपावकः स्मरः स्मितेन्दीवरदीर्घचक्षुषाम्।**
**विलासपीयूषनिधानकुम्भयोर्न यत्र वासं कुचयोर्विमुञ्चति।। २/१९**

विक्रमगर्भावस्थायां मातुर्वर्णनम्-

**निपीड्य चन्द्रं पयसे निवेशिता ध्रुवं तदीयस्तनकुम्भयोः सुधा।**
**यदुत्पलश्यामलमाननं तयोः सलाञ्छनच्छायमिव व्यराजत।। २/६३**

सोमेश्वरस्य मदो यथा–

**'मदिरेव नरेन्द्रश्रीस्तस्याभून्मदकारणम्।**
**न विवेद परिभ्रष्टं यदशेषं यशोऽशुकम्।। ४/९८**
**स जातु जातुषीं मेने मन्ये नरपतिश्रियम्।**
**एतद्गलनभीत्येव क्षात्रं तेजो यदत्यजत्।। ४/१०४'**

मलयानिलानां दक्षिणतः प्रयाणकल्पना–

**'कृतकोपाः पवनाशनानां निवासदानादिव पन्नगानाम्।**
**विनिर्ययुश्चन्दनशैलकुञ्जादाशामुदीचीं प्रति गन्धवाहाः।।'** ७/५

वसन्ते रवेरुत्तरदिग्गमनम्–

**'रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम्।**
**उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम्।।'** ७/६

नायिकाया नेत्रे–

**'मृगी सम्बन्धिनी दृष्टिरसौ यदि न सुभ्रुवः।**
**धावति श्रवणोत्तंसलीलादूर्वाङ्कुरे कुतः।।'** ८/७२

सन्ध्यावर्णनम्–

**'भानुमानपरदिग्वनिताश्चुम्बति स्म मुखमुद्गतरागः।**
**पद्मिनी किमु करोति वराकी मीलिताम्बुरुहनेत्रपुटाऽभूत्।।'** ११/९

कान्ताकचैर्बर्हिबर्हपराभवो यथा–

**'द्विषन्ति राजीवमुखि स्वजीवितं ध्रुवं मयूरास्तव निर्जिताः कचैः।**
**भवन्ति यद्वासवत्तापसम्मुखाः शिलीमुखप्राप्तिसमुत्सुका इव।।'** १३/२७

हेमन्ते पद्मिनीदाहो यथा–

**'मद्वैरिणः कठोरांशोरियं प्रणयभूरिति।**
**रोषादेव तुषारेण निरदह्यत पद्मिनी।।'** १६/१४

नायिकास्तनौ–

**'कुम्भौ सदम्भौ करिणां कलशौ मन्दकोशलौ।**
**चक्रवाकौ वराकौ च तदीयकुचयोः पुरः।।'** ८/४६
**'मुखेन्दुचन्द्रिकापूरप्लाव्यमानौ पुनः पुनः।**
**शीतभीताविवान्योऽन्यं तस्याः पीडयतः स्तनौ।।'** ८/४७
**'सा धारयत्यधीराक्षी दुर्बहं स्तनमण्डलम्।**
**गर्वपर्वतमारूढश्चित्रं कुसुमकार्मुकः।।'** ८/९

वलयावलिः–

**'कृशाङ्ग्याः कुचभारेण दूरमुत्सारितौ भुजौ।**
**वहतः कलहायेव वाचालां वलयावलिम्।।'** ८/६३

**'अस्त्यप्रतिस्वमाधेयं स्तनद्वन्द्वस्य दूषणम्।**
**स्फुरतां कञ्चुकानां यन्नायात्यावरधीयताम्।।'**

त्रिवली–

**'दरिद्रमुदरं दृष्ट्वा चक्रे लावण्यपूर्णयोः।**
**पन्थानं स्तनयोस्तस्यास्त्रिवली विषमं विधिः।।' ८/३७**

कङ्कणम्–

**'गौराङ्ग्या भुजलावण्यमीलितं हेमकङ्कणम्।**
**कण्ठाश्लेषे वयस्याभिः काठिन्यादन्वमीयत।।' ८/५७**

नेत्रे–

**'श्रूयतां कौतुकं सोऽपि स्मरः शृङ्गारिणां गुरुः।**
**अमुष्याः शिष्यतामेति श्रवणोन्मुखयोर्दृशोः।।' ८/७३**

दोलाविलासेषु कान्तानां या मुधरिमा स साक्षान्मनसिजेनैव वर्णयितुं शक्यो न कविना।

**'सौन्दर्यमिन्दीवरलोचनानां दोलासु लोलासु यदुल्ललास।**
**यदि प्रसादाल्लभते कवित्वं जानाति तद्वर्णयितुं मनोभूः।।७/२०**

**यथा वा –**

**'प्रसार्य पादौ विहितस्थितीनां दोलासु लोलांशुकपल्लवानाम्।**
**मनोरथानामपि यन्न गम्यं तद्द्रष्टुमापुः सुदृशां युवानः।।' ७/२२**

परलोकगतस्य राज्ञः कृते विलापोक्तिः–

**'दिग्गजास्त्यजत स्वैरक्रीडाविहरणाऽऽदरम्।**
**सम्भूय भूयः सर्वेऽपि धारयन्तु धरामिमाम्।।**
**बाहुराहवमल्लस्य सुवर्णस्तम्भविभ्रमः।**
**पुरन्दरधुरां धर्तुं धात्रा व्यवहितः कृतः।।' ४/७५,७६**
**'पद्मे! पद्माकरानेव पुनः सद्मत्वमानय।**
**अयं त्वया पतिभ्रंशसन्तापोऽन्यत्रः दुःसहः।।' ४/७९**

शोकग्रस्तस्य विधातारं प्रत्युपालम्भः–

**'अपूर्वः कोऽपि दुर्मेधाः शङ्के वेधीः समुत्थितः।**
**पुराणक्लेशनिष्पन्नां स्वकृतिं नाशयेत्कथम्।।' ४/८१**
**'विधास्यति कथं धाता सर्गरत्नं तथा विधम्।**
**कथं वा संघटिष्यन्ते तादृशाः परमाणवः।।' ४/८४**

राज्ञो विजययात्रया समुद्रादीनां क्षोभवर्णनं यथा–

**'अन्विष्यन्मरणोपायं दुःखात्तत्सैन्यलुण्ठितः।**
**कालकूटं हरग्रस्तं शुशोच पयसां निधिः।।' ४/१६**

**'शिलाभिः करटिक्षुण्णश्रीखण्डस्यन्दपाण्डुभिः।**
**मलयस्तद्बलक्षोभादस्थिशेष इवाभवत्।।' ४/१०**

उभयपार्श्वे निष्पीडनादेव कटेः कृशता, यथा-

**'स्तनौ भारार्पणव्यग्रौ, काञ्ची कलकलोन्मुखी।**
**कस्यां दिशि न मध्यस्य तस्याः कार्श्यं सहेतुकम्।।' ८/४०**

शोभावर्णने भङ्ग्या प्रोक्तिः-

**'लम्भिताः कदलीस्तम्भास्तदूरुभ्यां पराभवम्।**
**अत्यन्तमृदुभिर्लब्धो जडैः क्व जयडिण्डिमः।।' ८/१५**

दोलारूढलोलाक्षदर्शने नेत्रयोर्द्विकोशमार्गभ्रमणस्येव श्रमः-

**'समुद्वहन्त्योस्तदथायताक्षीदोलाविलोलाननमार्गसख्यम्।**
**दृशोः क्षितीन्द्रस्य गतागताभ्यां गव्यूतिमात्रं भ्रमणं बभूव।।' १०/३६**

श्रीहर्षस्य (नैषधचरितनिर्मातुः) यथा कल्पना क्वचिल्लोकसीमानमुल्लङ्घयति, तथा बिह्लणस्यापि-

**'न राजकपिभिरदृश्यतोर्वी स्तनद्वयेनाधिकमुन्नतेन।**
**हंसास्तुलाकोटिनिनादकृष्टाः पुण्यैः पदन्यासपदं न जाताः।।'**
**'तन्नितम्बस्य निन्दन्ति वृद्धिं परिजनाङ्गनाः।**
**काञ्चीनवनवग्रन्थिग्रथनेन कदर्थिताः।।' ८/२१**
**'अपर्याप्तभुजाऽऽयामः सखेदोऽस्याः सखीजनः।**
**श्रोण्यां कथञ्चित्कुरुते रशनादामबन्धनम्।।' ८/१९**

कल्पनाप्रवाहे वहतां कवीनां रूपवर्णनमपि विरूपमिव दृश्यते क्वचिद्। यथा बिह्लणस्य-

**' नाभिसङ्गेन गौराङ्ग्याः शोभते रमिमञ्जरी।**
**कन्दर्पहेमकटकीलाक्षाधारेव निर्गता।।' ८/२६**

रोमालीवर्णने कल्पनासामञ्जस्यं यथा-

**'लिखन्त्याः कामसाम्राज्यशासनं यौवनश्रियः।**
**गलितेव मषीधारा रोमाली नाभिगोलकात्।।' ८/३९**

गोलकपदं त्वत्रापि वैरूप्यमिवोपस्थापयति। अन्यायन्यकाश्मीरकाणां 'लटमवनिता' इत्यादिप्रयोगवत् 'लटमश्रूः' इति प्रयुङ्क्ते बिह्लणः-

**'तस्याः पदनखश्रेणिः शोभते लटमभ्रुवः' ८/६**

प्रसादगुण सौन्दर्येऽपि वर्णमैत्रीयभयं वर्णनं स्थाने स्थाने। यथा-

**'अन्तरङ्गमनङ्गस्य शृङ्गारकुलदैवतम्।**
**अङ्गीकरोति तन्वङ्गी सा विलासमयं वयः।।' ८/५**

साहित्यदर्पणाद्युदाहरणेषु यथा प्रसिद्धम्–

**'मल्लिकामुकुले भाति गुञ्जन् मत्तमधुव्रतः।**
**प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव।।' इति**
**'कुचद्वये चकोराक्षी चिबुकप्रान्तचुम्बिनि।**
**नार्मोक्तिषु न शक्नोति स्थातुं लज्जानताना।।' ८**

तदनुहारिवर्णनं यथा–

**'लग्नद्विरेफध्वनिपूर्यमाणं वासन्तिकायाः कुसुमं नवीनम्।**
**आसादयामास वसन्तमासजन्मोत्सवे मङ्गलशङ्खलीलाम्।। ' ७/४१**

विपिनस्थलीनां कान्तो वसन्तो वर्णित एव पूर्वैर्यत्र वक्राणि पलाशानि नखक्षतानीवाऽराजन्त। यथा कालिदासस्य–

**'बालेन्दुवक्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि।**
**सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्।।**

किन्तु वनस्थलीनां बालको वसन्त इति सुमधुरमाह बिह्लणः–

**'नवीनदन्तोद्गमसुन्दरेण वासन्तिकाकुड्मल निर्गमेन।**
**उत्सङ्गीसङ्गी विपिनस्थलीनां बाली वसन्तः किमपि व्यराजत्।।' ७/३४**

सोऽयमर्थोऽस्मत्पूर्वजैर्व्रजभाषाकवितायामपि सम्यगाबद्धो यथा–

**'डार दुमपालकः बिछौना नव पल्लव के**
**सुमन झगूला तेई तन छबि भारी दै।**
**पवन झलावैं केकी कीर बहरावैं मिलि**
**कोकिल हरखि हुलरावैं कर तारी दै।**
**पुहुप पराग सो उतार करैं राईलोन**
**कुञ्जकली-नायिका लतानि सिर सारी है**
**मदननरेस जू को बालक बसन्त ताहि**
**प्रातहि खिलावत गुलाब चटकारी दै।।'**

साम्प्रतिका देशाभिमानिनः समालोचयन्ति यत्संस्कृतविदुषां हृदि नाभिमानो निजदेशस्य, न च सम्मानो जन्मभूमेः। किन्तु वराकास्ते न परिचिताः प्राचीनसाहित्यस्य। निजकृतिभिरार्यावर्तमिमं चिरायाऽमरीकुर्वन्तः संस्कृतकवयो मञ्चमारुह्य न केवलं मौखिकवार्ताभिरेव, अपितु आचन्द्रतारकं स्मरणीयेषु निजकाव्येषु निजजन्मभूमेरभिमानं तथा चित्रयामासुर्यथा समग्रमपि शिक्षितं जगत्तेषां देशाभिमानस्य सम्पद्येत सर्वदैव साक्षि। विद्यापतिर्बिह्लणं स्थाने स्थाने निजदेशस्य काश्मीरस्य प्राकृतशोभासौभाग्यकवितागुम्फगौरवं च साभिमानमुपन्यस्यति–

**'सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कवितविलासाः।**
**न शारदादेशमपास्य दृष्टस्तेषां यदन्यत्र मया प्ररोहः।।' १/२१**

**'काव्यं येभ्यः प्रकृतिसुभगं निर्गतं कुङ्कुमं च**
**च्छायोत्कर्षाद्भवति जगतां वल्लभं दुर्लभं च।**
**यस्मिन्नन्तः स्थितवति जगत्सारभूते प्रयाताः**
**काश्मीरास्ते नियतमुरगाधीशरक्षास्पदत्वम्।।' १८/१६**

निजजन्मभूमेः 'खोनमुखग्रामस्य' गौरवं साभिमानोत्कर्षमाह–

**'ब्रूमतस्य प्रथमवसतेरद्भुतानां कथानां**
**किं श्रीकण्ठश्वशुरशिरवरिक्रोडलीलाललाम्नः।**
**एको भागः प्रकृतिसुभगं कङ्कुमं यस्य सूते**
**द्राक्षामन्यः सरससरयूपुण्ड्रकच्छेदपाण्डुम्।।' १८/७२**

काश्मीरककवितागुम्फनस्य मृद्वीकागुच्छकस्य च पीयूषसाम्यं सूचयन् सुललितमाह सः–

**'मन्ये मन्थाचल विदलितान्निर्गता दुग्धसिन्धो-**
**र्भूत्वा यस्मिन्नमृतलहरी सत्कवीनां वचांसि।**
**प्रेमाकूतं कुवलयदृशां शीकरैः पूरयन्ती**
**द्राक्षाखण्डेष्वमृतकिरणा पाण्डुषु स्थैर्यमाप।।' १८/७**

संस्कृतसरस्वत्याः का कथा, काश्मीरेषु हिन्दीभाषाविदोऽपि सम्प्रति विरलायन्ते, अन्यथा 'पण्डिते' ह्युपाधिमात्रमण्डिताः काश्मीरकब्राह्मणा यवनभाषायाम् (उर्दू) यवनलिप्यामेव चात्मानमवलिप्तं कलयन्ति, तेष्वेष काश्मीरेषु पुरुषास्तु दूरतः स्त्रीणामपि संस्कृतभाषा प्राकृतभाषा च जन्मभाषावत्प्रतिगृहमासीदिति सगर्वाभिमानमुल्लिखति बिह्लणः–

**'ब्रूमः सारस्वतकुल भुवः किं निधेः कौतुकानां**
**तस्याऽनेकाद्भुतगुणकथा कीर्णकर्णामृतस्य।**
**यत्र स्त्रीणामपि किमपरं जन्मभाषावदेव**
**प्रत्यावासं विलसति वचः संस्कृतं प्राकृतं च।।' १८/६**

किं बहुनां, कायस्थानां कुटिलां लिपिं सोऽयं प्रत्यक्षं निन्दति। किञ्च नवीनमिदं कौतूहलमुत्पादयति यत् काश्मीरक कविभिर्यान्येतानि राजचरितान्यङ्कितानि कवितानिबन्धेषु, न तानि बन्दिनामिव केवलं स्तुतिकाव्यानि नूनम्। प्रत्यक्षस्तुतिपाठकाः केवलं गायका एव पुरा आसन्, न केऽपि कवय इति साभिमानोद्रेकमात्मनः कविताया उत्कर्षं ध्वनयति सोऽयम्–

**'नो कायस्थैः कुटिललिपिभिर्नो विटैश्चाटुदक्षै-**
**र्न प्रत्यक्षस्तवनपटुभिर्लुण्ठिता गायकैश्च।**
**देवागारद्विजगुरुगृहाण्येव यत्सङ्गृहीता**
**याता लक्ष्मीर्निजचपलता दोषशुद्ध्यर्थिनीव।।' १८/४२**

कालिदासादिप्राचीनकवीनामपेक्षयापि क्वचित्क्वचिद्विषये विशेषाभिमानमावहति बिह्लणो नूनम्। अस्मत्प्रबन्धानामेव मार्मिकपरीक्षकाः सुतरां विरला इति भूयस्तरामभिमानोक्तिम् आह सः-

**'रसध्वनेरध्वनि ये चरन्ति सङ्क्रान्तवक्रोक्तिरहस्यमुद्राः।**
**तेऽस्मत्प्रबन्धानवधारयन्तु कुर्वन्तु शेषाः शुकवाक्यपाठम्।।' १/२२**

कालिदासः सविनयं यत्र निजकाव्यपरीक्षां प्रार्थयते-

**'तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।**
**हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यमिकाऽपि वा।।'** इत्यादि,

तत्र हि सगर्वविभासो बिह्लणस्य वाग्विलासः-

**'अलौकिकोल्लेखसमर्पणेन विदग्धचेतः कषपट्टिकासु।**
**परीक्षितं काव्यसुवर्णमेतल्लोकस्य कण्ठाभरणत्वमेतु।।' १/२४**

मम कृतयो निकषपरीक्षोत्तरं मार्मिकाणां निधिस्थानापन्ना एव भवितार इति परीक्षातः पूर्वमेव स्थिरीकुर्वन्नाह बिह्लणः-

**'उल्लेखलीलाघटनापटूनां सचेतसां वैकटिकोपमानाम्।**
**विचारशाणोपलपट्टिकासु मत्सूक्तिरत्नानि निधीभवन्तु।।' १/१९**

रसध्वनिपूर्णवक्रोक्ति काव्यरचनागर्वं स्वमुखत एव केवलं न प्रकटीकृतवान्बिह्लणो यावत्स्थाने स्थाने कार्यरूपेऽपि तं परिणमितवान्। यथा हि विक्रमस्य वीर्यमभिव्यज्यते पाटवेन-

**'चोलान्तः पुरगेहेषु सिंहानां तस्य बाहुना।**
**लोललाङ्गूलददण्डानां द्वाररक्षा समर्पिता।। ४/२५**
**चिन्तया दुर्बलं देहं द्रविडो यत्पलायितः।**
**सङ्कटाद्रिदरीद्वारप्रवेशे बह्वमन्यत।। ४/२६**
**दृश्यन्तेऽद्यापि तद्भीतिविद्रुतानां द्रुमालिषु।**
**अलकाश्चोलकान्तानां कर्पूरतिलकाङ्किताः।।' ४/२७ इत्यादि।**

अतएव नैषधसदृशान्यपि काव्यानि निजालोचनानिकषे 'विसङ्कुलानि' साधितवान् पण्डितराजो जगन्नाथो भूयस्सु स्थलेष्वलङ्कृतकाव्योदारणेषु बिह्लणसूक्तीरेव सन्तोषतः समालोचितवान्। यथा-निदर्शनायाम्-

**'तत्पादनखरत्नानां यदलक्तकमार्जनम्।**
**इदं श्रीखण्डलेपेन पाण्डुरीकरणं विधोः।।' ८/९**

उत्प्रेक्षायाम्-

**'चोलस्य यद्भीतिपलायितस्य भालत्वचं कण्टकिनो वनान्ताः।**
**अद्यापि किं वानुभविष्यतीति व्यपाटयन्द्रष्टुमिवाक्षराणि।।' १/११९**

अस्तु-एवमादिसामर्थ्योपबृंहितां गर्विष्ठमनोवृत्तिं चित्रयन् बिह्लणप्रशस्तिविषयकः 'सुभाषितरत्नभाण्डागारे'पि श्लोक एकः प्राप्यते-

**'बिन्दुद्वन्द्वतरङ्गिताग्रसरणिः कर्ता, शिरोबिन्दुकं**
**कर्मेति प्रतिबोधितान्वयविदो ये येऽपि तेभ्यो नमः।**
**ये तु ग्रन्थसहस्रशाणकषणत्रुट्यत्कलङ्कैर्गिरा-**
**मुल्लेखैः कवयन्ति बिह्लणकविस्तेष्वेव सन्नह्यते।।'**

### बिह्लणस्य ग्रन्थौ

बिह्लणस्यास्य द्वावेव प्रबन्धावुपलब्धौ पञ्चाशिका च विक्रमाङ्कचरिते च। पञ्चाशिकायाः पञ्चाशत्स्वपि पद्येषु, आद्ये 'अद्यापि' इति विद्यते। चेदयं कथानकः सत्यस्तर्हि प्राणोत्क्रमणकाले न कस्यापि शृङ्गारविलासे मनो भवति। लेशतोऽप्युद्वेजकशून्ये मनसि मनसिजोद्गमो भवतीति साहित्यविदो विदुः। किन्तु 'अन्ते स्मरामि' इति निमीलनवेलायामपि प्रणयविकासः कविताविलासश्च महाधृतेर्बिह्लणस्यैवातिशयः। अस्याः पञ्चाशिकाया अन्तिमः श्लोको ह्याबालवृद्धं प्रसिद्धः प्रसेधयति पञ्चाशिकामेनाम्। यथा हि-

**'अद्यापि नोज्झति हरः किल कालकूटं**
**कूर्मो बिभर्ति धरणी खलु पृष्ठभागे।**
**अम्भोनिधिर्वहति दुःसहवाडवाग्नि-**
**मङ्गीकृतं सुकृतिनः परिपालयन्ति।।'**

### बिह्लणकाव्यम्

काव्यमालात्रयोदशगुच्छके 'बिह्लणकाव्यम्' इति कृतशीर्षकं पुस्कमेकमवाप्तम्। ग्रन्थोऽयं नाम्नात्रयं बिह्लणकृतिः, किन्तु काव्ये तृतीयपुरुषरूपेण बिह्लणस्य वर्णनम्। च्युतसंस्कृतिदोषोऽत्र स्थाने स्थाने। विद्यासुन्दरा 'दिकाव्यानामपि- 'नीतानि नाशं जनकात्मजार्थे दशाननानि' इत्यादिपद्यान्यप्यत्रोपलभ्यन्ते। कानिचित्पद्यानि परस्ताद्भाविनां कवीनामप्यत्रोपलब्धानि ततश्च काव्यमिदं केनचिदन्येनैव सङ्गृहीतम्, न बिह्लणेनेति बलादेव निश्चेतव्यं भवति।

बिह्लणस्य शशिकलायाश्चाख्यानकमस्त्यस्मिन्नपि काव्ये। आसीद् गुर्जरे महिलपत्तनम्। तत्रत्यो राजा निजसुतायाः पाठनार्थं पण्डितमेकं प्रतीक्षते स्म। तत्रत्यो राजपुरोहितः काश्मीरकवेर्बिह्लणस्य परिचयं कारयामास राज्ञा। पाण्डित्यप्रीतो राजा बिह्लणमध्यापकं चकार निजसुतायाः। अतएव 'स्तोकैःश्रमैः शशिकला विदुषी बभूव।' ततो बिह्लणः कामशास्त्रमध्यापयामास। सा 'पूर्वजन्मपत्नी' कामशास्त्रं पठन्त्येवाऽनुरक्ता, अत एव बभूव द्वयोर्गान्धर्वविवाहः।

बिह्लणकाव्यस्यैकस्मिन् प्रतिपुस्तके घटनायाः स्वरूपमेवमुपलब्धं यद् राजा बिह्लणस्य हस्ते निजपुत्र्या हस्तं समर्प्य 'अध्याप्यतामियम्' इति सस्नेहं प्रार्थयते। अत एव शिष्याध्यापकयोर्मध्ये कृताऽवगुण्ठनम्। किन्त्वेकस्मिन्पुस्तके शशिकला अवगुण्ठनवती,

शिष्याध्यापकयोर्मध्यतो 'जवनिका' विलम्बते। एकदा बिह्लणो बभाषे–

**'जातं सुजन्म विफलं भुवने नलिन्या दृष्टं यया न विमलं तुहिनांशुबिम्बम्।**
**यावच्छ्रुतं सुवचनं सुकवेस्तदित्थं किञ्चिद्विहस्य तुहिनांशुकला बभाषे।।'**

चन्द्रकला–

**'दृष्टानि कोकमिथुनानि भवन्ति, यैश्च**
**सूर्यांशुभिर्जगदिदं निखिलार्थमेति।**
**सम्पूर्णतापि शशिनः किल निष्फलैव**
**दृष्टा यया न नलिनी परिपूर्णरूपा।।'**

एतदनन्तरं द्वयोर्मेलनम्। बिह्लणस्याध्यापकत्वे समभूद्राजपुरोहितो वराकः प्रतिभूः। अत एव तदिदं रहस्यं परिज्ञाय सुतरां न्यषेधद्राजपुरोहितः। परं प्रणयप्रवणो बिह्लणो नेदमकार्षीत्कर्णे रहस्यमिदमवगतं राज्ञा। शूलारोपणस्याज्ञा प्रादीयत राज्ञा प्रकुपितेन। बिह्लणे दयमानाः शूलारोपकाः ईष्टदेवं स्मर्तुमसूचयन् बिह्लणम्। बिह्लणेनोक्तं मे इष्टदेवः शशिकला। अत एव तस्मिन्नैव समये पञ्चाशिकाया निर्माणम्। गुणग्राहकाणां दर्शकश्रावकाणां बभूव प्रगाढप्रीतेरुपरि विस्मयश्च विषादश्च। असूच्यत राज्ञे सर्वाऽपि परिस्थितिः। राजमहिष्या अपि समदीयत सूचनाऽन्तःपुरमहिलाभिः। समसूच्यत चन्द्रकलाया अपि प्राणत्यागेच्छाराजमहिष्यै। प्रासादात्पतित्वा राजकुमारी प्राणान्विसृजेदिति। अवर्ण्यत नितरामुभयोः प्रीतिः। राज्ञी द्वयोः प्रणयं जानती हत्याकाण्डादकम्पत। सा सर्वमिदं राज्ञे निवेदयामास। राजा पुरोहितादिभिर्मन्त्रणां विदधौ। अन्ते राजपुरोहितादीनां परामर्शेन अपराधक्षमोत्तरं समभूद् द्वयोर्विवाहः। निजं गौरवमभिरक्षता भूभृता समदीप्यन्त शतं ग्रामाः, भूयस्तमं हस्तितुरगादियौतकजातं च।

प्रतीयते यत् श्रुतायाः प्राचीनाख्यायिकाया उपरि कस्यचित्कवेः सेयं कृतिः निर्माणकालस्य कर्त्रादेश्च न किञ्चिद्वर्णनम्। अन्यान्यपुस्तकानां प्राप्तिघटनाऽपि काव्यमालायां प्रायो निरदिश्यत तत्सम्पादकमहाभागेन। किन्तु तदिदं पुस्तकं कुतः समवाप्तमिति न किञ्चिन्निर्दिष्टं तत्रापि। बिह्लणविषये घटनाया अमुष्याः सन्निवेशमुत्प्रेक्षमाणैः सेयमपि किंवदन्ती समुद्धृतास्तीति जाने। आख्यायिकायां प्रोक्तं बिह्लणाय शतग्रामप्रदानमपि न घटते। एवं चेत्कर्णाटादि दक्षिणप्रान्तेषु किमित्याहिण्डेत कविः? स्वयमेव धनाधीशो भूत्वा कवीनां कल्पवृक्षः कुतो न स्यात्?

**ऐतिहासिकं विवरणम्**

'बम्बई गजेटियर' इत्यनेन तथा गवेषणायुक्तकैर्ज्ञायते यच्चालुक्यवंशीयाः प्रावर्द्धन्त भारतस्य दक्षिणप्रान्ते। द्वे शाखे तावद्वंशस्यास्य–पूर्वकालिकी उत्तरकालिकी च। पूर्वस्या राजधानी वातापिपुरम् (बादामी) (बीजापुरप्रान्ते)। एतच्छाखायाः प्रथमो राजा जयसिंहः (खिष्टीयषष्ठशतके)। सर्वेषामन्तिमः कीर्तिवर्मा (द्वितीयः)। खिष्टस्य ७४७ तमे वर्षे शाखाया अस्याः समाप्तिः। एतच्छाखायां सर्वतः प्रतापी द्वितीयः पुलकेशी, यो हि कान्यकुब्जेशं हर्षं

पराजिग्ये। सार्वभौमगौरवं चायमुपलेभे। ९० सहस्रग्रामाधिपतिः, अस्यैव शासनकाले चीनदेशीयो ह्यान्साङ्गो भारतमुपेतः। अनेन हि पुलकेशीमहत्त्वं विस्तृत्य वर्णितम्। अस्याः शाखायाः सक्षमो राजा विक्रमादित्यः (प्रथमः)। अस्य राजत्वे वंशस्य शाखा गुर्जरदेशस्य अनहिलपट्टने स्थापिता। जयसिंहराजस्तत्रत्यः प्रथमो राजा। गुर्जरदेशेऽस्य वंशस्य द्वित्राः शाखाः समभवन्। अष्टमशतके चान्तः। ख्रिष्टीय ७५३ तमवर्षतः पूर्वकालिकश्चालुक्यानामधिकारो राष्ट्रकूटराजेन दन्तिदुर्गेण हृतः। एतदनन्तरं महाराष्ट्रे राष्ट्रकूटसत्ता प्रसृता।

महाराष्ट्रे राष्ट्रकूटसत्ता २०० वर्षाणि। एतदन्तराले चालुक्येषु न कोऽपि नामाङ्कितो बभूव भूपालः। दशमशताब्द्यां चालुक्यवंशीयस्तैलपो राष्ट्रकूटवंशजात् कक्कलराज्ञतः सार्वभौमत्वमाच्छिद्य उत्तरकालिकीं चालुक्यवंशीयां शाखां स्थापयामास। अस्यां हि सम्पूर्णा एकादश राजानो बभूवुः-

१. तैलयः
२. सत्याश्रयः
३. विक्रमादित्यः (१)
४. जयसिंहः
५. सोमेश्वरः (१) (उपनाम आहवमल्लः)
६. सोमेश्वरः (२)
७. विक्रमादित्यः (२) (उपनाम विक्रमाङ्कः)
८. सामेश्वरः (३)
९. जगदेकमल्लः।
१०. नूर्मडि तैलपः।
११. सोमेश्वरः (४)

अन्तिमः सोमेश्वरः ख्रिष्टीय ११८२ तः ११८९ तमवर्षपर्यन्तं राज्यं चकार। एतदनन्तरं दक्षिणप्रान्तस्य सार्वभौमत्वं यादववंशीयानां हस्तगतमभूत्।

विक्रमाङ्कोऽयमुत्तरकालिकचालुक्यशाखायाः सप्तमो राजा। अयं १०७६ तमख्रिष्टीयवत्सरतः ११२६ तमवर्षपर्यन्तं शशास राज्यम्। एतत्पितुर्नाम सोमेश्वरः, परं स आहवमल्लनाम्ना विख्यातः। एतदेव बिह्लणोऽपि लिलेख। केनचित् शिलालेखेन 'त्रैलोक्यमल्ल' इत्युपाधिरपि परिज्ञायते। अयमेव कल्याणनगरीं वासयामास।

सोमेश्वरजयसिंहयोर्विषये बिह्लणेन यल्लिखितं तस्य भूयानंशस्ताम्रपत्रशिलालेखैः प्रमाणितो भवति। बिह्लणेन लिखितम्-'आलुपराजोऽपि अधीनतां स्वीचकार।' तदिदमालुपनगरं अर्वाचीनम् 'अलुपै' इत्यनुमीयते। 'अलुपै' मलाबार समुद्रतटे एकः प्रान्तः।

विक्रमाङ्कः पञ्चाशद्वर्षाणि राज्यं शशास। स 'कालिविक्रम' 'परमाडिराय' 'परमर्द्दिदेव' इत्युपाधीन् दधार। स हि शकसंवत्सरस्थाने निजसंवत्सरं प्रचारयितुमियेष परं न परिचचाल सः। यस्याश्चन्द्रलेखायाः स्वयंवरवर्णनं बिह्लणश्चकार तस्याः 'चन्दलदेवी'ति शिलालेखेषु नाम। सोऽयं विक्रमो विदुषामाश्रयदाता। बिह्लणातिरिक्ता अन्येऽपि महाविद्वांसोऽस्याश्रिता

बभूवुः, येषु याज्ञ्यवल्क्यस्मृतिटीकाया मिताक्षरायाः कर्ता विज्ञानेश्वरभट्टोऽपि बहूनां परिचितः। मिताक्षरायाः समाप्तौ त्रीणि पद्यान्यनेन दत्तानि। यैः– 'जगति कल्याणसदृशं न नगरम्, विक्रमादित्यसमो न राजा, विज्ञानेश्वरसमः पण्डितो न। यावच्चन्द्रदिवाकरं विक्रमो जीवेत्। एष हि याचकेभ्यः स्वच्छन्दं धनं दत्ते। विष्णुं ध्यायति। अयं षड्रिपूनजयत्। पश्चिममारभ्य पूर्वसमुद्रान्ताः सर्वे राजानोऽस्याधीनाः।' 'इति नगर्या राज्ञश्च प्रशंसनमवगम्यते। ततश्च स्पष्टमनुमीयते यद् बिह्लण–विज्ञानेश्वरयोराश्रयप्रदातामहाप्रतापी विक्रमो विक्रमाङ्कान्नान्यः। एतत्सामयिकाः २०० शिलालेखाः, ये बिह्लणसूचितमितिहासं समर्थयन्ते।

## चरितकाव्यनिर्माणम्

पुरा संस्कृतप्रचारो देशे भूयानासीत्। अनेके विद्वांसः संस्कृतपारङ्गताः स्वयशः ख्यापयामासुर्दिग्दिगन्तरेषु। नानाविषयकान् ग्रन्थान्निर्माय देशस्यास्योपकारेण सह स्वनामधेयमप्यजरामरं चक्रुः राजानोऽप्यनेके निजाश्रये पण्डितान्पुपुषुः, ये हि जीविकाचिन्तातो निवृत्ताः स्वजीवनं शास्त्रावलोकननिर्माणादिना चिराय कृतार्थयामासुः। तदा हि नासीत्कोऽप्येतादृशो माण्डलिको यस्याश्रमे द्वित्राः पण्डिताः कवयो वा न स्युः। एवं स्थितेऽपि संस्कृतसाहित्ये चरितकाव्यान्यतीव विरलानीति चित्रम्। यदि संस्कृतकवयश्चरितकाव्यान्यलेखिष्यँस्तर्हि भारतीयमिदमितिवृत्तमपूर्णं नाऽस्थास्यत, यत्र हि वैदेशिका नानाविधान् भ्रमपूर्णानात्मप्रयोजनसाधकान् वृत्तान्तानुपक्षिप्य स्वमनीषितमितिहासं समर्थयन्ते। यदि ते स्वाश्रयदातृणामेव चरितं निजग्रन्थेष्वसूचयिष्यन् तर्हि इतिहासविषये समभविष्यद्भूयसी सहायता। किन्तु मोगलादीनां राज्योत्कान्त्यादिभिरनुमीयते यत् एवंविधानि चरितकाव्यानि राजविप्लवे नष्टानि।

अथवा यदि तैरेवंविधानि काव्यानि न प्रणीतानि तर्हि तत्र मानुषचरितेषु प्राचामनास्थैव परमं कारणम्। प्राञ्चः कवयः पौराणिकमहापुरुषानेव काव्यनायकतया सम्मानयन्ति स्म तेषामेव च कीर्तनेन निजलेखनी कृतार्थयन्ति स्म।

लौकिकपुरुषाणां काव्यकीर्तनं तेषां दृष्टौ 'वाचो विग्लापनं हि तत्'। अत एव हि पौराणिकान्पुरुषानालम्ब्य सहस्रशः काव्यानि च नाटकानि च प्रणिन्यिरे उपलभ्यन्ते चापि तानि, किन्त्वितरेषामङ्गुलिगणनीयानि नूनम्। यानि च चरितानि लिखितान्यपि, तान्यपि मनुष्यचरितेषूपेक्षावशान्न कैश्चित्प्राचारितानि। तत्पुस्तकानि ग्रीष्मवर्षादिषु यथास्थितं नष्टानि।

## प्रकृतचरितस्यालोचना

प्रकृतमिदं चरितम् (विक्रमाङ्कदेवचरितम्) जीवनचरितेषु गण्यते परं तत्सामग्री अतीव विरला अलङ्कारशास्त्रनियमानुसारम् ऋतु–जलविहार–वाटिका–सायं–प्रातरादीनां वर्णनैरेव काव्यमिदं पूरितम्। अष्टादशसर्गाणां स्थाने अष्ट–नवसर्गैरेव काव्यमिदमपूरयिष्यत, यदि नियमानुवर्तनमात्रे दृष्टिर्नाभविष्यत्। सप्तम–त्रयोदशसर्गौ तु सुस्पष्टमनावश्यकौ चरितचित्रणे। तयोरभावेऽपि न काचिच्चारित्र्येऽपूर्णता प्राप्स्यत। परम् ऋतु–नायिकारूपवर्णनं महाकाव्यलक्षणमुक्तम्। आरम्भादन्तपर्यन्तं काव्यप्रणयनप्रवृत्तिरालङ्कारिकी अतिशयोक्तिपूर्णा

च। क्वचिद्वर्णनीयविषया दूरं त्यक्तव्या अभूवन्, अवर्णनीयाश्च विस्तृत्य निरूपणीया आसन्। अवर्णनीयेषु विस्तृतेषु **वर्णनीयाविषयाणामभिभस्त्वनिवार्य** एव। लिखितं कविना- स्वप्रतिपक्षस्य चोलमहीपतेः पूर्णरूपेण पराभवं विधाय विक्रमेण तद्विषय-सर्व एव स्वाधीना कृत इति। किन्तु स्वल्पाग्रे एव चोलोपरि द्वितीयमाक्रमणं भवति, महता सन्नाहेन च भवति। यदि चोलानां पूर्णपराभवोऽभवविष्यत्तर्हि स्वल्पकाल एव कथं तेषामुत्थानमभविष्यत्? अस्तु- काव्यरूपेण यश्चरितं चित्रणीयं भवति तत्रालङ्कारिकं रूपमनिवार्यं भवति। प्रोक्तं चाप्यानन्दवर्द्धनाचार्येण 'ध्वन्यालोके'- 'न हि कवेरितिवृत्तमात्रनिबन्धने कवित्वचारितार्थ्यम्' इत्यादि।

एवमेव चरितकाव्ये वर्णनीयस्य प्रशंसाऽप्यतिशयं गाहते तावत्। ते हि राम-कृष्ण-युधिष्ठिर-नलादिकक्ष्यायामादरणीयाः, निर्दोषाश्च सम्पाद्यन्ते। आहवमल्लपितुर्जयसिंहस्य विषये प्रतिभाप्रमत्तः कविराह- 'इन्द्रेण स्वहस्तेन तत्कण्ठे माला परिधापिता-यशोऽवतंसम्० (१/८६)। किञ्च का घटना कस्मिन्समये (वर्षे) भूदिति न तावदैतिहासिकबुद्ध्या काव्यं प्राणीयत कविना। कुत्रचित् 'किञ्चित्कालानन्तरम्', क्वचित् 'बहुदिनानन्तरम्' इत्येवालिख्यत। 'विक्रमाश्रये काव्यं प्रणयतः कवेरवश्यं तद्वंशजानां स्तुतिर्विशिष्य कर्तव्यम्, किन्तु औचित्यानौचित्य विचारो यो हि काव्यस्य जीवितम् अवश्यं कवेरवधातव्यस्तावत्' इति ह्यालोचकानां दृष्टिकोणः। परं यया दृष्ट्या सम्प्रति काव्यमालोच्यते पूर्वसमये नासीत्तथा। पुरा हि-काव्यं काममैतिहासिकं स्यात् पौराणिकं वा श्रुतकथानकं वा स्यात्काल्पनिकं वा, परं साहित्यनियमानुसारेणैव प्रणयने कविरासीद्विवशः। अवश्यमयं नियमः काव्यशोभायै, श्रोतृणां हृदयावर्जनाय च। अत एव सम्भावनामसम्भावनां वा दूरपर्यन्तमसमीक्ष्य, नायकस्य चरितोत्कर्ष एव तैः सर्वात्मना चित्र्यते स्म। इदमेव कारणमस्ति यत् इतिहासविश्रुतानामपि चालुक्यवंशीयानामतिमानुषचरित्रप्रदर्शने कवेः संरम्भ इव।

एवं सत्यपि आलङ्कारिकमंशं पृथक्कृत्य चरितवर्णनस्य या सामग्री सा न काल्पनिकी अपि तु यथार्था। तस्याः सत्यता तैः शिलालेखैः प्रमाणिता ये हि कल्याणे गवेषकैर्लब्धा। काव्येया वंशावली वर्णिता सा शिलालेखवर्णितानां चालुक्यवंशीयराजानां नामावलीतः संवदते। घटना अपि प्रायशः शिलालेखैः संवदन्ते। ततश्च काव्यातिशयोक्तिषु सतीष्वपि विक्रमाङ्कदेवचरितं प्राचीनेतिवृत्तपरिज्ञानायाऽत्युपयोगीति को वा नाभिनन्देत्। एतस्य मार्गस्य दिग्दर्शकाः कालिदासादयः प्राक्कवयोऽभूवन्, यै रघुवंशादिषु इतिहासचित्रणं कविकर्मप्रदर्शनं चेत्युभयमपि सम्यक्तया निरूढमिति तु परिचितमेव साहित्यमार्मिकाणाम्।

दुर्लभतमान्यपि ग्रन्थरत्नान्यालोचयितुमुत्कण्ठन्ते। न वा विलुप्तानां ग्रन्थरत्नानामन्वेषणाय प्रतीयते।

अत एव डॉ० बूल्हरः परमपरिश्रमेण चरितकाव्यमिदं सम्पादयामास दीर्घभूमिकया चालञ्चकार। एतद्विषये लेखनीं चालयद्भिः सर्वैरेव बूल्हरभूमिकातः सुमहत्साहाय्यमवाप्तम्। सर्वतोऽभिनन्दनीयमस्मिन्काव्ये तदिदमस्ति यत्कविः स्वस्य देशस्य कुटुम्बिनां च समस्तमपि वृत्तं सुस्पष्टं स्वलेखन्या लिलेख। अन्तिमः सर्गः (१८) सर्वोऽप्यनयैव सामग्र्या पूर्णः।

**पुस्तकप्राप्तेरितिहासः**

सर्वप्रथमं चरितकाव्यं 'हर्षचरितम्', यत्र ऐतिहासिकस्य राज्ञो हर्षवर्द्धनस्य चरितं महाकविनां बाणेन सुललितगद्येनावर्णि। एतदनन्तरं भूयांसं कालं यावन्नोदपद्यत किञ्चिच्चरितकाव्यम्। ततः अद्यतः षष्टिवत्सरा व्यतीताः स्युः, डॉ० बूल्हरो जैकोबी च प्राचीनसंस्कृतपुस्तकगवेषणायै राजपुत्रप्रान्ते गतवन्तौ। तत्र जैसलमेरदुर्गाभ्यन्तरे 'ओसवाल' जैनानां बृहज्ज्ञानकोषपुस्तकालये तालपत्रलिखितं विक्रमाङ्कचरितमिदमलभ्यत ताभ्याम्। हर्षचरितादुत्तरं द्वितीयमिदं चरितकाव्यम्। यद्धि कर्णाटकप्रान्तीयकल्याणनगरनरेशस्य विक्रमाङ्कस्य पद्यबद्धं सुललितचरितम्। एतद्धि तस्यैव सभाकविना बिह्लणेन सामयिकघटनानां प्रत्यक्षसाक्षीभूतेन विरचितम्। बिह्लणः काश्मीरकः खिष्टीयैकादशशतकजातः। यद्विक्रमाङ्कचरितपुस्तकं जैसलमेरदुर्गेऽधिगतं तद् १२८६ खिष्टाब्दे लिखितम्। प्रतीयते यद् बिह्लणात्केवलं २०० वर्षानन्तरमेव तदिदं पुस्तकमलेखि।

विक्रमाङ्कचरितादनन्तरं कुमारपालचरित-गौडवध-हम्मीरवध-नवसाहसाङ्कचरित-प्रभृतीन्यैतिहासिकचरितकाव्यान्युपलब्धानि प्रकाशितानि च। कुमारपालचरित-गौडवधे प्राकृतभाषामये काव्ये। नवसाहसाङ्कचरितमतिमानुषचरितपूर्णं किन्तु सुप्रसादगुणयुक्तं सुललितं च। हम्मीरवधमेतदपेक्षयाऽतिलघुहीनं च। अत एवाद्यावधि प्राप्तेषु पद्यमयचरितकाव्येषु विक्रमाङ्कचरितमिदं सर्वतः प्रधानम्।

**उपसंहारः**

महाकाव्यगुणैः सम्पन्नं कुङ्कुमकेसराणां सहोदरमपि तदेतत्काव्यं समर्थानामपि बहूनां संस्कृतपण्डितानामालोचनक्षेत्राद्दूरगतमिति भूयान् खेदविषयः। सत्यं त्विदमस्ति यत्परीक्षापाठ्यक्रमे यानि पुस्तकान्युपात्तानि तानि विहाय न साम्प्रतं कानिचित्संस्कृतशिक्षाक्षेत्रे प्रचलितानि। परीक्षापाठ्यक्रमे च मुद्रणयुगात्प्राक्तनानि, पण्डितमहाभागानां चिरपरिचितानि यानि पञ्चमहाकाव्यानि तान्यतिरिच्य न किञ्चिदन्यत्परिगृहीतम्। पुस्तकनिर्णायकमहाभागानां चिरपरिचितानि निजाभ्यस्तानि काव्यानि विहाय नान्येषु निपतति कृपादृष्टिः। परीक्षासरितमुत्तीर्णाः कृतविद्याः संस्कृतविद्वांसश्च न तावत्संस्कृतसाहित्याकरस्य दुर्लभतमान्यपि ग्रन्थरत्नान्यालोचयितुमुत्कण्ठन्ते, न वा विलुप्तानां ग्रन्थरत्नानामन्वेषणाय प्रयतन्ते। किमधिकम्, अन्यैरन्विष्य परमपरिश्रमतः प्रकाशितान्यपि बहूनि ग्रन्थरत्नान्यद्यावध्यपि संस्कृतानुरागिणामध्ययनव्यापाराद्दूरीभूतान्येव। तेष्वेव तदिदं विक्रमचरितमप्यासीन्नूनम्। किन्तु कतिपयवर्षेभ्यः काशिकराजकीयसाहित्याचार्यपरीक्षायां चरितकाव्येनानेन स्थानमुपलब्धमिति संस्कृतपण्डितानामभूदिदं परिचितम्। अत एव सूक्ष्मेक्षिकया तदिदं काव्यं विमृशन्तः संस्कृतपण्डिता मामकीमिमामालोचनामुपोद्घातमपि चेमं पावयेयुः कृपापावन्या विचारदृष्ट्येति किं वा विशेषज्ञेषु विशेषनिवेदनेन।

***

# नाटिका

१.	मञ्जुला

# मञ्जुला
## (ध्वनिनाटिका)

**काचित् स्त्री** – सखि कमले! अद्य यमद्वितीयायाः पुण्यदिनेऽपि एतावद्विलम्बेन स्नानाय समागताऽसि। पश्य, अद्य महिलाघट्टेऽपि स्त्रीणां कियती सङ्कुलता। इयं विमला चरणयोर्न्यस्तम् अलक्तकमेव चिरकालान्निरीक्षते। (विमलां प्रति) सखि विमले! दीपावलीमहोत्सवः सुखेन सम्पन्नः। परं चरणयोर्न्यस्तो लाक्षारागः किं नाद्यापि दृष्टिं परिहरति। अये इदं भगवत्या यमुनायास्तीरमस्ति। अत्र तु संयता तिष्ठ।

**विमला** –अस्मादृशीनामुपरि दृष्टिरेव कस्य निपतेत्। इयं सौन्दर्योज्ज्वला कमला निरीक्ष्यताम्। अस्या दृष्टिरेव न जाने कुत्र कुत्र भ्राम्यति? अपि दीपावली महोत्सवस्य मादकता साम्प्रतमपि विद्यमानाऽस्ति।

**कमला** –सखि विमले! आत्मवत् सर्वलोकान् पश्यसि। पश्य, तव नयनयोः कज्जलं किं साक्ष्यं न ददाति? हन्त! येषां वराकाणां गृहे उत्सवदिवसेऽपि कलहकोलाहलो न विश्राम्यति ते वराकाः कथम् उत्सवं सम्मानयिष्यन्ति? हन्त! तस्मिन् दिनेऽपि नागिनी भीषणफुत्कारान् न परित्यक्तवती।

**मनोरमा** –अहो अतीताभिः कथाभिः किमर्थम् आत्मानं क्लेशयसि। इतः पश्य। देहि एतस्मै दक्षिणाम्।

(नेपथ्ये – जय यमुने! जय यमुने! पुण्यपर्वणि दीयतां विप्रायाऽपि)।

**अन्या महिला** – अयि विमले! मनोरमां किमर्थमुपालभसे। अस्याः सौन्दर्यपरिमुग्धः स श्रेष्ठिपुत्र एव नित्यम् अस्या गृहस्य परिसरे भ्राम्यति। घट्टेऽपि तु स एनां त्यक्तुं नेच्छति। (जय यमुने, जय यमुने)

**द्वितीया** – किं घट्टेऽपि सः समायाति?

**एका स्त्री** – अये समायाति इति किं पृच्छसि। सम्मुखे किं न पश्यसि। पश्य? स समायात एव। सम्मुखे तस्याः नौकायाः पृष्ठतः श्वेतकञ्चुकधारी कोऽस्ति? अपि अस्ति सः।

**द्वितीया** – अये दृष्टम्। जय यमुने, यमुने।

**मनोरमा** – (क्रोधेन) माऽधिकं चापलं कुरु। अभागिनी मदुपरि कलङ्कं समारोपयति। सर्वमहं जानामि तव चरित्रम्। पूर्णिमाया रात्रौ त्वम्......।

**द्वितीया** – सखि! गच्छतु सर्वा कथा। सम्प्रति तूष्णीं भव। अन्यथा.....।

**काचित् स्त्री** – अरे इयं कलङ्किनि मञ्जुला अत्रापि समागता। अये भाग्यवति! इतस्तु दूरे गच्छ।

**अन्या** – अपेहि रे पापिनि! इहैव किं मरणस्याऽवकाशः प्राप्तः? दूरमपरसर। न किं विलोकयसे, अत्र वयं स्नामः।

**काचित् स्त्री** – विमले! का खलु इयम्! किमियं कलङ्किनी? काचिद् वेश्या वा? मुखमुद्रया तु सेयं गभीरा काचित् सतीव लक्ष्यते।

**द्वितीया** – नहि नहि। वेश्या तु नाऽस्ति। गृहत्यागिनी इयं सा मञ्जुलाऽस्ति। यस्या वार्ता मनोरमागृहे श्रुताऽभूत्।

**अपरा** – अये दूरे गच्छ। अन्यस्मिन् घट्टे गत्वा स्नानपुण्यम् अर्जय।

**मञ्जुला** – (स्वगतम्) अहं नाम समाजस्य कलङ्करुपा! यत्पापं प्रक्षालितमपि नाऽपगच्छति तेनाऽहं परिवृता। पुनः किमित्यहं यमुना स्नानाय आगच्छामि यमुनायाः पावनपयसा किं वेश्यायाः पातकमपोहितुं पार्यते! (मध्ये स्नानस्य घटादिपात्राणां च ध्वनिः) (स्वगतम्) सर्वे जना देवमन्दिरे जलमर्पयितुं व्रजन्ति। भगवतश्चरणयोः जलस्य अर्घ्यं समर्पयन्ति। बहुतराः स्त्रियो मन्दिरे ताम्बूलगृहस्य पुष्पगुम्फनगृहस्य वा सेवामारचयन्ति। कतिचित् स्त्रियो देवमन्दिरस्य भाण्डागारे तण्डुल–गोधूमादि–धन्यानां निस्तुषीकरणस्य शोधनस्य वा सेवां कुर्वन्ति। पुनः किमहं न कुर्याम्! मया आनीतं तोयं कि नाङ्गीकुर्यात् केशवः! यदि देवसेवायां जलं न स्वीक्रियेत् तर्हि देवमन्दिरस्य सोपानमेव अहं प्रक्षालयेयम्। हन्त! किं तस्याऽप्यधिकारो मम नास्ति! मम जलं नीचजातयोऽपि नाङ्गीकुर्वन्ति। मम जलस्पर्शेन तेऽपि अपवित्रा भवन्ति। ततः पुनरहं प्राङ्गणं सोपानं वा केन प्रकारेण प्रक्षालयितुं शक्नुयाम्? अस्तु ,अद्य भाग्यपरीक्षां करोमि। भगवान् मदनमोहनो मे सेवां स्वीकरोति न वा?

(मन्दिरस्य प्राङ्गणे जयतु भगवान्, जयतु स्वामी, जयतु मदनमोहनः इति ध्वनिः भवति)

**अधिकारी** –(परिचारकं प्रति) अरे मोहन! श्रेष्ठिनो रामदासस्य फलानां स करण्डको मन्दिरे प्रषितो वा? अरे अधुनाऽपि कठियावाडस्य श्रेष्ठी न समागतः। पश्य स हि आगतो न वा?

**मोहनः** –अरे अधिकारिमहोदय! करण्डकस्तु सायङ्काल एव प्रेषितः किन्तु श्रेष्ठी वृन्दावनदासः विलम्बेन समागमिष्यति। स हि ह्यो वृन्दावनं गतः।

**अधिकारी** – (एकं श्रेष्ठिनं प्रति) श्रेष्ठिन् ! जय श्रीकृष्ण! साम्प्रतं मन्दिरे तण्डुलानामावश्यकता। यदि भवान् वाञ्छति तर्हि वसुमति तण्डुलानां कृते अयमवकाशः। कथय, का इच्छा?

**श्रेष्ठी** – अहो! श्रीमतामतीव कृपा। श्व एव तण्डुलानां प्रबन्धं करिष्यामि। सखे नानदास! त्वं मन्दिरे केसरप्रेषणस्य वाञ्छां करोषि स्म। इदानीम् अधिकारिमहोदयं पृच्छ।

**अधिकारी** – निश्चितम्, निश्चितम्। नानदास! केसरो भण्डागारे अपेक्ष्यते। प्रेष्यतां निःसंशयम्। जय श्रीकृष्ण। अये श्रेष्ठिन् गोपालदास! गनि मलमल्लवस्त्राणि नाद्यापि भवता प्रेषितानि? (परिचारकं प्रति) अरे इमानि कूष्मण्डानि अत्रैव पतितानि सन्ति? आह्वय कञ्चिद् भारवाहकम्। स इमानि अभ्यन्तरे प्रापयेत्। जानकि! तव कार्यं सम्पन्नं न वा? तव कार्ये परिश्रमः कियान् कर्तव्योऽभूत्? (कोलाहलं श्रुत्वा) मोहन! श्रृणुरे! बहिः कोलाहलः इव श्रूयते।

**मोहनः** – पश्यामि, पश्यामि।

**मेघिनी** - (मन्दिरस्य सम्मार्जिका आभीरी क्रुद्धा भूत्वा कञ्चिदुच्चैर्वदति) अरे त्वं किं वाञ्छसि ? अत्र किमिति अवस्थिताऽसि ? दूरमपसर। यावत् सम्मार्जयामि देवाङ्गणम्।

**मञ्जुला** - (भयकम्पितस्वरेण) ममैतेन कलशजलेन........।

**मेघिनी** - नव कलशजलेन किं भविष्यति रे ? किं देवं स्नापयितुमिच्छसि ?

**मञ्जुला** - नैव।

**मेघिनी** - तर्हि ?

**मञ्जुला** - सोपानं बहिः प्राङ्गणं च वाञ्छामि प्रक्षालयितुम्।

**मोहनः** - मेघिनी कयाचित् सह कलहायते।

**अधिकारी** - (प्राङ्गणाभिमुखमुपसृत्य गभीरतया पृच्छन्) अये मेघिनी ! कं कोलाहलम् आरचयसि ?

**मेघिनी** - कोलाहलः कः स्यात ? दृश्यताम्। लोकानामभिमानः साम्प्रतं भुवनेऽपि न भाति। इयं वेश्या सलिलमादाय समागताऽस्ति। कामयते च यद् देवमन्दिरं पयसा प्रक्षालयेयम् इति।

**अधिकारी** - काऽसि रे त्वम् ? अपि मञ्जुला ? पश्य, भवत्या स्पृष्टं जलं न कस्मिन्नपि कार्ये समागच्छेत्। प्राङ्गणं प्रक्षालनेऽपि नेदं परिगृह्येत्। यावत् प्राङ्गणं न परिशुष्येत् तावत् तदुपरि पादपतनस्य आशङ्का।

**मञ्जुला** - (स्वगतम्) अस्मिन् पुष्पोद्याने तु मम निवारकः कश्चिन्न दृश्यते। (सभयकम्पं परितो विलोक्य) भगवन् मदनमोहन दीनामिमां ते दासीं क्षमस्व। हन्त ! तिष्ठामि तावद् अस्मिन्नेव भूतले। (भूतले मस्तकम् आघृष्य) अधमोद्धारक ! दयालो ! स्वीकुरु मे पूजाम्। इति कलशजलम् अर्घ्यमिव भूमौ निपातयति। ततो रिक्तं कलशं कक्ष्ये वहन्ती गृहं परावर्तते। मञ्जुला प्रतिदिनं मन्दिरोद्याने समागत्य एवमेव जलमर्पयति स्म किन्तु न भगवद्दर्शनं प्राप्तवती। वर्षानन्तरम् एकस्मिन् दिवसे-)

**मञ्जुला** - स्वामिन् ! नेदानीं मम स्थातुं शक्तिः। प्रभो ! एकवर्षस्य कठिनतपस्ययाऽपि किं कृपां न करिष्यसि ? साम्प्रतम् एकक्षणार्थमपि ते मधुरं दर्शनं देहि।

**प्रधानः** - (स्वगतम्) इयं दीना काऽस्ति ? बहोः कालादेषा समवस्थिता। (समीपे गत्वा) पुत्रि ! किं वाञ्छसि ? किं भगवतः सेवार्थं जलम् आनीतवती ?

**मञ्जुला** - नैव।

**प्रधानः** - तर्हि किं वाञ्छसि ?

**मञ्जुला** - मदनमोहनस्य एकबारं दर्शनम्।

**प्रधानः** - किं दर्शनं कर्तुमिच्छसि ? एहि, तर्हि माम् अनुसर। साम्प्रतमेव मन्दिरस्य पटमुद्घाटयामि। समीपे स्थिता भूत्वा सम्यक्प्रकारेण विधेहि भगवतो दर्शनम्।......उपरि आगत्य कुरु भगवतो दर्शनम्।

**मञ्जुला** - (स्वगतम्) भगवन् ! भवान् मदुपरि कृपां करोति किन्तु किमहं समीपे

गच्छामि ?

**प्रधानः** – उपरि आगत्य विलोक्य भगवन्तं स्थैर्येण।

**मञ्जुला** – (व्याकुलभावेन) अग्रे आगमनस्य न मेऽधिकार:।

**प्रधानः** – अधिकार: किमिति नास्ति वत्से! यस्य हि भगवद्दर्शनस्य प्रबला उत्कण्ठा तस्य सर्वोऽप्यधिकार:।

**मञ्जुला** – अहम्....... अहम्......।

**प्रधानः** – त्वं काऽसि ?

**मञ्जुला** – अहं कलङ्किनी समाजाद् बहिष्कृता।

**प्रधानः** – नैवम्, नैवम्। नाऽसि त्वं कलङ्किनी। त्वं हि भगवद्भक्त:। सोपानमारुह्य नि:शङ्कम् अग्रे उपेहि।

**अधिकारी** – दुष्टस्य दृश्यतां लोभ:। एकसहस्रमुद्राप्रदानस्य आसीद् वार्ता। साम्प्रतं द्विशतमुद्रा एव दातुं वाञ्छति। हा हन्त! (अग्रे विलोक्य) अरे जगन्मोहनमारूढाऽसि ? एतावती ते धृष्टता। दूरं गच्छ। सोपान्नीचैरवतर।

**प्रधानः** – (अधिकारिणं प्रति) एतस्या: स्त्रिया: किमिति करोषि तिरस्कारम् ?

**अधिकारी** – श्रीमन्! दृश्यतां मन्दिरस्य समीपमेव इयमुपगता।

**प्रधानः** – तर्हि कोऽस्मिन्नपराध: संवृत्त: ?

**अधिकारी** – इयं समाजस्य कलङ्किनी वेश्यावत् इति अधुनैव कथितवती।

**प्रधानः** – किं वेश्याया: कृते भगवद्दर्शनस्य निषेध: ? द्वारस्य अवरोध: ?

**अधिकारी** – दर्शनं यद्यपि न निषिद्धं किन्तु लोकानां समीपे समुपगत्य स्पर्शनमवश्यं निषिद्धम्।

**प्रधानः** – केन इदं भवते बोधितम् ? महामहत्सु जगदीशादिपीठेषु किं भवति ?

**अधिकारी** – महतां देवपीठानां कृते न कोऽपि नियम:।

**प्रधानः** – तर्हि कस्याऽपि देवमन्दिरस्य कृते न कश्चिन्नियम:। मम सुदृढो विश्वासो यद् घोरपातकिन: स्पर्शादपि भगवान् न कदाचिदपि अपवित्रो भवति।

**अधिकारी** – तर्हि पञ्चामृतस्नानादिना अङ्गशोधनस्य व्यवस्था किमिति प्रचलिता ?

**प्रधानः** – सा हि अस्मदादीनां कृते, न भगवत: शोधनाय। भक्तजना: भगवत: शोधनस्य व्यवस्थां कृत्वा निजमनस: शोधनं कुर्वन्ति। य: किल भगवान् जडजङ्गमानां सर्वेषां स्वामी स कदाचिदपि अपवित्रो न जायते–

**श्री अङ्गशोधनं कृत्वा स्वात्मानं शोधयन्ति ते।**
**पञ्चामृताऽभिषेकेण स्वं चात्मानं पुनन्ति ते।।**
**जड-जङ्गम-जन्तूनां दयालु: परम: पिता।**
**निजोत्पादितजीवानां स्पर्शेन न विदुष्यति।।**

अस्तु भगवतस्तु स्पर्शमपि नैषा कृतवती। इयं तु केवलं प्राङ्गणादग्रे

समागत्य जगन्मोहने स्थिता। किमेतावन्मात्रेण मन्दिरम् अपवित्रं संवृत्तम्?

**अधिकारी** - किमिति न संवृत्तम्?

**प्रधानः** - (किञ्चिदुच्चस्वरेण) अस्तु, तदिदं प्रत्यक्षदैवतस्य श्रीमदनमोहनस्य सम्मुखे समवस्थाय किं भवान् दृढतया वक्तुं शक्नुयाद् यद् भवान् वा अहं वा मन्दिरेऽस्मिन् सम्प्रविश्य मन्दिरस्याऽस्य अपवित्रतां नोत्पादयावः? समाजो सेयं प्रत्यक्षरूपेण कामं कलङ्किनी किन्तु भवान् वा अहं वा अन्ये वा किं दुग्धधौताः विशुद्धाः सिद्धाः भविष्यामः? यौवनस्य घटनाः संस्मृत्य शुद्धान्तः करणेन किञ्चिद् ब्रूहि।

**अधिकारी** - एवम्, एवम्? ......आम्..... । (मञ्जुलां प्रति) ये किं पुनरद्य भगवत्प्राङ्गणं प्रक्षालयितुम् उपागताऽसि? गच्छ, यावद् यस्मिन् स्थाने जलं निषिञ्चितवती तत्रैव नीरं निषिञ्चेः।

**प्रधानः** - नित्यं कस्मिन् स्थाने जलं निषिञ्चति?

**अधिकारी** - मन्दिरस्य पुष्पोद्याने।

**प्रधानः** - तर्हि आगच्छ, पश्यावः।

**अधिकारी** - (स्थानं निर्दिश्य) इयं मन्दभाग्या प्रत्यहम् अत्रैव जलं निषिञ्चति।

**प्रधानः** - जलं कुतः समाहरति?

**अधिकारी** - इदं स्पष्टतया विदितं नास्ति। किन्तु लोकाः कथयन्ति यदियं प्रत्यहं यमुनास्नानाय गच्छति। तत एव समागत्य नित्यमस्मिन् स्थाने सलिलेन अर्घ्यं प्रयच्छति।

**प्रधानः** - तदिदं जलं भगवतः सलिलगृहो किमिति न प्रयच्छति?

**अधिकारी** - कलङ्किन्या आनीतेन जलेन किं देवसेवा भवितुमर्हति? एकवत्सरात् पूर्वम् अस्मिन्नेव दिवसे जगन्मोहनस्थलं प्रक्षालयितुं सा सलिलं समाहरत्। तदेव प्रक्षालयितुं नास्यै आज्ञा प्रादीयत। तर्हि तस्या जलं तु सेवायां कथमुपयुज्यते?

**प्रधानः** - महापुरुषस्य भवतो विचारेण नोपयुज्येत। अहमुपयोगे नेष्यामि। (अग्रे गत्वा स्वगतम्) इयं वराकी नीचैः कृतमस्तका निश्चलभावेन सोपानस्य समीपे एव स्थिता। (मञ्जुलां प्रतिप्रकाशम्) वत्से! त्वं जलकलशमिमं भगवतो जलगृहे समाहर।

**मञ्जुला** - (आश्चर्येण हीनतया च) आम्..... किम्....... किम्?

**प्रधानः** - जलमिदं जलगृहे समानय? (आशीर्वादमुद्रां नाट्यन्) वत्से! त्वम् अद्यावधि यया भक्त्या भगवतो दर्शनं कृतवती सा भक्तिस्ते सर्वदा अक्षया भूयादिति तुभ्यम् आशीर्वादं ददामि। भक्तिप्लुतेन हृदयेन कामं कस्मिन्नपि स्थाने भगवन्तं लक्ष्यीकृत्य प्रदीयताम् अर्घ्यम्। भक्तवत्सलो भगवान् प्रेम्णा तत् स्वीकरोति। सर्वान्तर्यामी भगवान् अग्रतः पृष्ठतो वाऽपि न किञ्चित् प्रतीक्षते। ब्राह्मणो वा शूद्रो वा गङ्गाजले वा सामान्यसलिलं वा नैतयोर्भेददृष्टिं भावयति भगवान्। स हि अभिलषति हृदयम्। समर्पय तस्मै त्वम् आत्मनो हृदयं निजपापानां कृते रुदिहि निरन्तरम्। अपमृज्येरन् तव सर्वाण्यपि पातकानि।

**मञ्जुला** - रोदिष्यामि भगवन्! निरन्तरं रोदिष्यामि स्वपापानां कृते।

**युवकः** - मञ्जुले! मञ्जुले!

**मञ्जुला** - कोऽयमस्ति ?

**युवकः** - अहमस्मि। अहमस्मि। कथं त्वमेवं रुदितवदना। लक्षणैः प्रतीयते यत् पुनस्त्वमद्य निभृतमरोदीः। मुधा रोदित्वा रोदित्वा किमिति देहं क्षपयसि मञ्जुले।

**मञ्जुला** - किं सुखं देहेनाऽनेन ?

**युवकः** - सुखम् यावत् कालं लोकेऽस्मिन् स्थितिः स्यात् तावत् सुखमेव।

**मञ्जुला** - तावन्ति दिनानि दुःखमेव। पापानां स्मरणन्निरन्तरं यन्त्रणैव।

**युवकः** - किं कथयसि मञ्जुले ! गृहं विमुच्य मया सह त्वमिहागता एतस्यैव किमेतावद् दुःखम् ? अननैव निरन्तरं रोदिषि ? पूर्वं तु नासीत् सेयं परिस्थितिः। वर्षादारभ्य तदिदं परिवर्तनम् अवलोकयामि त्वयि। मञ्जुले ! अधर्मं सत्यम्। केनोपायेन त्वं पुनस्तादृशी स्याः।

**मञ्जुला** - पुनरहं तादृशी, भवेयमिति न केवलं कठिनमेव अपितु नितरामसम्भवम्। अहं यत् किञ्चित् परित्यज्य गृहादागता न तन्मे कश्चित् प्रतिदातुं शक्नोति।

**युवकः** - गच्छतु सर्वमिदम्। मम तावदिदमेव बोधय। किमिति एतावत् त्वं रोदिषि ?

**मञ्जुला** - अहं किमिति रोदिमि इति पृच्छसि ? हृदयं विदार्य दर्शनेन विना नेदं शब्दैः बोधयितुं शक्यम्।

**युवकः** - मञ्जुले ! अहमेव ते सर्वदुःखानां मूलम्। वत्सलौ माता-पितरौ राज्ञामिव विपुलं धनं वैभवं सर्वमादायसुखेन त्वं वर्तमाना आसीः। न जानेऽहं कस्मिन् कुमुहूर्त्ते तव रूपे गुणेषु च मुग्धो भूत्वा ते कामनामकार्षम्। यद्यहं प्रणयमेव केवलं कृत्वा निभृतं तिष्ठेयं तर्हि ते हृदये न सोऽयमग्निः प्रज्वलेत्। किन्तु मया मे प्रणयः प्रकटितोऽपि त्वां प्रति। ततस्त्वया तत्प्रतिदानमपि मह्यं कृतम्। इदानीं कथय मे सत्यं मञ्जुले ! कथय सत्यम्। केनोपायेन् ते सुखं स्यात् ?

**मञ्जुला** - किं त्वं तत्कर्तुं शक्नुयाः ?

**युवकः** - अवश्यं शक्नुयाम्। प्राणप्रतिदानेऽपि यदि ते मुहुर्त्तं सुखं स्यात् तर्हि तदर्थमहं सन्नद्धः।

**मञ्जुला** - तर्हि मां विमुच्य प्रतिनिवर्तस्व निजगेहम्।

**युवकः** - प्रतिनिवृत्ते सम्प्रति गृहे मम कोऽस्ति मञ्जुले ?

**मञ्जुला** - गृहे तव स्त्री-पुत्र-धन-जनं सर्वं त्वेवास्ति।

**युवकः** - सर्वमस्ति। किन्तु मञ्जुला नास्ति।

**मञ्जुला** - मञ्जुला पातकम्, स्त्री पुण्यम्। एतावन्ति दिनानि पापमसेविष्ठाः, सम्प्रति परिशीलय पुण्यस्य परिचयम्।

**युवकः** - मञ्जुलायास्तुलनायां स्त्री परिगण्यते ?

**मञ्जुला** - पत्न्याः पादतले कोटिशो मञ्जुलाः परिलोठन्ति। एकवारं परावृत्य परीक्षस्व तत्।

**युवकः** - मञ्जुले ! यस्मिन् मार्गे त्वं गन्तुमभिलषसि मामपि तत्सहगामिनं विधेहि।

पटुतरं त्वां विहाय नाऽहं शक्नुयां कुत्राऽपि स्थातुम्।

**मञ्जुला** - यस्य सुखस्याऽशया मे संसर्गं वाञ्छसि न तत्सुखं सम्प्रति शक्नुयाः प्राप्तुम्। तव सुखं पत्न्याः संसर्गे। मम सुखं स्वर्गतस्य स्वामिनश्चरणतले। मार्गौ नितान्तं भिन्नौ। अतएव मां विहाय परावर्तस्व गृहान्। नो चेत्......।

**युवकः** - नो चेत् किं करिष्यसि मञ्जुले?

**मञ्जुला** - नो चेद् अहमेव गृहमिदं विमुच्य गच्छेयम्।

**युवकः** - हन्त! मञ्जुले! एतावतः प्रणयस्य इदं पर्यवसानम्।

**मञ्जुला** - इदानीं मत्सम्मुखे नास्ति भवत्प्रणयस्य मूल्यम्।

**युवकः** - मञ्जुले! मञ्जुले! एतावत् कालानन्तरं तव मम विच्छेद। एवं भवेत्? किमिदं समञ्जसम्?...... मञ्जुले! मञ्जुले! कुतो गच्छसि? शृणु तावत्। मञ्जुले.... ?

(मञ्जुला नाग्रे किञ्चिदशृणोत्। न च तस्मिन् स्थाने स्थातुमशकत्। अव्रजत् सा द्वितीयस्यां दिशि मार्गस्य वातावरणम् )

**मञ्जुला** - स्वामिन्! समर्पितं मया तुभ्यं जीवनम्। किमिदानीं में गतिं वाञ्छसि? मन्दिरे तवैव दर्शनं कर्तुं विकलेन हृदयेन प्रयामि। पादौ जर्जरौ संवृत्तौ। त्वं मह्यं शक्तिं दास्यसि। त्वमेव च मह्यं मार्गं बोधयिष्यसि। त्वां विहाय न कञ्चन पश्यामि प्रभो!

(वृषकटस्य ध्वनिः)

**प्रथमश्चालकः**- अरे जगत्! का सेयं दुर्बलशरीरा। स्खलद्भ्यां पादाभ्यां प्रयाति अस्मिन् चित्रकूटमार्गे?

**द्वितीयश्चालकः**-न जाने का सेयमस्ति? अरे त्वं कुत्र प्रयासि?

**मञ्जुला** - भ्रातः! जगन्नाथपुरी स्थानाद् अस्मात् कियद् दूरे?

**प्रथमश्चालकः**- जगन्नाथपुरी? शतं कोशान् दूरे। अत्र त्वं जगन्नाथपुरीं पृच्छसि? तत्र किमेवमेव पादाभ्यां गन्तुमिच्छसि?

**मञ्जुला** - आम्।

**द्वितीयश्चालकः**-त्वं कुतः समागच्छसि?

**मञ्जुला** - एकं मासं यावत् निरन्तरं चलामि। अधुना तु चरणयोः शक्तिरपि विलुप्ता।

**प्रथमश्चालकः** -तर्हि भगिनि! त्वमेवं कुरु। दीनां त्वां विलोकयामि। जगन्नाथपुर्या मार्गः पूर्वस्यां दिशि। वयं तु पश्चिमस्यां गच्छामः। अधुना अग्रे भीषणमरण्यम् अस्ति। हिंस्रजन्तवोऽत्र रात्रौ विचरन्ति। सायंकालश्चायं सञ्जातः। अत्रैव त्वं विश्रामं कुरु। श्वः प्रातः काले तस्मिन् मार्गे पूर्वदिशामवलम्ब्य पुनः प्रयाहि।

**मञ्जुला** - नैव भ्रातः। जीवितमिदं मदीयं नास्ति। साम्प्रतं कस्य कृते जन्तुभ्यो विभेमि। .....अधुना चरणौ न प्रसरतः। अग्रे सम्मुखे स्थितस्य अस्य वटवृक्षस्य अधस्तादेव निपतामि। आः.....(करुणो ध्वनिः)भगवन् का मे साम्प्रतं गतिः। जानेऽहं जगदीशस्य दर्शनं न मे भाग्ये। यः सकृदपि तत्रोपगच्छति क्षीयन्ते तस्याऽशेषपातकानि। हे भगवन्! किं मे भवितव्यं

भाग्ये ? पापभारमिमं वोढुं न मे साम्प्रतं शक्तिः। शीर्यते शरीरम्। निद्रेव सामयाति। ..... किं भवानेव श्रीहरिः ?

**जगदीशः** - आम्। मार्गखेदात् प्रसुप्तायास्तव दीनां दशां विलोक्य तव चेतसि उद्बुद्धोऽस्मि।

**मञ्जुला** - किं भवान् मह्यं दर्शनं दातुमुपगतः।

**जगदीशः** - नैव।

**मञ्जुला** - अहं भवतो दर्शनाय जगदीशपुरीं प्रयामि।

**जगदीशः** - अहं केवलं जगदीशपुर्यामेव न निवसामि मनुष्याणां हृदयेऽपि मम निवासोऽस्ति। यो माम् आह्वयति यश्च मां द्रष्टुं जानाति स एव मे दर्शनं लभते।

**मञ्जुला** - भगवन्! अहम् आह्वानं न जानामि। दयां विधाय शिक्षय माम् आह्वानम्। ... भगवन्! शिक्षय माम् आह्वानं भवतः। भगवन्! बोधय मामेकवारम्। केनोपायेन लभ्येत भवान्। हे दयामय! बोधय मामेकवारम्। केनोपायेन त्वामासादयेयम् (चीत्कारः)
हन्त! कीदृशोऽयं स्वप्नो मया विलोकितः। अद्य महत् सौभाग्यं यद् भगवान् जगदीशः स्वप्ने प्रथमबारं दृष्टः।

(भगवन्तं स्मरन्ती तत्रैव स्वपिति)

**मञ्जुला** - कथं प्रातः कालः सञ्जातः। किन्तु अग्रे किमिदं पश्यामि ?? मम सम्मुखे इयं पर्णकुटी कीदृशी। इमे आम्रवृक्षाः परितो विलोक्यन्ते। हे प्रभो! मम चित्तम् अतीव व्याकुलम्। अग्रे मम का दशा भाविनी। किं करोमि। क्व गच्छामि।

**नेपथ्ये** - (पदध्वनिः, ॐ नमो भगवते वासुदेवाय इति स्वरश्च)

**मञ्जुला** - अहो कीदृशी प्रशान्ता मूर्त्तिः। दर्शनेनैव मे चित्तस्य विह्वलता विनष्टा। धैर्यमुत्पन्नम्। अहो महात्मनाम् अद्भुतः प्रभावः। अस्मिन् कुटीरे मम चेतसि विलक्षणशान्तिरिव उत्पन्ना। भगवन्! संसारे विह्वलं भ्रमन्ती सेयमशरणा चरणारविन्दे प्रणामं निवेदयति। भगवन्! का मे अग्रे दशा भाविनी ? श्रीजगदीशस्य दर्शनाय निर्गतायाः साम्प्रतं किं मार्ग एव मे शरीरपातो भवेत् ? भगवतो मदनमोहनस्य अन्तिमं दर्शनमपि मे मन्दभाग्याया न स्यात् ?

**सत्यबोधः** - वत्से! मा विह्वलतां याहि। न त्वं मन्दभाग्या। सम्प्रति जाता त्वयि परमेश्वरस्य पूर्णा दया। नहि मन्दभाग्यस्य हृदये प्रभवति भगवतो भक्तिः। यो मार्गस्त्वयावलम्बितः स ह्यचिरादेव त्वां शान्तिमुपनयेत्।

**मञ्जुला** - अबोधाया मम पूर्वजीवने यत्पापं संवृत्तं तत्किं निवर्तेत ?

**सत्यबोधः** - पापस्य पुण्यस्य वा उद्भूतिः मनसि भवति। यदि हृदये तदर्थं सत्योऽनतापो जायेत तर्हि पापस्य अपमार्जनं भवति। पश्चात्तापेन रुदतो हृदयात् अश्रुभिः सह निर्गलन्ति पातकानि।

**मञ्जुला** - मन्दभाग्याऽहम् अविरतं रुदितवती अस्मि। नानाविधैस्तापैस्तप्तस्य हृदयस्य रोदनाद् अन्यत् किं वा शरणम् ?

**सत्यबोधः** - अनुतप्तं हि हृदयं परिमुच्यते पातकात्। तप्तं सुवर्णं मलमुज्झित्वा सर्वथा विशुद्धं भवतीति को न जानाति?

**मञ्जुला** - परं भगवन्! श्रीजगदीशस्य दर्शनं विनैव किं मे प्राणातिपातो भवेत्?

**सत्यबोधः** - वत्से! जगदीशो न ते दूरे तिष्ठति। यो हि सम्पूर्णस्य जगतः स्वामी स किं जगति व्याप्तो नास्ति? जगदीशस्य निवासो भक्तानां हृदये विद्यते न केवलं मन्दिरे। स्वयं तेनैव प्रोक्तम्–

**नाऽहं वसामि वैकुण्ठे योगिनां हृदये न च।**
**मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद।।**

**मञ्जुला** - तर्हि किं करोमि प्रभो! मम चित्तेऽत्यन्तं व्याकुलता यस्य दर्शनाय निर्गता तस्य दर्शनमपि नोपलब्धम् इति।

**सत्यबोधः** - वत्से यस्य देवस्य दर्शनं त्वमद्यावधि पूर्णेनानुरागेण कृतवत्यसि स किं जगदीशात् पृथक्? सम्प्रति हृदये ते जगदीशो विराजते।

**मञ्जुला** - अहो! स्वयं जगदीशेनाऽपि स्वप्ने एतदेव अज्ञापितम्। हे दयालो! मे मदनमोहन! त्वद्दर्शनेनैव मया शान्तिरुपलब्धा। अहम् अतीव मन्दभाग्याऽस्मि यद् भवच्चरणौ विहाय इतस्ततो भ्रमामि। प्रभो! आशीर्वादो मे दीयतां येन श्रीमदनमोहनचरणे एव उपरमो मे भवेत्।

(योगिनः सत्यबोधस्योपदेशात् मञ्जुलाया भ्रमो दूरीभवति। सा मथुरायामागत्य भगवद्दर्शनं करोति।)

**मञ्जुला** - **भगवन्! दया दृगे वा मयि दीयतां दयालो!**
**अधुनाऽवहेलना मे न विधीयतां दयालो!**
**सुकृतीति को न पापात् पुरुषं सुरोऽमरोऽपि।**
**भृशमद्य पापिनीयं परिचीयतां दयालो।।**
**कति तारिता भवेयुर्भवताऽपराधिनोऽलम्।**
**अपि दीनदुष्कृतेयं न विहीयतां दयालो।।**
**विषयाटवीषु बाढं भ्रमिताऽति दुःखिताऽहम्।**
**अयि नाथ! वेदना मे व्यपनीयतां दयालो।।**
**भुवने भृशं भ्रमन्त्या अपि नाथ वीक्षितोऽसि।**
**अधुना तु मे समीपान्न निलीयतां दयालो।।**
**करितो न पीनकाया गिरितो गुरुर्न चाहम्।**
**दुरितोपरोधतो मे न विलीयतां दयालो।।**

(पुनः स्वगतम्)

हा हन्त! किं मयानुष्ठितम्। अनर्थो विहितः। अबोधस्य मनसो वशीभूताऽहं मुधैव जगन्नाथपुरीमभ्यधावम्। भोः! मम मदनमोहन! क्षमस्व बोधविकलमिमां ते पुत्रीम्। भवतश्चरणौ एव मत्कृते जगदीशपुरी। भगवतश्चरणावेव मे सर्वाणि पुण्यतीर्थानि। भगवतश्चरणयोः

प्रक्षालनजलं विसृज्यन्त्या एव मया निजपातकान्तं कृते रोदनं शिक्षितम्। पाषाणं निहाय सुवर्णं परिचितम्। त्वमेव मे वैकुण्ठपतिः श्रीहरिः। हे मम दयामयदेव! क्षमस्व मामकीनमपराधम्।

(कोलाहलः)

**विमला** - कमले! कथं मन्दायसे। घट्टे तु शीघ्रं चल।

**कमला** - चलामि चलामि। अरे इयं का गच्छति?

**मञ्जुला** - भगिनि सूचय मामपि। सर्वा यूयं कुत्र गच्छथ?

**विमला** - अपेहि रे मन्दभाग्ये। किं न जानासि यदद्य यमद्वितीया।

(जले स्नानरवः)

**मञ्जुला** - अद्य पुनस्तदेव यमद्वितीयादिनम्। अस्मिन्नेव दिने मया व्रतमङ्गीकृतमासीत्। अस्मिन्नेव दिने व्रतस्य उद्यापनमपि करिष्यामि। हे! मातर्यमुने! मम पापान्यपाकुरु। अस्माद् देहाद् मां विमोचय दीनोद्धारिणि मातः मातः ....(जलस्य ध्वनिः, मन्दिराद् विविधवाद्यानां ध्वनिरायाति। ''जय दयालो दर्शनं देहि'' इति ध्वनिरवोऽनुगुञ्जति।)

**प्रधानः** -अये वत्से मञ्जुले! अये त्वं बहुकालानन्तरं समागताऽसि। प्रणम पुत्रि! भगवन्तं मदनमोहनम्।

**मञ्जुला** -कं प्रणमामि? अपि भगवन्तम्? तस्य चरणयोरहं प्रत्यहं कोटि-कोटि-प्रणामान् अकुरवम्। तस्य चरणयोरहं प्रत्यहं लोठामि। एषाऽहं तस्यैव चरणयोर्मस्तकं निधाय निपतिताऽस्मि। इदानीं कुत्र मस्तकं निधाय कस्मै प्रणामं करवाणि?

**प्रधानः** - अये वत्से! चरणामृतं गृहीष्यसि वा?

**मञ्जुला** - चरणामृतम्? चरणामृतं कुत्र दास्यसि? मुखे स्थानं नास्ति। समस्तदेहस्योपरि भगवतो मदनमोहनस्यैव अधिकारः। क्व दास्यसि चरणामृतम्?

**प्रधानः** - वत्से मञ्जुले! धन्यासि। पराकाष्ठां भक्तेरुपगताऽसि। किं भगवतः प्रसादीभूतं पुष्पं गृहीष्यसि?

**मञ्जुला** - पुष्पम्? देहि तस्य चरणयोः।

**प्रधानः** - मञ्जुले! मञ्जुले! किं भाषसे? त्वं खलु मानवसीमानमतीताऽसि। धन्यासि वत्से। अरे, अरे! त्वं तु निर्निमेषं भगवन्तं पश्यन्ती...... अरे भूमौ निपतसि? (उच्चैः) वत्से! मञ्जुले।

(आश्चर्यमयसङ्गीतध्वनिः, मन्दिरात् मन्दं मन्दं वाद्ययन्त्राणां ध्वनिः प्रसरति। तत्सन्निविष्टाश्चेमे श्लोकाः श्रूयन्ते-)

**अपि चेत् सुदुराचारो न भजते मामनन्यभाक्।**
**साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः।।**
**क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं नियच्छति।**
**कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति।।**

***

# मुक्तककाव्यानि


१. नीरद-नीराजनम्

२. सती-सप्तदशी

३. कपिलार्याष्टकम्

४. वियोगिनो विप्रलापाः

५. मनोलहरी

## नीरद-नीराजनम्

(अकालजलदायोपालम्भः, काले चाऽऽमन्त्रणम्)

### ( १ )

**ज्येष्ठ-जलदः**

चण्डांशुः प्रखरैः करैरतितरामुत्तापमुत्पाद-
यत्येषोऽप्यद्य समीरणस्तनुलतासन्तापनः केवलम्।
इत्थं व्याकुलिताऽपि हन्त! जनता हे ज्येष्ठधाराधर!
त्वामालोकयते विषादविधुरं तत्ते विरामो वरम्।।
बिन्दून् सन्त्यज, दूरतः परिहर प्रेमाणमम्भःस्रुतौ
मा मा शीलय सीकरान्, कुरु परागेतं तवाऽऽडम्बरम्।
हे ज्येष्ठोद्गत वारिवाहक सखे! खे खेलदेतद्वपुः
क्षिप्रं गोपय रोपयाऽन्यसमये संरम्भमेतादृशम्।।

## नीरद-निमन्त्रणम्

श्यामाम्भोजप्रतिभटघटाच्छन्नदिङ्मण्डलस्य
प्रौढोत्तानस्तनितजनित-व्योमकोलाहलस्य।
धारासारप्रशमितधराधामसन्तापराशे-
र्हंहो! धाराधर! सुहृदिदं स्वागतं स्वागतं ते।।

### ( २ )

ग्रीष्मे चण्डमरीचितिग्मकिरणैः सन्तापिता मेदिनी
शीर्णान्तःप्रसवा तवागमविधावासीत्प्रतीक्षावती।
सेयं त्वामधुना निरन्तरपयःपूरैः प्रतिष्ठाजुषं
सम्प्राप्य प्रतिभाति चारुहरितैः सस्यैः समाच्छादिता।।

### ( ३ )

भीष्मग्रीष्मोत्तापसन्तापितानां
स्यात्सन्तोषो भूयसा वर्षणेन।
इत्थं मत्वा घोरमारब्धमासी-
द्धारावर्षं वर्षताऽङ्ग त्वयापि।।

(४)

निरन्तरपयःस्नुतिप्रसृमरैरलं निर्झरैः
प्रतिध्वनितकन्दराः शुशुभिरे परे भूधराः।
स्थलस्थलविनिःसरत्सलिलपूरतृप्यन्नरा
बभुर्जयपुरीयभूपरिसरा[१] अपि प्रत्यहम्।।

(५)

घोरैर्गर्जनतर्जनैरतितरां सांराविणं[२] व्यञ्जयन्
दंष्ट्राकोटिविशङ्कटाभिरधिकं विद्युद्भिरुद्भीषयन्।
यस्यां त्वं कलयाञ्चकर्थ सहसा शार्दूलविक्रीडितं
रात्रिं तामधुनापि विस्मरति न प्रायोन्तरात्मा मम।।

(६)

ततः प्रातर्मुक्ताफलविपुलबिन्दूत्करभरै-
रवर्षीस्त्वं घोरं सकलदिवसं व्याप्य परितः।
तवाम्भःसंरम्भैः परिमथितसंस्थानविधुरा
जलानामाबन्धा[३] विघटनविशङ्कामजनयन्।।

(७)

अविरलजलासारोत्सिक्तं सुजीर्णमिदं छदिः
प्रचलति महाझञ्झावाते न जातु पतेदिति।
प्रतिपलभवद्वर्षोद्रेकाकुलैः कृपणैर्जनै-
र्नवजलधरश्यामं व्योम प्रतिक्षणमीक्षितम्।।

(८)

तदियमचिरनिर्यत्सस्यसम्भारभूष्णु-
र्विसृमरनववीरुज्जालकैर्मालिनी[४] भूः।
कलयति किल काञ्चिच्चारुसम्मोदचर्या-
मयि जलद! वदन्ती 'स्वागतं स्वागतं ते'।।

***

---

१. गलताप्रभृतयः।
२. सम्भूयरवः (हाका)।
३. 'बन्धा' इति ख्याताः।
४. छन्दोपि मालिनी।

## सती-सप्तदशी

पतिरतिमादधतीनां दधतीनां पावके वपुः स्वीयम्।
भारतकुलयुवतीनामार्यसतीनामहो महिमा।।१।।
जन्मावधि पतिसेवामादधतीनां [१]प्रियानुगमतीनाम्।
प्रेमैकप्रकृतीनामार्यसतीनामहो महिमा।।२।।
[२]धर्माऽवनक्षितीनां दयितसकलसौख्यरक्षणकृत्तीनाम्।
[३]श्वःश्रेयसवसतीनामार्यसतीनामहो महिमा।।३।।
प्रणयेन [४]स्वपतीनां स्वपतीनां फुल्लपुष्पशयनेषु।
ज्वलनेन जाग्रतीनामार्यसतीनामहो महिमा।।४।।
अक्षयकोषवतीनां [५]दुर्ग्रहगृहराष्ट्रशासनवतीनाम्।
धृतिदुर्गबलवतीनामार्यसतीनामहो महिमा।।५।।
[६]दयिततरुव्रततीनां सम्पत्सौभाग्यसौरभवतीनाम्।
विश्रम्भवसुमतीनामार्यसतीनामहो महिमा।।६।।
[७]सुरभितसरस्वतीनां यशस्वतीनामनन्तकालाय।
सौभाग्यभास्वतीनामार्यसतीनामहो महिमा।।७।।
[८]स्त्रीस्वातन्त्र्यमतीनां विमतीनामन्यजातिसुदतीनाम्।
शिक्षणमादधतीनामार्यसतीनामहो महिमा।।८।।
सकलैः कृताऽऽनतीनां पूरितजनतामनोरथततीनाम्।
देवाभ्यधिककृतीनामार्यसतीनामहो महिमा।।९।।

---

१. प्रियानुगता मतिर्यासाम्।

२. धर्मरक्षाया भूमिरूपाणाम्।

३. कल्याण।

४. स्व-भर्तर्णिां प्रणयेन कुसुमशयनेषु स्वपतीनाम् (शयानानाम्), ततो ज्वलनेन (अग्निना) जाग्रतीनां जागृतशक्तीनाम्। तथा प्रेम्णा शेरते यथा सुखनिद्रातश्चिताग्निरेवैता जागरयति, जागरूकज्योतिषो विदधातीत्याशयः।

५. दुर्ग्रहं दुःखेन वशीकार्यं यद् गृहरूपं राष्ट्रं तत्र शासनवतीनाम्। कोषशासनदुर्गादिभिर्माहात्म्यं तासां स्पष्टमित्यर्थः।

६. दयितरूपा ये द्रुमास्तेषामाश्रिता लता इमा इत्यर्थः।

७. वर्णनेन पवित्रीकृता सरस्वती याभिस्तासामित्यर्थः।

८. विमतीनां प्रतिकूलमतानां स्त्रीस्वातन्त्र्यवादिनीनामन्यजातेः सुन्दरीणां शिक्षां कुर्वतीनाम्। शिक्षिताभासाः अन्यजातिस्त्रियः सभासु वक्तृतां कुर्वन्ति- 'अबलाभिः स्वातन्त्र्यद्वारा बलं सम्पादनीयम्' किन्तु दीपशलाकास्पर्शेऽपि चीत्कुर्वतीनां तासामस्ति किमेवंविधमात्मबलं त्यागबलं वा, इति कार्यद्वारा तासां कृते शिक्षां कुर्वतीनामित्याशयः।

९.शयानानाम्।

प्रेयांसं विशतीनां सं[१]विशतीनां महार्हशय्यासु।
दहनेऽपि च विशतीनामार्यसतीनामहो महिमा।।१०।।
पत्यैकधनवतीनां पत्या सह धर्मसाधनवतीनाम्।
पत्या निधनवतीनामार्यसतीनामहो महिमा।।११।।
प्रियरतिमाददतीनां ददतीनां [१]तनु-मनोऽपि दयिताय।
औदार्यान्महतीनामार्यसतीनामहो महिमा।।१२।।
[२]सौभाग्यस्व-पतीनां स्वपतीनां तोषणाऽऽहितरतीनाम्।
ज्वलनेऽपि स्वपतीनामार्यसतीनामहो महिमा।।१३।।
पतिसेवैकमतीनामद्भुतलोकातिशायकधृतीनाम्।
मृत्योर्न बिभ्यतीनामार्यसतीनामहो महिमा।।१४।।
आत्मानं सृजतीनां[३] संसृजतीनां सुखाय दयितस्य।
अनले तु विसृजतीनामार्यसतीनामहो महिमा।।१५।।
पतिचरणेऽभिरतीनां मरणेऽप्यासादिताऽमरगतीनाम्।
विस्मापितजगतीनामार्यसतीनामहो महिमा।।१६।।
आक्रान्तवाग्गतीनां वर्णनविश्रान्तकविकुलमतीनाम्।
विभ्रान्तवाक्पतीनामार्यसतीनामहो महिमा।।१७।।

***

---

१. तनुयुक्तं मनः। मध्यमपदलोपः।

२. सौभाग्यरूपं यत् स्वं धनं तस्य पतीनां स्वामिभूतानाम्। स्वदयितानां तोषणे निहितप्रीतीनाम्। अग्नावपि स्वपतीनां शयानानाम्। 'स्वपतीनाम्' इति त्रिर्नानार्थम्।

३. दयितसुखार्थमेव जन्म लब्धवतीनां, तथा दयितसुखार्थमेव तेन सह संसृज्यमानानां पुनः अग्नौ तमात्मानं विसृजतीनाम्।

## कपिलार्याष्टकम्

घनगिरिविपिनविहारिणि हारिणि दीनार्तलोकशोकरुजाम्।
जाग्रज्ज्योतिर्जटिले भगवति[१] कपिले! नमस्तुभ्यम्।।१।।

सिन्दूरकल्ककपिलामपि लावण्यं पुरः प्रवर्षन्तीम्।
अभिवाद्य भवतप्रतिमामतिमात्रं मोदमाविन्दे।।२।।

करुणाकारिणि कपिले ह्यपि लेखितमद्भुतं भवच्चरितम्।
मधुरतमां तवमूर्तिं वाञ्छितपूर्तिं च साकमाकलये।।३।।

क्रूरान् किल शकलयितुं कामं कलयसि करालकरवालम्।
निर्मासि तदपि मातः करुणातः शान्तिमत् स्वान्तम्।।४।।

शरणार्थिनो मनोरथमनाप्य भुवनोदरे विषीदन्ति।
इति वीक्ष्य करुणमनसा जनसाफल्यं त्वया क्रियते।।५।।

[२]चित्रं त्वज्जागरणे जागरणे भूरिभाग्यभूतीनाम्।
[३]निर्ऋतिरियं सदार्थं शेते, ह्येते वयं विद्मः।।६।।

मातर्भगवति कपिले! ह्यपि लेखं जातु कृतवती भवती।
अद्यावधि कति दीना विपन्निलीनास्त्वया त्राताः।।७।।

जननि! चतुर्दिक् चञ्चति चेतश्चलचञ्चरीकोऽयम्।
अयि कञ्जमञ्जुचरणे! चरणे परिचारयस्वैनम्।।८।।

***

---

१. कइला (कपिला) नाम्नी आर्या (भगवती) करौली राज्ये विराजते।

२. सेवकशरीरमाविश्य परिचयप्रदानं जागरणाख्यम्। तस्मिन् जनाः स्वमनोरथपूर्तिं लभन्ते इत्याशयः।

३. अलक्ष्मीः

## वियोगिनो विप्रलापाः

प्रमदं कुरुते न मन्दवायुर्न च चेतः कुसुमानि मोदयन्ति।
जगतां सुखकारि वस्तुजालं मम नाऽलं प्रमदाय विप्रयोगे।।१।।
सविता भविता नु चन्द्रमा मे रजनी मे दिवसायिता भवित्री।
सकलेषु यथापुरं चरन्ती प्रकृतिर्यास्यति वामतां ममैव।।२।।
अयि मन्दमरुत्! सखे सखेदं जनमेनं बत मुञ्च याचमानम्।
भवतः प्रभवन्ति वीजितानामथ ये नाम जयन्ति पार्श्वकान्ताः।।३।।
हरिचन्दनपङ्कसान्द्रचर्चा न ममार्चाय बतान्तरस्य सैषा।
विसरद्घनसारजन्यया वा किमु लालाटिकयापि मे फलं स्यात्।।४।।
सहकारमकारणं त्यजन्ती विकसन्ती भवती भवेत् किमग्रे?
विटपान्तरचारिकोकिलोऽयं व्रततिं वक्ति समाहितं हितैषी।।५।।
न मनोऽथ विनोदयत्ययं मे सुमनोहार उरोनिवेशितोऽपि।
दयितारहितस्य हन्त मन्ये न च नासीरमधीरतौषधाय।।६।।
मलयाचलवायुनर्तितानां नमितानां कुसुमोच्छ्रयेण भूयः।
इयमालिरनिन्दिता लतानां मनसो न प्रमदाय जायते मे।।७।।
नवमञ्जुलमञ्जरीपरीतः कुसुमामोदविनोदितान्तरङ्गः।
द्युतिशालि रसालपादपोऽयं न मनोयन्त्रनियन्त्रणाय नूनम्।।८।।
मयि सौरभभारनिर्भरेऽलं भवती चेद् भजते पराङ्मुखत्वम्।
गुणगौरवसङ्कथा वृथा स्यादिति चूतेन लता विनीयतेऽसौ।।९।।
नितरां वहसेऽथ मञ्जुकञ्जान्यलिपुञ्जाय ददास्यरं मरन्दम्।
इति सारिकरः स्तवीति भूयो नलिनीं चाटुपटुर्दिवाकरोऽपि।।१०।।
अयमस्ति रसालसाधुशाखी मिलिताऽसौ स्तबकानता लताऽस्मिन्।
इतिवादि विहङ्गवृन्दमेतद् बत मां स्मारयते निजामवस्थाम्।।११।।
अधुना मधुना न सङ्गमोऽस्या न च पूर्वाऽस्ति मनाग् विकासलक्ष्मीः।
ध्वनयन्निदमप्यलिर्नलिन्या न हि जाने किमु नोज्झति प्रदेशम्।।१२।।
समये सुदुरत्ययेऽपि भीतिर्न यदीये हृदये पदं दधार।
अधुना विमनायते वनान्ते स जनः कोकिलकाकलीकलापैः।।१३।।
जनशून्यमुपेत्य सम्प्रदेशं सविशेषं विकलत्वमेति चेतः।
अपभित्ति लिखत्यतीतचित्राण्यथ वित्रासयते हितैषिवर्गम्।।१४।।
घनचन्दनकर्दमाभिषिक्ते न विविक्तेऽपि मनः प्रमोदमेति।
वपुषि प्रतिषज्जितामिदानीं न हिमानीमपि मानये सुखाय।।१५।।
हृदि तापमवेक्षते वसन्तं न वसन्तं विरही विहीनचेताः।
बत सत्यमुदीरितं बुधानां सुखितानां सुखमेव सर्वतोऽपि।।१६।।

***

# मनोलहरी[1] १

**१.**

स्वभावादुन्मीलल्ललितपदभङ्गैः सुकविता-
तरङ्गैराघूर्णन् कवयति कविः किञ्चिदतुलम्।
तथैवायं मादृक् कतिपयपदैर्हास्यसुखदै-
र्यदेतत् कुग्रन्थेदियमपि लहर्येव मनसः।।

**२.**

यदीयैः प्रेङ्खोलैर्विषमितविलोलैर्विलुलितं[2]
महापोतप्रख्यं जगदपि विपर्यासमयते।
महोत्साहोत्ताला महिमनि विशाला मतिमतां
मनो-मोदाम्भोधेर्जयति जयिनी कापि लहरी।।

**३.**

नवीनो नाऽप्यर्थो न च वचसि काचिद्रुचिरता
स्फुरत्प्रासस्कन्धा[3] न च रुचिरबन्धा शिखरिणी।
तथाप्यन्यान्येषामिह लहरिनाम्नोऽनुकरणा-
न्निबद्धेयं सद्यो मदयतु मदुद्योगलहरी।।

**४.**

जटाजूटक्रीडत्-त्रिदशतटिनीवीचिनिचया-
दुदञ्चन्नेणाङ्कः प्रकटयति यस्याऽऽभरणताम्।
नमस्कुर्वद्वृन्दारकनिकटकिर्मीरितपदो
दयायां हेवाकी[4] मदुपरि पिनाकी स भवतात्।।

---

१. संस्कृत-रत्नाकरः वर्ष ३, सञ्चिका-१ यां प्रकाशिता।

२. कम्पनैः। यस्या लहर्याः प्रबलाघातैर्विलुलितं पोतवत् जगद्विपरिवर्तते, सा मनोमोदस्य लहरी जयतीति पिण्डितार्थः।

३. अनुप्रासः।

४. हेवाको लालसा, 'प्रियप्रणयहेवाकि यतो मानवतीमनः' (कथासरित्सागरे)।

५.

न लेशः पुण्यानामपि न मम गुण्यानि चरिता–
न्यहङ्कारः कामं जयति मदलङ्कारकतया।
तथापि त्वद्दीनोद्धरणसरणावस्म्युपगतो
दयाम्भोधे शम्भो! वद सपदि किं भो मृगयसे।।

६.

पुरा दिव्यैर्गेयैर्भृशमपरिमेयैरपचिता
ततस्त्वार्षैः सूक्तैः परतरपटूक्तैः[१] परिणुता।
ततो नानागुम्फैः सुकविभिरभीड्या समुदभू–
दसौ सा वाग्देवी विमलयतु मे वीक्षणपथम्।।

७.

समुद्यत्सूक्तीनामहह सुकवीनामनुगमा–
दुदीतां नः काचिद्वचनरचनासिद्धसरणिः।
प्रमेयाणां स्फूर्तिर्हयवदनदास्यादुदयता–
मसौ वीणापाणी रचयतु च वाणीमविकलाम्।।

८.

कलात्मा कारूणामुरसि[२], विपुलात्मा मतिमतां,
सतां सौजन्यात्मा, समितिषु धृतात्मा धृतिमताम्।
चले चैतन्यात्मा, प्रचितिरचले[३], विश्ववरदा
सदा सर्वात्माऽसौ जगति जयतात्सा भगवती।।

९.

घनेऽस्मिन् संसारे भ्रमिसरणिसारेऽनवरतं
परिभ्राम्यन् दीनो ह्ययमपथलीनो मृगयते।
उदञ्चत्कारुण्या त्वमपि मदपुण्यात्त्यजसि चे–
दये मातर्नातः परमनुचितं किञ्चिदुदयेत्।।

---

१. अत्यन्तपटूनि उक्तानि येषु तैः।
२. शिल्पिनाम्।
३. अचरे 'प्रचय' रूपा।

**१०.**

सुधाम्भोधेर्मध्ये मणिघटधरैर्दिग्गजकरैः
सुखस्वच्छैस्तोयैर्विलसदभिषेकोत्सवसुखा।
दयास्निग्धालोकैः कृतभयविमोकैर्विभवदा
सदा सेयं पद्मा सरसिरुहसद्मा सुखयतात्।।

**११.**

अये पद्मे मातः किमपि करुणातः स्पृशसि चे-
दिमं दीनं दृप्यद्द्रविणकणलीनं जडतया।
ध्रुवं सत्यं जाने विभवपरिमाणे सह मया
तदा स्वर्गस्थानामपि जननि का नाम तुलना।।

**१२.**

यदुद्गीर्णं किञ्चिद्विचयविमुखाल्लेखनिमुखा[१]-
त्तदेव प्रोद्ग्रथ्नन् जगति कविगर्वं वहति यः।
स एव न्यक्कर्तुं पटुमपि कविं चेत्प्रघटते
विलोके लोकेऽस्मिन् ननु विलुलिताऽलीकलहरी।।

**१३.**

न सूक्तीनां सारो न च किल विचारो जनरुचे-
र्न रीतिः साऽजय्या न पटुपदशय्यापि रुचिरा।
गुणालङ्काराणां विधृतिरकलङ्का न कुहचित्
तथाप्यस्मिन् लोके कविरिति विलोके बत मदम्।।

**१४.**

निरुन्धन्नाम्नायं सृजनसमुदायं परिहरन्
पदस्थानां[२] पुंसां वचननिचयो वल्गति बुधान्।
परं स्पष्टं भवति यदयं पञ्जरजुषां
समक्षे सिंहानां शिव शिव शिवानां कलकलः।।

---

१. अन्वेषणशून्यात् लेखनिमुखात् यदुद्वान्तं तदेव ग्रथ्नन् कविगर्वं वहतीति योजना।

२. पदे राजकीयाधिकारे स्थितानां गर्वापमानवचः परवशान् बुधान् यत् तिरस्करोति तदिदं पञ्जरस्थानां सिंहानामग्रे शिवानां कलकल इत्याशयः।

**१५.**

यदुच्छिष्टं भुक्त्वा मनसि महदिष्टं सुखमगु-
र्यदीयच्छायायामनिशमिह या मोदमगमन्।
मृगाधीशे तस्मिन्परवशमनीशेऽद्य जरसा
समिन्धे[१] दृप्तानां शिव शिव शिवानां कलकलः।।

**१६.**

द्विजानां कर्तव्यादथ विभवभव्यादपि[२] गुणाद्
गुणज्ञो गैर्वाणीमिह पठति वाणीं द्विजजनः।
धनाप्तेस्त्वाशातः श्रयति नृपभाषामिति बला-
दियं हौणी[३] गौणी मुखमिव तु मुख्या ह्यमरवाक्।।

**१७.**

अहं सर्वश्रेष्ठो वपुषि च गरिष्ठो द्विजकुले
सघूत्कारं सर्वानिति लघयति प्रेक्ष्य पतगान्।
प्रतिष्ठाऽर्हे तुङ्गे तरुशिरसि तिष्ठासति[४] च तत्
प्रशस्योऽयं गृध्रः प्रथयति निजस्योच्छ्र्यरुचिम्।।

**१८.**

जलान्तःसुप्तानामहह महिषाणां शिरसि यत्
खलः खेलामत्तोऽभ्रमदिति[५] महत्तोषणकरम्।
शयानं विश्रम्भाद्धरिमुपरतं भावयति चे-
त्कपिः कीलोत्पाटी विकटपरिपाटीमुपगतः।।

---

१. उज्जृम्भते, लटि तङ्।

२. स्वाभाविकात् माधुर्यादिवैभवगुणादित्यर्थः।

३. इंग्लिशभाषा।

४. स्थातुमिच्छति।

५. क्रीडामत्तो यन्महिषाणां शिरसि अभ्रमत्, एतदेव सन्तोषावहम्। किन्तु शयानं हरिमुपरतं सम्भावयति चेत्।

१९.

नितान्तं गूढानां निगमवचनानामनुगमं
न मन्दोऽहं जाने बहुविधविधानेषु धृतधीः।
चतुर्दिक् चिन्ताभिर्व्यपगतसुखं यत्नविमुखं
मनो मे गोविन्दे सकलसुखकन्देऽभिरमताम्।।

२०.

त्वदाधारादाप्ता किमपि कविता, तत्परिचया-
दवाचां च प्राचां वचनरचना चाऽप्यनुकृता।
अये मे वाग्ब्रह्मन्निदमनुनये त्वन्तसमये
दयालुर्गोविन्दो धृतदृगरविन्दो मयि भवेत्।।

***

# भट्टश्रीमथुरानाथशास्त्रिणां कृतयः

| | | | |
|---|---|---|---|
| १ | **साहित्यवैभवम्** | – | मञ्जुनाथग्रन्थावल्याः प्रथमभागे द्वितीयखण्डे प्रकाशितम् (प्रथमं १९३० वर्षे निर्णयसागरात् प्रकाशितमभूत्) |
| २ | **जयपुरवैभवम्** | – | मञ्जुनाथग्रन्थावल्याः प्रथमभागे प्रथमखण्डे प्रकाशितम् (प्रथमं १९४७ वर्षे मञ्जुनिकुञ्जात् प्रकाशितम्) |
| ३ | **गोविन्दवैभवम्** | – | मञ्जुनाथग्रन्थावल्याः प्रथमभागे प्रथमखण्डे प्रकाशितम् (पूर्वं गीताप्रेसतः १९५९ वर्षे प्रकाशितम्) |
| ४ | **संस्कृतसुबोधिनी** | – | पूर्वप्रकाशिता |
| ५ | **आदर्शरमणी** | – | मञ्जुनाथगद्यगौरवे सङ्कलिता (मञ्जुनाथग्रन्थावल्याः द्वितीयभागे प्रथमखण्डे प्रकाशिता) |
| ६ | **गीतिवीथी** | – | जयपुरात् लेखकेन १९३० वर्षे प्रकाशिता |
| ७ | **गाथारत्नसमुच्चयः** | – | जयपुरात् प्रकाशितः |
| ८ | **संस्कृतगाथासप्तशती** | – | मञ्जुनाथग्रन्थावल्याः प्रथमभागे तृतीयखण्डे प्रकाशिता |
| ९ | **गीर्वाणगिरागौरवम्** | – | केन्द्रीयसंस्कृतविद्यापीठम्, जयपुरम्, १९८९ (मञ्जुनाथग्रन्थावल्यां प्रकाशितम्) |
| १० | **प्रबन्धपारिजातः** | – | केन्द्रीयसंस्कृतविद्यापीठम्, जयपुरम्, १९८८ (मञ्जुनाथग्रन्थावल्यां प्रकाशितम्) |
| ११ | **शिलालेखललन्तिका** | – | निर्णयसागरात् प्रकाशिता १९४१ |
| १२ | **सुलभसंस्कृतम्** | – | जयपुरात् १९७० वर्षे प्रकाशितम् |
| १३ | **शरणागतिरहस्यम्** | – | गीताप्रेस, गोरखपुरम् |
| १४ | **ब्रज कविता वीथी** | – | जयपुरात् १९४७ वर्षे प्रकाशिता |
| १५ | **चतुर्थी स्तव** | – | जयपुरात् प्रकाशितम् |

| | | | |
|---|---|---|---|
| १६ | **चन्द्रदत्तपरिचय** | – | जयपुरात् प्रकाशितम् |
| १७ | **भारतवैभवम्** | – | प्रथमतया मञ्जुनाथग्रन्थावल्यां प्रकाशितम् |

**सम्पादिता ग्रन्थाः –**

| | | | |
|---|---|---|---|
| १ | **कादम्बरी** | – | निर्णयसागरतः प्रकाशिता |
| २ | **रसगङ्गाधरः** | – | सरलामर्मप्रकाशसनाथितः, निर्णयसागरात् प्रकाशितः |
| ३ | **गीतगोविन्दम्** | – | मुम्बई निर्णय सागरात् १९३७ वर्षे प्रकाशितम् |
| ४ | **ईश्वरविलासमहाकाव्यम्** | – | १९५८ वर्षे प्रकाशितम्। २००९ वर्षे रमाकान्तपाण्डेयेन सहिन्दीभाषानुवादं जयपुरात् प्रकाशितम्। |
| ५ | **पद्यमुक्तावली** | – | प्राच्यविद्याप्रतिष्ठानम्, जोधपुरम् १९५९ |
| ६ | **वृत्तमुक्तावली** | – | प्राच्यविद्याप्रतिष्ठानम्, जोधपुरम्, १९६२ |

**अप्रकाशितग्रन्थाः**

१ धातुप्रयोगपारिजातः

२ आर्याणाम् आदिभाषा

३ काव्यकुञ्जम्

४ रससिद्धान्तः

**पत्रकारता**

१ संस्कृतरत्नाकरः १९०४ तः १९४९ यावत्।

२ भारती– अत्र नैके विशेषाङ्काः प्रकाशिताः। १९५२ तः १९६४ यावत्

**भट्टमहोदयानां साहित्यमाश्रित्य प्रणीता ग्रन्थाः –**

| | | | |
|---|---|---|---|
| १. | **संस्कृत के युग पुरुष मञ्जुनाथ**– | | ले. देवर्षि कलानाथशास्त्री, प्रका. मञ्जुनाथस्मृतिसंस्थान, जयपुरम्, २००४ |
| २. | **आधुनिक संस्कृत साहित्य एवं भट्ट मथुरानाथशास्त्री** | | ले. डॉ. सुनीता शर्मा, प्रका. रचना प्रकाशन, जयपुर, २००८ |
| ३. | **मञ्जुनाथवाग्वैभवम्** | – | (निबन्धसङ्कलन) सम्पा. डॉ. गङ्गाधरभट्ट, प्रकाशकः राजस्थान संस्कृत अकादमी, जयपुरम् (पृ.क–झ, १–२१६) १९९० |
| ४. | **श्री मथुरानाथशास्त्रिणः** | – | (निबन्ध संकलन) संपा. डॉ. प्रभाकरशास्त्री |

**कृतित्वसमीक्षणम्** - प्रका. राजस्थान-संस्कृत अकादमी जयपुरम् सन् १९९५

५. **मञ्जुनाथगद्यगौरवम्** - सम्पादकः डॉ. रमाकान्तपाण्डेयः प्रका. प्रतिभाप्रकाशनम्, दिल्ली, २००४

६. **मञ्जुनाथवाग्वैजयन्ती** - सम्पा. देवर्षि कलानाथशास्त्री, ज.रा.रा.सं.वि.वि, जयपुरम्, २००७

७. **भट्टस्मृतिविशेषाङ्कः** - भारती संस्कृतमासिक वर्ष १४ अङ्क सम्पा. श्रीहरिशास्त्री, भारती भवन, जयपुर सितम्बर १९६४

८. **भट्टजन्मशताब्दीविशेषाङ्कः** - स्वरमङ्गला संस्कृतत्रैमासिकः सम्पा. डॉ. गङ्गाधर भट्ट प्रका. राजस्थान संस्कृत अकादमी, जयपुरम्। सन् १९९०

**शोधप्रबन्धः-**

१. **भट्टश्रीमथुरानाथशास्त्री व्यक्तित्व एवं कृतित्व** -

(पी.एच.डी के लिए शोध प्रबन्ध) शोधकर्त्री डॉ. उषा भार्गव, राजस्थान विश्वविद्यालय, शोध निर्देशक डॉ. प्रभाकर शर्मा शास्त्री, १९७५

२. **भट्टमथुरानाथशास्त्रिकृत समस्या सन्दोह**-

एम.फिल. के लिए शोधप्रबन्ध, डॉ. दीपा पन्त, शोध निदेशकः डॉ. गङ्गाधरभट्ट, राजस्थान विश्वविद्यालय, १९८०-८१

३. **संस्कृतमुक्तकपरम्परा को भट्टजी का योगदान** -

पी.एच.डी. के लिए डॉ. कमलेश कौशिक जोशी, शोधनिर्देशक डॉ. गङ्गाधर भट्ट राजस्थान विश्वविद्यालय सन् १९८१

४. **संस्कृतनिबन्ध साहित्य में भट्टजी का अवदान** -

पी.एच.डी के लिए डॉ. सुनीता शर्मा, शोधनिर्देशक डॉ. शिवसागर त्रिपाठी, राजस्थान विश्वविद्यालय, जयपुरम् १९९८

५. **गौविन्दवैभवम्- समीक्षात्मक विवरण** -

डॉ. कमलेश जोशी (कौशिक) एम.फिल के लिए, शोधनिर्देशकः डॉ. गङ्गाधर भट्ट, १९७८

# भट्टमहोदयानां कथासाहित्यम्

| क्र. | कथा | पत्रिका |
|---|---|---|
| | **( क ) ऐतिहासिककथाः** | |
| १. | अलक्ष्येन्द्रश्च दस्युश्च | भारती, ८.२ |
| २. | वीरबालकः | संस्कृतरत्नाकरः, ५.७–८ |
| ३. | वीरपरीक्षा | संस्कृतरत्नाकरः, ५.८.८ |
| ४. | धन्योऽसि धर्मवीर | संस्कृतरत्नाकरः, ५.८.१२ |
| ५. | अत्याचारिणः परिणामः | संस्कृतरत्नाकरः, ५.९.१ |
| ६. | सिंहदुर्गे सिंहवियोगः | संस्कृतरत्नाकरः, ५.९.३ |
| ७. | पुरुराजस्य पौरुषम् | संस्कृतरत्नाकरः, ५.९.५ |
| ८. | अङ्गुलिमालः | संस्कृतरत्नाकरः, ५.१०.१ |
| ९. | पृथ्वीराजपौरुषम् | संस्कृतरत्नाकरः, ५.१०.२ |
| १०. | आल्हा च ऊदलश्च | संस्कृतरत्नाकरः, ५.१०.४ |
| ११. | मातृसेवायां चिरममरे द्वे बलिदाने | संस्कृतरत्नाकरः, ५.१०.६ |
| १२. | सामन्तसङ्ग्रामः | संस्कृतरत्नाकरः, ५.१०.८ |
| १३. | भारतध्वजः बालवीरः | संस्कृतरत्नाकरः, ५.१०.१०–११ |
| १४. | अनुतापः | संस्कृतरत्नाकरः, ५.११.२–३ |
| १५. | चन्द्रहासः | संस्कृतरत्नाकरः, ५.११.४ |
| १६. | कृत्रिमबूँदी | संस्कृतरत्नाकरः, ५.११.६ |
| १७. | वीरवाणी | संस्कृतरत्नाकरः, ५.१२.१२ |
| १८. | प्राणानां भाषा | संस्कृतरत्नाकरः, ५.१३.५ |
| १९. | विजयिघण्टा | संस्कृतरत्नाकरः, ५.१२.१०–११ |
| २०. | कर्णश्चाऽर्जुनश्च | संस्कृतरत्नाकरः, ५.१३.६ |
| २१. | सत्यो बालचरः | संस्कृतरत्नाकरः, ५.१३.९ |

| | | |
|---|---|---|
| २२. | धन्यो भारतीयवीरः | संस्कृतरत्नाकरः, ५.१३.१२ |
| २३. | पुरुषपरीक्षा | |
| २४. | शस्त्रपाणिः क्षत्रियाणी | |
| २५. | भाग्यरेखा | |
| २६. | अमूल्यं वस्तु | |
| २७. | बालवीरः | |

## ( ख ) सामाजिककथाः

| | | |
|---|---|---|
| २८. | असमसाहसम् | संस्कृतरत्नाकरः, ५.३-४-७ |
| २९. | पश्यतोहरः | संस्कृतरत्नाकरः, ५.-१-२-५ |
| ३०. | सरला | संस्कृतरत्नाकरः, ५.७.११ |
| ३१. | एकवारं दर्शनम् | संस्कृतरत्नाकरः, ५.१.४-५ |
| ३२. | दयनीया | संस्कृतरत्नाकरः, ५.२.४ |
| ३३. | अनादृता | संस्कृतरत्नाकरः, ५.३.९ |
| ३४. | प्रत्युत्पन्नमतिर्हालिकः | संस्कृतरत्नाकरः, ५.११.११ |
| ३५. | अद्भुतचिकित्सा (अप्राप्ता) | संस्कृतरत्नाकरः, |
| ३६. | प्रतिशोधः | भारती ३.१० |
| ३७. | क्षत्रियशोणितम् | |
| ३८. | चतुरवञ्चकः | |
| ३९. | ममाध्यापनम् | |
| ४०. | प्रतिशोधः | |
| ४१. | हृदयव्रणः | |
| ४२. | स्वावलम्बनम् | |
| ४३. | स्वामिभक्तः | |
| ४४. | दीक्षा | |

## ( ग ) प्रणयकथाः

| | | |
|---|---|---|
| ४५. | प्रेम्णो विजयः | संस्कृतरत्नाकरः, ५-९-१० |
| ४६. | परीक्षा | संस्कृतरत्नाकरः, ५.१०.७ |

| | | |
|---|---|---|
| ४७. | निराशप्रणयः | संस्कृतरत्नाकरः, ५.७-३-७ |
| ४८. | प्रेम्णः प्रतिदानम् | संस्कृतरत्नाकरः, ५.३.४ |
| ४९. | जले ज्वाला | |

## ( घ ) प्रतीकात्मककथाः

| | | |
|---|---|---|
| ५०. | बालकभृत्यः | संस्कृतरत्नाकरः, ५.२.७-८ |
| ५१. | न कुहचिद् गुणतत्त्ववेदी | संस्कृतरत्नाकरः, ५.९.९ |

## ( ङ ) हास्यकथाः

| | | |
|---|---|---|
| ५२. | मिस्टरस्य गीताज्ञानम् | संस्कृतरत्नाकरः, ५.७.१२ |
| ५३. | चपण्डुकः | संस्कृतरत्नाकरः, ५.८-५-६ |
| ५४. | शिष्या | संस्कृतरत्नाकरः, ५.८.७ |
| ५५. | फाल्गुनगोष्ठी | संस्कृतरत्नाकरः, ५.९.७ |

## ( च ) मनोवैज्ञानिककथाः

| | | |
|---|---|---|
| ५६. | विषमा समस्या | संस्कृतरत्नाकरः, ५.११.८ |

## ( छ ) विविधविषयिण्यः कथाः

| | | |
|---|---|---|
| ५७. | करुणा कपोती च युवती च | संस्कृतरत्नाकरः, ५.१३.८ |
| ५८. | मृगयुः | संस्कृतरत्नाकरः, ५.८.२ |
| ५९. | दानी दीनेशः | संस्कृतरत्नाकरः, ५. |
| ६०. | वीरो बालचरः | संस्कृतरत्नाकरः, ५. |
| ६१. | धर्म-धनयोर्युद्धं धर्मस्य विजयश्च | संस्कृतरत्नाकरः, ५. |
| ६२. | परीक्षा | संस्कृतरत्नाकरः, ५. |
| ६३. | न्यायाधिकारी | संस्कृतरत्नाकरः, ५. |
| ६४. | द्वे स्पर्धे | संस्कृतरत्नाकरः, ५. |
| ६५. | जरीयान् ज्यौतिषी | संस्कृतरत्नाकरः ११ १२ |
| ६६. | जीविते ममता | |

## मञ्जुनाथगद्यगौरवे प्रकाशिता रचनाः

उपन्याससाहित्यम्

१. आदर्शरमणी

२. मोगलसाम्राज्यसूत्रधारो महाराजो मानसिंहः

३. भक्तिभावनो भगवान्

## कथासाहित्यम्

१. दयनीया

२. चतुरवञ्चकः

३. प्रेम्णः प्रतिदानम्

४. अनादृता

५. ममाध्यापनम्

६. जले ज्वाला

७. भाग्यरेखा

८. क्षत्रियशोणितम्

९. शस्त्रपाणिः क्षत्रियाणी

## शोधनिबन्धाः

१. काव्यलक्षणं तद्विषये विभिन्नमतानि च

२. रसस्वरूपं विभिन्ना रससिद्धान्ताश्च

३. कश्मीरकमहाकविर्विह्लणस्तस्य काव्यं च

## रेडियो नाटकम्

१. मञ्जुला

***

# भट्टमहोदयानां निबन्धसाहित्यम्

**वर्णनात्मकनिबन्धाः –**

| क्र. | शीर्षकम् | पत्रिका | वर्षम् | अङ्कः |
|---|---|---|---|---|
| १. | अहं मोहमय्याम् | सं.रत्नाकरः प्रा. | ५ | १,२ |
| २. | चीन–देशे धर्म–चर्चा | सं.रत्नाकरः प्रा. | ६ | ५,६ |
| ३. | कार्नेगी–कारू–विद्यालयः | सं.रत्नाकरः प्रा. | ७ | २ |
| ४. | संस्कृत–सेवा–कुञ्जम् | सं. रत्नाकरः प्रा. | ८ | ९,११,१२ |
| ५. | स्वतन्त्रताया मङ्गलप्रभातम् | सं. रत्नाकरः प्रा. | १२ | २ |
| ६. | भारतस्य राष्ट्रीयपताका | सं. रत्नाकरः प्रा. | १२ | २ |
| ७. | व्रज–विहारिणा विहारिणो द्वन्द्वम् | सं. रत्नाकरः प्रा. | १३ | ११ |
| ८. | सत्यम् | भारती | ३ | २ |
| ९. | परोपकारः | भारती | ३ | ५ |
| १०. | कालिकातातः प्राचीनसाहित्यप्रकाशनम् | भारती | ८ | ८ |
| ११. | हिमालयाञ्चले मणिकूट–पवर्तः | भारती | ९ | ८ |
| १२. | भारतमिदम् असीम–मूल्येनाऽपि निजसीम्नो रक्षां कुर्यात् | भारती | ९ | ९ |
| १३. | सोवियतसंघे संस्कृतस्याध्ययनम् | भारती | १० | ६ |
| १४. | राजधान्यां संस्कृततोन्नतेः प्रयत्नः | भारती | १० | १० |
| १५. | सोमनाथे यवनाक्रमणम् | सं. रत्नाकरः प्रा. | ९ | १० |
| १६. | अमरकण्टकम् | सं. रत्नाकरः प्रा. | १२ | ७ |
| १७. | स्वागतं महाराजस्थानस्य | सं. रत्नाकरः प्रा. | १३ | १० |
| १८. | मरुस्थल–निरोधस्य योजना | भारती | ३ | ८ |
| १९. | भगवतो बुद्धस्याऽवशेषोपरि लिच्छविनिर्मितः स्तूपः | सं. रत्नाकरः प्रा. | ८ | ८ |

**विवरणात्मकनिबन्धाः -**

| | | | | |
|---|---|---|---|---|
| १. | प्रभातवायुः | सं.रत्नाकरः प्रा. | ६ | ५,६ |
| २. | भारतपर्यटनम् | सं.रत्नाकरः प्रा. | ७ | ६,८,११.१ |
| ३. | वर्तमाने युरोपीय-महायुद्धे भारतीयाः | सं.रत्नाकरः प्रा. | ९ | ८,९ |
| ४. | कांकरोली-यात्रा | सं.रत्नाकरः प्रा. | ९ | ७ |
| ५. | विक्रमार्कस्य द्विसहस्राब्दी | सं.रत्नाकरः प्रा. | १० | ३ |
| ६. | महायुद्धस्य जगति जाज्वल्यमानः प्रभावः | सं.रत्नाकरः प्रा. | १२ | २ |
| ७. | प्राचीनाऽऽर्याणां वस्त्राणि | भारती | १२ | ९ |
| ८. | प्राचीनभारते पोत-निर्माणकला | भारती | ३ | ८ |
| ९. | आर्याणां होलिकामहोत्सवः | भारती | ५ | ५ |
| १०. | हिमालयाञ्चले बद्रीनाथयात्रा | भारती | ६ | १२ |
| ११. | आर्याणाम् उत्सवसमाजश्च दीपावली च | भारती | ७ | १ |
| १२. | होलिकामहोत्सवः | सं.रत्नाकरः प्रा. | १२ | ९ |

**विचारात्मकनिबन्धाः -**

| | | | | |
|---|---|---|---|---|
| १. | दीपावली | सं.रत्नाकरः प्रा. | ७ | ८ |
| २. | हिन्दुविश्वविद्यालयः | सं.रत्नाकरः प्रा. | ७ | ८,९ |
| ३. | एशियाप्रदेशे अदृष्टवादः | सं.रत्नाकरः प्रा. | ७ | ९,१०,११ |
| ४. | भारतीयानां राजभक्तिः | सं.रत्नाकरः प्रा. | ७ | ११ |
| ५. | चलच्चित्रपटे समुद्रगर्भस्य | सं.रत्नाकरः प्रा. | १ | ११ |
| | रोमाञ्चकारीणि दृश्यानि | | ३ | १२ |
| ६. | वर्तमानयुगस्य परीक्षाप्रणाली | सं.रत्नाकरः प्रा. | २ | १,२,३ |
| | च संस्कृतशिक्षा च | | | |
| ७. | दीर्घजीवनार्थमायोजनानि | सं.रत्नाकरः प्रा. | ८ | ४ |
| ८. | निबन्धलेखस्य विराट् प्रवाहः | सं.रत्नाकरः प्रा. | ३ | २,३,४,५ |
| ९. | संस्कृतपण्डितान् क्व निनीषन्ति | सं.रत्नाकरः प्रा. | ९ | २ |
| | शिक्षाधिकारिणः ? | | | |
| १०. | प्रिये मधुरवाणि! | सं.रत्नाकरः प्रा. | ९ | ३ |
| ११. | भारते संस्कृतभारती राष्ट्रभाषा प्रश्नश्च | सं.रत्नाकरः प्रा. | ९ | ४ |

| | | | | |
|---|---|---|---|---|
| १२. | हंसवाहना सरस्वती मयूरवाहना कथं जाता (शोधलेखः) | सं.रत्नाकरः प्रा. | १० | ४ |
| १३. | पशुपक्षिषु मनुष्यस्य सभ्यता | सं.रत्नाकरः प्रा. | १० | ५ |
| १४. | संस्कृतपण्डिताः पश्यन्तु | सं.रत्नाकरः प्रा. | १० | ६ |
| १५. | सम्राडवरङ्गजीवस्य निजपुत्रं प्रति पत्रम् | सं.रत्नाकरः प्रा. | १० | १०,११ |
| १६. | संस्कृतं च तच्छिक्षा च | सं.रत्नाकरः प्रा. | १० | १०,११ |
| १७. | संस्कृतभाषा च प्रारम्भिकी शिक्षा च | सं.रत्नाकरः प्रा. | ११ | ७ |
| १८. | संस्कृत-शिक्षा-परिष्कारः | सं.रत्नाकरः प्रा. | ११ | ७ |
| १९. | साहित्यस्य सत्ता मानवस्य महत्ता | सं.रत्नाकरः प्रा. | १२ | ८ |
| २०. | संस्कृतभाषा च तदुपजीविनश्च | सं.रत्नाकरः प्रा. | १३ | १, २ |
| २१. | भारतस्य का स्यात् संस्कृतिः ? | सं.रत्नाकरः प्रा. | १३ | २ |
| २२. | संस्कृत-पण्डिताः | सं.रत्नाकरः प्रा. | १३ | ३,४ |
| २३. | संस्कृतस्य सङ्कटम्, सेवकानां साम्प्रतिकं कर्तव्यम् | सं.रत्नाकरः प्रा. | १७ | २,३ |
| २४. | वर्तमान-युगस्यापेक्षा संस्कृतभाषा च | सं.रत्नाकरः प्रा. | १७ | ६,७ |
| २५. | संस्कृत-भाषा-विषये संस्कृतज्ञानां कर्तव्यम् | भारती | ५ | ४,५ |
| २६. | ९३ कोटिमुद्राणां करभारो भारतीयानामुपरि | भारती | ७ | ९ |
| २७. | विद्यायाः महिमा | भारती | ८ | १ |
| २८. | नवसाहित्य-निकषः | भारती | ८ | ४,५ |
| २९. | बालशिक्षां प्रति पितुः कर्तव्यम् | भारती | ८ | ७ |
| ३०. | आंग्लसंस्कृतिरपसार्यताम् | भारती | ८ | ८ |
| ३१. | संस्कृतं राजभाषाऽवश्यं भवेत् | भारती | ८ | ८ |
| ३२. | काश्मीर-विषये पाकिस्तानस्य दृष्टिकोणः | भारती | ८ | ८ |
| ३३. | समस्त-संसारः संस्कृतं प्रत्युन्मुखः किन्तु भारतीयाः ? | भारती | ९ | ६ |
| ३४. | चरित्र-बलं विना देशस्य सम्पूर्णा अपि योजना निष्फलाः | भारती | १९ | १ |
| ३५. | श्रीहनुमतः आदर्शचरितम् | भारती | १ | १ |
| ३६. | अन्येषामुपकारको भवेत् | सं.रत्नाकरः प्रा. | ९ | ११ |

**समीक्षात्मकनिबन्धाः -**

| | | | | |
|---|---|---|---|---|
| १. | अपि जापानः स्यात् अस्माकम् आदर्शः | सं.रत्नाकरः प्रा. | ५ | ९,१० |
| २. | जर्मन-शिक्षा-नीतिः | सं.रत्नाकरः प्रा. | ६ | १,२ |
| ३. | सीता | सं.रत्नाकरः प्रा. | ६ | ९,१० |
| ४. | फ्रांस-देश-वासिनां दृष्टौ भारतम् | सं.रत्नाकरः प्रा. | ७ | २ |
| ५. | गाथासप्तशती अमरुकश्च | सं.रत्नाकरः प्रा. | १ | ४ |
| ६. | प्राकृत-भाषा कैः कैः कारणैः संस्कृततो मधुरा ? | सं.रत्नाकरः प्रा. | १ | ५ |
| ७. | गाथा-सप्तशती बिहारी-सतसई च | सं.रत्नाकरः प्रा. | १ | ६ |
| ८. | प्राप्त-पत्रस्य प्रत्युत्तरम् | सं.रत्नाकरः प्रा. | २ | ९ |
| ९. | समादधतु सज्जनाः | सं.रत्नाकरः प्रा. | ११ | ४,६ |
| १०. | संस्कृतानुरागिणः शृण्वन्तु | सं.रत्नाकरः प्रा. | ११ | ५ |
| ११. | अपि सत्येयं कोकिलानां परपुष्टता ? | सं.रत्नाकरः प्रा. | ९ | ४ |
| १२. | अपि नासाभूषणमिदमासां यवन-जातीनां सहवासादनुकृतम् | सं.रत्नाकरः प्रा. | ९ | ६,७,८,९ |
| १३. | सांख्य-शास्त्रस्य चिर-विस्मृतो ग्रन्थकारः | सं.रत्नाकरः प्रा. | १२ | ३ |
| १४. | रेऊ महोदयस्य आर्य-विधानम् | सं.रत्नाकरः प्रा. | १२ | १०,११ |
| १५. | आगरानगरस्यैतिहासिकता | सं.रत्नाकरः प्रा. | १२ | १०,११,१२ |
| १६. | भारतीयं भोजन-शस्त्रं शष्कुली (जलेबी) च | सं.रत्नाकरः प्रा. | १२ | १०,११,१२ |
| १७. | पी.के. गोडे महोदयस्य गवेषणाकार्यम् | सं.रत्नाकरः प्रा. | १२ | १०,११ |
| १८. | अनुपलब्धं सङ्गीतसूत्रम् | सं.रत्नाकरः प्रा. | ११ | ८ |
| १९. | गन्धर्वसेनस्य स्वर्गयात्रा | सं.रत्नाकरः प्रा. | १२ | १४४,९ |
| २०. | प्राचीना ऋषयश्चौद्भिद्तत्त्वं च | अमरभारती | २ | १,४ |
| २१. | अद्भुतचिकित्सा | अमरभारती | १ | १०,११ |
| २२. | मुद्राराक्षस्य चाणक्यः | अमरभारती | १ | १,२ |
| २३. | अमरकोषे टीकाकाराणां कृपा | अमरभारती | १ | ६ |
| २४. | साम्प्रतिकशिक्षाया धनभिक्षा | अमरभारती | १ | ७ |

| | | | | |
|---|---|---|---|---|
| २५. | नवीन–शिक्षितानां दृष्टौ प्राचीनमस्मत्साहित्यम् | अमरभारती | २ | ७ |
| २६. | अपि नाम सेयमव्यावहारिकी ? | सारस्वती सुषमा | ७ | २ |
| २७. | संस्कृतभाषायाः महत्त्वम् | सर्वोदयः | ८ | १ |

**ललित- निबन्धाः -**

| | | | | |
|---|---|---|---|---|
| १. | श्रद्धायाः पराकाष्ठा | सं.रत्नाकरः प्रा. | ५ | ११,१२ |
| २. | वासन्तिकः प्रमोदः | सं.रत्नाकरः प्रा. | ९ | ८,९ |
| ३. | किन्तोः कुटिलता | सं.रत्नाकरः | १ | ७,८,९,१० |
| ४. | संस्कृतज्ञानां महाशयता | सं.रत्नाकरः | १९ | १०,११ |
| ५. | अङ्ककौतुकम् | सं.रत्नाकरः प्रा. | ६ | १,२ |
| ६. | कवि–कौतूहलम् | सं.रत्नाकरः प्रा. | ६ | ३,४ |
| ७. | अपि अस्वार्थिनो ब्राह्मणाः शूद्रेषु ? | सं.रत्नाकरः प्रा. | ६ | ७,८ |
| ८. | संस्कृतस्य नवीनं संस्कृतम् | सं.रत्नाकरः | ३ | ११ |
| ९. | संस्कृतभाषा च तत्कोषश्च | सं.रत्नाकरः | ९ | ५ |
| १०. | विद्वद्भ्यो निवेदनम् | सं.रत्नाकरः | ९ | ६ |
| ११. | महर्घतापिशाची | सं.रत्नाकरः | ९ | ६ |
| १२. | कुतो वा न प्रसरेतां चरणौ ? | सं.रत्नाकरः | १० | ३ |
| १३. | दन्तकथा | सं.रत्नाकरः | १० | ९ |

एतेषु प्रमुखकथा निबन्धाश्च मञ्जुनाथग्रन्थावल्यां प्रकाशिताः सन्ति।

***